नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि

(सटीकं)

भागः – १

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भागः-९ जीवाजीवभिगमउपाङ्गसूत्रम्

-: संशोधकः सम्पादकश्चः :-
मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाजीवाभिगमउपाङ्गसूत्रस्य विषयानुक्रम

मूलाङ्कः	विषयः	पृष्ठाङ्कः
१-५१	**प्रथमा- द्विविधा प्रतिपत्तिः**	५
	जीवाभिगमस्य द्विविधे भेदे, अजीवाभिगमस्य द्विविधेभेदे, पृथिव्यादि जीवानाम् वर्णनः, दिन्द्रियादी जीवानाम् वर्णनः	
-७३	**द्वितीया- त्रिविधा प्रतिपत्तिः**	६१
	संसारीजीवानाम् त्रैविध्यम्, स्त्री-पुरुषः-नपुंसकः,	
❑	तृतीया- चतुर्विधा प्रतिपत्तिः	
-१२९	- **नैरयिकाः** -	१००
	उद्देशकः-१	१००
	नैरयिकस्य नाम्नं एवं गोत्रं, नरकस्य वर्णनम्, नरकावासे गत्यागति, नरकस्य अल्पबहुत्वम्	
	उद्देशकः-२	११५
	नरकस्य नाम्नं-आकारः वेदना, संस्थानं, वर्ण, गंधं, स्पर्शः, पुद्गलः, संहननं, आहारः, लेश्या, ज्ञानं, अज्ञानं, योगः, उपयोगः इत्यादि	
	उद्देशकः-३	१४४
	पुद्गल परिणमन्	
-१३९	- **तिर्यंच योनिकः** -	१४७
	उद्देशकः-१	१४७
	तिर्यंचयोनिक जीवानाम् पञ्चभेदाः	
	उद्देशकः-२	१५५
	संसारस्थित जीवानाम्- षड्विधत्वम्, पृथ्वीनाम्- षड्विधत्वम्, जीवस्य- संस्थित्ति कालः, इत्यादिः	
-१५१	- **मनुष्याधिकारः** -	१६०
	मनुष्यस्य द्वैविध्यम्, एकोरुकद्वीप वर्णनम्, आभासिक-मंगोलिक- वैशालिक आदि द्वीपस्य स्थानादि वर्णनम्	
-१५९	- **देवाधिकारः** -	१७५
	देवानाम् चतुर्विधत्वम्, भवनवासी देवानाम् भवनं, पर्षदा, देवदेवी सङ्ख्या, स्थितिः, व्यन्तराणाम् वर्णनं	
-२०४	- **द्वीपसमुद्रः** -	१९४
	स्थानं, सङ्ख्या, संस्थानं जंबूद्वीपस्य वर्णनम्, विजयदेवस्य अधिकारः, सुधर्मासभा, उपपातसभा इत्यादि, लवणसमुद्रस्य- वर्णनं, जम्बूद्वीपस्यान्तर्गतः गौतम- द्वीप-चन्द्रद्वीप- सूर्यद्वीप इत्यादि अधिकारः, धातकी खण्डाधिकारः,	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलाङ्कः	विषयः	पृष्ठाङ्कः
	कालोद समुद्राधिकारः, पुष्कर वरद्वीपाधिकारः, मानुषोत्तरपर्वताधिकारः, इत्यादि द्वीप-समुद्राप्राधिकारः	
-३०६	**- इन्द्रिय विषयाधिकारः -**	४१०
	पञ्च-इन्द्रियस्य विषयः	
-३२३	**ज्योतिष्कउद्देशकः** देवगति, वैक्रियशक्तिः, चन्द्रसूर्य- परिवारः, ज्योतिष्क देवस्य गतिक्षेत्रः, अन्तरं, नक्षत्रवर्णनम्, संस्थानम्, अग्रमहिषि, अल्पबहुत्व इत्यादि	४१२
-३४१	**- वैमानिक देवाधिकारः -**	४२३
	उद्देशकः-१-२	४२३
	सौधर्मादिकल्पस्य विमानानि, बाहल्यः, संस्थानं, उच्चत्वम्, वर्ण, प्रभा, गन्धं, स्पर्शः, रचना, सौधर्मादि देवानाम् सङ्घयणं, संस्थानं, वर्णादिः, पुद्गलः, आहारः, अवधिज्ञानं, समुद्घातः, वेदना, ऋध्धिः, कामभोगः, गत्यागति, स्थितिः	
-३४५	**चतुर्थी- पञ्चविधाप्रतिपत्तिः**	४४७
	संसारस्थितजीवस्य पञ्चविधत्वम्, तस्यभेदाः, स्थितिः संस्थितिः, अन्तरं, अल्पबहुत्वम् इत्यादिः	
-३६४	**पञ्चमी षड्विधा प्रतिपत्तिः**	४५०
	संसारस्थित जीवस्य षड्विधत्वम्- पृथ्वीकायिक आदि जीवानाम्	

मूलाङ्कः	विषयः	पृष्ठाङ्कः
	स्थितिः, संस्थितिः, अन्तरं, अल्पबहुत्वम्, निगोदवर्णनम्	
-३६५	**षष्ठी- सप्तविधा प्रतिपत्तिः**	४६८
	संसारस्थितजीवस्य सप्तविधत्वम्, तस्य स्थितिः, संस्थितिः, अन्तरं, अल्पबहुत्वम्	
-३६६	**सप्तमी अष्टविधा प्रतिपत्तिः**	४७०
	संसारस्थितजीवस्य अष्टविधत्वम्, तस्य स्थितिः, संस्थितिः, अन्तरं, अल्पबहुत्वम्	
-३६७	**अष्टमी नवविधाप्रतिपत्तिः**	४७३
	संसारस्थितजीवस्य नवविधत्वम्, तस्य स्थितिः, संस्थितिः, अन्तरं, अल्पबहुत्वम्	
-३६८	**नवमी दसविधा प्रतिपत्तिः**	४७४
	संसार स्थितजीवस्य- स्थितिः, संस्थितिः, अन्तरं, अल्पबहुत्वम्	
-३९८	**सर्वजीवाप्रतिपत्तिः**	४७८
	द्विविधः सर्वजीवः-१ त्रिविधः सर्वजीवः-२ चतुर्विधः सर्वजीवः-३ पञ्चविधः सर्वजीवः-४ षड्विधः सर्वजीवः-५ सप्तविधः सर्वजीवः-६ अष्टविधः सर्वजीवः-७ नवविधः सर्वजीवः-८ दशविधः सर्वजी[illegible]	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाजीवाभिगम-उपाङ्गसूत्रम्

चतुर्थउपाङ्गसूत्रम्

''आगमसुत्ताणि'' भागः-९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઇ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पञ्चम गणधर श्री सुधर्मास्वामिने नमः

१४ जीवाजीवाभिगम उपाङ्गसूत्रं

(सटीकं)

तृतीयम् उपाङ्गसूत्रम्

(मूलसूत्रम् + मलयगिरिआचार्य विरचिता वृत्तिः)

॥१॥ प्रणमत पदनखतेजःप्रतिहतनिशेषनम्रजनतिमिरम्।
वीरं परतीर्थयशोद्विरदघटाध्वंसकेसरिणम्॥

॥२॥ प्रणिपत्य गुरून् जीवाजीवाभिगमस्य निवृत्तिमहमनघाम्।
विदधे गुरूपदेशात्प्रबोधमाधातुमल्पधियाम्॥

वृ. इह रागद्वेषाद्यभिभूतेन सांसारिकेण सत्त्वेनाविषह्यशारीरमानसिकदुःखोपनिपातपीडितेन तदपनोदाय हेयोपादेयपदार्थपरिज्ञाने यत्न आस्थेयः, स च विशिष्टविवेकप्रतिपत्तिमन्तरेण न भवति, विशिष्टश्च विवेको न प्राप्ताशेषातिशयकलापाप्तोपदेशमृते, आप्तश्च रागद्वेषमोहादिदोषाणामात्यन्तिकप्रक्षयात्, स चात्यन्तिकः, अक्षयो दोषाणामर्हत एव, अतः प्रारभ्यतेऽर्हद्वचनानुयोगः, तत्राचारदिशास्त्राणामनुयोगः पूर्वसूरिभिर्व्यासादिप्रकारैरनेकधाकृतस्ततो न तदन्वाख्याने समस्ति तथाविधं प्रयाससाफल्यम्, अतो यदस्ति तृतीयाङ्गस्य स्थाननाम्नो रागविषपरममन्त्ररूपं द्वेषानसलिलपूरोपमं तिमिरादित्यभूतं भवाब्धिपरमसेतुर्महाप्रयत्नगम्यं निश्रेयसावाप्तयबन्ध्यशक्तिकं जीवाजीवाभिगमनामकमुपाङ्गं पूर्वटीकाकृताऽतिगम्भीरमल्पाक्षरैर्व्याख्यातम्, अत एव मन्दमेधसामुपकारयाप्रभविष्णु, तस्य तेषामनुग्रहाय सविस्तरमन्वाख्यानमातन्यते।

तत्र जीवाजीवाभिगमाध्ययनारम्भप्रयासोऽयुक्तः, प्रयोजनादिरहितत्वात्, कण्टकशाखामर्दनादिवत्, इत्याशङ्काऽपनोदाय प्रयोजनादिकमादावुपन्यसनीयम्, उक्तं च–

॥१॥ "प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम्।
मङ्गलं चैव शास्त्रादौ वाच्यमिष्टार्थसिद्धये॥" इति।

तत्र प्रयोजनं द्विधा–परमपरं च, पुनरेकैकं द्विविधं–कर्तृगतं श्रोतृगतं च, तत्र द्रव्यास्तिकनयमतपर्यालोचनायामागमस्य नित्यत्वात्कर्तुरभाव एव, तथा चोक्तम्–'नैषा द्वादशाङ्गी कदाचिन्नासीत् न कदाचिन्न भवति न कदाचिन्न भविष्यति, ध्रुवा नित्या शाश्वतीत्यादि, पर्यायास्तिकनयमतपर्यालोचनायां चानित्यत्वादवश्यंभावं तत्सद्भावः, तत्पर्यालोचनायां तु सूत्रार्थोभयरूपत्वादागमस्यार्थापेक्षया नित्यत्वात् सूत्रापेक्षया चानित्यत्वात्कथञ्चित्कर्तृसिद्धि, तत्र सूत्रकर्त्तु परमपवर्गप्राप्ति अपरं सत्वानुग्रहः, तदर्थप्रतिपादकस्यार्हतः किं प्रयोजनमिति चेद्, उच्यते, न किञ्चित्।

कृतकृत्यत्वाद्भगवतः, प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासो निरर्थक इति चेत्, न, तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीर्थकरनामकर्मविपाकोदयप्रभवत्वात्, उक्तं च– "तं च कहं वेइज्जइ ?, अगिलाए धम्मदेसणाएउ" इति।

श्रोतॄणामनन्तरं प्रयोजनं विवक्षिताध्ययनार्थपरिज्ञानं, परं निश्रेयसपदं, विवक्षिताध्ययन-सम्यगर्थावगमतः संयमप्रवृत्त्या सकलकर्मक्षयोपपत्तेः, ततः प्रयोजनवान् अधिकृताध्ययन-प्ररम्भप्रयासः, अभिधेयं जीवाजीवस्वरूपं, तच्चाधिकृताध्ययननाम्नो यथार्थत्वमात्रातप्यवगतं

सम्बन्धश्च द्विधा–उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च, तत्राद्यस्तर्कानुसारिणः प्रति, तद्यथा वचनरूपापन्नं प्रकरणमुपायस्तत्परिज्ञानं चोपेयं, गुरुपर्वक्रमलक्षणः केवलश्रद्धानुसारिणः प्रति, स चैवम्–अर्थतो भगवता वर्द्धमानस्वामिना जीवाजीवाभिगम उक्तः, सूत्रतो द्वादशस्वङ्गेषु गणधरैः, ततोऽपि मन्दमेधसामनुग्रहायातिशायिभिश्चतुर्दशपूर्वधरैस्तृतीयस्मादङ्गादाकृष्य पृथगध्ययनत्वेन व्यवस्थापितः, अमुमेव सम्बन्धमनुविचिन्त्य स्थविरा भगवन्तः प्रज्ञापितवन्त इति प्रतिपादयिष्यति २।

इदं च जीवाजीवाभिगमाख्यमध्ययनं सम्यग्ज्ञानहेतुत्वात् अत एव (च) परम्परया मुक्तिपदप्रापकत्वाच्छ्रेयोभूतम् अतो मा भूदत्र विघ्न इति विघ्नविनायकोपशान्तये शिष्याणां मङ्गलबुद्धिपरिग्रहाय स्वतो मङ्गलभूतेऽप्यस्मिन् मङ्गलमुपन्यस्यते, तच्चादिमध्यावसानभेदात्त्रिधा, तत्रादिमङ्गलम् 'इह खलु जिनमय'मित्यादि, अत्र जिननामोत्कीर्तनं मङ्गलं, मङ्गलं च नामादि-भेदाच्चतुर्धा, तत्रेदं नोआगमतो भावमङ्गलम्, एतच्चाधिकृताध्ययनार्थपार-गमनकारणं, मध्यमङ्गलं द्वीपसमुद्रस्वरूपकथनं, निमित्तशास्त्र हि द्वीपसमुद्रनामग्रहणं परममङ्गलमिति निवेदितं, तथा च द्वीपसमुद्रादिनामग्रहणाधिकारे तत्रोक्तम्– "जो जं पसत्थमत्थं पुच्छइ तस्सऽत्थसंपत्ती" इत्यादि

एतच्चाधिकृताध्ययनार्थस्थिरीकरणहेतुः, अवसानमङ्गलं "दसविहा सव्वजीवा इत्यादिरूपं, सर्वजीवपरिज्ञानहेतुत्वेन माङ्गलिकत्वात्, तच्च शिष्यप्रशिष्यसन्तानाव्यवच्छेदार्थम्, उक्तं च–

॥१॥ "तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स।
पढमं सुत्तत्थाविग्घपारगमणाय निद्दिट्ठं॥
॥२॥ तस्सेव उ थिज्जत्थं मज्झिमयं अंतिमंपि तस्सेव।
अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स॥

अथ कथं सकलमेवेदमध्ययनं स्वतो मङ्गलभूतम् ?, उच्यते, निर्जरार्थत्वात्तपोवत्, निर्जरार्थता च सम्यगज्ञानरूपत्वात्, उक्तं च–

॥१॥ "जं अण्णाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं।
तं नाणी तिहिँ गुत्तो खवेइ ऊसासमेत्तेणं॥"

मङ्गलशब्दव्युत्पत्तिश्चेयम्–उख नख वख मखेत्यादि दण्डकधातुः, मङ्ग्यतेऽधिगम्यते हितमनेनेति मङ्गलम्, अथवा मङ्ग इति धर्मस्याख्या तं लाति–आदत्ते इति मङ्गलं, तथा चास्मिन्नध्ययने मनसि भावतः परिणमति समुपजायते सुविशुद्धसम्यग्दर्शनादिको भावधर्म, उक्तं च–

॥१॥ "मंगिज्जएऽधिगम्मइ जेण हियं तेण मंगलं होइ।
अहवा मंगो धम्मो तं लाति तयं समादत्ते॥" इति।

यदिवा मां गालयति–अपनयति भवादिति मङ्गलं, मा भूद्गलो–विघ्नो गालो वा–नाशः शास्त्रस्यास्मादिति मङ्गलं, पृषोदरादित्वादिष्टरूपनिष्पत्ति। तदेवं प्रयोजनादित्रितयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मङ्गलं,चोपदर्शितम्, अधुनाऽनुयोगः प्रारभ्यते, अथानुयोग इति कः शब्दार्थ ?, उच्यते, सूत्रपाठानन्तरमनु–पश्चात् सूत्रस्यार्थेन सह योगो–घठनाऽनुयोगः, सूत्राध्ययनात्पश्चादर्थकथनमिति भावना, यद्वाऽनुकूलः–अविरोधी सूत्रस्यार्थेन सह योगोऽनुयोगः, तत्रेदमादिसूत्रम्–

प्रथमा प्रतिपत्तिः –"द्विविधा"

मू. (१) *॥ ऐं नमः ॥ इह खलु जिनमयं जिणाणुमयं जिणाणुलोमं जिनप्पणीतं जिनपरूवियं जिनक्खायं जिणाणुचिन्नं जिनपन्नत्तं जिनदेसियं जिनपसत्थं अणुव्वीइए तं सद्दहमाणा तं पत्तियमाणा तं रोएमाणा थेरा भगवंतो जीवाजीवाभिगमनाममज्झयणं पन्नवइंसु*

वृ. 'इह' अस्मिन् प्रवचने खलुशब्दोऽवधारणे इहैव प्रवचने न शेषेषु वाक्यादिप्रवचनेषु, अथवा 'इहे'ति मनुष्यलोके, खलुशब्दो वाक्यालङ्कारे, 'जिनमत'मिति रागादिशत्रून् जयति स्म (इति) जिनः, स च यद्यपि छद्मस्थवीतरागोऽपि भवति तथाऽपि तस्य तीर्थप्रवर्त्तकत्वायोगादुत्पन्नकेवलज्ञानस्तीर्थकृदभिगृहयते, सोऽपि च वर्द्धमानस्वामी, तस्य वर्त्तमानतीर्थाधिपतित्वात्, तस्य जिनस्य–वर्द्धमानस्वामिनो मतम्–अर्थतस्तेनैव प्रणीतत्वादाचारादि दृष्टिवादपर्यन्तं द्वादशाङ्गं गणिपिटकं, कथम्भूतं वर्द्धमानस्वामिजिनमतमित्याह–

'जिनानुमतं' जिनानाम्–अतीतानागतवर्त्तमानानामृषभपद्मनाभसीमन्धरस्वामिप्रभृतीनामनुमतम्–आनुकूल्येन संमतं वस्तुतत्त्वमपवर्गमार्गं च प्रति मनागपि विसंवादाभावादिति जिनानुमतम्, एतेन सर्वेषामपि तीर्थकृतां परस्परमविसंवादिवचनता प्रवेदित, पुनः कथम्भूतमित्याह–'जिनानुलोमं' जिनानाम्–अवध्यादिजिनानामनुलोमम्–अनुकूलमनुगुणमिति भावः, एतद्वशादवध्यादिजिनत्वप्राप्तेः, तथाहि यथोक्तमिदं जिनमतमासेवमानाः साधवोऽवधिमनःपर्यायकेवललाभमासादयन्त्येवेति, तथा 'जिनप्रणीतं' जिनेन–भगवता वर्द्धमानस्वामिना प्रणीतं समस्तार्थसङ्ग्रहात्मकमातृकापदत्रयप्रणयनाज्जिनप्रणीतं।

भगवान् हि वर्द्धमानस्वामी केवलज्ञानावाप्तावादौ बीजबुद्धित्वादिपरमगुणकलितान् गौतमादीन् गणधारिणः प्रत्येतनमातृकापदत्रयमुक्तवान् "उप्पन्ने इ वा विगमे इ वा धुवे इ वा" इति, एतच्च पदत्रयमुपजीव्य गौतमादयो द्वादशाङ्गं विरचितवन्तस्ततो भवत्येतज्जिनमतं जिनप्रणीतमिति, एतेनागमस्य सूत्रतः पौरुषेयत्वमावेदितं, पुरुषव्यापारमन्तरेण वचनानामसंभवात्, न खलु पुरुषव्यापारमन्तरेण नभसि ध्वनन्तः शब्दा उपलभ्यन्त इति, तेन यदवादि परैः–

॥ १ ॥ 'वचनाज्जिनसंबुद्धिस्तत्रैरर्थक्यमन्यथा।
अपौरुषेयमेवेदं, धर्माधर्मनिबन्धनम् ॥' इति।

तदपास्तमवसेयमिति, तत्र मा भूत्कस्याप्येवमाशङ्का–यथेदमविज्ञातार्थमेव तत्वतः साक्षात्सर्वज्ञादपि श्रवणे सर्वज्ञविवक्षायां अत्यक्षत्वेन ग्रहणाभावे विवक्षितशब्दार्थपरिज्ञानायोगात् केवलं म्लेच्छस्येवाऽऽर्योक्तानुभाषणमात्रमिदमिति, तथा चोक्तमपरैः–

॥ १ ॥ "आर्याभिप्रायमज्ञात्वा, म्लेच्छवागयोगतुल्यता।
सर्वज्ञादपि हि श्रोतुस्तदन्यस्यार्थदर्शने ॥"

तत आह–'जिनप्ररूपितं' जिनेन–भगवता वर्द्धमानस्वामिना यथा श्रोतृणामधिगमो भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा सम्यक्प्रणयनक्रियाप्रवर्त्तनेन प्ररूपितं, किमुक्तं भवति ? —यद्यपि नाम श्रोता न भगवद्विवक्षां साक्षादधिगच्छत तथाऽप्यनादिरयं शाब्दो व्यवहारः साक्षाद्विवक्षाग्रहणमन्तरेणापि भवति यथासङ्केतं शब्दार्थावगमो, बालादीनां तथा दर्शनात्, अन्यथा सकलशाब्दव्यवहारोच्छेदप्रसक्तेः, चित्रार्था अपि शब्दा भगवतैव सङ्केतिताः प्रस्तावौचित्यादिना च नियतमर्थं प्रतिपादयन्ति, ततश्चित्रार्थशब्द-श्रवणेऽपि भवति यथाऽवस्थितार्थावगमो, न चान्यथाऽवबुध्यमानांस्तान्न निषेधति, अविप्रता-रत्वात्, न चोपेक्षते, तीर्थप्रवर्त्तनाय प्रवृत्तत्वात् ।

ततो गणभृतां साक्षात् परम्परया शेषसूरीणामपि यथाऽवस्थितार्थावगम इति नेदमविज्ञा-तार्थमिति, अन्ये त्वाहुः—भगवान्न प्रवचनप्रयासमाधत्ते, केवलं तत्पुण्यप्राग्भारवशादेव श्रोतृणां प्रतिभास उपजायते यथा—इत्थमित्थं भगवान् तत्वमाचष्टे, उक्तं च—

॥१॥ "तदाधिपत्यादाभासः, सत्वानामुपजायते ।
स्वयं तु यत्नरहितश्चिन्तामणिरिव स्थितः ॥" इति ।

तन्मतविकुट्टनार्थमाह—'जिनाख्यातं' जिनेन—भगवता वर्द्धमानस्वामिना प्रकृष्टपुण्यसंभार-विपाकोदयतस्तथा व्यापारयोगेन आख्यातं—कथितं जिनाख्यातं, साक्षात्कथनव्यापारोपलम्भेऽपि यदि तदाधिपत्यमात्रात्तथाप्रतिभासः श्रोतृणामित्यभ्युपगम्यते ततोऽन्यत्रापि तथाकल्पनाप्रसङ्गः, तथा च प्रत्यक्षविरोध इति यत्किञ्चिदेतद्, भगवांश्चाख्यातवान् सम्यग् योग्येभ्यः श्रोतृभ्यो नायोग्येभ्यः, अमूढलक्षत्वात्, सम्यगयोग्यश्च श्रोता श्रोतृलक्षणोपेतः, श्रोतृलक्षणानि चामूनि—

॥१॥ "मध्यस्थो बुद्धिमानर्थी, जात्यादिगुणसंगतः ।
श्रुतकृच्च यथाशक्ति, श्रोता पात्रमिति स्मृतः ॥"

ततः फलवदेवेदं जिनाख्यातमित्यावेदयन्नाह—'जिनानुचीर्णं' जिना इह हिताप्त्यनिवर्त्त-कयोगसिद्धा गणधारिणः परिगृह्यन्ते, विचित्रार्थत्वात्तणां, ततोऽयमर्थ—जिनैः—हितास्थनिवर्त्त-कयोगसिद्धैर्गणधारिभिरनुचीर्णं—सम्यक् तदर्थावगमासङ्गक्तिगर्भानिवर्त्तकसमभावप्राप्तया धर्ममेघनाकसमाधिरूपेण परिणमितं जिनानुचीर्णम्, अत एव तथारूपसमाधिभावतः समुल्लसिका-तिशयविशेषभावेन तेषां तथा सूत्रकरणशक्तिरिति दर्शयन्नाह—'जिनप्रज्ञप्तं' जिनैः—हितास्यनिव-र्त्त्कयोगिभि प्रज्ञप्तं—तदन्यसत्वानुग्रहाय सूत्रत आचाराद्यङ्गोपाङ्गादिभेदेन रचितं जिनप्रज्ञप्तम्, उक्तं च—

॥१॥ अत्थं भासइ अरिहा सुत्तं गंथंति गणहरा निउणं ।
सासणस्स हियट्ठाए तओ सुत्तं पवत्तई ॥ इति ।

इदं च हितप्रवृत्तादिरूपेभ्यो जिनेभ्यो देशनीयं, तेषामेव सम्यग्विनेययोगभावतो हिताविघातकरणात्, इत्येतदुपदर्शयन्नाह—'जिनदेशितं' जिना इह हितप्रवृत्तगोत्रविशुद्धोपाया-भिमुखापायविमुखादयः परगृह्यन्ते, तथा मूलटीकाकृता व्याख्यानात्, जिनेभ्यो—हितप्रवृत्ता-दिरूपेभ्यः सुश्रूषादिभिर्व्यक्तभावेभ्यो देशितं—कथितं गणधरैरपि जिनदेशितं, तथा च जम्बूस्वमा-मिप्रभृतय एवंविधा एवेति निरूपणीयमेतत्, अथ प्रकृतिसुन्दरमिदमिति कस्मादजिनेभ्योऽपि नोपदिश्यते ?, उच्यते, तेषां स्वतोऽसुन्दरत्वेनानार्थोपनिपातसम्भवात्, दृष्टं च पात्रासुन्दरतय स्वतः सुन्दरमपि रविकराद्युलूकादीनामनदिश्यते ?, उच्यते, तेषां स्वतोऽसुन्दरत्वेनानर्थोपनिपात-सम्भवात्, दृष्टं च पात्रासुन्दरतया स्वतः सुन्दरमपि रविकराद्युलूकादीनामनर्थाय, आह च—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "पेउंजियव्वं धीरेण हियं जं जस्स सव्वहा।
आहारोवि हु मच्छस्स न पसत्थो गलो भुवि ॥"

अस्यार्थस्य संदर्शनायाह-'जिनप्रशस्तं' जिनानां-गोत्रविशुद्धोपायाभिमुखापाय-विमुखहितप्रवृत्तादिभेदानां प्रशस्तं-निरुजपथ्यान्नवत् उचितसेवनया हितं जिनप्रशस्तम्, एवं भूतं जिनमतम् 'अनुविचिन्त्य' औत्पत्तिक्यादिभेदभिन्नया बुद्धया पर्यालोच्य 'तत्' जिनमतं 'श्रद्धानाः' यद्यपि नाम कालवैगुण्यतो मेधादिगुणहीनाः प्राणिनस्तथाऽप्यतः स्वल्पमप्यधिगतं भवच्छेदायेत्यार्द्रचित्ततया मन्यमानाः, तथा 'तत्' जिनमतमेव 'प्रीयमाणाः' असङ्गशक्तिप्रीत्या पश्यन्तः, तथा 'तत्' जिनमतमेव 'रोचयन्तः' सात्मीभावेनानुभवन्तः, क एते इत्याह-

'स्थविरा भगवन्तः' तत्र धर्मपरिणत्या निवृत्तासमञ्जसक्रयामतयः सथविरा इव स्थविराः, परिणतसाधुभावा आचार्या इति गर्भ, 'भगवन्तः' श्रुतैश्वर्यादियोगाद् भग्नवन्तः कषायादीनिति भगवन्तः पृषोदरादित्वान्नकारलोपः, 'जीवाजीवाभिगमं नाम' नाम्ना जीवाजीवाभिगमं, नामनशब्द-स्यात्राव्ययत्वात्ततः परस्य तृतीयैकवचनस्य लोपः, जीवानाम्-एकेन्द्रियादीनाम् अजीवानां-धर्मास्तिकायादीनामभिगमः-परिच्छेदो यस्मिन् तत् जीवाजीवाभिगमम्।

इदं चान्वर्थप्रधानं नाम यथा ज्वलतीति ज्वलन इत्यादि, किं तित्याह-अधीयत इति 'अध्ययनं' विशि,ष्टार्थध्वनिसंदर्भरूपं 'प्रज्ञापितवन्तः' प्ररूपितवन्तः, एतेन गुरूपर्वक्रमलक्षणः सम्बन्धः साक्षादुपदर्शितः, एतदुपदर्शनादभिधेयादिकमपि सिद्धिं यथोक्तमनन्तरमिति कृतं प्रसङ्गेन ॥

मू. (२) *से किं तं जीवाजीवाभिगमे?, जीवाजीवाभिगमे दुविहे पन्नत्ते, तंजहा-जीवाभिगमे य अजीवाभिगमे य।*

वृ. अथास्य सूत्रस्य किमैदम्पर्यम्?, उच्यते, प्रश्नसूत्रमिदम्, एतच्चादावुपन्यस्यन्निदं ज्ञापयति-पृच्छतो मध्यस्थस्य बुद्धिमतो भगवदर्हदुपदिष्टतत्वस्य तत्वप्ररूपणा कार्या नान्यस्येति, अक्षरगमनिका त्वेवम्-सेशब्दो मगधदेशप्रसिद्धो निपातोऽथशब्दार्थे, अथशब्दश्च प्रक्रियाद्यर्थाभि-धायी, उक्तं च-"अथ प्रक्रियाप्रस्नान्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्येष्वि"ति, इह तूपन्यासे, किंशब्दः परप्रश्ने, स चाभिधेययथावत्स्वरूपानिरज्ञाते नपुंसकलिङ्गतया निर्दिश्यते।

तथा चोक्तम्-"अव्यक्ते गुणसन्दोहे नपुंसकलिङ्गं प्रयुज्यते" ततः पुनरथपिक्षया यथाभि-धेयमभिसंबध्यते इति, अथ 'किं तज्जीवाजीवाभिगमं' इति, अथवा प्राकृतशैल्या 'अभिधेय-वल्लिङ्गवचनानि भवन्ती'ति न्यायात् किं तदिति-कोऽसावित्यस्मिन्नर्थे द्रष्टव्यं, ततोऽयमर्थ-कोऽसौ जीवाजीवाभिगमः? इति, एवं सामान्येन केनचित्प्रश्नेकृते सति भगवान् गुरु शिष्यवचनानुरोधेनाद-राधानार्थं किञ्चित्प्रत्युच्चार्याह--

'जीवाजीवाभिगमः' अनन्तरोदितशब्दार्थ 'द्विविधः' द्विप्रकारः प्रज्ञप्तस्तीर्थकरगणधरैः, अनेन चागृहीतशिष्याभिधानेन निर्वचनसूत्रेणैतदाह-न सर्वमेव सूत्रं गणधरप्रश्नतीर्थकरनिर्वचन-रूपं किन्तु किञ्चिदन्यथापि, केवलं सूत्रं बाहुल्येन गणधरैर्दृब्धं स्तोकं शेषैः, यत् उक्तम्-"अत्थं भासइ अरिहा" इत्यादि, 'तद्यथे'ति वक्ष्यमाणभेदकथनोपन्यासार्थः।

स जीवाजीवाभिगमो यथा द्विविधो भवतितथोपन्यस्यत इति भावः, जीवाभिगमश्चा-जीवाभिगमश्च, चशब्दौ वस्तुतत्वमङ्गीकृत्य द्वयोरपि तुल्यकक्षतोद्भावनार्थौ, आह-जीवा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाभिगमः प्रश्नसूत्रे संवलित उपन्यस्तस्तं तथैवोच्चार्यासंवलितनिर्वचनाभिधानमयुक्तं, असंवलिते संवलितविधानायोगात्, नैष दोषः, प्रश्नसूत्रेऽप्यसंवलितस्यैवोपन्यासात् भिन्नजातीययोरेकत्वायोगात्। तत्र यद्यपि 'यथोद्देशस्तथा निर्देश' इति न्यायोऽस्ति, तथाऽप्यल्पतर-वक्तव्यत्वात् प्रथमतोऽवाभिगममभिधित्सुस्तत्प्रश्नसूत्रमाह–

मू. (३) *से किं तं अजीवाभिगमे? अजीवाभिगमे दुविहे पन्नत्ते, तंजहा–रूविअजीवाभिगमे य अरूविअजीवाभिगमे य ॥*

वृ. अथ कोऽसौ अजीवाभिगमः?, सूरिराह–अजीवाभिगमो द्विविधः प्रज्ञप्तः, तद्यथा–रूप्यजीवाभिगोऽरूप्यजीवाभिगमश्च, रूपमेषामस्तीति रूपग्रहणं गन्धादीनामुपलक्षणं, तद्व्यतिरेकेण तस्यासम्भवात्, तथाहि–प्रतिपरमाणु रूपरसगन्धस्पर्शा, उक्तं च–

॥१॥ "कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।
एकरसगन्धवर्णो द्विस्पर्श कार्यलिङ्गश्च ॥"

एतेन यदुच्यते कैश्चित् 'भिन्ना एव रूपपरमाणवो भिन्नाश्च पृथक् पृथग् रसादिपरमाणव' इति, तदपास्तमवसेयं, प्रत्यक्षबाधितत्वात्, तथाहि–य एव नैरन्तर्येण कुचकलशोपरिनिविष्टा रूपपरमाणव उपलब्धिगोचरास्तेष्वेवाव्यवच्छेदेन सकलेष्वपि स्पर्शोऽप्युलभ्यते, य एव च घृतादिरसपरमाणवः कर्पूरादिगन्धपरमाणवो वा तेष्वेव नैरन्तर्येण रूपं स्पर्शश्चोपलब्धिविषयः, अन्यथा सान्तरा रूपादयः प्रतीतिपथमिग्रियुः।

न च सान्तराः प्रतीयन्ते, तस्मादव्यतिरेकः परस्परं रूपादीनामिति, रूपव्यतिरिक्ता अरूपिणो–धर्मास्तिकायादयस्ते च तेऽजीवाश्चारूप्यजीवास्तेषामभिगमोऽरूप्यजीवाभिगमः ॥

मू. (४) *से किं तं अरूविअजीवाभिगमे?, अरूविअजीवाभिगमे दसविहे प०, तंजहा–धम्मत्थिकाए एवं जहा पन्नवणाए जाव सेत्तं अरूविअजीवाभिगमे।*

वृ. तत्रारूपिणः प्रत्यक्षाद्यविषयाः केवलमागमप्रमाणगम्यास्तत्वत इति प्रथमतस्तद्विषयं प्रश्नसूत्रमाह– सुगमं, सूरिराह–'अरुवी'त्यादि॥ अरूप्यजीवाभिगमः 'दशविधः' दशप्रकारः प्रज्ञप्तः, तदेव दशविधत्वमाह–तंजहेत्यादि, 'तद्यथे'ति वक्ष्यमाणभेदकथनोपन्यासार्थः, धर्मास्तिकायः

'एवं जहा पन्नवणाए' इति 'एवम्' उक्तेन प्रकारेण यथा प्रज्ञापनायां तथा वक्तव्यं तावद् यावत् 'सेत्तं असंसारसमापन्नजीवाभिगमे' इति, तच्चैवम्–"धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पएसा अधम्मत्थिकाए अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पएसा आगासत्थिकाए आगासत्थिकायस् देसे आगासत्थिकायस्स पएसा अद्धासमये" इति, तत्र जीवानां पुद्गलानां च स्वभावत् एव गतिपरिणामपरिणतानां तत्स्वभावधारणात्पोषणाद्धर्म अस्तयः–प्रदेशास्तेषां कायः–सङ्घातः "गण काए य निकाए खंधे वग्गे तहेव रासी य" इति वचनात् अस्तिकायः–प्रदेशसङ्घात इत्यर्थः।

धर्मश्चासावस्तिकायश्च धर्मास्तिकायः, अनेन सकलधर्मास्तिकायरूपमवयविद्रव्यमाह, अवयवी च नाम अवयवानां तथारूपः सङ्घातपरिणामविशेष एव, न पुनरवयवद्रव्येभ्यः पृथगर्थान्त द्रव्यं, तस्यानुपलम्भात्, तन्तव एव हि आतानवितानरूपसङ्घातपरिणामविशेषमापन्ना लोके पटव्यपदेशभाज उपलभ्यन्ते, न तदतिरिक्तं पटाख्यं नाम द्रव्यम्, उक्तं चान्यैरपि–

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

॥ १ ॥　　"तन्त्वादिव्यतिरेकेण, न पटाद्युपलम्भनम् ।
तन्त्वादयोऽविशिष्टा हि, पटादिव्यपदेशिनः ॥"

कृतं प्रसङ्गेन, अन्यत्र धर्मसङ्ग्रहणिटीकादावेतद्वादस्य चर्चितत्वात्, तथा तस्यैव बुद्धिपरिकल्पितो द्व्यादिप्रदेशात्मको विभागो धर्मास्तिकायस्य देशः, धर्मास्तिकायस्य प्रदेशाः–प्र कृष्टा देशाः प्रदेशाः, प्रदेशा निर्विभागा भागा इति, ते चासङ्ख्येयाः, लोकाकाशप्रदेशप्रमाणत्वात्तेषाम्, अत एव बहुवचनं, धर्मास्तिकायप्रतिपक्षभूतोऽधर्मास्तिकायः, किमुक्तं भवति ?

जीवानां पुद्गलानां च स्थितिपरिणामपरिणतानां तत्परिणामोपष्टम्भकोऽमूर्तोऽसङ्ख्यातप्रदेशात्मकोऽधर्मास्तिकायः, अधर्मास्तिकायस्य देश इत्यादि पूर्ववत्, तथा आ–समन्तात्सर्वाण्यपि द्रव्याणि काशन्ते–दीप्यन्तेऽत्र व्यवस्थितानीत्याकाशम्, अस्तयः–प्रदेशास्तेषां कायोऽस्तिकायः, आकाशं च तदस्तिकायश्चाकाशास्तिकायः, आकाशास्तिकायस्य देश इत्यादि प्राग्वत्, नवरमस्य प्रदेसा अनन्ताः, अलोकस्यानन्तत्वात् ।

'अद्धासमय' इति, अद्धेति कालस्याख्या, अद्धा चासौ समयश्चाद्धासमयः, अथवाऽद्धायाः समयो निर्विभागो भागोऽद्धासमयः, अयं चैक एव वर्त्तमानः परमार्थतः सन् नातीतानागताः, तेषां यथाक्रमं विनष्टानुत्पन्नत्वात्, ततः कायत्वाभावाद्देशप्रदेशकल्पनाविरहः, अथाकाशकालौ लोकेऽपि प्रतीताविति त श्रद्धातुं शक्येते, धर्माधर्मास्तिकायौ तु कथं प्रत्येतव्यौ ? येन तद्विषया श्रद्धा भवेत्, उच्यते, गतिस्थितिकार्यदर्शनात् ।

तथाहि–यद् यदन्वयव्यतिरेकाविधायि तत्तद्धेतुकमिति व्यवहर्त्तव्यं, यथा चक्षुरिन्द्रियान्वयव्यतिरेकानुविधायि चाक्षुषं विज्ञानं, तथा च जीवानां पुद्गलनां च गतिस्थितिपरिणामपरिणतानामपि गतिस्थिती यथाक्रमं धर्माधर्मास्तिकायान्वयव्यतिरेकानुविधायिन्यौ, तस्मात्ते तद्धेतुके, न चायमसिद्धो हेतुः, तथाहि–जीवानां पुद्गलानां च गतिस्थितिपरिणामपरिणतानामपि गतिस्थिती न तत्परिणमनमात्रहेतुके, तन्मात्रहेतुकतायामलोकेऽपि तत्प्रसक्तेः, अथ न तत्परिणमनमात्रं हेतुः किन्तु विशिष्टः परिणामः, स चेत्थंभूतो यथा लोकमात्रक्षेत्रस्यान्तरेऽत्र गतिस्थितिभ्यां भवितव्यं न बहिः प्रदेशमात्रमप्यधिकं, ननु स एवेत्यम्भूतो विशिष्टपरिणाम आकालं जीवानां पुद्गलानां चोत्कर्षतोऽप्येतावत्प्रमाण एवाभूद् भवति भविष्यति वा न तु कदाचनाप्य धिकतर इत्यत्र किं नियामकं ?

यथा हि किल परमाणोर्जघन्यतः परमाणुमात्रक्षेत्रातिक्रममादिं कृत्वोत्कर्षतश्चतुर्दशरज्वात्मकमपि क्षेत्रं यावद् गतिरूपजायते तथा परतोऽपि प्रदेशमात्रमप्यधिका किं न भवति ?, तस्मादवश्यमत्र किञ्चिन्नियामकमपरं वक्तव्यं, तच्च धर्माधर्मास्तिकायावेव नाकाशमात्रम्, आकाशमात्रस्यालोकेऽपि सम्भवात्, नापि लोकपरिमितमाकाशम्, इतरेतराश्रयदोषप्रसङ्गात्, तथाहि–जीवानां पुद्गलानां चान्यत्र गतिस्थित्योरभावे सिद्धे सति विवक्षितस्य परिमितस्याकाशस्य लोकत्वसिद्धि, तत्सिद्धौ चान्यत्र जीवपुद्गलानां गतिस्थित्यभावसिद्धिरित्येकाभावेऽन्यतरस्याप्यभावः ।अथ किमिदमसंबद्धमुच्यते ? , यत् लोकत्वेन सम्प्रति व्यवह्रियते क्षेत्रं, तावन्मात्रस्यैवाकाशखण्डस्य गतिस्थित्युपष्टम्भकस्वभावो न परस्य प्रदेशमात्रस्यापि ततो न कश्चिद्दोषः, ननु तावन्मात्रस्यैवाकाशस्य स स्वभावो न परस्य प्रदेशमात्रस्यापीत्यत्रापि सुधियः कारणान्तरं

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

मृगयन्ते, आकाशत्वमात्रस्योभयत्रा तुल्यत्वात्, विशेषणमन्तरेण च वैशिष्टयायोगात्, कारणान्तरं धर्माधर्मास्तिकायभावाभाववेव नापरमिति स्थितम्, अन्यञ्च–तावन्मात्रस्याकाशखण्डस्य स स्वभावो न परस्येत्यपि कुतः प्रमाणात्परिकल्प्यते?, आगमप्रमाणादिति चेत् तथाहि–तावत्येवाकाश-खण्डे जीवानां च पुद्गलानां च गतिस्थितिमतां गतिस्थिती तत्र तत्र व्यावण्येर्ते न परत इति, यद्येवं तर्ह्यागमप्रामाण्य-बलादेव धर्माधर्मास्तिकायावपि गतिस्थितिनिबन्धनमिष्येयातां किमाकाश-खण्डस्य निर्मूल-स्वभावान्तरपरिकल्पनाऽऽयासेनेति कृतं प्रसङ्गेन।

अथामीषामित्थं क्रमोपन्यासे किं प्रयोजनम्?, उच्यते, इह धर्मास्तिकाय इति पदं मङ्गल-भूतम्, आदौ धर्मशब्दान्वितत्वात्, पदार्थप्ररूपणा च सम्प्रत्युत्क्षिप् वर्त्तते, ततो मङ्गलार्थमादौ धर्मास्तिकायस्योपादानां, धर्मास्तिकायप्रतिपक्षभूतश्चाधर्मास्तिकाय इति तदनन्तरमधर्मास्ति-कायस्, द्वयोरपि चानयोराधारभूतमाकाशमिति तदनन्तरमाकाशास्तिकायस्य,ततः पुनरजीवा-साधर्म्याद्दद्धासमयस्य, अथवा इह धर्माधर्मास्तिकायौ विभू न भवतः, तद्विभुत्वेन तत्सामर्थ्यतो जीवपुद्गलानामस्खलितप्रचारप्रवृत्तेर्लोकव्यवस्थाऽनुपपत्तेः, अस्ति च लोकालोकव्यवस्था, तत एतावविभू सन्तौ यत्र क्षेत्रे समवगाढौ तावत्प्रमाणो लेकः, शेषस्त्वलोक इति सिद्धम्, उक्तं च–

॥१॥ ''धर्माधर्मविभुत्वात्सर्वत्र च जीवपुद्गलविचारात्।
नालोकः कश्चित्स्यान्न च संमतमेतदार्याणाम्॥
॥२॥ तस्माद्धर्माधर्मावर्वगाढौ व्याप्य लोकखं सर्वम्।
एवं हि परिच्छिन्नः सिद्धयति लोकस्तदविभुत्वात्॥

तत एवं लोकालोकव्यवस्थाहेतू धर्माधर्मास्तिकायावित्यनयोरादावुपादानं, तत्रापि माङ्गलिकत्वात् प्रथमतो धर्मास्तिकायस्य, तत्प्रतिपक्षत्वात् ततोऽधर्मास्तिकायस्य, ततो लोकालोक-व्यापित्वादाकाशास्तिकायस्य, तदनन्तरं लोके समयासमयक्षेत्रव्यवस्थाकारित्वादद्धासमयस्य, एवमागमानुसारेणान्यदपि युक्त्यनुपा वक्तव्यमित्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः, अत्रोपसंहारवाक्यं–'सेत्तं अरूविअजीवाभिगमे'।

मू. *(५) से किं तं रूविअजीवाभिगमे?, रूविअजीवाभिगमे चउव्विहे पन्नत्ते, तंजहा–खंधा खंधदेसा खंधप्पएसा परमाणुपोग्गला, ते समासतो पंचविहा पन्नत्ता, तंजहा–वण्णपरिणया गंध० रस० फास० संठाणपरिणया, एवं ते ५ जहा पण्णवणाए, सेत्तं रूविअजीवाभिगमे, सेत्तं अजीवाभिगमे।*

वृ. अत ऊर्ध्वमिदं सूत्रम्–'से किं तं रूविअजीवाभिगमे?, रूविअजीवाभिगमे चउव्विहे पन्नत्ते, तं०–खंधा खंधदेसा खंधपएसा परमाणुपुग्गला' इह स्कन्धा इत्यत्र बहुवचनं पुद्गलस्कन्धा-नामनन्तत्वख्यापनार्थं, तथा चोक्तम्–''दव्वतो णं पुग्गलत्थिकाए णं अनन्ते'' इत्यादि, 'स्कन्धदेशाः' स्कन्धानामेव स्कन्धत्वपरिणाममजहतां बुद्धिपरिकल्पिता द्वयादिप्रदेशात्मका विभागाः, अत्रापि बहुवचनमनन्तप्रदेशिककेषु स्कन्धेषु स्कन्धदेशानन्तत्वसम्भावनार्थं, 'स्कन्धप्रदेशाः' स्कन्धानां स्कन्धत्वपरिणाममजहतां प्रकृष्ट देशाः–निर्विभागा भागाः परमाणव इत्यर्थः, 'परमाणुपुद्गलाः' स्कन्धत्वपरिणामरहिताः केवलाः परमाणवः। अत ऊर्ध्वं सूत्रमिदम्–'ते समासतो पंचविधा पन्नत्ता, तंजहा–वण्णपरिणया गंधपरिणता रसपरिणता फासपरिणता संठाणपरिणता, तत्थ णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जे वण्णपरिणया ते पंचविहा पन्नत्ता, तंजहा– कालवण्णपरिणता नीलवण्णपरिणता इत्यादि तावद् यावत् 'सेत्तं रूविअजीवाभिगमे, सेत्तं अजीवाभिगमे ।।

मू. (६) *से किं तं जीवाभिगमे ?, जीवाभिगमे दुविहे पन्नते, तंजहा–संसारसमावण्णग-जीवाभिगमे य असंसारमावण्णगजीवाभिगमे य ।*

वृ. संसरणं संसारो–नारकतिर्यङ्नरामरभवभ्रमणलक्षणस्तं सम्यग्–एकीभावेनापन्नाः–प्राप्ताः संसारसमापन्नाः–संसारवर्त्तिनस्ते च ते जीवाश्च तेषामभिगमः संसारसमापन्नजीवाभिगमः, तथा न संसारोऽसंसाः–संसारप्रिपक्षभूतो मोक्ष इत्यर्थः तं समापन्ना असंसारसमापन्नास्ते च ते जीवाश्च तेषत्मभिगमोऽसंसारसमापन्नजीवाभिगमः, चशब्दौ उभयेषामपि जीवानां जीवत्वं प्रति तुल्यकक्षतासूचकौ, तेन ये विध्यातप्रदीपकल्पं निर्वाणमभ्युपगतवन्तः ये च नवानामात्मगुणा-नामत्यन्तोच्छेदेन ते निरस्ता द्रष्टव्याः, तथाभूतमोक्षाभ्युपगमे तदर्थं प्रेक्षावतां प्रवृत्यनुपपत्तेः, न खलु सचेतनः स्ववधाय कण्ठ कुठारिकां व्यापारयति, दुःखितोऽपि हि जीवन् कदाचिद् भद्रमाप्नुयात् भृतेन तु निर्मूलमपि हस्तिताः सम्पद् इति, इह केवलान् अजीवान् जीवांश्चानुच्चार्याभिगम-शब्दसंलितप्रश्नोऽभिगमव्यतिरेकेण प्रतिपत्तेरसन्मवतस्तेषामभिगमगम्यताधर्मख्यापनार्थ तेन 'सदेवेद' मित्यादि सदद्वैद्यपोह उक्तो वेदितव्यः, सदद्वैताद्यभ्युपगमेऽभिगमगम्यतारूपधर्मायोगतः प्रतिपत्तेरेवासम्भात् ।

मू. (७) *से किं तं असंसारसमावण्णगजीवाभिगमे ?, २ दुविहे पन्नत्ते, तंजहा–अनंतरा-सद्धासंसार- समावण्णगजीवाभिगमे य परंपरसिद्धासंसारसमावण्णगजीवाभिगमे य ।*

से किं तं अनंतरसिद्धासंसारसमावण्णगजीवाभिगमे ?, २ पन्नरसविहे पन्नत्ते, तंजहा–तित्थसिद्धा जाव अनेगसिद्धा, सेत्तं अनंतरसिद्धा । से किं तं परंपरसिद्धासंसारसमावण्ण-गजीवाभिगमे ?, २ अणेगविहे पण्णत्ते, तंजहा–पढम- समयसिद्धा दुसमय सिद्धा जाव अणंतसमयसिद्धा, से तं परंपरसिद्धासंसारसमावण्णगजीवाभिगमे, सेत्तं असंसारसमावण्ण-गजीवाभिगमे ।

वृ. तत्राल्पवक्तव्यत्वात्प्रथमतोऽसंसारसमापन्नजीवाभिगमसूत्म्–'से किं तं असंसार-समावन्नजीवाभिगमे ?, २ दुविहे पं०, तं०–अनंतरसिद्धअसंसारसमावन्नजवाभिगमे परंपर-सिद्धअसंसारसमावन्नजीवाभिगमे य' इत्यादि तावद्वाच्यं यावदुपसंहारवाक्यं 'सेत्तं असंसार-समापन्न- जीवाभिगमे' अस्य व्याख्यानं प्रज्ञापनाटीकातो वेदितव्यं, तत्र सविस्तरमुक्तत्वात् ।

सम्प्रति संसारसमापन्नजीवाभिगममभिधित्सुस्तत्प्रश्नसूत्रमाह–

मू. (८) *से किं तं संसारसमावन्नजीवाभिगमे ?, संसारसमावण्णएसु णं जीवेसु इमाओ नव पडिवत्तीओ एवमाहिज्ञंति, तं०–एगे एवमाहंसु–दुविहा संसारसमावण्णगा जीवा पं० ।*

एगे एवमाहंसु–तिविहा संसारसमावण्णगा जीवा पं० । एगे एवमाहंसु–चउव्विहा संसारसमावण्णगा जीवा पं०, एगे एवमाहंसु–पंचविहा संसारसमावण्णगा जीवा पं० –

एतेणं अभिलावेणं जाव दसविहा संसारसमावण्णगा जीवा पन्नत्ता ।

वृ. 'सूरिराह–संसारसमापन्नेषु णमिति वाक्यालङ्कारे जीवेषु 'इमाः' वक्ष्यमाणलक्षणा 'नव प्रतिपत्तयो' द्विप्रत्यवतारमादौ कृत्वा दशप्रत्यवतारं यावद् ये नव प्रत्यवतारास्तद्रूपाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादनानि संवित्तय इतियावत् 'एवं' वक्ष्यमाणया रीत्याऽऽख्यायन्ते पूर्वसूरिभि, इह प्रतिपत्त्या-ख्यानेन प्रणालिकयाऽर्थाख्यानं द्रष्टव्यं, प्रतिपत्तिभावेऽपि शब्दादर्थे प्रवृत्तिकरणात्, तेन यदुच्यते शब्दाद्वैतवादिभिः– 'शब्दमात्रं विश्व'मिति, पदपास्तं द्रष्टव्यं, तदपासने चेयमुपपत्ति– एकान्तैक-स्वरूपे वस्तु- न्यभिदानद्वयासंम्भवात् भिन्नप्रवृत्तिनिमित्ताभावात्, ततश्च शब्दमात्रमित्येव स्यात् न विश्वमिति, प्रणालिकयाऽर्थाभिधानमेवोपदर्शयति, तद्यथा–एके आचार्या एवमाख्यात-वन्तः–द्विविधाः संसारसमापन्ना जीवाः प्रज्ञप्ताः ।

एके आचार्या एवमाख्यातवन्तः–त्रिविधाः संसारसमापन्ना जीवाः, एवं यावद्दशविधा इति, इह एके इति न पृथग्मतावलम्बिनो दर्शनान्तरीया इव केचिदन्ये आचार्या, किन्तु य एव पूर्वं द्विप्रत्यवतारविवक्षायां वर्त्तमाना एवमुक्तवन्तः यथा द्विविधाः संसारसमापन्ना जीवा इति त एव त्रिप्रत्यवतारविवक्षायां वर्त्तमानाः, द्विप्रत्यवतारविवक्षामपेक्ष्य त्रिप्रत्यवतारविवक्षाया अन्यत्वात्, विवक्षावतां तु कथञ्चिद् भेदादन्य इति वेदितव्याः, अत एव प्रतिपत्तय इति परमार्थतोऽनुयोग-द्वाराणीति प्रतिपत्तव्यम् । इञ्हय एव द्विविधास्त एव त्रिविधास्त एव चतुर्विधा यावद्दशविधा इति तेषामनेकस्वभाव- तायां तत्तद्धर्मभेदेन तथा तताऽभिधानता युज्यते, नान्यथा, एकान्तैकस्वभावतायां तेषां वैचित्र्यायोगतस्तथा तथाऽभिधानप्रवृत्तेरसम्भवात्, एवं सति ।

॥ १ ॥ "अष्टविकल्पं दैवं तिर्यग्योनं च पञ्चधा भवति ।
मानुष्यं चैकविधं समासतो भौतिकः सर्ग ॥" इति ।

वाङ्धात्रमेव, अधिष्ठातृजीवानामेकरूपत्वाभ्युपगमेन तथारूपवैचित्र्यासम्भवादिति, एवमन्येऽपि प्रवादास्तथा तथा वस्तुवैचित्र्यप्रतिपादनपरा निरस्ता द्रष्टव्याः, सर्वथैकस्वभाव-त्वाभ्युपगतौ वैचित्र्यायोगात् ।

सम्प्रत्येता एव प्रतिपत्तीः क्रमेण व्याचिख्यासुः प्रथमत आद्यां प्रतिपत्तिं विभावयिषुरिदमाह–

मू. (९) *तत्थ(णं) जे एवमाहंसु 'दुविहा संसारसमावण्णगा जीवा पं०' ते एवमाहंसु–तं०–तसा चेव थावरा चेव ॥*

वृ. 'तत्र' तेषु नवसु प्रतिपत्तिषु मध्ये ये द्विप्रत्यवतारविवक्षायां वर्त्तमाना एवं व्याख्या-तवन्तः–द्विविधाः संसारसमापन्नका जीवाः प्रज्ञप्ता इति ते 'णम्' इ वाक्यालङ्कारे 'एवं' वक्ष्यमाणरीत्या द्विविधत्वभावनार्थमाख्यातवन्तः, 'तद्यथे' त्युपन्यस्तद्वैविध्योपदर्शनार्थः, त्रसाश्चैव स्थावराश्चैव,तत्र त्रसन्ति–उष्णाद्यभितप्ताः सन्तो विवक्षितस्थानादुद्विजन्ति गच्छन्ति च छायाद्यासेवनार्थं स्थानान्त- रमिति त्रसाः, अनया च व्युत्पत्त्या त्रसास्त्रसनामकर्मोदयवर्त्तिन एव परिगृह्यन्ते, न शेषाः, अथ शेषैरपीह प्रयोजनं, तेषामप्यग्रे वक्ष्यमाणत्वात् ।

तत एवं व्युत्पत्तिः–त्रसन्ति–अभिसन्धिपूर्वकमनभिसन्धिपूर्वकं वा ऊर्ध्वमधस्तिर्यक् चलन्तीति त्रसाः–तेजोवायवो द्वीन्द्रियादयश्च, उष्णाद्यभितापेऽपि तत्स्थानपरिहारासमर्थाः सन्तस्तिष्ठन्तीत्येवंशीलाः स्थावराः–पृथिव्यादयः, चशब्दौ स्वगतानेकभेदसमुच्चयार्थौ, एवकाराव-वधारणार्थौ, अत एव संसारसमापन्नका जीवाः, एतद्वयतिरेकेण संसारिणामभावात् ।

तत्राल्पवक्तव्यत्वात्प्रथमतः स्थावरानभिधित्सुस्तत्प्रश्नसूत्रमाह–

मू. (१०) *से किं तं थावरा ?, २ तिविहा पन्नत्ता, तंजहा–पुढविकाइया १ आउक्काइया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ *वणस्सइकाइया ३ ।*

वृ. अथ के ते स्थावराः ?, सूरिराह–स्थावरासस्त्रिविधाः प्रज्ञप्ताः, तद्यथा–पृथिवीकाया एव पृथिवीकायिकाः, आर्षत्वात्स्वार्थे इकप्रत्ययः, आपो–द्रवास्ताश्च प्रतीताः ता एव कायः–शरीरं येषां ते अप्कायाः अप्काया एवाप्कायिकाः, वनस्पति–लतादिरूपः प्रतीतः स एव कायः–शरीरं येषां ते वनस्पतिकायाः वनस्पतिकाया एव वनस्पतिकायिकाः, सर्वत्र बहुवचनं बहुत्वख्यापनार्थं, तेन 'पृथिवी देवते'त्यादिना यत्तदेकजीवत्वमात्रप्रतिपादनं तदपास्तमवसेयं, यदि पुनस्तदधिष्ठात्री काचनापि देवता परिकल्प्यते तदानीमेकत्वेऽप्यविरोधः ।

इह सर्वभूताधारः पृथिवीती प्रथमं पृथिवीकायिकानामुपादानं, तदनन्तरं तत्प्रतिष्ठितत्वादप्कायिकाना, तदनन्तरं 'जत्थ जलं तत्थ वणं' इति सैद्धान्तिकवस्तुप्रतिपादनार्थं वनस्पतिकायिकानामिति, इह त्रिविधत्वं स्थावराणां तेजोवायूनां लब्ध्या स्थावराणामपि सतां गतित्रसेष्वन्तर्भावविवक्षणात्, तथा च तत्वार्थसूत्रमप्येवं ''पृथिव्यम्बुवनस्पतयः स्थावराः ।। तेजोवायू द्वीन्द्रियादयश्च त्रसाः'' इति, तत्र 'यथोद्देशं निर्देश' इति प्रथमतः पृथिवीकायिकप्रतिपादनार्थमाह–

मू. *(११) से किं तं पुढविकाइया ?, २ दुविहा पं०, तं०–सुहुमपुढविक्काइया य बायरपुढविक्काइया य ॥*

वृ. अथ के ते पृथिवीयिकाः ?, सूरिराह–पृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च, तत्र सूक्ष्मनामकर्मोदयात्सूक्ष्मा बादरनामकर्मोदयात्त बादराः, कर्मोदयजनिते खल्वेते सूक्ष्मबादरत्वे, नापेक्षिके बदरामलकयोरिव, सूक्ष्माश्च ते पृथिवीकायिकाश्च सूक्ष्मपृथिवीकायिकाः, बादराश्च ते पृथिवीकायिकाश्च बादरपृथिवीकायिकाः, चशब्दौ स्वगतानेकभेदसूचको, सूक्ष्माः सकललोकवर्त्तिनो बादराः प्रतिनियतैकदेशधारिणः ।

तत्र सूक्ष्मपृथिवीकायिकप्रतिपादनार्थमाह–

मू. *(१२) से किं तं सुहुमपुढविक्कइया ?, २ दुविहा पं०, तं०–पज्जत्तगा य अपज्जत्तगाय ॥*

वृ. अथ के ते सूक्ष्मपृथिवीकायिकाः ?, सूरिराह–सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–पर्याप्तकाश्चापर्याप्तकाश्च, तत्र पर्याप्तिर्नामाहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः, स च पुद्गलोपचयादुपजायते, किमुक्तं भवति ?–उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्संपर्कतस्तद्रूपतया जातानां यः शक्तिविशेष आहारादिपुद्गलखलरसरूपतापादनहेतुर्यथोदरान्तर्गतानां पुद्गलविशेषाणामाहारपुद्गलविशेषाणामाहारपुद्गलखलरसरूपतापरिणमनहेतुः सा पर्याप्ति सा च षोढा, तद्यथा–आहारपर्याप्तिः १ शरीरपर्याप्तिः २ इन्द्रियपर्याप्तिः ३ प्राणापान० भाषापर्याप्ति० ५ मनःपर्याप्तिश्च ६

तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति साऽऽहारपर्याप्तिः १, यया रसीभूतमाहारं रसासृग्मांसमेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः २, यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयति सा इन्द्रियपर्याप्ति ३, यया पुनरुच्छ्वासप्रायोग्यवर्गणापुद्गलानादायोच्छ्वासरूपतया परिणमय्यालम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः ४, यया तु भाषाप्रायोग्यान् पुद्गलानादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः ५, यया पुनर्मनःप्रायोग्वर्गमादलिकमादाय मनस्त्वेन परिणमय्यालम्ब्य च मुञ्चति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा मनःपर्याप्तिः ६। एताश्च यथाक्रमेकेन्द्रियाणां संज्ञिवर्जानां द्वीन्द्रियादीनां संज्ञिनां च चतुष्पञ्चषट्-सङ्ख्या भवन्ति, उत्पत्तिप्रथमसमये एव च एता यथायथं सर्वा अपि युगपन्निष्पादयितुमारभ्यन्ते क्रमेण च निष्ठामुपयान्ति, तद्यथा–प्रथममाहारपर्याप्तिस्ततः शरीरपर्याप्तिस्तत इन्द्रियपर्याप्तिरित्यादि, आहारपर्याप्तिश्च प्रथमसमय एव निष्पत्तिमुपगच्छति, शेषास्तु प्रत्येकमन्तर्मुहूर्त्तेन कालेन, अथाहारर्याप्ति प्रथमसमय एव निष्पद्यत इति कथमवसीयते ?, उच्यते, इह भगवताऽऽर्यश्यामेन प्रज्ञापनायामाहारपदे द्वितीयोद्देशके सूत्रमिदमपाठि।

"आहारपज्जत्तीए अपज्जत्तए णं भंते ! किं आहारए अनाहारए ?, गोयमा ! नो आहारए अनाहारए" इति, तत आहारपर्याप्तया अपर्याप्तो विग्रहगतावेवोपपद्यते नोपपातक्षेत्रमागतोऽपि, उपपातक्षेत्रसमागतस्य प्रथमसमय एवाहारकत्वात्, तत एकसामायिकी आहारपर्याप्तिनिर्वृत्ति, यदि पुनरुपपातक्षेत्रसमागतोऽप्याहारपर्याप्तया अपर्याप्तः स्यात्तत एवं व्याकरणसूत्रं पठेत्–"सिय आहारए सिय अनाहारए" यथा शरीरादिपर्याप्तिषु "सिय आहारए सिय अणनहारए" इति, सर्वासामपि च पर्याप्तीनां पर्याप्तिपरिसमाप्तिकालोऽन्तर्मुहूर्त्तप्रमाणः, पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः, 'अभ्रादिभ्य' इति मत्वर्तीयोऽप्रत्ययः, पर्याप्ता एव पर्याप्तकाः, ये पुनः स्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्तेऽपर्याप्ताः अपर्याप्ता एवापर्याप्तकाः, ते द्विधा–लब्ध्या करणैश्च, तत्र येऽपर्याप्तका एव म्रियन्ते ते लब्ध्याऽपर्याप्तकाः, ये पुनः करणानि–शरीरेन्द्रियादीनि न तावन्निर्वर्त्तयन्ति अथचावश्यंनिर्वर्त्तयिष्यन्ति ते करणापर्याप्ताः संप्राप्ताः–।

सम्प्रति विनेयजनानुग्रहाय शेषवक्तव्यतासङ्ग्रहार्थमिदं सङ्ग्रहणिगाथाद्वयमाह –

मू. (१३) *सरीरोगाहणसंघयण संठाणकसाय तह य हुंति सन्नाओ।*
लेसिंदिय समुग्घाए सन्नी वेए य पज्जत्ती
दिट्ठी दंसणनाणे जोगुवओगे तहा किमाहारे
उववायठिई समुग्घाय चवणगइरागई चेव॥

वृ. अस्य व्याख्या–प्रथमतः सूक्ष्मपृथिवीकायिकानां शरीराणि वक्तव्यानि, तदनन्तरमवगाहना, ततः संहननं, तदनन्तर संस्थानं, ततः कषायाः, ततः कति भवन्ति संज्ञाः ? इति वक्तव्वं, ततो लेश्याः, तदनन्तरमिन्द्रियाणि, ततः समुद्घाताः, ततः किं संज्ञिनोऽसंज्ञिनो वा ? इति वक्तव्यं, तदनन्तरं वेदो वक्तव्यः, ततः पर्याप्तयो यथा कति पर्याप्तयः सूक्ष्मपृथिवीकायिकानाम् ? इत्यादि। पर्याप्तिग्रहणमुपलक्षणं तेन तत्प्रतिपक्षभूता अपर्याप्तयोऽपि वक्तव्या इति द्रष्टव्यं, तदनन्तरं दृष्टिर्वक्तव्या, ततो दर्शनं, तदनन्तरं ज्ञानं, ततो योगः, तत उपयोगः, तथा किमाहारमाहारयन्ति सूक्ष्मपृथिवीकायिकाः ? इत्यादि वक्तव्यं, तदनन्तरमुपपातः, ततः स्थिति, ततः समुद्घातः समुद्घातमधिकृत् मरणं वक्तव्यमित्यर्थः, तदनन्तरं च्यवनं, ततो गत्यागती इति, इति सर्वसङ्ख्यया त्रयोविंशतिर्द्वाराणि, तत्र प्रथमद्वारव्याख्यानार्थमाह–

मू. (१४) *तेसि णं भंते ! जीवाणं कतिसरीरया पन्नत्ता, गोयमा ! तओ सरीरगा पं०, तं०–ओरालिए तेयए कम्मए। तेसि णं भंते ! जीवाणं केमहालिया सरीरोगाहणा पं०, गो० ! जहन्नेणं अंगुलासंखेज्जतिभागं उक्कोसेणवि अंगुलासंखेज्जतिभागं।*

तेसि णं भंते ! जीवाणं सरीरा किंसंघयणा पन्नत्ता ?, गोयमा ! छेवट्ठसंघयणा पन्नत्ता।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसि णं भंते ! सीरा किंसंठिया पं० ?, गोयमा ! मसूरचंदसंठिता पन्नत्ता ।

तेसि णं भंते ! जीवाणं कति कसाया पन्नत्ता ?, गोयमा ! चत्तारि कसाया पन्नत्ता, तंजहा–कोहकसाए मानकसाए मायाकसाए लोहकसाए । तेसि णं भंते ! जीवाणं कति सण्णा प० ?, गोयमा ! चत्तारि पण्० तंजहा– आहारसण्णा जाव परिग्गहसन्ना ।

तेसि णं भंते ! जीवाणं कति लेसाओ पन्नत्ताओ ?, गोयमा ! तिन्नि लेस्सा प०तं० किण्हलेस्सा नीललेसा काउलेसा । तेसि णं भंते ! जीवाणं कति इंदियाइं पन्नत्ताइं ?, गोयमा ! एगे फासिंदिए पन्नत्ते । तेसि णं भंते ! जीवाणं कति समुग्घाया पन्नाा ?, गोयमा ! तओ समुग्घाया प० तं० वेयणासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए ।

ते णं भंते ! जीवा किं सन्नी असन्नी ?, गोयमा ! नो सन्नी असन्नी । ते णं भंते ! जीवा किं इत्थिवेया पुरिसवेया नपुंसगवेया ?, गोयमा ! नो इत्थिवेया नो पुरिसवेया नपुंसगवेया ।

तेसि णं भंते ! जीवाणं कति पज्जत्तीओ पन्नत्ताओ ?, गोयमा ! चत्तारि पज्जत्तीओ पन्नत्ताओ, तंजहा–आहारपज्जत्ती सरीरपज्जत्ती इंदियपज्जत्ती आणपाणुपज्जत्ती । तेसि णं भंते ! जीवाणं कति अपज्जत्तीओ पन्नत्ताओ ?, गोयमा ! चत्तारि अपज्जत्तीओ पन्नत्ताओ, तंजहा–आहार-अपज्जत्ती जाव आणापाणुअपज्जत्ती ।

ते णं भंते ! जीवा किं सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी ?, गोयमा ! नो सम्मदिट्ठी मिच्छादिट्ठी नो सम्ममिच्छादिट्ठी ।। ते णं भंते ! जीवा किं चक्खुदंसणी अचक्खुदंसणी ओहिदंसणी केवलदंसणी ?, गोयमा ! नो चक्खुदंसणी अचक्खुदंसणी नो ओहिदंसणी नो केवलदंसणी ।।

ते णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नो नाणी अन्नाणी, नियमा दुअन्नाणी, तंजहा–मतिअन्नाणी सुयअन्नाणी य ।। ते णं भंते ! जीवा किं मनजोगी वयजोगी कायजोगी ?, गो० ! नो मनजोगी नो वयजोगी कायजोगी । ते णं भंते ! जीवा किं सागारोवउत्ता अनागारोवउत्ता ?, गोयमा ! सागारोवउत्तावि अनागारोवउत्तावि ।। ते णं भंते ! जीवा किमाहारमाहारेंति ?, गोयमा ! दव्वतो अनंतपदेसियाइं खेत्तओ असंखेज्जपदेसोगाढाइं कालओ अन्नयर समयट्ठितीयाइं भावतो वण्ण(मं)ताइं गंध(मं)ताइं रस(मं)ताइं फासव मंताइं ।

जाइं भावओ वण्णमंताइं आ०, ताइं किं एगवण्णाइं आ० दुवण्णाइं आ० तिवण्णाइं आ० चउवण्णाइं आ० पंचवण्णाइं आ० ?, गोयमा ! ठाणमग्गणं पडुच्च एगवण्णाइंपि दुवण्णाइंपि तिवण्णाइंपि चउवण्णाइंपि पंचवण्णाइंपि आ०, विहाणमग्गणं पडुच्च कालाइंपि आ० जाव सुक्कलाइंपि आ०, जाइं वण्णओ कालाइं आ० ताइं किं एगगुणकालाइं आ० जाव अनंतगुणकालाइं आ० ?, गोयमा ! एगगुणकालाइंपि आ० जाव अनंतगुणकालाइंपि आ० एवं जाव सुक्कलाइं ।

जाइं भावतो गंधमंताइं आ० ताइं किं एगगंधाइं आ० दुगंधाइं आ० ?, गोयमा ! ठाणमग्गणं पडुच्च एगगंधाइंपि आ० दुगंधाइंपि आ०, विहामग्गणं पडुच्च सुब्भिगंधाइंपि आ० दुब्भिगंधाइंपि आ०, जाइं गंधतो सुब्भिगंधाइं आ० ताइं किं एगगुणसुब्भिगंधाइं आ० जाव अनंतगुणसुरभिगंधाइं आ० ?, गोयमा ! एगगुणसुब्भिगंधाइंपि आ० जाव अणंतगुणसुब्भिगंधाईपि, आ० एवं दुब्भिगंधाइंपि ।। रसा जहा वण्णा । जाइं भावतो फासमंताइं आ० ताइं किं एगफासाइं आ० जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अट्ठफासाइं आ० ?, गोयमा ! ठाणमग्गणं पडुच्च नो एगफासाइं आ० नो दुफासाइं आ० नो तिफासाइं आ० चउफासाइं आ० पंचफासाइंपि जाव अट्ठफासाइंपि आ०, विहाणमग्गणं पडुच्च कक्खडाइंपि आ० जाव लुक्खाइंपि आ०, जाइं फासतो कक्खडाइं आ० ताइं किं एगगुणकक्खडाइं आ० जाव अनंतगुणकक्खडाइं आ० ?, गोयमा ! एगगुणकक्खडाइंपि आ० जाव अनंतगुणकक्खडाइंपि आ० एवं जाव लुक्खा नेयव्वा ।

ताइं भंते ! किं पुट्ठाइं आ० अपुट्ठाइं आ० ?, गोयमा ! पुट्ठाइं आ० नो अपुट्ठाइं आ०, ताइं भंते ! ओगाढाइं आ० अनोगाढाइं आ० ?, गोयमा ! ओगाढाइं आ० नो अणोगाढाइं आ०, ताइं भंते ! किमंतरोगाढाइं आ० परंपरोगाढाइं आ० ?, गोयमा ! अणंतरोगाढाइं आ० नो परंपरोगाढाइ आ०, ताइं भंते ! किं अणूइं आ० बायराइं आ० ?, गोयमा ! अणूइंपि आ० बायराइंपि आहारेंति

ताइं भंते ! उड्ढं आ० अहे आ० तिरियं आहारेंति ?, गोयमा ! उड्ढंपि आ० अहवि आ० तिरियंपि आ०, ताइं भंते ! किं आइं आ० मज्झे आ० पज्जवसाणे आहारेंति ?, गोयमा ! आदिंपि आ० मज्झेवि आ० पज्जवसाणेवि आ०, ताइं भंते ! किं सविसए आ० अविसए आ० ?, गोयमा ! सविसए आ० नो अविसए आ०, ताइं भंते ! किं आणुपुव्विं आ० अनानुपुव्विं आहारेंति ?, गोयमा ! आनुपुव्विं आहारेंति नो अनानुपुव्विं आहारेंति ।

ताइं भंते ! किं तिदिसिं आहारेंति चउदिसिं आहारेंति पंचदिसिं आहारेंति छदिसिं आहारेंति ?, गोयमा ! निव्वाघाएणं छदिसिं, वाघातं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं, उस्सन्नकारणं पडुच्च वण्णतो काला नीला जाव सुक्किलाइं, गंधतो सुब्भिगंधाइं दुब्भिगंधाइं, रसतो जाव तित्तमहुराइं, फासतो कक्खडमउयजाव निद्धलुक्खाइं, तेसिं पोराणे वण्णगुणे विप्परिणामइत्ता परिपालइत्ता परिसाडइत्ता परिविद्धंसइत्ता अन्ने अपुव्वे वण्णगुणे गंधगुणे जाव फासगुणे उप्पाइत्ता आतसरीरओगाढा पोग्गले सव्वप्पणयाए आहारमाहारेंति ।

ते णं भंते ! जीवा कतोहिंतो उववज्जंति ? किं नेरइएहिंतो उववज्जंति तिरिक्खमणुस्सदेवेहिंतो उववज्जंति ?, गोयमा ! नो नेरइएहिंतो उववज्जंति, तिरिक्खजोणिएहिंतो उववज्जंति मणुस्सेहिंतो उववज्जंति, नो देवेहिंतो उव्वज्जंति, तिरिक्खजोणियपज्जत्तापज्जत्तेहिंतो असंखेज्जवासाउयवज्जेहिंतो उववज्जंति, मणुस्सेहिंतो अकम्मभूमिगअसंखेज्जवासाउयवज्जेहिंतो उववज्जंति, वक्कंतीउववाओ भाणियव्वो ।तेसि णं भंते ! जीवाणं केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं ।। ते णं भंते ! जीवा मारणंतियसमुग्घातेणं किं समोहया मरंति असमोहया मरंति ? गोयमा ! समोहयावि मरंति असमोहयावि मरंति ।

ते णं भंते ! जीवा अनंतरं उव्वट्टित्ता कहिं गच्छंति ? कहिं उववज्जंति ? –किं नेरइएसु उववज्जंति तिरिक्खजोणिएसु उ० मणुस्सेसु उ० देवेसु उवव० ?, गोयमा ! नो नेरइएसु उववज्जंति तिरिक्खजोणिएसु उ० मणुस्सेसु उ० नो देवेसु उवव० । किं एगिंदिएसु उववज्जंति जाव पंचिंदिएसु उ० ?, गोयमा ! एगिंदिएसु उववज्जंति जाव पंचेंदियतिरिक्खजोणिएसु उववज्जंति, असंखेज्जवासाउयवज्जेसु पज्जत्तापज्जत्तएसु उव०, मणुस्सेसु अकम्मभूमगअंतरदीवगअसंखेज्जवासाउयवज्जेसु पज्जत्तापज्जत्तएसु उव० ते णं भंते ! जीव कतिगतिका कतिआगतिका पन्नत्ता ?, गोयमा ! दुगतिया दुआगतिया, परित्ता असंखेज्जा पन्नत्ता समणाउसो !, से त्तं सुहुमपुढविक्काइया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'तेषां' सूक्ष्मपृथिवीकायिकानां णमिति वाक्यालङ्कारे 'भदन्त !' परमकल्याणयोगिन् कति शरीराणि प्रज्ञप्तानि ?, अथ कः कमेवमाह ?, उच्यते, भगवान् गौतमो भगवन्तं श्रीमन्महावीरं, कथमेतद् विनिश्चीयते इति चेद्, उच्यते, निर्वचनसूत्रात्, ननु गौतमोऽपि भगवान् उपचितकुशलमूलो गणधरस्तीर्थकरभाषित मातृकापदत्रयश्रवणमात्रावाप्तप्रकृष्ट श्रुतज्ञानावरणक्षयोपशमश्चतुर्दशपूर्वविद् विवक्षितार्थपरिज्ञानसमन्वित एव ततः किमर्थं पृच्छति ?

तथाहि–न चतुर्दशपूर्वविदः प्रज्ञापनीयं किञ्चिदविदितमस्ति, विशेषतः सर्वाक्षरसंनिपातिनः संभिन्नश्रोतसो भगवतो गणभृतः सर्वोत्कृष्टश्रुतलब्धिसमन्वितस्य गौतमस्य, उक्तं च–

॥ १ ॥ "संखातीते वि भवे साहइ जं वा परो उ पुच्छेज्जा ।
न य णं अणाइसेसी वियाणई एस छउमत्थो ॥"

उच्यते, शिष्यसंप्रत्ययार्थं, तथाहि–जानन्नेवभगवान् अन्यत्र विनेयेभ्यः प्रतिपाद्य तत्संप्रत्ययनिमित्तं भूयोऽपि भगवन्तं पृच्छतीति, अथवा गणधरप्रश्नतीर्थकरनिर्वचनरूपं किञ्चित्सूत्रमितीत्थमधिकृतसूत्रकारः सूत्रं रचितवान्, यदिवा समवति भगवतोऽपि स्वल्पोऽनाभोगः छद्मस्थत्वादिति पृच्छति, उक्तं च–

॥ १ ॥ "न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति ।
ज्ञानावरणीयं हि ज्ञानावरणीयं हि ज्ञानावरणप्रकृति कर्म ॥"

इति कृतं प्रसङ्गेन, प्रस्तुतमुच्यते, भगवानाह–गोयमेत्यादि, अनेन लोकप्रथितमहागोत्रविशिष्टाभिधाययेनामन्त्रणध्वनिनाऽऽमन्त्रयन्निदं ज्ञापयति–प्रधानासाधारणगुणेनोत्साह्य विनेयस्य धर्म कथनीयः, इत्थमेव सम्यकप्रतिपत्तियोगादिति, त्रीणि शरीराणि प्रज्ञप्तानि, इह शरीराणि पञ्च भवन्ति, तद्यथा–औदारिकं वैक्रियमाहारकं तैजसं कार्मणं च, तत्रोदारं–प्रधानं, प्राधान्यं चास्य तीर्थकरगणधरशरीराण्यधिकृत्य, ततोऽन्यस्यानुत्तरसुरशरीस्यापि अनन्तगुणहीनत्वात्, यद्वा उदारं सातिरेकयोजनसहस्रमानत्वात् शेषशरीरापेक्षया बृहत्प्रधानं, बृहत्ता चास्य वैक्रियं प्रति भवधारणीयसहजशरीरापेक्षया द्रष्टव्या, अन्यथोत्तरवैक्रियं योजनलक्षमानमपि लभ्यते, उदारमेव औदारिकं, विनयादिपाठादिकण् १ ।

तथा विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियं, तथाहि–तदेकं भूत्वाऽनेकं भवति अनेकं भूत्वा एकं तथाऽणु भूत्वा महद्भवति महच्च भूत्वाऽणु तथा खचरं भूत्वा भूमिचरं भवति भूमिचरं भूत्वा खचरं तथा दृश्यं भूत्वाऽदृश्यं भवति अदृश्यं भूत्वा दृश्यमिति, तच्च द्विविधम्–औपपातिकं लब्धिप्रत्ययं च, तत्रोपपातिकमुपपातजन्मनिमित्तं, तच्च देवनारकाणां, लब्धिप्रत्ययं तिर्यग्मनुष्याणां २, तथा चतुर्दशपूर्वविदां तीर्थकरस्फादिदर्शनादिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाह्रियते–निर्वर्त्यते इत्याहारकं, 'कृद्बहुल्कमिति वचनात्कर्मणि वुञ्, यथा पादहारक इत्यत्र, उक्तं च–

॥ १ ॥ "कज्जंमि समुप्पन्ने सुयकेवलिणा विसिट्ठलद्धीए ।
जं एत्थ आहरिज्जा भणंति आहारगं तं तु ॥

–कार्यं चेदम्–

॥ १ ॥ "पाणिदयरिद्धिदंसण सुहुमपयत्थावगाहहेउं वा ।
संसयवोच्छेयत्थं गमणं जिनपायमूलंमि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतच्चाहारकं कदाचनापि लोके सर्वथाऽपि न भवति, तच्चाभवनं जघन्यत एकं समय-मुत्कर्षतः षण्मासान् यावत्, उक्तं च–

॥ १ ॥ "आहारगाइ लोगे छम्मासा जा न होंतिवि कयाइं ।
उक्कोसेणं नियमा एक्कं समयं जहन्नेणं ॥"

आहारकं च शरीरं वैक्रियशरीरापेक्षयाऽयन्मशुभं स्वच्छस्फटिकशिलेव शुभ्रपुद्गल-समूहात्मकं ३, तथा तेजसां–तेजःपुद्गलानां विकारस्तैजसं 'विकार' इत्यण्, तत् औष्मलिङ्गं भुक्ताहारपरिणमनकारणं, ततश्च विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमः, उक्तं च–

॥ १ ॥ "सव्वस्स उम्हसिद्धं रसाइआहारपाकजणगं च ।
तेयगलद्धिनिमित्तं च तेयगं हइ नायव्वं ॥" ४ ।

तथा कर्मणो जातं कर्मजं, किमुक्तं भवति ? – कर्मपरमाणव एवात्मप्रदेशैः सह क्षीरनीर-वदन्योऽन्यानुगताः सन्तः शरीररूपतया परिणताः कर्मजं शरीरमिति, अत एवैतदन्यत्र कार्मणमि-त्युक्तं, कर्मणो विकारः कार्मणमिति, तथा चोक्तम्–

॥ १ ॥ "कम्मविकारो कम्मणमट्ठविहविचित्तकम्मनिष्फन्नं ।
सव्वेसिं सरीराणं कारणभूयं मुणेयव्वं ॥

अत्र 'सव्वेसि' मति सर्वेषामौदारिकादीनां शरीराणां कारणभूतं–बीजभूतं कार्मणं शरीरं, न खल्वामूलमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषिशेषशरीरप्रादुर्भावः, इदं च कर्मजं शरीरं–बीजभूतं कार्मणं शरीरं, न खल्वामूलमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषि शेषशरीरप्रादुर्भावः, इदं च कर्मजं शरीरं जन्तोर्गत्यन्तरसङ्क्रान्तौ साधकतमं कारणं, तथाहि–कर्मजेनैव वपुषा तैजससहितेन परिकरितो जन्तुर्मरणदेशमपहायोत्पत्तिदेशमभिसर्पति, ननु यदि तैजससहितकार्मण वपुःपरिकरितो गत्यन्तरं संक्रमति तर्हि स गच्छन्नागच्छन् कस्मान्न दृष्टिपथमव-तरति ?, उच्यते, कर्मपुद्गलानां तैजसपुद्गलानां चातिसूक्ष्मतया चक्षुरादीन्द्रियागोचरत्वात्, तथा च परतीर्थिकैरप्युक्तम्–

॥ १ ॥ "अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलभ्यते ।
निष्क्रामन् प्रविशन् वाऽपि, नाभावोऽनीक्षणादपि ॥"

एतेषां पञ्चानां शरीराणां मध्ये यानि त्रीणि शरीराणि सूक्ष्मपृथिवीकायिकानां तानि नामग्राह-मुपदर्शयति– तंजहा–ओरालिए तेयए कम्मए, वैक्रियाहारके तु तेषां न संभवतो, भवस्वभावत एव तल्लब्धिशून्यत्वात् । अधुनाऽवगाहनाद्वारमाह– 'तेसिणं भंते !' इत्यादि सुगमं, नवरं जघन्य-पदोत्कृष्टपदयोस्तुल्यश्रुतावपि जघन्यपदादु- त्कृष्टपदमधिकमवसातव्यम् ।

संहननद्वारमाह–तेसिणमित्यादि, तेषां भदन्त ! जीवानां शरीरकाणि किंसंहननानि प्रज्ञप्तानि ?, संहननं नामास्थिनिचयरूपं, तच्च षोढा, तद्यथा–वज्रऋषभनाराचं ऋषभनाराचं नाराचमर्द्धनाराचं कीलिका छेदवर्त्ति च, तत्र वज्रं–कीलिका ऋषभः–परिवेष्टनपट्टः नाराचस्तूभयतो मर्कटबन्धः ततश्च द्वयोरस्थोरुभयतो मर्कटबन्धेन बद्धयोः पट्टाकृति गच्छता तृतीयेनास्था परिवेष्टित-योरुपरि तदस्थित्रयभेदि कीलिकाख्यं वज्रनामकमस्थि यत्र भवति तद्वज्रऋषभनाराचसंज्ञं प्रथमं संहननं १, यत्पुनः कीलिकारहितं संहननं तत् ऋषभनाराचं द्वितीयं संहननं २, तथा यत्रास्थोर्मर्कट-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

बन्ध एव केवलस्तन्नाराचसंज्ञं तृतीयं संहननं ३, यत्र पुनरेकपार्श्वे मर्कटबन्धो द्वितीये च पार्श्वे कीलिका तदर्द्धनाराचं चतुर्थं संहननं ४, तथा यत्रास्थीनि कीलिकामात्रबद्धानि तत्कीलिकाख्यं पञ्चमं संहननं ५, तथा यत्रास्थीनि परस्परं छेदेन वर्त्तन्ते न कीलिकामात्रेणापि बन्धस्तत् षष्ठं छेदवर्त्ति, तच्च प्रायो मनुष्यादीनां नित्यं स्नेहाभ्यङ्गादिरूपां परिशीलानामपेक्षते ६ ।

इत्थं षोढा संहननसम्भवे संशयः—तेषां शरीराणि किंसंहननानि प्रज्ञप्तानि ? इति, भगवानाह गौतम ! छेदवर्त्तिसंहननानि प्रज्ञप्तानि, अयमत्राभिप्रायः—यद्यपि सूक्ष्मपृथिवीकायिकानामस्थ्यभावस्तथाऽप्यौदारिकशरीरिणामस्थ्यात्मकेन संहननेन यः शक्तिविशेष उपजायते सोऽप्युपचारात्संहननमिति व्यवह्रियते, शक्तिविशेषश्चात्यन्तमल्पीयान् सूक्ष्मपृथिवीकायिकानामप्यत्योदारिकशरीरित्वात्, जघन्यश्च शक्तिविशेषश्छेदवर्त्तिसंहननविषय इति तेषामपि छेदवर्त्तिसंहननमुक्तम् ।। गतं संहननद्वारं, सम्प्रति संस्थानद्वारमाह—

'तेसिणं भंते !' इत्यादि सुगमं, नवरं 'मसूरगचंदसंठिया' इति, मसूरकाख्यस्य—धान्यविशेषस्य यच्चन्द्राकृति दलं स मसूरकचन्द्रस्तद्वदनुसंस्थितानि मसूरकचंद्रसंस्थितानि, अत्रायं भावार्थ—इह जीवानां षट् संस्थानानि, तानि च समचतुरस्रादीनि वक्ष्यमाणलक्षणानि, तेषामाद्यानि पञ्च संस्थानानि मसूरचन्द्रकाकारे न संभवन्ति, तल्लक्षणायोगात्, तत इदं मसूरचन्द्रकाकारं संस्थानं हुण्डं प्रतिपत्तव्यं, सर्वत्रासंस्थितत्वरूपस्य तल्लक्षणस्य योगात्, जीवनां संस्थानान्तराभावाच्च, आह च मूलटीकाकारः—"संस्थानं मसूरचन्द्रकसंस्थितमपि हुण्डं, सर्वत्रासंस्थितत्वेन तल्लक्षणयोगात्, जीवानां संस्थानान्तराभावाच्चे"ति ।।गतं संस्थानद्वारमधुना कषायद्वारमाह—

'तेसि णं भंते !' इत्यादि, तेषां भदन्त ! सूक्ष्मपृथ्वीकायिकानां कति कषायाः प्रज्ञप्ताः ?, तत्र कषाया नाम कष्यन्ते—हिंस्यन्ते परस्परमस्मिन् प्राणिन इति कषः—संसारस्तमयन्ते—गच्छन्त्येभिर्जन्तव इति कषायाः—क्रोधादयः परिणामविशेषाः, तथा चाह—'गोयमे'त्यादि सुगमं, नवरं क्रोधः—अप्रतीपरिणामः मानो—गर्वपरिणामः माया—निकृतिरूपा लोभो—गार्द्ध्यलक्षणः, एते च क्रोधादयोऽमीषां मन्दपरिणामतयाऽनुपदर्शितबाह्यशरीरविकारा एवानाभोगतस्तथा तथा वैचित्र्येण भवन्तः प्रतिपत्तव्याः । गतं कषायद्वारं संज्ञाद्वारमाह—

'तेसिण' मित्यादि सुगमं, नवरं संज्ञानं सज्ञा, सा च द्विधा—ज्ञानरूपाऽनुभवरूपा च, तत्र ज्ञानरूपा मतिश्रुतावधिमनःपर्यायकेवलभेदात्पञ्चप्रकारा, तत्र केवलसंज्ञा क्षायिकी शेषास्तु क्षायोपशमिक्यः, अनुभवसंज्ञा—स्वकृतासातवेदनीयादिकर्मविपाकोदयसमुत्था, इह प्रयोजनमनुभवसंज्ञया, ज्ञानसंज्ञायास्तद्वारेण परिगृहीतत्वात्, तत्राहारसंज्ञाआ नाम आहाराभिलाषः क्षुद्वेदनीयप्रभवः स्वल्वात्मपरिणामविशेषः, एषा चासातवेदनीयोदयादुपजायते, 'भयसंज्ञा' भयवेदनीयोदयजनितत्रासपरिणामरूपा, 'परिग्रहसंज्ञा' लोभविपाकोदयसमुत्थ- मूर्च्छापरिणामरूपा, 'मैथुसंज्ञा' वेदोदयजनिता मैथुनाभिलाषः, एताश्चतस्रोऽपि मोहनीयोदय- प्रभवाः, एता अपि सूक्ष्मपृथ्वीकायिकानामव्यक्तरूपाः प्रतिपत्तव्याः ।

गतं संज्ञाद्वारमधुना लेश्याद्वारमाह—'तेसिणमित्यादि सुगमं, नवरं लिश्यति—श्लिष्यते आत्मा कर्मणा सहानयेति लेश्या—कृष्णादिद्रव्यसाचिव्यादात्मनः शुभाशुभपरिणामः, उक्तं च—

॥ १ ॥ "कृष्णादिद्रव्यसाचिव्यात्परिणामो य आत्मनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रवर्त्तते ॥''

सा च षोढा, तद्यथा–कृष्णलेश्या नीललेश्या कापोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या च, आसां च स्वरूपं जम्बूफलाखादकषट्पुरुषदृष्टान्तेनैवावसातव्यम्–

॥ १ ॥ ''पंथाओ परिभट्ठा छप्पुरिसा अडविमज्झयारंमि ।
जंबूतरुस्स हेट्ठा परोप्परं ते विचिंतेति ॥

॥ १ ॥ निम्मूलखंधसाला गोच्छे पक्के य पडियसडियाइं ।
जह एएसिं भावा तह लेसाओवि नायव्वा ॥

अमीषां च सूक्ष्मपृथिवीकायिकानामतिसंक्लिष्टपरिणामत्वाद्देवेभ्यः सूक्ष्मेष्वनुत्पादाच्चाद्या एव तिस्रः कृष्णनीलकापोतरूपा लेश्याः, न शेषा इति ।

गतं लेश्याद्वारमिदानीमिन्द्रियद्वारमाह–'तेसिण'मित्यादि, इन्द्रियं नाम 'इदु परमैश्वर्ये' 'उदितः' इति नम्, इन्दनादिन्द्रः–आत्मा सर्वोपलब्धिरूपपरमैश्वर्ययोगात् तस्य लिङ्गं–चह्लमविना-भावि इन्द्रियम्, 'इन्द्रिय'मिति निपातनसूत्राद्रूपनिष्पत्ति, तत्पञ्चधा, तद्यथा–श्रोत्रेन्द्रियं चक्षुरिन्द्रियं जिह्वेन्द्रियं घ्राणेन्द्रियं स्पर्शनेन्द्रियं च, एकैकमपि द्विधा–द्रव्येन्द्रियं भावेन्द्रियं च, द्रव्येन्द्रियं द्विधा–निर्वृत्तिरूपमुपकरणरूपं च, तत्र निर्वृत्तिर्नाम प्रतिविशिष्टः संस्थानविशेषः, साऽपि द्विधा–बाह्याऽभ्यन्तरा च, तत्र बाह्या कर्णपर्पटिकादिरूपा, सा च विचित्रा न प्रतिनियतरूपतया निर्देष्टुं शक्यते, तथाहि–मनुष्यस्य श्रोत्रे नेत्रयोरुभयपार्श्वतोभाविनी भ्रुवावुपरितनश्रवणबन्धापेक्षया समे, वाजिनो नेत्रयोरुपरि तीक्ष्णे चाग्रभागे इत्यादि, अभ्यन्तरा तु निर्वृत्ति सर्वेषामप्येकरूपा, तामेवाधिकृत्य चामूनि सूत्राणि प्रावर्त्तिषत–

''सोइंदिए णं भंते किंसंठाणसंठिए पन्नत्ते ?, गोयमा ! कलंबुयासंठाणसंठिए पन्नत्ते, चक्खिदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोयमा ! मसूरचंदसंठाणसंठिए पन्नत्ते, घाणिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोयमा ! अइमुत्तसंठाणसंठिए पन्नत्ते, जिब्भिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोयमा ! खुरप्पसंठाणसंठिए पन्नत्ते, फासिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोयमा ! नाणासंठाणसंठिए पन्नत्ते ॥'' इति ।

इह स्पर्शनेन्द्रियनिर्वृत्तेः प्रायो न बाह्याभ्यन्तरभेदः, तत्वार्थमूलटीकायामनभ्युपगमात्, उपकरणं नाम खड्गस्थानीयाया बाह्यनिर्वृत्तेर्या खड्गधारास्थानीया स्वच्छतरपुद्गलसमूहात्मि-काऽभ्यन्तरा निर्वृत्तिस्तस्याः शक्तिविशेषः, इदं चोपकरणरूपं द्रव्येन्द्रियमान्तरनिर्वृत्तेः कथञ्चिदर्थान्तरं, शक्तिशक्तिमतोः कथञ्चिद्भेदात्, कथञ्चिद्भेदश्च सत्यामपि तस्यामान्तरनिर्वृत्तौ द्रव्यादिनोपकरणस्योपघातसम्भवात्, तथाहि– सत्यामपि कदम्बपुष्पाद्याकृतिरूपायामान्तरायां निर्वृत्तौ महाकठोरतरघनगर्जितादिना शक्त्युपघाते सति न परिच्छेत्तुमीशते जन्तवः शब्दादिकमिति, भावेन्द्रियमपि द्विधा–लब्धिरुपयोगश्च, तत्र लब्धिः श्रोत्रेन्द्रियादिविषयस्तदावरणक्षयोपशमः, उपयोगः स्वस्वविषये लब्ध्यनुसारेणात्मनः परिच्छेदव्यापारः, तत्र यद्यपि द्रव्यरूपं भावरूपं चेत्थमिन्द्रियमनेकप्रकारं तथाऽपीह बाह्यनिर्वृत्तिरूपमिन्द्रियं पृष्टमवगन्तव्यं, तदेवाधिकृत्य व्यवहारप्रवृत्तेः, तथाहि–बकुलादयः पञ्चेन्द्रिया इह भावेन्द्रियपञ्चकविज्ञानसमन्विता अनुमानत प्रतीयन्ते तथाऽपि न ते पञ्चेन्द्रिया इथि व्यवह्रियन्ते, बाह्येन्द्रियपञ्चकासम्भवात्, उक्तं च–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "पंचेंदिओ उ बउल नरो व्व सव्वविसओवलंभाओ।
तहवि न भण्णइ पंचिंदिउ त्ति बज्झिंदियाभावा ॥"

–ततो द्रव्येन्द्रियमधिकृत्य निर्वचनसूत्रमाह–'गोयमे'त्यादि सुगमम्।

गतमिन्द्रियद्वारमधुना समुद्घातद्वारं, तत्र समुद्घाताः सप्त, तद्यथा–वेदनासमुद्घातः १ कषायसमुद्घातः २ मारणसमुद्घातः ३ वैक्रियसमुद्घातः ४ तैजससमुद्घातः ५ आहारकसमुद्घातः ६ केवलिसमुद्घातश्च ७, तत्र वेदनायाः समुद्घातो वेदनासमुद्घातः, स चासातवेदनीयकर्माश्रयः १, कषायेण–कषायोदयेन समुद्घातः कषायसमुद्घातः, स च कषायचारित्रमोहनीयकर्माश्रयः २, मरणे भवो मारणः, स चासौ समुद्घातश्च मारणसमुद्घातः ३, वैक्रिये प्रारभ्यमामे समुद्घातो वैक्रियसमुद्घातः, स च वैक्रियशरीरनामकर्माश्रयः ४, (तैजसेन हेतुभूतेन समुद्घातस्तैजसमुद्घातः तैजसशरीरनामकर्माश्रयः) ५, आहारके प्रारभ्यमाणे समुद्घात आहारकसमुद्घातः, स चाहारकशरीरनामकर्माश्रयः ६, केवलिनि अन्तर्मुहूर्तभाविपरमपदे समुद्घातः केवलिसमुद्घातः ७।

अथ समुद्घात इति कः शब्दार्थ ?, उच्यते–समिति–एकीभावे उत्–प्राबल्ये एकीभावेन प्राबल्येन घातः समुद्घातः, केन सह एकीभावगमनम् ? इति चेद्, उच्यते, अर्थाद्वेदनादिभिः, तथाहि–यदा आत्मा वेदनादिसमुद्घातगतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवति नान्यज्ञानपरिणतः, प्राबल्येन घातः कथम् ? इति चेद्, उच्यते, इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मपुद्गलान् कालान्तरानुभवयोग्यानुदीरणाकरणेनाकृष्योदयावलिकायां प्रक्षिप्यानुभूयानुभूय निर्जरयति, आत्मप्रदेशेभ्यः शातयतीति भावः, तत्र वेदनासमुद्घातगत आत्म वेदनीयकर्मपुद्गलपरिशातं करोति, तथाहि–वेदनाकरालितो जीवः स्वप्रदेशानन्तानन्तकर्मपरमाणुवेष्टितान् शरीराद्बहिरपि विक्षिपति, तैश्च प्रदेशैर्वदनजघनादिरन्ध्राणि कर्णस्कन्धाद्यन्तरालानि चापूर्यायामतो विस्तरतश्च शरीरमात्रं क्षेत्रमभिव्याप्यान्तर्मुहूर्त्तं यावदवतिष्ठते, तस्मिंश्चान्तर्मूहूर्त्ते प्रभूतासातवेदनीयकर्मपुद्गलपरिशातं करोति, कषायसमुद्घातसमुद्धतः कषायाख्यचारित्रमोहनीयकर्मपुद्गलपरिशातां करोति।

तथाहि–कषायोदयसमाकुलो जीवः स्वप्रदेशान् बहिर्विक्षिप्य तैर्वदनोदरादिरन्ध्राणि कर्णस्कन्धायन्तरालानि चापूर्यायामविस्तराभ्यां देहमात्रं क्षेत्रमभिव्याप्य वर्त्तते, तथाभूतश्च प्रभूतकषायकर्मपुद्गलपरिशातं करोति, एवं मरणसमुद्घातगत आयुःकर्मपुद्गलपरिशातं करोति, वैक्रियसमुद्घातगतः पुनर्जीवः स्वप्रदेशान् शरीराद्बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमानमायामतः सङ्ख्येययोजनप्रमाणं दण्डं निसृजति, निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्मपुद्गलान् प्राग्बद्धान् शातयति, तथा चोक्तम्–"वेउव्वियसमुग्घाए णं समोहणइ २ त्ता संखिज्ज़ाइं जोयणाइं दंडं निसिरइ, निसिरित्ता अहाबायरे पुग्गले परिसाडेइ" इति।

तैजसाहारकसमुद्घातौ वैक्रियसमुद्घातवदवसाव्यौ, केवलं तैजससमुद्घातगतस्तैजशरीरनामकर्मपुद्गलपरिशातं करोति, आहारकसमुद्घातगत आहारकशरीरनामकर्मपुद्गलपरिशातं करोति, केवलिसमुद्घातसमुद्धतस्तु केवली सदसद्वेदनीयशुभाशुभनामोच्चनीचैर्गोत्रकर्मपुद्गलपरिशातं (करोति), केवलिसमुद्घातवर्जा शेषाः षडपि समुद्घातः प्रत्येकमान्तर्मौहूर्त्तिकाः, केवलिसमुद्घातः पुनरष्टसामयिकः, उक्तं च प्रज्ञापनायाम्–"वेयमासमुग्घाए णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कइसमइए पन्नत्ते ?, गोयमा ! असंखेज्जसमइए अंतमुहुत्ते, एवं जाव आहारगसमुग्घाए।

केवलिसमुग्घाए णं भंते ! कइसमइए पन्नत्ते ?, गोयमा ! अट्ठसमइए पन्नत्ते ॥'' इति, तदेवमनेकसमुद्घातसम्भवे सूक्ष्मपृथिवीकायिकानां तान् पृच्छति–'तेसिणं भंते' इत्याद सुगमं, नवरं वैक्रियाहारकतैजसकेवलिसमुद्घातभावो वैक्रियादिलब्ध्यभावात् ॥ गतं समुद्घातद्वारं, सम्प्रति संज्ञाद्वारमाह–'ते णं भंते' इत्यादि, 'ते' सूक्ष्मपृथिवीकायिकाः णमिति वाक्यालङ्कारे भदन्त ! किं संज्ञानोऽसंज्ञानो वा ?, संज्ञानं संज्ञा–भूतभवद्भाविभावस्वभावपर्यालोचनं सा विद्यते येषां ते संज्ञनः–विशिष्टस्मरणादिरूपमनोविज्ञानभाज इत्यर्थ, यथोक्तमनोविज्ञानविकला असंज्ञनः ?, अत्र भगवान्निर्वचनमाह–गौतम ! नो संज्ञानः, किन्त्वसंज्ञानः, विशिष्टमनोलब्ध्य-भावात्, हेतुवादोपदेशेनापि न संज्ञानः, अभिसंधारणपूर्विकायाः करणशक्तेर- भावात्, इहासंज्ञा इत्येव सिद्धे नो संज्ञान इति प्रतिषेधः प्रतिषेधप्रधानो विधिरयमिति ज्ञापनार्थ, प्रतिपाद्यस्य प्रकृतिसावद्यत्वादिति। गतं संज्ञाद्वारं, वेदनाद्वारमाह।

'ते णं भंते !' इत्यादि ॥ 'इत्थिवेयगा' इति स्त्रियाः वेदो येषां ते स्त्रीवेदकाः, एवं पुरुषवेदका नपुंसकवेदका इत्यपि भावनीयं, तत्र स्त्रियाः पुंस्यभिलाषः स्त्रवेदः, पुंसः स्त्रियामभिलाषः पुंवेदः, उभयोरप्यभिलाषो नपुंसकवेदः, भगवानाह–गौतम ! नस्त्रिवेदका न पुरुषवेदकाः, नपुंसकवेदकाः संमूर्च्छिमत्वात्, 'नारकसंमूर्च्छिमा नपुंसका' इति भगवद्वचनम् ॥ पर्याप्तिद्वारमाह–''तेसि णं भंते' इत्यादि, सुगमं, पर्याप्तिप्रतिपक्षा अपर्याप्तिस्तन्निरूपणार्थमाह–

'तेसि णं भंते !' इत्यादि पाठसिद्धं, नवरं चतस्रोऽप्यपर्याप्तयः करणापेक्षया द्रष्टव्याः, लब्ध्यपेक्षया त्वेकैव प्राणापानापर्याप्ति, यस्मादेवमागमः–इह लब्ध्यपर्याप्तका अपि नियमा-दाहारशरीरेन्द्रियपर्याप्तिपरिसमाप्तावेव म्रियन्ते नार्वाक्, यत आगामिभवायुर्बद्धा म्रियन्ते सर्व एव देहिनः, तच्चाहारशरीरेन्द्रियपर्याप्तानामेव बन्धमायातीति ॥ सम्प्रति दृष्टिद्वारमाह–

'ते णं भंते !' इत्यादि सुगमं, नवगं सम्यग्–अविपरीता दृष्टि–जिनप्रणीतवस्तुतत्वप्रति-पत्तिर्येषां ते सम्यग्दृष्टयः, मिथ्या–विपर्यस्ता दृष्टिर्येषां भक्षितहृत्पूरपुरुषस्य सिते पीतप्रतिपत्तिवत् मिथ्यादृष्टयः, एकान्तसम्यग्रूपमिथ्यारूपप्रतिपत्तिविकलाः सम्यग्मिथ्यादृष्टयः, निर्वचनसूत्रं– 'गोयमे'त्यादि, सुगमं, नवरं सम्यग्दृष्टित्वप्रतिषेधः सासादनसम्यक्त्वस्यापि तेषामसम्भवात्, सासादनसम्यक्त्ववतां तन्मध्ये उत्पादाभावात्, ते ह्यतिसंक्लिष्टपरिणामाः, सास्वादनसम्यक्त्व-परिणामस्तु मनाक् शुभ इति तन्मध्ये सासादनसम्यक्त्ववतामुत्पादाभावः, अत एव सदा संक्लिष्ट-परिणामत्वात्तेषां सम्यग्मिथ्यादृष्टित्वपरिणामोऽपि न भवति, ज्ञापि सम्यग्मिथ्यादृष्टि सन् तन्मध्ये उत्पद्यते, ''न सम्ममिच्छो कुणइ कालं'' इति वचनात्। गतं दृष्टिद्वारमधुना दर्शनद्वारमाह–

दर्शनं नाम सामान्यविशेषात्मके वस्तुनि सामान्यावबोधः, तच्चतुर्धा, तद्यथा–चक्षुर्दर्शन-मचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं च, तत्र सामान्यविशेषात्मके वस्तुनि चक्षुषा दर्शनं–रूपसामान्यपरिच्छेदश्चक्षुर्दर्शनम्, अचक्षुषा–चक्षुर्वर्जशेषेन्द्रियमनोभिर्दर्शन- मचक्षुर्दर्शनम्, अवधिरेव दर्शनं रूपिसामान्यग्रहणमवधिदर्शनं, केवलमेव दर्शन–सकलजगद्भावि- वस्तुसा-मान्यपरिच्छित्तिरूपं केवलदर्शनं, तत्र किमेषां दर्शनमिति जिज्ञासुः पृच्छति–

'ते णं भंते' इत्यादि पाठसिद्धं, नवरमचक्षुर्दर्शनित्वं स्पर्शनेन्द्रियापेक्षया, शेषदर्शनप्रतिषेधः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोबा

सुज्ञानः ॥ गतं दर्शनद्वारं, ज्ञानद्वारमाह–'ते णं भंते जीवा' इत्यादि, अज्ञानत्वं मिथ्यादृष्टित्वात्, तदपि चाज्ञानत्वं मत्यज्ञानश्रुताज्ञानापेक्षया, तथा चाह– 'नियमा दुअन्नाणी' त्यादि पाठसिद्धं, नवरं तदपि मत्यज्ञानं श्रुताज्ञानं च शेषजीवबादरादिराश्यपेक्षयाऽत्यन्तमल्पीयः प्रतिपत्तव्यं, यत उक्तम्–

॥ १ ॥ "सर्वनिकृष्टो जीवस्य दृष्ट उपयोग एष वीरेण ।
सूक्ष्मनिगोदापर्याप्तानां स च भवति विज्ञेयः ॥

॥ २ ॥ तस्मात्प्रभृति ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानाम् ।
लब्धिनिमित्तैः करणैः कायेन्द्रियवाग्मनोदृग्भिः ॥

योगद्वारमाह–'ते णं भंते' इत्यादि पाठसिद्धम् ॥ गतं योगद्वारमधुनोपयोगद्वारं, तत्रोपयोगो द्विविधः–साकारोऽनाकारश्च, तत्राकारः–प्रतिवस्तु प्रतिनियतो ग्रहणपरिणाः "आगारो उ विसेसो" इति वचनात्, सह आकारो यस्य येन वा स साकरो ज्ञानपञ्चकमज्ञानत्रिकं, यथोक्ताकारविकलोऽनाकारः, स चक्षुर्दर्शनादिको दर्शनचतुष्टयात्मकः, उक्तं च–

॥ १ ॥ "ज्ञानाज्ञाने पञ्च त्रिविकल्पे सोऽष्टधा तु साकारः ।
चक्षुरचक्षुरवधिकेवलदृग्विषयस्त्वनाकारः ॥"

तत्र क एषामुपयोगः ? इति जिज्ञासुः पृच्छति–'ते णं भंते !' इत्यादि निगदसिद्धं, नवरं साकारोपयोगोपयुक्ता मत्यज्ञानश्रुताज्ञानोपयगापेक्षया, अनाकारोपयोगोपयुक्ता अचक्षुर्दर्शनोपयोगापेक्षयेति ॥ साम्प्रतमाहारद्वारमाह–'ते णं भंते इत्यादि, 'ते' सूक्ष्मपृथिवीकायिकाः णमिति वाक्यालङ्कारे भदन्त ! जीवाः किमाहारमाहारयन्ति ?, भगवानाह–गौतम ! 'द्रव्यतो' द्रव्यस्वरूपपर्यालोचनायामनन्तप्रादेशिकानि द्रव्याणि, अन्यथा ग्रहणासम्भवात्, न हि सङ्ख्यातप्रदेशात्मका असङ्ख्यातप्रदेशात्मका वा स्कन्धा जीवस्य ग्रहणप्रयोग्या भवन्ति, क्षेत्रतोऽसङ्ख्यातप्रदेशावगाढानि, कालतोऽन्यतरस्थितिकानि–जघन्यस्थितिकानि मध्यमस्थितिकानि उत्कृष्टस्थितिकानि चेति भावार्थ, स्थितिरिति चाहारयोग्यस्कन्धपरिणामत्वेऽवस्थानं प्रत्येतव्यम् ।

आह च मूलटीकाकारः–"कालतोऽन्यतरस्थितीनि तद्भावावस्थानेन जघन्यादिरूपां स्थितिमधिकृत्ये"ति, भावतो वर्णवन्ति गन्धवन्ति रसवन्ति स्पर्शवन्ति च, प्रतिपरमाण्वेकैकवर्णगन्धरसद्विसपर्शभावात्, "एवं जहा पन्नवणाए" इत्यादि, 'एवम्' उक्तेन प्रकारेण यथा प्रज्ञापनायामष्टाविंशतितमे आहारपदे प्रथमोद्देशके तावद्वक्तव्यं यावत् "सिय तिदिसिं सिय चउदिसिं सिय पंचदिसि" मिति, तच्चैवम्–"जाइं भावतो वण्णमंताइं आहारेंति ताइं किं एगवण्णाइं आहारेंति जाव पंचवण्णाइं आहारेंति ?, गोयमा ! ठाणमग्गणं पडुच्च एगवण्णाइंपि आहारेंति जाव पंचवण्णाइं पि आहारेंति, विहाणमग्गणं पडुच्च कालवण्णाइंपि आहारेंति जाव सुक्किल्लवण्णाइंपि आहारेंति, जाइं कालवण्णाइंपि आहारेंति ताइं किं एगगुणकालाइं आहारेंति जाव दसगुणकालाइं आहारेंति संखिज्जगुणकालाइं आहारेंति असंखेज्जगुणकालाइं आहारेंति अनंतगुणकालाइं आहा० ?, गोयमा ! एगगुणकालाइंपि आहारेंति जाव अनंतगुणकालाइंपि आहारेंति एवं जाव सुक्किल्लाइंपि आहारेंति, एवं गंधतोवि रसतोवि ।

जाइं भावतो फासमंताइं आहारेंति ताइं किं एगफासाइं आहारेंति दुफासाइं आहारेंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाव अट्ठफासाइं आहारेंति ?, गोयमा ! ठाणमग्गणं पडुच्च नो एगफासाइं आहारेंति नो दुफासाइ आहारेंति नो तिफासांपि आहारेंति चउफासाइंपि आहारेंति जाव अट्ठफासाइंपि आहारेंति, विहानग्गणं पडुंच्च कक्खडाइंपि आहारेंति जाव लुक्खाइंपि आहारेंति ।। जाइं फासतो कक्खडाइंपि आहारेंति ताइं किं एगगुणकक्खडाइं आहारेंति जाव अनंतगुणकक्खडाइंपि आहारेंति ?, गोयमा ! एगगुणकक्खडाइंपि आहारेंति जाव अनंतगुणकक्खडाइंपि आहारेंति, एवं अट्ठवि फासा भाणियव्वा जाव अनंतगुणलुक्खाइंपि आहारेंति ।।

जाइं भंते ! अनंतगुणलुक्खाइं आहारेंति ताइं भंते ! किं पुट्ठाइं आहारेंति अपुट्ठाइं आहारेंति ?, गोयमा ! पुट्ठाइं आहारेंति न अपुट्ठाइं आहारेंति, जाइं पुट्ठाइं आहारेंति ताइं भंते ! किं ओगाढाइं आहारेंति अनोगाढाइं आहारेंति ?, गोयमा ! ओगाढाइं आहारेंति नो अणोगाढाइं आहारेंति, जाइं भंते ! ओगाढाइं आहारेंति तांइं किं अनंतरोगाढाइं आहारेंति परंपरोगाढाइं आहारेंति ?, गोयमा ! अनंतरोगाढाइं आहारेंति नो परंपरोगाढाइं आहारेंति, ताइं भंते ! किं अणूइं आहारेंति बायराइं आहारेंति ?, गोयमा ! अणुइंपि आहारेंति बायराइंपि आहारेंति, जाइं भंते ! अणूइं आहारेंति ताइं भंते ! किं उड्ढं आहारेंति अहे आहारेंति तिरियं आहारेंति ?, गोयमा ! उड्ढंपि आहारेंति अहेवि आहारेंति तिरियंपि आहारेंति ।

जाइं भंते ! उड्ढंपि आहारेंति तिरियंपि आहारेंति ताइं किं आइं आहारेंति मज्झे आहारेंति पज्जवसाणे आहारेंति ?, गोयमा ! तिन्निवि आहारेंति, जाइं भंते ! आइंपि आहारेंति जाव पज्जवसाणेवि आहारेंति ताइं किं सविसए आहारेंति अविसए आहारेंति ?, गोयमा ! सविसए आहारेंति नो अविसए आहारेंति, जाइं भंते ! सविसए आहारेंति ताइं किं आणुपुव्विं आहारेंति अणाणपुव्विं आहारेंति ?, गोयमा ! आणुपुव्विं आहारेंति नो अणाणुपुव्विं आहारेंति, जाइं भंते आणुपुव्विं आहारेंति ताइं किं तिदिसिं आहारेंति चउदिसिं आहारेंति पंचदिसिं आहारेंति छद्दिसिं आहारेंति ?, गोयमा ! निव्वाधाएणं छद्दिसिं, वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं (सिय) पंचदिसिमिति ।।"

अस्य व्याख्या—"जाइं भावतो वण्णंताइं" इत्यादि प्रश्नसूत्रं सुगम्, भगवानाह—गौतम ! 'ठाणमग्गणं पडुच्चे'ति तिष्ठन्ति विशेषा अस्मिन्निति स्थानं—सामान्यमेकवर्णं द्विवर्णं त्रिवर्णमित्यादिरूपं तस्य मार्गणम्—अन्वेषणं तत्प्रतीत्य, सामान्यचिन्तामाश्रित्येति भावार्थः, एकवर्णान्यपि द्विवर्णान्यपीत्यादि सुगमं, नवरं तेषामनन्तप्रदेशिकानां स्कन्धानामेकवर्णत्वं द्विवर्णत्वमित्यादि व्यवहारनयमतापेक्षया, निश्चयनमतापेक्षया त्वनन्तप्रादेशिकस्कन्धोऽल्पीयानपि पञ्चवर्ण एव प्रतिपत्तव्यः, 'विहाणमग्गणं पडुच्चे'त्यादि यावद् विविक्तम्—इतरव्यवच्छिन्नं धानं—पोषणं स्वरूपस्य यत्तत्प्रतीत्य सामान्यचिन्तामाश्रित्येति शेषः, कृष्णो नील इत्यादि प्रतिनियतो वर्णविशेष इतियावत्, तस्य मार्गणं तत्प्रतीत्य कालवर्णान्यप्याहारयन्तीत्यादि सुगमं, नवरमेतदपि व्यवहारतः प्रतिपत्तव्यं, निश्चयतः पुनरवश्यं तानि पञ्चवर्णान्येव ।

'जाइं वण्णतो कालवण्णाइं' इत्यादि सुगमं यावदनन्तगुणसुक्किल्लइंपि आहारयन्ति, एवं गन्धरस्पर्शविषयाण्यपि सूत्राणि भावनीयानि ।। 'जाइं भंते ! अनंतगुणलुक्खाइं' इत्यादि, यानि भदन्त ! अनन्तगुणरूक्षाणि, उपलक्षणमेतत्—एकगुणकालादीन्यप्याहारयन्ति तानि स्पृष्टानि—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मप्रदेशस्पर्शविषयाण्याहारयन्ति उतास्पृष्टानि ?, भगवानाह–स्पृष्टानि नो अस्पृष्टानि, तत्रात्मप्रदेशैः संस्पर्शनमात्मप्रदेशावगाढक्षेत्राद्बहिरपि संभवति ततः प्रश्नयति–

'जाइं भंते'इत्यादि, यानि भदन्त ! स्पृष्टान्याहारयन्ति तानि किमवगाढानि–आत्मप्रदेशैः सहैकक्षेत्रावस्थायीनि उतानवगाढानि–आत्मप्रदेशावगाहक्षेत्राद्बहिरवस्थितानि ?, भगवानाह–गौतम ! अवगाढान्याहारयन्ति नानवगाढानि। यानि भदन्त ! अवगाढान्याहारयन्ति तानि किमनन्तरवगाढानि ?, किमुक्तं भवति ? –येष्वात्मप्रदेशेषु यान्यव्यवधानेनावगाढानि तैरात्मप्रदेशैस्तान्येवाहारयन्ति उत परम्परावगाढानि–एकद्वित्राद्यात्मप्रदेशैर्व्यवहितानि ?, भगवानाह–गौतम ! अनन्तरावगाढानि न परम्परावगाढानि। यानि भदन्त ! अनन्तरावगाढान्याहारयन्ति तानि भदन्त ! अनन्तप्रादेशिकानि द्रव्याणि किमणूनि–स्तकान्याहारयन्ति उत बादराणि–प्रभूतप्रदेशोपचितानि ?,भगवानाह–अणून्यप्याहारयन्ति बादराण्यप्याहारयन्ति, इहाणुत्वबादरत्वे तेषामेवाहारयोग्यानां स्कन्धानां प्रदेशस्तोकत्वबाहुल्यापेक्षया प्रज्ञापनामूलटीकाकारेणापि व्याख्याते इत्यस्माभिरपि तथैवाभिहिते।

यानि भदन्त ! अणून्यपि आहारयन्ति तानि किमूर्ध्वप्रदशस्थितान्याहारयन्ति अधस्तिर्यग्वा ?, इहोर्ध्वाधस्तिर्यक्त्वं यावति क्षेत्रे सूक्ष्मपृथिवीकायिकोऽवगाढस्तावत्येव क्षेत्रे तदपेक्षया परिभावनीयं, भगवानाह–ऊर्ध्वमप्याहारयन्ति–ऊर्ध्वप्रदेशावगाढान्यप्याहारयन्ति, एवमघोऽपि तिर्यगपि। यानि भदन्त ! ऊर्ध्वमूतिर्यगप्याहारयन्ति तानि किमादावा- हारयन्ति मध्ये आहारयन्ति पर्यवसाने आहारयन्ति ?, अयमत्राभिप्रायः–

सूक्ष्मपृथिवीकायिका ह्यनन्तप्रादेशिकानि द्रव्याण्यन्तर्मुहूर्त्त कालं यावदुपभोगोचितानि गृह्णन्ति, ततः संशयः– किमुपभोगोचितस्य कालस्यान्तर्मुहूर्तप्रमाणस्यादौप्रथमसमये आहारयन्ति उत मध्ये–मध्यसमयेषु आहोश्वित पर्यवसाने–पर्यवसानसमये ?, भगवानाह–गौतम ! आदावपि मध्येऽपि पर्यवसानेऽ- प्याहारयन्ति, किमुक्तं भवति ? –उपभोगोचितकालस्यान्तर्मुहूर्त्तप्रमाणस्यादिमध्यावसानसम- येऽप्याहारयन्तीति। यानि भदन्त ! आदाजाव पर्यवसानेऽप्याहारयन्ति तानि भदन्त ! किं स्वविषयानि–स्वोचिताहारयोग्यान्याहारयन्ति उताविषयानि–स्वोचिताहारा० भगवानाह–गौतम ! स्वविषयाण्याहारयन्ति नो अविषयाणि।

यानि भदन्त ! स्वविषयाण्याहारयन्ति तानि भदन्त ! किमानुपूर्व्याऽऽहारयन्ति अनानुपूर्व्या ?, आनुपूर्वी नाम यथाऽऽसन्नं, तद्विपरीताऽनानुपूर्वी, भगवानाह–गौतम ! आनुपूर्व्या, सूत्रे द्वितीया तृतीयार्थे वेदितव्या प्राकृतत्वात्, यथाऽऽचाराङ्गे "अगणिं पुट्ठा" इत्यत्र, आहारयन्ति, नो अनानुपूर्व्या ऊर्ध्वमधस्तिर्यग्वा, यथाऽऽसन्नं नातिक्रम्याहारयन्तीति भावः। यानि भदन्त ! आनुपूर्व्याऽऽहारयन्ति तानि भदन्त ! किं 'तिदिसं'ति तिस्रो दिशः समाहृतास्त्रिदिक् तस्मिन् व्यवस्थितान्याहारयन्ति चतुर्दिशि पञ्चदिशि षड्दिशि वा, इह लोकनिष्कुटपर्यन्ते जघन्यपदेऽपि [जीवावगाहक्षेत्रं] त्रिदिग्व्यवस्थितमेव प्राप्यते न द्विदिग्व्यवस्थितमेकदिग्व्यवस्थितं वा, अतस्त्रिदिश्यारभ्य प्रश्नः कृतः, भगवानाह–गौतम ! 'निव्वाघाएणं छद्दिसि'मित्यादि, व्याघातो नामालोकाकाशे प्रतिस्खलनं व्याघातस्याभावो निर्व्याघातं 'शब्दप्रथादावव्ययं पूर्वपदार्थे नित्यमव्ययीभाव' इत्यव्ययीभावः 'तेन वा तृतीयाया' इति विकल्पेनाम्भावविधानात् पक्षेऽत्राम्भावः।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

नियमाद्–अवश्यंतया षड्दिशि व्यवस्थितानि, षड्भ्यो दिग्भ्य आगतानीति भावः, द्रव्याण्याहारयन्ति, व्याघातं पुनः प्रतीत्य लोकनिष्कुटादौ स्यात्कदाचित्त्रिदिशि–तिसृभ्यो दिग्भ्य-आगतानि, कदाचित् चतसृभ्यः कदाचित्पञ्चभ्यः, काऽत्र भावना ? इति चेदुच्यते–इह लोकनिष्कुटे पर्यन्तेऽधस्त्यप्रतराग्नेयकोणावस्थितो यदा सूक्ष्मपृथिवीकायिको वर्त्तते तदा तस्याधस्तादलोकेन व्याप्तत्वात् अधोदिकपुद्गलाभावः आग्नेयकोणावस्थितत्वात् पूर्वदिक्पुद्गलाभावो दक्षिणदिक्-पुद्गलाभावश्च, एवमधःपूर्वदक्षिणरूपाणां तिसृणां दिशामलोकेन व्यापनात् ता अपास्य या परिशिष्टा ऊर्ध्वाऽपरोत्तरा च दिगव्याहता वर्त्तते तत आगतान् पुद्गलानाहारयन्ति, यदा पुनः स एव पृथिवीकायिकः पश्चिमां दिशमनुसृत्य वर्त्तते तदा पूर्वादिगभ्यधिका जाता, द्वे च दिशौ दक्षिणाध-स्त्यरूपे अलोकेन व्याहते इति स चतुर्दिगागतान् पुद्गलानाहारयति, यदा पुनरूर्ध्वं द्वितीयादिप्रत-रगतपश्चिमदिशमवलम्ब्य तिष्ठति तदाऽधस्त्यापि दिगभ्यधिका लभ्यते, केवला दक्षिणैवैका पर्यन्तवर्त्तिनी अलोकेन व्याहतेति पञ्चदिगागतान् पुद्गलानाहारयति ।

'वण्णतो' इत्यादि वर्णतः कालनीललोहितहारिद्रशुक्लानि, गन्धतः सुरभिगन्धानि दुरभिग-न्धानि वा, रसतस्तिक्तानि यावन्मधुराणि, स्पर्शतः कर्कशानि यावद्रूक्षाणि, तथा तेषामाहार्यमाणानां पुद्गलानां 'पुराणान्' अग्रेतनान् वर्णगुणान् गन्ध० रस० स्पर्श० 'विपरिणामइत्ता परिपालइत्ता परिसाडइत्ता परिविद्धंसइत्ता' एतानि चत्वार्यपि पदान्येकार्थिकानि विनाशार्थप्रति- पादकानि नानादेशजविनेयानुग्रहार्थमुपात्तानि, विनाशः किमित्याह–अन्यान् अपूर्वान् वर्णगुणान् यावत्स्पर्श-गुणान् उत्पाद्यात्मशरीरक्षेत्रावगाढान् पुद्गलान् 'सव्वप्पणयाए' सर्वात्मना–सर्वैरवात्मप्रदेशैराहार-माहाररूपान् पुद्गलानाहारयन्ति ॥ गतमाहारद्वारं, साम्प्रतमुपपातद्वारमाह–

'ते णं भंते' इत्यादि, ते भदन्त ! सूक्ष्मपृथिवीकायिका जीवाः 'कुतः' केभ्यो जीवेभ्य उद्वत्योत्पद्यन्ते ?, किं नैरयिकेभ् ? इत्यादि प्रतीतं, भगवानाह–गौतम ! नो नैरयिकेभ्य इत्यादि पाठसिद्धं, नवरं देवनैरयिकेभ्य उत्पादप्रतिषेधो देवनैरयिकाणां तथाभवस्वभावतया तन्मध्ये उत्पादासम्भवात्, 'जहा वक्कंतीए' इति, यथा प्रज्ञापनायां व्युत्क्रान्तिपदे तथा वक्तव्यं, तच्चैवम्–तिर्यग्योनेभ्योऽप्युत्पादः पर्याप्तेभ्योऽपर्याप्तेभ्यो वा केवलमसङ्ख्यातवर्षायुष्कवर्जितेभ्यः, मनुष्येभ्योऽप्यकर्मभूमिजान्तरद्वीपजासङ्ख्यातवर्षायुष्ककर्मभूमिजव्यतिरिक्तेभ्यः पर्याप्तेभ्योऽपर्याप्तेभ्यो वेति । गतमुपपातद्वारमधुना स्थितिद्वारमाह–

'तेसि णं भंते !' इत्यादि सुगमं, नवरं जघन्यपदा- दुत्कृष्टपदमधिकमवसेयम् ॥ गतं स्थितिद्वारमधुना समुद्घातमधिकृत्य मरणं त्रिचिन्तयिषुरिद- माह–'ते णं भंते जीवा' इत्यादि सुगमम्, उभयथाऽपि मरणसम्भवात् । च्यवनद्वारमाह–'ते णं भंते जीवा' इत्यादि, 'ते' सूक्ष्मपृथ्वी-कायिका भदन्त ! जीवा अनन्तर- मुद्वृत्य सूक्ष्मपृथिवीकायिकभवादानन्तर्येणोद्वृत्येति भावः क्वगच्छन्ति ? –क्वोत्पद्यन्ते ?, एतेनात्मनो गमनधर्मकता पर्यायान्तरमधिकृत्योत्पत्तिधर्मकता च प्रतिपादिता, तेन ये सर्वगतमनुत्पत्तिधर्मकं चात्मानं प्रतिपन्नास्ते निरस्ता द्रष्टव्या, तथारूपे सत्यात्मनि यथोक्तप्रश्नार्थासम्भवात्, 'किं नेरइएसु गच्छन्ति' ? इत्यादि सुप्रतीतं, भगवानाह–'नो नेरइएसु गच्छन्ति' इत्यादि पाठसिद्धं 'जहा वक्कंतीए' इति, यथा प्रज्ञापनायां व्युत्क्रान्तिपदे च्यवनमुक्तं तथाऽऽत्रापि वक्तव्यं, तच्चोत्पादवद् भावनीयमिति गतं च्यवनद्वारमधुना गत्यागतिद्वारमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ते णं भंते जीवा' इत्यादि, ते भदन्त ! जीवाः 'कतिगतिकाः ?' कति गतयो येषां ते कतिगतिकाः, 'कत्यागतिकाः ?' कतिभ्यो गतिभ्य आगतिर्येषां ते कत्यागतिकाः, भगवानाह— गौतम ! द्वयागतिका नरकगतेर्देवगतेश्च सूक्ष्मेषूत्पादाभावात्, द्विगतिका नरकगतौ देवगतौ च तत उद्वृत्तानामुत्पादाभावात्, 'परीत्ता' प्रत्येकशरीरिणः, असङ्ख्येया असङ्ख्येयलोकाकाश-प्रदेशप्रमाणत्वात् प्रज्ञप्ता मया शेषैश्च तीर्थकृद्भिः अनेन सर्वतीर्थकृतामविसंवादिवचनतामाह, हे श्रमण ! हे आयुष्मन् ! 'से त्तं सुहुपुढविकाइया' त एते सूक्ष्मपृथिवीकायिका उक्ताः ।

उक्ताः सूक्ष्मपृथिवीकायिकाः, अधुना बादरपृथिवीकायिकानमिधित्सुराह—

मू. (१५) *से किं तं बायरपुढविकाइया ?, २ दुविहा पन्नत्ता, तंजहा—सण्हबायर-पुढविक्काइया य खरबायरपुढविक्काइया य ॥*

वृ. 'से किं त'मित्यादि, अथ के ते बादरपृथिवीकायिकाः ?, सूरिराह—बादरपृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा—श्लक्ष्मबादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिकाश्च—श्लक्ष्णा नाम चूर्णितलोष्टकल्पा मृदुपृथवी तदात्मका जीवा अप्युपचारतः श्लक्ष्णाः ते च ते बादरपृथिवी-कायिकाश्च श्लक्ष्णबादरपृथिवीकायिकाः, अथवा श्लक्ष्णा चासौ बादरपृथिवीका च सा कायः—शरीरं येषां ते श्लक्ष्णबादरपृथ्वीकायाः त एव स्वार्थिकेकप्रत्ययविधानात् श्लक्ष्णबादरपृथिवीकायिकाः

खरा नाम पृथिवी सङ्घातविशेषं काठिन्यविशेषं वाऽऽपन्ना तदात्मका जीवा अपि खराः ते च ते बादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिकाः, अथवा पूर्ववत्प्रकारान्तरेण समासः, चशब्दौ स्वगतानेकभेदसूचकौ ॥

मू. (१६) *से किं तं सण्हबायरपुढविक्कइया ?, २ सत्तविहा पन्नत्ता, तंजहा—कण्हमत्तिया, भेओ जहा पन्नवणाए जाव ते समासतो दुविहा पन्नत्ता, तंजहा—पज्रत्तगा य अपज्रत्तगा य ।*

तेसि णं भंते ! जीवाणं कति सरीरगा पन्नत्ता ? गोयमा ! तओ सरीरगा पं०, तंजहा—ओरालिए तेयए कम्मए, तं चेव सव्वं नवरं चत्तारि लेसाओ, अवसेसं जहा सुहुमपुढविक्काइयाणं आहारो जाव नियमा छद्दिसि, उववातो तिरिक्खजोणियमणुस्सदेवेहिंतो, देवेहिं जाव सोधम्मेसाणेहिंतो, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं ।

ते णं भंते ! जीवा मारणंतियसमुग्धाएणं किं समोहया मरंति असमोहता मरंति ? गोयमा समोहतावि मरंति असमोहतावि मरंति । ते णं भंते ! जीवा अणंतरं उव्वट्टित्ता कहिं गच्छंति ? कहिं उववज्रंति ? —किं नेरइएसु उववज्रंति ? ०, पुच्छा, नो नेरइएसु उववज्रंति तिरिक्खजोणिएसु उववज्रंति मणुस्सेसु उव० नो देवेसु उव०, तं चेव जाव असंखेज्रवासाउवज्रेहिं ।

ते णं भंते ! जीवा कतिगतिया कतिआगतिया पन्नत्ता ?, गोयमा ! दुगतिया तिआगतिया परित्ता असंखेज्ञा य समणाउसो !, से तं बायरपुढविक्काइया । सेत्तं पुढविकाइया ॥

वृ. 'से किं त'मित्यादि, अथ के ते श्लक्ष्णबादरपृथिवीकायिकाः ?, सूरिराह—श्लक्ष्णबादर-पृथिवीकायिकाः सप्तविधाः प्रज्ञप्ताः, तदेव सप्तविधत्वं दर्शयन्ति, तद्यथा—कृष्णमृत्तिका इत्यादि 'भेदो भाणियव्वो जहा पन्नवणाए जाव तत्थ नियमा असंखिज्ञा' इति, भेदो बादरपृथिवीकायिकानां द्विविधानामपि तथा भणितव्यो यथा प्रज्ञापनायां, स च तावद् यावत् ''तत्थ नियमा असंखेज्ञा'' इति पदं, स चैवम्—किण्हमत्तिया नीलमत्तिया लोहियमत्तिया हालिद्दमत्तिया सुक्किलमत्तिया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंडुमत्तिया पणगमत्तिया, सेत्तं सण्हबायरपुढविकाइया ।

—से किं तं खरबायरपुढविक्काइया ?, २ अनेगविहा पन्नत्ता, तंजहा—

॥ १ ॥ पुढवी य सक्करा वालुया य उवले सिला य लोणूसे ।
तंबा य तउय सीसय रुप्प सुवण्णे य वइरे य ॥

॥ २ ॥ हरियाले हिंगुलए मनोसिला सासगंजण पवाले ।
अब्भपडलब्भवालुय बायरकाये मणिविहाणा ॥

॥ ३ ॥ गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य ।
मरगयमसारगल्ले भुयमोयगइंदनीले य ॥

॥ ४ ॥ चंदनगेरुयहंसे पुलए सोगंधिए य बोद्धव्वे ।
चंदप्पभवेरुलिए जलकंते सूरकंते य ॥

जे यावण्णे तहप्पगारा ते समासतो दुविहा पन्नत्ता, तंजहा—पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपन्ना, तत्थ णं जे ते पज्जत्तगा एएसिणं वण्णादेसेणं गंधाएसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं संखिज्जाइं जोणिप्पमुहसयसहस्साइं पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा'' इति, अस्य व्याख्या—कृष्णमृत्तिकारूपा, एवं नीललोहितहारिद्रशुक्लभेदा अपि वाच्याः, पाण्डुमृत्तिका नाम देशविशेषे या धूलीरूपा सती पाण्डू इति प्रसिद्धा तदात्मका जीवा अप्यभेदोपचारात्पाण्डुमृत्तिकेत्युक्ताः, 'पणगमत्तिया' इति नद्यादिपूरप्लाविते देशे नद्यादि पूरेऽपगते यो भूमौ श्लक्ष्णमृदुरूपो जलमलोऽपरपर्यायपङ्कः स पनकमृत्तिका तदात्मका जीवा अप्यभेदोपचारात्पनकमृत्तिकाः, सेत्तमित्यादिनिगमनं सुगमम् ।

'से किं त'मित्यादि ॥ अथ के ते खरबादरपृथिवीकायिकाः ?, सूरिराह—खरबादरपृथिवीकायिकानेकविधाःप्रज्ञप्ताः, चत्वारिंशद्भेदा मुख्यतः प्रज्ञप्ता इत्यर्थः, तानेव चत्वारिंशन्द्रेदानाह, तंजहा—'पुढवी' त्यादिगाथाचतुष्टयम् ।

पृथिवीति 'भामा सत्यभामावत्' शुद्धपृथिवी नदीतटभित्यादिरूपा १, चशब्द उत्तरापेक्षया समुच्चये, शर्करा—लघूपलशकलरूपा २, वालुका—सिकता ३, उपलः—टङ्काद्युपकरणपरिकर्मणायोग्यः पाषाणः ४, शिलाघटनयोग्या देवकुलपीठाद्युपयोगी महान् पाषाणविशेषः ५, लवणं—सामुद्रादि ६, ऊषो यद्वशादूषरं क्षेत्रम् ७, अयस्ताम्रत्रपुसीसकरूप्यसुवर्णानि—प्रतीतानि १३, वज्रो—हीरकः १४, हरितालहिङ्गुलमनःशिलाः प्रतीताः १७, सासगं—पारदः १८, अञ्जनं सौवीराञ्जनादि १९, प्रवालं—विद्रुमः २०, अभ्रपटलं—प्रसिद्धम् २१, अभ्रवालुका—अभ्रपटमिश्रा वालुका २२, 'बायरकाए' इति बादरपृथिवीकायेऽमी भेदा इति शेषः, 'मणिविहाणा' इति चशब्दस्य गम्यमानत्वात् मणिविधानानि च—मणिभेदाश्च बादरपृथिवीकायभेदत्वेन ज्ञातव्याः, तान्येव मणिविधानानि दर्शयति—'गोमेज्जए य' इत्यादि, गोमेज्जकः २६, 'चः' समुच्चये, रुचकः २४ अङ्कः २५ स्फटिकः २६ 'चः' पूर्ववत्, लोहिताक्षः २७ मरकतः २८ मसारगल्लः २९ भुजमोचकः ३० इन्द्रनीलश्च ३१ चन्दन : ३२ गैरिकः ३३ हंसगर्भः ३४ पुलकः ३५ सौगन्धिकश्च ३६ चन्द्रप्रभः ३७ वैडूर्य ३८ जलकान्तः ३९ सूर्यकान्तश्च ४० । तदेवमाद्यया गाथया पृथिव्यादयश्चतुर्दश भेदा उक्ताः द्वितीयगाथयाऽष्टौ हरितालादयः तृतीयगाथया गोमेज्जकादयो दश तुर्यगाथयाऽष्टाविति, सर्वसङ्ख्यया चत्वारिंशत्, 'जे यावण्णे तहप्पगारा' इति येऽपि चान्ये तथाप्रकारा

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

मणिभेदाः—पद्मरागादयस्तेऽपि खरबादरपृथिवी- कायिकत्वेन वेदितव्याः ।

'ते समासतो' इत्यादि, ते बादरपृथिवीकायिकाः 'समासतः' सङ्क्षेपेण द्विविधाः प्रज्ञप्ताः, तद्यथा—पर्याप्तका अपर्याप्तकाश्च, तत्र येऽपर्याप्तकास्ते स्वयोग्याः पर्याप्तीः साकल्येनासंप्राप्ताः अथवाऽसंप्राप्ता इति विशिष्टान् वर्णादीननुपगताः, तथाहि वर्णादिभेदविवक्षायामेते न शक्यन्ते कृष्णादिना भेदेन व्युपदेष्टुं, किं कारणमिति—चेद्, उच्यते, इह शरीरादिपर्याप्तिषु परिपूर्णासुसतीषु बादराणां वर्णादिभेदः संप्रकटो भवति नापरिपूर्णासु, ते चापर्याप्ता उच्छ्वासपर्याप्तया अपर्याप्ता एव म्रियन्ते, ततो न स्पष्टो वर्णादिविभाग इत्यसंप्राप्ता इत्युक्तम्, अन्ये तु व्याचक्षते—सामान्यतो वर्णादीनसंप्राप्ता इति, तच्च न युक्तं, यतः शरीरमात्रभाविनो वर्णादयः, शरीरं च शरीरपर्याप्तया संजातमिति ।

'तत्थ ण' मित्यादि, तत्र ये ते पर्याप्तकाः—परिसमाप्तसमस्तस्वयोग्यपर्याप्तयस्ते वर्णादेशेन—वर्णभेदविवक्षया एवं गन्धादेशेन रसादेशेन स्पर्शादेशेन सहस्राग्रशः—सहस्रसङ्ख्यया विधानानि—भेदाः, तद्यथा—वर्णा कृष्णादिभेदात्पञ्च गन्धौ सुरभीतरभेदाद्वौ रसास्तिक्तादयः पञ्च स्पर्शा मृदुकर्कशादयोऽष्टौ, एकैकस्मिंश्च वर्णादौ तारतम्यभेदेनानेकेऽवान्तरभेदाः, तथाहि—भ्रमरकोकिल कज्जलादिषु तरतमभावात् कृष्णः कृष्णतरः कृष्णतम त्यादिरूपतयाऽनेके कृष्णभेदाः, एवं नीलादिष्वपि० तथा गन्धरसस्पर्शेष्वपि, तथा परस्परं वर्णानां संयोगतो धूसरकर्बुरत्वादयोऽनेक-सङ्ख्याभेदाः, एवं गन्धादीनामपि गन्धादनः समायोगात्, ततो भवन्ति वर्णाद्यादेशैः सहस्राग्रशो भेदाः

संखिज्जाइं जोणिप्पमुहसयसहस्साइं''ति सङ्ख्येयानि योजानिमुखाणि—योनिद्वाराणि शतसहस्राणि, तथाहि—एकैकस्मिन् वर्णे गन्धे रसे स्पर्शे च संवृता योनि पृथिवीकायिकानां, सा पुनस्त्रिधासचित्ताऽचित्ता मिश्रा च, पुनरेकैका त्रिधा—शीता उष्णा शीतोष्णा, शीतादीनामपि प्रत्येकं तारतम्यभेदादनेकभेदत्वं, केवलमेकविशिष्टवर्णादियुक्ताः सङ्ख्यातीता अपि स्वस्थाने व्यक्तिभेदेन योनिजातिमधिकृत्यैकैव योनिर्गण्यते, ततः सङ्ख्येयानि पृथ्वीकायिकानां योनिशतसहस्राणि भवन्ति, तानिच सूक्ष्मबादरगतसर्वसङ्ख्यया सप्त, 'पज्जत्तगनिस्साए' इत्यादि, पर्याप्तकनिश्रयाऽपर्याप्तका व्युत्क्रामन्तिउत्पद्यन्ते, कियन्तः ? इत्याह—यत्रैकः पर्याप्तकस्तत्र नियमात्तन्निश्रया असङ्ख्येयाः—सङ्ख्यातीता अपर्याप्तकाः ।

'एएसि णं भंते ! जीवाण'मित्यादिना शरीरावगाहनादिद्वारकलापचिन्तां करोति, सा च पूर्ववत्, तथा चाह—'एवं जो चेव सुहुमपुढविकाइयाणं गमो सो चेव भाणियव्वो इति, 'नवर' मित्यादि, नवरमिदं नानात्वं लेश्याद्वारे चतस्रोलेश्या वक्तव्याः, तेजोलेश्याया अपि सम्भवात्, तथाहि—व्यन्तरादय ईशानान्ता देवा भवनविमानादावतिमूर्च्छयाऽऽत्मीयरत्नकुण्डलादा-वप्युत्पद्यन्ते, ते च तेजोलेश्यावन्तोऽपि भवन्ति, यल्लेश्यश्च म्रियते अग्रेऽपि तल्लेश्य एवोपजायते ''जल्लेसे मरइ तल्लेसे उववज्जइ इति वचनात् ।

ततः कियत्कालमपर्याप्तावस्थायां तेजोलेश्यावन्तोऽप्यवाप्यन्ते इति चतस्रो वक्तव्याः, आहारो नियमात् षड्दिशि, बादराणां लोकमध्य एवोपपातभावात्, उपपातो देवेभ्योऽपि, बादरेषु तदुत्पादविधानात्, स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिवर्षसहस्राणि, देवेभ्योऽप्युत्पादात् त्र्यागतयो, द्विगतयः पूर्ववत्, एतेऽपि च 'परोत्ता' प्रत्येकशरीरिणोऽसङ्ख्येयाः प्रज्ञप्ताः हे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रमण ! हे आयुष्मन् !, 'सेत्त'नित्याद्युपसंहारवाक्यम् ।

—उक्ताः पृथ्वीकायिकाः, अधुनाऽप्कायिकानभिधित्सुरिदमाह—

मू. (१७) *से किं तं आउक्काइया ?, २ दुविहा पन्नत्ता, तंजहा—सुहुमआउक्काइया य बायरआउक्काइया य, सुहुमआऊ० दुविहा पन्नत्ता, तंजहा—पज्जत्ता य अपज्जत्ता य ।*

तेसि णं भंते ! जीवाणं कत सरीरया पन्नत्ता ?, गोयमा ! तओ सरीरया पन्नत्ता, तंजहा—ओरालिए तेयए कम्मए, जहेव सुहुमपुढविक्काइयाणं, नवरं थिवुगसंठिता पन्नत्ता ।

सेसं तं चेव जाव दुगतिया दुआगतिया परित्ता असंखेज्जा पन्नत्ता । से तं सुहुमआउक्काइया

वृ. अथ के तेऽप्कायिकाः ? सूरिराह—अप्कायिका द्विविधाः प्रज्ञप्ताः, तद्यथा—सूक्ष्माप्कायिकाश्च बादराप्कायिकाश्च, तत्र सूक्ष्माः सर्वलोकव्यापिनो बादरा धनोदध्यादिभाविनः, चशब्द स्वगतानेकभेदसूचकौ । 'से किं तं सुहमआउक्कइया ?' इत्यादि सूक्ष्मपृथिवीकायिकवन्निरवशेषं भावनीयं, नवरमिदं संस्थानद्वारे नानात्वं, तदेवोपदर्शयति—'ते सि णं भंते ! जीवाणं सरीरया किं संठिया ?' इत्यादि पाठसिद्धम् ॥

मू. (१८) *से किं तं बायरआउक्काइया ?, २ अनेगविहा पन्नत्ता, तंजहा—ओसा हिमे जाव जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता, तंजहा—पज्जत्ता य अपज्जत्ता य ।*

तं चेव सव्वं नवरं थिवुगसंठिता, चत्तारि लेसाओ, आहारो नियमा छद्दिसिं, उववातो तिरिक्खजोणियमणुस्सदेवेहिं, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसं सत्तवाससहस्साइं ।

सेसं तं व जहा बायरपुढविकाइया जाव दुगतिया तिआगतिया परित्ता असंखेज्जा पन्नत्ता समणाउसो !, सेत्तं बायरआऊ, सेत्तं आउक्कइया ॥

वृ. 'से किं त'मित्याद, अथ के ते बादराप्कायिकाः ?, सूरिराह—बादरप्कायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा—"ओसा हिमे महिया जाव तत्थ नियमा असंखेज्ञा इति, यावत्करणादेवं परिपूर्णपाठो द्रष्टव्यः—"करगे हरतणू सुद्धोदए सीओदए खट्टोदए खारोदए अंबिलोदए लवणोदए वरुणोदए खीरोदए खोओदए रसोदए जे यावन्ने तहप्पगारा, ते समासतो दुविहा प० तं० ,—पज्जत्तगा य अपज्जत्तगा य । तत्थ णं जे ते अपज्जत्तगा एएसिणं वण्णादेसेणं गंधादेसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं संखिज्ञाइ जोणिप्पमुहसयसहस्साइं पज्जत्तगसनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्ञा" इति, अस्य, व्याख्या—अवश्यायत्रेहः, हिमं—स्त्यानोदकं, महिका—गर्भमासेसु सूक्ष्मवर्षं, करको—धनोपलः, हतनुः यो भुवमुद्भिद्य गोधूमाङ्कुरतृणाग्रादिषु बद्धो बिन्दुरुपजायते, शुद्धोदकम्—अन्तरिक्षसमुद्भवं नद्यादिगतं वा, तच्च स्पर्शरादिभदादनेकभेदं, तदेवानेकभेदत्वं दर्शयति—शीतोदकं—नदीतडागावटवापीपुष्करिण्यादिषु शीतपरिणामम्, उष्णोदकं—स्वभावत एव क्वचिन्निर्झरादावुष्णपरिणामं, क्षीरोदकम्—ईषल्लवणपरिणामं यथा लाटदेशादौ केषुचिदवटेषु, खट्टोदकम्—ईषदम्लपरिणामम्, आम्लोदकम्—अतीव स्वभावत एवम्लपरिणामं काञ्जिकवत्, लवणोदकं लवणसमुद्रे, वारुणोदकं वारुणसमुद्रे, क्षीरोदकं क्षीरसमुद्रे, क्षोदोदकमिक्षुरससमुद्रे, रसोदकं पुष्करवरसमुद्रादिषु, येऽपि चान्ये तथाप्रकारा रसस्पर्शादिभेदाद् धृतोदकादयो बादराप्कायिकास्ते सर्वे बादराप्कायिकतया प्रतिपत्तव्याः, 'ते समासओ' इत्यादि प्राग्वत् नवरं सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणीत्यत्रापि सप्त वेदितव्यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तेसि णं भंते ! जीवाणं कइ सरीरगा' ? इत्यादिद्वारकलापचिन्तायामपि बादरपृथिवीकायिकगमोऽनुमन्तव्यो, नवरं संस्थानद्वारे शरीरकाणि स्तिबुकसंस्थानसंस्थितानि वक्तव्यानि, स्थितिद्वारे जघन्यतः स्थितिरन्तर्मुहूर्तमुत्कर्षतः सप्त वर्षसहस्राणि, शेषं तथैव, उपसंहारमाह– 'सेत्त'मित्यादि ॥ उक्ता अप्कायिकाः, सम्प्रति वनस्पतिकायिकनाह–

मू. (१९) से किं तं वणस्सइकाइया ?, २ दुविहा पन्नत्ता, तंजहा–सुहुमवणस्सइकाइया य बायरवणस्सइकाइया य ।

वृ. अथ के ते वनस्पतिकायिकाः ?, सूरिराह–वनस्पतिकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मवनस्पतिकायिकाश्च बादरवनस्पतिकायिकाश्त, चशब्दौ स्वगतानेकभेदसूचकौ ।

मू. (२०) से किं तं समहुमवणस्सइकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य तहेव णवरं अनित्थंथ (संठाण०) संठिया, दुगतिया दुआगतिया अपरित्ता अणंता, अवसेसं जहा पुढविक्काइयाणं, से तं सुहुमवणस्सइकाइया ॥

वृ. 'से किं त'मित्यादि, अथ के ते सूक्ष्मवनस्पतिकायिकाः ?, सूरिराह–सूक्ष्मवनस्पतिकायिका द्विविधाः प्रज्ञप्ताः–पर्याप्ता अपर्याप्ताश्च, 'तेसि णं भंते ! कति सरीरगा' इत्यादिद्वारकलापचिन्तनं सूक्ष्मपृथिवीकायिकवद्भावनीयं, नवरं संस्थानद्वारे 'सरीरगा अनित्थंत्थसंठाणसंठिया पन्नत्ता' इति, इत्थं तिष्ठतीति इत्थंस्थं न इत्थंस्थमनित्थंस्थम्, अनियताकारमित्यर्थः ।

तच्च तत्संस्थानं तेन संस्थितानि–अनियतसंस्थानसंस्थितानि, गत्यागतिद्वारसूत्रपयन्ते 'अपरित्ता अनंता पन्नत्ता' इति वक्तव्यम्, 'अपरीत्ता' अप्रत्येकशरीरिणः अनन्तकायिका इत्यर्थः, अत एवानन्ताः प्रज्ञप्ताः हे श्रमण ! हे आयुष्मन् ! 'सेत्त'मित्यादि उपसंहारवाक्यम् ॥

मू. (२१) से किं तं बायरवणस्सइकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पत्तेयसरीरबायरवणस्सतिकाइया य साधारणसरीरबायरवणस्सइकाइया य ।

वृ. 'से किं त'मित्यादि, अथ के ते बादरवनस्पतिकायिकाः ?, सूरिराह–बादरवनस्पतिकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–प्रत्येक शरीरबादरवनस्पतिकायिकाश्च साधारणशरीरबादरवनस्पतिकायिकाश्च, चशब्दौ पूर्ववत् ।

मू. (२२) से किं तं पत्तेयसरीरबादरवणस्सतिकाइया ?, २ दुवालसविहा पन्नत्ता तंजहा

वृ. 'से किंग त'मित्यादि, अथ के ते प्रत्येकशरीरबादरवनस्पतिकायिकाः ?, सूरिराह–प्रत्येकशरीरबादरवनस्पतिकायिका द्वादशविधाः प्रज्ञप्ताः, तद्यथा–

मू. (२३) रुक्खा गुच्छा गुम्मा लता य वल्ली य पव्वगा चेव ।
तणवलयहरितओसहिजल- रुहकुहणा य बोद्धव्वा ॥

मू. (२४) से किं तं रुक्खा ?, २ दुविहा पन्नत्ता, तंजहा–एगट्ठिया य बहुबीया य । से किं तं एगट्ठिया ?, २ अनेगविहा पन्नत्ता, तंजहा–निबंबजंबुजाव पुण्णागणागरुक्खे सीवण्णि तधा असोगे य, जे यावण्णे तहप्पगारा, एतेसि णं मूलावि असंखेज्जजीवायि, एवं कंदा खंधा तया साला पवाला पत्ता पत्तेयजीवा पुप्फाइं अणेगजीवाइं फला एगट्ठिया, सेत्तं एगट्ठिया ।

से किं तं बहुबीया ?, २ अणेगविधा पन्नत्ता, तंजहा–अत्थियतंदुयउंबरकविट्ठे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमलकफणसदाडिमणग्गोधकाउंबरीयतिलयलउयलोद्धे धवे, जे यावण्मे तहप्पगारा, एतेसि णं मूलावि असंखेज्जवीविया जाव फला बहुबीयगा, सेत्तं बहुबीयगा।

सेत्तं रुक्खा, एवं जहा पन्नवणाए तहा भाणियव्वं, जाव जे यावन्ने तहप्पगारा, सेत्तं कुहणा।

मू. (२५) *नाणाविधसंठाणा रुक्खाणं एगजीविया पत्ता।*
खंधोवि एगजीवो तालसरलनालिएरीणं।

मू. (२६) *जह सगलसरिसवाणं पत्तेयसरीराणं गाहा।*

मू. (२७) *जह वा तिलसक्कलिया गाहा॥*

वृ. 'रुक्खा' इत्यादि, वृक्षाः—चूतादयः गुच्छा—वृन्ताकीप्रभृतयः गुल्मानि—नवमालिकाप्रभृतीनि लताः—चम्पकलतादयः, इह येषां स्कन्धप्रदेशे विवक्षितोर्ध्वशाखाव्यतिरेकेणान्य शाखान्तरं तथाविधं परिस्थूरं न निर्गच्छति ते लता इति व्यवह्रियन्ते, ते च सम्पकादय इति, वल्लयः—कूष्माण्डीत्रपुषीप्रभृतयः पर्वगा—इक्ष्वादयः तृणानि—कुशजुञ्जकार्जुनादीनि वलयानि—केतकीकदल्यादीनि तेषां हि त्वगू वलयाकारेण व्यवस्थितेति हरितानि—तन्दुलीयकवस्तुलप्रभृतीनि औषधयः—फलपाकान्ताः ताश्च शाल्यादयः जले रुहन्तीति जलरुहाः—उदकावकपनकादयः कुहणा—भूमिस्फोटाभिधानास्ते चायकायप्रभृतयः, 'एवं भेदो भाणियव्वो जहा पन्नवणाए' इत्यादि, 'एवम्' उक्तेन प्रकारेण बादरप्रत्येकशरीरवनस्पतिकायिकानां भेद वक्तव्यो यथा प्रज्ञापनायाम्, इह तु ग्रन्थगौरवभयान्न लिख्यते, स च किं यावद् वक्तव्यः ? इत्याह—'जह वा तिलसक्कलिया' इत्यादि, अस्याश्च गाथाया अयं सम्बन्धः—इह यदि वृक्षादिनां मूलादयः प्रत्येकमनेकप्रत्येकशरीरजीवाधिष्ठितास्ततः कथमेकखण्डशरीराकारा उपलभ्यन्ते ?, तत्रेयमुत्तरगाथा—

॥१॥ "जह स्फलसरिसवाणं सिलेसमिस्साण वट्टिया वट्टी।
पत्तेयसरीराणं तह होंति सरीरसंधाया॥"

अस्या व्याख्या—यथा सकलसर्षपाणां श्लेषमिश्राणां—श्लेषद्रव्यविमिश्रितानां वलिता वत्तिरिकरूपा भवति, अथ च ते सकलसर्षपाः परिपूर्णशरीराः सन्तः पृथक् पृथक् स्वस्वावगाहनयाऽवतिष्ठन्ते, 'तथा' अनयैवोपमया प्रत्येक शरीरिणां जीवानां शरीर सङ्घाताः पृथकपृथकस्वावगाहना भवन्ति, इह श्लेषद्रव्यस्थानीयं रागद्वेषोपचितं तथाविधं स्वकर्म सकलसर्षपस्थानीयाः प्रत्येकशरीराः, सकलसर्षपग्रहणं वैविक्त्य-प्रतिपत्या पृथकपृथकस्वस्वावगाहप्रत्येकशरीरवैविक्त्यप्रतिपत्त्यर्थम्, अत्रैव दृष्टान्तान्तरमाह— "जह वा तिलसक्कलिया" इत्यादिरधिकृतगाथा, वाशब्दो दृष्टान्तान्तरसूचने, यथा 'तिलस- क्कलिका' तिलप्रधाना पिष्टमयी अपूपिका बहुभिस्तिलैर्मिश्रिता सती यथा पृथकपृथकस्वस्वावगाह- तिलात्मिका भवति कथञ्चिदेकरूपा च 'तथा' अनयैवोपमाय प्रत्येक- शरीरिणां जीवानां शरीरसङ्घाताः कथञ्चिदेकरूपाः पृथकपृथकस्वस्वावगाहनाश्च भवन्ति

मू. (२८) *सेत्तं पत्तेयसरीरबायरवणस्सइकाइया॥*

वृ. उपसंहारमाह—'सेत्त'मित्यादि सुगमम्।

सम्प्रति साधारणवनस्पतिकायिकप्रतिपादनार्थमाह—

मू. (२९) *से किं तं साहारणसरीरबादरवणस्सइकाइया ?, २ अनेगविधा पन्नत्ता, तंजहा—आलुए मूलए सिंगबेर हिरिलि सिरिलि सिस्सिरिलि किट्टिया छिरिया छिरियविरालिया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कण्हकंदे वज्रकंदे सूरणकंदे खल्लूडे किमिरासि भद्दे मोत्थापिंडे हलिद्दा लोहारी नीहुठिहुथिभु अस्सकण्णी सीहकन्नी सीउंढी मूसंढी जे यावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य।

तेसि णं भंते! जीवाणं कति सरीरगा पण्णत्ता?, गोयमा! तओ सरीरगा पन्नत्ता, तंजहा– ओरालिए तेयए कम्मए, तहेव जहा बायरपुढविकाइयाणं, नवरं सरीरोगाहणा जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं सातिरेगजोयणसहस्सं, सरीरगा अनित्थंत्थसंठिता, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दसवाससहस्साइं, जाव दुगतिया तिआगतिया परित्ता अनंता पन्नत्ता।

सेत्तं बायरवणस्सइकाइया, सेत्तं थावरा॥

वृ. 'से किं त'मित्यादि, अथ के ते साधारणशरीरबादरवनस्पतिकायिकाः?, सूरिराह– साधारणशरीरबादरवनस्पतिकायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा–'आलुए' इत्यादि, एते आलुकमूलकश्रृङ्गबेरहिरिलिसिरिलिसिस्सिरिलिकिट्टिकाक्षीरबिडालिकाकृष्णकन्दवज्रकन्दसूरण-कन्दखल्लूट भद्रमुस्तापिण्डहरिद्रालौहीस्नुहिस्तिभुअश्वकर्णीसिंहकर्णीसि कुंढीमुषण्ढी- नामानः साधारणवनस्पतिकायिकभेदाः केचिदप्रतिप्रसिद्धत्वात्केचिद्देशविशेषात्स्वयमवगन्तव्याः, 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकाराः– एवं प्रकारा अवकपनकसेवालादयस्तेऽपि साधारणशरीरबादरवनस्पतिकायिकाः प्रतिपत्तव्याः।

'ते समासतो' इत्यादि, 'ते' बादरवनस्पतिकायिकाः समासतो द्विविधाः प्रज्ञप्ताः, तद्यथा– पर्याप्तका अपर्याप्तकाश्च, 'जाव सिय संखेज्ञा' इति यावत्करणादेवं परिपूर्ण पाठो द्रष्टव्यः–"तत्थ णं जे ते अप्पज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा तेसि णं वण्णादेसेणं गंधादेसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं संखिज्जाइं जोणिप्पमुहसयसहस्साइं पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ सिय संखिज्जा सिय असंखेज्जा सिय अनंता" इति, एतत्प्राग्वत्, नवरं यत्रैको बादरपर्याप्तस्तत्र तन्निश्रयाऽपर्याप्ताः कदाचत्सङ्ख्येयाः कदाचिदसङ्ख्येयाः कदाचिदनन्ताः प्रत्येकतरवः सङ्ख्येया असङ्ख्येया वा, साधारणास्तु नियमादन इति भावः।

'तेसि णं भंते! कइसरीरगा?' इत्यादिद्वारकलापचिन्तनं बादरपृथिवीकायिकवत्, नवरं संस्थानद्वारे नानासंस्थानसंस्थितानीति वक्तव्यम्। अवगाहनाद्वारे 'उक्कोसेणं सातिरेगं जोयणसहस्स'मिति, तच्च सातिरेकं योजनसहस्रमवगाहनामानमेकस्य जीवस्य बाह्यद्वीपेषु वल्लयादीनां समुद्रगोतीर्येषु च पद्मनालादीनां, तदधिकोच्छ्रयमानानि पद्मानि पृथिवीकायपरिणाम इति वृद्धाः स्थितिद्वारे उत्कर्षतो दश वर्षसहस्राणि वक्तव्यानि, गत्यागतिसूत्रानन्तरं 'अपरीत्ता अनंता' इति वक्तव्यं, तत्र 'परीत्ताः' प्रतियेकशरीरिणोऽसङ्ख्येयाः 'अपरीत्ताः' अप्रत्येकशरीरिणोऽनन्ताः प्रज्ञप्ताः हे श्रवण! हे आयुष्मन्! उपसंहारमाह–'सेत्तं बादरवणस्सइकाइया, सेत्तं थावरा' इति सुगमम्॥ उक्ताः स्थावराः, सम्प्रति तत्रप्रतिपादनार्थमाह–

मू. (३०) से किं तं तसा?, २ तिविहा पन्नत्ता, तंजहा–तेउक्काइया वाउक्काइया ओराला तसा पाणा॥

वृ. अथ के ते त्रसाः?, सूरिराह–त्रसास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–तेजस्कायिका वायुकायिका औदारिकत्रसाः, तत्र तेजः–अग्निकायः–शरीरं येषां ते तेजस्कायास्त एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वार्थिकेकप्रत्ययविधा- नात्तेजस्कायिकाः, वायुः–पवनः स कायो येषां ते वायुकायास्त एव वायुकायिकाः।

उदाराः–स्फारा उदारा एव औदारिकाः प्रत्यक्षत एव स्पष्टत्रसत्वनिबन्धना सन्धिपूर्वक-गतिलिङ्गतयोपलभ्यमानत्वात्, तत्र त्रसा द्वीन्द्रियादयः 'औदारिकत्रसाः' स्थूरत्रसा इत्यर्थः ॥ तत्र तेजस्कायिकप्रतिपादनार्थमाह–

मू. *(३१) से किं तं तेउक्काइया ?, २ दुविहा प० तं० सुहुमतेउक्काइया बादरतेउक्काइया य ॥*

वृ. अथ के ते तेजस्कायिकाः ?, तेजस्कायिका द्विविधाः प्रज्ञप्ताः, तद्यथासूक्ष्मतेजस्कायि-काश्च बादरतेजस्कायिकाश्च, चशब्दो पूर्ववत्।

मू. *(३२) से किं तं सुहुमतेउक्काइया ?, २ जहा सुहुमपुढविक्काइया नवरं सरीरगा सूइकला-वसंठिया, एगगइया दुआगइआ परित्ता असंखेज्ञा पन्नत्ता, सेसं तं चेव, सेत्तं सुहुमतेउक्काइया*

वृ. अथ के ते सूक्ष्मतेजस्कायिकाः ?, सूरिराह–सूक्ष्मतेजस्कायिका इत्यादि सूत्रं सर्व सूक्ष्मपृथिवीकायिकवद् वक्तव्यं, नवरं संस्थानद्वारे शरीराणि सूचीकलापसंस्थितानि वक्तव्यानि, च्यवनद्वारेऽनन्तरमुद्धृत्य तिर्यग्गतावेवोत्पद्यन्ते, न मनुष्यगतौ, तेजोवायुभ्योऽनन्तरोद्धृतानां मनुष्यगतावुत्पादप्रतिषेधात्, तथा चोक्तम्–

॥१॥ "सत्तमिमहिनेरइया तेऊ वाऊ अनंतरुव्वट्टा।
नवि पावे माणुस्सं तहेवऽसंखाउया सव्वे ॥"

गत्यागतिद्वारे द्वयागतयः, तिर्यग्गतेर्मनुष्यगतेश्च तेषूत्पादात्, एकगतयोऽनन्तरमुद्वृत्तानां तिर्यग्गतावेवगमनात्, शेषं तथैव, उपसंहारवाक्यं 'सेत्तं सुहुमतेउक्काइया'।

मू. *(३३) से किं तं बादरतेउक्काइया ?, २ अनेगविहा पन्नत्ता, तंजहा–इंगाले जाले मुम्मुरे जाव सूरकंतमणिनिस्सिते, जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य। तेसि णं भंते ! जीवाणं कति सरीरगा पन्नत्ता ?, गोयमा ! तओ सरीरगा पन्नत्ता, तंजहा–ओरालिए तेयए कम्मए, सेसं तं चेव, सरीरगा सूइकलावसंठिता, तिन्निलेस्सा, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि राइंदियाइं तिरियमणुस्सेहिंतो उववाओ, सेसं तं चेव एगगतिया दुआगतिया, परित्ता असंखेज्ञा पन्नत्ता, सेत्तं तेउक्काइया ॥*

वृ. बादरतेजस्कायिकानाह–अथ के ते बादरतेजस्कायिकाः ?, सूरिराह–बादरतेज-स्कायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा–"इंगाले जाव तत्थ नियमे"त्यादि यावत्करणादेवं परिपूर्ण-पाठः–"इंगाले जाला मुम्मुरे अच्ची अलाए सुद्धागणी उक्का विज्जू असनि निग्घाए संघरिससमुट्ठिए सूरकंतमणिनिस्सिए, जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता–

तंजहा–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसिणं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखिज्जाइं जोणिप्पमुहसयसहस्साइं पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ निमा असंखेज्ञा" इति।

अस्य व्याख्या–'अङ्गारः' विगतधूमज्वालो जाज्वल्यमानः खदिरादि, 'ज्वाला' अनलसंबद्धा दीपशिखेत्यन्ते, 'मुर्मुरः' फुम्फुकाग्नौ भस्मामिश्रितोऽग्निकणरूपः 'अर्चि' अनलाप्रतिबद्धा ज्वाला, 'अलातम्' उल्मुकं, 'शुद्धाग्नि' अयःपिण्डादौ 'उल्का' चुडुली 'विद्युत्' प्रतीता, 'अशनि' आकाशे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतन्नग्निमयः कणः, 'निर्घातः' ळऐखअरइयआशनिप्रपातः 'संघर्षसमुत्थितः' अरण्यादिकाष्ठ-निर्मथनसमुत्थः, 'सूर्यकान्तमणिनिश्रितः' सूर्यस्वरकिरणसंपर्के सूर्यकान्तमणेर्य समुपजायते।

'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये 'तथाप्रकाराः' एवंप्रकारास्तेजस्कायिकास्तेऽपि बादरतेजसकायिकतया वेदितव्याः, 'ते समासतो' इत्यादि प्राग्वत्, शरीरादिद्वारकलापचिन्ताऽपि सूक्ष्मतेजस्कायिकवत्, नवरं स्थितिद्वारे जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतस्त्रणि रात्रिन्दिवानि, आहारो यथा बादरपृथ्विकायिकानां तथा वक्तव्यः, उपसंहारमाह– 'सेत्तं तेउक्काइया'।

उक्तास्तेजस्कायिकाः, सम्प्रति वायुकायिकानाह–

मू. (३४) *से किं तं वाउक्काइया ?, २ दुविहा पन्नत्ता, तंजहा–सुहुमवाउक्काइया य बादरवाउक्काइया य, सुहुमवाउक्काइया जहा तेउक्काइया नवरं सरीरा पडागसंठिता एगगतिया दुआगतिया परित्ता असंखिज्जा, सेत्तं सुहुमवाउक्काइया।*

से किं तं बादरवाउक्कइया ?, २ अनेगविधा पण्णत्ता, तंजहा–पाईणवाए पडिणवाए, एवं जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य।

ते सि णं भंते ! जीवाणं कति सरीरगा पन्नत्ता ?, गोयमा ! चत्तारि सरीरगा पन्नत्ता, तंजहा–ओरालिए वेउव्विए तेयए कम्मए, सरीरगा पडागसंठिता, चत्तारि समुग्घाता–वेयणासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए वेउव्वियसमुग्घाए। आहारो निव्वाघातेणं छद्दिसिं वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं, उववातो देवमणुयनेरइएसु णत्थि, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि वाससहस्साइं, सेसं तं चेव एगगतिया दुआगइया परित्ता असंखेज्जा प० समणाउसो !, सेत्तं बायरवाऊ, सेत्तं वाउक्कइया

वृ. *अथ* के ते वायुकायिकाः ?, सूरिराह–वायुकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मवायुकायिकाश्च बादरवायुकायिकाश्च, चशब्दौ प्राग्वत्, तत्र सूक्ष्मवायिकायिकाः सूक्ष्मतेजस्कायिकवद्वक्तव्याः, नवरं संस्थानद्वारे तेषां शरीराणि पताकासंस्थानसंस्थितानि वक्तव्यानि, शैषं तथैव, बादरवायुकायिका अपि एवं चैव–सूक्ष्मतेजस्कायिकवदेव, नवरं भेदो यथा प्रज्ञापनायां तता वक्तव्यः, स चैवम्। "से किं तं बायरवाउक्काइया ?, बायरवाउक्काइया अनेगविहा पण्णत्ता, तंजहा–पाइणवाए पडीणवाए दाहिणवाए उदीणवाए उड्डवाए अहेवाए रियवाए बिदिसिवाए वाउब्भामे वाउक्कलिया मंडलियावाए उक्कलियावाए गुंजावाए झंझावाए संवट्टगवाए घणवाए तनुवाए सुद्धवाए, जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसिं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासाएसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा" इति।

अस्य व्याख्या– 'पाईणवाए' इति, यः प्राच्या दिशः समागच्छति वातः स प्राचीनवातः, एवमपाचीनो दक्षिणवात् उदीचीनवातश्च वक्तव्यः, ऊर्ध्वमुद्गच्छन् यो वाति वातः स ऊर्ध्ववातः, एवमधोवाततिर्यग्वातावपि परिभावनीयौ, विदिग्वातो यो विदिग्भ्यो वादि, वातोद्भ्रमः–अनवस्थितो वातः, वातोत्कलिका समुद्रस्येव वातस्योत्कलिका वातमण्डलीवात् उत्कलिकाभि प्रचुरतराभि सम्मिश्रो यो वातः, मण्डलिकावातो मण्डलिकाभिर्मूलत आरभ्य प्रचुरतराभि सम्मिश्रो यो वातः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुञ्जावातो यो गुञ्जन्–शब्दं कुर्वन् वाति, झञ्झावातः सवृष्टि, अशुभनिष्ठुर इत्यन्ये, संवर्त्तकवात-स्तृणादिसंवर्त्तनस्वभावः, धनवातो धनपरणामो वातो रत्नप्रभापृथिव्याद्यघोवर्त्ती, तनुवातो–विरलपरिणामो धनवातस्याधःस्थायी, शुद्धवातो मन्दस्तिमितो, बस्तिदृत्यादिगत इत्यन्ये, 'ते समासतो' इत्यादि प्राग्वत् ।

तथा शरीरादिद्वारकलापचिन्तायां शरीरद्वारे चत्वारि शरीराणइ औदारिकवैक्रियतैजस-कार्मणानि, चत्वारः समुद्घाताः–वैक्रयवेदनाकषायमारणान्तिकरूपाः, स्थितिद्वारे जघन्यतोऽ-न्तर्मुहूर्त्त वक्तव्यमुत्कर्षतस्त्रीणि वर्षसहस्राणि, आहारो निर्व्याघातेन षड्दिशि, व्याघातं प्रतीत्य स्यात्रिदिशिस्याच्चतुर्दिशि स्यात्पञ्चदिशि, लोकनिष्कुटादावपि बादरवातकायस्य सम्भवात्, शेषं सूक्ष्मवातकायवत्, उपसंहारमाह–'सेत्तं वाउक्काइया' इति ।

उक्ता वातकायिकाः, सम्प्रत्यौदारिकत्रसानाह–

मू. (३५) *से किं तं ओराला तसा पाणा ?, २ चउव्विहा पन्नत्ता, तंजहा–बेइंदिया तेइंदिया चउरिंदिया पंचेंदिया ॥*

वृ. अथ के ते औदारिकत्रसाः ?, सूरिराह–औदारिकत्रसाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा–द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाः, तत्र द्वे स्पर्शनरसनरूपे इन्द्रिये येषां ते द्वीन्द्रियाः, त्रीणि स्पर्शनरसनघ्राणारूपाणि इन्द्रियाणि येषां ते त्रीन्द्रियाः, चत्वारि स्पर्शनरसनघ्राणचक्षूरूपाणि इन्द्रियाणि येषां ते चतुरिन्द्रियाः, पञ्च स्पर्शनरसनघ्राणचक्षःश्रोत्ररूपाणि इन्द्रियाणि येषां ते पञ्चेन्द्रियाः

तत्र द्वीन्द्रियप्रतिपादनार्थमाह–

मू. (३६) *से किं तं बेइंदिया ?, २ अनेगविधा पन्नत्ता, तंजहा–पुलाकिमिया जाव समुद्दलिक्खा, जे यावन्ने तहप्पगारा, ते समासतो दुविहा प० तं०-पज्जत्ता य अपज्जत्ता य । तेसिणं भंते ! जीवाणं कति सरीरगा पन्नत्ता ?, गोयमा ! तओ सरीरगा प० तं० ओरालिए तेयए कम्मए । तेसि णं भंते ! जीवाणं के महालिया सरीरओगाहणा पन्नत्ता ?, जहन्नेणं अंगुलासंखेज्जभागं उक्कोसेणं बारसजोयणाइं छेवट्ठसंघयणा हुंडसंठिता, चत्तारि कसाया, चत्तारि सण्णाओ, तिन्नि लेसाओ, दो इंदिया, तओ समुग्घाता–वेयणा कसाया मारणंतिया, नोसन्नी असन्नी, नपुंसकवेदगा, पंच पज्जत्तीओ, पंच अपज्जत्तीओ, सम्मद्दिट्ठीवि मिच्छदिट्ठीवि नो सम्मिमिच्छदिट्ठी, नो ओहिदंसणी णो चक्खुदंसणी अचक्खुदंसणी नो केवलदंसणी ।*

ते णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि, जे नाणी ते नियमा दुन्नाणी, तंजहा–आभिनिबोहियनाणी सुयनाणी य, जे अन्नाणी ते नियमा दुअन्नाणी–मतिअन्नाणी य सुयअन्नाणी य, नो मनजोगी वइजोगी कायजोगी, सागारोवउत्तावि अना-गारोवउत्तावि । आहारो नियमाछद्दिसिं, उववातो तिरियमणुस्सेसु नेरइयदेवअसंखेज्जवासाउयवज्जेसु, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बारस संवच्छराणि, समोहतावि मरंति असमोहतावि मरंति । कहिं गच्छंति ?, नेरइयदेवअसंखेज्जवासाउअवज्जेसु गच्छंति, दुगतिया दुआगतिया, परित्ता असंखेज्जा, सेत्तं बेइंदिया ॥

वृ. 'से किं त'मित्यादि, अथ के ते द्वीन्द्रियाः ?, सूरिराह–द्वीन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा–'पुलाकिमिया जाव मसुद्दलिक्खा' इति यावत्करणादेवं परिपूर्णपाठो द्रष्टव्यः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पुलाकिमिया कुच्छिकिमिया गंडूयलगा गोलोमा नेउरा सोमंगलगा वंसीमुहा सूईमुहा गोजलोया जलोया जालायुसा संखा संखाणगा घुल्ला खुल्लावराडा सोत्तिया मोत्तिया कल्लुयावासा एगतोवत्ता दुहतोवत्ता नंदियावत्ता संबुक्का माइवाहा सिप्पिसंपुडा चंदणा समुद्दलिक्खा इति" अस्य व्याख्या—'पुलाकिमिया' नाम वायुप्रदेशोत्पन्नाः कृमयः 'कुक्षिकमयः' कुक्षिप्रदेशोत्पन्नाः 'गण्डोयलकाः' प्रतीताः 'शङ्खाः' समुद्रोद्भवास्तेऽपि प्रतीताः 'शङ्खनकाः' त एव लघवः 'घुल्लाः' घुल्लिकाः 'खुल्लाः' लघवः शङ्खाः सामुद्रशङ्खाकाराः 'वराटाः' कपर्दा 'मातृवाहाः' कोद्रवाकारतया ये कोद्रवा इति प्रतीताः 'सिप्पिसंपुडा' संपुटरूपाः शुक्यः 'चन्दनकाः' अक्षाः, शेषास्तु यथासम्प्रदायं वाच्याः

'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकाराः—एवंप्रकाराः मृतककलेवरसम्भूतकृम्यादयस्ते सर्व्वे द्वीन्द्रिया ज्ञातव्याः, 'ते समासतो' इत्यादि, ते द्वीन्द्रियाः 'समासतः' सङ्क्षेपेण द्विविधाः प्रज्ञप्ताः, —अपर्याप्ताः पर्याप्ताश्च । शरीरद्वारेऽमीषां त्रीणि शरीराणि—औदारिकं तैजसं कार्मणं च, अवगाहना जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रा उत्कृष्टा द्वादश योजनानि, संहननद्वारे छेदवर्त्तिसंहननिनः, अत्र संहननं मुख्यमेव द्रष्टव्यम्, अस्थिनिचयभावात्, संस्थानद्वारे हुण्डसंस्थानाः, कषायद्वारे चत्वारः कषायाः, संज्ञाद्वारे चतस्र आहारादिकाः संज्ञाः, लेश्याद्वारे आद्यास्तिस्र लेश्याः, इन्द्रियद्वारे द्वे इन्द्रिये, तद्यथा—स्पर्शनं रसनं च, समुद्घातद्वारे त्रयः समुद्घाताः, —वेदनासमुद्घातः कषाय- समुद्घातो मारणान्तिकसमुद्घातश्च ।

संज्ञाद्वारे नो संज्ञिनोऽसंज्ञिनः, वेदद्वारे नपुंसकवेदाः, संमूर्च्छिमत्वात्, पर्याप्तिद्वारे पञ्चपर्याप्तयः पञ्चापर्याप्तयः, दृष्टिद्वारे सम्यग्दृष्टयो मिथ्यादृष्टयो वा, न सम्यग्मिथ्यादृष्टयः, कथम् ? इति चेत् उच्यते, इह घण्टाया वादितायां महान् शब्द उपजायते, तत उत्तरकालं हीयमानोऽवसाने लालामात्रं भवति, एवममुना घण्टालालान्यायेन किञ्चित्सास्वादनसम्यक्त्वशेषाः केचिद् द्वीन्द्रियेषु मध्ये उत्पद्यन्ते, ततोऽपर्याप्तावस्थायां कियत्कालं सास्वादनसम्यक्त्वसम्भवात् सम्यग्दृष्टित्वं, शेषकालं मिथ्यादृष्टिता यत्तु सम्यग्मिथ्यादुष्टित्वं तन्न संभवति, तथाभवस्वभावतया तथारूप० परिणामायोगात्, नापि सम्यग्मिथ्यादृष्टि सन् तत्रोत्पद्यते 'न सम्ममिच्छो कुणइ कालं' इति वचनात्, दर्शनद्वारं प्राग्वत्, ज्ञानद्वारे ज्ञानिनोऽप्यज्ञानिनोऽपि, तत्र ज्ञानित्वं सास्वादनसम्यक्त्वापेक्षया, ते च ज्ञानिनो नियमाद् द्विज्ञानिनो, मतिश्रुतज्ञानमात्रमावात्, अज्ञानिनोऽपि नियमाद् द्वयज्ञानिनो, मत्यज्ञानश्रुताज्ञानमात्रभावात्, योगद्वारे न मनोयोगिनो वाग्योगिनोऽपि काययोगिनोऽपि, उपयोगद्वारे पूर्ववत्, आहारो नियमात् षड्दिशि ।

त्रसनाड्या एवान्तर्द्वीन्द्रियादीनां भावात्, उपपातो देवनारकासङ्ख्या तदर्षायुष्कवर्जेभ्यः शेषतिर्यग्मनुष्येभ्यः, स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वादश वर्षाणि, समवहतद्वारं प्रागिवच्यवनद्वारे देवनारकासङ्ख्यातवर्षायुष्कवर्जितेषु शेषेषु तिर्यग्मनुष्येष्वनन्तरमुद्धृत्य गमनम्, अत एवा गत्यागतिद्वारे द्व्यागतिकाद्विगतिकाः तिर्यग्मनुग्यगत्यपेक्षया, 'परित्ताः' प्रत्येकशरीरिणः, असङ्ख्येया घनीकृतस्य लोकस्य या ऊर्ध्वाध आयता एकप्रादेशिक्यः, श्रेणयोऽसङ्ख्येयोजनकोटाकोटीप्रमाणाकाशसूचिगत- प्रदेशराशिप्रमाणाः तावत्प्रमाणत्वात्, प्रज्ञप्ताः हे श्रमण ! हे आयुष्मन् !, उपसंहारमाह— 'से तं बेइंदिया' ॥ उक्ता द्वीन्द्रियाः, अधुना त्रीन्द्रियानाह—

मू. (३७) से किं तं तेइंदिया ?, २ अनेगविधा पन्नत्ता, तंजहा—ओवइया रोहिणीया

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

हत्थिसोंडा, जे यावण्णे तहप्पगारा, ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य, तहेव जहा बेइंदियाणं। नवरं सरीरोगाहणा उक्कोसेणं तिन्नि गाउयाइं, तिन्नि इंदिया, ठिई जह० अंतोमुहुत्तं उक्को० एगूणपन्नराइंदिया, सेसं तहेव, दुगतिया दुआगतिया, परित्ता असंखेज्जा प० से तं तेइंदिया॥

वृ. अथ के ते त्रीन्द्रियाः?, सूरिराह–त्रीन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा–'भेदो जहा पन्नवणाए' भेदो यथा प्रज्ञपनायां तथा वचव्यः, स चैवम्–"उवयिया रोहिणिया कुंथूपिवीलिया उद्देसका उद्देहिया उक्कलिया तणहारा कट्ठहारा पत्तहारा मालुया पत्तहारा तणस्सका पत्तबेंटया फलबेंटया तेम्बूरुमिजिया तउसमिंजिया कप्पासट्ठिभिंजिया झिल्लिया झिंगिरा झगिरिडा वाहुया, मुरगा सोवत्थिया सुयबेंटा इंदकाइया इंदगोवया कोत्थलवाहगा हालाहला पिसुया तसवाइया गोम्ही हत्थिसोंडा। इति, एते च केचिदतिप्रतीताः केचिद्देशविशेषतोऽवगन्तव्याः,

नवरं 'गोम्ही' कण्हसियाली, 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये 'तथाप्रकाराः' एवंप्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्याः, 'ते समासतो' इत्यादि समस्तमपि सूत्रं द्वीन्द्रियवत्परिभावनीयं, नवरमवगाहनाद्वारे उत्कर्षतोऽ- वगाहना त्रीणि गव्युतानि। इन्द्रियद्वारे त्रीणि इन्द्रियाणि। स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षत एकोनपञ्चाशद् रात्रिन्दिवानि, शेषं तथैव, उपसंहारमाह–'सेत्तं तेइंदिया'। उक्तास्त्रीन्द्रियाः, सम्प्रति चतुरिन्द्रियप्रतिपादनार्थमाह–

मू. (३८) *से कं तं चउरिंदिया?, २ अनेगविधा पन्नत्ता, तंजहा–अंधिया पुत्तिया जाव गोमयकीडा, जे यावन्ने तहप्पगारा ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य*

तेसि णं भंते! जीवाणं कति सरीरगा पन्नत्ता?, गोयमा! तओ सरीरगा पन्नत्ता तं चेव, नवरं सरीरोगाहणा उक्कोसेणं चत्तारि गाउयाइं, इंदिया चत्तारि, चक्खुदंसणी अचक्खुदंसणी, ठिती उक्कोसेणं छम्मासा। सेसं जहा तेइंदियाणं जाव असंखेज्जा प० से तं चउरिंदिया।

वृ. अथ के ते चतुरिन्द्रियाः?, सूरिराह–चतुरिन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा– "अंधिया पुत्तिया मच्छिया मगसिरा कीडा पयंगा टेंकणा कुक्कहा कुक्कडा नंदावत्ता झिंगिरिडा किण्हपत्ता नीलपत्ता लोहियपत्ता हालिद्दपत्ता सुक्कलपत्ता चित्तपक्खा विचित्तपक्खा ओहंजलिया जलचारिया गंभीरा नीणिया तंतवा अच्छिरोडा अच्छिवेहा सारंगा नेउरा डोला भमरा भरिलि जरला विच्छुया पत्तविच्छुया छाणविच्छुया जलविच्छुया सेइंगाला कणगा गोमयकीडगा" एते लोकतः प्रत्येतव्याः। 'जे यावण्णे तहप्पगारा' इति, येऽपि चान्ये 'तथाप्रकाराः' एवंप्रकारास्ते सर्वे चतुरिन्द्रिया विज्ञेयाः, 'ते समासतो' इत्यादि सकलमपि सूत्रं द्वीन्द्रियवद्भावनीयं, नवरमवगाहनाद्वारे उत्कर्षतोऽवगाहना चत्वारि गव्यूतानि।

इन्द्रियद्वारे स्पर्शनरसनघ्राणचक्षुर्लक्षणानि चत्वारीन्द्रियाणि। स्थितिद्वारे उत्कर्षतः स्थिति षण्मासाः, शेषं तथैव, उपसंहारमाह–'सेत्तं चउरिंदिया'।

सम्प्रति पञ्चेन्द्रियान् प्रतिपिपादयिषुराह–

मू. (३९) *से किं तं पंचेंदिया?, २ चउव्विहा प० रतिया तिरिक्खजोणियाम णुस्सा देवा॥*

वृ. अथ के ते पञ्चेन्द्रियाः?, सूरिराह–पञ्चेन्द्रियाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा–नैरयिकास्तिर्यग्योनिका मनुष्या देवाः, तत्र अयमृइष्टफलं कर्म निर्गतमयं येभ्यस्ते निरया–नरकावासास्तेषु भवा नैरयिकाः, अध्यात्मादेराकृतिगणत्वादिकणप्रत्ययः। तिर्यगिति प्रायस्तिर्यगलोके

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

योनयस्तिर्यगयोनयस्तत्र जातास्तिर्यग्योनिजाः, यदिवा तिर्यग्योनिका इति शब्दसंस्कारः, तत्र तिर्यगिति प्रायस्तिर्यग्लोके योनयः-उत्पत्तिस्थानानि येषां ते तिर्यग्योनिकाः

मनुरिति मनुष्यस्य संज्ञा, मनोरपत्यानि मनुष्याः, जातिशब्दोऽयं राजन्यादिशब्दवत् दीव्यन्तीति देवाः ॥ तत्रनैरयिकप्रतिपादनार्थमाह-

मू. (४०) *से किं तं नेरइया ?, २ सत्तविहा पन्नत्ता, तंजहा-रयणप्पभापुढविनेरइया जाव अहे सत्तमपुढविनेरइया, ते समासओ दुविहा पन्नत्ता, तं०-पज्जत्ता य अपज्जत्ता य। तेसि णं भंते! जीवाणं कति सरीरगा पन्नत्ता ?, गोयमा! तओ सरीरया पन्नत्ता, तंजहा-वेउव्विए तेयए कम्मए।*

तेसि णं भंते! जीवाणं केमहालिया सरीरोगाहणा पन्नत्ता ?, गोयमा! दुविहा सरीरोगाहणा पन्नत्ता, तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखेज्जो भागो उक्कोसेणं पंचधणुसयाइं, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखेज्जो भागो उक्कोसेणं धणुसहस्सं।

तेसिणं भंते! जीवाणं सरीरा किंसंघयणी पन्नत्ता ?, गोयमा! छण्हं संघयणाणं असंघयणी, नेवट्ठी नेव छिरा नेव ण्हारु नेव संघयणमत्थि, जे पोग्गला अनिट्ठा अकंता अप्पिया असुभा अमणुण्णा अमणामा ते तेसिं संघातत्ताए परिणमंति। तेसि णं भंते! जीवाणं सरीरा किंसंठिता पन्नत्ता ?, गोयमा! दुविहा पन्नत्ता, तंजहा-

भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जे ते भवधारणिज्जा ते हुंडसंठिया, तत्थ णं जे ते उत्तरवेउव्विया तेवि हुंडसंठिया पन्नत्ता, चत्तारि कसाया चत्तारि सण्णाओ तिन्नि लेसाओ पंचेंदिया चत्तारि समुग्घाता आइल्ला, सन्नीवि असन्नीवि, नपुंसकवेदा, छप्पज्जत्तीओ छ अपज्जत्तीओ, तिविधा दिट्ठी, तिन्नि दंसणा, नाणीवि अन्नाणीवि, जे नाणी ते नियमा तिन्नाणी, तंजहा।-

आभिनिबोहियनाणी सुतनाणी ओहिनाणी, जे अन्नाणी ते अत्थेगतिया दुअन्नाणी अत्थेगतिया तिअन्नाणी, जे य दुअन्नाणी ते नियमा मइअन्नाणी सुयअन्नाणी य, जे तिअन्नाणी ते नियमा मतिअन्नाणी य सुयअन्नाणीय विभंगनाणी य।

तिविधे जोगे, दुविहे उवओगे, छद्दिसिं आहारो, ओसन्नं कारणं पडुच्च वण्णतो कालाइं जाव आहारमाहारेंति, उववाओ तिरियमणुस्सेसु, ठिती जहन्नेणं दसवाससहस्साइं उक्कोसेणं तित्तीसं सागरोवमाइं, दुविहा मरंति, उव्वट्टणा भाणियव्वा जतो आगता, नवरि संमुच्छिमेसु पडिसिद्धो, दुगतिया दुआगतिया परित्ता असंखेज्जा पन्नत्ता समणाउसो!। से तं नेरइया।

वृ. अथ के ते नैरयिकाः ?, सूरिराह-नैरयिकाः सप्तविधाः प्रज्ञप्ताः, तद्यथा-रत्नप्रभापृथिवीनैरयिका यावत् प्रणात् शर्कराप्रभापृथिवीनैरयिकाः वालुकाप्रभापृथिवीनैरयिकाः पङ्कप्रभापृथिवीनैरयिकाः धूमप्रभापृथिवीनैरयिकाः तमःप्रभापृथिवीनैरयिका इति परिग्रहः, अधःसप्तमपृथिवीनैरयिकाः, 'ते समासतो'इत्यादिपर्याप्तापर्याप्तसूत्रं सुगमम् ॥

शरीरादिदा- रप्रतिपादनार्थमाह- 'तेसि णं भंते!' इत्यादि, सुगमं नवरं भवप्रत्ययादेव तेषां शरीरं वैक्रियं नौदारिकमिति वैक्रियतैजसकार्मणानि त्रीणि शरीराण्युक्तानि। अवगाहना तेषां द्विधाभवधारणीया उत्तरवैकुर्विकी च, तत्र यया भवो धार्यते सा भवधारणीया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुलवचनात्करणेऽनीयप्रत्ययः, अपरा भवान्तर- वैरिनारकप्रतिघातनार्थमुत्तरकालं या विचित्ररूपा वैक्रियिकी अवगाहना सा उत्तरवैकुर्विकी, तत्र या सा भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभागः, स चोपपातकाले वेदितव्यः, तथाप्रयत्नभावात्, तत्कर्षतः पञ्चधनुःशतानि, इदं चोत्कर्षतः प्रमाणं सप्तमपृथिवीमधिकृत्य वेदितव्यं, प्रतिपृथिवि तूत्कर्षतः प्रमाणं सङ्ग्रहणिटीकातो भावनीयं, तत्र सविस्तरमुक्तत्वात्, उत्तरवैकुर्विकी जघन्यत्मुङ्गुलसङ्ख्येयभागो न त्वसङ्ख्येयभागः, तथाप्रयत्नाभावात्, उत्कर्षतो धनुःसहस्रमिति, इदमप्युत्कर्षपरिमाणं सप्तमनरकपृथिवीमधिकृत्य वेदितव्यं, प्रतिपृथिवि तु सङ्ग्रहणिटीकातः परिभावनीयं, संहननद्वारे।

तेसि णं भंते त्यादि प्रश्नसूत्रं सुगमं, भगवानाह--गौतम ! षण्णां संहननानामन्यतमेनापि संङननेन तेषां शरीराण्यसंहननानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, कस्मादसंहननादि इति चेद् अत आह–'नेवट्ठी' इत्यादि, नैव तेषां शरीराणामस्थीनि, नैव शिरा–धमनिनाड्यो, नापि स्नायूनि– शेषशिराः अस्थिनिचयात्मकं च संहननमतोऽस्थ्याद्यभावादसंहननानि शरीराणि, इयमत्र भावना–इह तत्ववृत्या संहननमस्थिनिचयात्मकं, यत्तु प्रागेकेन्द्रियाणां सेवार्त्तसंहननमभधायि तदौदा- रिकशरीरसम्बन्धमात्रमपेक्ष्यौपचारिकं, देवा अपि यदन्यत्र प्रज्ञापनादौ वज्रसंहननिन उच्यन्ते तेऽपि गौणवृत्या, तथाहि– इह यादृशी मनुष्यलोके चक्रवत्यादेर्विशिष्टवज्रर्षभ- नाराचसंहननिनः सकलशेषमनुष्यजना- साधारणा शक्ति "दोसोला बत्तीसा सव्वबलेणं तु संकलनिबद्ध"मित्यादिका, ततोऽधिकतरा देवानां पर्वतोत्पाटनादिविषया शक्ति श्रूयते न च शरीरपरिक्लेश इति तेऽपि वज्रसंहननिन इव वज्रसंहननिन उक्ता न पुनः परमार्थतस्ते संहननिनः, ततो नारकाणामस्थ्यभावात्संहननाभावः, एतेन योऽपरिणतभगवत्सिद्धान्तसारो वावदूकः सिद्धान्तबाहुल्यमात्मनः ख्यापयन्नेवं प्रललाप–"सुत्ते सत्तिविसेसो संघयणमिहऽट्ठिनिचयो"त्ति, इति सोऽपाकीर्णो द्रष्टव्यः, साक्षादत्रैव सूत्रे अस्थिनिचयात्मकस्य संहननस्याभिधानात्, अस्थ्यभावे संहननप्रतिषेधादिति। अपरस्त्वाह– नैरयिकाणामस्थ्यभावे कथं शरीरबन्धोपपत्ति ? नैष दोषः, तताविधपुद्गलस्कन्धवन् शरीरबन्धोपपत्तेः, अत एवाह–

'जे पोग्गला अनिट्ठा' इत्यादि, ये पुद्गलाः 'अनिष्टाः' मनस इच्छामतिक्रान्ताः, तत्र किञ्चित्कमनीयमपि केषाञ्चिदनिष्टं भवति तत आह–न कान्ताः सकान्ता–अकमनीयाः, अत्यन्ताशुभवर्णोपेतत्वात्, अत एव न प्रियाः, दर्शनापातकालेऽपि न प्रियबुद्धिमात्मन्युत्पादयन्तीति भावः, 'अशुभाः' अशुभरसगन्धस्पर्शात्कत्वात्, 'अमनोज्ञाः' न मनःप्रह्लादहेतवो, विपाकतो दुःखजनकत्वात्, अमनआपाः–न जातुचिदपि भोज्यतया जन्तूनां मनांस्याप्वन्तीति भावः, ते ताषां 'संङ्घातत्वेन' तथारूपशरीरपरिणतिभावेन परिणमन्ति।

संस्थानद्वारे तेषां शरीराणि भवधारणीयानि उत्तरवैकुर्विकाणि च हुण्डसंस्थानानि वक्तव्यानि, तथाहि–भवधारणीयानि तेषां शरीराणि भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटित- सकलग्रीवादिरोमपक्षिशरीरकवदतिबीभत्सहुण्डसंस्थानोपेतानि, यान्यप्युत्तरवैक्रियाणि तानि यद्यपि शुभानि वयं विकुर्विष्याम इत्यभिसन्धिना विकुर्वितुमारभन्ते तथाऽपि तानि तेषामत्यन्ता- शुभतथाविधनामकर्मोदयतोऽवीताशुभतराण्युपजायन्ते इति तान्यपि हुण्डसंस्थानानि।

कषायद्वारं संज्ञाद्वारं च प्राग्वत्, लेश्याद्वारे आद्यास्तिस्र लेश्याः, तत्राद्ययोर्द्वयोः पृथिव्योः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कापोतलेश्या तृतीयस्यां पृथिव्यां केषुचिन्नरकावासेषु कापोतलेश्या शेषेषु नीललेश्या, चतुर्थ्यां नीललेश्या, पञ्चम्यां केषुचिन्नरकावासेषु नीललेश्या, शेषेषु कृष्णलेश्या, षष्ठ्यां कृष्णलेश्या, सप्तम्यां परमकृष्णलेश्या, उक्तञ्च व्याख्याप्रज्ञप्तौ–

॥१॥ "काऊ य दोसु तइयाए मीसिया नीलीया चउत्थीए
पंचमियाए। मीसा कण्हा तत्तो परमकण्हा॥"

इन्द्रियद्वारे पञ्च इन्द्रियाणि स्पर्शनरसनघ्राणचक्षुश्रोत्रलक्षणानि। समुद्घातद्वारे चत्वारः समुद्घाताः–वेदनासमुद्घातः कषायसमुद्घातो वैक्रियसमुद्घातो मारणान्तिकसमुद्घातश्च। संज्ञिद्वारे संज्ञिनोऽसंज्ञिनश्च, तत्र ये गर्भव्युत्क्रान्तिकेभ्य उत्पन्नास्ते संज्ञिन इति व्यपदिश्यनते, ये तु संमूर्च्छनजेभ्यस्तेऽसंज्ञिनः, ते च रत्नप्रभायामेवोत्पद्यन्ते न परतः, अनाशयाशुभक्रियाया दारुणायां अप्यनन्तरविपाकिन्या एतावन्मात्रफलत्वात्, अत एवाहुर्वृद्धाः–

॥१॥ "असन्नी खलु पढमं दोच्चं व सिरीसवा तइय पक्खी।
सीहा जंति चउत्थिं उरगा पुण पंचमिं पुढविं॥

॥२॥ छट्ठिं य इत्थियाओ मच्छा मणुया य सत्तमिं पुढविं।
एसो परमोवाओ बोद्धवो नरयपुढवीसु॥

वेदद्वारे नपुंसकवेदाः। पर्याप्तिद्वारे पञ्च पर्याप्तयः पञ्चापर्याप्तयः। दृष्टिद्वारे त्रिविधदृष्टयोऽपि, तद्यथा–मिथ्यादृष्टयः सम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयश्च, दर्शनद्वारे त्रीणि दर्शनानि, तद्यथा–चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं च।

ज्ञानद्वारे ज्ञानिनोऽपि अज्ञानिनोऽपि, तत्र ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः, तद्यथा–आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, येऽत्राज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च, एष चात्र भावार्थः–ये नारका असंज्ञिनस्तेऽपर्याप्तावस्थायां द्व्यज्ञानिनः पर्याप्तावसथायां तु त्र्यज्ञानिनः संज्ञिनस्तूभय्यामप्यवस्थायां त्र्यज्ञानिनः, असंज्ञिभ्य ह्युत्पद्यमानास्तथाबोधमान्द्यादपर्याप्तावस्थायां नाव्यक्तमप्यवधिमाप्नुवन्तीति।

योगोपयोगाहारद्वाराणि प्रतीतानि। उपपातो यथा व्युत्क्रान्तिपदे प्रज्ञापनायां तथा वक्तव्यः, पर्याप्तपञ्चेन्द्रितिर्यग्मनुष्येभ्योऽसङ्ख्यातवर्षायुष्कवर्जेभ्यो वक्तव्यो, न शेषेभ्य इति भावः। स्थितिर्जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि। समुद्घातमधिकृत्य मरणचिन्ता प्राग्वत्। उद्वर्त्तनाचिन्ता यथा व्युत्क्रान्तिपदे प्रज्ञापनायां कृता तथा वक्तव्या, अनन्तरमुद्धृत्य संज्ञिपञ्चेन्द्रियतिर्यङ्मनुष्येष्वसङ्ख्यातवर्षायुष्कवर्जितेष्वागच्छन्तीति भावः, अत एव गत्यागतिद्वारे द्व्यागतिका द्विगतिकाः, 'परीत्ताः' प्रत्येकशरीरिणोऽसङ्ख्येयाः प्रज्ञप्ताः, हे श्रमण! हे आयुष्मन्!, उपसंहारमाह–'सेत्तं नेरइया'। उक्ता नैरयिकाः, सम्प्रति तिर्यकपञ्चेन्द्रियानाह–

मू. (४१) *से किं तं पंचेंदियतिरिक्खजोणिया?, २ दुविहा पन्नत्ता, तजहा–संमुच्छिमपंचेंदियतिरिक्खजोणिया य गब्भवक्कंतियपंचिंदियतिरिक्खजोणिया य॥*

वृ. अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः?, सूरिराह–पञ्चेन्द्रियतिर्यग्योनिका द्विविधाः प्रज्ञप्ताः, तद्यथा–संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिका गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यग्योनिकाश्च, तत्र संमूर्च्छनं संमूर्च्छो–गर्भोपपातव्यतिरेकेणैव यः प्राणिनामुत्पादस्तेन निर्वृत्ताः संमूर्च्छिमाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भावादिम' इति इमप्रत्ययः। ते च ते पञ्चेन्द्रियतिर्यग्योनिकाश्च संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः, गर्भे व्युत्क्रान्ति–उत्पत्तिर्येषां यदिवा गर्भाद्–गर्भवशाद् व्युत्क्रान्ति–निष्क्रमणं येषां ते गर्भव्युक्रान्तिकाः, ते च ते पञ्चेन्द्रिय-तिर्यग्योनिकाश्चेति विशेषणसमासः, चशब्दौ स्वगतानेकभेदसूचकौ

मू. (४२) *से किं तं संमुच्छिमपंचेंदियतिक्खजोणिया?, २ तिविहा पन्नत्ता, तंजहा–जलयरा थलयरा खहयरा ॥*

वृ. अथ के ते संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः?, सूरिराह–संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–जलचराः स्थलचराः खचराः, तत्र जले चरन्तीति जलचराः, एवं स्थलचरा खचरा अपि भावनीयाः।

मू. (४३) *से किं तं जलयरा?, २ पंचविधा पन्नत्ता, तंजहा–मच्छगा कच्छभा मगरा गाहा सुसुमारा से किं तं मच्छा?, एवं जहा पन्नवणाए जाव जे यावन्ने तहप्पगारा, ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य।*

तेसि णं भंते! जीवाणं कति सरीरगा पन्नत्ता?, गोयमा! तओ सरीरया पन्नत्ता, तंजहा–ओरालिए तेयए कम्मए, सरीरोगाहणा जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं जोयणसहस्सं छेवट्ठसंघयणी हुंडसंठिता, चत्तारि कसाया, सण्णाओवि ४, लेसाओ ५, इंदिया पंच।

समुग्घाता तिन्नि नो सण्णी असण्णी, नपुंसकवेदा, पज्जत्तीओ अपज्जत्तीओ य पंच, दो दिट्ठिओ, दो दंसणा, दो नाणा दो अन्नाणा, दुविधे जोगे, दुविधे उवओगे, आहारो छद्दिसिं, उववातो तिरियमणुस्सेहिंतो नो देवेहिंतो नो नेरइएहिंतो, तिरिएहिंतो असंखेज्जवासाउवज्जेसु।

अकम्मभूमगअंतरदीवगअसंखेज्जवासाउअवज्जेसु मणुस्सेसु, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, मारणंतियसमुग्घातेणं दुविहावि मरंति, अणनतरं उव्वट्टित्ता कहिं?

नेरइएसुवि तिरिक्खजोणिएसुवि मणुस्सेसुवि देवेसुवि, नेरइएसु रयणप्पहाए, सेसेसु पडिसेधो, तिरिएसु सव्वेसु उववज्जंति संखेज्जवासाउएसुवि असंखेज्जवासाउएसुवि चउप्पएसु पक्खीसुवि मणुस्सेसु सव्वेसु कम्मभूमीसु नो अकम्मभूमीएसु अंतरदीवएसुवि संखिज्जवासाउएसुवि देवेसु जाव वाणमंतरा, चउगइया दुआगतिया, परित्ता असंखेज्जा पन्नत्ता।

से तं जलयरसंमुच्छिमपंचेंदियतिरिक्खा ॥

वृ. अथ के ते जलचराः?, सूरिराह–जलचराः पञ्चविधाः प्रज्ञप्ताः, तद्यथा–मत्स्याः कच्छपा मकरा ग्राहाः शिशुमाराः, 'एवं भेओ भाणियव्वो जहा पन्नवणाए जाव सुसुसारा एगागारा पन्नत्ता' इति, 'एवम्' उक्तेन प्रकारेण मत्स्यादीना भेदो यथा प्रज्ञ पनायां तथा वक्तव्यः, स च तावद् यावत् 'सिसुमारा' एगागारा इतिपदं, स चैवम्–

"से किं तं मच्छा?, मच्छा अनेगविहा पन्नत्ता, तंजहा–सण्हमच्छा खवल्लमच्छा जुगमच्छा भिब्भियमच्छा हेलियमच्छा मंजरियामच्छा रोहियमच्छा हलीसागारा मोगरावडा वडंगरा तिमीतिमिंगिलामच्छा तंदुलमच्छा कणिक्कमच्छा सिलेच्छियामच्छा लंभणमच्छा पडागा पडागाइपडागा, जे यावन्ने तहप्पगारा, से तं मच्छा। से किं तं कच्छभा?, कच्छभा दुविहा पन्नत्ता, तंजहा–अट्ठिकच्छभा य मंसलकच्छभा य, से तं कच्छभा। से किं तं गाहा?, गाहा पंचविहा पन्नत्ता, तंजहा–दिली वेढगा मुदुगा पुलगा सीमागारा, सेत्तं गाहा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं मगरा ?, मगरा दुविहा पन्नत्ता, तं०—सोंडमगरा य मट्ठमगरा य, सेत्तं मगरा से किं तं सुसुमारा ?, २ एगागार पण्णत्ता, सेत्तं सुसुमारा'' इति, एते मत्स्यादिभेदा लोकतोऽवगन्तव्याः, 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये 'तथाप्रकाराः' उक्तप्रकारा मत्स्यादिरूपाः, ते सर्वे जलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिका द्रष्टव्याः। 'ते समासतो' इत्यादि पर्याप्तापर्याप्तसूत्रं सुगमं, शरीरादिद्वारकदम्बकमपि चतुरिन्द्रियवद्भावनीयं, नवरमवगाहनाद्वारे जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागमात्रा, उत्कर्षतो योजनसहस्रम्।

इन्द्रियद्वारे पञ्चेन्द्रियाणि। संज्ञिद्वारे नो संज्ञिनोऽसंज्ञिनः, संमूर्च्छिमतया समनस्कत्वायोगात् उपपात यथा व्युत्क्रान्तिपदे तथा वक्तव्यः, तिर्यग्मनुष्येभ्योऽसङ्ख्यातवर्षायुष्कवर्ज्येभ्यो वाच्य इति भावः। स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी। च्यवनद्वारेऽनन्तरमुद्वृत्य चतसृष्वपि गतिषूत्पद्यन्ते, तत्र नरकेषु रत्नप्रभायामेव, तिर्यक्षु सर्वेष्वेव, मनुष्येषु कर्मभूमिजेषु, देवेष व्यन्तरभवनवासिषु, तदन्येष्वसंख्यायुष्काभावात्, अत एव गत्यागतिद्वारे चतुर्गतिका द्व्यागतिकाः।

'परीत्ताः' प्रत्येकशरीरिणोऽसङ्ख्येयाः प्रज्ञप्ताः हे श्रमण! हे आयुष्मन्!, उपसंहारमाह—'सेत्तं संमुच्छिमजलयरपंचेंदियतिरिक्खजोणिया' ॥ उक्ताः संमूर्च्छिमजलचरपञ्चेन्द्रियतिर्यग्योनिकाः, सम्प्रति संमूर्च्छिमस्थलचरपञ्चेन्द्रि- यतिर्यग्योनिकप्रतिपादनार्थमाह—

मू. (४४) *से किं तं थलयरसंमुच्छिमपंचेंदियतिरिक्खजोणिया ?, २ दुविहा पन्नत्ता, तंजहा—चउप्पयलयरसंमुच्छिमपंचेंदियतिरिक्खजोणिया परिसप्पसंमु० ॥*

से किं तं थलयरचउप्पयसंमुच्छिम० ?, २ चउव्विहा पन्नत्ता, तंजहा—एगखुरा दुखुरा गंडीपया समप्फया जाव जे यावन्ने तहप्पगारा ते समासतो दुविहा पन्नत्ता, तंजहा—पज्ञत्ता य अपज्ञत्ता य, तओ सरीगा ओगाहणा जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं गाउयपुहुत्तं ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं चउरासीतिवाससहस्साइं, सेसं जहा जलयराणं जाव चउगतिया दुआगतिया परित्ता असंखेज्ञा पन्नत्ता, सेत्तं थलयरचउप्पदसंमु०।

से किं तं थलयरपरिसप्पसंमुच्छिमा ?, २ दुविहा पन्नत्ता, तंजहा—उरगपरिसप्पसंमुच्छिमा भुयगपरिसप्पसंमुच्छिमा। से किं तं उरगपरिसप्पसंमुच्छिमा ?, २ चउव्विहा पन्नत्ता, तंजहा—अही अयगरा आसालिया महोरगा।

से किं तं अही ?, अही दुविहा पन्नत्ता, तंजहा—दव्वीकरा मउलिणो य। से किं तं दव्वीकरा २ अनेगविधा पन्नत्ता, तंजहा—आसीविसा जाव से तं दव्वीकरा।

से किं तं मउलिणो ?, २ अनेगविहा पण्णत्ता, तंजहा—दिव्वा गोणसा जाव से तं मउलिणो, सेततं अही। से किं तं अयगरा ?, २ एगागारा पन्नत्ता, से तं अयगरा।

से किं तं आसालिया ?, २ जहा पन्नवणाए, से तं आसालिया। से किं तं महोरगा ?, २ जहा पन्नवणाए, से तं महोरगा। जे यावण्णे तहप्पगारा ते समासतो दुविहा पन्नत्ता, तंजहा—पज्ञत्ता य अपज्ञत्ता य तं चेव, नवरि सरीरोगाहणा जहन्नेणं अंगुलस्स ऽसंखेज्ज० उक्कोसेणं जोयणपुहुत्तं, ठिई जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तेवन्नं वाससहस्साइं, सेसं जहा जलयराणं, जाव चउगतिया दुआगतिया परित्ता असंखेज्ञा, से तं उरगपरिसप्पा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं भुयगपरिसप्पसंमुच्छिमलयरा ?, २ अनेगविधा पन्नत्ता, तंजहा–गोहा नउला जाव जे यावन्ने तहप्पकारा ते समासतो दुविहा पन्नत्ता, तंजहा–पज्ञत्ता य अपज्ञत्ता य, सरीरोगाहणा जहन्नेणं अंगुलासंखेज्ञं उक्कोसेणं घणुपुहुत्तं, ठिती उक्कोसेणं बायालीसं वाससहस्साइं सेसं जहा जलयराणं जाव चउगतिया दुआगतिया परित्ता असंखेज्ञा पन्नता, से तं भुयपरिसप्पसंमुच्छिमा, से तं थलयरा ।

से किं तं खहयरा ?, २ चउव्विहा पन्नत्ता, तंजहा–चम्मपक्खी लोमपक्खी समुग्गपक्खी विततपक्खी । से किं तं चम्मपक्खी ?, २ अनेगविधा पन्नत्ता, तंजहा–वग्गुली जाव जे यावन्ने तहप्पगारा, से तं चम्मपक्खी । से किं तं लोमपक्खी ?, २ अनेगविहा पन्नत्ता, तंजहा–ढंका कंका जे यावन्ने तहप्पकारा, से तं लोमपक्खी ।

से किं तं समुग्गपक्खी ?, २ एगागारा पन्नत्ता जहा पन्नवणाए, एवं विततवक्खी जाव जे यावन्ने तहप्पगारा ते समासतो दुविहा पन्नत्ता, तंजहा–पज्ञत्ता य अपज्ञत्ता य, नाणत्तं सरीरोगाहणा जह० अंगु० असं० उक्कोसेणं धणुपुहुत्तं ठिती उक्कोसेणं बावत्तरिं वाससहस्साइं, सेसं जहा जलयराणं जाव चउगतिया दुआगतिया परित्ता असंखेज्ञा पन्नत्ता ।

से तं खयरसंमुच्छिमतिरिक्खजोणिया, सेतं संमुच्छिमपंचेंदियतिरिक्खजोणिया ॥

वृ. अथ के ते संमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह–स्थलचरपञ्चेन्द्रिय-तिर्यग्योनिका द्विविधाः प्रज्ञप्ताः, तद्यथा–चतुष्पदस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाश्च परिसर्पस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाश्च, तत्र चत्वारि पदानि येषां ते चतुष्पदाः–अश्वादयः ते च ते स्थचरपञ्चेन्द्रियतिर्यग्योनिकाश्च परिसर्पस्थलचरसंमूर्च्छिमपञ्चेन्द्रिय-तिर्यग्योनिकाश्च, तत्र चत्वारि पदानि येषां ते चतुष्पदाः–अश्वादयः ते च ते स्थचरपञ्चेन्द्रियति-र्यग्योनिकाश्चतुष्पदस्थलचरसंमूर्च्छिपञ्चेन्द्रियतिर्यग्योग्योनिकाः, उरसा भुजाभ्यां वा परिसर्पन्तीति परिसर्पन्तीति परिसर्पा–अहिनकुलादयस्ततः पूर्ववत्समासः, चशब्दौ स्वस्वगतानेकभेदसूचकौ, तदेवानेकविधत्वं क्रमेण प्रतिपिपादयिषुराहअथ के ते चतुष्पदस्थलरसंमूर्च्छिमपञ्चेन्द्रिय-तिर्यग्योनिकाः ?, सूरिराह–चतुष्पदस्थलचरसंमूर्च्छिमपञ्चे० श्चतुर्विधाः प्रज्ञप्ताः, तद्यथा–

'जहा पन्नवणाए' इति, यथा प्रज्ञापनायां प्रज्ञापनाख्ये प्रथमे पदे भेदास्तथा वक्तव्या यावत् 'ते समासतो दुविहा पन्नत्ता' इत्यादि, ते चैवम्–"एगखुरा दुखुरा गंडीपया सणप्फया । से किं तं एगखुरा ?, एगखुरा अनेगविहा पन्नत्ता, तंजहा–अस्सा अस्सतरा घोडा गद्दभा गोरखुरा कंदलगा सिरिकंदलगा आवत्ता जे यावण्णे तहप्पगारा, सेत्तं एगखुरा । से किं तं दुखुरा ?, दुखुरा अनेगविहा पन्नत्ता, तंजहा–उट्टा गोणा गवया महिसा संवरा वराहा अजा एलगा रुरू सरभा चमरी कुरंगा गोकण्णमाई, सेत्तं दुखुरां । से किं तं गंडीपया ?, गंडीपया अनेगविहा पन्नत्ता, तंजहा–हत्थी हत्थिपूयणा मंकुणहत्थी खग्गा गंडा, जे यावन्ने तहप्पगारा, सेत्तं गंडीपया । से किं तं सणप्फया ?, २ अनेगविहा प०–सीहा वग्घा दीविया अच्छा तरच्छा परस्सरा सीयाला सुणगा कोकंतिया ससगा चित्तगा चित्तलगा, जे यावन्ने तहप्पकारा ।

तत्र प्रतिपदमेकः खुरो येषां ते एकखुराः–अश्वादयः, प्रतिपादं द्वौ खुरौ–सफौ येषां ते द्विखुरा–उष्ट्रादयः, तथा च तेषामेकैकस्मिन् पादे द्वौ द्वौ शफौ दृश्येते, गण्डीव पदं येषां ते गण्डीपदाः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्त्यादयः, सनखानि–दीर्घनखपरिकलितानि पदानि येषां ते सनखपदाः–श्वादयः, प्राकृतत्वाच्च 'सणप्फया' इति सूत्रे निर्देशः, अश्वादयस्त्वेतद्भेदाः केचिदतिप्रसिद्धत्वात्स्वयमन्ये च लोकतो वेदितव्याः, नवरं सनखपदाधिकारे द्वीपकाः–चित्रका अच्छाः–ऋक्षाः परसराः–सरभाः कोकन्तिका–लोमटिकाः चित्ता चित्तलगा आरण्यजीवविशेषाः, शेषास्तु सिंहव्याघ्रतरक्षश्रृगालशुनककोलशुनशशकाः प्रतीताः, 'ते समासतो' इत्यादि पर्याप्तापर्याप्तसूत्रं शरीरादिद्वारकलापसूत्रं च जलचरवद्भावनीयं, नवरमवगाहनाद्वारे जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागप्रमाणा उत्कृष्टा गव्यूतपृथक्त्वं स्थितिद्वारे जघन्यतः स्थितिरन्तर्मूहर्तमुत्कर्षतश्चतुरशीति वर्षसहस्राणि, शेषं तथैव

उपसंहारमाह–'सेत्तं चउप्पयथलयरसंमुछमपंचिंदियतिरक्खजोणिया' ॥

अथ के ते परिसर्पस्थलचरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाः ?, २ द्विविधाः प्रज्ञप्ताः, तद्यथा–'एवं भेदो भाणियव्वो' इति, 'एवम्' उक्तेन प्रकारेण यथा प्रज्ञापनायां तथा भेदो वक्तव्यो यावत् 'पज्जत्ता य अपज्जत्ता य' स चैवम्–'तंजहा–उरपरिसप्पथलयरसंमुच्छिमपञ्चेन्द्रियितिरिक्खजोणिया य भुयपरिसप्पथलयरसंमुच्छिमप० सुगमं ।

नवरम् उरसा परिसर्पन्तीत्युरः परिसर्पा–सर्पादयः, भुजाभ्यां परिसर्पन्तीति भुजपरिसर्पा–नकुलादयः, शेषपदसमासः प्राग्वत्, "से किं तं उरपरिसप्पथलयरसंमुच्छिमपञ्चिंदियतिरिक्खजोणिया ?, चउव्विहा पन्नत्ता, तंजहा–अही अयगरा आसालिया महोरगा । से किं तं अही ?, अही दुविहा प०– दव्वीकरा य मउलिणो य । से किं तं दव्वीकरा ?, दव्वीकरा अनेगविहा पन्नत्ता, तंजहा–आसीविसा दिट्ठीविसा उग्गविसा भोगविसा तयाविसा लालाविसा निस्सासविसा कण्हसप्पा सेयसप्पा काकोदरा दुब्भपुप्फा कोलाहा सेलेसिंदा, जे यावन्ने तहप्पगारा, सेत्तं अही

से किं तं अयगरा ?, अयगरा एगागार पन्नत्ता, सेत्तं अयगरा । से किं तं आसालिया ?, कहि णं भंते ! आसालिगा संमुच्छइ ?, गोयमा ! अंतो मणुस्सखेत्ते अड्ढाइज्जेसु दीवेसु निव्वाघाएणं पन्नरससु कम्मभूमीसु, वाघायं पडुच्च पंचसु महाविदेहेसु चक्कवट्टिखंधावारेसु बलदेवखंधावारेसु वासुदेवखंधावारेसु मंडलियखंधावारेसु महामण्डलियखंधावारेसु गामनिवेसेसु नगरनिवेसेसु खेडनिवेसेसु कब्बड० मडंबनिवेसेसु दोणमुहनिवेसेसु पट्टणनिवेसेसु आगरनिवेसेसु आसमनिवेसेसु गामनिवेसेसु नगरनिवेसेसु खेडनिवेसेसु कब्बड० मडंबनिवेसेसु दोणमुहनिवेसेसु पट्टणनिवेसेसु आगरनिवेसेसु आसमनिवेसेसु रायहाणिनिवेसेसु एएसि णं चेव विणासेसु, एत्थ णं आसालिया संमुच्छइ, जहन्नेणं अंगुलस्स असंखेज्जइ भागमित्ताए ओगाहणाए, उक्कोसेणं बारस जोयणाइं, तदाणुरूवं च णं विक्खंभबाहल्लेणं भूमिं दालित्ता संमुच्छइ, असण्णी मिच्छद्दिट्ठी अन्नाणी अंतोमुहुत्तद्धाउया चेव कालं करेइ, सेत्तं आसालिया ।

से किं तं महोरगा ?, महोरगा अनेगविहा प०ा अत्थेगइया अंगुलंपि अंगुलपुहुत्तियावि विहत्थिंपि विहत्थिपुहत्तियावि जोयणसयंपि जोयणसयपुहुत्तियावि, ते णं थले जाया जलेऽवि चरंति थलेऽवि चरंति, ते नत्थि इहं बाहिरएसु दीवसमुद्देसु हवंति, जे यावन्ने तहप्पगारा, सेत्तं महोरगा ।" इति ।

अस्य विषमपदव्याख्या–"दव्वीकरा य मउलिणो य' इति, दर्व्वीव दर्वी–फणा तत्करणशीला दर्वीकराः, मुकुलं–फणाविरहयोग्या शरीरावयवविशेषाकृति सा विद्यते येषां ते मुकुलिनः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फटाकरणशक्तिविकला इत्यर्थः, अत्रापि चशब्दौ स्वगतानेकभेदसूचकौ, 'आसीविसा' इत्यादि, आस्यो–दंष्ट्रास्तासु विषं येषां ते आसीविषाः, उक्तं च–"आसी दाढा तग्गयविसाऽऽसीविसा मुणेयव्वा" इति, दृष्टौ विषं येषां ते दृष्टिविषाः, उग्रं विषं येषां ते उग्रविषाः, भोगः–शरीरं तत्र सर्वत्र विषं येषां ते भोगविषाः, त्वचि विषं येषां त त्वग्विषाः, प्राकृतत्वाच्च 'तयाविसा' इति पाठः, लाला–मुखात् श्वावस्तत्र विषं येषां ते लालाविषाः, निश्वासे विषं येषां ते निश्वासविषाः कृष्णसर्पादयो जातिभेदा लोकतः प्रत्येतव्याः।

'से किं तं आसालिगा' इत्यादि, अथ का सा आसालिगा ?, एवं शिष्येण प्रश्ने कृते सति सूत्रकृद् यदेवासालिकाप्रतिपादकं गौतमप्रश्नभगवन्निर्वचनरूपं सूत्रमस्ति तदेवागमबहुमानतः पठति–'कहि णं भंते!' इत्यादि, क णमिति वाक्यालङ्कारे भदन्त! परमकल्याणयोगिन्! आसालिया संमूर्छति, एषा हि गर्भजा न भवति किन्तु संमूर्च्छिमैव तत उक्तं संमूर्च्छति, भगवानाह–गौतम! अन्तः–मध्ये मनुष्यक्षेत्रस्य न बहि, एतावता मनुष्यक्षेत्राद्बहिरस्या उत्पादो न भवतीति प्रतिपादितं, तत्रापि मनुष्यक्षेत्रे सर्वत्र न भवति किन्तु अर्द्धतृतीयेषु द्वीपेषु, अर्द्ध तृतीयं येषां तेऽर्द्धतृतीयाः, अवयवेन विग्रहः समुदायः समासार्थ तेषु, एतावता लवणसमुद्रे कालसमुद्रे वा न भवतीत्यावेदितं, 'निव्याघतिन' व्याघातस्याभावो निव्याघातं तेन, यदि पञ्चसु भरतेषु पञ्चस्वैरावतेषु सुषमसुषमादिरूपोऽतिदुष्षमादिरूपश्च कालो व्याघातहेतुत्वाद् व्याघातो न भवति तदा पञ्चदशसुकर्मभूमिषु संमूर्च्छति, व्याघातं प्रतीत्य।

किमुक्तं भवति ?–यदि पञ्चसु भरतेषु पञ्चस्वैरावतेषु यथोक्तरूपो व्याघातो भवति ततः पञ्चसु महाविदेहेषु संमूर्च्छति, एतावता त्रिंशत्यप्यकर्मभूमिषु नोपजायत इति प्रतिपादितं, पञ्चदशसु कर्मभूमिषु पञ्चसु महाविदेहेषु सर्वत्र न संमूर्च्छति किन्तु चक्रवर्त्तिस्कन्धावारेषु बलदेवस्कन्धावारेषु वासुदेवस्कन्धावारेषु माण्डलिकः–सामान्यराजाऽल्पर्द्धिकः, महामाण्डलिकः स एवानेकदेशाधिपतिस्तत्स्कन्धावारेषु, ग्रामनिवेशेषु इत्यादि, प्रसति बुद्ध्यादीन् गुणानिति यदिवा गम्यः शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामः, निगमः–प्रभूततरवणिग्वर्गावासः, पांसुप्राकारनिबद्धं खेटं, क्षुल्लप्राकारवेष्टितं कर्बटम्, अर्द्धतृतीयगव्युतान्तर्ग्रामरहितं मडम्बं 'पट्टण'त्ति पट्टनं पत्तनं वा, उभयत्रापि प्राकृतत्वेन निर्देशस्य समानत्वात्, तत्र यन्नौभिरेव गम्यं तत्पट्टनं यत्पुनः शकटैर्घोटकैर्नौभिर्वा गम्यं तत्पत्तनं यथा भरूकच्छम्, उक्तं च–

॥१॥ "पत्तनं शकटैर्गम्यं, घोटकैर्नौभिरेव च।
नौभिरेव तु यद्गम्यं, पट्टनं तत्प्रचक्षते॥"

द्रोणमुखं–प्रायेण जलनिर्गमप्रवेशम्, आकरो–हिरण्याकरादि आश्रमः–तापसावसथोपलक्षित आश्रयः, संबाधो–यात्रासमागतप्रभूतजननिवेशः, राजधनी–राजाधिष्ठानं नगरम्, 'एएसि ण'मित्यादि, एतेषां चक्रवर्त्तिस्कन्धावारादीनामेव विनाशेषूपस्थितेषु 'एत्थ णं'ति एतेषु चक्रवर्त्तिस्कन्धावारादिषु स्थानेष्वासालिका संमूर्च्छति, सा च जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रयाऽवगाहनया समुत्तिष्ठतीति योगः, एतच्चोत्पादप्रथमसमये वेदितव्यम्, उत्कर्षतो द्वादश योजनानि–द्वादशयोजनप्रमाणयाऽवगाहनया 'तदनुरूपं' द्वादशयोजनप्रमाणदैर्ध्यानुरूपं 'विक्खंभबाहल्लेणं'ति विष्कम्भश्च बाहल्यं च तेन, विष्कम्भो–विस्तारो बाहल्यं च–स्थूलता,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूमिं 'दालित्ता णं' विदार्य समुत्तिष्ठति, चक्रवर्तिस्कन्धा- वारादीनामधस्ताद् भूमेरलरुत्पद्यत इति भावः, सा चासंज्ञिनी–अमनस्का संमूर्च्छिमत्वात्, मिथ्यादृष्टि सासादनसम्यक्त्वस्यापि तस्या असम्भवात्, अत एवाज्ञानिनी, अन्तर्मुहूर्त्ताद्धायुरेव कालं करोति

'अत्थेगइया अंगुलंपी'त्यादि, अस्तीति निपातोऽत्र बहुवचनाभिधायी, ततोऽयमर्थ–सन्त्येककाः केचन महोरगा येऽङ्गुलमपि शरीरावगाहनया भवन्ति, इहाङ्गुलमुच्छ्रयाङ्गुलमवसातव्यं, शरीरप्रमाणस्य चिन्त्यमानत्वात्, सन्त्येकका येऽङ्गुलपृथक्त्विका अपि–पृथक्त्वं द्विप्रभृतिरानवभ्य इति परिभाषा अङ्गुलपृथक्त्वं शरीरावगाहनमानमेषामस्तीत्यङ्गुलपृथक्त्विकाः, 'अतोऽनेकस्वरादि' तीकप्रत्ययः, एवं शेषसूत्राण्यपि भावनीयानि, नवरं द्वादशाङ्गुलप्रमाणा वितस्ति, द्विवितस्तिप्रमाणा रत्निर्हस्तः, कुक्षिर्द्विहस्तमाना, धनुर्हस्तचतुष्टयप्रमाणं, गव्यूतं द्विधनुःसहस्त्रप्रमाणं, चत्वारि गव्यूतानि योजनम्, एतच्चापि वितस्त्यादिकमुच्छ्रयाङ्गुलापक्षया प्रतिपत्तव्यं, 'ते ण'मित्यादि, 'ते' अनन्तरोदितस्वरूपा महोरगाः स्थलचरविशेषत्वात् स्थले जायन्ते स्थले च जाताः सन्तो जलेऽपि स्थल इव चरन्ति स्थलेऽपि चरन्ति, तथास्वाभाव्यात्, यद्येवं ते कस्मादिह न दृश्यन्ते ? इत्याशङ्कायामाह– 'ते नत्थि इहं' इत्यादि, 'ते' यथोदितस्वरूपा महोरगाः 'इह' मानुषक्षेत्रे 'नत्थि'त्ति न सन्ति, किन्तु बाह्येषु द्वीपसमुद्रेषु भवन्ति, समुद्रेष्वपि च पर्वतदेवनगर्यादिषु स्थलेषूत्पद्यन्ते न जलेषु, तत इह न दृश्यन्ते। 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये तथाप्रकारा अङ्गुलदश-कादिशरीरावगाहमानास्तेऽपि महोरगा ज्ञातव्याः, उपसंहारमाह–

'सेत्तं महोरगा, 'जे यावण्मे तहप्पगारा' इति, येऽपि चान्ये तथाप्रकाराः उक्तरूपाह्या-दरूपास्ते सर्वेऽपि उरःपरिसर्पस्थल- चरसंमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकाद्रष्टव्याः 'ते समासतो' इत्यादि पर्याप्तापर्याप्तसूत्रं शरीरादिद्वारकदम्बकं च जलचरवद्भावनीयं, नवरमवगाहना जघन्यतोऽ-ङ्गुलासङ्ख्येयभागप्रमाणा उत्कर्षतो योजनपृथक्त्वं, स्थितिद्वारे जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षत-स्त्रिपञ्चाशद्वर्षसहस्त्राणि, शेषं तथैव ॥ भुजपरिसर्पप्रतिपादनार्थमाह–

'से किं त'मित्यादि, अथ क ते भुजपरिसर्पसंमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्यो-निकाः ?, सूरिराह–भुजपरिसर्पसंमूर्च्छिमस्थलचरपञ्चेन्द्रियतिर्यग्योनिका अनेकविधाः प्रज्ञप्ताः, 'तह चेव भेओ भाणियव्वो' इति, यथा प्रज्ञापनायां तथैव भेदो वक्तव्यः, स चैवम्– "तंजहा–गोहा नउला सरडा सम्मा सरंडा सारा खारा घरोलिया विस्संभरा मंसा मंगुसा पयलाया छीरविरालिया जाहा चउप्पाइया" एते देशविशेषतो वेदितव्याः, 'जे यावन्ने तहप्पगारा' येऽपि चान्ये 'तथाप्रकाराः' उक्तप्रकारा गोधादिस्वरूपास्ते सर्वे भुजपरिसर्पा अवसातव्याः, 'ते समासतो' इत्यादि सूत्रकदम्बकं प्राग्वद्भाव- नीयं, नवरमवगाहना जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा उत्कर्षतो घनुःपृथक्त्वं, स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाचत्वारिंशद्वर्षसहस्राणि,

शेषं जलचरवद्रष्टव्यम्, उपसंहारमाह–'सेत्त'मित्यादि सुगमम्।

खचरप्रतिपादनार्थमाह–अथ के ते संमूर्च्छिमखचरपञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह–संमूर्च्छिमखचरप० चतुर्विधाः प्रज्ञप्ताः, तद्यथा– 'भेदो जहा पन्नवणाए' इति, भेदो यथा प्रज्ञापनायां तथा वक्तव्यः, स चैवम्– "चम्मपक्खी लोमपक्खी समुग्गपक्खी विततपक्खी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं चम्मपक्खी !, २ अनेगविहा पन्नत्ता, तंजहा–वग्गुली जलोया अडिला भारुंडपक्खी जीवंजीवा समुद्दवायसा कण्णत्तिय पक्खिविराली, जे यावन्ने तहप्पगारा, सेत्तं चम्मपक्खी। से किं तं लोमपक्खी ?, लोमपक्खी अनेगविहा पन्नत्ता, तंजहा–ढङ्का कंका कुरला वायसा चक्कवागा हंसा कलहंसा पोयहंसा रायहंसा अडा सेडीवडा वेलागया कोंचा सारसा मेसरा मयूरा सेयवगा गहरा पोंडरीया कामा कामेयगा वंजुलागा तित्तिरा वट्टगा लावगा कपोया कपिंजला पारेवया चिडगा वीसा कुक्कडा सुगा वरहिंगा मयणसलागा कोकिला सण्हावरण्णगमादी, से त्तं लोमपक्खी से किं तं समुग्गपक्खी ?, समुग्गपक्खी एगागारा पण्णत्ता, ते णं नत्थि इहं, बाहिरएसु दीवसमुद्देसु हवंति, से त्तं समुग्गपक्खी ।

से किं तं विततपक्खी ?, विततपक्खी एगागारा पन्नत्ता, ते णं नत्थि इहं, बाहिरएसु दीवसमुद्देसु भवंति, से त्तं विततपक्खी'' इति पाठसिद्धं नवरं 'चम्मपक्खी' इत्यादि, चर्मरूपौ पक्षौ चर्मपक्षौ तौ विद्येते येषां ते चर्मपक्षिणः, लोमात्मकौ पक्षौ लोमपक्षौ तौ विद्येते येषां ते लोमपक्षिणः, तथा गच्छतामपि समुद्रवत्स्थितौ पक्षौ समुद्गकपक्षौ तद्वन्तः समुद्गकपक्षिणः, विततौ–नित्यमनाकुञ्चितौ पक्षौ विततपक्षौ तद्वन्तो विततपक्षिणः 'ते समासतो' इत्यादि सूत्रकदम्बकं जलचरवद्भावनीयं, नवरमवगाहना उत्कर्षतो धनुःपृथक्त्वं, स्थितिरुत्कर्षतो द्वासप्ततिवर्षसहस्राणि । तथा चात्र क्वचित्पुस्तकान्तरेऽवगाहनास्थित्योर्यथाक्रमं सङ्ग्रहणिगाथे–

॥१॥ ''जोयणसहस्सगाउयपुहत्त तत्तो य जोयणपुहत्तं ।
दोण्हंपि घणुपुहत्तं संमुच्छिमवियगपक्खीणं ॥
॥२॥ संमुच्छ पुव्वकोडी चउरासीई भवे सहस्साइं ।
तेवण्णा बायाला बावत्तरिमेव पक्खीणं ॥''

व्याख्या–संमूर्च्छिमानां जलचराणामुत्कृष्टाऽवगाहना योजनसहस्रं, चतुष्पदानां गव्यूतपृथक्त्वम्, उरःपरिसर्पाणां योजनपृथक्त्वं । 'दोण्हं तु' इत्यादि, द्वयानां संमूर्च्छिमभुजगपक्षिणां–संमूर्च्छिमभुजगपरिसर्पपक्षिरूपाणां प्रत्येकं घनुःपृथक्त्वं, तथा संमूर्च्छिमानां जलचराणामुत्कृष्टा स्थिति पूर्वकोटी चतुष्पदाना चतुरशीतिर्वर्षसहस्राणि, उरःपरिसर्पाणां त्रिपञ्चाशद्वर्षसहस्राणि, भुजपरिसर्पाणां द्वाचत्वारिंशद्वर्षसहस्राणि, पक्षिणां द्वासप्ततिवर्षसहस्राणि, उपसंहारमाह–'सेत्तं संमुच्छिखहयरपञ्चिंदियतिरिक्खजोणिया' । उक्ताः संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनयः, सम्प्रति गर्भव्युत्क्रान्तिकान् पञ्चेन्द्रिय- तिर्यग्योनिकानाह–

मू. (४५) *से किं तं गब्भवक्कंतियपंचेंदियतिरिक्खजोणिया ?, २ तिविहा पन्नत्ता, तंजहा–जलयरा थलयरा खहयरा ॥*

वृ. 'से किं त'मित्यादि, अथ के ते गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह–गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यगयोनिकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–जलचराः स्थलचराः खचराश्च । तत्र जलचरप्रतिपादनार्थमाह–

मू. (४६) *से किं तं जलयरा ?, जलयरापंचविधा पन्नत्ता, तंजहा–मच्छा कच्छभा मगरा गाहा सुंसुमारा, सव्वेसिं भेदो भाणितव्वो तहेव जहा पन्नवणाए, जाव जे यावन्ने तहप्पकारा ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य । तेसि णं भंते ! जीवाणं कति सरीरगा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नत्ता ?, गोयमा ! चत्तारि सरीरगा प० –ओरालिए वेउव्विए तेयए कम्मए, सरीरोगाहणा जहन्नेणं अंगुलस्स असंखेज्ज० उक्कसेणं जोयणसहस्सं छव्विहसंघयणी प० –

वइरोसभनारायसंघयणी उसभनारायसंघयणी नारायसंघयणी अद्धनारायसंघयणी कीलियासंघयणी सेवट्टसंघयणी, छव्विहा संठिता पन्नत्ता, तंजहा–समचउरंससंठिता नग्गोध-परिमंडल० साति० खुज्ज० वामण० हुंड०, कसाया सव्वे सण्णाओ ४ लेसाओ ६ पंच इंदिया पंच समुग्घाता आदिल्ला सण्णी नो असण्णी तिविधवेदा छप्पज्जत्तीओ छअपज्जत्तीओ दिट्ठी तिविधावि तिन्नि दंसणा नाणीवि अन्नाणीवि जे नाणी ते अत्थेगतिया दुनाणी अत्थेगतिया तिन्नाणी ।

जे दुन्नाणी ते नियमा आभिनिबोहियनाणी य सुतनाणी य, जे तिन्नाणी ते नियमा आभिनिबोहियनाणी सुतनाणि ओहिनाणी, एवं अन्नाणीवि, जोगे तिविहे उवओगे दुविधे आहारो छद्दिसिं उववातो नेरइएहिं जाव अहे सत्तमा तिरिक्खजोणिएसु सव्वेसु असंखेज्जवासाउयवज्जेसु मणुस्सेसु अकम्मभूमगअंतरदीवगअसंखेज्जवासाउयवज्जेसु देवेसु जाव सहस्सारो, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, दुविधावि मरंति ।

अनंतरं उव्वट्टित्ता नेरइएसु जाव अहे सत्तमा तिरिक्खजोणिएसु मणुस्सेसु सव्वेसु देवेसु जाव सहस्सारो, चउगतिया चउआगतिया परित्ता असंखेज्जा पन्नत्ता, से तं जलयरा ॥

वृ. 'भेदो भाणियव्वो तहेव जहा पन्नवणाए' इति भेदस्तथैव मत्स्यादीनां वक्तव्यो यथा प्रज्ञापनायां, स च प्रागेवोपदर्शितः, 'ते समासतो' इत्यादि पर्याप्तापर्याप्तसूत्रं पाठसिद्धं, शरीरादिद्वार-कदम्बकसूत्रं संमूर्च्छिमजलचरवद्भावनीयं, नवरमत्र शरीरद्वारे चत्वारि शरीराणि वक्तव्यानि, गर्भव्युत्क्रान्तिकानां तेषां वैक्रियस्यापि सम्भवात्, अवगाहनाद्वारे उत्कर्षतोऽवागहना योजनसहस्रम् संहननचिन्तायां षडपि संहननानि, तत्स्वरूपप्रतिपादकं चेदं गाथाद्वयम्–

॥१॥ "वज्जरिसहनारायं पढमं बीयं च रिसहनारायं ।
नारायमद्धनारायकीलिया तह य छेवट्ठं ॥

॥२॥ रिसहो य होइ पट्टो वज्जं पुन कीलिया मुणेयव्वा ।
उभयो मक्कडबंधो नारायं तं वियाणाहि ॥

संस्थानचिन्तायां षडपि संस्थानानि, तान्यमूनि–समचतुरस्रं न्यग्रोधपरिमण्डलं सादि वामनं कुब्जं हुण्डमिति, तत्र समाः–सामुद्रिकशास्त्रक्तप्रमाणाविसंवादिन्यश्चतस्रोऽस्रयः– चतुर्दिग्विभा-गोपलक्षिताः शरीरावयवा यत्र तत्समचतुरस्रं, समासान्तोऽत्प्रत्ययः, अत एवैतदन्यत्र तुल्यमिति व्यवह्रियते, तथा न्यग्रोधवत्परिमण्डलं यस्य, यथा न्यग्रोघ उपरि संपूर्णप्रमाणोऽघस्तु हीनः तथा यत्संस्थानं नाभेरुपरि संपूर्णमघस्तु न तथा तन्नयग्रोधपरिमण्डलम्, उपरि विस्तारबहुलमिति भावः, तथाऽऽदिरिहोत्सेधाख्यो नाभेरघस्तनो देहभागो गृह्यते ।

ततः सह आदिना–नाभेरघस्तनभावेन यथोक्तप्रमाणलक्षणेन वर्त्तत इति सादि, उत्सेध-बहुलमिति भावः, इह यद्यपि सर्वं शरीरमादिना सह वर्त्तते तथाऽपि सादित्वविशेषणान्यथाऽनुपपत्त्या विशिष्ट एव प्रमाणलक्षणोपपन्न आदिदिह लभ्यते, तत उक्तम्–उत्सेधबहुलमिति, इदमुक्तं भवति–यत्संस्थानं नाभेरधः प्रमाणोपपन्नमुपरि च हीनं तत्सादीति, अपरे तु साचीति पठन्ति, तत्र साचीति प्रवचनवेदिनः शाल्मलीतरुमाचक्षते, ततः साचीव यत्संस्थानं, यथा शाल्मलीतरोः

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

स्कन्धकाण्डमतिपुष्टमुपरि च न तदनुरूपा महाविशालता तद्वदस्यापि संस्थानस्याधोभागः परिपूर्णो भवति उपरितनभागस्तु नेति, तथा यत्र शिरोग्रीवं हस्तपादादिकं च यथोक्तप्रमाणलक्षमोपेतं उरउदरादि च मण्डलं चत्कुब्जं संस्थानं, यत्र पुनरुदरादि प्रमाणलक्षणोपेतं हस्तपादादिकं च हीनं तद्वामनं, यत्र सरह्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तत् हुण्डम्, उक्तञ्च–

॥१॥ "समचउरंसे नग्गोहमंडले साइ खुज्ज वामणए।
हुंडेवि य संठाणे जीवाणं छम्मुणेयव्वा ॥

॥२॥ तुल्लं वित्थडबहुलं उस्सेहबहुं च मडहकोट्ठं च।
हेट्ठिल्लिकायमडहं सव्वत्थासंठियं हुंडं ॥

लेश्याद्वारे षडपि लेश्याः, शुक्ललेश्याया अपि सम्भवात्, समुद्घाताः पञ्च, वैक्रियसमुद्घातस्यापि सम्भवात्, संज्ञिद्वारे संज्ञिनो नो असंज्ञिनः, वेदद्वारे त्रिविधवेदा अपि, स्त्रपुरुषयोर्वेदयोरप्यमीषां भावात्, पर्याप्तिद्वारे पञ्च पर्याप्तयो, भाषामनःपर्याप्तयोरेकत्वेन विवक्षणात्, अपर्याप्तिचिन्तायां पञ्चापर्याप्तयः, दृष्टिद्वारे त्रिविधदृष्टयोऽपि, तद्यथा–मिथ्यादृष्टयः सम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयश्च, दर्शनद्वारे त्रिविधदर्शना अपि, अवधिदर्शनस्यापि केषाञ्चिद्भावात्, ज्ञानद्वारे त्रिज्ञानिनोऽपि, अवधिज्ञानस्यापि केषाञ्चिद्भावात्, अज्ञानचिन्तायामज्ञानिनोऽपि, विभङ्गस्यापि केषाञ्चित्सम्भवात्, अवधिविभङ्गौ च सम्यग्मध्यादृष्टिभेदेन प्रतिपत्तव्यौ, उक्तञ्च– "सम्यग्दृष्टेर्ज्ञानं मिथ्यादृष्टेर्विपर्यासः" इति।

उपपातद्वारे उपपातो नैरयिकेभ्यः सप्तपृथ्वीविभ्योऽपि, तिर्यग्योनिकेभ्योऽप्यसङ्ख्यातवर्षायुष्कवर्जेभ्यः सर्वेभ्योऽपि, मनुष्येभ्योऽकर्मभूमिजान्तरद्वीपजासङ्ख्यातवर्षायुष्कवर्जकर्मभूमिभ्यो, देवेभ्योऽपि यावत्सहस्रारात्, परतः प्रतिषेधः, स्थितिद्वारे जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, च्यवनद्वारेऽनन्तरमुद्वृत्य सहस्रारात्परे ये दाव्सान् वर्जयित्वा शेषेषु सर्वेष्वपि जीवास्थानेषु गच्छन्ति, अत एव गत्यागतिद्वारे चतुरागतिकाश्चतुर्गतिकाः, 'परीत्ताः' प्रत्येकशरीरिणोऽसङ्ख्येयाः प्रज्ञप्ताः, हे श्रमण ! हे आयुष्मन् ! उपसंहारमाह–'सेत्तं जलयरा गब्भवक्कंतियपञ्चिंदियतिरिक्खजोणिया' ॥ सम्प्रति स्थलचरप्रतिपादनार्थमाह–

मू. (४७) *से किं तं थलयरा ?, २ दुविहा पन्नत्ता, तंजहा–चउप्पदा य परिसप्पा य। से किं तं चउप्पया ?, २ चउव्विधा पन्नत्ता, तंजहा–एगक्खुरा सो चेव भेदो जाव जे यावन्ने तहप्पकारा ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य।*

चत्तारि सरीरा ओगाहणा जहन्नेणं अंगुलस्स असंखेज्ज० उक्कोसेणं छ गाउयाइं, ठिती उक्कोसेणं तिन्नि पलिओमाइं नवरं उव्वट्टित्ता नेरइएसु चउत्थपुढविं गच्छंति, सेसं जहा जलयराणं जाव चउगतिया चउआगतिया परित्ता असंखिज्जा पन्नत्ता, से तं चउप्पया।

से किं तं परिसप्पा ?, २ दुविहा पन्नत्ता, तंजहा–उरपरिसप्पा य भुयगपरिसप्पा य, से किं तं उरपरिसप्पा ?, २ तहेव आसालियवज्जो भेदो भाणियव्वो, (तिन्नि) सरीरा, ओगाहणा जहन्नेणं अंगुलस्स असंखे० उक्कोसेणं जोयणसहस्सं, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी उव्वट्टित्ता नेरइएसु जाव पंचमं पुढविं ताव गच्छंति, तिरिक्खमणुस्सेसु सव्वेसु, देवेसु जाव सहस्सारा।

सेसं जहा जलयराणं जाव चउगतिया चउआगइया परित्ता असंखेज्जा से तं उरपरिसप्पा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं भुयगपरिसप्पा?, २ भेदो तहेव, चत्तारि सरीरगा ओगाहणा जहन्नेणं अंगुलासंखे० उक्कोसेणं गाउयपुहुत्तं ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, सेसेसु ठाणेसु जहा उरपरिसप्पा, नवरं दोच्चं पुढविं गच्छंति, से तं भुयपरिसप्पा पन्नत्ता, से तं थलयरा।

वृ. स्थलचरगर्भव्युत्क्रान्तिकानां भेदोपदर्शकं सूत्रं यथा संमूर्च्छिमस्थलचराणां, नवरमंत्रासालिका न वक्तव्या, सा हि संमूर्च्छिमैव न गर्भव्युत्क्रान्तिका, तथा महोरगसूत्रे "जोयणसयंपि जोयणसयपुहुत्तियावि जोयणसहस्संपि" इत्येतदधिकं वक्तव्यं, शरीरादिद्वारकदम्बकसूत्रं तु सर्वत्रापि गर्भव्युत्क्रान्तिकजलचराणामिव, नवरमवगाहनास्थित्युद्वर्त्तनासु नानात्वं, तत्र चतुष्पदानामुत्कृष्टाऽवगाहना षड् गव्यूतानि, स्थितिरुत्कर्षतस्त्रीणि पल्योपमानि, ऊद्वर्त्तना चतुर्थपृथिव्या आरभ्य यावत्सहस्रारः।

एतेषु सर्वेष्वपि जीवस्थानेष्वनन्तरमुद्वृत्योत्पद्यन्ते, उरःपरिसर्पाणामुत्कृष्टावगाहना योजनसहस्रं, स्थितिरुत्कर्षतः पूर्वकोटी, उर्द्वर्त्तना पञ्चमपृथिव्या आरभ्य यावत्सहस्रारः, अत्रान्तरे सर्वेषु जीवस्थानेष्वनन्तरमुदवृत्योत्पद्यन्ते।

भुजपरिसर्पाणामुत्कृष्टाऽवगाहना गव्यूतपृथक्त्वं, स्थितिरुत्कर्षतः पूर्वकोटी, उर्द्वर्त्तनाचिन्तायां द्वितीयपृथिव्या आरभ्य यावत्सहस्रारः, अत्रान्तरे सर्वेषु जीवस्थानेषूत्पादः।

मू. (४८) *से किं तं खहयरा?, २ चउव्विहा पन्नत्ता, तंजहा—चम्मपक्खी तहेव भेदो, ओगाहणा जहन्नेणं अंगुलस्स असंखे० उक्कोसेणं धणुपुहुत्तं, ठिती जहन्नेणं अंतोमुहुत्तं उक्कसेणं पलिओवमस्स असंखेज्जतिभागो। सेसं जहा जलयराणं, नवरं जाव तच्चं पुढविं गच्छंति जाव से तं खहयरगब्भवक्कंति- यपंचेंदियतिरिक्खजोणिया, से तं तिरिक्खजोणिया॥*

वृ. खचरगर्भव्युत्क्रान्तिकपञ्चेन्द्रियभेदो यथा संमूर्च्छिमखचराणां, शरीरादिद्वारकलापचिन्तनं गर्भव्युत्क्रान्तिकजलचरवत्, नवरमवगाहनास्थित्युद्वर्त्तनासु नानात्वं, तत्रोत्कर्षतोऽवगाहना धनुष्पृथक्त्वं, जघन्यतः सर्वत्राप्यङ्गुलासङ्ख्येयभागप्रमाणा, स्थितिरपि जघन्यतः सर्वत्राप्यन्तर्मुहूर्त्तमुत्कर्षतोऽत्र पल्योपमासङ्ख्येयभागः, उद्वर्त्तना तृतीयपृथिव्या आरभ्य यावत्सहस्रारः, अत्रान्तरे सर्वेषु जीवस्थानेषूत्पादः। —क्वचित्पुस्तकान्तरेऽवगाहनास्थित्योर्यथाक्रमं सङ्ग्रहणिगाथे—

॥१॥ जोयण सहस्स छग्गाउयाइ त्तो य जोयणसहस्सं।
गाउयपुहुत्त भुयगे धणुयपुहुत्तं च पक्खीसु॥

॥२॥ गब्भंमि पुव्वकोडी तिन्नि य पलिओवमाइं परमाउं।
उरभुयग पुव्वकोडी पलियअसंखेज्जभागो य॥

अनयोव्यार्ख्या—गर्भव्युत्क्रान्तिकानामेव जलचरामामुत्कृष्टावगाहना योजनसहस्रं, चतुष्पदानां षड् गव्यूतानि, उरःपरिसर्पाणां योजनसहस्रं, भुजपरिसर्पाणां गव्यूतपृथक्त्वं, पक्षिणां धनुष्पृथक्त्वं। तता गर्भव्युत्क्रान्तिकानामेव जलचराणामुत्कृष्टा स्थिति पूर्वकोटी, चतुष्पदाग्नं त्रीणि पल्योपमानि, उरगाणां भुजगानां च पूर्वकोटी, पक्षिणां पल्योपमासङ्ख्येयभाग इति॥

उत्पादविधिस्तु नरकेष्वस्माद्गाथाद्वयादवसेयः—

॥१॥ "अस्सण्णी खलु पढमं दोच्चं च सरीसवा तइय पक्खी।
सीहा जंति चउत्थिं उरगा पुण पंचमिं पुढविं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२॥ छट्ठिं च इत्थियाउ मच्छा मणुया य सत्तमिं पुढविं ।
एसो परमुववाओ बोद्धव्वो नरयपुढवीसु ॥

–उक्ताः पञ्चेन्द्रियतिर्यञ्चः, सम्प्रति मनुष्यप्रतिपादनार्थमाह–

मू. (४९) *से किं तं मणुस्सा ?, २ दुविहा पन्नत्ता, तंजहा–संमुच्छिममणुस्सा य गब्भवक्कंतियमणुस्सा य । कहि णं भंते ! संमुच्छिममणुस्सा संमुच्छंति ?, गोयमा ! अंतो मणुस्सखेत्ते जाव करेंति । तेसि णं भंते ! जीवाणं कति सरीरगा पन्नत्ता ?, गोयमा ! तिन्नि सरीरगा पन्नत्ता, तंजहा–ओरालिए तेयए कम्मए, सेतं संमुच्छिममणुस्सा ।*

से किं तं गब्भवक्कंतियमणुस्सा ?, २ तिविहा पन्नत्ता, तंजहा–कम्मभूमया अकम्मभूमगा अंतरदीवगा, एवं माणुस्सभेदो भाणियव्वो जहा पन्नवणाए तहा निरवसेसं भाणियव्वं जाव छउमत्था य केवली य, ते समासतो दुविहा पन्नत्ता, तंजहा–पज्जत्ता य अपज्जत्ता य ।

तेसि णं भंते ! जीवाणं कति सरीरा प० ?, गोयमा ! पंच सरीरया, तंजहा–ओरालिए जाव कम्मए । सरीरोगाहणा जहन्नेणं अंगुलअसंखेज्ज० उक्कोसेणं तिन्नि गाउयाइं छच्चेव संघयणा छस्संठाणा । ते णं भंते ! जीवा किं कोहकसाई जाव लोभकसाई अकसाई ?, गो० ! सव्वेवि । ते णं भंते ! जीवा किं आहारसन्नोवउत्ता० लोभसन्नोवउत्ता नोसन्नोवउत्ता ?, गोयमा ! सव्वेवि ।

ते णं भंते ! जीवा किं कण्हलेसा य जाव अलेसा ?, गोयमा ! सव्वेवि । सोइंदियोवउत्ता जाव नोइंदियोवउत्तावि, सव्वे समुग्घाता, तंजहा–वेयणासमुग्घाते जाव केवलिसमुग्घाए, सन्नीवि नोसन्नी असन्नीवि, इत्थिवेयावि जाव अवेदावि, पंच पज्जत्ती, तिविहावि दिट्ठी, चत्तारि दंसणा ।

नाणीवि अन्नाणीवि, जे नाणी ते अत्थेगतिया दुनाणी अत्थेगतिया तिनाणी अत्थेगइया चउनाणी अत्थेगतिया एगनाणी, जे दुन्नाणी ते नियमा आभिनिबोहियणाणी सुतनाणी य, जे तिनाणी ते आभिनिबोहियनाणी सुतनानी ओहिनानी य, अहवा आभिनिबोहियणाणी सुयनाणी मणपज्जवनाणी य, जे चउनाणी ते नियमा आभिणिबोहियनाणी सुत० ओहि० मणपज्जवनाणी य, जे एगनाणी ते नियमा केवलनाणी, एवं अन्नाणीवि दुअन्नाणी तिअन्नाणी ।

मनजोगीवि वइकायजोगीवि अजोगीवि, दुविहउवओगे, आहारो छद्दिसिं, उववातो नेरइएहिं अहे सत्तमवज्जेहिं तिरिक्खजोणिएहिंतो, उववाओ असंखेज्जवासाउयवज्जेहिं मणुएहिं अकम्मभूमगअंतरदीवगअसंखेज्जवासाउयवज्जेहिं ।

देवेहिं सव्वेहिं, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं, दुविधावि मरंति, उव्वट्टित्ता नेरइयादिसु जाव अणुत्तरोववाइएसु, अत्थेगतिया सिज्झंति जाव अंतं करेंति ।

ते णं भंते ! जीवा कतिगतिया कइआगइया पन्नत्ता ?, गोयमा ! पंचगतिया चउआगतिया परित्ता संखिज्जा पन्नत्ता, सेत्त मणुस्सा ॥

वृ. अथ के ते मनुष्याः ?, सूरिराह–मनुष्या द्विविधाः प्रज्ञप्ताः, तद्यथा–संमूर्च्छिममनुष्याश्च गर्भव्युत्क्रान्तिकमनुष्याश्च, चशब्दौ स्वगतानेकभेदसूचकौ ।

तत्र संमूर्च्छिममनुष्यप्रतिपादनार्थमाह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! संमूर्च्छिममनुष्याः संमूर्च्छन्ति ?, भगवानाह–गौतम ! 'अंतो मनुस्सखेत्ते जाव करेंति' इति, अत्र यावत्करणादेवं परिपूर्ण पाठः–''अंतो मनुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पण्णाए अंतरदीवेसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणएसु वा वंतेसु वा पित्तेसु वा सोणिएसु वा सुक्केसु वा सुक्कपोग्गलपरिसाडेसु वा कलगयजीवकलेवरेसु वा थीपुरिससंजोगेसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु, एत्थ णं संमुच्छिमणुस्सा संमुच्छंति अंगुलस्स असंखेज्जइभागमेत्ताए ओगाहणाए असन्नी मिच्छादिट्ठी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतोमुहत्ताउया चेव कालं करेंति'' एतच्च निगदसिद्धम् । सम्प्रति शरीरादिद्वारप्रतिपादनार्थमाह–

'तेसि णं भंते !' शरीराणि त्रीणि औदारिकतैजसकार्मणानि अवगाहना जघन्यत उत्कर्षतश्चाङ्गुलासङ्ख्येयभागप्रमाणा, संहननसंस्थानकषायलेश्याद्वाराणि यथा द्वीन्द्रियाणां, इन्द्रियद्वारे पञ्चेन्द्रियाणि, संज्ञिद्वारवेदद्वारे अपि द्वीन्द्रियवत्, पर्याप्तिद्वारेऽपर्याप्तयः पञ्च, दृष्टिदर्शनज्ञानयोगोपयोगद्वाराणि (यथा) पृथिवीकायिकानां, आहारो यथा द्वीन्द्रियाणां, उपपातो नैरयिकदेवतेजोवाय्वसङ्ख्यातवर्षायुष्कवर्जेभ्यः, स्थितिर्जघन्यत उत्कर्षतोऽप्यन्तर्मुहूर्त्तप्रमाणा, नवरं जघन्यपदादुत्कृष्टमधिकं वेदितव्यं, मारणान्तिकसमुद्घातेन समवहता अपि म्रियन्ते असमवहताश्च, अनन्तरमुद्वृत्य नैरयिकदेवासङ्ख्येयवर्षायुष्कवर्जेषु शेषेषु स्थानेषूत्पद्यन्ते, अत एव गत्यागतिद्वारे द्वयागतिका द्विगतिकास्तिर्यग्मनुष्यगत्यपेक्षया, 'परीत्ताः' प्रत्येक-शरीरिणोऽसङ्ख्येययाः प्रज्ञप्ताः, हे श्रमण ! हे आयुष्मन् !, उपसंहारमाह– 'सेत्तं संमुच्छिम मणुस्सा' ।

उक्ताः संमूर्च्छिममनुष्याः, अधुना गर्भव्युत्क्रान्तिकमनुष्यानाह–अथ के ते गर्भव्युत्क्रान्तिक-मनुष्याः ?, सूरिराह–गर्भव्युत्क्रान्तिकमनुष्यास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–कर्मभूमिका अकर्मभूमका अन्तरद्वीपजाः, तत्र कर्म–कृषिवाणिज्यादि मोक्षानुष्ठानं वा कर्मप्रधाना भूमिर्येषां ते कर्मभूमाः आर्षत्वात्समासान्तोऽप्रत्ययः, कर्मभूमा एव कर्मभूमकाः, एवमकर्मा–यथोक्तकर्मविकला भूमिर्येषां तेऽकर्मभूमास्त एवाकर्मभूमकाः, अन्तरशब्दो मध्यवाची, अन्तरे–लवणसमुद्रस्य मध्ये द्वीपा अन्तरद्वीपास्तद्गता अन्तरद्वीपगाः ।

'एवं माणुस्सभेयो भाणियव्वो जहा पन्नवणाए' इति, 'एवम्' उक्तेन प्रकारेण मनुष्यभेदो भणितव्यो यथा प्रज्ञापनायां, स चातिबहुग्रन्थ इति तत एव परिभावनीयः, 'ते समासतो' इत्यादि पर्याप्तापर्याप्तसूत्रं पाठसिद्धं, शरीरादिद्वारकलापचिन्तायां शरीरद्वारे पञ्च शरीराणि, तद्यथा–औदारिकं वैक्रियमाहारकं तैजसं कार्मणं च, मनुष्येषु सर्वभावसम्भवात्, अवगाहनाद्वारे जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागमात्रा उत्कर्षस्त्रीणि गव्यूतानि, संहननद्वारे षडपि संहननानि, संस्थानद्वारे षडपि संस्थानानि, कषायद्वारे क्रोधकषायिणोऽपि जाव लोभकषायिणोऽपि अकषायिणोऽपि, वीतरागमनुष्याणामकषायित्वात्, संज्ञाद्वारे आहारसंज्ञोपयुक्ता जाव लोभसञ्ज्ञोपयुक्ताः, नोसंज्ञोपयुक्ताश्च निश्चयतो वीतरागमनुष्याः, व्यवहारतः सर्व एव चारित्रिणो, लोकोत्तरचित्त- लाभात्तस्य सञ्ज्ञादशकेनापि विप्रयुक्तत्वात्, उक्तञ्च–

॥ १ ॥ ''निर्वाणसाधकं सर्वं, ज्ञेयं लोकोत्तराश्रयम् ।
संज्ञा लोकाश्रया सर्वा, भवाङ्कुरजलं परम् ॥''

लेश्याद्वारे कृष्णद्वारे नीललेश्याः कापोतलेश्यास्तेजोलेश्याः पद्मलेश्याः शुक्ललेश्या अलेश्याश्च, तत्रालेश्याः परमशुक्लध्यायिनोऽयोगिकेवलिनः । इन्द्रियद्वारे श्रोत्रेन्द्रियोपयुक्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत्स्पर्शनिन्द्रियोपयुक्ता नोइन्द्रियोपयुक्ताश्च, तत्र नोइन्द्रियोपयुक्ताः केवलिनः, समुद्घातद्वारे सप्तति समुद्घाताः, मनुष्येषु सर्वभावसम्भवात्, समुद्घातसङ्ग्राहिका चेमा गाथा–

॥ १ ॥ "वेयणकसायसमरणंतिए य वेउव्विए य आहारे।
केवलियसमुग्घाए सत्त समुग्घा इमे भणिया ॥"

संज्ञिद्वारे संज्ञिनोऽपि नोसंज्ञिनोअसंज्ञिनोऽपि, तत्र नोसंज्ञिनोअसिंज्ञिनः केवलिनः। वेदद्वारे स्त्रिवेदा अपि पुरुषवेदा अपि नपुंसकवेदा अपि अवेदाः–सूक्ष्मसम्परायादयः, पर्याप्तिद्वारे पञ्च पर्याप्तयः पञ्चापर्याप्तयः, भाषामनःपर्याप्तयोरेकत्वेन विवक्षणात्।

दृष्टिद्वारे त्रिविधदृष्टयः, तद्यथा–केचिन्मिथ्यादृष्टयः केचित्सम्यग्दृष्टयः केचित्सम्यग्मिथ्यादृष्टयः, दर्शनद्वारे चतुर्विधदर्शनाः, तद्यता–चक्षुर्दर्शना अचक्षुर्दर्शना अवधिदर्शनाः केवलदर्शनाः, ज्ञानद्वारे ज्ञानिनोऽज्ञानिनश्च, तत्र मिथ्यादृष्टयोऽन्येनः सम्यग्दृष्टयो ज्ञानिनः, 'नाणाणि पंच तिन्नि अन्नाणाणि भयणाते' इति, ज्ञानानि पञ्च मतिज्ञानादीनि, अज्ञानानि त्रीणि मत्यज्ञानादीनि, तानि भजनया वक्तव्यानि, सा च भजना एवम्।

केचिद्द्विज्ञानिनः केचित्त्रिज्ञानिनः केचिच्चतुर्ज्ञानिनः केचिदेकज्ञानिनः, तत्र येद्विज्ञाननस्ते नियमादाभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च, ये त्रिज्ञानिनस्ते मतिज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, अथवाऽऽभिनिबोधिकज्ञानिनः श्रुतज्ञानिनो मनःपर्यवज्ञानिनश्च, अवधिज्ञानमन्तरेणापि मनःपर्यवज्ञानस्य सम्भवात्, सिद्धप्राभृतादौ तथाऽनेकशोऽभिधानात्, ये चतुर्ज्ञानिनस्ते आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनो मनःपर्यवज्ञानिनश्च, ये एकज्ञानिनस्ते केवलज्ञानिनः, केवलज्ञानसद्भावे शेषज्ञानापगमात्, "नट्ठंमि छाउमत्थिए नाणे" इति वचनात्, ननु केवलज्ञानप्रादुर्भावे कथं शेषज्ञानापगमः ?, यावता यानि शेषाणि मत्यादीनि ज्ञानानि स्वस्वावरणक्षयोपशमेन जायन्ते ततो निर्मूलस्वस्वावरणविलये तानि सुतरां भवेयुश्चारित्रपरिणाभवत्, उक्यञ्च–

॥ १ ॥ "आवरणदेसविगमे जाइं विज्जंति मइसुयाईणि।
आवरणसव्वविगमे कह ताइं न होंति जीवस्स ॥"

उच्यते, इह यथा जात्यस्य मरकतादिमणेर्मलोपदिग्धस्य यावन्नाद्यापि समूलमलापगमस्तावद् यथा यथा देशतो मलविलयस्तथा तथा देशतोऽभिव्यक्तिरुप्यजायते, सा च क्वचित्कदाचित्कथञ्चिवती- त्यनेकप्रकारा, तथाऽऽत्मनोऽपि सकलकालकलाकलापावलम्बिनिखिलपदार्थसार्थपरिच्छेद- करणैकपारमार्थिकस्वरूपस्याप्यावरणमलपटलतिरोहितस्य यावन्नाद्यापि निखिलकर्ममला- पगमस्तावद् यथा यथा देशतः कर्ममलोच्छेदस्तथा तथा तस्य विज्ञप्तिरुज्जृम्भते, सा च क्वचित्कदा- चित्कथञ्चिदनेकप्रकारा, उक्तञ्च–

॥ १ ॥ "मलविद्धमणेर्व्यक्तिर्यथाऽनेकप्रकारतः।
कर्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारतः ॥"

सा चानेकप्रकारता मतिश्रुतादिभेदेनावसेया, ततो यथा मरकतादिमणेरशेषमलापगमसम्भवे समस्तास्पष्टदेशव्क्तिव्यवच्छेदेन परिस्फुटरूपैकाभिव्यक्तिरुपजायते तद्वदात्मनोऽपि ज्ञानदर्शनचारित्रप्रभावतो निशेषावरणप्रहाणावशेदेशज्ञानव्यवच्छेदेनैकरूपाऽतिपरिस्फुटा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्ववस्तुपर्यायप्रपञ्चसाक्षात्कारिणी विज्ञप्तिरुल्लसति, उक्तञ्च–

॥ १ ॥ "यथा जात्यस्य रत्नस्य, निशेषमलहानितः ।
स्फुटैकरूपाऽभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः ॥" इति ।

येऽज्ञानिनस्ते द्व्यज्ञानिनस्त्र्यज्ञानिनो वा, तत्र ये द्व्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनः, ये त्र्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च । योगद्वारे मनोयोगिनो वाग्योगिनः काययोगिनोऽयोगनश्च, तत्रायोगिनः शैलेशीमवस्थां प्रतिपन्नाः, उपयोगद्वारमाहारद्वारं च द्वीन्द्रियवत्, उपपात एतेष्वध–सप्तमनरकादिवर्जेभ्यः, उक्तञ्च–

॥ १ ॥ "सत्तममहिनेरइया तेऊ वाऊ अंतरूव्वट्टा ।
नवि पावे माणुस्सं तहेवऽसंखाउया सव्वे ॥"

इति, स्थितिद्वारे जघन्यतः स्थितिरन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, समुद्घातमधिकृत्य मरणचिन्तायां समवहता अपि म्रियन्ते असमवहता अपि, च्यवनद्वारेऽनन्तरमुद्वृत्य सर्वेषु नैरयिकेषु सर्वेषु च तिर्यग्योनिषु सर्वेषु मनुष्येषु सर्वेषु देवेष्वनत्तरोपपातिकपर्यवसानेषु गच्छन्ति, 'अत्थेगइया सिज्झंति जाव अंतं करेंति' इति, अस्तीति निपातोऽत्र बहुवचनार्थ, सन्त्येकक निष्ठितार्था भवन्ति यावत्करणात् "बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खाणमंतं करेंती"ति द्रष्टव्यं, तत्राणिमाद्यैश्वर्याप्ता तथापि मनुष्यकृत्यापेक्षया निष्ठितार्था इति ।

असर्वविदोऽपि कैश्चित्सिद्धा इष्यन्ते ततो मा भूत्तेषु संप्रत्यय इति तदपोहायाह–

'बुध्यन्ते' निरावरणत्वात्केवलावबोधेन समस्त वस्तुजातम्, एते चासिद्धा अपि भवस्थकेवलिन एवंभूता वर्त्तन्ते तन्न मा भूदेतेष्वेव प्रतीतिरित्याह– 'मुच्यन्ते' पुण्यापुण्यरूपेण कृच्छ्रेण कर्मणा, एतेऽपि चापरिनिर्वृत्ता एव परैरिष्यन्ते–'मुक्तिपदे प्राप्ता अपि तीर्थनिकार-दर्शनादिहागच्छन्ती'ति वचनात्, ततो मा भूत्तद्गोचरा मन्दमतीनां धीरित्याह–'परिनिर्वान्ति' विध्यात- समस्तकर्महुतवहपरमाणवो भवन्तीति, किमुक्तं भवति ? –सर्वदुःखानां शारीरमान-सभेदामन्तविनाशं कुर्वन्ति, अत एव गत्यागतिद्वारे चतुरागतिकाः पञ्चगतिकाः, सिद्धगतावपि गमनात्, 'परीत्ताः' प्रत्येकशरीरिणः 'सङ्घ्येयाः' सङ्घ्येयकोटीप्रमाणत्वात् प्रज्ञप्ताः, हे श्रमण ! हे आयुष्मन् ! ।

उपसंहारमाह–'सेत्तं मणुस्सा' ॥ अधुना देवानाह–

मू. (५०) *से किं तं देवा ?, देवा चउव्विहा पन्नत्ता, तंजहा–भवणवासी वाणमंतरा जोइसाय वेमाणिया । से किं तं भवणवासी ?, २ दसविधा पन्नत्ता, तंजहा–असुरा जाव थणिया, से तं भवणवासी से किं तं वाणमंतरा ?, २ देवभेदो सव्वो भाणियव्वो जावते समासतो दुविहा पन्नत्ता, तंजहा– पज्जत्ता य अपज्जत्ता य, तओ सरीरगा–वेउव्विए तेयए कम्मए ।*

ओगाहणा दुविधा– भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखेज्जभागं उक्कोसेणं सत्त रयणीओ, उत्तरवेउव्विया जहन्नेणं अंगुल-संखेज्जति० उक्कोसेणं जोयणसयसहस्सं, सरीरगा छण्हं संघयणाणं असंघयणी नेवट्ठी नेव छिरा नेव ण्हारू नेव संघयणमत्थि ।

जे पोग्गला इट्ठा कंता जाव ते तेसिं संघायत्ताए परिणमंति, किंसंठिता ?, गोयमा ! दुविहा पन्नत्ता, तंजहा–भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जे ते भवधारणिज्जा ते णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समचउरंससंठिया पन्नत्ता, तत्थ णं जे ते उत्तरवेउव्विया ते णं नानासंठाणसंठिया पन्नत्ता।

चत्तारि कसाया चत्तारि सण्णा छ लेस्साओ पंच इंदिया पंच समुग्घाता सन्नीवि असन्नीवि इत्थिवेदावि पुरिसवेदावि नो नपुंसगवेदा, पज्जत्ती अपज्जत्तीओ पंच, दिट्ठी तिन्नि तिण्णि दंसणा, नाणीवि अन्नाणीवि, जे नाणी ते नियमा तिन्नाणी अन्नाणी भयणाए, दुविहे उवओगे तिविहे जोगे आहारो नियमा छदिसिं, ओसन्नकारणं पडुच्च वण्णतो हालिद्दसुक्किल्लाइं जाव आहारमाहारेंति, उववातो तिरियमणुस्सेसु।

ठिती जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं, दुविधावि मरंति, उव्वट्टित्ता नो नेरइएसु गच्छंति तिरियमणुस्सेसु जहासंभवं, नो देवेसु गच्छंति, दुगतिया दुआगतिया परित्ता असंखेज्ञा पण्णत्ता, से तं देवा, से तं पंचेंदिया, सेत्तं ओराला तसा पाणा॥

वृ. अथ के ते देवाः ?, सूरिराह—देवाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा—भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाश्च, 'एवं भेदो भाणियव्वो जहा पन्नवणाए' इति, 'एवम्' उक्तेन प्रकारेण भेदो भणितव्यो यथा प्रज्ञापनायां, स चैवम्— "से किं तं भवणवासी ?, दसविहा पन्नत्ता" इत्यादिरूपस्तत एव सव्याख्यानः परिभावनीयः, 'ते समासतो दुविहा पन्नत्ता—पज्जत्तगा य अपज्जत्तगा य' एषामपर्याप्तत्वमुत्पत्तिकाल एव द्रष्टव्यं न त्वपर्याप्तिनामकर्मोदयतः, उक्तञ्च—

॥१॥ "नारयदेवा तिरियमणुयगब्भजा जे असंखेवासाऊ।
एए उ अपज्जत्ता उववाए चेव बोद्धव्वा॥" इति।

शरीरादिद्वारचिन्तायां शरीरद्वारे त्रीणि शरीराणि वैक्रियं तैजसं कार्मणं च, अवगाहना भवधारणीया जघन्यतोऽङ्गुलासङ्खयेयभागमात्रा उत्कर्षतः सप्तहस्तप्रमाणा, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्खयेयभागप्रमाणा उत्कर्षतो योजनशतसहस्रं, संहननद्वारे षण्णां संहनननामन्यतमेनापि संहननेनासंहननिनः, कुतः ? इत्याह—'नेवट्ठी' इत्यादि, यतो नैव तेषां देवानां शरीरेष्वस्थीनि नैव शिरा नापि स्नायूनि संहननं चास्थिनिचयात्मकमतोऽ स्थ्यादीनामभावात्संहनना- भावः, किन्तु 'जे पोग्गला' इत्यादि, ये पुद्गला इष्टाः—मनस इच्छामापन्नाः, तत्र किञ्चिदकान्तमपि केषाञ्चिदिष्टं भवति तत आह—

'कान्ताः' कमनीयाः शुभवर्णोपेतत्वात्, यात्करणात् 'पिया मणुन्ना मणामा' इति द्रष्टव्यं, तत्र यत एव कान्ता अत एव प्रियाः—सदैवात्मनि प्रियबुद्धिमुत्पादयन्ति, तथा 'शुभाः' शुभरसगन्धस्पर्शात्मकत्वात् 'मनोज्ञाः' विपाकेऽपि सुखजनकतया मनःप्रह्लादहेतुत्वात् 'मनआपाः' सदैव भोज्यतया जन्तूनां मनांसि आप्नुवन्ति, इत्थम्भूताः पुद्गलास्तेषां शरीरसङ्घाताय परिणमन्ति।

संस्थानद्वारे भवधारणीया तनुः सर्वेषामपि समचतुरस्रसंस्थाना उत्तरवैक्रिया नानासंस्थानसंस्थिता, तस्या इच्छावशतः प्रादुर्भावात्, कषायाश्चत्वारः, संज्ञाश्चतस्र, लेश्याः षड्, इन्द्रियाणि पञ्च, समुद्घाताः पञ्च, वेदनाकषायमारणान्तिकवैक्रियतैजससमुद्घातसम्भवात्। संज्ञिद्वारे संज्ञिनोऽपि असंज्ञिनोऽपि, ते च नैरयिकवद्भावनीयाः, वेदद्वारे स्त्रिवेदा अपि पुरुषवेदा अपि नो नपुंसकवेदाः, पर्याप्तिद्वारं दृष्टिद्वारं दर्शनद्वारं च नैरयिकवत्।

ज्ञानद्वारे ज्ञानिनोऽपि अज्ञानिनोऽपि चेति विकल्पोऽसंज्ञिमध्यः, तत्र ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः, तद्यथा—आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, तत्र येऽज्ञानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नस्ते सन्त्येकका ये द्वयज्ञानिनः सन्त्येकका ये त्र्यज्ञानिनः, तत्र ये द्वयज्ञानिनस्ते नियमान्मत्यज्ञानिनः श्रुताज्ञानिनः, ये त्र्यज्ञानिनस्ते नियमान्मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च, अयं च द्वयज्ञानिनस्त्रयज्ञानिनो वेति विकल्पः असंज्ञिमध्याद् ये उत्पद्यन्ते तान् प्रति द्रष्टव्यः, स च नैरयिकवद्भावनीयः। उपयोगा हारद्वाराणि नैरयिकवत्, उपपातः संज्ञ्यसंज्ञिपञ्चेन्द्रिय-तिर्यग्गर्भजमनुष्येभ्यो न शेषेभ्यः।

स्थितिर्जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, समुद्घातमधिकृत्य मरणचिन्तायां समवहता अपि म्रियन्तेऽसमवहता अपि। च्यवनद्वारेऽनन्तरमुद्वृत्य पृथिव्यम्बुवन-स्पतिकायिकगर्भव्युत्क्रान्तिकसङ्ख्यातवर्षायुष्कतिर्यकपञ्चेन्द्रियमनुष्येषु गच्छन्ति न शेषजीवस्थानेषु अत एव गत्यागतिद्वारे द्वयागतिका द्विगतिकाः, तिर्यग्मनुष्यगत्यपेक्षया, 'परित्ताः' प्रत्येकशरी- रिणोऽसङ्ख्येयाः प्रज्ञप्ताः हे श्रमण ! हे आयुष्मन् !, उपसंहारमाह– 'सेत्तं देवा', सर्वोपसंहारमाह– 'सेत्तं पंचेंदिया सेत्तं ओराला तसा पाणा' सुगमम्।

सम्प्रति स्थावरभावस्य त्रसभावस्य च भवस्थितिकालमानप्रतिपादनार्थमाह–

मू. (५१) *थावरस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं ठिती पन्नत्ता। तसस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तेत्तीसं सागरोवमाइं ठिती पन्नत्ता।*

थावरे णं भंते ! थावरत्ति कालतो केवच्चिरं होति ?, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ उस्सप्पिणिओ [अवसप्पिणीओ] कालतो खेत्ततो अनंता लोया असंखेज्जा पुग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाणं असंखेज्जतिभागो।

तसे णं भंते ! तसत्ति कालतो केवच्चिरं होति ?, जहन्नेणं अंतोमुहुत्त उक्कोसेणं असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओ [अवसप्पिणीओ] कालतो खेत्ततो असंखेज्जा लोगा। थावरस्स णं भंते ! केवतिकालं अंतरं होति ?, जहा तससंचिट्ठणाए॥ तसस्स णं भंते ! केवतिकालं अंतरं होति ?, अंतोमुहुत्तं उक्कोसेणं वणस्सतिकाले।

एएसि णं भंते ! तसाणं थावराण य कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तसा थावरा अनंतगुणा, सेतं दुविधा संसारसमावण्णगा जीवा पन्नत्ता॥

वृ. जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिवर्षसहस्राणि, एतच्च पृथिवीकायमधिकृत्या-वसातव्यम्, अन्यस्य स्थावरकायस्योत्कर्षत एतावत्या भवस्थितेरभावात्॥ त्रसकायस्य जघन्यतोऽन्तर्मुहूर्त्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, एतच्च देवनारकापेक्षया द्रष्टव्यम् अन्यस्य त्रसकायस्योत्कर्षत एतावत्प्रमाणाया भवस्थितेरसम्भवात्॥

सम्प्रत्येतयोरेव कायस्थितिकालमानमाह–स्थावरे 'णम्' इति वाक्यालङ्कारे 'स्थावर इति' स्थावर इत्यनेन रूपेण स्थावरत्वेनेति भावः, कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं, तमेवानन्तं कालं कालक्षेत्राभ्यां निरूपयति–अनन्ताः उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽनन्ता लोकाः, किमुक्तं भवति ?–अनन्तलोकेषु यावन्त आकाशप्रदेशास्तेषां प्रतिसमयमेकैकापहारेण यावत्योऽनन्ता अवसर्पिण्युत्सर्पिण्यो भवन्ति तावत्य इति, एतासामेव पुद्गलपरावर्त्ततो मानमाह–असङ्ख्येयाः पुद्गलपरावर्त्ताः, असङ्ख्येयेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुद्‌गलपरावर्तेषु क्षेत्रत इति पदसांनिध्यात्क्षेत्रपुद्‌गलपरावर्तेषु यावत्यः संभवन्ति अनन्ता उत्सर्पिण्य-वसर्पिण्यस्तावत्य इति भावः, इहासङ्ख्येयमसङ्ख्येयभेदात्मकमतः पुद्‌गलपरावर्त्तगतमसङ्ख्येययत्वं निर्द्धारयति- 'ते ण'मित्यादि, ते णमिति वाक्यालङ्कारे पुद्‌गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, आवलिकाया असङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणा इत्यर्थः, एतच्च वनस्पतिकाय-स्थितिमङ्गिकृत्य वेदितव्यं, न पृथिव्यम्बुकायस्थितिव्यपेक्षया, तयोः कायस्थितेरुत्कर्षतोऽप्य-सङ्ख्येयोत्सर्पिणीप्रमाणत्वात्, तथा चोक्तं प्रज्ञापनायाम्-

'पुढविक्काइए णं भंते ! पुढविक्काइ यत्ति कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तमुक्कोसेणं असंखिज्जं कालं असंखिज्जाओ उस्सप्पिणिअवसप्पिणीओ कालओ, खेत्तओ असंखिज्जा लोगा, एवं आउक्काएवि" इति, या तु वनस्पतिकायस्थिति सा यथोक्तप्रमाणा तत्रोक्ता "वणस्सइकाइए णं भंते ! वणस्सइकायत्ति काल कियच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ उस्सप्पिणीओसप्पिणीओ कालओ, खित्तओ अणंता लोगा असंखिज्जा पुग्गलपरियट्टा आवलियाए असंखिज्जइभागे" इति ।

एषोऽपि च वनस्पतिकायस्थितिकालः सांव्यवहारिकजीवानधिकृत्य प्रोच्यते, असांव्यवहारिकजीवानां तु कायस्थितिरनादिरवसेया, तथा चोक्तं विशेषणवत्याम्-

॥१॥　"अत्थि अनंता जीवा जेहिं न पत्तो तसाइपरिणामो ।
तेवि अनंतानंता निगोयवासं अणुवसंति ॥"

साऽपि तेषामसांव्यवहारिकजीवानामनादि कायस्थिति केषाञ्चिनादिरपर्यवसाना, ये न जातुचिदसांव्यवहारिकराशेरुद्दद्वृत्य सांव्यवहारिकराशौ निपतिष्यन्ति, केषाञ्चिदनादि सपर्यवसाना, ये असांव्यवहारिकराशेरुद्वृत्य सांव्यवहारिकराशौ निपतिष्यन्ति ।

अथ किमसांव्यवहारिकराशेर्विनिर्गत्य सांव्यवहारिकराशावागच्छन्ति ? येनैवं प्ररूपणा क्रियते, आगच्छन्ति, कथमवसीयते ? इति चेदुच्यते-पूर्वाचार्योपदेशात्, तथा चाह दुःषमान्ध-कारनिमग्नप्रवचनप्रदीपो भगवान् जिनभद्रगणि क्षमाश्रमणो विशेषणवत्याम्-

॥१॥　"सिज्झंति जत्तिया किर इह संववहारजीवरासिमज्झाओ ।
इंति अणाइवणस्सइरासीओ तत्तिया तंमि ॥"

इति कृतं प्रसङ्गेन । सम्प्रति त्रसकायस्य कायस्थितिमानमाह- 'तसे णं भंते' इत्यादि, तसे 'ण'मिति पूर्ववत् 'त्रस इति' त्रस इत्यनेन पर्यायेण कालतः 'कियच्चिरं' कियन्तं कालं यावद्भवति ?, भगवानाह-गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालम्, एनमेवासङ्ख्येयं कालक्षेत्राभ्यां निरूपयति-'असंखिज्जाओ' इत्यादि, असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोका असङ्ख्येयेषु लोकेषु यावन्त आकाश-प्रदेशास्तवां प्रतिसमयमेकैकापहारे यावत्योऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्य इति भावः, इयं चैतावती कायस्थितिर्गतित्रसं तेजस्कायिकं वायुकायिकं चाधिकृत्यावसेया न तु लब्धित्रसं, लब्धित्रसस्य कायस्थितेरुत्कर्षतोऽपि कतिपयवर्षाधिकसागरोपमसहस्रद्वयप्रमाणत्वात्, तथा चोक्तं प्रज्ञापनायाम्-

"तसकाए णं भंते ! तसकायत्ति कालतो कियच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं' तथा "तेउक्काइए णं भंते ! तेउक्काइएत्ति

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कालतो केवच्चिरं होति ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालओ, खेत्तओ असंखेज्जा लोगा, एवं वाउक्काइयावि'' इति ।। सम्प्रति स्थावरत्वस्यान्तरं विचिन्तयिषुराह–'थावरस्स णं भंते ! अंतर'मित्यादि सुगमं नवरमसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः, इत्येतावत्प्रमाणमन्तरं तेजस्कायिक-वायुकायिकमध्यगमनेनावसातव्यम्, अन्यत्र गतावेतावत्प्रमाणस्यान्तरस्यासम्भवात् ।

'तसस्स णं भंते ! अंतर'मित्यादि सुगमं नवरम् 'उक्कोसेणं वणस्सइकालो' इति, उत्कर्षतो वनस्पतिकालो वक्तव्यः, स चैवम्–''उक्कोसेणं अनंतमनंताओ उस्सप्पिणीओसप्पिणीओ कालओ, खेत्तओ अनंता लोगा, असंखेज्जा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइ-भागो'' इति, एतावत्प्रमाणं वनस्पतिकायमध्यगमनेन प्रतिपत्तव्यम्, अन्यत्र गतावेतावतोऽन्तर-स्यालभ्यमानत्वात् ।

सम्प्रत्यल्पबहुत्वमाह–एतेषां भदन्त ! जीवानां त्रसानां स्थावराणां च मध्ये कतरे कतमेभ्योऽ-ल्पा वा बहवो वा कतरे कतरैस्तुल्या वा ?, अत्र सूत्रे विभक्तिपरिणामेन तृतीया व्याख्येया, तथा कतरे कतरेभ्यो (ऽल्पा बहुकास्तुल्या) विशेषाधिका वा ?, भगवानाह–गौतम ! सर्वस्तोकास्त्रसाः, असङ्ख्यातत्वमात्रप्रमाणत्वात्, स्थावरा अनन्तगुणाः, जघन्योत्कृष्टानन्तानन्तसङ्ख्यापरिमाणत्वात्, उपसंहारमाह–'सेत्तं दुविहा संसारसमावन्ना जीवा' इति ।।

प्रथमा– ''द्विविधां'' प्रतिपत्ति समाप्ता

मुनि दीपरत्न सागरेण संशोधिता सम्पादीता जीवाजीवाभिगम उपाङ्ग सूत्रे प्रथमा प्रतिपत्याः मलयगिरि आचार्य विरचिता टीका परिसमाप्ता ।

प्रतिपत्ति २ ''त्रिविधा''

वृ. तदेवमुक्ता द्विविधे प्रतिपत्तिः, सम्प्रति त्रिविधा प्रतिपत्तिरारभ्यते, तत्र –

मू. (५२) *तत्थ जे ते एवमाहंसु तिविधा संसारसमावण्णगा जीवा पन्नत्ता ते एवमाहंसु, तंजहा–इत्थि पुरिसा नपुंसका ।।*

वृ. 'तत्र' तेषु नवसु प्रतिपत्तिषु मध्ये ये आचार्य एवमाख्यातवन्तः–त्रिविधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्त एवमाख्यातवन्तः, तद्यथा–स्त्रियः पुरुषा नपुंसकानि ।

इह स्त्र्यादिवेदोदयाद् योन्यादिसङ्गताः स्त्र्यादयो गृह्यन्ते, तथा चोक्तम् ।

॥ १ ॥ ''योनिर्मृदुत्वमस्थैर्यं, मुग्धताऽऽबलता स्तनौ ।
पुंस्कामितेति लिङ्गानि सप्त स्त्रीत्वे प्रचक्षते ।।

॥ २ ॥ मेहनं खरता दार्ढ्यं, शौण्डीर्यं श्मश्रु धृष्टता ।
स्त्रीकामितेति लिङ्गानि, सप्त पुंस्त्वे प्रचक्षते ।।

॥ ३ ॥ स्तनादिश्मश्रुकेशादिभावाभावसमन्वितम् ।
नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम् ।।

तत्र 'यथोद्देशं निर्देश' इति स्त्रावक्तव्यतामाह–'से किं त'मित्यादि, अथ कास्ताः स्त्रियः ?, सूरिराह–स्त्रियस्त्रिविधाः प्रज्ञप्ताः, तद्यथा–तिर्यग्योनिस्त्रियो मनुष्यस्त्रियो देवस्त्रियश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'से किं त'मित्यादि, तिर्यग्योनिस्त्रयस्त्रिविधाः, तद्यथा–जलचर्य स्थलचर्य खचर्यश्च ।

मू. (५३) *से किं तं इत्थीओ ?, २ तिविधाओ पन्नत्ता, तंजहा–तिरिक्खजोणियाओ मणुस्सित्थीओ देवित्थीओ ।*

से किं तं तिरिक्खजोणिणित्थीओ ?, २ तिविधा पन्नत्ता, तंजहा–जलयरीओ थलयरीओ, खहयरीओ । से किं तं जलयरीओ ?, २ पंचविधाओ पन्नत्ताओ, तंजहा–मच्छीओ जाव सुंसुमारीओ ।

से किं तं थलयरीओ ?, २ दुविधाओ पन्नत्ता, तंजहा–चउप्पदीओ य परिसप्पीओ य । से किं तं चउप्पदीओ ?, २ चउव्विधाओ पन्नत्ता, तंजहा–एगखुरीओ जाव सणप्फईओ ।

से किं तं परिसप्पीओ ?, २ दुविहा पन्नत्ता, तंजहा– उरपरिसप्पीओ य भुजपरिसप्पीओ य । से किं तं उरगपरिसप्पीओ ?, २ तिविधाओ पन्नत्ता, तंजहा–अहीओ अहिगरीओ महोरगाओ, सेत्तं उरपरिसप्पीओ । से किं तं भुयपरिसप्पीओ ?, २ अनेगविधाओ पण्णत्ता, तंजहा–सेरडीओ सेरंघीओ गोहीओ नउलीओ सेधाओ सण्णाओ सरडीओ सेरंधीओ भावाओ खाराओ पवण्णाइयाओ चउप्पइयाओ मूसियाओ मुगुसिओ धरोलियाओ गोव्हियाओ, जोव्हियाओ बिरचिरालियाओष सेत्तं भुयगपरिसप्पीओ । से किं तं खहयरीओ ?, २ चउव्विधाओ पन्नत्ता, तंजहा–चम्मपक्खीओ, जाव सेत्तं खहयरीओ, सेत्तं तिरिक्खजोणिओ ।

से किं तं मणुस्सिओ ?, २ तिविधाओ पण्णत्ता, तंजहा–कम्मभूमियाओ अकम्मभूमियाओ अंतरदीवियाओ । से किं तं अंतरदीवियाओ ?, २ अट्ठावीसतिविधाओ पन्नत्ता, तंजहा–एगूरूइयाओ आभासियाओ जाव सुद्धदंतीओ, सेत्तं अंतरदी वियाओ ।

से किं तं अकम्मभूमियाओ ?, २ तीसविधाओ पन्नत्ता, तंजहा–पंचसु हेमवएसु पंचसु एरण्णवएसु पंचसु हरिवंसेसु पंचसु रम्मगवासेसु पंचसु देवकुरासु पंचसु उत्तरकुरासु, सेत्तं अकम्मा० । से किं तं कम्मभूमिया ?, २ पन्नरसविधाओ पन्नत्ताओ, तंजहा–पंचसु भरहेसु पंचसु एरवएसु पंचसु महाविदेहेसु, सेत्तं कम्मभूमगमणुस्सीओ, सेत्तं मणुस्सित्थीओ ।

से किं तं देवित्थियाओ ?, २ चउव्विधा पन्नत्ता, तंजहा–भवणवासिदेवित्थियाओ वाणमंतरदेवित्थियाओ जोतिसियदेवित्थियाओ वेमाणियदेवित्थियाओ । से किं तं भवणवासिदेवित्थियाओ ?, २ दसविहा प०–असुरकुमारभवणवासिदेवित्थियाओ जाव थणीतकुमारवणवासिदेवित्थियाओ, से तं भवणवासिदेवित्थियाओ । से किं तं वाणमंतरदेवित्थियाओ ?, २ अट्ठविधाओ प० पिसायवाणमंतरदेवित्थियाओ जाव से तं वाणमंतरदेवित्थियाओ । से किं तं जोतिसियदेवित्थियाओ ?, २ पंचविधाओ प०–चंदविमाणजोतिसियदेवित्थियाओ सूर० गह० नक्खत्त० ताराविमाणजोतिसियदेवित्थियाओ, से त्तं जोतिसियाओ ।

से किं तं वेमामियदेवित्थियाओ ?, २ दुविहा पन्नत्ता, तंजहा–सोहम्मकप्पवेमाणियदेवित्थियाओ ईसाणकप्पवेमाणियदेवित्थिगाओ, सेत्तं वेमाणित्थिओ ॥

वृ. 'से किं त'मित्यादि । मनुष्यस्त्रयोऽपि त्रिविधास्तद्यथा–कर्मभूमिका अकर्मभूमिका अन्तरद्वीपिकाश्च । 'से किं त'मित्यादि, देवस्त्रियश्चतुर्विधास्तद्यथा–भवनवासिन्यो व्यन्तर्यो ज्योतिष्क्यो वैमानिक्यश्च । सम्प्रति स्त्रिया भवस्थितिमानप्रतिपादनार्थमाह–

मू. (५४) *इत्थी णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! एगेणं आएसेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पण्णपन्नं पलिओवमाइं एक्केणं आदेसेण जहन्नेणं अंतोमुहुत्तं उक्कोसेणं नव पलिओवमाइं एगेणं आदेसेणं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सत्त पलिओवमाइं एगेणं आदेसेणं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पन्नासं पलिओवमाइं ॥

वृ. 'इत्थी णं भंते' इत्यादि, स्त्रिया भदन्त ! कियन्तं कालं स्थिति प्रज्ञप्ता ?, भगवानाह–गौतम 'एकेनादेशेन' आदेशशब्द इह प्रकारवाची "आदेसो त्ति पगारो" इति वचनात्, एकेन प्रकारेण, एकं प्रकारमधिकृत्येति भावार्थः, जघन्येनान्तर्मुहूर्त्तम्, एतत्तिर्यग्मनुष्यस्त्र्यपेक्षया द्रष्टव्यम् अन्यत्रैतावतो जघन्यस्यासम्भवात्, उत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि, एतदीशानकल्पा-परिगृहीतदेव्यपेक्षम् । तथैकेनादेशेन जघन्यतोऽन्तर्मुहूर्त्तम् एतत्तथैवोत्कर्षतो नव पल्योपमानि, एतदीशानकल्प एव परिगृहीतदेव्यपेक्षम् ।

तथा एकेनादेशेन जघन्यतोऽन्तर्मुहूर्त्तम्, एतत्प्राग्वत्, उत्कर्षतः सप्त पल्योपमानि, एतत्सौधर्मकल्पे परिगृहीतदेवीरधिकृत्य । तथा एकेनादेशेन जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पञ्चाशत्पल्योपमानि, एतत्सौधर्मकल्प एवापरिगृहीतदेव्यपेक्षम्, उक्तञ्च सङ्ग्रहण्याम्–

॥ १ ॥ "सपरिग्गहेयारणं सोहम्मीसाण पलियसाहीयं ।
उक्कोस सत्त पन्ना नव पणपन्ना य देवीणं ॥"

तदेवं सामान्यतः स्त्रिणां जघन्यत उत्कर्षतश्च स्थितिमानमुक्तं, सम्प्रति तिर्यक्स्त्र्यादिभे-दानधिकृत्याह–

मू. *(५५) तिरिक्खजोणित्थीणं भंते ! केवतियं कालं ठिती पन्नत्ता ?, , गो० जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं । जलयरतिरिक्खजोणित्थीणं भंते ! केवइयं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतो० उक्को० पुव्वकोडी ।*

चउप्पदथलयरतिरिक्खजोणित्थीणं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गो० जहा तिरिक्खजोणित्थीओ । उरगपरिसप्पथलतरतिरिक्खजोणित्थीणं भंते ! केवतियं कालं ठिती पन्नत्ता ? गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसं पुव्वकोडी । एवं भुयपरिसप्प० । एवं खहयरति-रिक्खित्थीणं जहन्नेणं अंतोमुहुत्तं उक्को० पलिओवमस्स असंखेज्ञतिभागो ।

मणुस्सित्थीणं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! खेत्तं पडुच्च जह० अंतो० उक्को० तिन्नि पलिओवमाइं, धम्मचरणं पडुच्च जह० अंतो० उक्कोसेणं देसूणा पुव्वकोडी । कम्मभूमयमणुस्सित्थीणं भंते ! केवइयं कालं ठिती प० गो० खित्तं पडुच्च जहन्नेणं अंतोउक्को० तिन्नि पलिओवमाइं धम्मचरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी ।

भरहेरवयकम्मभूमगमणुस्सित्थीणं भंते ! केवतियं कालं ठिती पन्नत्ता, गोयमा ! खेत्तं पडुच्च जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं, धम्मचरणं पडुच्च जहन्नेणं अतोमु० उक्कोसेणं देसूणा पुव्वकोडी । पुव्वविदेहअवरविदेहकम्मभूमगमणुस्सित्थीणं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! खेत्तं पडुच्च जहन्नेणं अंतो० उक्कोसेणं पुव्वकोडी, धम्मचरणं पडुच्च जहन्नेणं अंतोमुहुत्तं उक्कोसेणं देसूणा पुव्वकोडी ।

अकम्मभूमगमणुस्सित्थीणं भंते ! केवतियं कालं ठिती प० गो० जम्मणं पडुच्च जहन्नेणं देसूणं पलिओवमं पलिओवमस्स असंखेज्ञतिभागऊणगं उक्कोसेणं तिन्नि पलिओवमाइं, संहरणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडुच्च जहन्नेणं अंतोमुहुत्तं उक्कोसेणं देसूणा, पुव्वकोडी। हेमवएरण्णवए जम्मणं पडुच्च जहन्नेणं देसूणं पलिओवमं पलिओवमस्स असंखेज्जइभागेण ऊणगं पलिओवमं संहरणं पडुच्च जहन्नेणं अंतोमुहुत्तं उक्कोसेणं देसूणा पुव्वकोडी।

हरिवासरम्मयवासअकम्मभूमगमणुस्सित्थीणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा जम्मणं पडुच्च जहन्नेणं देसूणाइं दो पलिओवमाइं पलिओवमस्स असंखेज्जतिभागेण ऊणयाइं उक्को० दो पलिओवमाइं, संहरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी।

देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सित्थीणं भंते! केवतियं कालं ठिई पन्नत्ता?, गोयमा! जम्मणं पडुच्च जहन्नेणं देसूणाइं तिन्नि पलिओवमाइं पलिओवमस्स असंखेज्जतिभागेण ऊणयाइं उक्को० तिन्नि पलिओवमाइं, संहरणं पडुच्च जहन्नेणं अंतो० उक्को० देसूणा पुव्वकोडी।

अंतरदीवगअकम्मभूमगमणुस्सित्थीणं भंते! केवतिकालं ठिती प० गो० जम्मणं पडुच्च जहन्नेणं देसूणं पलिओवमस्स असंखेज्जइभागं पलिओवमस्स असंखेज्जतिभागेण ऊणयं उक्को० पलिओवमस्स असंखेज्जइभागं संहरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी।

देवित्थीणं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! जहन्नेणं दसवाससहस्साइं उक्कोसेणं पणपन्नं पलिओवमाइं। भवणवासिदेवित्थीणं भंते!, जहन्नेणं दसवाससहस्साइं उक्कोसे अद्धपंचमाइं पलिओवमाइं। एवं असुरकुमारभवणसाविदेवित्थियाए, नागकुमारभवणवासिदेवित्थियाएवि जहन्नेणं दसवाससहस्साइं उक्कोसेणं देसूणाइं पलिओवमाइं, एवं सेसाणवि जाव थणियकुमाराणं। वाणमंतरीणं जहन्नेणं दसवाससहस्साइं उक्को० अद्धपलिओवमं।

जोइसियदेवित्थीणं भंते! केवइयं कालं ठिती पन्नत्ता?, गोयमा! जहन्नेणं पलिओवमं अट्ठभागं उक्कोसेणं अद्धपलिओवमं पन्नासाए वाससहस्सेहिं अब्भहियं, चंदविमाणजोतिसियदेवित्थियाए जहन्नेणं चउभागपलिओवमं उक्कोसेणं अद्धपलिओवमं पंचहिं पाससएहिमब्भहियं, गहविमाणजोतिसियदेवित्थीणं जहण्णेणं चउभागपलिओवमं उक्कसेणं अद्धपलिओवमं, नक्खत्तविमाणजोतिसियदेवित्थीणं जहन्नेणं चउभागपलिओवमं उक्को० चउभागपलिओवमं साइरेगं, ताराविमाण० जह० अट्ठभागं पलिओवमं उक्को० सातिरेगं अट्ठभागपलिओवमं।

वेमाणियदेवित्थियाए जहण्णेणं पलिओवमं उक्कोसेणं पणपन्नं पलिओवमाइं, सोहम्मकप्पवेमाणियदेवित्थीणं भंते! केवतियं कालं ठिती प०?, जहन्नेणं पलिओवमं उक्कोसेणं सत्त पलिओवमाइं ईसाणदेवित्थीणं जहन्नेणं सातिरेगं पलिओवमं उक्कोसेणं नव पलिओवमाइं॥

वृ. 'तिरिक्खजोणिइत्थियाणं भंते!' इत्यादि, उत्कर्षतस्त्रीणि पल्योपमानि, देवकुर्वादिषु चतुष्पदस्त्रीरधिकृत्य, जलचरस्त्रीणामुत्कर्षतः पूर्वकोटी, स्थलचरस्त्रीणां यथा औधिकी, त्रीणि पल्योपमानीत्यर्थः। खचरीणामुत्कर्षतः पल्योपमासङ्ख्येयभागः, मनुष्यस्त्रषु क्षेत्रं प्रतीत्य–क्षेत्राश्रयणेनेति- भावः, जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देवकुर्वादिषु भरतादिष्वपि एकान्तसुषमादिकाले त्रीणि पल्योपमानि, 'धर्मचरणं' चरणधर्मसेवनं प्रतीत्य जघन्येनान्तर्मुहूर्त्तम्, एतच्च तद्भवस्थिताया एव परिणामवशतः प्रतिपातापेक्षया द्रष्टव्यं, चरणधर्मस्य मरणमन्तरेण सर्वस्तोकतयाऽप्येतावन्मात्रकालावस्थानभावात्, तथाहि–

काचित्स्त्री तथाविधक्षयोपशमभावतः सर्व विरतिं प्रतिपद्य तावन्मात्रक्षयोपशमभावा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दन्तर्मुहूर्तानन्तरं भूयोऽपि अविरतसम्यग्दृष्टित्वं मिथ्यात्वं वा प्रतिपद्यते इति, अथवा धर्मचरणमिह देशचरणं प्रतिपत्तव्यं न सर्वचरणं, देशचरणप्रतिपत्तिस्तु जघन्यतोऽप्यान्तर्मुहूर्तिकी, तस्या भङ्गबहुलत्वात्, अथोभयचरणसम्भवे किमर्थमिह देशचरणं परिगृह्यते ?, उच्यते, देशचरणपूर्वकं प्रायः सर्वचरणमिति ख्यापनार्थम्, अत एवोक्तं वृद्धैः-

॥१॥ "सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होइ ।
चरणोवसमखयाणं सागरसंखंतरा होंति ॥"

एवं "अप्परिवडिए" इत्यादि, उत्कर्षतो देशोना पूर्वकोटी, अष्टसांवत्सरिक्याश्चरणधर्म-प्राप्तेस्तदूर्ध्वं चरमान्तर्मुहूर्त्तं यावदप्रतिपति परिणामभावात्, पूर्वपरिमाणं चेदम्-

॥१॥ "पुव्वस्सउ परिमाणं सयरिं खलु होंति कोडिलक्खाओ ।
छप्पन्नं च सहस्सा बोद्धव्वा वासकोडीणं ॥ (७०५६०००००००००)

सम्प्रति कर्मभूमिकादिविशेषस्त्रीणां वक्तव्यतामाह- अक्षरगमनिका सुगमा, भावार्थस्त्वयम्-कर्मभूमिकमनुष्यस्त्राणां क्षेत्रं कर्मभूमिकासामान्यलक्षण- मधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्राणि पल्योपमानि, तानि च भरतैरावतेशु सुषमसुष- मालक्षणेऽरके वेदितव्यानि, धर्मचरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भावना चात्र प्रागिव द्रष्टव्या, एवमुत्तरसूत्रद्वयेऽपि ॥ अत्रैव विशेषचिन्तां चिकीर्षुराह-सुगमं, नवरं भरतैरावतेषु त्रीणि पल्योपमानि सुषम- सुषमायां, पूर्वविदेहेषु क्षेत्रतः पूर्वकोटी, तत ऊर्ध्वं तत्र तथाक्षेत्र-स्वाभाव्यादायुषोऽसम्भवात्, अकम्मभूमिगेत्यादि, जन्म प्रतीत्येति-अकर्मभूमिषूत्पत्तिमाश्रित्य जघन्यतो देशोनं पल्योपमं, तच्चाअठभागाद्यूनमपि देशोनं भवति ततो विशेषस्थापनायाह-पल्योपमस्यासङ्ख्येयभागेनोनं, एतच्च हैमवतहैरण्यवतक्षेत्रापेक्षया द्रष्टव्यं, तत्र जघन्यतः स्थितेरेतावत्प्रमाणायाः सम्भवात्, उत्कर्षतस्त्रीणि पल्योपमानि तानि च देवकुरूत्तरकुर्वपेक्षया ।

'संहरणं पडुच्चे' त्यादि, संहरणं नाम कर्मभूमिजायाः स्त्रियोऽकर्मभूमिषु नयनं 'तत्प्रतीत्य' तदाश्रित्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, इयमत्र भावना इह कर्मभूमिकाऽप्य-कर्मभूमिषु संहृता अकर्मभूमिकेति व्यवह्रियते, तत्क्षेत्रबन्धभावात्, यथा लोके कश्चिन्मगधादिशे-शात्सुराष्ट्रान् प्रति प्रस्थितो गिरिनगरेषु निवासं कल्पयितुकामः सुराष्ट्रपर्यन्तग्रामप्राप्तः सन् समुत्पद्यमानेषु तथाविधेषु प्रयोजनेषु सौराष्ट्र इति व्यवह्रियते, तद्वदधिकृताऽपि, तत्र च संहृता सती काचिदन्तर्मुहूर्त्तं जीवति ततोऽपि वा भूयोऽपि संह्रियते काचित्पूर्वकोट्यायुष्का यावज्जीवमपि तत्रावतिष्ठते ततो जघन्यतोऽन्तर्मूहूर्त्तमुक्तमुत्कर्षतो देशोना पूर्वकोटीति ।

आह-भरतैरावतान्यपि कर्मभूमौ वर्त्तन्ते तत्र चैकान्तसुषमादौ त्रीण्यपि पल्योपमानि स्थितिरस्या भवति संहरणं च संभवति तत्कथं देशोना पूर्वकोटी भण्यते ? इति, अत्रोच्यते, कर्मकालविवक्षयाऽभिधानात्, तस्य चैतावन्मात्रत्वादिति । हैमवतहैरण्यवताकर्मभूमिक-मनुष्यस्त्रीणां जन्मतो जघन्येन देशोनं पल्योपमं पल्योपमासङ्ख्येयभागेन न्यूनमुत्कर्षतः परिपूर्णं पल्योपमं, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भावना प्रागिव ॥ एवं 'हरिवासरम्मए' इत्याद्यपि सूत्रत्रयं भावनीयं, नवरं हरिवर्षरम्यकयोर्जन्मतो जघन्येन द्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पल्योपमे पल्योपमासङ्खयेयभागन्यूने उत्कर्षतः परिपूर्णे द्वे पल्योपमे।

देवकुरूत्तरकुरुषु जन्मतो जघन्येन त्रीणि पल्योपमानि पल्योपमासङ्खयेयभागहीनानि उत्कर्षतः परिपूर्णानि त्रीणि पल्योपमानि, अन्तरद्वीपेषु जन्मतो जघन्येन देशोनः पल्योपमासङ्खयेयभागः, कियता देशेनोनः पल्योपमासङ्खयेयभाग ? इति चेदत आह–पल्योपमासङ्खयेयभागेनोनः, किमुक्तं भवति ? –उत्कृष्टपल्योपमासङ्खयेयभागप्रमाणादायुषो जघन्यमायुः पल्योपमासङ्खयेयभागन्यूनं, नवरमूनताहेतुः पल्योपमासङ्खयेयो भागोऽतीव स्तोको द्रष्टव्यः, संहरणमधिकृत्य सर्वत्रापि जघन्यत उत्कर्षतश्च तावदेव प्रमाणम्। सम्प्रति देवीस्त्रवक्तव्यतामाह–

अक्षरगमनिका सुगमा तात्पर्यमात्रमुच्यते–देवस्त्रीणां सामान्यतो जघन्यतः स्थितिर्दश वर्षसहस्राणि, तानि च भवनपतिव्यन्तरीरधिकृत्य वेदितव्यानि, उत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि, एतानि चेशानदेवीरधिकृत्य प्रतिपत्तव्यानि। विशेषचिन्तायां भवनवासिदेव्यः सामान्यतो दश वर्षसहस्राणि, उत्कर्षतोऽर्द्धपञ्चमानि–सार्द्धानि चत्वारि पल्योमानि, एतानि च भवनवासिविशेषासुरकुमारदेवीरधिकृत्य, अत्रापि विशेषचिन्तायामसुर- कुमारदेवीनां सामान्यतो जघन्येन दश वर्षसहस्राणि उत्कर्षतोऽर्द्धपञ्चमानि पल्योपमानि, नागकुमारभवनवासिदेवस्त्राणां जघन्यतो दश वर्षसहस्राणि उत्कर्षतो देशोनं पल्योपमम्, एवं शेषाणां यावत्स्तनितकुमारीणां, व्यन्तरीणा जघन्यतो दश वर्षसहस्राणि उत्कर्षतोऽर्द्धं पल्योपमं

ज्योतिषस्त्रीणां जघन्येनाष्टभागपल्योपममुत्कर्षतोऽर्द्धपल्योपमं पञ्चाशता वर्षसहस्रारभ्यधिकम्, अत्रापि विशेषचिन्तायां चन्द्रविमानवासिज्योतिषस्त्रीणां जघन्यतश्चतुर्भागमात्रं पल्योपममुत्कर्षतोऽर्द्धपल्योपमं पञ्चाशता वर्षसहस्रारधिकं, सूर्यविमानवासिज्योतिष्कदेवीनां जघन्यतश्चतुर्भागमात्रं पल्योपममुत्कर्षतोऽर्द्धपल्योपमं वर्षशतपञ्चकाभ्यधिकं, ग्रहविमानवासिज्योतिष्कदेवीनां जघन्यतश्चतुर्भागमात्रं पल्योपमं उत्कर्षतोऽर्द्धपल्योपमं, नक्षत्रविमानज्योतिष्कदेवीनां जघन्यतश्चतुर्थभागमात्रं पल्योपममुत्कर्षतः सातिरेकं चतुर्थभागमात्रं पल्योपमं, ताराविमानज्योतिष्कदेवीनां जघन्यतोऽष्टभागमात्रं पल्योपममुत्कर्षतस्तदेवाष्टभागमात्रं पल्योपमं सातिरेकं

सामान्यतो वैमानिकदेवीस्त्रीणां जघन्यतः पल्योपममुत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि, विशेषचिन्तायां सौधर्मकल्पवैमानिकदेवीनां जघन्यतः पल्योपममुत्कर्षतः सप्त पल्योपमानि, अत्रापीदं स्थितिपरिमाणं परिगृहीतदेवीनामवगन्तव्यं, अपरिगृहीतदेवीनां जघन्यतः पल्योपममुत्कर्षतः पञ्चाशत्पल्योपमानि, ईशानकल्पवैमानिकदेवीनां जघन्यतः सातिरेकं पल्योपमुत्कर्षतो नव पल्योपमानि, अत्रापीदं स्थितिपरिमाणं परिगृहीतदेवीनामवगन्तव्यं, अपरिगृहीदेवीनां जघन्यतः सातिरेकं पल्योपममुत्कर्षतः पञ्चपञ्चाशत्पल्योपमानि, एतच्च सूत्रं समस्तमपि क्वापि साक्षाद् दृश्यते कचिन्नैवमतिदेशः– "एवं देवीणं ठिई भाणियव्वा जहा पन्नवणाए जाव ईसाणदेवीण" मिति

सम्प्रति स्त्री नैरन्तर्येण स्त्रीत्वमभुञ्चन्ती कियन्तं कालमवतिष्ठते ? इति जिज्ञासायां सूत्रकृत्तत्कालापेक्षया ये पञ्चादेशाः प्रवर्त्तन्ते तानुपदर्शयितुमाह–

मू. (५६) *इत्थी णं भंते ! इत्थित्ति कालतो केवचिरं होइ ?, गोयमा ! एक्केणादेसेणं जहन्नेणं एक्कं समयं उक्कोसं दसुत्तरं पलिओवमसयं पुव्वकोडिपुहुत्तमब्भहियं। एक्केणादेसेणं जहन्नेणं एक्कं समयं उक्कोसेणं अट्ठारस पलिओवमाइं पुव्वकोडीपुहुत्तमब्भहियाइं। एक्केणादेसेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहन्नेणं एक्कं समयं उक्कोसेणं चउद्दस पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं। एक्केणादेसेणं जह० एक्कं समयं उक्को० पलिओवमसयं पुव्वकोडीपुहुत्तमब्भहियं। एक्केणादेसेणं जहन्नं एक्कं समयं उक्को० पलिओवमपुहुत्तं पुव्वकोडीपुहुत्तमब्भहियं। तिरिक्खजोणित्थी णं भंते ! तिरिक्खजोमित्थिति कालओ केवच्चिरं होति ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडी पुहुत्तमब्भहियाइं,, जलयरीए जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडिपुहुत्तं

चउप्पदथलयरतिरिक्खजो० जहा ओहिता तिरिक्ख०, उरगपरिसप्पीभुयगपरिसप्पित्थी णं जधा जलयरीणं, खहयरि० जहन्नेणं अंतोमुहुत्तं उक्को० पलिओवमस्स असंखेज्जतिभागं पुव्वकोडिपुहुत्तमब्भहियं।

मणुस्सित्थी णं भंते ! कालओ केवच्चिरं होति ?, गोयमा ! खेत्तं पडुच्च जहन्नेणं अंतोमुहुत्तं उक्को० तिन्नि पलिवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी, एवं कम्मभूमियावि भरहेरवयावि, नवरं खेत्तं पडुच्च जह० अंतो उक्को० तिन्नि पलिओवमाइं देसूणपुव्वकोडीअब्भहियाइं, धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी। पुव्वविदेहअवरविदेहित्थी णं खेत्तं पडुच्च जह० अंतो० उक्को० पुव्वकोडीपुहुत्तं, धम्मचरणं पडुच्च जह० एक्कं समयं उक्कोसेणं देसूणा पुव्वकोडी ॥

अकम्मभूमिकमणुस्सित्थी णं भंते ! अकम्मभूम० कालओ केवच्चिरं होइ ? गोयमा ! जम्मणं पडुच्च जह० देसूणं पलिओवमं पलिओवमस्स असंखेज्जतिभागेणं ऊणं उक्को० तिन्नि पलिओवमाइं। संहरणं पडुच्च जह० अंतो० उक्कोसेणं तिन्नि पलिओवमाइं देसूणाए पुव्वकोडिए अब्भहियाइं। हिमवतेरण्णवते अकम्मभूमगमणुस्सित्थीणं भंते ! हेम० कालतो केवच्चिरं होइ ?, गोयमा ! जम्मणं पडुच्च जह० देसूणं पलिओवमं पलिओवमस्स असंखेज्जतिभागेणं ऊणगं, उक्को० पलिओवमं। साहरणं पडुच्च जह० अंतोमु० उक्को० पलिओवमं देसूणाए पुव्वकोडीए अब्भहियं।

हरिवासरम्मयअकम्मभूमगमणुस्सित्थी णं भंते !, जम्मणं पडुच्च जह० देसूणाइं दो पलिओवमाइं पलिओवमस्स असंखेज्जतिभागेण ऊणगाइं, उक्को० दो पलिओवमाइं। संहरणं पडुच्च जह० अंतोमु० उक्को० दो पलिओवमाइं देसूणपुव्वकोडिमब्भहियाइं।

उत्तरकुरुदेवकुरूणं०, जम्मणं पडुच्च जहन्नेणं देसूणाइं तिन्नि पलिओवमाइं पलितोवमस्स असंखेज्जभागेणं ऊणगाइं उक्को० तिन्नि पलिओवमाइं। संहरणं पडुच्च जह० अंतोमु० उक्क० तिन्नि पलिओवमाइं देसूणाए पुव्वकोडिए अब्भहियाइं। अंतरदीवाकम्मभूमकमणुस्सित्थी ?, २ जम्मणं पडुच्च जह० देसूणं पिलओवमस्स असंखेज्जतिभागंपलिओवमस्स असंखेज्जतिभागेण ऊणं उक्को० पलिओवमस्स असंखेज्जतिभागं। साहरणं पडुच्च जह० अंतोमु० उक्को० पलिओवमस्स असंखेज्जतिभागं देसूणाए पुव्वकोडीए अब्भहियं।

देवित्थी णं भंते ! देवित्थित्ति काल०, जच्चेव संचिट्ठणा ॥

वृ. एकेनादेशेन जघन्यत एकं समयं यावदवस्थामुत्कर्षतो दशोत्तरं पल्योपमशतं पूर्वकोटीपृथक्त्वाभ्यधिकम्, एकसमयं कथम् ? इति चेदुच्यते—काचिद् युवतिरुपशमश्रेण्यां वेदत्रयोपशमनादवेदकत्वमनुभूय ततः श्रेयेः प्रतिपन्ती स्त्रवेदोदयमेकं समयमनुभवति, ततो द्वितीये समये कालंकृत्वा देवेषूत्पद्यते तत्र च तस्याः पुंसत्वमेव न स्त्रत्वं, तत एवं जघन्यतः

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

स्त्रीत्वं समयमात्रं, सम्प्रति पूर्वकोटिपृथक्त्वाभ्यधिकदशोत्तरपल्योपमशतभावना क्रियते।

कश्चिज्जन्तुर्नारीषु तिरश्चीषु वा पूर्वकोटयायुष्कासु मध्ये पञ्चषान् भवाननुभूय ईशाने कल्पे पञ्चपञ्चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोत्पद्यते ततः स्वायुःक्षये तस्मात्स्थानाद् भूयोऽपि नारीषु तिरश्चीषु वा मध्ये पूर्वकोट्यायुष्षुरुत्पन्नस्ततो भूयो द्वितीयं वारमीशानदेवलोके पञ्चपञ्चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोपजातस्ततः परमवश्यं वेदान्तरमवगच्छति, एवं दशोत्तरं पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकं प्राप्यते, अत्र पर आह—ननु यदि देवकुरूत्तरकुर्वादिषु पल्योपमत्रयस्थितिकासु स्त्रीषु मध्ये समुत्पद्यते ततोऽधिकाऽपि स्त्रीवेदस्यावस्थितिर्लभ्यते, ततः किमित्येतावदेवोपदिष्ट ?, तदयुक्तम्, अभिप्रायापरिज्ञानात्, तथाहि—न तावद्देवीभ्यश्च्युत्वाऽसङ्ख्येयवर्षायुष्कासु स्त्रीषु मध्ये स्त्रीत्वेनोत्पद्यते, देवयोनेश्च्युतानामसङ्ख्येयवर्षायुष्केषु मध्ये उत्पादप्रतिषेधात्, नाप्यसङ्ख्येयवर्षायुष्का सती उत्कृष्टायुष्कासु देवीषु जायते, यत उक्तं प्रज्ञापनामूलटीकायाम्—

''जतो असंखेज्जवासाउया उक्कोसियं ठिइं न पावेइ'' इति, ततो यथोक्तप्रमाणैव स्त्रीवेदस्योत्कृष्टाऽवस्थितिरवाप्यते। द्वितीयेनादेशेन जघन्यत एकं समयमुत्कृष्टतोऽष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यदिकानि, तत्र समयभावना सर्वत्रापि प्राग्वत्, अष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि एवं—नारीषु तिरश्चीषु वा पूर्वकोटीप्रमाणायुष्कासु मध्ये कश्चिज्जन्तुः पञ्चषान् भवाननुभूय पूर्वप्रकारेणेशानदेवलोके वारद्वयमुत्कृष्टस्थितिकासु देवीषु मध्ये समुत्पद्यमानो नियमतः परिगृहीतास्वेवोत्पद्यते नापरिगृहीतासु, तत एवं द्वितीयादेशवादिमतेन स्त्रीवेदस्योत्कृष्टमवस्थानमष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वं च। तृतीयेनादेशेन जघन्यत एकं समयमुत्कर्षतश्चतुर्दश पल्योपमानि पूर्वकोटिपृथक्त्वा- भ्यधिकानि, तानि चैवं— पूर्वप्रकारेण सौधर्मदेवलोके परिगृहीतदेवीषु सप्तपल्योपमप्रमाणोत्कृष्टायुष्कासु मध्ये वारद्वयं समुत्पद्यते तत्र एवं तृतीयादेशवादिमतेन स्त्रीवेदस्योत्कृष्टमवस्थानं चतुर्दश पल्योपमानि पूर्वकोटिपृथक्त्वं च। चतुर्थेनादेशेन जघन्यत एकं समयमुत्कर्षतः पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकं, कथम् ? इति चेदुच्यते, नारीषु तिरश्चीषु वा पूर्वकोटयायुष्कासु पञ्चषान् भवाननुभूय पूर्वप्रकारेण सौधर्मदेवलोके पञ्चाशत्पल्योपमप्रामाणोत्कृष्टायुष्कास्व- परिगृहीतदेवीषु मध्ये देवीत्वेनोत्पद्यते, तत एवं चतुर्थादेशवादिमतेन पल्योपमशतं पूर्वकोटि- पृथक्त्वाभ्यधिकं भवति।

पञ्चमेनादेशेन जघन्यत एवं समयमुत्कर्षतः पल्योपमपृथक्त्वं पूर्वकोटिपृथक्त्वाभ्यधिकं, तच्चैवं—नारीषु तिरश्चीषु वा पूर्वकोटयायुष्कासु मध्ये सप्त भवाननुभूयाष्टमभवे देवकुर्वादिषु त्रिपल्योपमस्थितिकासु स्त्रीषु मध्ये स्त्रीत्वेन समुत्पद्यते, ततो मृत्वा सधर्मदवलोके जघन्यस्थितिकासु देवीषु मध्ये देवीत्वेनोपजायते, तदनन्तरं आवश्यं वेदान्तरमधिगच्छति, ततः पञ्चमादेशवादिमतेन स्त्रीवेदस्यावस्थानं पूर्वकोटिपृथक्त्वाभ्यधिकं सपल्योपमपृथक्त्वं, ते ह्येवमाहुर्नानाभवप्रमाणद्वारे—यदि स्त्रीवेदस्योत्कृष्टमवस्थानं चिन्त्यते तत इत्थमेतावदेव लभ्यते, नाधिकमन्यथा चेति।

अमीषां च पञ्चानामादेशानामन्यतमादेशमीचीनतानिर्णयोऽतिशयज्ञानिभिः सर्वोत्कृष्टश्रुतलब्धिसंपन्नैर्वा कर्तुं शक्यते, ते च सूत्रकृत्प्रतिपत्तिकाले नासीरन्निति सूत्रकृन्न निर्णयं कृतवानिति तदेवं सामान्यतः स्त्रीस्त्रीत्वं नैरन्तर्येणामुञ्चन्ती यावन्तं कालमवतिष्ठते तावत्काल प्रमाणमुक्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ इदानीं तिर्यक्स्त्रियास्तिर्यकस्त्रीत्वमजहत्याः कालमानं विचिन्तयिषुरिदमाह—

'तिरिक्खजोणिइत्थिए णं भंते !, इत्यादि, तिर्यकस्त्री णमिति वाक्यालङ्कारे भदन्त ! तिर्यक्स्त्रीति कालतः कियच्चिरं भवति ?, भगवनाह—गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तत्रान्तर्मुहूर्त्तं कस्याश्चित्तावत्प्रमाणायुष्कतया तदनन्तरं मृत्वा वेदान्तराधिगमाद्विलक्षणमनुष्यभवान्तराधिगमाद्वा, कथमुत्कर्षतस्त्रिणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि ? इति चेदुच्यते—इह नराणां तिरश्चां चोत्कर्षतोऽष्टौ भवाः प्राप्यन्ते नाधिकाः। "नरतिरियाणं सत्तट्ठभवा" इति वचनात्, तत्र सप्त भवाः सङ्ख्येयवर्षायुषोऽष्टमस्त्व-सङ्ख्येयवर्षायुरेव, तथाहि—पर्याप्तमनुष्याः पर्याप्तसंज्ञिपञ्चेन्द्रियतिर्यञ्चो वा निरन्तरं यथासङ्ख्यं सप्त पर्याप्तमनुष्यभवान् सप्त पर्याप्तसंज्ञिपञ्चेन्द्रियतिर्यगभगवान् वाऽनुभूय यद्यष्टमे भवे भूयः पर्याप्तमनुष्याः पर्याप्तसंज्ञिपञ्चेन्द्रियतिर्यञ्चो वा समुत्पद्यन्ते ततो नियमादसङ्ख्येयवर्षायुष एव न सङ्ख्येयवर्षायुषः, असङ्ख्येयवर्षायुषश्च मृत्वा नियमतो देवलोकेषूत्पद्यन्ते, ततो नवमोऽपि मनुष्यभवः संज्ञिपञ्चेन्द्रियतिर्यग्भवो वा निरन्तरं न लभ्यते, अत एव च पाश्चात्याः सप्त भवा निरन्तरं भवन्तः सङ्ख्येयवर्षायुष एवोपपद्यन्ते नैकोऽप्यसङ्ख्येयवर्षायुः, असङ्ख्येयवर्षायुर्भवानन्तरं भूयो मनुष्यभवस्य तिर्यग्भवस्य वाऽसम्भवात्, तत्र यदा उत्कर्षतस्तिर्यक्स्त्रीवेदसहिताः पाश्चात्याः सप्तापि भवा पूर्वकोटयायुषो लभ्यन्ते अष्टमस्तु भवो देवकुर्वादिषु तदा भवन्त्युत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि तिर्यकस्त्रीत्वस्यावस्थानम्।

अत्रैव विशेषचिन्तां चिकीर्षुराह—'जलयरीए' इत्यादि, जलचर्या स्त्रीया जलचरस्त्रीत्वेन निरन्तरं भवन्त्या जघन्यतोऽवस्थानमन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं, सप्तपूर्वकोटयायुर्भ-वानन्तरं जलचरस्त्रीणामवश्यं जलचरस्त्रीत्वच्युतिभावात्, 'चउप्पयथलयरीए जहा ओहियाए' इति, चतुष्पदस्थलचरस्त्रया यथा औधिक्यास्तिर्यकस्त्रिया उक्तं तथा द्रष्टवंय, तच्चैवम्—जघन्यतोऽ-न्तर्मुहूर्त्तं तत ऊर्ध्वं तद्भावपरित्यागसम्भवात्, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वा-भ्यधिकानि, तानि च प्रागिव भावनीयानि।

उरःपरिसर्पस्थलचरस्त्रिया भुजपरिसर्पस्थलचरस्त्रीयाश्च यथा जलचरस्त्रियास्तथा वक्तव्यं, तच्चैवं—जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं तच्च पूर्ववद्भावनीयम्। खचरस्त्रिया जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासङ्ख्येयभागः पूर्वकोटिपृथकत्वाभ्यधिक उत्कर्षतोऽ-वस्थानमिति।तदेवमुक्तं तिर्यक्स्त्रियाः सामान्यतोविशेषतश्च अवस्थानमानं, सम्प्रति मनुष्यस्त्रीया आह—

'मणुस्सित्थियाए' इत्यादि, मनुष्यस्त्रयाः सामान्यतो यथा औधिक्यास्तिर्यक्स्त्रियाः, तच्चैवं—जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रिणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तानि च सामान्यतस्तिर्यक्स्त्रीवद्भावनीयानि। कर्मभूमकमनुष्यस्त्रयः क्षेत्रं प्रतीत्य सामान्यतः कर्मक्षेत्र-मधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तं, तत ऊर्ध्वं तद्भावपरित्यागसम्भवात्, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तत्र सप्त भवा महाविदेहेषु अष्टमो भवो भरतैरावतेष्वेकान्तसुषमादौ त्रिपल्योपमप्रमाण इति। 'धर्मचरणं प्रतीत्य' चारित्रासेवनमाश्रित्य जघन्येनैकं समयं, सर्वविरति-परिणामस्य तदावरणकर्मक्षयोपशमवैचित्र्यतः समयमेकं सम्भवात्, तत ऊर्ध्वं मरणतः प्रतिपात-भावात्, उत्कर्षतो देशोना पूर्वकोटी, समग्रचरणकालस्योत्कर्षतोऽप्येतावन्मात्रप्रमाणत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भरतैरावतकर्मभूमकमनुष्यस्त्रियाः स्त्रत्वं 'क्षेत्रं प्रतीत्य' भरताद्येवाश्रित्य जघन्येनान्तर्मुहूर्त्त तच्च प्राग्वद्भावनीयम्, उत्कर्षतस्त्रीणि पल्योपमानि देशोनया पूर्वकोट्याऽभ्यधिकानि, तानि चैवं–पूर्वविदेहमनुष्यस्त्री अपरविदेहमनुष्यस्त्री वा पूर्वकोटयायुष्का केनापि भरतादावेकान्तसुषमादौ संहृता, सा च यद्यपि महाविदेहक्षेत्रोत्पन्ना तथाऽपि प्रागुक्तामागधपुरुषदृष्टान्तबलेन भारत्यैरावतीया वेति व्यपदिश्यते, ततः सा भारत्यादिव्यपदेशं प्राप्ता पूर्वकोटिं जीवित्वा स्वायुःक्षयतस्तत्रैव भरतादावेकान्तसुषमाप्रारम्भे समुत्पन्ना, तत एवं देशोनपूर्वकोटयभ्यधिकं पल्योपमत्रयमिति

धर्मचरणं प्रतीत्य कर्मभूमिजस्त्रिया इव भावनीयं, जघन्यत एकं समयमुत्कर्षतो देशोनां पूर्वकोटीं यावत्, पूर्वविदेहापरविदेहकर्मभूमिजमनुष्यस्त्रियास्तु क्षेत्रमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तं, तच्च सुप्रतीतं, प्राग्भावितत्वात्, उत्कर्षतः पूर्वकोटिपृथक्त्वं, तत्रैव भूय उत्पत्त्या, धर्मचरणं प्रतीत्य समागतकर्मभूमिजस्त्रिया इव वक्तव्यं, जघन्यत एवं समयमुत्कर्षतो देशोनां पूर्वकोटिं यावदिति भावार्थः ॥ उक्ता सामान्यतो विशेषतश्च कर्मभमूकमनुष्यस्त्रीवक्तव्यता, साम्प्रतमकर्मभूमकमनुष्यस्त्रीवक्तव्यतां चिकीर्षु प्रथमतः सामान्येनाह–

'अकम्मभमूगमणुस्सित्थी णं भंते!' इत्यादि, अकर्मभूमकमनुष्यस्त्र, णमिति वाक्यालङ्कारे, अकर्मभूमिकमनुष्यस्त्रीति कालतः कियच्चिरं भवति?, भगवानाह–गौतम! 'जन्म' तत्रैव सम्भूतिलक्षणं 'प्रतीत्य' आश्रित्य जघन्येन पल्योपमं देशोनं, अष्टभागाद्यूनमपि देशोनं भवति ततो विशेषस्थापनायाह–पल्योपमस्यासङ्ख्येयभागोनं जघन्यतः उत्कर्षतस्त्रीणि पल्योपमानि, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमन्तर्मुहूर्त्तायुःशेषायाः संहृतिभावात्, उत्कर्षेण त्रीणि पल्योपमानि देशोनया पूर्वकोटयाऽभ्यधिकानि, कथम्? इति चेदुच्यते–काचित्पूर्वविदेहमनुष्यस्त्र अपरविदेहमनुष्यस्त्री वा देशोनपूर्वकोटयायुःसमन्विता देवकुर्वादौ संहृता, सा च पूर्वदृष्टान्तबलेन देवकुर्वादिका जाता, ततः सा देशोनां पूर्वकोटिं जीवित्वा मृत्वा च तत्रैव त्रिपल्योपमायुष्का समजनि, तत एवं देशोनपूर्वकोट्यधिकं पल्योपमत्रयमिति, अनेन संहरणतो जघन्योत्कृष्टावस्थानकालमानप्रदर्शनेन न्यूनान्तर्मुहूर्त्तायुःशेषाया गर्भस्त्रया वा न संहरणमिति प्रतिपादितम्, अन्यथा जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षचिन्तायां पूर्वकोटया देशोनता न स्यादिति।

अकर्मभूमिकमनुष्यस्त्रविषयामेव विशेषचिन्तां करोति–'हेमवये'त्यादि, हैमवतैरण्यवतहरिवर्षरम्यकवर्षदेवकुरूत्तरकुर्वन्तरद्वीपिकाणां जन्म प्रतीत्य या यस्याः स्थितिस्ततस्तस्या अवस्थानं वाच्यं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो या यस्या उत्कष्टा स्थिति सा तस्या देशोनया पूर्वकोट्याऽभ्यधिका वक्तव्या, सा चैवं–हैमवतैरण्यवतयोर्मनुष्यस्त्री जन्म प्रतीत्य जघन्येन पल्योपमं पल्योपमासङ्ख्येयभागन्यूनम्, उत्कर्षतः परिपूर्णं पल्योपमं, संहरणमधिकृत्य जघन्येनान्तर्मुहूर्त्तम्, अन्तर्मुहूर्त्तायुःशेषाया एव संहरणभावात्, उत्कर्षतः पल्योपमं देशोनया पूर्वकोटयाऽभ्यधिकं, तच्च देशोनपूर्वकोटयायुःसमन्वितायास्तत्र संहरणे तत्रैव च मृत्वोत्पन्नाया भावनीयम्।

हरिवर्षरम्यकयोर्जन्म प्रतीत्य जघन्येन पल्योपमासङ्ख्येयभागन्यूने द्वे पल्योपमे, उत्कर्षतः परिपूर्णे द्वे पल्योपमे। संहरणं प्रतीत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोनया पूर्वकोटयाऽभ्यधिके द्वे पल्योपमे, भावना प्रागिव। देवकुरूत्तरकुरुषु जन्म प्रतीत्य जघन्यतः पल्योपमासंख्येयभागन्यूनानि त्रीणि पल्योपमानि, उत्कर्षतस्त्रीणि पल्योपमानि।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतस्त्रीणि पल्योपमानि देशोनया पूर्वकोटयाऽभ्यधिकानि। अन्तरद्वीपेषु जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनं पल्योपमासङ्ख्येयभागं यावत् उत्कर्षतः पल्योपमासङ्ख्येयभागम्, एतावत्प्रमाणस्य तत्र जघन्यत उत्कर्षतश्च मनुष्याणामायुषः सम्भवात्, मरणान्तरं च देवयोनावुत्पादात्। संहरणमधिकृत्य जघन्येनान्तर्मुहूर्तमुत्कर्षतो देशोनया पूर्वकोटयाऽभ्यधिकं पल्योपमासङ्ख्येयभागं यावत्, भावनाऽत्र प्रागिव।। उक्ता सामस्त्येन मनुष्यस्त्रीवक्तव्यता, सम्प्रति देवस्त्रीवक्तव्यतामाह–

'देवित्थीण'मित्यादि, देवीनां तथाभवस्वभावतया कायस्थितेरसम्भवात् यैव प्राक् सामान्यतो विशेषतश्च भवस्थितिरुक्ता 'सेव संचिट्ठणा भाणियव्वा' तदेवावस्थानं वक्तव्यम्, अभिलापश्च 'देवित्थी णं भंते! देवित्थीति कालतो केवच्चिरं होइ ?' इत्यादिरूपः सुधिया परिभावनीयः।

तदेवमुक्तं सामान्यतो विशेषतश्च स्त्रीत्वस्यावस्थानकालमानम्, इदानीमन्तरद्वारमाह–

मू. *(५७) इत्थीणं भंते! केवतियं कालं अंतरं होति ?, गोयमा! जह० अंतोमु० उक्को० अनंतं कालं, वणस्सतिकालो, एवं सव्वासिं तिरिक्खित्थीणं। मणुस्सित्थीए खेत्तं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो, धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० अनंतं कालं जाव अवड्ढपोग्गल- परियट्टं देसूणं, एवं जवा पुव्वविदेहअवरविदेहियाओ।*

अकम्मभूमगमणुस्सित्थीणं भंते! केवतियं कालं अंतरं होति ?, गोयमा! जम्मणं पडुच्च जहन्नं दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं, उक्को० वणस्सतिकालो, संहरणं पडुच्च जह० अंतोमु० उक्को० वणस्सतिकालो, एवं जाव अंतरदीवियाओ।

देवित्थियाणं सव्वासिं जह० अंतो० उक्को० वणस्सतिकालो।।

वृ. स्त्रिया भदन्त! अन्तरं कालतः कियच्चिरं भवति ?, स्त्री भूत्वा स्त्रीत्वाद् भ्रष्टा सती पुनः कियता कालेन स्त्री भवतीत्यर्थः, एवं गौतमेन प्रश्ने कृते सति भगवानाह–गौतम! जघन्येनान्तर्मुहूर्त्तं, कथमिति चेदुच्यते–इह काचित्स्त्री स्त्रीत्वान्मरणेन च्युत्वा भवान्तरे पुरुषवेदं नपुंसकवेदं वाऽन्तर्मुहूर्तमनुभूय ततो मृत्वा भूयः स्त्रीत्वेनोत्पद्यते तत एव जघन्यतोऽन्तमन्तर्मुहूर्त्तं भवति, उत्कर्षतो वनस्पतिकालः–असङ्ख्येयपुद्गलपरावर्त्ताख्यो वक्तव्यः, तावता कालेनामुक्तौ सत्यां नियोगतः स्त्रीत्वयोगात्, स च वनस्पतिकाल एवं वक्तव्यः।

"अनंताओ उस्सप्पिणीओसप्पिणीओ कालओ, खेत्तओ अनंता लोगा, असंखेज्ञा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्ञइभागो" इति, एवमौधिकतिर्यक्स्त्रीणां जलचरस्थलचरखचरस्त्रीणामौघिकमनुष्यस्त्रीणां च जघन्यत उत्कर्षतश्चान्तरं वक्तव्यम्, अभिलापोऽपि सुगमत्वात्स्वयं परिभावनीयः कर्मभूमिकमनुष्यस्त्रियाः क्षेत्रं–कर्मभूमिक्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतोऽनन्तं कालं वनस्पतिकालप्रमाणं यावत्, धर्मचरणं प्रतीत्य जघन्येनैकं समयं, सर्वजघन्यस्य समयत्वात्, उत्कर्षेणानन्तं कालं, देशोनमपार्द्धं पुद्गलपरावर्त्तं यावत्, नातो ह्यधिकतरश्चरणलब्धिपातकालः, संपूर्णस्याप्यपार्द्धपुद्गलपरावर्त्तस्य दर्शनलब्धिपातकालस्य सतत्र तत्र प्रदेशे प्रतिषेधात्। एवं भरतैरावतमनुष्यस्त्रियाः पूर्वविदेहापरविदेहस्त्रियाश्च क्षेत्रतो धर्मचरणं चाश्रित्य वक्तव्यम्।

अकर्मभूमकमनुष्यस्त्रिया जन्म प्रतीत्यान्तरं जघन्येन दश वर्षसहस्राण्यन्तर्मुहूर्त्ताभ्यधिकानि,

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

कथमिति चेदुच्यते—इह काचिदकर्मभूमिका स्त्र मृत्वा जघन्यस्थितिषु देवेषूत्पन्ना, तत्र दश वर्षसहस्राण्यायुः परिपाल्य तत्क्षये च्युत्वा कर्मभूमिषु मनुष्यपुरुषत्वेन मनुष्यस्त्रत्वेन वोत्पद्यते, देवेभ्योऽनन्तरकर्मभूमिषूत्पादाभावात्, अन्तर्मुहूर्त्तेन मृत्वा भूयोऽप्यकर्मभूमिजस्त्रीत्वेन जायत इति भवन्ति जघन्यतो दश वर्षसहस्राण्यन्तर्मुहूर्त्ताभ्यधिकानि, उत्कर्षतो वनस्पतिकालोऽन्तरं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तम्, अकर्मभूमिजस्त्रियाः कर्मभूमिषु संहृत्य तावता कालेन तथाविधबुद्धिपरावृत्या भूयस्तत्रैव नयनात्, उत्कर्षतो वनस्पतिकालोऽन्तरं, तावता कालेन कर्मभूम्युत्पत्तिवत् संहरणस्यापि नियोगतो भावात्, तथाहि—काचिदकर्मभूमिका कर्मभूमौ संहृता, सा च स्वायुःक्षयानन्तरमनन्तकालं वनस्पत्यादिषु संसृत्य भूयोऽप्यकर्मभूमौ समुत्पन्ना ततः केनापि संहृतेति यथोक्तं संहरणस्योत्कृष्टकालमानम्।

एवं हैमवतहैरण्यवतहरिवर्ष, रम्यकवर्षदेवकुरूत्तरकुर्वन्तरभूमिकानामपि जन्मतः संहरणतश्च प्रत्येकं जघन्यमुत्कृष्टं चान्तरं वक्तव्यम्, सूत्रपाठोऽपि सुगमत्वात्स्वयं परिभावनीयः

सम्प्रति देवस्त्रीणामन्तरप्रतिपादनार्थमाह—'देवित्थियाणं भंते!' इत्यदि, देवस्त्रिया भदन्त अनन्तरं कालतः कियच्चिरं भवति?, भगवानाह—गौतम! जघन्येनान्तर्मुहूर्त्त, कस्याश्चिद्देवस्त्रिया देवीभयाच्च्युताया गर्भव्युत्क्रान्तिकमनुष्येषूत्पद्य पर्याप्तिपरिसमाप्तिसमनन्तरं तथाऽध्यवसायमरणेन पुनर्देवत्वेनोत्पत्तिसम्भवात्, उत्कर्षतो वनस्पतिकालः, स च सुप्रतीत एव। एवमसुरकुमारदेव्या आरभ्य यावदीशानदेवस्त्रयामुत्कृष्टमन्तरं वक्तव्यं, पाठोऽपि सुगमत्वात्स्वयं परिभावनीयः।

सम्प्रत्यल्पबहुत्वं वक्तव्यं, तानि च पञ्च, तद्यथा—प्रथमं सामान्येनाल्पबहुत्वं विशेषचिन्तायां द्वितीयं त्रिविधतिर्यकस्त्रीणां तृतीयं त्रिविधमनुष्यस्त्रीणां चतुर्थं चतुर्विधदेवस्त्रीणां पञ्चमं मिश्रस्त्रीणां, तत्र प्रथममल्पबहुत्वमभिधित्सुराह—

मू. (५८) *एतासि णं भंते! तिरिक्खजोणित्थियाणं मणुस्सित्थियाणं देवित्थियाणं कतरा २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा मणुस्सित्थियाओ तिरिक्खजोणित्थियाओ असंखेज्जगुणआओ देवित्थियाओ असंखिज्जगुणाओ।*

एतासि णं भंते! तिरिक्खजोणित्थियाणं जलयरीणं थलयरीणं खहयरीण य कतरा २ हिंतो अप्पा वा बहुया तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवाओ खहयरतिरिक्खजोणित्थियाओ थलयरतिरिक्खजोणित्थियाओ संखेज्जगुणाओ जलयरतिरिक्ख० संखेज्जगुणाओ

एतासि णं भंते! मणुस्सित्थीणं कम्मभूमियाणं अकम्मभूमियाणं अंतरदीवियाण य कतरा २ हिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवाओ अंतरदीवगअकम्मभूमगमणुस्सित्थियाओ देवकुरूत्तरकुरुअकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखेज्जगु०, हरिवासरम्मयवासअकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखेज्जगु०, हेमवतेरण्णवासअकम्मभूमिगमणुस्सित्थ्याओ दोवि तुल्लाओ संखिज्जगु०, भरतेरवतवासकम्मभूमगमणुस्सि० दोवि तुल्लाओ संखिज्जगुणाओ, पुव्वविदेहअवरविदेहकम्मभूमगमणुस्सित्थियाओ दोवि तुल्लाओ संखेज्जगुणाओ।

एतासि णं भंते! देवित्थियाणं भवणवासीणं वाणमंतरीणं जोइसिणीणं वेमाणिणीय य कयरा २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा? गो० सव्वत्थोवाओ वेमाणियदेवित्थियाओ भवणवासिदे० असंखेज्जगुणाओ वाणमंतरदेवीयाओ असंखेज्जगुणाओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोतिसियदेवित्थियाओ संखेज्जगुणाओ ।। एतासि णं भंते ! तिरिक्खजोणित्थियाणं जलयरीणं थलयरीणं खहयरीणं मणुस्सित्थीयाणं कम्मभूमियाणं अकम्मभूमियाणं अंतरदीवियाणं देवित्थीणं भवणवासियाणं वाणमंतरीणं जोतिसियाणं वेमाणिणीण य कयराओ २ हिंतो अप्पा वा बहुआ वा तुल्ला वा विसे० ?, गो० ! सव्वत्थोवा अंतरदीवगअकम्मभूमगमणुस्सित्थियाओ देवकुरुउत्तर-कुरुअकम्मभूमग- मणुस्सित्थियाओ दोवि संखेज्जगुणाओ ।

हरिवासरम्मगवासअकम्मभूमगमणुस्सित्थियाओ दोऽवि संखेज्जगु०, हेमवतेरण्ण-वयवाअकम्मभूमग० दोऽवि संखेज्जगु०, भरहेरवतवासकम्मभूमगमणुस्सित्थीओ दोऽवि तुल्लाओ संखेज्जगु०, पुव्वविदेह अवरविदेहवासकम्मभूमगमणुस्सित्थि० दोऽवि संखेज्जगु० ।

वेमाणियदेवित्थियाओ असंखेज्जगु०, भवणवासिदेवित्थियाओ असंखेज्जगु०, खहयरतिरिक्खजोणित्थियाओ असंखेज्जगु०, थलयरतिरक्खजो० संखिज्जगु० । जलयरति-रक्खजो० खेज्जगुणाओ, वाणमंतरदेवि० संखेज्जगुणाओ जोइसियदो० संखेज्जगुणाओ ।।

वृ. सर्वस्तोका मनुष्यस्त्रियः, सङ्ख्यातकोटीप्रमाणत्वात्, ताभ्यस्तिर्यग्योनिकस्त्रियोऽ-सङ्ख्येयगुणाः, प्रतिद्वीपं प्रतिसमुद्रं तिर्यकस्त्रीणामतिबहुतया सम्भवात्, द्वीपसमुद्राणां चासङ्ख्येय-त्वात्, ताभ्योऽपि देवस्त्रियोऽसङ्ख्येयगुणाः, भवनवासिव्यन्तरज्योतिष्कसौधर्मेशानदेवीनां प्रत्येकसङ्ख्येयश्रेण्याकाशप्रदेशराशिप्रमाणत्वात् । द्वितीयमल्पबहुत्वमाह—

सर्वस्तोकाः खचरतिर्यग्योनिकस्त्रयः, ताभ्यः स्थलचरतिर्यग्योनि- कस्त्रयः सङ्ख्येयगुणाः, खचरेभ्यः स्थलचराणां स्वभावत एव प्राचुर्येण भावात्, ताभ्यो जलचरस्त्रियः सङ्ख्येयगुणाः, लवणे कालोदे स्वयम्भूरमणे च समुद्रे मत्स्यानामतिप्राचुर्येण भावात्, स्वयम्भूरमण- समुद्रस्य च शेषसमस्तद्वीपसमुद्रापेक्षयाऽतिप्रभूतत्वात् । उक्तं द्वितीयमल्पबहुत्वम् ।

अधुना तृतीयमाह—सर्वस्तोका अन्तरद्वीपकाकर्मभूमिकमनुष्यस्त्रियः, क्षेत्रस्याल्पत्वात्, ताभ्यो देवकुरूत्तरकुरुस्त्रियः सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात्, स्वस्थाने तु द्वय्योऽपि परस्परं तुल्याः, समानप्रमाणक्षेत्रत्वात्, ताभ्यो हरिवर्षरम्यकवर्षाकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः, देवकुरूत्तरकुरुक्षेत्रापेक्षया हरिवर्षम्यकक्षेत्रस्यातिप्रचुरत्वात्, स्वस्थानेऽपि द्वय्योऽपि परस्परं तुल्याः, क्षेत्रस्य समानत्वात्, ताभ्योऽपि हैमवतैरण्यवताकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः, क्षेत्रस्याल्पत्वेऽप्यल्पस्थितिकतया बहूनां तत्र तासां सम्भवात्, स्वस्थाने तु द्वय्योऽपि परस्परं तुल्याः, ताभ्योऽपि भरतैरावतकर्मभूमिकमनुष्यस्त्रियः सङ्ख्येयगुणाः, कर्मभमूतया स्वभावत एव तत्र प्राचुर्येण सम्भवात्, स्वस्थाने तु द्वय्योऽपि परस्परं तुल्याः, ताभ्योऽपि पूर्वविदेहापरविदेह-कर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः, क्षेत्रबाहुल्यादजितस्वामिकाल इव च स्वभावत एव तत्र प्राचुर्येण भावात्, स्वस्थाने तु द्वय्योऽपि परस्परं तुल्याः ।। उक्तं तृतीयमल्पबहुत्वम् ।

अधुना चतुर्थमाह—सर्वस्तोका वैमानिकदेवस्त्रियः, अङ्गुलमात्रक्षेत्रप्रदेशराशेर्यद् द्वितीयं वर्गमूलं तस्मिन् तृतीयेन वर्गमूलेन गुणिते यावत्प्र देशराशिस्तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशा द्वात्रिंशत्तमभागहीनास्तावत्प्रमाणत्वात्प्रत्येकं सौधर्मेशानदेवस्त्रीणां, ताभ्यो भवनवासिदेवस्त्रियोऽसङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेर्यत्प्रथमं वर्गमूलं तस्मिन् द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशराशिर्द्वात्रिंशत्तमभागहीनस्तावत्प्रमाणत्वात्, ताभ्यो व्यन्तरदेवस्त्रियोऽ- सङ्ख्येयगुणाः, सङ्ख्येययोजनप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेभ्योऽपि द्वात्रिंशत्तमे भागेऽपनीते यच्छेषमवतिष्ठते तावत्प्रमाणत्वात्तासां, ताभ्यः सङ्ख्यंय गुणा ज्योतिष्कदेवस्त्रियः, षट्पञ्चाशदधिकशतद्वयाङ्गुलप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेभ्यो त्तमे द्वात्रिंशंत्तमे भागेऽपसारिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणत्वात् उक्तं चतुर्थमल्पबहुत्वम् ।

इदानीं समस्तस्त्रीविषयं पञ्चममल्पमाह-सर्वस्तोका अन्तरद्वीपकाकर्मभूमकमनुष्यस्त्रियः, ताभ्यो देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः ताभ्योऽपि हरिवर्षरम्यकस्त्रियः सङ्ख्येयगुणाः ताभ्योऽपि हैमवतहैरण्यवतस्त्रियः सङ्ख्येयगुणाः ताभ्योऽपि भरतैरावतकर्मभूमकमनुष्यस्त्रियः सङ्ख्येयगुणाः ताभ्योऽपि पूर्वविदेहापरविदेहमनुष्यस्त्रियः सङ्ख्येयगुणाः, अत्र भावना प्राग्वत्, ताभ्यो वैमानिकदेवस्त्रियोऽसङ्ख्येयगुणाः, असङ्ख्येयश्रेण्याकाशप्रदेशराशिप्रमाणत्वात्तासां ताभ्यो भवनवासिदेवस्त्रियोऽसङ्ख्यातगुणाः, अत्र युक्ति प्रागेवोक्ता, ताभ्यः खचरति र्यग्योनिकस्त्रियोऽसङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणगताकाशप्रदेराशिपरमाणत्वा-त्तासांताभ्यः स्थलचरतिर्यग्गेस्त्रियोऽसङ्ख्येयगुणबृहत्तरप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् । ताभ्यो जलचरतिर्यग्योनिकस्त्रियः सङ्ख्येयगुणाः, बृहत्तमप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, ताभ्यो व्यन्तरदेवस्त्रियः सङ्ख्येयगुणाः, सङ्ख्येययोजनकोटाकोटीप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रते भवन्ति तेभ्यो द्वात्रिंशत्तमे भागेऽपहृते यावान् राशिरवतिष्ठते तावत्प्रमाणत्वात्, ताभ्योऽपि ज्योतिष्कदेवस्त्रियः सङ्ख्येयगुणाः, एतच्च प्रागेव भावितम् ।

इह स्त्रीत्वानुभावः स्त्रीवेदकर्मोदय इति स्त्रीवेदकर्मणो जघन्यत उत्कर्षतश्च स्थितिमानमाह

मू. (५९) *इत्थिवेदस्स णं भंते ! कम्मस्स केवइयं कालं बंधठिती पन्नत्ता ?, गोयमा ! जहन्नेणं सागरोवमस्स दिवड्ढो सत्तभागो उ पलिओवमस्स असंखेज्जतिभागेण ऊणो उक्को० पन्नरस सागरोवमकोडाकोडी, पन्नरस वाससयाइं अबाधा, अबाहूणिया कम्मठिती कम्मणिसेओ ।*

इत्थिवेदे णं भंते ! किंपगारे पण्णत्ते ?, गोयमा ! फुंफुअग्गिसमाणे पण्णत्ते, सेत्तं इत्थियाओ

वृ. 'स्त्रीवेदस्य' स्त्रीवेदनाम्नो णमिति वाक्यालङ्कारे भदन्त ! कर्मणः कियन्तं कालं बन्धस्थिति प्रज्ञप्ता ?, भगवानाह—गौतम ! जघन्येन सागोरपमस्य सार्द्धः सप्तभागः पल्योपमासङ्ख्येयभागन्यूनः, कथमिति चेदुच्यते—इह स्त्रीवेदादीनां कर्मणां स्वस्मात् २ उत्कृष्टस्थितिबन्धात् मिथ्यात्वसत्कया उत्कृष्टया स्थित्वा सप्ततिसागरोपमकोटाकोटीप्रमाणया भागे हृते यल्लभ्यते तत्पल्योपमासङ्'ख्येयभागन्यूनं जघन्यस्थिति ः।

"सेसाणुक्कोसाओ मिच्छत्तुक्कसएणं जं लद्धं" मित्यादिवचनप्रमाण्यात्, तत्र स्त्रीवेदस्योत्कृष्टः स्थितिबन्धः पञ्चदशसागरोपमकोटीकोटयः, तासां मिथ्यात्वस्थित्या भागो ह्रियते, शून्यं शून्येन पातयेत् जाता उपरि पञ्चदश अघस्तात्सप्तति अनयोश्च छेद्यच्छेदकरास्योर्दशभिरपवर्त्तना जात उपर्येकः सार्द्धः अधस्तात्सप्त आगतमेकसागरोपमस्य सार्द्धः सप्तभागः, पल्यपमासङ्ख्येयभागन्यूनः क्रियते, इयं च व्याख्या मूलटीकाऽनुसारेण कृता, पञ्चसङ्ग्रहमतेनापीदमेव जघन्यिथतिपरिमाणं केवलं पल्योपमासङ्खेययभागहीनं (न) वक्तव्यं, तन्मतेन "सेसाणुकसाओ मिच्छत्तठिईए जं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धं'' इत्येतावन्मात्रस्यैव जघन्यस्थित्यानयनस्य करणस्य विद्यमानत्वात्, कर्मप्रकृतिसङ्ग्रहणीकारस्त्वित्थं जघन्यस्थित्यानयनाय करणसूत्रमाह–

॥१॥ ''वग्गुकोसठिईणं मिच्छत्तुक्कोसेगेण जं लद्धं ।
सेसाणं तु जहन्नं पलियासंखेज्जगेणूणं ॥''

अस्याक्षरगमनिका–इह ज्ञानावरणीयप्रकृतिसमुदायो ज्ञानावरणीयवर्ग इत्युच्यते, दर्शनावरणीयप्रकृतिसमुदायो दर्शनावरणीयवर्गः, वेदनीयप्रकृतिसमुदायो वेदनीयवर्गः, दर्शनमोहनीयप्रकृतिसमुदायो दर्शनमहनीयवर्गः, चारित्रमोहनीयप्रकृतिसमुदायश्चारित्रमोहनीयवर्गः, नोकषायमोहनयप्रकृतिसमुदायो नोकषायमोहनीयवर्गः, नामप्रकृतिसमुदायो नामवर्गः, गोत्रप्रकृतिसमुदायो गोत्रवर्गः, अन्तरायप्रकृतिसमुदायोऽन्तरावर्गः, एतेषां वर्गाणां या आत्मीया आत्मीया उत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोटयादिका तस्या मिथ्यात्वसत्कया उत्कृष्टया स्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे हृते सति यल्लभ्यते तत्पल्योपमासङ्ख्येयभागन्यूनं सत् उक्तशेषाणां निद्रादीनां प्रकृतीनां जघन्यस्थितेः परिमाणमिति ।

ततस्तन्मतेन स्त्रीवेदस्य जघन्या स्थितिदर्द्धौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, तथाहि–नोकषायमोहनीयस्योत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोटयः, तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे ह्रियमाणे सून्यं शून्येन पातयेत् लब्धौ द्वौ सागरोपमस्य सप्तभागौ तौ पल्योपमासङ्ख्येयभागहीनौ क्रियेते इति ।

उत्कृष्ठा स्थिति पञ्चदशसागरोपमकोटीकोटयः, इह स्थितिर्द्विधाकर्मरूपताऽवस्थानलक्षणा अनुभवयोग्या च, तत्रेयं कर्मरूपताऽवस्थानलक्षणा द्रष्टव्या, अनुभवयोग्या पुनरबाधाहीना, (सा) च येषां कर्मणां यावत्यः सागरोपमकोटीकोट्यस्तेषां तावन्ति वर्षशतान्यबाधा, स्त्रीवेदस्य चाधिकृतस्योत्कृष्टा स्थिति पञ्चदश सागरोपमकोटीकोटयस्ततः पञ्चदश वर्षशतान्यबाधा, तथा चाह–

''पन्नरस वाससयाइं अबाहा'' इति किमुक्तं भवति ? – स्त्रीवेदकमं उत्कृष्टस्थितिकं बद्धं सत्वरुपेण पञ्चदश वर्षशतानि यावन्न जीवस्य स्वविपाकोदयमादर्शयति तावत्कालमध्ये दलिकनिषेकस्याभावात्, तथा चाह–''अबाहूणिया'' इत्यादि, 'अबाधोना' अबाधाकालपरिहीना कर्मस्थितिरनुभवयोग्येति गम्यते, यतः 'अबाधोनः' अबाधाकालपरिहीनः कर्मनिषेकः–कर्मदलिकरचनेति ।

सम्प्रति स्त्रीवेदकर्मोदयजनितो यः स्त्रीवेदः स किंस्वरूपः ? इत्यावेदयन्नाह–'इत्थिवए णं भंते!' इत्यादी, स्त्रीवेदो णमिति पूर्ववत् भदन्त! 'किं प्रकारः' किंस्वरूपः प्रज्ञप्तः ?, भगवानाह–गौतम ! फुम्फुकाग्निसमानः, फुम्फुकशब्दो देशीत्वात्कारीषवचनस्ततः कारीषाग्निसमानः परिमलनमदनदाहरूप इत्यर्थः, प्रज्ञप्तः ।

उपसंहारमाह–'सेत्तं इत्थियाओ' ॥ तदेवमुक्ताः स्त्रियः, सम्प्रति पुरुषप्रतिपादनार्थमाह–

मू. (६०) *से किं तं पुरिसा ?, पुरिसा तिविहा पन्नत्ता, तंजहा–तिरिक्खजोणियपुरिसा मणुस्सपुरिसा देवपुरिसा ॥ से किं तं तिरिक्खजोणियपुरिसा ?, २ तिविहा पन्नत्ता, तंजहा–जलयरा थलयरा खहयरा, इत्थिभेदो भाणितव्वो, जाव खहयरा, सेत्तं खहयरा सेत्तं खहयरतिरिक्खजोणियपुरसा । से किं तं मणुस्सपुरिसा ?, २ तिविधा पन्नत्ता, तंजहा–कम्मभूमगा अकम्मभूमगा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंतरदीवगा, सेत्तं मणुस्सपुरिसा ॥ से किं तं देवपुरिसा ?, देवपुरिसा चउव्विहा पण्णत्ता, इत्थीभेदो भाणितव्वो जाव सव्वट्ठसिद्धा ।

वृ. 'से किं तं पुरिसा' इत्यादि, अथ के ते पुरुषाः ?, पुरुषास्त्रिविधाः प्रज्ञप्ताः, तद्यथा-तिर्यग्योनिकपुरुषा मनुष्यपुरुषा देवपुरुषाश्च ॥ से किं तमित्यादि, अथ के ते तिर्यग्योनिकपुरुषाः ?, तिर्यग्योनिकपुरुषास्त्रिविधाः प्रज्ञप्तास्तद्यथा-जलचरपुरुषाः स्थलचरपुरुषाः खचरपुरुषाश्च । मनुष्यपुरुषा अपि त्रिविधास्तद्यथा-कर्मभूमका अकर्मभूमका अन्तरद्वीपकाश्च ।

देवसूत्रमाह-'से किं त'मित्यादि, अथ के ते देवपुरुषाः ?, देवपुरुषाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा-भवनवासिनो वानमन्तरा ज्योतिष्का वैमानिकाश्च, भवनपतयोऽसुरादिभेदेन दशविधा वक्तव्याः, वानमन्तराः पिशाचादिभेदेनाष्टविधाः, ज्योतिष्काश्चन्द्रादिभेदेन पञ्चविधाः, वैमानिकाः कल्पोपपन्नकल्पातीतभेदेन द्विविधाः, कल्पोपपन्नाः सौधर्मादिभेदेन द्वादशविधाः, कल्पातीता ग्रैवेयकानुत्तरोपपातिकभेदेन द्विविधाः, तथा चाह-"जाव अणुत्तरोववाइया" इति ।

उक्तो भेदः, सम्प्रति स्थितिप्रतिपादनार्थमाह-

***मू.* (६१)** *पुरिसस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जह०- अंतोमु० उक्को० तेत्तीसं सागरोवमाइं । तिरिक्खजोणियपुरिसाणं मणुस्साणं जा चेव इत्थीणं ठिती सा चेव भणियव्वा ॥ देवपुरिसाणवि जाव सव्वट्ठसिद्धाणं ति । ताव ठिती जहा पन्नवणाए तहा भा०*

वृ. 'पुरिसस्स णं भंते' इत्यादि, पुरुषस्य स्वस्वभवमजहतो भदन्त ! कियन्तं कालं यावत्स्थिति प्रज्ञप्ता ?, भगवानाह-जघन्यतोऽन्तर्मुहूर्त्तं, तत ऊर्ध्वं मरणभावात्, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, तान्यनुत्तरसुरापेक्षया द्रष्टव्यानि, अन्यस्यैतावत्याः स्थितेरभावात् । तिर्यग्योनिकानामौधिकानां जलचराणां स्थलचराणां खचराणां स्त्रिया या स्थितिरुक्ता तथा वक्तव्या, मनुष्यपुरुषस्याप्यौधिकस्य कर्मभूमिकस्य सामान्यतो विशेषतो भरतैरावतकस्य पूर्वविदेहापरविदेहकस्य अकर्मभूमस्य सामान्यतो विशेषतो हैमवतैरण्यवतकस्य हरिवर्षरम्यकस्य देवकुरूत्तरकुरूकस्यान्तरद्वीपकस्य यैवात्मीये आत्मीये स्थाने स्त्रयाः स्थिति सैव पुरुषस्यापि वक्तव्या, तद्यथा

सामानिकतिर्यग्योनिकपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रिणि पल्योपमानि, जलचरपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, चतुष्पदस्थलचरपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रिणि पल्योपमानि, उर-परिसर्पस्तलचरपुरुषाणां जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, एवं भुजपरिसर्पस्थलचरपुरुषाणां खचरपुरुषाणामपि जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासङ्ख्येयभागः, सामान्यतो मनुष्यपुरुषाणां जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रिणि पल्योपमानि, धर्मचरममधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तं, एतच्च बाह्यलिङ्गप्रव्रज्याप्रतपत्तिमङ्गीकृत्य वेदितव्यं, अन्यथा चरणपरिणामस्यैकसामायिकस्यापि सम्भवादेकं समयमिति ब्रूयात्, अथवा देशचरणमधिकृत्येदं वक्तव्यं, देशचरमप्रपत्तेर्बहुलभङ्ग तथा जघन्यतोऽप्यन्तर्मुहूर्त्तसम्भवात्, तत्र सर्वचरणसम्भवेऽपि यदिदं देशचरणमधिकृत्योक्तं तद्देशचरणपूर्वकं प्रायः सर्वचरणमिति प्रतिपत्त्यर्थं, तता चोक्तम्-

॥ १ ॥ "सम्मत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होइ ।
चरणोवसमखयाणं सागर संखंतरा होंति ॥" इति ।

अत्र यदाद्यं व्याख्यानं तत्स्त्रीवेदचिन्तायामपि द्रष्टव्यं, यच्च स्त्रीवेदचिन्तायां व्याख्यातं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदत्रापीति, उत्कर्षतो देशोना पूर्वकोटी वर्षाष्टकादूर्ध्वमुत्कर्षतोऽपि पूर्वकोट्यायुष एव चरणप्रतिपत्तिसम्भवात्, कर्मभूमकमनुष्यपुरुषाणां जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रिणि पल्योपमानि, चरणप्रतिपत्तिमङ्गीकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भरतैरावतकर्मभूमकमनुष्यपुरुषाणां क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्राणि पल्योपमानि, तानि च सुषमसुषमारके वेदितव्यानि, धर्मचरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, पूर्वविदेहापरविदेहकर्मभूमकमनुष्यपुरुषाणां क्षेत्रं प्रतीत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, धर्मचरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, सामान्यतोऽकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्येन पल्योपमासङ्ख्येयभागन्यूनमेकं पल्योपममुत्कर्षतस्त्रिणि पल्योपमानि, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षेण देशोना पूर्वकोटी, पूर्वविदेहकस्यापरविदेहकस्य वाऽकर्म्मभूमौ संहृतस्य जघन्येनोत्कर्षत एतावदायुःप्रमाणसम्भवात्

हैमवतहैरण्यवताकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्येन पल्योपमं पल्योपमासङ्ख्येयभागन्यूनमुत्कर्षतः परिपूर्ण पल्योपमं, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, भावना प्रागिव, हरिवर्षरम्यकवर्षाकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीतय जघन्यतो द्वे पल्योपमे पल्योपमासङख्येयभागन्यूने उत्कर्षतः परिपूर्णे द्वे पल्योपमे, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी, देवकुरूत्तरकुर्वकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनानि त्रीणि पल्योपमानि उत्कर्षतः परिपूर्णानि त्रीणि पल्योपमानि, संहरणमधिकृत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटी।

अन्तरद्वीपकाकर्मभूमकमनुष्यपुरुषाणां जन्म प्रतीत्य जघन्येन देशोनपल्योपमासङ्ख्येयभाग उत्कर्षतः परिपूर्णपल्योपमासङख्येयभागः, संहरणमधिकृत्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वकोटीति।। देवपुरिसाणमित्यादि, देवपुरुषाणां सामान्यतो जघन्यतः स्थितिर्दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, विशेषचिन्तायाम सुरकुमारपुरुषाणां जघन्यतो दश वर्षसहस्राणि उत्कर्षतः सातिरेकमेक सांगत्तोपमं, नागकुमारादिपुरुषाणां सर्वेषामपि जघन्यतो दश वर्षसहस्राणि उत्कर्षतो देशोने द्वे पल्योपम, व्यन्तरपुरुषाणांजघन्यतो दश वर्षसहस्रामि उत्कर्षतः पल्योपमं।

ज्योतिष्कदेवपुरुषाणां जघन्यतः पल्योपमस्याष्टमो भाग उत्कर्षतः परिपूर्णं पल्योपमं वर्षशतसहस्रारभ्यधिकं, सौधर्मकल्पदेवपुरुषाणां जघन्यतः पल्योपममुत्कर्षतः द्वे सागरोपमे ईशान कल्पदेवपुरुषाणां जघन्यतः साधिकं पल्योपममुत्कर्षतो द्वे सागरोपमे सातिरेके सनत्कुमारकल्पदेवपुरुषाणां च जघन्यतो द्वे सागरोपमाणि माहेन्द्रकल्पदेवपुरुषाणां जघन्यतश्चतुर्दश सागरोपमाणि उत्कर्षतः सप्तदश सहस्रारकल्पदेवानां जघन्येन सप्तदश सागरोपमाणि उत्कर्षतोऽष्टादश आनतकल्पदेवानां जघन्यतोऽष्टादश सागरोपमाणि उत्कर्षत एकोनविंशति प्राणतकल्पदेवानां जघन्यत एकोनविंशति सागरोपमाणि उत्कर्षतो विंशति आरणकल्पदेवानां जघन्यतो विंशति सागरोपमाणि उत्कर्षत एकविंशति अच्युतकल्पदेवानां जघन्यत एकविंशति सागरोपमाणि उत्कर्षतो द्वाविंशतिः। अधस्तनाधस्तनग्रैवेयकदेवानां जघन्यतो द्वाविंशति सागरोपमाणि उत्कर्षतस्त्रयोविंशति अधस्तनसध्यमग्रैवेयकदेवानां जघन्यतस्त्रयोविंशति सागरोपमाणि उत्कर्षतश्चतुर्विंशति अधस्तनोपरितनग्रैवेयकदेवानां जघन्यतश्चतुर्विंशति सागरोपमाणि उत्कर्षतः पञ्चविंशति मध्यमाधस्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नग्रैवेयकदेवानां जघन्येन पञ्चविंशति सागरोपमाणि उत्कर्षतः षड्विंशति मध्यममध्यमग्रैवेयकदेवानां जघन्यतः षड्विंशति सारोपमाणि उत्कर्षतः सप्तविंशति मध्यमोपारतनग्रैवेयकदेवानां जघन्येन सप्तविंशति सागरोपमाणि उत्कर्षतोऽष्टाविंशति उपरितनाधस्तनग्रैवेयकदेवानां जघन्येनाष्टाविंशति सागरोपमाणि उत्कर्षत एकोनत्रिंशत् उपरितनमध्यमग्रैवेयकदेवानां जघन्येनैकोनत्रिंशत्सागरोपमाणि उत्कर्षतस्त्रिंशत् उपरितनोपरितनग्रैवेयकदेवनां जघन्यतस्त्रिंशत्सागरोपमाणि उत्कर्षत एकत्रिंशत् सागरोपमाणि।

विजयवैजयन्तजयन्तापराजितविमानदेवानां जघन्येनैकत्रिंशत्सागरोपमाणि उत्कर्षतस्त्रयस्त्रिंशत् सागरोपमाणि सर्वार्थसिद्धमहाविमानदेवानामजघन्योत्कृष्टं त्रयस्त्रिंशत्सागरोपमाणि क्वचिदेवं सूत्रपाठः-"देवपुरिसाण ठिई जहा पन्नवणाए ठिइपए तहा भाणियव्वा" इति, तत्र स्थितिपदेऽप्येवमेवोक्तास्थितिरिरित। उक्तं पुरुषस्य मवस्थितिमानमधुना पुरुषः पुरुषत्वममुञ्चन् कियन्तं कालं निरन्तरमवतिष्ठते इति निरूपणार्थमाह-

मू. (६२) *पुरिसे णं भंते! पुरिसे त्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं। तिरिक्खजोणियपुरिसे णं भंते! कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं अंतो० उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, एवं तं चेव, संचिट्ठणा जहा इत्थीणं जाव खहयरतिरिक्खजोणियपुरिसस्स संचिट्ठणा।*

मणुस्सपुरिसाणं भंते! कालतो केवच्चिरं होइ?, गोयमा! खेत्तं पडुच्च जहन्ने० अंतो० उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, धम्मचरणं पडुच्च जह० अंतो० उक्कोसेणं देसूणा पुव्वकोडी एवं सव्वत्थ जाव पुव्वविदेहअवरविदेह, अकम्मभूमगमणुस्सपुरिसाण जहा अकम्मभूमकमणुस्सित्थीणं जाव अंतरदीवगाणं जच्चेव ठीति सच्चेव संचिट्ठणा जाव सव्वट्ठसिद्धगाणं

वृ. पुरुषो णमिति वाक्यालङ्कारे भदन्त! पुरुष इति पुरुषभावापरित्यागेन 'कियच्चिरं' कियन्तं कालं यावद्भवति?, भगवानाह-गौतम! जघन्यतोऽन्तर्मुहूर्त्तं, तावतः कालादूर्ध्वं मृत्वा स्त्र्यादिभावगमनाद्, उत्कर्षतः सातिरेकं सागरोपमशतपृथक्त्वं, सामान्येन तिर्यङ्नरामरभवेष्वेतावन्तं कालं पुरुषेष्वेव भासम्भवात्, सातिरेकता कतिपयमनुष्यभवैर्दितव्या, अत ऊर्ध्वं पुरुषनामकर्मोदयाभावतो नियमत एव स्त्र्यादिभावगमनात्।

तिर्यग्योनिकपुरुषाणां यथा तिर्यग्योनिकस्त्रीणां तथा वक्तव्यं, तच्चैवम्-तिर्यग्योनिकपुरुषस्तिर्यग्योनिकपुरुषत्वमजहत् जघन्यतोऽन्तर्मुहूर्त्तं, तदन्तरं मृत्वा गत्यन्तरे वेदान्तरे वा संक्रमात्, उत्कर्षतस्त्रिणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तत्र पूर्वकोटिपृथक्त्वं सप्त भवाः पूर्वकोटयायुषः पूर्वविदेहादौ (यतः) त्रीणि पल्योपमान्यष्टमे भवे दवकुरूत्तरकुरुषु (यतः) विशेषचिन्तायां जलचरपुरुषो जघन्येनान्तर्मुहूर्त्तं, तत ऊर्ध्वं मरणभावेन तिर्यग्योन्यन्तरे गत्यन्तरे वेदान्तरे सा संक्रमात्, उत्कर्षतः पूर्वकोटिपृथक्त्वं, पूर्वकोटयायुःसमन्वितस्य भूयो भूयस्तत्रैव द्वयादिवारोत्पत्तिसम्भवात्। चतुष्पदस्थलचरपुरुषो जघन्येनान्तर्मुहूर्त्तमुत्कर्षतस्त्रिणि पल्योपमानि पूर्वकोटिपृथ-क्त्वाभ्यधिकानि, तानि सामान्यतिर्यकपुरुषस्येव भावनीयानि। उरःपरिसर्पस्थलचरपुरुषो भुजपरिसर्पस्थलचरपुरुषश्च जघन्यतोऽन्तर्मुहूर्त्तमुत्कृषतः पूर्वकोटिपृथक्त्वं, तच्च जलचरपुरुषस्येव भावनीयं। खचरपुरुषो जघन्यतोऽन्तर्मुहूर्त्तं, अन्तर्मुहूर्त्तभावना सर्वत्रापि प्रागिव,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कर्षतः पूर्वकोटिपृथक्त्वं, तच्च जलचरपुरुषस्येव भावनीयं। खचरपुरुषो जघन्यतोऽन्तर्मुहूर्त्तं, अन्तर्मुहूर्त्तभावना सर्वत्रापि प्रागिव, उत्कर्षतः पूर्वकोटिपृथक्त्वाभ्यधिकः पल्योपमासङ्ख्येयभागः, स च सप्त वारान् पूर्वकोटिस्थितिषूत्पद्याष्टम्वारमन्तरद्वीपादिखचरपुरुषेषु पल्योपमासङ्ख्येय-भागस्थितिषूत्पद्यमानस्य वेदितव्यः।

'मणुस्सपुरिसाणं जहा मणुस्सित्थीणं'मिति, मनुष्यपुरुषाणां यथा मनुष्यस्त्रीणां तथा वक्तव्यं, तच्चैवं– सामान्यतो मनुष्यपुरुषस्य क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं, तत ऊर्द्ध मृत्वा गत्यन्तरे वेदान्तरे वा संक्रमात्, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि, तत्र सप्त भवाः पूर्वकोटयायुषो महाविदेहेषु अष्टमस्तु देवकुर्वादिषु, धर्मचरणं प्रतीत्य समयमेकं, द्वीतियसमये मरणभावात्, उत्कर्षतो देशोना पूर्वकोटी, उत्कर्षतोऽपि पूर्वकोटयायुष एव वर्षाष्ट-कादूर्द्धं चरण-प्रतिपत्तिभावात्, विशेषचिन्तायां सामान्यतः कर्म्मभूमकमनुष्यपुरुषः कर्मभूमिरूपं क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्रणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यदिकानि, तत्रान्तर्मुहूर्त्तभावना प्रागिव, त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि सप्त वारान् पूर्वकोटयायुः-समन्वितेषूत्पद्याष्टमं वारमेकान्तसुषमायां भरतैरावतयोस्त्रिपल्योपमस्थितषूत्पद्य-मानस्य वेदितव्यानि, धर्म्मचरणं प्रतीत्य जघन्यत एकं समयं, सर्वविरतिपरिणामस्यैकसामयि-कस्यापि सम्भवात्, उत्कर्षतो देशोना पूर्वकोटी, समग्रचरणकालस्याप्येतावत एव भावात्।

भरतैरावतकर्मभूमकमनुष्यपुरुषोऽपि भरतैरावतक्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्त-मुत्कर्षतस्त्रीणि पल्योपमानि देशोनपूर्वकोटयभ्यधिकानि, तानि च पूर्वकोटयायुःसमन्वितस्य विदेहपुरुषस्य भरतादौ संहृत्यानीतस्य भरतादिवासयोगाद् भरतादिप्रवृत्तव्यपदेशस्य भवायुःक्षये एकान्तसुषमाप्रारम्भे समुत्पन्नस्य वेदितव्यानि, धर्म्मचरणं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी, एतच्च द्वयमपि प्रागिव भावनीयं, पूर्वविदेहापरविदेहकर्म्मभमकमनुष्यपुरुषः क्षेत्रं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी, एतच्च द्वयमपि प्रागिव भावनीयं, पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषः क्षेत्रं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी, एतच्च द्वयमपि प्रागिव भावनीयं, पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषः क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं, तच्च भूयो भूयस्तत्रैव सप्तवारानुत्पत्या भावनीयं, अत ऊर्द्धं त्ववश्यं गत्यन्तरे योन्यन्तरे वा संक्रमभावात्, धर्मचरणं प्रतीत्य जघन्यत एवं समयमुत्कर्षतो देशोना पूर्वकोटी।

तथा सामान्यतोऽकर्मभूमकमनुष्यपुरुषस्तद्भावमपरित्यजन् जन्म प्रतीत्य जघन्यत एकं पल्योपमं पल्योपमासङ्ख्येयभागन्यूनमुत्कर्षतस्त्रीणि पल्योपमानि देशोनया पूर्वकोटयाऽभ्या-धिकानि, तानि च देशोनपूर्वकोटयायुः समन्वितस्योत्तरकुर्वादौ संहृतस्य तत्रैव मृत्वोत्पन्नस्य वेदितव्यानि, देशोनता च पूर्वकोटया गर्भकालेन न्यूनत्वाद्, गर्भस्थितस्य संहरणप्रतिषेधात्।

हैमवतहैरम्यवताकर्म्मभूमकमनुष्यपुरुषो जन्म प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनं पल्योपममुत्कर्षतः परिपूर्णं पल्योपमं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोनया पूर्वकोटयाऽभ्यधिकमेकं पल्योपमं, अत्र भावना प्रागुक्तानुसारेण स्वयं कर्त्तव्या।

हरिवर्षरम्यकवर्षाकर्मभूमकमनुष्यपुरुषो जन्म प्रतीत्य जघन्यतो द्वे पल्योपमे पल्योपमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्येयभागन्यूने, उत्कर्षतः परिपूर्णे द्वे पल्योपमे, जघन्यत उत्कर्षतश्च तत्रैतावत आयुषः सम्भवात्, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं न्यूनान्तर्मुहूर्त्तायुषः संहरणाऽसम्भात्, उत्कर्षतो देशोनया पूर्वकोटयाऽभ्यधिके द्वे पल्योपमे, भावनाऽत्र प्राग्वत्। देवकुरूत्तरकुर्वकर्मभूमकमनुष्यपुरुषः क्षेत्रं प्रतीत्य जघन्यतः पल्योपमासङ्ख्येयभागन्यूनानि त्रीणि पल्योपमानि देशोनपूर्वकोटयधिकानि

अन्तरद्वीपकमनुष्यपुरुषो जन्म प्रतीत्य देशोनं पल्योपमासङ्ख्येयभागमुत्कर्षतः परिपूर्णं पल्योपमासङ्ख्येयभागं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिसमभ्यधिकः पल्योपमासङ्ख्येयभागः। देवाणं जा चेव ठिई सा चेव संचिट्ठणा भाणियव्वा' देवानां यैव स्थिति प्रागभिहिता सैव संचिट्ठणा' इति कायस्थितिर्भणितव्या, नन्वनेकभवभावाश्रया कायस्थिति सा कथमेकस्मिन् भवे भवति ?, नैष दोषः, देवपुरुषो देवपुरुषत्वापरित्यागेन कियन्तं कालं यावन्निरन्तरं भवति ? इत्येतावदेवात्र विवक्षितं, तत्र देवो मृत्वाऽऽनन्तर्येण भूयो देवो न भवति ततः 'देवाणं वा ठिई सा चेव संचिट्ठणा भाणियव्वा' इत्यतिदेशः कृतः।

तदेवमुक्तं सातत्येनावस्थानमिदानीमन्तरमाह–

मू. (६३) पुरिसस्स णं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जह० एक्कं समयं उक्को० वणस्सतिकालो तिरिक्खजोणियपुरिसाणं जह० अंतोमु० उक्को० वणस्सतिकालो एवं जाव खहयरतिरिक्खजोणियपुरिसाणं। मणुस्सपुरिसाणं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! खेत्तं पडुच्च जह० अंतोमु० उक्को० वणस्सतिकालो, धम्मचरणं पडुच्च जह० एक्कं समयं उक्को० अनंतं कालं अनंताओ उस्स० जाव अवड्ढपोग्गलपरियट्टं देसूणं, कम्मभूमकाणं जाव विदेहो जाव धम्मचरणे एक्को समओ सेसं जहित्थीणं जाव अंतरदीवकाणं।

देवपुरिसाणं जह० अंतो० उक्को० वणस्सतिकालो, भवणवासिदेवपुरिसाणं ताव जाव सहस्सारो, जह० अंतो० उक्को० वणस्सतिकालो। आनतदेवपुरिसाणं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जह० पासपुहुत्तं उक्को० आणतदेवपुरिसाणं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जह० वासपुहुत्तं उक्को० वणस्सतिकालो, एवं जाव गेवेज्जदेवपुरिसस्सवि।

अनुत्तरोववातियदेवपुरिसस्स जह० वासपुहुत्तं उक्को० संखेज्जाइं सागरोवमाइं साइरेगाइं

वृ. 'पुरिसस्सणं' इत्यादि, पुरुषस्य णमिति वाक्यालङ्कारे पूर्ववत् भदन्त ! अन्तरं कालतः कियच्चिरं भवति ?, पुरुषः पुरुषत्वात्परिभ्रष्टः सन् पुनः कियता कालेन तदवाप्नोतीत्यर्थः, तत्र भगवानाह–गौतम ! जघन्येनैकं समयं–समयादनन्तरं भूयोऽपि पुरुषत्वमवाप्नोतीति भावः, इयमत्र भावना। यदा कश्चित्पुरुष उपशमश्रेणिगत उपशान्ते पुरुषवेदे समयमेकं जीवित्वा तदनन्तरं म्रियते तदाऽसौ नियमाद्देवपुरुषेषूत्पद्यते इति समयमेकमन्तरं पुरुषत्वस्य, ननु स्त्रीनपुंसकयोरप श्रेणिलाभो भवति तत्कस्मादनयोरप्येवमेकः समयोऽन्तरं न भवति ?, उच्यते, स्त्रीया नपुंसकस्य च श्रेण्यारूढा-ववेदकभावानन्तरं मरणेन तथाविधशुभाध्यवसायतो नियमेन देवपुरुषत्वेनोत्पादात्, उत्कर्षतो वनस्पतिकालः, स चैवमभिलपनीयः–

''अनंताओ उस्सप्पिणीओ ओसप्पिणीओ कालतो खेत्ततो अनंता लोगा असंखेज्जा पोग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइ भागो'' इति।

तदेवं सामान्यतः पुरुषत्वस्यान्तरमभिधाय सम्प्रति तिर्यकपुरुषविधयमतिदेशमाह–'जं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिरिक्खजोणित्थीणमंतर'मित्यादि, यत्तिर्यग्योनिकस्त्रीणामन्तरं प्रागभिहितं तदेव तिर्यग्योनिकपुरुषाणामप्यविशेषितं वक्तव्यं, तच्चैवम्—सामान्यतस्तिर्यकपुरुषस्य जघन्यतोऽन्तरमन्तर्मुहूर्त्तं तावत्कालस्थितिना मनुष्यादिभवेन व्यवधानात्, उत्कर्षतो वनस्पतिकालोऽसङ्ख्येयपुद्गलपरावर्त्ताख्यः, तावता कालेनामुक्त सत्यां नियोगतः पुरुषत्वयोगात्, एवं विशेषचिन्तायां जलचरपुरुषस्य स्थलचरपुरुषस्य खचरपुरुषस्यापि प्रत्येकं जघन्यत उत्कर्षतश्चान्तरं वक्तव्यं।

सम्प्रति मनुष्यपुरुषत्वविषयान्तरप्रतिपानार्थमतिदेशमाह—'जं मणुस्सइत्थीणमंतरं तं मणुस्सपुरिसाण'मिति, यन्मनुष्यस्त्रीणामन्तरं प्रागभिहितं तदेव मनुष्यपुरुषाणामपि वक्तव्यं, तच्चैवम्—सामान्यतो मनुष्यपुरुषस्य जघन्यतः क्षेत्रमधिकृत्यान्तरमनुतर्मुहूर्त्त, तच्च प्रागिव भावनीयं, उत्कर्षतो वनस्पतिकालः, धर्मचरणमधिकृत्य जघन्यत एकं समयं, चरणपरिणामात्परिभ्रष्टस्य समयानन्तरं भूयोऽपि कस्यचिच्चरणप्रतिपत्तिसम्भवात्, उत्कर्षतो देशोनपार्द्धपुद्गलपरावर्त्तः, एवं भरतैरावतकर्म्मभूमकमनुष्यपुरुषस्य पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषस्य जन्म प्रतीत्य चरणमधिकृत्य च प्रत्येकं जघन्यत उत्कर्षतश्चान्तरं वक्तव्यं।

सामान्यतोऽकर्मभूमकमनुष्यपुरुषस्य जन्म प्रतीत्य जघन्यतोऽन्तरं दश वर्षसहस्राणि अन्तर्मुहूर्ताभ्यधिकानि, अकर्मभूमकमनुष्यपुरुषत्वेन मृतस्य जघन्यस्थितिषु देवेषूत्पद्यते, ततोऽपि च्युत्वा कर्मभूमिषु स्त्रीत्वेन वा पुरुषत्वेन वोत्पद्यकस्याकर्मभूमित्वेन भूयोऽप्युत्पादात्, देवभवाच्च्युत्वाऽनन्तरम कर्म्मभूमिषु मनुष्यत्वेन तिर्यक्संज्ञिपञ्चेन्द्रियत्वेन वा उत्पादाभावादपान्तराले कर्म्मभूमिकेषु मृत्वोत्पादाभिधानं, उत्क्षतो वनस्पतिकालोऽन्तरं, संहरणं प्रतीत्य जघन्यतोऽन्तरमन्तर्मुहूर्त्त, अकर्म्मभूमेः कर्म्मभूमिषु संहृत्यान्तर्मुहूर्तानन्तरं तथाविधबुद्धिपरावर्त्तादिभावतो भूयस्तत्रव नयनसम्भवात्, उत्कर्षतो वनस्पतिकालः, एतावतः कालादूर्द्धमकर्मभूमिषूत्पत्तिवत्, संहरणस्यापि नियोगतो भावात्।

एवं हैमवतैरवण्यवतादिष्वप्यकर्म्मभूमिषु जन्मतः संहरणतश्च जघन्यत उत्कर्षतश्चान्तरं वक्तव्यं यावदन्तरद्वीपकाकर्मभूमकमनुष्यपुरुषवक्तव्यता।

सम्प्रति देवपुरुषाणामन्तरप्रतिपादनार्थमाह—'देवपुरिसस्स णं भंते!' इत्यादि, देवपुरुषस्य भदन्त! कालतः कियच्चिरमन्तरं भवति?, भगवानाह—गौतम! जघन्येनान्तर्मुहूर्त्त, देवभवाच्च्युत्वा गर्भव्युत्क्रान्तिकमनुष्येषूत्पद्य पर्याप्तिसमाप्त्यनन्तरं तथाविधाध्यवसायमरणेन भूयोऽपि कस्यापि देवत्वेनोत्पादसम्भवात्, उत्कर्षतो वनस्पतिकालः, एवमसुरकुमारादारभ्य निरन्तरं तावद्वक्तव्यं यावत्सहस्रारकल्पदेवपुरुषस्यान्तरं, आनतकल्पदेवस्यान्तरं जघन्येन वर्षपृथक्त्वं, कस्मादेतावदिहान्तरमिति चेदुच्यते इह यो गर्भस्थ सर्वाभि पर्याप्तिभि पर्याप्तः स शुभाध्यवसायोपेतो मृतः सन् आनतकल्पादारतो ये देवास्तेषूत्पद्यते नानतादिषु, तावन्मात्रकालस्य तद्योग्याध्यवसायविशुद्ध्यभावात्। ततो य आनतादिभ्यश्च्युतः सन् भूयोऽप्यानतादिषूत्पत्स्यते स नियमाच्चारित्रमवाप्य, चारित्रं चाष्टमे वर्षे, तत उक्तं जघन्यतो वर्षपृथक्त्वम्, उत्कर्षतो वनस्पतिकालः, एवं प्राणतारणाच्युकल्पग्रैवेयकदेवपुरुषाणामपि प्रत्येकमन्तरं जघन्यत उत्कर्षतश्च वक्तव्यम्, अनुत्तरोपपातिककल्पातीतदेवपुरुषस्य जघन्यतोऽन्तरं वर्षपृथक्त्वमुत्कर्षतः सङ्ख्येयानि सागरोपमाणि सातिरेकाणि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र सङ्ख्येयानि सागरोपमाणि तदन्यवैमानिकेषु सङ्ख्येयवारोत्पत्त्या, सातिरेकाणि मनुष्यभवैः, तत्र सामान्यमिदानेऽप्येतदपराजितान्तमवगन्तव्यं, सर्वार्थसिद्धे सकृद्देवोत्पादतस्तत्रान्तरासम्भवात्

अन्ये त्वमिदधति–भवनवासिन आरभ्य आईशानादमरस्य जघन्यतोऽन्तरमन्तर्मुहूर्त्तं, सनत्कुमारादारभ्यासहस्रारान्नव दिनानि, आनतकल्पादारभ्याच्युतकल्पं यावन्नव मासाः, नवसु ग्रैवेयकेषु सर्वार्थसिद्धमहाविमानवर्जेष्वनुत्तरविमानेषु च नव वर्षाणि, ग्रैवेयकान् यावत् सर्वत्राप्युत्कर्षतो वनस्पतिकालः, विजयादिषु चतुर्षु महाविमानेषु द्वे सागरोपमे, उक्तञ्च–

॥१॥ "आईसाणादमरस्सअंतरं हीणयं मुहुत्तंतो।
आसहस्सारे अच्चुयनुत्तरदिनमासवासनव॥

थावरकालुक्कोसो सव्वट्ठे बीयओ न उववाओ। दो अयरा विजयादिसु" इति॥ तदेवमुक्तमन्तरं, साम्प्रतमल्पबहुत्वं साम्प्रतमल्पबहुत्वं वक्तव्यं, तानि च पञ्च, तद्यथा–प्रथमं सामान्याल्पबहुत्वं, द्वितीयं त्रिविधतिर्यकपुरुषविषयं, तृतीयं त्रिविधमनुष्यपुरुषविषयं, चतुर्थं चतुर्विधदेवपुरुषविषयं, पञ्चमं मिश्रपुरुषविषयं। तत्र प्रथमं तावदभिधित्सुराह–

मू. (६४) *अप्पाबहुयाणि जहेवित्थीणं जाव एतेसि णं भंते! देवपुरिसाणं भवणवासीणं वाणमंतराणं जोतिसियाणं वेमाणियाण य कतरे२ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा वेमाणियदेवपुरिसा भवणवइदेवपुरिसा असंखे० वाणमंतरदेवपुरिसा असंखे० जोतिसिया देवपुरिसा संखेज्जगुणा।*

एतेसि णं भंते! तिरिक्खजोणियपुरिसाणं जलयराणं थलयराणं खहयराणं मणुस्सपुरिसाणं कम्मभूमकाणं अकम्मभूमकाणं अंतरदिव० देवपुरिसाणं भवणवासीणं वाणमन्तराणं जोइसियाणं वेमाणियाणं सोधम्माणं जाव सव्वट्ठसिद्धगाण य कतरे२ हिंतो अप्पा वा बहुगा वा जाव विसेसाहिया वा।

गोयमा! सव्वत्थोवा अंतरदीवगमणुस्सपुरिसा देवकुरूत्तरकुरुअकम्मभूमगमणुस्सपुरिसा दोवि संखेज्ज० हरिवासरम्मगवासअक० दोवि संखेज्जगुणा हेमवतहेरण्णवतवासअकम्म० दोवि संखि० भरहेरवतवासकम्मभूमगमणु० दोवि संखे० पुव्वविदेहअवरविदेहकम्मभू० दोवि संखे० अनुतरोववातियदेवपुरिसा असंखि० उवरिमगेविज्जदेवपुरिसा संखेज्ज० मज्झिमगेविज्जदेव-पुरिसा संखेज्ज० हेट्ठिमगेविज्जदेव० संखे० अच्चुयकप्पे देव० संखे०, जाव आणतकप्पे देवपुरिसा संखेज्ज०। सहस्सारे कप्पे देवपुरिसा असंखे० महासुक्क कप्पे देवपुरिसा असंखे० जाव माहिंदे कप्पे देवपुरिसा असंखे० सणंकुमारकप्पे देवपुरिसा असं० ईसाणकप्पे देवपुरिसा असंखे० सोधम्मे कप्पे देवपुरिसा संखे० भवणवासिदेवपुरिसा असंखे० खहयरतिरिक्खजोणियपुरिसा असंखे० थलयरतिरिक्खजोणियपुरिसा संखे० जलयरतिरिक्खजोणियपुरिसा असंखे० वाणमंतरदेवपुरिसा संखे०, जोतिसियदेवपुरिसा संखेज्जगुणा॥

वृ. 'पुरिसाणं भंते!' इत्यादि, सर्वस्तोका मनुष्यपुरुषाः सङ्ख्येयकोटीकोटीप्रमाणत्वात्, तेभ्यस्तिर्यग्योनिकपुरुषा असङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्तेषां, तेभ्यो देवपुरुषाः सङ्ख्येयगुणाः, बृहत्तरप्रतरासङ्ख्येयश्रेणितगताकाशप्रदेशराशिप्रमाणत्वात्, तिर्यग्योनिकपुरुषाणां यथा तिर्यग्योनिकस्त्रीणां मनुष्यपुरुषाणां यथा मनुष्यस्त्रणामल्पबहुत्वं (तथा) वक्तव्यं। सम्प्रति देवपुरुषाणामल्पबहुत्वमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वस्तोका अनुत्तरोपपातिकदेवपुरुषाः, क्षेत्रपल्योपमासङ्ख्येयभागवत्याकाशप्रदेशराशिप्रमाणत्वात्, तेभ्य उपरितनग्रैवेयकदेवपुरुषाः सङ्ख्येयगुणाः, बृहत्तरक्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभः- प्रदेशराशिभावख्यात्, कथमेतदवसेय- मिति चेदुच्यते—विमानबाहुल्यात्, तथाहि—अनुत्तरदेवानां पञ्च विमानानि, विमानशतं तूपरित- नग्रैवेयकप्रस्तटे, प्रतिविमानं वासङ्ख्येया देवाः, तथा चाधोऽबोधवर्त्तीनि विमानानि तथा तथा देवा अपि प्राचुर्येण लभ्यन्ते, ततोऽवसीयते—अनुत्तरविमानवासिदेवपुरुषापेक्षया बृहत्तरक्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणा उपरितनग्रैवेयकप्रस्तटे देवपुरुषाः (संख्येयगुणा) एवमुत्तरत्रापि भावना विधेया, तेभ्यो मध्यमग्रैवेय- कप्रस्तटदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽप्यधस्तनग्रैवेयकप्रस्तटदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽप्यच्युतकल्पदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽप्यारणकल्पदेवपुरुषाः सङ्ख्येयगुणाः, यद्यप्यारणाच्युतकल्पौ समश्रेणीकौ समविमान- सङ्ख्याकौ च तथाऽपि कृष्णपाक्षिकास्तथास्वा- भाव्यात्प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते।

अथ के ते कृष्णपाक्षिकाः ?, उच्यते, इह द्वये जीवाः, तद्यथा—कृष्णपाक्षिकाः शुक्लपाक्षिकाश्च, तत्र येषां किञ्चिदूनोऽपार्द्धपुद्गलपरावर्त्तः संसारस्ते शुक्लपाक्षिकाः, इतरे दीर्घसंसारभाजिनः कृष्णपाक्षिकाः उक्तञ्च—

॥१॥ "जेसिमवड्ढो पुग्गलपरियट्टो सेसओ य संसारो।
ते सुक्कपक्खिया खलु अहिए पुण कण्हपक्खीया॥"

अत एव स्तोकाः शुक्लपाक्षिकाः, अल्पसंसाराणं स्तोकानामेव सम्भवात्, बहवः कृष्णपाक्षिकाः, दीर्घसंसारणामनन्तानमन्तानां भावात्, अथ कथमेतदवसातवयं तता कृष्णपाक्षिकाः प्राचुर्येण दक्षिमस्यां दिशि समुत्पद्यन्ते, उच्यते, तथास्वाभाव्यात्, तच्च तथास्वाभाव्यमेवं पूर्वाचार्यैर्युक्तिभिरुपबृंहितं—कृष्णपाक्षिकाः खलु दीर्घसंसारभजिन उच्यन्ते, दीर्घसंसारभाजिनश्च बहुपापोदयात्, बहुप्रापोदयाश्च क्रूरकर्माणः, क्रूरकर्माणश्च प्रायस्तथास्वाभाव्याद् तद्भवसिद्धिका अपि दक्षिणस्या दिशि समुत्पद्यन्ते, यत उक्तम्—

॥१॥ "पायमिह कूरकम्मा भवसिद्धीयावि दाहिणिल्लेसु।
नेरइयतिरियमणुया सुराइठाणेसु गच्छंति॥"

तत् दक्षिणस्यां दिशि प्राचुर्येण कृष्णपाक्षिकाणां सम्भवादुपपद्यते—अच्युतकल्पदेवपुरुषापेक्षयाऽऽरणकल्पदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽपि प्राणतकल्पदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽप्यानतकल्पदेवपुरुषाः सङ्ख्येयगुणाः, अत्रापि प्राणतकल्पापेक्षया सङ्ख्येयगुणत्वं कृष्णपाक्षिकाणां दक्षिणस्या दिशि प्राचुर्येण भावात्, एते च सर्वेऽप्यनुत्तरविमानवास्यादय आनतकल्पवासिपर्यन्तदेवपुरुषाः प्रत्येकं क्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणा द्रष्टव्याः

"आणयपाणयमाई पल्लस्सासंखभागो उ" इति वचनात्, केवलमसङ्ख्येयो भागो विचित्र इति परस्परं यथोक्तं सङ्ख्येयगुणत्वं न विरुध्यते, आनतकल्पदेवपुरुषेभ्यः सहस्र रकल्पवासिदेवपुरुषा असङ्ख्येयगुणाः, घनीकृतस्य लोकस्यैकप्रादेक्याः श्रेणेरसङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्योऽपि महाशुक्रकल्पवासिदेवपुरुषा असङ्ख्येयगुणाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बृहत्तरश्रेण्यसङ्ख्येयभागाकाशप्रदेशराशिप्रमाणत्वात्, कथमेतत्प्रत्येमिति चेदुच्यते–विमान-बाहुल्यात्, तथाहि–षट् सहस्राणि विमानानां सहस्रारकल्पे चत्वारिंशत्सहस्राणि महाशुक्र, अन्यच्चाधो-विमानवासिनो देवा बहुबहुतराः स्तोकस्तोकता उपरितनोपरितनविमानवासिनस्तत उपपद्यन्ते सहस्रारकल्पदेवपुरुषेभ्यो महाशुक्रकल्पवासिदेवपुरुषा असङ्ख्येयगुणाः, तेभ्योऽपि लान्तक-कल्पदेवपुरुषा असङ्ख्येयगुणाः, बृहत्तमश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् ।

–तेभ्योऽपि ब्रह्मलोककल्पवासिदेवपुरुषा असङ्ख्येयगुणाः, भूयोबृहत्तमश्रेण्य-सङ्ख्येयभागवर्त्तयाकाशप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि ब्रह्मलोककल्पवासदेवपुरुषा असङ्ख्येय-गुणाःष भूयोबृहत्तमश्रेण्सङ्ख्येयभागवत्यार्काशप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि माहेन्द्र-कल्पदेवपुरुषा असङ्ख्येयगुणाः, भूयस्तरबृहत्तमनभः श्रेण्यसङ्ख्येयभागभागगताकाशप्रदेश-मानत्वात्, तेभ्यः सनत्कुमारकल्पदेवा असङ्ख्येयगुणाः, विमानबाहुल्यात्, तथाहि–द्वादश शतस-हस्राणि सनत्कुमारकल्पे विमानानामष्टौ शतसहस्राणि माहेन्द्रकल्पे अन्यच्च दक्षिणदिग्भावर्त्ती सनत्कुमारकल्पो माहेनद्रकल्पश्चोत्तरदिग्वर्त्ती दक्षिणस्यां च दिशि बहवः समुत्पद्यन्ते कृष्णपाक्षिकाः, तत उपपद्यन्ते माहेन्द्रकल्पात्सनत्कुमारकल्पे देवा असङ्ख्येयगुणाः, एते च सर्वेऽपि सहस्रार-कल्पवासिदेवादयः सनत्कुमारकल्पवासिदेवपर्यन्ताः प्रत्येकं स्वस्थाने चिन्त्यमाना घनीकृतलोकै-कश्रेण्यसङ्ख्येयभागगताकाशप्रदेशराशिप्रमाणा द्रष्टव्याः ।केवलं श्रेण्यसङ्ख्येयभागोऽसङ्ख्येय-भेदभिन्नस्तत इत्थमसङ्ख्येयगुणतयाऽल्पबहुत्व- मभिधीयमानं न विरोधभाक्, सनत्कुमार-कल्पदेवपुरुषेभ्य ईशानकल्पदेवपुरुषा असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशिसम्बन्धिनि द्वितीये वर्गमूले तृतीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्सङ्ख्याकासु घनीकृतस्य लोकस्यैक-प्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात्, तेभ्यः सौधर्मकल्पवासिदेवपुरुषाः सङ्ख्येयगुणाः, विमानबाहुल्यात्, तथाहि –

अष्टाविंशति शतसहस्राणि विमानानामशानकल्पे द्वात्रिंशच्छतसहस्राणि सौधर्म्मकल्पे, अपि च दक्षिणदिग्वर्त्ती सौधर्म्मकल्प ईशानकल्पश्चोत्तरदिग्वर्त्ती, दक्षिणस्यां च दिशि बहवः कृष्णपाक्षिका उत्पद्यन्ते, तत ईशानल्पवासिदेवपुरुषेभ्यः सौधर्मकल्पवासिदेवपुरुषाः सङ्ख्येयगुणाः, नन्वियं युक्ति सनत्कुमारमाहेन्द्रकल्पयोरप्युक्ता, परं तत्र माहेन्द्रकल्पापेक्षया सनत्कुमारकल्पे देवा असङ्ख्येयगुणा उक्ता इह तु सौधर्मे कल्पे सङ्ख्येयगुणास्तदेतत्कथम् ?, उच्यते, तथावस्तु-स्वाभाव्यात्, एतच्चावसीयते प्रज्ञापनाद सर्वत्र तथाभणनात्, तेभ्योऽपि भवनवासिदेवपुरुषा असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि प्रथमे वर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिरुप-जायते तावत्सङ्ख्याकासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तेषां यावान् द्वात्रिंशत्तमो भावस्तावत्प्रमाणत्वात् । तेभ्यो व्यन्तरदेवपुरुषा असङ्ख्येय-गुणाः, सङ्ख्येययोजनकोटीकोटीप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात्, तेभ्यः सङ्ख्येयगुणा ज्योतिष्कदेवपुरुषाः षट्पञ्चाशदधिकशतद्वयाङ्गुलप्रमाणैकप्रादेशिकश्रेणिमात्राणि खण्डानि यावन्त्येकस्मिन्प्रतरे भवन्ति तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाण- त्वात् ।। सम्प्रति पञ्चममल्पबहुत्वमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एएसि णं भंते!' इत्यादि, सर्वस्तोका अन्तरद्वीपक-मनुष्यपुरुषाः, क्षेत्रस्य स्तोकत्वात्, तेभ्योऽपि देवकुरूत्तरकुरुमनुष्यपुरुषाः सङ्ख्येयगुणाः, क्षेत्रस्य बहुत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्योऽपि हरिवर्षरम्यकवर्षाकर्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः, क्षेत्रस्य बहुत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्योऽपि हरिवर्षरम्यकव-र्षाकर्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः, क्षेत्रस्यातिबहुत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, क्षेत्रस्य समानत्वात्, तेभ्योऽपि हैमवतहैरण्यवताकर्म० सङ्ख्येयगुणाः, क्षेत्रस्याति- बहुत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, क्षेत्रस्य समानत्वात्, तेभ्योऽपि हैमवत हैरण्वता- कर्मभू० सङ्ख्येयगुणाः, क्षेत्रस्याल्पत्वेऽप्यल्पस्थितिकतया प्राचुर्येण लभ्यमानत्वात्, स्वस्थाने तु द्वयेऽपि परस्परं, तुल्याः

—तेभ्योऽपि भरतैरावतकर्म्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः, अजितस्वामिकाले उत्कृष्टपदे (इव) स्वभावत एव भरतैरावतेषु चृ मनुष्यपुरुषाणामतिप्राचुर्येण सम्भवात्, स्वस्थाने च द्वयेऽपि परस्परि तुल्याः, क्षेत्रस्य तुल्यत्वात्, तेभ्योऽपि पूर्वविदेहापरविदेहकर्मभूमकमनुष्यपुरुषाः सङ्ख्येयगुणाः, क्षेत्रबाहुल्यादजितस्वामिकाले इव स्वभावत एव मनुष्यपुरुषाणां प्राचुर्येण सम्भवात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्योऽनुत्तरोपपातिकदेवपुरुषा असङ्ख्येयगुणाः, क्षेत्रपल्योप-मासङ्ख्येयभागवर्त्याकाशप्रदेशप्रमाणत्वात्, तदनन्तरमुपरितनग्रैवेयकप्रस्तटदेवपुरुषा मध्यमग्रैवेयक्रस्तटदेवपुरुषा अधस्तनग्रैवेयकप्रस्तटदेवपरुषा अच्युतकल्पदेवपुरुषा आरणकल्प-देवपुरुषाः प्राणतकल्पदेवपुरुषा आनतकल्पदेवपुरुषा यथोत्तरं सङ्ख्येयगुणाः, भावना प्रागिव, तदनन्तरं सहस्रारकल्पदेवपुरुषा लान्तककल्पदेवपुरुषा ब्रह्मलोक० माहेन्द्रक०- सनत्कुमारक० ईशानक० यथोत्तरमसङ्ख्येयगुणाः, सौधर्म्मकल्प- देवपुरुषाः सङ्ख्येयगुणाः, सौधर्म्मकल्पदेव-पुरुषेभ्यो भवनवासिदेवपुरुषा असङ्ख्येयगुणाः, भावना सर्वत्रापि प्रागिव ।

—तेभ्यः खचरतिर्यग्योनिकपुरुषा असङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्यङ्ख्येयश्रेणि-गताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः स्थलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽपि जलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः, युक्तिरत्रापि तेभ्योऽपि वानमन्तरदेवपुरुषाः सङ्ख्येय-गुणाः, सङ्ख्येययोजनकोटीप्रमाणैकप्रादेशिकश्रेणिमात्रामि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तेषां यावान् द्वात्रिंशत्तमो भागस्तावत्प्रमाणत्वात्, तेभ्यो जयोतिष्कदेवपुरुषाः सङ्ख्येयगुणाः, युक्ति प्रागेवोक्ता ।

मू. *(६५) पुरिसवेदस्स णं भंते ! क्मस्स केवतियं कालं बंधट्ठिती पन्नत्ता ?, गोयमा ! जह० अट्ठ संवच्छराणि, उक्को० दस सागरोवमकोडाकोडीओ, दसवाससयाइं अबाहा, अबाहूणिया कम्मठिती कम्मणिसेओ ।*

पुरिसवेदे णं भंते ! किंपकारे पन्नत्ते ?, गोयमा ! वणदवग्गिजालसमाणे प० सेत्तं पुरिसा ॥

वृ. पुरुषवेदस्थितिर्जघन्यतोऽष्टौ संवत्सराणि, एतन्न्यूनस्य तन्निबन्धनविशिष्टाध्य-वसायाभावतो जघन्यत्वेनास्म्भवात्, उत्कर्षतो दश सागरोपमकोटीकोटयः, दश वर्षशतान्यबाधा, अबाधोना कर्म्मस्थिति कर्मनिषेकः, अस्य व्याख्या प्राग्वत् । तथा पुरुषवेदो भदन्त ! किंप्रकारः प्रज्ञप्तः ?, भग०—गौ० ! दवाग्निज्वालासमानः, प्रारम्भे तीव्रमदनदाह इति भावः,

व्याख्यातः पुरुषाधिकाः, सम्प्रति नपुंसकाधिकारप्रस्तावः, तत्रेदमादिसूत्रम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (६६) *से किं तं नपुंसका ?, नपुंसका तिविहा पन्नत्ता, तंजहा–नेरइयनपुंसका तिरिक्खजोणियनपुंसका मणुस्सजोणियणपुंसका। से किं तं नेरइयनपुंसका ?, नेरइयनपुंसका सत्तविधा पन्नत्ता, तंजहारयणप्प- भापुढविनेरइयनपुसका सक्करप्पभापुढविनेरइयनपुंसका जाव अधेसत्तमपुढविनेरइयनपुंसका, से तं नेरइयनपुंसका।*

से किं तं तिरिक्खजोणियणपुंसका ?, २ पंचविधा पन्नत्ता, तंजहाएगिंदियतिरिक्खजोणियनपुंसका, बेइंदि० तेइंदि० चउ० पंचेंदियतिरिक्खजोणियनपुंसका ॥ से किं तं एगिंदियतिरिक्खजोणियनपुंसका ?, २ पञ्चविधा पन्नत्ता, तं० पु० आ० ते० वा० व० से तं एगिंदियतिरिक्खजोणियणपुंसका।

से किं तं बेइंदियतिरिक्खजोणियनपुंसका ?, २ अनेगविधा पन्नत्ता०, से तं बेइंदियतिरिक्खजोणिया, एवं तेइंदियावि, चउरिंदियावि।

से किं तं पंचेंदियतिरिक्खजोणियनपुंसका ?, २ तिविधा पन्नत्ता, तंजहा–जलरा थलयरा खहयरा। से किं तं जलयरा ?, २ सो चेव पुव्वुत्तभेदो आसालियवज्जितो भाणिव्वो से तें पंचेंदियतिरिक्खजोणियनपुंसका। सो किं तं मणुस्सनपुंसका ?, २ तिविधा पन्नत्ता, तंजहा–कम्मभूमगा अकम्मभूमगा अंतरदीवका, भेदो जाव भा० ॥

वृ. से किं तं नपुंसगा' इत्यादि, अथ के ते नंपुसकाः ?, नपुंसकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–नैरयिकनपुंसकास्तिर्यग्योनिकनपुंसकामनुष्यनपुंसकाश्च ॥ नैरयिकनपुंसकप्रतिपादनार्थमाह–'से किं त'मित्यादि, अथ के ते नैरयिकनपुंसकाः ?, पृथ्वीभेदेन सप्तविधाः प्रज्ञप्ताः, तद्यथा–रत्नप्रभा- पृथ्वीनैरयिकनपुंसकाः शर्कराप्रभापृथ्वीनैरयिकनपुंसकाः यावदधःसप्तमपृथिवीनैरयिकनपुंसकाः, उपसंहारमाह–'से तं नेरइयनपुंसका'।

सम्प्रति तिर्यग्योनिकपुंसक- प्रतिपादनार्थमाह–

'से किं त'मित्यादि प्रश्नसूत्रं सुगमम्, भगवानाह–तिर्यग्योनिकनपुंसकाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा–एकेन्द्रियतिर्यग्योनिकनपुंसका यावत्पञ्चेन्द्रियतिर्यग्योनिकनपुंसकाः ॥ एकेन्द्रियनपुंसकप्रश्नसूत्रं सुगमं, भगवानाह–एकेन्द्रिय- तिर्यग्योनिकनपुंसकाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा–पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अप्कायिकैकेन्द्रिय०तेजस्कायिकैकेन्द्रि० वायुकायिकैकेन्द्रिय० वनस्पति कायिकैकेन्द्रियतिर्यग्योनिकनपुंसकाः, उपसंहारमाह–'सेत्तं एगिंदियतिरिक्खजोणियनपुंसका'।द्वीन्द्रियनपुंसकप्रतिपादनार्थमाह–'बेइंदिए'त्यादि, द्वीन्द्रियतिर्यग्योनिकनपुंसका भदन्त ! कतिविधाः प्रज्ञप्ताः , भगवानाह–गौतम ! अनेकविधाः प्रज्ञप्तास्तद्यथा–''पुलाकिमिया'' इत्यादि पूर्ववत्तावद्वक्तव्यं यावच्चतुरिन्द्रियभेदपरिसमाप्ति।

पञ्चेन्द्रियतिर्यग्योनिकनपुंसका भदन्त ! कतिविधाः प्रज्ञप्ताः ?, गौतम ! त्रिविधाः प्रज्ञप्ताः, तद्यथा–जलचराः स्थलचराः खचराश्च, एते च प्राग्वत्सप्रभेदा वक्तव्याः, उपसंहारमाह–'से तं पंचिंदियतिरिक्खजोनियणपुंसगा'। 'से किं त'मित्यादि, अथ के ते मनुष्यनपुंसकाः ?, मनुष्यनपुंसकास्त्रिविधाः प्रज्ञप्ताः, तद्यथा–कर्मभूमका अकर्मभूमका अन्तरद्वीपाश्च, एतेऽपि प्राग्वत्सप्रभेदा वक्तव्याः। उक्तो भेदः, सम्प्रति स्थितिपरतिपादनार्थमाह–

मू. (६७) *नपुंसकस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जह० अंतो०*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्को० तेत्तीसं सागरोवमाइं।

नेरइयनपुंसगस्स णं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! जह० दसवाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं, सव्वेसिं ठिती भाणियव्वा जाव अधेसत्तमापुढविनेरइया।

तिरिक्खजोणियणपुंसकस्स णं भंते! केवइयं कालं ठिती प०, गोयमा!, जह० अंतो० उक्को० पुव्वकोडी। एगिंदियतिरिक्खजोणियणपुंसक० जह० अंतो० उक्को० बावीसं वाससहस्साइं, पुढविकाइयएगिंदियतिरिक्खजोणियणपुंसकस्स णं भंते! केवतियं, कालं ठिती पन्नत्ता?, जह० अंतो० उक्को० बावीसं वाससहस्साइं, सव्वेसिं एगिंदियनपुंसकाणं ठिती भाणियव्व,, बेइंदियतेइंदियचउरिंदियनपुंसकाणं ठिती भाणितव्वा।

पंचिंदियतिरिक्खजोणियनपुंसकस्स णं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! जह० अंतो० उक्को० पुव्वकोडी, एवं जलयतिरिक्खचउप्पदथलयरउरगपरिसप्पभुयगपरिसप्प-खहयरतिरिक्ख० सव्वेसिं जह० अंतो० उक्को० पुव्वकोडी।

मणुस्सनपुंसकस्स णं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! खेत्तं पडुच्च जह० अंतो० उक्को० पुव्वकोडी, धम्मचरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी। कम्मभूमग-भरहेरवयपुव्वविदेहअवरविदेहमणुस्सनपुंसकस्सवि तहेव, अकम्मभूमगमणुस्सनपुंसकस्स णं भंते! केवतियं कालं ठिती पण्णत्ता?, गोयमा! जम्मणं पडुच्च जह० अंतो० उक्क० अंतोमु० साहरणं पडुच्च जह० अंतो० उक्क० देसूणा पुव्वकोडी, एवं जाव अंतरदीवकाणं॥

नपुंसए णं भंते! नपुंसए त्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं एक्कं समयं उक्को० तरुकालो। नेरइयनपुंसए णं भंते!, २ गोयमा! जह० दस वाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं, एवं पुढवीए ठिती भाणियव्वा। तिरिक्खजोणियनपुंसए णं भंते! ति०?, २ गोयमा! जह० अंतो० उक्को० वणस्सतिकालो, एवं एगिंदियनपुंसकस्स णं, वणस्सतिकाइयस्सवि एवमेव, सेसाणं जह० अंतो० उक्को० असंखिज्जं कालं असंखेज्जाओ उस्सप्पिणिओसप्पिणीओ कालतो, खेत्तओ असंखेज्जा लोया।

बेइंदियतेइंदियचउरिंदियनपुंसकाण य जह० अंतो० उक्को० संखेज्जं कालं। पंचिंदियति-रिक्खजोणियनपुंसए णं भंते!?, गोयमा! जह० अंतो० उक्को० पुव्वकोडिपुहुत्तं।

एवं जलयरतिरिक्खचउप्पदथलचरउरगपरिसप्पभुयगपरिसप्पमहोरगाणवि। मणुस्सनपुंसकस्स णं भंते! खेत्तं पडुच्च जह० अंतो० उक्को० पुव्वकोडिपुहुत्तं, धम्मचरं पडुच्च जह० एक्क समयं उक्को० देसूणा पुव्वकोडी।

एवं कम्मभूमगभरहेरवयपुव्वविदेहअवरविदेहेसुवि भणियव्वं। अकम्मभूमकम-णुस्सनपुंसए णं भंते! जम्मणं (पडुच्च) जह० अंतो० उक्को० मुहुत्तपुहुत्तं, साहरणं पडुच्च जह० अंतो० उक्को० देसूणा पुव्वकोडी। एवं सव्वेसिं जाव अंतरदीवगाणं।

नपुंसकस्स णं भंते! केवतियं कालं अंतरं होइ?, गो० जह० अंतो० उक्को० सागरोवमसयपुहुत्तं सातिरेगं। नेरइयनपुंसकस्स णं भंते! केवतियं कालं अंतरं होइ?, जह० अंतो० उक्को० तरुकालो, रयणप्पभापुढवीनेर० जह० अंतो० उक्को० तरुकालो, एवं सव्वेसि जाव अधेसत्तमा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिरिक्खजोणियणपुंसकस्स जह० अंतो० उक्को० सागरोवमसयपुहुत्तं सातिरेगं । एगिंदियतिरिक्खजोणियनपुंसकस्स जह० अंतो० उक्को० दो सागरोवमसहस्साइं संखेज्जवास-मब्भहियाइं, पुढविआउतेउवाऊणं जह० अंतो० उक्को० वणस्सइकालो । वणस्सतिकाइयाणं जह० अंतो० उक्को० असंखेज्जं कालं जाव असंखेज्जा लोया, सेसाणं बेइंदियादीणं जाव खहयराणं जह० अंतो० उक्को० वणस्सतिकालो । मणुस्सनपुंसकस्स खेत्तं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो, धम्मचरणं पडुच्च जह० एगं समयं उक्को० अनंतं कालं जावअवड्डपोग्गलपरियट्टं देसूणं, एवं कम्मभूमकस्सवि भरतेरवतस्स पुव्वविदेहअवरविदेहकस्सवि ।

अकम्मभूमकमणुस्सणपुंसकस्स णं भंते ! केवतियं कालं० ?, जम्मणं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो, संहरणं पडुच्च जह० अंतो० उक्को० वणस्सतिकालो एवं जाव अंतरदीवगत्ति ॥

वृ. 'नपुंसगस्स णं भंते !' इत्यादि सुगमं, नवरमन्तर्मुहूर्त्तं तिर्यग्मनुष्यापेक्षया द्रष्टव्यं, त्रयस्त्रिंशत्सागरोपमाणि सप्तमपृथिवीनारकापेक्षया ॥ तदेवं सामान्यतः स्थितिरुक्ता, सम्प्रति विशेषतस्तां विचिचिन्तयिषुः प्रथमतः सामान्यतो विशेषतश्च नैरयिकनपुंसकविषयामाह—

'नेरइयनपुंसगस्स ण'मित्यादि, सामान्यतो नैरयिकनपुंसकस्य जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिशत्सागरोपमाणि, विशेषचिन्तायां रत्नप्रभापृथिवीनैरयिकनपुंसकस्य जघन्यतः स्थितिर्दश वर्षसहस्राणि उत्कर्षत एकं सागरोपमं शर्करापृथिवीनैरयिकनपुंसकसस्य जघन्यत एकं सागरोपममुत्कर्षतस्त्रीणि सागरोपमाणि वालुकाप्रभापृथिवीनैरयिकनपुंसकस्य जघन्यतस्त्रीणि सागरोपमाणि उत्कर्षतः सप्त पङ्कप्रभापृथवीनैरयिकनपुंसकस्य जघन्यतः सप्त सागरोपमाणि उत्कर्षतो दश धूमप्रभापृथिवीनैरयिकनपुंसकस्य जघन्यतो दश सागरोपमाणि उत्कर्षतः सप्तदश तमःप्रभापृथिवीनैरयिकनपुंसकस्य जघन्यतः सप्तदश सा० उत्कर्षतो द्वाविंशति अधःसप्तमपृथिवी-नैरयिकनपुंसकस्य जघन्यतो द्वाविंशति सा० उत्कर्षतस्त्रयस्त्रिंशत्, क्वचिदतिदेशसूत्रं 'जहा पन्नवणाए ठिइपदे तहे' त्यादि, तत्राप्येवमेवातिदेशव्याख्याऽपि कर्त्तव्या

सामान्यतस्तिर्यग्योनिकनपुंसकस्य स्थितिर्जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, सामान्यत एकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि, विशेषचिन्तायां पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि अप्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सप्त वर्षसहस्राणि तेजःकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्महूर्त्तमुत्कर्षतस्त्रीणि रात्रिन्दिवानि वातकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि वर्षसहस्राणि वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो दश जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षत एकोनपञ्चाशद् रात्रिन्दिवानि । चतुरिन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः षण्मासाः । सामान्यतः पञ्चेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽ-न्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, विशेषचिन्तायां जलचरस्य स्थलचरस्य खचरस्यापि पञ्चेन्द्रियति-र्यग्योनिकनपुंसकस्य जघन्य- तोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी ।

सामान्यतो मनुष्यनपुंसकस्यापि जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, कर्म्मभूमक-मनुष्यनपुंसकस्य क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, 'धर्मचरणं' बाह्यवेष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिकरितप्रव्रज्याप्रतिपत्तिमङ्गीकृत्य जघन्येनान्तर्मुहूर्त्तं तत ऊध्ध्र्वंमरणादिभावात्, उत्कर्षतो देशोना पूर्वकोटी, संवत्सराष्टकादूर्द्ध्वं प्रतिपद्याजन्मपालनात्, भरतैरावतकर्मकमनुष्यनपुंसकस्य पूर्वविदेहा-परविदेहकर्म्मभूमकमनुष्यनपुंसकस्य च क्षेत्रं धर्म्मचरणं च प्रतीत्य जघन्यत उत्कर्षत-श्चैवमेव वक्तव्यम् । अकर्म्मभूमकमनुष्यनपुंसकस्य जन्म प्रतीत्य जघन्येनान्तर्मुहूर्त्तमुत्क-र्षेणाप्यन्तर्मुहूर्तम्, अकर्म्मभूमौ हि मनुष्या नपुंसकाः संमूर्च्छिमा एव भवन्ति, न गर्भव्युत्क्रान्तिकाः, युगलधर्मिणां नपुंसकत्वाभावात्, संमूर्च्छिमाश्च जघन्यत उत्कर्षतो वाऽन्तर्मुहूर्त्तायुषः, केवलं जघन्यादुत्कृ मन्तर्मुहूर्त्तं बृहत्तरमवसेयं, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो देशोना पूर्वको, संहरणादूर्ध्वमाभरणान्तमवस्थानसम्भवात्, उत्कर्षतो देशोनता च पूर्वकोटया गर्भानिर्गतस्य संहरणस्भवात्, एवं विशेषचिन्तायां हैमवतहैरण्यवताकर्म्मभूमकमनुष्यनपुंसकस्य हरिवर्षरम्यक-वर्षाकर्म्मभूमकमनुष्यनपुंसकस्य देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसकस्य अन्तरद्वीपक-मनुष्यनपुंसकस्य च जन्म संहरणं च प्रतीत्यैवमेव वक्तव्यम् ॥

सम्प्रति कायस्थितिमाह–'नपुंसगे णं भंते!' इत्यादि, नपुंसको भदन्त! नपुंसक इत्यादि, सामान्यतस्तद्वेदापरित्यागेन कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! जघन्यत एकं समयमुत्कर्षतो वनस्पतिकालं, तत्रैकसमयता उपशमश्रेणिसमाप्तौ सत्यामवेदकत्वे सति उपशमश्रेणीतः प्रतिपततो नपुंसकवेदोदयसमयानन्तरं कस्यचिन्मरणात्, तथा मृतस्य चावश्यं देवोत्पादे पुंवेदोदयभावात्, वनस्पतिकालः–आवलिकासङ्ख्येयभागगतसमयराशिप्रमाणासङ्ख्येय-पुद्गलपरावर्त्तप्रमाणः ।

नैरयिकनपुंसककायस्थितिचिन्तायां यदेव सामान्यतो विशेषतश्च स्थितिमानं जघन्यत उत्कर्षतश्चोक्तं तदेवावसातव्यं, भवस्थितिव्यतिरेकेण तत्रान्यस्याः कायस्थितेरसम्भवात् ।

सामान्यतस्तिर्यग्योनिकनपुंसककायस्थितिचिन्तायां जघन्यतोऽन्तर्मुहूर्त्तं, तदनन्तरं मृत्वा गत्यन्तरे वेदान्तरे वा संक्रमात्, उत्कर्षतो वनस्पतिकालः, विशेषचिन्तायामेकेन्द्रियतिर्यग्योनिक-नपुंसककायस्थितावपि जघन्यतोऽन्तर्मुहूर्त्तं भावना प्राग्वत्, उत्कर्षतो वनस्पतिकालो यथोदितरूपः, तत्रापि विशेषचिन्तायां पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसककायस्थितौ जघन्यतोऽन्त-र्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येकालोऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीप्रमाणः, तथा चाह–"उक्कोसेणमसंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालतो, खेत्ततो असंखिज्जा लोगा" एवमप्कायिक-तेजःकायिकवायुकायिककायस्थितिष्वपि वक्तव्यं, वनस्पतिकायिककायस्थितौ तथा वक्तव्यं, यथा सामान्यत एकेन्द्रियकायस्थितौ । द्वीन्द्रियतिर्यग्योनिकनपुंसककायस्थितौ जघन्यतोऽन्त-र्मुहूर्त्तमुत्कर्षतः सङ्ख्येयः कालः, स च सङ्ख्येयानि वर्षसहस्राणि प्रतिपत्तव्यः । एवं त्रीन्द्रियचतुरिन्द्रिय-तिर्यग्योनिकनपुंसककायस्थित्योरपि वक्तव्यम् ।

पञ्चेन्द्रियतिर्यग्योनिकनपुंसककायस्थितौ जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटिपृथक्त्वं, तच्च निरन्तरं सप्तभवान् पूर्वकोट्यायुषो नपुंसकत्वेनानुभवतो वेदितव्यं, तत ऊर्ध्वं त्ववश्यं वेदान्तरे विलक्षणभवान्तरे वा संक्रमात्, एवं जलचरस्थलचरखचरसामान्यतो मनुष्यनुपंसक-कायस्थितिष्वपि वेदितव्यं, कर्मभूमकमनुष्यनपुंसकायस्थितौ क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं उत्कर्षतः पूर्वकोटीपृथक्त्वं भावना प्रागिव, धर्म्मचरणं प्रतीत्य जघन्यत एकं समयमुत्कर्षतो देशोना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वकोटी, अत्रापि भावना पूर्ववत् । एवं भरतैरावतकर्म्मभूमकमनुष्यनपुंसककायस्थितौ पूर्वविदेहापरविदेहकर्म्म-भूमकमनुष्यनपुंसककायस्थितौ च वाच्यं, सामान्यतोऽकर्म्मभू-मनुष्यनपुंसककायस्थितिचिन्तायां जन्म प्रतीत्य जघन्यतोऽन्तर्मुहूर्त तत ऊर्द्ध मरणादिभावात् उत्कर्षतो देशोना पूर्वकोटी । एवं हैमवतहैरण्यवतहरिवर्षरम्यकवर्षदेवकुरूत्तरकुर्वन्तरद्वीप-कमनुष्यनपुंसककायस्थितिष्वपि वक्तव्यम् । तदेवमुक्ता कायस्थिति ।

साम्प्रतमन्तरमभिधित्सुरिदमाह– 'नपुंसगस्स ण'मित्यादि, नपुंसकस्य णमिति वाक्यालङ्कारे भदन्त ! अन्तरं कालतः कियच्चिरं भवति ?, नपुंसको भूत्वा नपुंसकत्वात्परिभ्रष्टः पुनः कियता कालेन नपुंसको भवतीत्यर्थः, भगवानाह–गौतम ! जघन्यतोऽन्तर्मुहूर्तं, एतावता पुरुषादिकालेन व्यवधानात्, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, पुरुषादिकालस्यैतावत एव सम्भवात्, तथा चात्र सङ्ग्रहणिगाथा–

॥ १ ॥ "इत्थिनपुंसा संचिट्ठणेसु पुरिसंतरे य समओ उ ।
पुरिसनपुंसा संचिट्ठणंतरे सागर पुहुत्तं ॥"

अस्या अक्षरगमनिका–संचिट्ठणा नाम सातत्येनावस्थानं, तत्र स्त्रिया नपुंसकसय च सातत्येनावस्थाने पुरुषान्तरे च जघन्यत एकः समयः तथा यथा प्रागभिहितम्–"इत्थीए णं भंते ! इत्थीत्ति कालतो कियच्चिरं होइ ?, गोयमा ! एगेणं आदेसेणं जह० एगं समयं" इत्यादि, तथा–नपुंसगे णं भंते ! नपुंसगत्ति कालतो कियच्चिरं होइ ?, जह० एक्कं समयं" इत्यादि, –

"पुरिसस्स णं भंते ! अंतरं कालतो कियच्चिरं होइ ?, गोयमा ! जहन्नेणं एक्कं समयं" इत्यादि । तथा पुरुषस्य नपुंसकस्य यथाक्रमं संचिट्ठणा–सातत्येनावस्थानमन्तरं चोत्कर्षतः 'सागर-पृथकत्वं' पदैकदेशे पदसमुदायोपचारात् सागरोपमशतपृथकत्वं, तथा च प्रागभिहितम्–"पुरिसे णं भंते ! पुरिसेत्ति कालतो कियच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं सातिरेगं" नपुंसकान्तरोत्कर्षप्रतिपादकं चेदमेवाधिकृतं तत्सूत्रमिति । तथा सामान्यतो नैरयिक-नपुंसकस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तं, सप्तमनरकपृथिव्या उद्वृत्य तन्दुलमत्स्यादिभवेष्वन्तर्मुहूर्तं स्थित्वा भूयः सप्तमनरकपृथिवीगमनस्य श्रवणात्, उत्कर्षतो वनस्पतिकालः, नरकभवादुद्वृत्य पारम्पर्येण निगोदेषु मध्ये गत्वाऽनन्तं कालमवस्थानात्, एवं विशेषचिन्तायां प्रतिपृथिव्यपि वक्तव्यं

तथा सामान्यचिन्तायां तिर्यग्योनिकनपुंसकस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सागरोपमशतपृथक्त्वं, सातिरेकत्वभावना प्रागिव, विशेषचिन्तायां सामान्यत एकेन्द्रियतिर्यग्योनि-क नपुंसकस्यान्तरमन्तर्मुहूर्त्त तावता द्वीन्द्रियादिकालेन व्यवधानात्, उत्कर्षतो द्वे सागरोपमसहस्रे, सङ्ख्येयवर्षाणि त्रसकायस्थितिकालस्य एकेन्द्रियत्वव्यवधायकस्योत्कर्षतोऽप्येतावत् एव सम्भवात्

पृथिवीकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः एवमप्कायिकतेजःकायिकवायुकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकानामपि वक्तव्यं । वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालं यावत्, स चासङ्ख्येयः कालोऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः, किमुक्तं भवति ? –असङ्ख्येयलोकाकाशप्रदेशानां प्रतिसमयमेकैकापहारे यावत्य उत्सर्प्पिण्यवसर्पिण्यो भवन्ति तावत्य इत्यर्थः, वनस्पतिभवात्प्रच्युतस्यान्यत्रोत्कर्षत एतावन्तं कालमवस्थानसम्भवात्,

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

तदनन्तरं संसारिणो नियमेन भूयो वनस्पतिकायिकत्वेनोत्पादभावात्।

द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियतिर्यग्योनिकनपुंसकानां जलचरस्थल खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसकानां सामान्यतो मनुष्यनपुंसकस्य च जघन्यतोऽन्तरमन्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं, स चानन्तः कालो वनस्पतिकालो यथोक्तस्वरूप प्रतिपत्तव्यः, कर्मभूमकमनुष्यनपुंसकस्यान्तरं क्षेत्रं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः, धर्म्मचरणं प्रतीत्य जघन्यत कं समयं यावत्, लब्धिपातस्य सर्वजघन्यस्यैकसामयिकत्वात्, उत्कर्षतोऽनन्तं कालं, तमेवानन्तं कालं निर्द्धारयति– "अनंताओ उस्सप्पिणीओप्पिणीओ कालओ, खेत्तओ अनंता लोगा अवड्ढं पुग्गलपरियट्टं देसूण" मिति, एवं भरतैरावतपूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकानामपि क्षेत्रं धर्म्मचरणं च प्रतीत्य जघन्यमुत्कृष्टं चान्तरं प्रत्येकं वक्तव्यम्।

अकर्म्मभूमकमनुष्यनपुंसकस्य जन्म प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं, एतावता गत्यन्तरादिकालेन व्यवधानभावात्, उत्कर्षतो वनस्पतिकालः, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं, जघन्यतोऽन्तर्मुहूर्त्तं, एतावता गत्यन्तरादिकालेन व्यवधानभावात्, उत्कर्षतो वनस्पतिकालः, संहरणं प्रतीत्य जघन्यतोऽन्तर्मुहूर्त्तं, तच्चैवं–कोऽपि कर्म्मभूमकमनुष्यनपुंसकः केनाप्यकर्मभूमौ संहृतः, स च मागधपुरुषदृष्टान्तबलादकर्म्मभूमक इति व्यपदिश्यते, ततः कियत्कालानन्तरं तथाविधबुद्धिपरावर्त्तनभावतो भूयोऽपि कर्म्मभूमौ संहृतः, तत्र चान्तर्मुहूर्त्तं धृत्वा पुनरप्यकर्मभूमावानीतः, उत्कर्षतो वनस्पतिकालः। एवं विशेषचिन्तायां हैमवतहैरण्यवतहरिवर्षरम्यकदेवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसकानामन्तरद्वीपकमनुष्यनपुंसकस्य च जन्म संहरणं च प्रतीत्य जघन्यत उत्कर्षतश्चान्तरं वक्तव्यम्। तदेवमुक्तमन्तरमधुनाऽल्पबहुत्वमाह–

मू. (६८) *एतेसि णं भंते! नेरइयणपुंसकाणं तिरिक्खजोणियनपुंसकाणं मणुस्सनपुंसकाण य कयरे कयरेहिन्तो जाव विसेसाहिया वा?, गोयमा! सव्वथोवा मणुस्सनपुंसका नेरइनपुंसगा असंखेज्जगुणा तिरिक्खजोणियनपुंसका अनंतगुणा।*

एतेसि णं भंते! रयणप्पहापुढविनेरइयणपुंसकाणं जाव अहेसत्तमपुढविने० य कयरे २ हिंतो जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा अहेसत्तमपुढविनेरइयनपुंसका छट्ठपुढविणे० असंखेज्जगुणा जाव दोच्चपुढविने० असंखेज्जगुणा इमीसे रयणप्पभाए पुढवीए णेरइयणपुंसका असंखेज्जगुणा।

एतेसि णं भंते! तिरिक्खजोणियणपुंसकाणं एगिंदियतिरिक्खजोणियनपुंसकाणं पुढविकाइय जाव वणस्सतिकाइयएगिंदियतिरिक्खजोणियनपुंसकाणं य कतरे२ हिंतो जाव विसेसाहिया वा?, गोयमा! सव्वथोवा खहयरतिरिक्खजोणियनपुंसका, थलयरतिरिक्खिजोणियनपुंसका संखेज्ज० जलयरतिरिक्खजोणियनपुंसका संखेज्ज० चतुरिंदितिरि० बिसेसाहिया तेइंदियति० विसेसाहिया बेइंदियति० विसेसा० तेउक्काइयएगिंदियतिरिक्खा असंखेज्जगा पुढविक्काइयएगिंदियतिरिक्खजोणिया विसेसाहिया, एवं आउवाउवणस्सतिकाइयएगिंदिय तिरिक्खजोणियनपुंसका अनंतगुणा। एतेसि णं भंते! मणुस्सनपुंसकाणं कम्मभूमिनपुंसकाणं अकम्मभूमिनपुंसकाणं अंतर-दीवकाण य कतरे कयरेहिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा अंतरदीवगअकम्मभूमगमणुस्सण-पुंसका देवकुरुउत्तरकुरुअकम्मभूमगा दोवि संखेज्जगुणा एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व पुव्वविदेहअवरविदेहकम्म० दोवि संखेज्ञगुणा।

एतेसि णं भंते ! नेरइयनपुंसकाणं रयणप्पभा पुढविनेरइयनपुंसकाणं जाव अधेसत्तमा-पुढविनेरइयणपुंसकाणं तिरिक्खजोणियनपुंसकाणं एगिंदियतिरिक्खजोणियाणं पुढविकाइय-एगिंदियतिरिक्खजोणियनपुंसकाणं जाव वणस्सतिकाइय० बेइंदियतेइंदियचतुरिंदिय-पंचिंदियतिरिक्खजोणियनपुंसकाणं जलयराणं थलयराणं खहयराणं मणुस्सनपुंसकाणं कम्मभूमिकाणं अकम्मभूमिकाणं अंतरदीवकाण य कतरे २ हिंतो अप्पा ४, गोयमा ! सव्वत्थोवा अधेसत्तमपुढविनरइयनपुंसका छट्ठपुढविनेरइयनपुंसका असंखेज्ञ० जाव दोच्चपुढविणेरइणपुं० असंखे० ।

—अंतरदीवगमणुस्सनपुंसका असंखेज्ञगुणा, देवकुरुउत्तरकुरुअकम्मभूमिक० दोवि संखेज्ञगुणा जाव पुव्वविदेहअवरविदेहकम्मभूमगमणुस्सनपुंसका दोवि संखेज्ञगुणा, रयणप्प-भापुढविनेरइयनपुंसका असंखे० खहयरपंचेंदियतिरिक्खजोणियनपुंसका असं० थलयर० संखिज्ञ० जलयर० संखिज्ञगुणा चतुरिंदियतिरिक्खजोणिय० विसेसाहिया तेइंदिय० विसे० बेइंदिय० विसे० तेउक्काइयएगिंदिय० असं० पुढविकाइयएगिंदिय० विसेसाहिया आउक्काइय० विसे० वाउकाइय० विसेसा० वणस्सइकाइयएगिंदियतिरिक्खजोणियनपुंसका अनंतगुणा ।।

वृ. 'एएसि ण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोका मनुष्यनपुंसकाः, श्रेण्यसङ्ख्येयभागवर्त्तिप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि नैरयिकनपुंसका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशौ तद्गतप्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात्तेषां तेभ्यस्तिर्यग्योनिकनपुंसका अनन्तगुणाः, निगोदजीवानामनन्तत्वात् ।

सम्प्रति नैरयिकनपुंसकविषयमल्पबहुत्वमाह—'एएसि ण' मित्यादि, सर्वस्तोका अधः—सप्तमपृथिवीनैरयिकनपुंसकाः, अभ्यन्तरश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि षष्ठपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि पञ्चमपृथ्वीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि चतुर्थपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि तृतीयपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्योऽपि द्वितीयपृथिवीनैरयिकनपुंसका असङ्ख्येयगुणाः, सर्वेषामप्येतेषां पूर्वपूर्वनैरयिकपरिमाणहेतुश्रेण्यसङ्ख्येयभागापेक्षयाऽसङ्ख्येय-गुणासङ्ख्येयगुणश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् ।

द्वितीयपृथिवीनैरयिकनपुंसकेभ्योऽस्यां रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशौ तद्गतप्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्त आकाश-प्रदेशास्तावत्प्रमाणत्वात्, प्रतिपृथिवी च पूर्वोत्तरपश्चिमदिग्भाविनो नैरयिकाः सर्वस्तोकाः, तेभ्यो दक्षिणदिग्भाविनोऽसङ्ख्येयगुणाः, पूर्वपूर्वपृथिवीगतदक्षिणदिग्भाविभ्योऽप्युत्तरस्यामुत्तरस्यां पृथिव्यामसङ्ख्येयगुणाः पूर्वोत्तरपश्चिमदिग्भाविनः, तथा चोक्तं प्रज्ञापनायाम्—

"दिसाणुवाएणं सव्वथोवा अहेसत्तमपुढविनेरइया पुरत्थिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्ञगुणा। दाहिणेहिंतो अहेसत्तमपुढविनेरइएहिंतो छट्ठीए तमाए पुढवीए नेरइया पुरत्थिम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो तमापुढविनेरइएहिंतो पंचमाए पुढवीए नेरइया पुरत्थिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो धूमप्पभापुढविनेरइएहिंतो चउत्थीए पंकप्पभाए पुढवीए नेरइया पुरत्थिम-पच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो पंकप्पभापुढविनेरइएहिंतो तइयाए वालुयप्पभाए पुढवीए नेरइया पुरत्थिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो वालुयप्पभापुढविनेरइएहिंतो दुइयाए सक्करप्पभाए पुढवीए नेरइया पुरत्थिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दाहिणिल्लेहिंतो सक्करप्पभा-पुढवीनेरइएहिंतो इमीसे रयणप्पभाए पुढवीए नेरइया पुरत्थिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा''। सम्प्रति तिर्यग्योनिकनपुंसकविषयमल्पबहुत्वमाह–

'एएसि णं'मित्यादि, सर्वस्तोकाः खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसकाः, प्रतरासङ्ख्येय-भागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः स्थलचरतिर्यग्योनिकनपुंसकाः सङ्ख्येयगुणाः, बृहत्तरप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगतनभःप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि जलचरतिर्यग्योनिकनपुंसका विशेषाधिकाः, असङ्ख्येययोजनकोटीकोटीप्रमाणाकाश-प्रदेशराशिप्रमाणासु घनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाण-त्वात्, तेभ्यस्त्रीन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः, प्रभूततरश्रेणिगताकाशप्रदेशराशि-प्रमाणत्वात्, तेभ्योऽपि द्वीन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः, प्रभूततमश्रेणिगताकाश-प्रदेशराशिमानत्वात्, तेभ्यस्तेजस्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः, सूक्ष्मबादरभेदभिन्नानां तेषामसङ्ख्येयलोकाकाशप्रदेशपरिमाणत्वात्, तेभ्यः पृथिवीकायि-कैकेन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽप्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाश-प्रदेशमानत्वात्, तेभ्योऽपि वायुकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात्, तेभ्योऽपि वनस्पतिकायिकैकेन्द्रिय-तिर्यग्योनिकनपुंसका अनन्तगुणाः, अनन्तलोकाकाशप्रदेशराशिप्रमाणत्वात्।

अधुना मनुष्यनपुंसकविषयमल्पबहुत्वमाह– 'एएसि णं'मित्यादि, सर्वस्तोका अन्तरद्वीप-जमनुष्यनपुंसकाः, एते च संमूर्च्छनजा द्रष्टव्याः, गर्भव्युत्क्रान्तकमनुष्यनपुंसकानां तत्रासम्भवात्, संहृतास्तु कर्म्मभूमिजास्तत्र भवेयुरपि, तेभ्यो देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, तद्गतगर्भजमनुष्याणामन्तरद्वीपजगर्भजमनुष्येभ्यः सङ्ख्येयगुणत्वात्, गर्भज-मनुष्योच्चाराद्याश्रयेण च संमूर्च्छिममनुष्याणामुत्पादात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, एवं तेभ्यो हरिवर्षरम्यकवर्षाकर्मभूमकमनुष्यनपुंसाः सङ्ख्येयगुणाः स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः तेभ्योऽपि हैमवतहैरण्यवतवर्षाकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्यो भरतैरावतवर्षकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्यः पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकाः सङ्ख्येयगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, युक्ति सर्वत्रापि तथैवानुसर्त्तव्या।

सम्प्रति नैरयिकतिर्यग्मनुष्यविषयमल्पबहुत्वमाह–'एएसि णं भंते!' इत्यादि, सर्वस्तोका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधःसप्तमपृथिवीनैरयिकनपुंसकाः, तेभ्यः षष्ठपञ्चमचतुर्थतृतीयपृथिवीनैरयिकनपुंसका यथोत्तरमसङ्ख्येयगुणाः, द्वितीयपृथिवीनैरयिकनपुंसकेभ्योऽन्तरद्वीपजमनुष्यनपुंसका असङ्ख्येयगुणाः, एतदसङ्ख्येयगुणत्वं संमूर्च्छनजमनुष्यापेक्षं, तेषां नपुंसकत्वादेतावतां च तत्र संमूर्च्छनसम्भवात्, तेभ्यो देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यनपुंसका हरिवर्षरम्यकवर्षाकर्म्मभूमकमनुष्यनपुंसका हैमवतहैरण्यवताकर्म्मभूमकमनुष्यनपुंसका भरतैरावतकर्म्मभूमकमनुष्यनपुंसकाः पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसका यथोत्तरं सङ्ख्येयगुणाः, स्वस्थानचिन्तायां तु द्वयेऽपि परस्परं तुल्याः। पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यनपुंसकेभ्योऽस्यां प्रत्यक्षत उपलभ्यमानायां रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्यः खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः, तेभ्यः स्थलचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका जलचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका यथोत्तरं सङ्ख्येयगुणाः, जलचरपञ्चेन्द्रियनपुंसकेभ्यश्चतुरिन्द्रियत्रीन्द्रियद्वीन्द्रियतिर्यग्योनिकनपुंसका विशेषाधिकाः, द्वीन्द्रियतिर्यग्योनिकनपुंसकेभ्यतेजस्कायिकैकेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः, तेभ्यः पृथिव्यम्बुवायुतिर्यग्योनिकनपुंसका यथोत्तरं विशेषाधिकाः, वाय्वेकेन्द्रियतिर्यग्योनिकनपुंसकेभ्यो वनस्पतिकायिकैकेन्द्रियतिर्यग्यनोकनपुंसका अनन्तगुणाः, युक्ति सर्वत्रापि प्रागुक्तानुसारेण स्वयं भावनीया।

सम्प्रति नपुंसकवेदकर्म्मणो बन्धस्थितिं नपुंसकवेदस्य प्रकारं चाह--

मू. (६९) *नपुंसकवेदस्स णं भंते! कम्मस्स केवइयं कालं बंधठिई पन्नत्ता?, गोयमा! जह० सागरोवमस्स दोन्नि सत्तभागा पलिओवमस्स असंखेज्जतिभागेण ऊणगा उक्को० वीसं सागरोवमकोडाकोडीओ।*

दोण्णि य वाससहस्साइं अबाधा, अबाहूणिया कम्मठिती कम्मनिसेगो। नपुंसकवेदे णं भंते! किंपगारे पण्णत्ते?, गोयमा! महाणगरदाहसमाणे पण्णत्ते समणाउसो!, से तं नपुंसका॥

वृ. 'नपुंसकवेयस्स णं भंते!' कम्मस्स' इत्यादि, प्राग्वद्भावनीयं, नवरं महानगरदाहसमानमिति सर्वावस्थासु सर्वप्रकारं, मदनदाह इत्यर्थः। सम्प्रत्यष्टावल्पहबहुत्वानि वक्तव्यानि,

तद्यथा–प्रथमं सामान्येन तिर्यकस्त्रपुरुषनपुंसक- प्रतिबद्धम्, एवमेव मनुष्यप्रतिबद्धं द्वितीयं, देवस्त्रीपुरषनारकनपुंसकप्रतिबद्धं तृतीयं, सकलसम्मिश्रं चतुर्थं, जलचर्यादिविभागतः पञ्चमं, कर्म्मभूमिजादिमनुष्यस्त्रयदि विभागतः षष्ठं, भवनवास्या- दिदेव्यादिविभागतः सप्तमं, जलचर्यादिविजातीयव्यक्तिव्यापकमष्टमं। तत्र प्रथममभिधित्सुराह–

मू. (७०) *एतेसि णं भंते! इत्थीणं पुरिसाणं नपुंसकाण य कतरे२हिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा पुरिसा इत्थीओ संखि० नपुंसका अनंत०।*

एतेसि णं भंते! तिरिक्खजोणिइत्थीणं तिरिक्खजोणियपुरिसाणं तिरिक्खजोमियनपुंसकाण य कयरे २ हिंतो अप्पा वा ४?, गोयमा! सव्वत्थोवा तिरिक्खजोणियपुरिसा तिरिक्खजोणिइत्थीओ असंखे० तिरक्खजो० नपुंसगा अनंतगुणा॥

--एतेसि णं भंते! मणुस्सित्थीणं मणुस्सपुरिसाणं मणुस्सणपुंसकाण य कयरे २ हिन्तो अप्पा वा ४?, गोयमा! सव्व० मणुस्सपुरिसा मणुस्सित्थीओ संखे० मणुस्सनपुंसका असंखेज्जगुणा॥

--एतेसिणं भंते! देवित्थीणं देवपुरिसाणं नेरइयपुंसकाण य कयरे २ हिंतो अप्पा वा ४?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा ! सव्व० मणुस्स पु० मणुस्सित्थिओ संखे० मणुस्सने० असं० तिरिक्खजोणित्थीणं तिरिक्खजोणियपुरि० तिरिक्खजो० नपुंसकाणं मणुस्सित्थीणं मणुस्सपुरिसाणं मणुस्सनपुंसकाणं देवित्थीणं देवपुरिसाणं नेरइयनपुंसकाण य कतरे २ हिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा मणुस्सपुरिसा मणुस्सित्थीओ संखे० मणुस्सनपुंसका असं० नेरइयणपुंसका असं० तिरिक्खजोणियपुरिसा असं० तिरिक्खजोणित्थियाओ संखेज्ज० देवपुरिसा असं० देवित्थियाओ संखि० तिरिक्खजोणियनपुंसका अनंतगुणा ॥

एतेसि णं भंते ! तिरिक्खजोणित्थीणं जलयरीणं थलयरीणं खहयरीणं तिरिक्खजोणियपुरिसाणं जलयराणं थलयराणं खहयराणं तिरिक्खजो० नपुंसकाणं एगिंदियतिरिक्खजोणियणपुंसकाणं पुढविकाइयएगिंदियतिरिक्खजो० नपुंसकाणं जाव वणस्सतिकाइय० बेइंदियतिरिक्खजोणिणपुंसकाणं तेइंदिय० चउरिंदिय० पंचेंदियतिरिक्खजोणियनपुंसकाणं जलयराणं थलयराणं खहयराणं कतरे २ हिंतो जाव विसेसाहिया वा । गोयमा ! सव्वत्थोवा खहयरतिरिक्खजोणियपुरिसा खहयरतिरिक्खजोणित्थियाओ संखेज्ज० थलयरपंचिंदियतिरिक्खजोणियपुरिसा संखे० थलयरपंचिंदियतिरिक्खजोणित्थियाओ संखे० जलयरतिरिक्खजो० पुरिसा संखि० जलयरतिरिक्खजोणित्थीयाओ संखेज्जगु० खहयर- पंचिंदियतिरिक्खजो० नपुंसका असंखे० थलयरपंचिंदियतिरिक्खजोणि० नपुंसगा संखि० जलयरपंचेंदियतिरिक्खजोणियनपुंसका संखे० चउरिंदियतिरि० विसेसाहिया तेइंदियनपुंसका विसेसाहिया बेइंदियनपुंसका विसेसा० तेउक्काइयएगिंदियतिरिक्खजोणियणपुंसका असं० पुढवि० नपुंसका० विसेसाहिया आउ० विसेसाहिया वाउ० विसेसा० वणप्फति० एगिंदियनपुंसका अनंतगुणा ॥

एतेसि णं भंते ! मणुस्सित्थीणं कम्मभूमियाणं अकम्मभूमगाणं अंतरदीवियाणं मणुस्सपुरिसाणं कम्मभूमकाणं अकम्मभूमकाणं अंतरदीवकाणं मणुस्सनपुंसकाणं कम्मभूमाणं अकम्म० अंतरदीविकाण य कयरे २ हिंतो अप्पा वा ४ ?

गोयमा ! अंतरदीवगा मणुस्सित्थियाओ मणुस्सपुरिसा य एते णं दुन्नि य तुल्लावि सव्वत्थोवा देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सित्थियाओ मणुस्सपुरिसा एते णं दोन्निवि तुल्ला संखे० हरिवासरम्मवासअकम्मभूमकमणुस्सित्थियाउ मणुस्सपुरिसा य एतेसि णं दोन्निवि तुल्ला संखे० हेमवतहेरण्णवतअकम्मभूमकमणुस्सित्थियाओ मणुस्सपुरिसाण य दोवि तुल्ला संखे० भरहेरवतकम्मभूमगमणुस्सपुरिसा दोवि संखे० भरहेरवतकम्ममणुस्सित्थियाओ दोवि संखे० ।

पुव्वविदेहअवरविदेहकम्मभूमगमणुस्सपिरिसा दोवि संखे० पुव्वविदेहअवरविदेहकम्मभूमगमणुस्सित्थियाओ दोवि संखे० ।

अंतरदीवगमणुस्सनपुंसका असंखे० देवकुरुउत्तरकुरुअकम्मभूमकमणुस्सनपुंसका दोवि संखेज्जगुणा ए तहेव जाव पुव्वविदेहकम्मभूमकमणुस्सनपुंसका दोवि संखेज्जगुणा ।

एतासि णं भंते ! देवित्थीणं भवणवासीणीणं वाणमन्तरीणीणं जोइसिणीणं वेमाणिणीणं देवपुरिसाणं भवणवासिणं जाव वेमाणियाणं सोधम्मकाणं जाव गेवेज्जकाणं अनुत्तरोववातियाणं नेरइयनपुंसकाणं रयणप्पभापुढविनेरइयणपुंसगाणं जाव अहेसत्तमपुढविनेरइय० कतरे २ हिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा अनुत्तरोववातियदेवपुरिसा उवरिमगेवेज्जदेवपुरिसा संखेज्जगुणा

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तं चेव जाव आणते कप्पे देवपुरिसा संखेज्जगुणा ।

अहेसत्तमाए पुढवीए नेरइयणपुंसका असंखेज्जगुणा, छट्ठीए पुढवीए नेरइय० असंखेज्जगुणा सहस्सारे कप्पे देवपुरिसा असंखेज्जगुणा महासुक्क कप्पे देवा असंखेज्जगुणा पंचमाए पुढवीए नेरइयणपुंसका असंखेज्जणा लंतए कप्पे देवा असंखेज्जगुणा चउत्थीए पुढवीए नेरइया असंखेज्जगुणा बंभलोए कप्पे देवपुरिसा असंखेज्जगुणा तच्चाए पुढवीए नेरइय० असंखेज्जगुणा माहिंदे कप्पे देवपुरिसा असंखेज्जगुणा सणंकुमारकप्पे देवपुरिसा असंखेज्जगुणा दोच्चाए पुढवीए नेरइया असंखेज्जगुणा, इसाणे कप्पे देवपुरिसा असंखेज्जगुणा ईसाणे कप्पे देवित्थियाओ संखेज्जगुणाओ ।

सोधम्मे (कप्पे) देवपुरिसा संखेज्ज० सोधम्मे कप्पे देवित्थियाओ संखे० भवणवासिदेवपुरिसा असंखेज्जगुणा भवणवासिदेवित्थियाओ संखेज्जगुणाओ इमीसे रयणप्पभापुढवीए नेरइया असंखेज्जगुणा वाणमंतरदेवपुरिसा असंखेज्जगुणा वाणमंतरदेवित्थियाओ संखेज्जगुणाओ जोतिसिय-देवपुरिसा संखे० जोतिसियदेवित्थियाओ संखे० । एतासि णं भंते ! तिरिक्खजोणित्थीणं जलयरीणं थलयरीणं खहयरीणं तिरिक्खजोणिय- पुरिसाणं जलयराणं थलयराणं खहयराणं तिरिक्खजोणियनपुंसकाणं एगिंदियतिरिक्खजोणिय- पुंसकाणं पुढविक्कइयएगिंदियति० जो० नपुंस० आउक्काइयएगिंदिय० जो० नपुंस० जाव वणस्सतिकाइयएगिंदियति० जो० नपुंस० बेइंदियति० जो० नपुंस० तेइंदियति० जो० नपुंस० चउरिंदियति० जो० नपुंस० पंचेंदियति० जो० नपुंस० जलयराणं थलयराणं खहयराणं मणुस्सित्थीणं कम्मभूमियाणं अकम्मभूमियाणं अंतरदीवियाणं मणुस्सपुरिसाणं कम्मभूमियाणं अकम्म० अंतरदीवयाणं मणुस्सणपुंसकाणं कम्मभूमिकाणं अकम्मभूमिकाणं अंतरदीवकाणं देवित्थीणं भवणवासिणीणं वाणमंतरीणीणं जोतिसिणीणं वेमाणिणीणं देवपुरिसाणं भवणवासिणीणं वाणमंतराणं रयणप्पभापुढविनेरइय-नपुंसकाणं जाव अहेसत्तमपुढविनेरइयन- पुंसकाण य कयरे २ हिंतो अप्पा वा ४ ?

—गोयमा ! अंतरदीवअकम्मभूमकमणुस्सित्थीओ मणुस्सपुरिसा य, एते णं दोवि तुल्ला सव्वत्थोवा, देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सइत्थीओ पुरिसा य एते णं दोवि तुल्ला संखे० एवं हरिवासरम्मगवास० एवं हेमवतहेरण्णवयभरहेरवयकम्मभूमगमणुस्सपुरिसा दोवि संखे० भरहेरवतकम्म० मणुस्सित्थीओ दोवि संखे० पुव्वविदेहअवरविदेहकम्मभूमकमणुस्सपुरिसा दोवि संखे०, पुव्वविदेहअवरविदेहकम्म० मणुस्सित्थियाओ दोवि संखे० अनुत्तरोववातियदेवपुरिसा असंखेज्जगुणा उवरिमगेवेज्ञा देवपुरिसा संखे० जाव आणते कप्पे देवपुरिसा संखे० ।

अधेसत्तमाए पुढवीए नेरइयनपुंसका असंखे० छट्ठीए पुढवीए नेरइयनपुंसका असं० सहस्सरे कप्पे देवपुरिसा असंखे० महासुक्क कप्पे देवपुरिसा असंखे० महासुक्क कप्पे देव० असं० पंचमाए पुढवीए नेरइनपुंसका असं० लंतए कप्पे देवपु० असं० चउत्थीए पुढवीए नेरइयनपुंसका असं० बंभलोए कप्पे देवपुरिसा असं० तच्चाए पुढवीए नेरइयण० असं० माहिंदे कप्पे देवपु० असंखे० सणंकुमारे कप्पे देवपुरिसा असं० दोच्चाए पुढवीए नेरइयनपुंसका असं० अंतरदीवगअकम्मभूमगमणुस्सणपुंसका असंखे० देवकुरुउत्तरकुरुअकम्मभूमगमणुस्सनपुंसका दोवि संखे० एवं जाव विदेहत्ति । ईसाणे कप्पे देवपुरिसा असं० ईसाणकप्पे देवित्थियाओ संखे० सोधम्मे कप्पे भवणवासिदेवित्थियाओ संखिज्जगुणाओ इमीसे रयणप्पभाए पुढवीए नेरइयनपुंसका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असं० खहयरतिरिकखजोणियपुरिसा संखेज्जगुणा खहयरतिरिक्खजोणित्थियाओ संखे० थलयरतिरिक्खजोणियपुरिसा संखे० थलयरतिरिक्खजोणित्थियाओ संखे० जलयरतिरिक्खपुरिसा संखे० जलयरतिरिक्खजोणित्थियाउ संखेज्जगुणा।

वाणमंतरदेवपुरिसा संखे० वाणमंतरदेवित्थियाओ संखे० जोतिसियदेवपुरिसा संखे० जोतिसियदेवित्थियाओ संखे० खहयरपंचेंदियतिरिक्खजोणियनपुंसका संखे० थलयरणपुंसका संखे० जलयरणपुंसका संखे० चतुरिंदियनपुंसका विसेसाहिया तेइंदिय० विसेसा० बेइंदिय० विसेसा० तेउक्काइयएगिंदियतिरिक्खजोणियनपुंसका असं० पुढवी० विसेसा० आऊ० विसेसा० वाऊ० विसेसा० वणप्फतिकाइयएगिंदियतिरिक्खजो० नपुंसका अनंतगुणा॥

वृ. 'एयासि णं भंते ! तिरिक्खजोणियइत्थीणं' इत्यादि, सर्वस्तोकास्तिर्यकपुरुषाः, तेभ्यस्तिर्यकस्त्रियः सङ्ख्येयगुणास्त्रिगुणत्वात्, ताभ्यस्तिर्यगनपुंसका अनन्तगुणाः, निगोदजीवानामनन्तानन्तत्वात्। सम्प्रति द्वितीयमल्पबहुत्वमाह— 'एयासि णं भंते !' इत्यादि, सर्वस्तोका मनुष्यपुरुषाः सङ्ख्येयकोटीकोटीप्रमाणत्वात्, तेभ्यो मनुष्यस्त्रियः सङ्ख्ये०ः सप्तविंशतिगुणत्वात्, ताभ्यो मनुष्यन० असङ्ख्येय०ः श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणत्वात्।

सम्प्रति तृतीयमल्पबहुत्वमाह— 'एयासि णं भंते ! देवित्थीण' मित्यादि, सर्वस्तोका नैरयिकनपुंसका अङ्गुलमात्रक्षेत्रप्रदेशराशौ स्वप्रथमवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासुधनीकृतस्य लोकस्य एकप्रदाशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात्, तेभ्यो देवपुरुषा असङ्ख्येयगुणा असङ्ख्येययोजनकोटीकोटीप्रमाणायां सूचौ यावन्तो प्रदेशास्तावत्प्रमाणासुघनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्, तेभ्यो देवस्त्रियः सङ्ख्येयगुणा द्वात्रिंशद्गुणत्वात्।

सम्प्रति सकलसन्मिश्रं चतुर्थमल्पबहुत्वमाह— 'एयासि ण' मित्यादि, सर्वस्तोका मनुष्यपुरुषास्तेभ्यो मनुष्यस्त्रियः सङ्ख्येयगुणाः, ताभ्यो मनुष्यनपुंसका असङ्ख्येयगुणाः, अत्र युक्ति प्रागुक्ता, तेभ्यो नैरयिकनपुंसका असङ्ख्येयगुणा असङ्ख्येयश्रेण्याकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यस्तिर्यग्योनिकपु० असङ्ख्ये० प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यस्तिर्यग्योनि- कस्त्रियः सङ्ख्येयगुणास्त्रगुणत्वात्, ताभ्यो देवपुरुषाः सङ्ख्ये०ः प्रभूततरप्रतरासङ्ख्येय- भागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमा० तेभ्यो देवस्त्रियः सङ्ख्ये० द्वात्रिंशद्गुणत्वात्, ताभ्यस्तिर्यग्योनिकन० अनन्तगुणा निगोदजीवानामनन्तानन्तत्वात्।

सम्प्रति जलचर्यादिविभागतः पञ्चममल्पबहुत्वमाह— 'एयासि णं भंते !' इत्यादि, सर्वस्तोकाः खचरपञ्चेन्द्रियतिर्यग्योनिकपुरुषाः, तेभ्यः खचरतिर्यग्योनिकस्त्रियः सङ्ख्येयगुणास्त्रिगुणत्वात्, ताभ्यः स्थलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः, तेभ्यस्तत्स्त्रियः सङ्ख्येयगुणास्त्रिगुणत्वात्, ताभ्यो जलचरतिर्यग्योनिकपुरुषाः सङ्ख्येयगुणाः, तेभ्यो जलचरतिर्यग्योनिकस्त्रियः सङ्ख्येयगुणास्त्रिगुणत्वात्, ताभ्यः खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका असंख्येयगुणाः, तेभ्यः स्थलचरजलचरतिर्यग्योनिकनपुंसका यथाक्रमं सङ्ख्येयगुणाः, ततश्चतुरिन्द्रियत्रीन्द्रियद्वीन्द्रिया यथोत्तरं विशेषाधिकाः, ततस्तेजःकायिकैकेन्द्रियतिर्यग्यनिकनपुंसका असङ्ख्येयगुणाः, ततः पृथिव्यम्बुवा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युकायिकै- केन्द्रियतिर्यग्योनिकनपुंसका यथोत्तरं विशेषाधिकाः, ततो वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अनन्तगुणाः ।

सम्प्रति कर्म्मभूमिजादिमनुष्यस्त्र्यादिविभागतः षष्ठमल्पबहुत्वमाह-'एयासि णं भंते !' इत्यादि, सर्वस्तोका अन्तरद्वीपकमनुष्यस्त्रियोऽन्तरद्वीपकमनुष्यपुरुषाश्च, एते च द्वयेऽपि परस्परं तुल्याः, तत्रत्यस्त्रिपुंसानां युगलधर्मोपेतत्वात्, तेभ्यो देवकुरूत्तरकुर्वकर्म्मभूमकमनुष्यस्त्रियो मनुष्य-पुरुषाश्च सङ्ख्येयगुणाः, युक्तिरत्र प्रागेवोक्ता, स्वस्थाने तु परस्परं तुल्याः, एवं हरिवर्षरम्यक-पुरुषस्त्रियो हैमवतहैरण्यवतमनुष्यपुरुषस्त्रियश्च यथोत्तरं सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, ततो भरतैरावतकर्म्मभूमकमनुष्या द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो भरतैरावतकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः, सप्तविंशतिगुत्वात्, स्वस्थाने तु परस्परं तुल्याः, ताभ्यः पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषा द्वयेऽपि सङ्ख्येयगुणाः, सप्तविंशति-गुणत्वत्, स्वस्थाने तु परस्परं तुल्याः, ताभ्यः पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषा द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने परस्परं तुल्याः, तेभ्यः पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः, सप्तविंशतिगुणत्वात्, स्वस्थाने तु परस्परं तुल्याः, तेभ्योऽन्तरद्वीपकमनुष्यनपुंसका असङ्ख्येयगुणाः, श्रेण्यसङ्ख्येयभागगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यो देवकुरूत्तरकुर्वकर्म्म- भूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, ततो हरिवर्षरम्यवर्षा- कर्म्मभूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थने तु परस्परं तुल्याः, तेभ्यो हैमवतहैरण्य- वताकर्म्मभूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो भरतैरावत- कर्म्मभूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्योऽपि पूर्वविदेहा-परविदेहकर्म्मभूमकमनुष्यनपुंसका द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः ॥

सम्प्रति भवनवास्यादिदेव्यादिविभागतः । सप्तममल्पबहुत्वमाह–

'एयासि णं भंते ! देवित्थीणं भवणवासिणीण'मित्यादि, सर्वस्तोका अनुत्तरोपपातिका देवपुरुषाः, तत उपरितनग्रैवेयकमध्यमग्रैवेयकधस्तनग्रैवेयकाच्युतारण-प्राणतानतकल्पदेवपुरुषा यथोत्तरं सङ्ख्येयगुणाः, ततोऽधःसप्तमषष्ठपृथिवीनैरयिकनपुंसक- सहस्रारमहाशुक्रकल्प-देवपुरुषपञ्चमपृथिवीनैरयिकनपुंसकलान्तककल्पदेवपुरुषचतुर्थपृथिवीनैरयिकनपुंसकब्रह्मलोक-कल्पदेवपुरुषतृतीयपृथिवीनैरयिकनपुंसकमाहेन्द्रस- नत्कुमारकल्पदेवपुरुषद्वितीयपृथिवीनैरयिकनपुंसका यथोत्तरमसङ्ख्येयगुणाः, तत ईशानकल्प- देवपुरुषा असङ्ख्येयगुणाः, तेभ्य ईशानकल्प-देवस्त्रयः सङ्ख्येयगुणाः, द्वात्रिंशत्गुणत्वात्, ततः सौधर्म्मकल्पदेवपुरुषाः सङ्ख्येयगुणाः, तेभ्योऽपि सौधर्म्मकल्पदेवस्त्रियः सङ्ख्येयगुणाः, द्वात्रिंशद्गुणत्वात्, तेभ्यो भवनवासिदेवपुरुषा असङ्ख्येय-गुणाः, तेभ्यो भवनवासिदेव्यः सङ्ख्येयगुणाः, द्वात्रिंशतद्गुणत्वात्, ताभ्यो रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः, तेभ्यो वानमन्तरेदवुपुषा असङ्ख्येयगुणाः, तेभ्यो वानमन्तरदेव्यः सङ्ख्येयगुणाः, ताभ्यो ज्योतिष्काः सङ्ख्येयगुणाः, तेभ्यो ज्योतिष्कदेवस्त्रियः संख्येयगुणाः, द्वात्रिंशद्गुणत्वात् ।

सम्प्रति विजातीयव्यक्तिव्यापकमष्टममल्पबहुत्वमाह-'एयासि णं भंते !' इत्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वस्तोका अन्तरद्वीपका मनुष्यस्त्रियो मनुष्यपुरुषाश्च, स्वस्थाने तु द्वयेऽपि तुल्याः, युगलधर्मोपेतत्वात्, एवं देवकुरूत्तरकुर्वकर्म्मभूमकहरिवर्षरम्यकवर्षाकर्म्भूमकहैमवतहैरण्यवताकर्म्मभूमकमनुयस्त्रीपुरुषा यथोत्तरं सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्योऽपिभरतैरावतकर्म्मभूमकमनुष्यपुरुषा द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो भरतैरावतकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, ताभ्यः पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यपुरुषा द्वयेऽपि सङ्ख्येयगुणाः, स्वस्थाने तु परस्परं तुल्याः, तेभ्यो पूर्वविदेहापरविदेहकर्म्मभूमकमनुष्यस्त्रियो द्वय्योऽपि सङ्ख्येयगुणाः, सप्तविंशतिगुणत्वात्, स्वस्थाने तु परस्परं तुल्याः, ताभ्योऽनुत्तरोपपातिकोपरितनग्रैवेयकमध्यमग्रैवेयकाधस्तनग्रैवेयकाच्युतारणप्राणतानतकल्पदेवुरुषा यथोत्तरं सङ्ख्येयगुणाः ।

–ततोऽधःसप्तमषष्ठपृथिवीनैरयिक(न०) सहस्रारकल्पदेवपुरुषमहाशुक्रकल्पदेवपुरुषपञ्चमपृथिवीनैरयिक(न०) लान्तककल्पदेवपुरुषचतुर्थपृथवीनैरयिकनपुंसकब्रह्मलोककल्पदेवपुरुषतृतीयपृथिवीनैरयिकनपुंसकमाहेन्द्रकल्पसनत्कुमारकल्पदेवपुरुषद्वितीयपृथिवीनैरयिकनपुंसकान्तरद्वीपकमनुष्यनपुंसका यथोत्तरमसङ्ख्येयगुणाः, ततो देवकुरूत्तरकुर्वकर्म्मभूमकहरिवर्षरम्यकवर्षाकर्म्मभूमकहैमवतहैरण्यवताकर्मभूमकभरतैरावतकर्म्मभूमकपूर्वविदेहापरविदेहक र्म्मभूमकमनुष्यनपुंसका यथोत्तरं सङ्ख्येयगुणाः, स्वस्वस्थानेषु तु द्वये परस्परं तुल्याः, ततईशानकल्पदेवपुरुषा असङ्ख्येयगुणाः, ततईशानकल्पदेवस्त्रियः सौधर्मकल्पदेवपुरुषाः सौधर्म्मकल्पदेवस्त्रियो यथोत्तरं सङ्ख्येयगुणाः, ततो भवनवासिदेवपुरुषा असङ्ख्येयगुणाः ।

तेभ्यो भवनवासिदेवस्त्रियः सङ्ख्येयगुणाः, तेभ्योऽस्यां रत्नप्रभायां पृथिव्यां नैरयिकनपुंसका असङ्ख्येयगुणाः, ततः खचरतिर्यग्योनिकस्त्रियो वानमन्तरा देवपुरुषा वानमन्तरदेवस्त्रयो ज्योतिष्कदेवपुरुषा ज्योतिष्कदेवस्त्रियो यथोत्तरं सङ्ख्येयगुणाः, ततः खचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसका असङ्ख्येयगुणाः, ततः स्थलचरजलचरपञ्चेन्द्रियतिर्यग्योनिकनपुंसकाः क्रमेण सङ्ख्येयगुणाः, ततश्चतुरिन्द्रियत्रीन्द्रियद्वीन्द्रयतिर्यग्योनिकनपुंसका यथोत्तरं विशेषाधिकाः, ततस्तेजःकायिकैके० असङ्ख० ततः पृथिव्यबवायुकायिकतिर्य० यथोत्तरं विशेषाधिकाः ।

ततो वनस्पतिकायिकैकेन्द्रियतिर्यग्योनिकनपुंसका अनन्तगुणाः, निगोदजीवानामनन्तत्वात् । साम्प्रति स्त्रिपुरुषनपुंसकानां भवस्थितिमानं कायस्थितिमानं च क्रमेणाभिधातुकाम आह

मू. (७१) *इत्थीणं भंते ! केवइयं कालं ठिती पन्नत्ता ?, गोयमा ! एगेणं आएसेणं जहा पुव्विं भणियं, एवं पुरिसस्सवि नपुंसकस्सवि, संचिट्ठणा पुनरवि तिण्हंपि जहापुव्विं भणिया, अंतरंपि तिण्हंपि जहापुव्विं भणियं तहा नेयव्वं ॥*

वृ. 'इत्थीणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, इत्यादि, एतत्सर्वं प्रागुक्तवद्भावनीयम्, अपुनरुक्तता च प्राक् स्त्यादीनां पृथक् स्वस्वाधिकारे स्थित्यादि प्रतिपादितमिदानीं तु समुदायेनेति

सम्प्रति स्त्रीपुरुषनपुंसकानामल्पबहुत्वमाह–'एयासि णं भंते ! इत्थीण'मित्यादि, सर्वस्तोकाः पुरुषाः स्त्र्यादिभ्यो हीनसङ्ख्याकत्वात्, तेभ्यः स्त्रियः संखे० –,ताभ्यो नपुंसका अनन्तगुणाः, एकेन्द्रियाणामनन्तानन्तसङ्ख्योपेतत्वात् । इह पुरुषेभ्यः स्त्रियः सङ्ख्ये० इत्युक्तं, तत्र काः स्त्रियः स्वजातिपुरुषापेक्षया कतिगुणा इति प्रश्नावकाशमाशङ्क्यतन्निरूपणार्थमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (७२) *तिरिक्खजोणित्थियाओ तिरिक्खजोणियपुरिसेहिंतो तिगुणाउ तिरूवाधियाओ मणुस्सित्थियाओ मणुस्सपुरिसेहिंतो सत्तावीसतिगुणाओ सत्तावीसयरूवाहियाओ देवित्थियाओ देवपुरिसेहिंतो बत्तीसइगुणाओ बत्तीसइरूवाहियाओ सेत्तं तिविधा संसारसमावण्णगा जीवा पन्नत्ता से तं तिविहा संसारसमावन्नगा जीवा पन्नत्ता ॥*

वृ. 'तिरिक्खजोणित्थीओ तिरिक्खजोणियपुरिसेहिंतो' इत्यादि, तिर्यग्योनिकस्त्रियस्तिर्यग्योनिकपुरिषेभ्यस्त्रिगुणास्त्रिरूपाधिकाः, मनुष्यस्त्रियो मनुष्यपुरुषेभ्यः सप्तविंशतिगुणाः सप्तविंशति-रूपाधिकाः, देवपुरुषेभ्यो देवस्त्रियो द्वात्रिंशद्गुणा द्वात्रिंशद्रूपाधिकाः, उक्तं च वृद्धाचार्यैरपि–

॥१॥ "तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा ।
सत्तावीसगुणा पुण मणुयाणं तदहिया चेव ॥
॥२॥ बत्तीसगुणा बत्तीसरूवअहिया उ होंति देवाणं ।
देवीओ पन्नत्ता जिणेहिं जियरागदोसेहिं ॥

प्रतिपत्त्युपसंहारमाह–'सेत्तं तिविहा संसारसमावन्नगा जीवा पन्नत्ता' इति ।

मू. (७३) *तिविहेसु होई भेयो ठिई य संचिट्ठणंतरऽप्पबहुं ।
वेदाण य बंधठिई वेओ तह किंपगारो उ ॥*

वृ. सम्प्रत्यधिकृतप्रतिपत्त्यर्थाधिकारसंग्रहगाथामाह– 'तिविहेसु होइ भेओ' इत्यादि, त्रिविधेषु वेदेषु वक्तव्येषु भवति प्रथमोऽधिकारो भेदः ततः स्थिति तदनन्तरं 'संचिट्ठणं'ति सातत्येनावस्थानं तदनन्तरमन्तरं ततोऽल्पबहुत्वं ततो वेदानां बन्धस्थिति तदनन्तरं किंप्रकारो वेद इति ॥

द्वितीया प्रतिपत्तिः समाप्ता

मुनि दीपरत्नसागरेण संशोधिता सम्पादीता जीवाजीवाभिगमसूत्रे द्वितीया "त्रिविधा" प्रतिपत्याः मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

तृतीया– "चतुर्था" प्रतिपत्ति

–: "नैरयिक" उद्देशकः–१ :–

वृ. तदेवमुक्ता द्वितीया प्रतिपत्ति, सम्प्रति तृतीयप्रतिपत्त्यवसरः, तत्रेदमादिसूत्रम्–

मू. (७४) *तत्थ जे ते एवमाहंसु चउव्वधा संसारसमावण्णगा जीवा पन्नत्ता ते एवमाहंसु, तंजहा–नेइया तिरिक्खजोणिया मणुस्सा देवा ।*

वृ. तत्थ जे ते एवमाहंसु चउव्विहा इत्यादि, 'तत्र' तेषु दशसु प्रतिपत्तिमत्सु मध्ये ये ते आचार्या एवमाख्यातवन्तश्चतुर्विधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्ते एवमाख्यातवन्तस्तद्यथा–नैरयिकास्तिर्यग्योनिका मनुष्या देवाः ।

मू. (७५) *से किं तं नेरइया?, २ सत्तविधा प० तं०, –पढमापुढविनेरइया दोच्चा-पुढविने० तच्चापुढविनेर० चउत्थापुढवीनेर० पंचमापु० नेर० छट्ठापु० नेर० सत्तमापु० नेरइया ॥*

वृ. 'से किं त'मित्यादि, अथ के ते नैरयिकाः ?, सूरिराह–नैरयिकाः सप्तविधाः प्रज्ञप्ताः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा–प्रथमायां पृथिव्यां नैरयिकाः प्रथमपृथिवीनैरयिकाइत्यर्थ, एवं सर्वत्र भावनीयम् । सम्प्रति प्रतिपृथिवी नामगोत्रं वक्तव्यं, तत्र नामगोत्रयोरयं विशेषः–अनादिकालसिद्धमन्वर्थरहितं नाम सान्वर्थं तु नाम गोत्रमिति ।

मू. (७६) *पढमा णं भंते ! पुढवी किंनामा किंगोत्ता पन्नत्ता ?, गोयमा ! नामेणं धम्मा गोत्तेणं रयणप्पभा । दोच्चा णं भंते ! पुढवी किंनामा किंगोत्ता पन्नत्ता ?, गोयमा ! नामेणं वंसा गोत्तेणं सक्करप्पभा, एवं एतेणं अभिलावेणं सव्वासिं पुच्छा, नामाणि इमाणि से लातव्वा (णि), (सेला तईया) अजंणा चउत्थी रिट्ठा पंचमी मघा छट्ठी माघवती सत्तमा, (जाव) तमतमागोत्तेणं*

वृ. तत्र नामगोत्रप्रतिपादनार्थमाह–'इमा णं (पढमा णं) भंते !' इत्यादि, इयं भदन्त ! रत्नप्रभापृथिवी 'किंनामा' किमनादिकालप्रसिद्धान्वर्थरहितनामा ? किंगोत्रा किमन्वर्थयुक्त-नामा ?, भगवानाह–गौतम ! नाम्ना धर्म्मेति प्रज्ञप्ता गोत्रेण रत्नप्रभा, तथा चान्वर्थमुपदर्शयन्ति पूर्वसूरयः–रत्नानां प्रभा–बाहुल्यं यत्र सा रत्नप्रभा रत्नबहुलेति भावः, एवं शेषसूत्राण्यपि प्रतिपृथिवि प्रश्ननिर्वचनरूपाणि भावनीयानि, नवरं शर्कराप्रभादीनामियमन्वर्थभावना–शर्कराणां प्रभा–बाहुल्यं यत्र सा तमःप्रभा, तमस्तमस्य–प्रकृष्टतमसः प्रभा–बाहुल्यं यत्र सा तमस्तमप्रभा

मू. (७७) *धम्मा वंशा सेला अंजण रिट्ठा मघाय माघवती ।*
सतण्हं पुढवीएणं एए नामा नायव्वा ।।

मू. (७८) *रयणा सक्कर वालुय पंका धूमा तमातमाय ।*
सतण्हं पुढवीएणं एए गोत्ता मुणेयव्वा ।।

वृ. अत्र केषुचित्पुस्तकेषु सङ्ग्रहणिगाथे–

।। १ ।। "धम्मा वंसा सेला (यावत्) नायव्वा ।
।। २ ।। रयणा सक्कर वालुय (यावत्) मुणेयव्वा

अधुना प्रतिपृथिवि बाहुल्यमभिधित्सुराह–

मू. (७९) *इमा णं भंते ! रयणप्पभापुढवी केवतिया बाहल्लेणं प० ?, गो० ! इमा णं रयण० असिउत्तरं जोयणसयसहस्सं बाहल्लेणं पण्णत्ता, एवं एतेणं अभिलावेणं इमा गाहा०अ०*

वृ. 'इमा णं भंते !' इत्यादि, इयं भदन्त ! रत्नप्रभा पृथिवी कियदबाहुल्येन प्रज्ञप्ता ?, अत्र गोत्रेण प्रश्नो नाम्नो नाम्नो गोत्रं प्रधानतरं प्रधानेन च प्रश्नाद्युपपन्नमिति न्यायप्रदर्शनार्थ, उक्तञ्च–"न हीना वाक् सदा सता''मिति, भगवानाह–'असीत्युत्तरम्' अशीतियोजनसहस्राभ्यधिकं योजनशतसहस्र बाहुल्येन प्रज्ञप्ता । एवं सर्वाण्यपि सूत्राणि भावनीयानि ।

मू. (८०) *आसीतं बत्तीसं अट्ठावीसं तहेव वीसं च ।*
अट्ठारस सोलसगं अट्ठुत्तरमेव हिट्ठिमया

वृ. अत्र सङ्ग्रहणिगाथा–"आसीयं बत्तीसं (यावत्) हिट्ठिमया ।

मू. (८१) *इमा णं भंते ! रयणप्पभापुढवी कतिविधा पन्नत्ता ?, गोयमा ! तिविहा पन्नत्ता, तंजहा–खरकंडे पंकबहुले कंडे आवबहुले कंडे ।*

इमीसे णं भंते ! रय० पुढ० खरकंडे कतिविधे पन्नत्ता ?, गोयमा ! सोलसविधे प० त्तं०, –रयणकंडे १ वइरे २ वेरुलिए ३ लोहितक्खे ४ मसारगल्ले ५ हंसगब्भे ६ पुलए ७ सोयंधिए ८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोतिरसे ९ अंजणे १० अजलपुलए ११ रयते १२ जातरूवे १३ अंके १४ फलिहे १५ रिट्ठे १६ कंडे ।। इमीसे णं भंते ! रयणप्पभापुढवीए रयणकंडे कतिविधे पन्नत्ते ?, गोयमा ! एगागारे पन्नत्ते, एवं जाव रिट्ठे । इमीसे णं भंते ! रयणप्पभापुढवीए पंकबहुले कंडे कतिविधे पन्नत्ते ?, गोयमा ! एकागारे पन्नत्ते । एवं आवबहुले कंडे कतिविधे पन्नत्ते ?, गोयमा ! एकागारे पन्नत्ते

सक्करप्पभा णं भंते ! पुढवी कतिविधा पन्नत्ता ?, गोयमा ! एकागारा पन्नत्ता, एवं जाव अहेसत्तमा ।।

वृ. 'इमा णं भंते' इत्यादि इयं भदन्त ! रत्नप्रभा पृथिवी 'कतिविधा' कतिप्रकारा कतिविभागा प्रज्ञप्ता ?, भगवानाह–गौतम ! 'त्रिविधा' त्रिविभागा प्रज्ञप्ता, तद्यथा–'खरकाण्ड'मित्यादि, काण्डं नाम विशिष्टो भूभागः, खरं–कठिनं, पङ्कबहुलं ततोऽबबहुलं चान्वर्थतः प्रतिपत्तव्यं, क्रमश्चैतेषामेवमेव, तद्यथा–प्रथमं खरकाण्डं तदनन्तरं पङ्कबहुलं ततोऽबबहुलमिति ।

'इमीसे णं भंते' इत्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां खरकाण्डं कतिविधं प्रज्ञप्तं ?, भगवानाह–गौतम ! 'षोडशविधं' षोडशविभागं प्रज्ञप्तं, तद्यथा–

'रयणे' इति, पदैकदेशे पदसमुदायोपचाराद् रत्नकाण्डं तच्च प्रथमं, द्वितीयं वज्रकाण्डं, तृतीयं वैडूर्यकाण्डं, चतुर्थं लोहितकाण्डं, पञ्चमं मसारगल्लकाण्डं, षष्ठं हंसगर्भकाण्डं, सप्तमं पुलककाण्डम्, अष्टमं सौगन्धिककाण्डं, नवमं ज्योतीरसकाण्डं, दशममञ्जनकाण्डम्, एकादश-मञ्जनपुलककाण्डं, द्वादशं रजतकाण्डं, त्रयोदशं जातरूपकाण्डं, चतुर्दशमङ्ककाण्डं, पञ्चदशं स्फटिककाण्डं षोडशं रिष्टरत्नकाण्डं, तत्र रत्नानि–कर्केतनादीनि तत्प्रधानं काण्डं रत्नकाण्डं, वज्ररत्नप्रधानं काण्डं वज्रकाण्डम्, एवं शेषाण्यपि, एकैकं च काण्डं योजनसहस्रबाहल्यम् ।

'इमीसे णं भंते' इत्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां रत्नकाण्डं 'कतिविधं' कतिप्रकारं कतिविभागमिति भावः प्रज्ञप्तं ?, भगवानाह–एकाकारं प्रज्ञप्तं । एवं शेषकाण्डविष-याण्यपि प्रश्ननिर्वचनसूत्राणि क्रमेण भावनीयानि । एवं पङ्कबहुलाब्बहुलविषयाण्यपि ।

'दोच्चा णं भंते' इत्यादि, द्वितीयादिपृथिवीविषयाणि सूत्राणि पाठसिद्धानि ।।

सम्प्रति प्रतिपृथिविनरकावाससङ्ख्याप्रतिपादनार्थमाह–

मू. (८२) *इमीसे णं भंते ! रयणप्पभाए पुढवीए केवइया निरवायाससयसहस्सा पन्नत्ता ?, गो० तीसं निरयावाससयसहस्सा पन्नत्ता, एवं एतेणं अभिलावेणं सव्वासिं पुच्छा, इमा गाहा ०*

वृ. 'इमीसे णं भंते' इत्यादि, सुगमं, नवरमियमत्र सङ्ग्रहणिगाथा–

मू. (८३) *तीसा य पन्नवीसा पन्नरस दसेव तिन्नि य हवंती ।*
पंचूणसयसहस्सं पंचेव अनुत्तरा नरगा ।।

मू. (८४) *जाव अहेसत्तमाए पंच अनुत्तरा महतिमहालया महाणरगा पन्नत्ता, तंजहा काले महाकाले रोरुए महारोरुए अपतिट्ठाणे ।।*

वृ. "तीसा य पन्नवीसा पन्नरस दस चेव सयसहस्साइं ।
तिण्णेगं पंचूणं पंचेव अणुत्तरा निरया ।।"

अधःसप्तम्यां च पृथिव्यां कालादयो महानरका अप्रतिष्ठानाभिधस्य नरकस्य पूर्वादिक्रमेण, (उक्तञ्च) "पुव्वेण होइ कालो अवरेणं अप्पइट्ठ महकालो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोरू दाहिणपासे उत्तरपासे महारोरू ॥"

रत्नप्रभादिषु च तमःप्रभापर्यन्तासु षट्सु पृथिवीषु प्रत्येकं नरकावासा द्विविधाः, तद्यथा— आवलिकाप्रविष्टाः प्रकीर्णकरूपाश्च, तत्र रत्नप्रभायां पृथिव्यां त्रयोदश प्रस्तटाः, प्रस्तटा नाम वेश्मभूमिकाकल्पाः, तत्र प्रथमप्रस्तटे पूर्वादिषु चतसृषु दिक्षु प्रत्येकमेकोनपञ्चाशत् नरकावासाः, चतसृषु विदिक्षु प्रत्येकमष्टचत्वारिंशत्, मध्ये च सीमन्तकाख्यो नरकेन्द्रकः, सर्वसङ्ख्यया प्रथमप्रस्तटे नरकावासानामावलिकाप्रविष्टानामेकोननवत्यधिकानि त्रीणि शतानि ३८९।

शेषेषु च द्वादशसु प्रस्तटेषु प्रत्येकं यथोत्तरं दिक्षु विदिक्षु चैकैकनरकावासहानिभावाद् अष्टकाष्टकहीना नरकावासा द्रष्टव्याः, ततः सर्वसङ्ख्यया रत्नप्रभायां पृथिव्यामावलिकाप्रविष्टा नरकावासाश्चतुश्चत्वारिंशच्छतानि त्रयस्त्रिंशदधिकानि ४४३३, शेषास्त्वेकोनत्रिंशल्लक्षाणि पञ्चनवतिसहस्राणि पञ्च शतानि सप्तषष्ट्यधिकानि २९९५५६७ प्रकीर्णकैः, तथा चोक्तम्—

॥ १ ॥ "सत्तट्ठी पंचसया वणनउइसहस्स लक्खगुणतीसं।
रयणाए सेढिगया चोयालसया उ तित्तीसं॥"

उभयमीलने त्रिंशल्लक्षा नरकवासानां भवन्ति ३००००००।

शर्कराप्रभायामेकादश प्रस्तटाः, "नरकपटलान्यधोऽधो द्वन्द्वहीनानी"ति वचनात्, तत्र प्रथमे प्रस्तटे चतसृषु दिक्षु षट्त्रिंशद् आवलिकाप्रविष्टा नरकावासाः, विदिक्षु पञ्चत्रिंशत्, मध्ये चैको नरकेन्द्रकः, सर्वसङ्ख्यया द्वे शते पञ्चाशीत्यधिके २८५, शेषेषु तु दशसु प्रस्तटेषु प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानि—, प्रतिदिकप्रतिविदिक्षु(क् च) एकैकनरकावासहानेः, ततस्तत्र सर्वसङ्ख्ययाऽऽवलिकाप्रविष्टा नरकावासाः षड्विंशतिशतानि पञ्चनवत्यधिकानि २६९५, शेषाश्चतुर्विंशतिलक्षाः सप्तनवति सहस्राणि त्रीणि शतानि पञ्चोत्तराणि पुष्पावकीर्णकाः उक्तञ्च—

॥ १ ॥ "सत्ताणउइ सहस्सा चउवीसं लक्ख तिसय पंचऽहिया।
बीयाए सेढिगया छव्वीससया उ पणनउया॥"

उभयमीलने पञ्चविंशतिर्लक्षा नरकावासानाम् २५०००००।

वालुकाप्रभायां नव प्रस्तटाः, प्रथमे च प्रस्तटे एकैकस्यां दिशि आवलिकाप्रविष्टा नरकावासाः पञ्चविंशति विदिशि चतुर्विंशति मध्ये चैको नरेन्द्रक इति सर्वसङ्ख्यया सप्तनवतं शतं १७९, शेषेषु चाष्टसु प्रस्तटेषु प्रत्येकं क्रमेणाधोऽधोऽष्टकहानि, तत्र च कारणं प्रागेवोक्तं, ततः सर्वसङ्ख्यया तत्रावलिकाप्रविष्टा नरकावासाशचतुर्दश शतानि पञ्चाशीत्यदिकानि १४८५, शेषास्तु पुष्पावकीर्णकाश्चतुर्दश लक्षा अष्टनवति सहस्राणि पञ्च शतानि पञ्चदशाधिकानि उक्तञ्च—

॥ १ ॥ "पंचसया पन्नारा अडनवइसहस्स लक्ख चोद्दस य।
तइयाए सेढिगया पणसीया चोद्दससया उ॥"

उभयमीलने पञ्चदश लक्षा नरकावासानाम् १५०००००।

पङ्कप्रभायां सप्त प्रस्तटाः, प्रथमे च प्रस्तटे प्रत्येकं दिशि षोडश षोडश आवलिकाप्रविष्टा नरकावासाः विदिशि पञ्चदश पञ्चदश मध्ये चैको नरकेनद्रकः सर्वसङ्ख्यया पञ्चविंशतिशतं १२५, शेषेषु षट्सु प्रस्तटेषु पूरववत् प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानि, ततः सर्वसङ्ख्यया तत्रावलिकाप्रविष्टा नरकावासाः सप्त शतानि सप्तोत्तराणि ७०७, शेषास्तु पुष्पावकीर्णका नव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षा नवनवति सहस्राणि द्वे शते त्रिनवत्यधिके ९९९२९३, उक्त–

॥१॥ "तेनउया दोन्नि सया नवनउइसहस्स नव य लक्खा य।
पंकाए सेढिगया सत्त सया हुंति सत्तहिया॥

उभयमीलने नरकावासानां दश लक्षाः १००००००।

धूमप्रभायां पञ्च प्रस्तटाः, प्रथमे च प्रस्तटे एकैकस्यां दिश नव नव आवलिकाप्रविष्टा नरकावासाः, विदिशि अष्टौ अष्टौ मध्ये चैको नरकेन्द्रक इति सर्वसङ्ख्यया एकोनसप्तति :६९, शेषेषु चतुर्षु प्रस्तटेषु पूर्ववत्प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानि, ततः सर्वसङ्ख्यया तत्रावलिकाप्रविष्टा नरकावासा द्वे शते पञ्चषष्ट्यधिके २६५, शेषाः पुष्पावकीर्णका द्वे लक्षे नवनवति सहस्राणि सप्त शतानि पञ्चत्रिंशदधिकानि २९९७३५, उक्तञ्च–

॥१॥ "सत्तसया पणतीसा नवनव [इय] सहस्स दो य लक्खा य।
धूमाए सेढिगया पणसड्ड दो सया होंति॥"

सर्वसङ्ख्यया तिस्रो लक्षाः ३००००० नरकावासानाम्।

तमःप्रभायां त्रयः प्रस्तटाः, तत्र प्रथमे प्रस्तटे प्रत्येकं दिशि चत्वारश्चत्वार आवलिकाप्रविष्टा नरकावासा विदिशि त्रयस्त्रयो मध्ये चैको नरकेन्द्रक इति सर्वसङ्ख्यया एकोनत्रिंशत् २९, शेषयोस्तु प्रस्तटयोः प्रत्येकं क्रमेणाधोऽधोऽष्टकाष्टकहानि, ततः सर्वसङ्ख्ययाऽऽवलिकाप्रविष्टा नरकावासास्त्रिषष्टि : शेषास्तु नवनवति सहस्राणि नव शतानि द्वात्रिंशदधिकानि पुष्पावकीर्णकाः

॥१॥ (उक्तञ्च) "नवनऊई य सहस्सा नव चेव सया हवंति बत्तीसा।
पुढवीए छट्ठीए पइण्णगासेण संखेवो॥"

उभयमीलने पञ्चोनं नरकावासानां लक्षम् ९९९९५॥

मू. (८५) *अत्थि णं भंते! इमीसे रयणप्पभाए पुढवीए अहे घनोदधीति वा घनवातेति वा तनुवातेति वा ओवासंतरेति वा?, हंता अत्थि, एवं जाव अहे सत्तमाए॥*

वृ. सम्प्रति प्रतिपृथिवि घनोदध्याद्यस्तित्वप्रतिपादनार्थमाह– 'अत्थि णं भंते!' इत्यादि, अस्ति भदन्त! अस्याः प्रत्यक्षत उपलभ्यमानाया रत्नप्रभायाः पृथिव्या अधो घनः–स्त्यानीभूतोदक उदधिर्घनोदधिरिति वा घनः–पिण्डीभूतो वातः घनवात इति वा तनुवात इति वा अवकाशान्तरमिति वा?, अवकाशान्तरं नाम शुद्धमाकाशं, भगवानाह–हन्त! अस्ति, एवं प्रतिपृथिवि तावद्वाच्यं यावदधःसप्तम्याः॥

मू. (८६) *इमीसे णं भंते! रयणप्पभाए पुढवीए खरकंडे केवतियं बाहल्लेणं पन्नत्ते?, गो० सोलस जोयणसहस्साइं बाहल्लेणं प० इमीसे णं भंते! रयणप्पभाए पुढवीए रयणकंडे केवतियं बाहल्लेणं प० गो० एक्कं जोयणसहस्सं बाहल्लेणं प० एवं जाव रिट्ठे।*

इमीसे णं भंते! रय० पु० पंकबहुले कंडे केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! चतुरसीति-जोयणसहस्साइं बाहल्लेणं पन्नत्ते। इमीसे णं भंते! रय० पु० आवबहुले कंडे केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! असीतिजोयणसहस्साइं बाहल्लेणं पन्नत्ते।

इमीसे णं भंते! रयणप्पभाए पु० गणोदही केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! वीसं जोयणसहस्साइं बाहल्लेणं प०। इमीसे णं भंते! रय० पु० घणवाए केवतियं बाहल्लेणं प० गो०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असंखेज्जाइं जोयणसहस्साइं बाहल्लेणं प० एवं तणुवातेऽवि ओवसंतरेऽवि। सक्करप्प० भंते! पु० घनोदही केवतियं बाहल्लेणं प० ?, गोयमा! वीसं जोयसहस्साइं बाहल्लेणं पण्णत्ते।

सक्करप्प० पु० घनवाते केवइए बाहल्लेणं पन्नते ?, गोयमा! असंखे० जोयणसहस्साइं बाहल्लेणं पण्णत्ते, एवं तणुवातेवि, ओवासंतरेवि जहा सक्करप्प० पु० एवं जाव अधेसत्तमा ॥

वृ. 'इमीसे णं भंते!' इत्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्याः सम्बन्धि यत्प्रथमं खरं–खराभिधानं काण्डं तत् कियद्बाहल्येन प्रज्ञप्तम् ?, भगवानाह–गौतम! षोडश योजनसहस्राणि ॥ 'इमीसे णं' मित्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्या रत्नं रत्नाभिधानं काण्डं तत् कियद्बाहल्येन प्रज्ञप्तम् ?, भगवानाह–गौतम! एकं योजनसहस्रं। एवं सेषाण्यपि काण्डानि वक्तव्यानि यावद् रिष्ठं–रिष्ठाभिधानं काण्डम्।

एवं पङ्कबहुलाब्बहुलकाण्डसूत्रे अपि व्याख्येये, पङ्कबहुलं काण्डं चतुरशीतिर्योजनसहस्राणि बाहल्येन, अब्बहुलं काण्डमशीतिर्योजनसहस्राणि, सर्वसङ्ख्यया रत्नप्रभाया बाहल्यमशीति-सहस्राधिकं लक्षं, तस्या अधो घनोदधिः विंशतिर्योजनसहस्राणि बाहल्येन, तस्याप्यधो घनवातोऽ-सङ्ख्येयानि योजनसहस्राणि बाहल्येन, तस्याप्यधोऽसङ्ख्येयानि योजनसहस्राणि तनुवातो बाहल्येन, तस्याप्यधोऽसङ्ख्येयानि योजनसहस्राणि बाहल्येनावकाशान्तरम्।

एवं शेषाणामपि पृथिवीनां घनोदध्यादयः प्रत्येकं तावद्वक्तव्या यावदधः सप्तम्याः ॥

मू. (८७) *इमीसेणं भंते! रयणप्प० पु० असीउत्तरजोयण (सय) सहस्सबाहल्लाए खेत्तच्छेएणं छिज्जमाणीए तित्तकडुयकसायअंबिलमहुराइं फासतो कक्खडमगउयगरुयलहुसीतउसिणणि-द्धलुक्खाइं संठाणतो परिमंडलवट्टतंसचउरंसआययसंठाणपरिणयाइं अन्नमन्नबद्धाइं ॥*

अन्नमन्नपुट्ठाइं अन्नमन्नओगाढाइं अन्नमन्नसिणेहपडिबद्धाइं अन्नमन्नघडत्ताए चिट्ठंति? हंता अत्थि। इमीसेणं भंते! रयणप्प भाए पु० खरकंडस्स सोलसजोयणसहस्सबाहल्लस्स खेत्तच्छेएणं छिज्जमाणस्स अत्थि दव्वाइं वण्णओ काल जाव परिणयाइं ?, हंता अत्थि। इमीसे णं रयणप्प० पु० रयणनामगस्स कंडस्स जोयणसहस्सबाहल्लस्स खेत्तच्छेएणं छिज्ज० तं चेव जाव हंता अत्थि, एवं जाव रिट्ठस्स, इमीसे णं भंते! रयणप्प० पु० पंकबहुलस्स कंडस्स चउरासीति-जोयणसहस्सबाहल्लस्स खेत्ते तं चेव, एवं आवबहुलस्सवि असीतिजोयणसहस्सबाहल्लस्स।

इमीसे णं भंते! रयणप्प० पु० घनोदधिसस वीसं जोयणसहस्सबाहल्लस्स खेत्तच्छेदेण तहेव। एवं घनवातस्स अंसखेज्जजोयणसहससबाहल्लस्स तहेव, ओवासंतरस्सवि तं चेव।

सक्करप्पभाए णं भंते! पु० बत्तीसुत्तरजोयणसतसहस्सबाहल्लस्स खेत्तच्छेण छिज्जमाणीए अत्थि दव्वाइं वण्णतो जाव घडत्ताए चिट्ठंति ?, हंता अत्थि।

एवं घनोदहिस्स वीसजोयणसहस्सबाहल्लस्स घणवातस्स असंखेज्जजोयणसहस्सबाहल्लस्स, एवं जाव ओवासंतरस्स, जहा सक्करप्पभाए एवं जाव अहेसत्तमाए ॥

वृ. 'इमीसे णं भंते' इत्यादि, अस्यां भदन्त! रत्नप्रभायां पृथिव्यामशीत्युत्तरयोजनशत-सहस्रबाहल्यायां क्षेत्रच्छेदेन–बुद्धया प्रतरकाण्डविभागेन छिद्यमानायाम्, अस्तीति निपातोऽत्र बहुलवचनार्यगर्भः, सन्ति द्रव्याणि वर्णतः कालानि नीलानि लोहितानि हारिद्राणि शुक्लानि, गन्धतः सुरभिगन्धीनि दुरभिगन्धीनि च, रसतस्तिक्तरसानि कटुकानि कषायाणि अम्लानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मधुराणि, स्पर्शतः कर्कशानि मृदूनि गुरुकाणि लघूनि शीतानि उष्णानि स्निग्धानि रूक्षाणि, संस्थानतः परिमण्डलानि वृत्तानि त्र्यम्राणि चतुरस्रामिणआयतानि, कथम्भूतान्येतानि सर्वाण्यपि? इत्यत आह–

'अन्नमन्नपुट्ठाइं' इत्यादि, अन्योऽन्यं–परस्परं स्पृष्टानि–स्पर्शमात्रोपेतानि, तथाऽन्योऽन्यं–परस्परमवगाढानि यत्रैकं द्रव्यमवगाढं तत्रान्यदपि देशतः क्वचित्सर्वतोऽवगाढमित्यर्थः तथाऽन्योऽन्यं–परस्परं स्नेहेन प्रतिबद्धानि येनैकस्मिन् चाल्यमाने गृह्यमाणे वाऽपरमपि चलनादिधर्मोपेतं भवति, एवम् 'अन्नोन्नघडत्ताए' इति, अन्योऽन्यं–परस्परं घटन्ते–संबध्नन्तीति अन्योऽन्यघटास्तद्भावोऽन्योऽन्यघटता तया–परस्परसंबद्धतया तिष्ठन्ति,

भगवानाह– 'हंता अत्थि' 'हन्त!' इति प्रत्यवधारणे सन्त्येवेत्यर्थ। एवमस्यामेव रत्नप्रभायां पृथिव्यां खरकाण्डस्य षोडशयोजनसहस्रप्रमाणबाहल्यस्य, तदनन्तरं रत्नकाण्डस्य योजनसहस्रबाहल्यस्य, ततो वज्रकाण्डस्य यावद्रिष्ठाकाण्डस्य, तदनन्तरमस्यामेव रत्नप्रभायां पृथिव्यां पङ्कबहुलकाण्डस्य चतुरशीतियोजनसहस्रबाहल्यस्य, तदनन्तरमबबहुलकाण्डस्याशीतियोजनसहस्रबाहल्यस्य, तदनन्तरमस्या एव रत्नप्रभाया घनोदधेर्योजनविंशतिसहस्रप्रमाणबाहल्यस्य, ततोऽसङ्ख्यातयोजन- सहस्रप्रमाणबाहल्यस्य घनवातस्य, तत एतावत्प्रमाणबाहल्यस्य तनुवातस्य, ततोऽवकाशन्तरस्य तावत्प्रमाणस्य।

ततः शर्कराप्रभायाः पृथिव्या द्वात्रिंशत्सहस्रोत्तरयोजनशतसहस्रबाहल्यपरिमाणायाः, तस्या एवाधस्ताद्यथोक्तप्रमाणबाहल्यानां घनोदधिघनवाततनुवातावकाशान्तराणाम्, एवं यावदधःसप्तम्याः पृथिव्या अष्टसहस्रोधिकयोजनशतसहस्रपरिमाणबाहल्यायाः, ततस्तस्या एवाधःसप्तमपृथिव्या अधस्तात्क्रमेण घनोदधिघनवाततनुवातावकाशान्तराणां प्रश्ननिर्वचनसूत्राणि यथोक्तद्रव्यविषयाणि भावनीयानि। सम्प्रति संस्थानप्रतिपादनार्थमाह–

मू. (८८) *इमा णं भंते! रयणप्प० पु० किंसंठिता पन्नत्ता?, गो० झल्लरिसंठिता प०। इमीसे णं भंते! रयणप्प० पु० खरकंडे किंसंठिते पन्नत्ते?, गोयमा! झल्लरिसंठिते पन्नत्ते। इमीसे णं भंते! रयणप० पु० रयणकंडे किंसंठिते पन्नत्ते?, गोयमा! झल्लरिसंठिए पन्नत्ते। एवं जावरिट्ठे। एवं पंकबहुलेवि, एवं आवबहुलेवि घनोदधीवि घनवाएवि तनुवाएवि ओव संतरेवि, सव्वे झल्लरिसंठिते पन्नत्ते।*

सक्करप्पभा णं भंते! पुढवी किंसंठिता पन्नत्ता?, गोयमा! झल्लरिसंठिता पन्नत्ता, सक्करप्पभापुढवीए घनोदधी किंसंठिते पन्नत्ते?, गोयमा! झल्लरिसंठिते पन्नत्ते, एवंजाव ओवासंतरे, जहा सक्करप्पभाए वत्तव्वया एवं जाव अहेसत्तमाएवि॥

वृ. 'इमा णं भंते' इत्यादि, 'इयं' प्रत्यक्षत उपलभ्यमाना णमिति वाक्यालङ्कृतौलप्रभापृथिवी किमिव संस्थिता किंसंस्थिता प्रज्ञप्ता?, भगवानाह–गौतम! झल्लरीव संस्थिता झल्लरीसंस्थिता प्रज्ञप्ता, विस्तीर्णवलयाकारत्वात्। एवमस्यामेव रत्नप्रभायां पृथिव्यां खरकाण्डं, तत्रापि रत्नकाण्डं, ततो वज्रकाण्डं, ततो यावद् रिष्ठकाण्डं, तदनन्तरं पङ्कबहुलकाण्डं, ततो जलकाण्डं, तदनन्तरमस्या एव रत्नप्रभायाः पृथिव्या अधस्तात्क्रमेण घनोदधिघनवाततनुवातावकाशान्तराणि यावदधःसप्तमीपृथिवी, तस्याश्चाधस्तात्क्रमेण घनोदधिघनवाततनुवातावकाशान्तराणि झल्लरीसंस्थानानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तव्यानि। ननु चैताः सप्तापि पृथिव्यः सर्वासु दिक्षु किमलोकस्पर्शिन्य उत न? इति, उच्यते, नेति ब्रूमः, यद्येवं ततः–

मू. (८९) *इमीसे णं भंते! रयणप्प० पुढवीए पुरत्थिमिल्लातो उवरिमंता केवतियं अबाधाए लोयंते पन्नत्ते?, गोयमा! दुवालसहिं जोयणेहिं अबाधाए लोयंते पन्नत्ते, एवं दाहिणिल्लातो पच्चत्थिमिल्लातो उत्तरिल्लातो। सक्करप्प० पु० पुरत्थिमिल्लातो चरिमंतातो केवतियं अबाधाए लोयंते प० गो० तिभागूणेहिं तेरसहिं जोयणेहिं अबाधाए लोयंते प० एवं चउद्दिसिंपि।*

वालुयप्प० पु० पुरत्थिमिल्लातो पुच्छा, गोयमा! सतिभागेहिं तेरसहिं जोयणेहिं अबाधाए लोयंते पन्नत्ते, एवं चउद्दिसिंपि, एवं सव्वासिं चउसुवि दिवासुस पुच्छितव्वं। पंकप्प० चोद्दसहिं जोयणेहिं अबाधाए लोयंते पन्नत्ते। पंचमाए तिभागूणेहिं पन्नरसहिं जोयणेहिं अबाधाए लोयंते पण्णत्ते। छट्ठीए सतिभागेहिं पन्नरसहिं जोयणेहिं अबाधाए लोयंते पन्नत्ते। सत्तमीए सोलसहिं जोयणेहिं अबाधाए लोयंते पन्नत्ते, एवं जाव उत्तरिल्लातो।

इमीसे णं भंते! रयण० पु० पुरत्थिमिल्ले चरिमंते कतिविधे पन्नत्ते?, गोयमा! तिविहे पन्नत्ते, तंजहा–घनोदधिवलए घनवायवलए तनुवायवलए।

इमीसे णं भंते! रयणप्प० पु० दाहिणिल्ले कतिविधे पन्नत्ते?, गोयमा! तिविधे पन्नत्ते, तंजहा–एवं जाव उत्तरिल्ले, एवं सव्वासिं जाव अधेसत्तमाए उत्तरिल्ले॥

वृ. 'इमी से णं भंते' इत्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्याः 'पुरत्थिमिल्लाओ' इति पूर्वदिग्भाविनश्चरमान्तात् 'केवइयाए' इति कियत्याऽबाधया–अपान्तरालरूपया लोकान्तोऽलोकावधिपरच्छिन्नः प्रज्ञप्तः?, भगवानाह–द्वादश योजनानि, द्वादशयोजनप्रमाण-येत्यर्थः, अबाधया लोकान्तः प्रज्ञप्तः, किमुक्तं भवति?–रत्नप्रभायाः पृथिव्याः पूर्वस्यां दिशि चरमपर्यन्तात्परतोऽलोकादर्वाग् अपान्तरालं द्वादश योजनानि, एवं दक्षिणस्यामपरस्यामुत्तरस्यां चापान्तरालं वक्तव्यं, दिग्ग्रहणं चोपलक्षणं तेन सर्वासु विदिक्ष्वपि यथोक्तमपान्तरालमवसातव्यं, सेषाणां तु पृथिवीनां सर्वासु दिक्षु विदिक्षु च चरमपर्यन्तादलोकः क्रमेणाधोऽधस्त्रिभागोनेन योजनेनाधिकैर्द्वादशभिर्योजनैरवगन्तव्यः, तद्यथा–शर्कराप्रभायाः पृथिव्याः सर्वासु दिक्षु विदिक्षु च चरमपर्यन्तादलोकादर्वागपान्तरालं त्रिभागोनानि त्रयोदश योजनानि, वालुकाप्रभायाः सत्रिभागानि त्रयोदश योजनानि, पङ्कप्रभायाः परिपूर्णानि चतुर्दश योजनानि, धूमप्रभायास्त्रिभागो-नानि पञ्चदश योजनानि, तमःप्रभायाः सत्रिभागानि पञ्चदश योजनानि, अध–सप्तमपृथिव्याः परिपूर्णानि षोडश योजनानि, सूत्राक्षराणि पूर्ववद्योजनीयानि।

अथामूनि रत्नप्रभादीनां द्वादशयोजनप्रमाणादीनि अपान्तरालानि किमाकाशरूपाणि उत घनोदध्यादिव्याप्तानि?, उच्यते, घनोदध्यादिव्याप्तानि, तत्र कस्मिन्नपान्तराले कियान् घनोदध्यादि? इति प्रतिपादनार्थमाह–'इमी से णं भंते' इत्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्याः पूर्वदिग्भावी 'चरमान्तः' 'कतिविधः' कतिप्रकारः कतिविभाग इत्यर्थ प्रज्ञप्तः?, भगवाना–गौतम! त्रिविधः प्रज्ञप्तः, तद्यथा–'घनोदधिवलयः' वलयाकारघनोदधिरूप इत्यर्थः, एवं घनवातवलयस्त-नुवातव-लयश्च, इयमत्र भावना–सर्वासां पृथिवीनामधो यत्प्राग् बाहल्येन घनोदध्यादीनां परिमाणमुक्तं तन्मध्यभागे द्रष्टव्यं, ते हि मध्यभागे यथोक्तप्रमाणबाहल्यास्ततः प्रदेशहान्या प्रदेशहान्या हीयमानाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्वपृथिवी पर्यन्तेषु तनुतरा भूत्वा स्वां स्वां पृथिवीं वलयाकारेण वेष्टयित्वा स्थिताः, अत एवामूनि वलयान्युच्यन्ते, तेषां च वलयानामुच्चैस्त्वं सर्वत्र स्वस्वपृथिव्यनुसारेण परिभावनीयं, तिर्यग्बाहल्यं पुनरग्रे वक्ष्यते, इदानीं तु विभागमात्रमेवापान्तरालस्य प्रतिपादयितुमिष्टमिति तदेवोक्तं, एवमस्या रत्नप्रभायाः पृथिव्याः शेषासु दिक्षु, एवं शेषाणामप पृथिवीनां चतसृष्वपि दिक्षु प्रत्येकं २ विभागसूत्रं भणितव्यम् ।सम्प्रति घनोदधिवलयस्य तिर्यग्बाहल्यमानमाह–

मू. (९०) इमीसे णं भंते! रयणप्प० पुढवीए घनोदधिवलए केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! छ जोयणाणि बाहल्लेणं पन्नत्ते। सक्करप्प० पु० घनोदधिवलए केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! सतिभागाइं छजोयणाइं बाहल्लेणं पन्नत्ते। वालुयप्पभाए पुच्छा गोयमा! तिभागूणाइं सत्त जोयणाइं बाहल्लेणं प०।

एवं एतेणं अभिलावेणं पंकप्पभाए सत्त जोयणाइं बाहल्लेणं पन्नत्ते। धूमप्पभाए सतिभागाइं सत्त जोयणाइं पन्नत्ते। तमप्पभाए तिभागूणाइं अट्ठ जोयणइं। तमतमप्पभाए अट्ठ जोयणाइं।

इमीसे णं रयणप्प० पु० घनवायवलए केवतियं बाहल्लेणं पन्नत्ते?, गोयमा! अद्धपंचमाइं जोयणाइं बाहल्लेणं। सक्करप्पभाए पुच्छा, गोयमा! कोसूणाइं पंच जोयणाइं बाहल्लेणं पन्नत्ताइं, एवं एतेणं अभिलावेणं वालुयप्पभाए पंच जोयणाइं बाहल्लेणं पन्नत्ताइं, पंकप्पभाए सक्कोसाइं पंच जोयणाइं बाहल्लेणं पन्नत्ताइं। धूमप्पभाए अद्धछट्ठाइं जोयणाइं बाहल्लेणं पन्नत्ताइं, तमप्पभाए कोसूणाइं छजोयणाइं बाहल्लेणं पन्नत्ते, अहेसत्तमाए छजोयणाइं बाहल्लेणं पन्नत्ते।

इमीसे मं भंते! रयणप्प० पु० तनुवायवलए केवतियं बाहल्लेमं पन्नत्ते?, गोयमा! छक्कोसेणं बाहल्लेणं पन्नत्ते, एवं एतेणं अभिलावेणं सक्करप्पभाए सतिभागे छक्कोसे बाहल्लेणं प० वालुयप्पभाए तिभागूणे सत्तकोसं बाहल्लेणं पन्नत्ते। पंकप्पभाए पुढवीए सत्तकोसं बाहल्लेणं पन्नत्ते।धूमप्पभाए सतिभागेसत्तकोसे। तमप्पभाए तिभागूणे अट्ठकोसेबाहल्लेणं पन्नत्ते। अधेसत्तमाए पुढवीए अट्ठकोसे बाहल्लेणं पन्नत्ते। इमीसे णं भंते! रयणप्प० पु० घनोदधिवलयस्स छज्जोयणबाहल्लस्स खेत्तच्छेएणं छिज्जमाणस्स अत्थि दव्वाइं वण्णत्तो काल जाव हंता अत्थि। सक्करप्पभाए णं भंते! पु० घनोदधिवलयस्स सतिभागछजोयणबाहल्लस्स खेत्तच्छेदेणं छिज्जमाणस्स जाव हंता अत्ति, एवं जाव अधेसत्तमाए जं जस्स बाहल्लं। इमीसे णं भंते! रयणप्प० पु० घनवातवलयस्स अद्धपंचमजोयणबाहल्लस्स खेत्तछेदेणं छि० जाव हंता अत्थि, एवं जाव अहेसत्तमाए जं जस्स बाहल्लं। एवं तनुवायवलयस्सवि जाव अधेसत्तमा जं जस्स बाहल्लं।

इमीसे णं भंते! रयणप्पभाए पुढवीए घनोदधिवलए किंसंठिते पन्नत्ते?, गोयमा! वट्टे वलयागारसंठाणसंठिते पन्नत्ते। जे णं इमं रयणप्पभं पुढविं सव्वतो संपरिक्खिवित्ता णं चिट्ठति, एवं जाव अधेसत्तमाए पु० घनोदधिवलए, नवरं अप्पणप्पणं पुढविं संपरिक्खिवित्ता णं चिट्ठति

इमीसे णं रयणप्प० पु० घनवातवलए किंसंठिते पन्नत्ते?, गोयमा! वट्टे वलयागारे तहेव जाव जे णं इमीसे णं रयणप्प० प० घनोदधिवलयं सव्वतो समंता संपरिक्खिवित्ताणं चिट्ठइ वं जाव अहेसत्तमाए घनवातवलए। इमीसे णं रयणप्प० पु० तनुवातवलए किसंठिते पन्नत्ते?, गोयमा! वट्टे वलयागारसंठाणसंठिए जाव जेणं इमीसे रयणप्प० पु० घनवातवलयं सव्वतो समंता संपरिक्खिवित्ता णं चिट्ठइ, एवं जाव अधेसत्तमाए तनुवातवलए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इमा णं भंते ! रयणप्प० पु० केवतिआयामविक्खंभेणं ? पं० गोयमा ! असंखेज्जाइं जोयणसहस्साइं आयामविक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पन्नत्ते, एवं जाव अधेसत्तमा। इमा णं भंत ! रयणप्प० पु० अंते य मज्झे य सव्वत्थ समा बाहल्लेणं प०?, हंता गो० इमा णं रयण० पु० अंते य मज्झे य सव्वत्थ समा बाहल्लेणं, एवं जाव अधेसत्तमा ॥

वृ. 'इमीसे ण'मित्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्याः सर्वासु दिक्षु विदिक्षु च चरमान्ते घनोदधिवलयः कियद्बाहल्येन तिर्यग्बाहल्येन प्रज्ञप्तः ?, भगवानाह—गौतम ! षड् योजनानि बाहल्येन—तिर्यग्बाहल्येन प्रज्ञप्तः, तत ऊर्ध्वं प्रतिपृथिवि योजनस्य त्रिभागो वक्तव्यः, तद्यथा—शर्कराप्रभायाः सत्रिभागानि षड् योजनानि वालुकाप्रभायास्त्रिभागोनानि सप्त योजनानि पङ्कप्रभायाः परिपूर्णानि सप्त योजनानि धूमप्रभायाः सत्रिभागानि सप्त योजनानि तमःप्रभायास्त्रिभागोनान्यष्टौ योजनानि अधःसप्तमपृथिव्याः परिपूर्णान्यष्टौ योजनानि, सूत्राक्षराणि तु सर्वत्र पूर्ववद्योजनीयानि । सम्प्रति घनवातवलयस्य तिर्यग्बाहल्यपरिमाणप्रतिपादनार्थमाह—'इमीसे णं भंते!' इत्यादि, अस्या रत्नप्रभायाः पृथिव्या घनवातवलयस्तिर्यग्बाहल्येनार्द्धपञ्चमानि—सार्द्धानि चत्वारि योजनानि प्रज्ञप्तः, अत ऊर्ध्वं तु प्रतिपृथिवि गव्यूतं वर्द्धनीयं, तथा चाह—द्वितीयस्याः पृथिव्याः क्रोशोनानि पञ्च योजनानि, तृतीयस्याः पृथिव्याः परिपूर्णानि पञ्च योजनानि, चतुर्थ्याः पृथिव्याः सक्रोशानि पञ्च योजनानि, पञ्चम्याः पृथिव्या अर्द्धषष्ठानि—सार्द्धानि पञ्च योजनानि, षष्ठ्याः पृथिव्याः क्रोशोनानि षड् योजनानि, सप्तम्याः पृथिव्याः परिपूर्णानि षड् योजनानि ।

सम्प्रति तनुवातवलयस्य तिर्यग्बाहल्यपरिमाणप्रतिपादनार्थमाह—'इमीसे णं भंते!' इत्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्यास्तनुवातवलयः 'कियत्' किंप्रमाणं 'बाहल्येन' तिर्यग्बाहल्येन प्रज्ञप्तः ?, भगवानाह—षट्क्रोशबाहल्येन प्रज्ञप्तः, अत ऊर्ध्वं तु प्रतिपृथिवि क्रोशस्य त्रिभागो वर्द्धनीयः, तथा चाह—द्वितीयस्याः पृथिव्याः सत्रिभागान् षट् क्रोशान् बाहल्येन प्रज्ञप्तः, तृतीयस्याः पृथिव्यास्त्रिभागोनान् सप्त क्रोशान् चतुर्थ्याः परिपूर्णान् सप्त क्रोशान् पञ्चम्याः पृथिव्याः सत्रिभागान् सप्त क्रोशान् षष्ठ्याः पृथिव्यास्त्रिभागोनान् अष्टौक्रोशान्, सप्तम्याः परिपूर्णान् अष्टौ क्रोशान्,

॥१॥ "छच्चेव अद्धपंचमजोयणसड्डं च होइ रयणाए ।
उदहीघनतनुवाया (उ) जहासंखेण निद्दिट्ठा ॥

॥२॥ सतिभागगाउयं च तिभागो गाउयस्स बोद्धव्वो ।
आइधुवे पक्खेवो अहो अहो जाव सत्तमिया ॥

एतेषां च त्रयाणामपि घनोदध्यादिविभागानामेकत्र मीलने प्रतिपृथिवि यथोक्तमपान्तरालमानं भवति ॥ सम्प्रत्येतेष्वेव घनोदध्यादिवलयेषु क्षेत्रच्छेदेन कृष्णावर्णाद्युपेतद्रव्यास्तित्वप्रतिपादनार्थमाह—'इमीसे णं भंते!' इत्यादि, पूर्वद्भावनीयं, बाहल्यपरिमाणमपि घनोदध्यादीनां प्रतिपृथिवि प्रागुक्तमुपयुज्य वक्तव्यम् ॥ सम्प्रति घनोदध्यादिसंस्थानप्रतिपादनार्थमाह—'इमीसे णं भंते!' इत्यादि, अस्या भदन्त! रत्नप्रभायाः पृथिव्या घनोदधिवलयः किमिव संस्थितः किंसंस्थितः प्रज्ञप्तः ?, भगवानाह—गौतम! 'वृत्तः' चक्रवालतया परिवर्त्तुलो वलयस्य—मध्यशुषिरस्य वृत्तविशेषस्याकारः—आकृतिर्वलयाकारः स इव संस्थानं वलयाकारसंस्थानं तेन संस्थितो वलयाकारसंस्थानसंस्थितः । कथमेवमवगम्यते वलयाकारसंस्थानसंस्थित इति ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत आह–'जेण' मित्यादि, येन कारणेनेमां रत्नप्रभां पृथिवीं 'सर्वतः' सर्वासु दिक्षु विदिक्षु च 'संपरिक्षिप्य' सामस्त्येन वेष्टयित्वा 'तिष्ठति' वर्त्तते तेन कारणेन वलयाकारसंस्थानसंस्थितः प्रज्ञप्तः । एवं घनवातवलयसूत्रं तनुवात- वलयसूत्रं च परिभावनीयं, नवरं घनवातवलयो घनोदधिवलयं संपरिक्षिप्येति वक्तव्यः, तनुवातवलयो घनवातवलयं संपरिक्षिप्येति । एवं शेषास्वपि पृथिवीषु प्रत्येकं त्रीणि त्रीणि सूत्राणि भावनीयानि ।

'इमा णं भंते !' इत्यादि, इयं भदन्त ! रत्नप्रभा पृथिवी कियद् 'आयामविष्कम्भेन' समाहारो द्वन्द्वः, आयामविष्कम्भाभ्यां प्रज्ञप्ता ?, भगवानाह–असङ्ख्येयानि योजनसहस्राणि आयाम-विष्कम्भेन, किमुक्तं भवति ?–असङ्ख्येयानि योजनसहस्राणि आयामेन, असङ्ख्येयानि योजन-सहस्राणि विष्कम्भेन च, आयामविष्कम्भयोस्तु परस्परमल्पबहुत्वचिन्तने तुल्यत्वं, तथाऽसङ्ख्येयानि योजनसहस्राणि 'परिक्षेपेण' परिधिना प्रज्ञप्ता, एवमेकैका पृथिवी तावद्वक्तव्या यावदधःसप्तमी पृथिवी । 'इमा णं भंते' इत्यादि, इयं भदन्त ! रत्नप्रभा पृथिवी अन्ते मध्ये च सर्वत्र समा 'बाहल्येन' पिण्डभावेन प्रज्ञप्ता ?, भगवानाह–गौतमेत्यादि सुगमम् । एवं क्रमेणैकैका पृथिवी तावद्वक्तव्या यावत्सप्तमी ।।

मू. (९१) इमीसे णं भंते ! रयणप्प० पु० सव्वजीवा उववन्नपुव्वा ? सव्वजीवा उववन्ना ?, गोयमा ! इमीसे णं रय० पु० सव्वजीवा उववन्नपुव्वा नो चेव णं सव्वजीवा उववन्ना, एवं जाव अहेसत्तमाए पुढवीए ।

इमा णं भंते ! रयण० पु० सव्वजीवेहिं विजढपुव्वा ? सवुवजीवेहिं विजढा ?, गोयमा ! इमा णं रयण० पु० सव्वजीवेहिं विजढपुव्वा नो चेव णं सव्वजीवविजढा, एवं जाव अधेसत्तमा

इमीसे णं भंते ! रयण० पु० सव्वपोग्गला पविट्ठपुव्वा ? सव्वपोग्गला पविट्ठा ? गो० ! ! इमीसे णं रयण० पुढवीए सव्वपोग्गला पविट्ठपुव्वा नो चेव णं सव्वपोग्गला पविट्ठा, एवं जाव अधेसत्तमाए पुढवीए । इमा णं भंते ! रयणप्पभा पुढवी सव्वपोग्गलेहिं विजढपुव्वा ? सव्वपोग्गल विजढा ?, गोयमा ! इमा णं रयणप्पभा पु० सव्वपोग्गलेहिं विजढपुव्वा नो चेव णं सव्वपोग्गलेहिं विजढा, एवं जाव अधेसत्तमा ।।

वृ. 'इमीसे णं भंते !' इत्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां सर्वजीवाः सामान्येन उपपन्नपूर्वा इति–उत्पन्नपूर्वा कालक्रमेण, तथा सर्वजीवाः 'उपपन्नाः' उत्पन्ना युगपद् ?, भगवानाह–गौतम ! अस्यां रत्नप्रभायां पृथिव्यां सर्वजीवाः सांव्यवहारिकजीवराश्यन्तर्गताः प्रायोवृत्तिमाश्रित्य सामान्येन 'उपपन्नपूर्वा' उत्पन्नपूर्वा कालक्रमेण, संसारस्यानादित्वात्, न पुनः सर्वजीवाः 'उपपन्ना' उत्पन्ना युगपत्, सकलजीवानामेककालं रत्नप्रभापृथिवीत्वेनोत्पादे सकलदेवनारकादिभेदा-भावप्रसक्तेः, न चैतदस्ति, तताजगत्स्वाभाव्यात्, एवमेकैकस्याः पृतिव्यास्तावद्वक्तव्यं यावदधःसप्तम्याः । 'इमा णं भंते !' इत्यादि, इयं च भदन्त ! रत्नप्रभापृथिवी 'सव्वजीवेहिं विजढपुव्वा' इति सर्वजीवैः कालक्रमेण परित्यक्तपूर्वा, तथा सर्वजीवैर्युगपद् 'विजढा' परित्यक्ता ?, भगवानाह–गौतम ! इयं रत्नप्रभा पृथिवी प्रायोवृत्तिमाश्रित्य सर्वजीवैः सांव्यवहारिकैः कालक्रमेण परित्यक्तपूर्वा, न तु युगपत्परित्यक्ता, सर्वजीवैः एककालपरित्यागस्यासम्भवात् तथानिमित्ताभावात्, एवं तावद्वक्तव्यं यावदधःसप्तमी पृथ्वी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इमीसे ण' मित्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां सर्वे पुद्गला लोकोदरविवरवर्त्तिनः कालक्रमेण 'प्रविष्टपूर्वा' तद्भावेन परिणतपूर्वा, तथा सर्वे पुद्गलाः 'प्रविष्टाः' एककालं तद्भावेन परिणताः ?, भगवानाह-गौतम ! अस्यां रत्नप्रभायां पृथिव्यां सर्वे पुद्गलाः लोकवर्त्तिनः 'प्रविष्टपूर्वा' तद्भावेनपरिणतपूर्वा, संसारस्यानादित्वात्, न पुनरकेककालं सर्वपुद्गलाः 'प्रविष्टाः' तद्भावेन परिणताः, सर्वपुद्गलानां तद्भावेन परिणतौ रत्नप्रभाव्यतिरेकेणान्यत्र सर्वत्रापि पुद्गलाभावप्रसक्तेः, न चैतदस्ति, तथाजगत्स्वाभाव्यात् । एवं सर्वासु पृथिवीषु क्रमेण वक्तव्यं यावदधःसप्तम्यां पृथिव्यामिति । 'इमा णं भंते !' इत्यादि, इयं भदन्त ! रत्नप्रभा पृथिवी सर्वपुद्गलैः कालक्रमेण 'विजढपुव्वा' इति परित्यक्तपूर्वा तथैव सर्वे पुद्गलैरेककालं परित्यक्ता ?, भगवानाह-गौतम ! इयं रत्नप्रभा पृथिवी सर्वपुद्गलै कालक्रमेण परित्यक्तपूर्वा, संसारस्थानादित्वात्, न पुनः सर्वपुद्गलैरेककालं परित्यक्ता, सर्वपुद्गलैरेककालपरित्यागे तस्याः सर्वथा स्वरूपाभावप्रसक्तेः, न चैतदस्ति, तथाजगत्स्वाभाव्यतः शाश्वतत्वात्, एतच्चानन्तरमेव व्यति । एवमेकैका पृथिवी क्रमेण तावद्वाच्या यावदधःसप्तमी पृथिवी ॥

मू. *(९२) इमा णं भंते ! रयणप्पभा पुढवी किं सासया असासया ?, गोयमा ! सिय सासता सिय असासया ॥ से केणट्ठेणं भंते ! एवं वुच्चइ-सिय सासया सिय असासया ? गोयमा दव्वट्ठयाए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता, से तेणट्ठेणं गोयमा ! एवं वुच्चति-तं चेव जाव सिय असासता, एवं जाव अधेसत्तमा ।*

इमा णं भंते ! रयणप्पभापु० कालतो केवच्चिरं होइ ?, गोयमा ! न कयाइ न आसि न कयाइ नत्थि न कयाइ न भविस्सति ॥ भुविं च भवइ य भविस्सति य धुवा नियया सासया अक्खया अव्वया अवट्ठिता निच्चा एवं जाव अधेसत्तमा ॥

वृ. 'इमा णं भंते !' इत्यादि, इयं भदन्त ! रत्नप्रभा पृथिवी किं शाश्वती अशाश्वती ?-गौतम ! स्यात्-कथञ्चित्कस्यापि नयस्याभिप्रायेणेत्यर्थ शाश्वती, स्यात्-कथञ्चिदशाश्वती ॥ एतदेव सविशेषं जिज्ञासुः पृच्छति-'से केणट्ठेण' मित्यादि, सेशब्दोऽथशब्दार्थ स च प्रश्ने, केन 'अर्थेन' कारणेन भदन्त ! एवमुच्यते यथा स्यात् शाश्वती स्यादशाश्वतीति ?, भगवानाह-गौतम ! 'दव्वट्ठयाए' इत्यादि, द्रव्यार्थतया शाश्वतीति, तत्र द्रव्यं सर्वत्रापि सामान्यमुच्यते, द्रवति-गच्छति तान् तान् पर्यायान् विशेषानिति वा द्रव्यमितिव्युत्पत्तेर्द्रव्यमेवार्थः-तात्विकः पदार्थ यस्य न तु पर्यायाः स द्रव्यार्थः-द्रव्यमात्रास्तित्वप्रतिपादको नयविशेषस्तद्भावो द्रव्यार्थता तया द्रव्यमात्रास्तित्वप्रतिपादकनयाभिप्रायेणेतियावत् शाश्वती, द्रव्यार्थिकनयमतपर्यालोचनायामेवंविधस्य रत्नप्रभायाः पृथिव्या आकारस्य सदा भावात् ।

'वर्णपर्यायैः' कृष्णादिभिः 'गन्धपर्यायैः' सुरभ्यादिभिः 'रसपर्यायैः' तिक्तादिभिः 'स्पर्शपर्यायैः' कठिनत्वादिभि 'अशाश्वती' अनित्या, तेषां वर्णादीनां प्रतिक्षणं कियत्कालानन्तरं वाऽन्यथाभवनात्, अतादवस्थ्यस्य चानित्यत्वात्, न चैवमपि भिन्नाधिकरणे नित्यत्वानित्यत्वे, द्रव्यपर्याययोर्भेदाभेदोपगमात्, अन्यथोभयोरप्यसत्वापत्तेः, तथाहि-शक्यते वक्तुं परपरिकल्पितं द्रव्यमसत्, पर्यायव्यतिरिक्तत्वात्, बालत्वादिपर्यायशून्यवन्ध्यासुतवत्, तथा परपरिकल्पिताः पर्याया असन्तः, द्रव्यव्यतिरिक्तत्वात्, वन्ध्यासुतगतबालत्वादिपर्यायवत्, उक्तञ्च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ "द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः।
क कदा केन किंरूपा ?, दृष्टा मानेन केन वा ? ॥" इति।

कृतं प्रसङ्गेन, विस्तरार्थिना च धर्मसङ्ग्रहणिटीका निरूपणीया। 'से तेणट्ठेण' मित्याद्युपसंहार-माह, सेशब्दोऽथशब्दार्थ स चात्र वाक्योपन्यासे अथ 'एतेन' अनन्तरोदितेन कारणेन गौतम! एवमुच्यते–स्यात् शाश्वती स्यादशाश्वती, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमी पृथिवी, इह यद् यावत्सम्भवास्पदं तच्चेत्तावन्तं कालं शश्वद्भवति तदा तदपि शाश्वतमुच्यते यथा तन्त्रान्तरेषु 'आकप्पट्ठाई पुढवी सासया' इत्यादि, ततः संशयः–किमेषा रत्नप्रभा पृथवी सकलकालावस्थायि-तया शाश्वती उतान्यथा यता तन्त्रान्तरीयैरुच्यत इति ?, ततस्तदपनोदार्थं पृच्छति–

'इमा णं भंते इत्यादि, इयं भदन्त ! रत्नप्रभा पृथिवी कालतः 'कियच्चिरं' कियन्तं कालं यावद्भवति ?, भगवानाह–गौतम ! न कदाचिन्नासीत्, सदैवासीदिति भावः, अनादित्वात्, तता न कदाचिन्न भवति, सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, अत्रापि स एव हेतुः, सदा भावादिति, तता न कदाचिन्न भविष्यति, भविष्यच्चिन्तायां सर्वदैव भविष्यतीति भावः, अपर्यवसितत्वात्। तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति–

'भुविं चे'त्यादि, अभूत् भवति भविष्यति च, एवं त्रिकालभावित्वेन 'ध्रुवा' ध्रुवात्वादेव 'नियता' नियतावस्थाना, धर्म्मास्तिकायादिवत्, नियतत्वादेव च शाश्वती, शश्वद्भावः प्रलया-भावात्, शास्वतत्वादेव च सततगङ्गासिन्धुप्रवाहप्रवृत्तावपि पद्मपौण्डरीकह्रद इवान्यतरपुद्गल विचटनेऽप्यन्यतरपुद्गलोपचयभावात्, अक्षया अक्षयत्वादेव च अव्यया, मानुषोत्तराद्बहि समुद्रवत्, अव्ययत्वादेव 'अवस्थिता' स्वप्रमाणावस्थिता, सूर्यमण्डलादिवत्, एवं सदाऽवस्थानेन चिन्त्यमाना नित्या जीवस्वरूपवत्, यदिवा ध्रुवादयः शब्दा इन्द्रशक्रादिवत्पर्यायशब्दा नानादेशजनविनेया-नुग्रहार्थमुपन्यस्ता इत्यदोषः, एवमेकैका पृथिवी क्रमेण तावद्वक्तव्या यावदधःसप्तमी।

सम्प्रति प्रतिपृथिवीषुविभागतोऽन्तरं विचिन्तयिषुरिदमाह–

मू. (९३) *इमीसे णं भंते ! रयणप्पभाए पुढवीए उवरिल्लातो चरिमंतातो हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पन्नत्ते ?, गोयमा ! असिउत्तरं जोयणसतसहस्सं अबाधाए अंतरे पन्नत्ते । इमी से णं भंते ! रयण० पु० उवरिल्लातो चरिमंताओ खरस्स कंडस्स हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पन्नत्ते ?, गोयमा ! सोलस जोयणसहस्साइं ।*

इमीसे णं भंते ! रयणप्पभाए पुढवीए उवरिल्लातो चरमंताओ रयणस्स कंडस्स हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पन्नत्ते ?, गोयमा ! एक्कं जोयणसहस्सं अबाधाए अंतरे पन्नत्ते ।। इमीसे णं भंते ! रयण० पु० उवरिल्लातो चरिमंतातो वइरस्स कण्डस्स उवरिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पण्णत्ते ?, गोयमा ! एक्कं जोयणसहस्सं ।

इमीसे णं रयण० पु० उवरिल्लाओ चरिमंताओ वइरस्स कंडस्स हेट्ठिल्ले चरिमंते एस णं भंते ! केवतियं अबाधाए अंतरे प० ?, गोयमा ! दो जोयणसहस्साइं इमीसे णं अबाधाए अंतरे पन्नत्ते, एवं जाव रिट्ठस्स उवरिल्ले पन्नरस जोयणसहस्साइं, हेट्ठिल्ले चरिमंते सोलस जोयणसहस्साइं

इमीसे णं भंते ! रयणप्प० पु० उवरिल्लाओ चरिमंता पंकबहुलस्स कंडस्स उवरिल्ले चरिमंते एस णं अबाधाए केवतियं अंतरे पन्नत्ते ?, गोयमा ! सोलस जोयणसहस्साइं अबाधाए अंतरे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नत्ते । हेट्ठिल्ले चरिमंते एक्कं जोणसयसहस्सं आवबहुलस्स उवरि एक्कं जोयणसयसहस्सं हेट्ठिल्ले चरिमंते असीउत्तरं जोयणसयसहस्सं । घनोदहि उवरिल्ले असिउत्तरजोयणसयसहस्सं हेट्ठिल्ले चरिमंते दो जोयणसयसहस्साइं । इमीसे णं भंते ! रयण० पुढ० घनवातस्स उवरिल्ले चरिमंते दो जोयणसयसहस्काइं । हेट्ठिल्ले चरिमंते असंखेज्जाइं जोयणसयसहस्साइं ।

इमीसे णं भंते ! रयण० पु० तनुवातस्स उवरिल्ले चरिमंते असंखेज्जाइं जोयणसयसहस्साइं अबाधाए अंतरे हेट्ठिल्लेवि असंखेज्जाइं जोयणसयसहस्साइं, एवं ओवासंतरेवि ।

दोच्चाए णं भंते ! पुढवीए उवरिल्लातो चरिमंताओ हेट्ठिल्ले चरिमंते एस णं केवतियं अबाधाए अंतरे पन्नत्ते ?, गोयमा ! बत्तीसुत्तरं जोयणसयसहस्सं अबाहाए अंतरे पन्नत्ते । सक्करप्प० पु० उवरि घणोदधिस्स हेट्ठिल्ले चरिमंते बावण्णुत्तरं जोयणसयसहस्सं अबाधाए । घनवातस्स असंखेज्जाइं जोयणसयसहस्साइं पन्नत्ताइं । एवं जाव उवासंतरस्सवि जावऽधेसत्तमा, ए नवरं जीसे जं बाहल्लं तेण घनोदधी संबंधेतव्वो बुद्धीए । सक्करप्पभाए अणुसारेणं घनोदहिसहिताणं इमं पमाणं । तच्चाए णं भंते ! अडयालीसुत्तरं जोयणसतसहस्सं । पंकप्पभाए पुढवीए चत्तालीसुत्तरं जोयणसयसहस्सं । धूमप्पभाए पु० अट्ठतीसुत्तरं जोयणसतसहस्सं ।

तमाए पु० छत्तीसुत्तरं जोयणसतसहस्सं । अधेसत्तमाए पु० अट्ठावीसुत्तरं जोयणसतसहस्सं जाव अधेसत्तमाए । एस णं भंते ! पुढवीए उवरिल्लातो चरिमंतातो उवासंतरस्स हेट्ठिल्ले चरिमंते केवतियं अबाधाए अंतरे प० गो० ! असंखेज्जाइं जोयणसयसहस्साइं अबाधाए अंतरे प० ॥

वृ. 'इमीसे णं भंते !' इत्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्य प्रथमस्य खरकाण्डस्य विभागस्य 'उवरिल्लात्' इति परितताच्चरमान्तात्परतो योऽधस्तनः 'चरमान्तः' चरमपर्यन्तः 'एस ण' मिति एतत्, सूतरे पुंस्त्वनिर्देशः प्राकृतत्वात्, अन्तरं 'कियत्' कियद्योजन-प्रमाणम् 'अबाधया' अन्तरत्वव्याघातरूपया प्रज्ञप्तम् ?, भगवानाह–गौतम ! 'एकं योजनसहस्रम्' एकं योजनसहस्रप्रमाणमन्तरं प्रज्ञप्तम् ।

'इमीसे ण' मित्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरिनाच्चरमान्तात्परतो यो वज्रकाण्डस्योपरितनश्चरमान्त एतदन्तरं 'कियत्' किंप्रमाणमबाधया प्रज्ञप्तम् ?, भगवानाह–गौतम ! एकं योजनसहस्रमबाधयाऽन्तरं प्रज्ञप्तं, रत्नकाण्डाधस्तनचरमान्तस्य वज्रकाण्डोपरितनचरमान्तस्य च परस्परसंलग्नतया उभयत्रापि तुल्यप्माणत्वभावात् ।

'इमीसे ण' मित्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्ताद् वज्रकाण्डस्य योऽधस्तनश्चरमान्तः एतदन्तरं कियद् अबाधया प्रज्ञप्तम् ?, भगवानाह–गौतम ! द्वे योजनसहस्रे अबाधयाऽन्तरं प्रज्ञप्तं, एवं काण्डे काण्डे द्वौ द्वावालपकौ वक्तव्यौ, काण्डम् चाधस्तने चरमान्ते चिन्त्यमाने योजनसहस्रपरिवृद्धि कर्तव्या यावद् रिष्ठस्य काण्डस्याधस्तने चरमान्त चिन्त्यमाने षोडश योजनसस्रणि अबाधयाऽन्तरं प्रज्ञप्तमिति वक्तव्यम् ।

'इमीसे ण' मित्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितन्ताच्चर-मान्तात्परतो यः पङ्कबहुलस्य काण्डस्योपरितनश्चरमान्त– एतत् 'कियत्' किंप्रमाणमबाधयाऽन्तरं प्रज्ञप्तम् ?, भगवानाह–गो० ! षोड्श योजनसहस्राणि अबाधयाऽन्तरं प्रज्ञप्तम् । 'इमीसे ण'-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्यादि, तस्यैव पङ्कबहुलस्य काण्डस्याधस्तनश्चरमान्त एकं योजनशतसहस्रमबाधयाऽन्तरं प्रज्ञप्तं।

'इमीसे ण'मित्यादि, अस्य भदन्त ! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्तात्परतोऽबबहुलस्य काण्डस्य य उपरितनश्चरमान्त एतदन्तरं कियद् अबाधया प्रज्ञप्तम् ?, भगवानाह–गौतम ! एकं योजनशतसहस्रमबाधयाऽन्तरं प्रज्ञप्तं।

'इमीसेण'मित्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्या रत्नकाण्डस्योपरितनाच्चरमान्तात्परतोऽबबहुलस्य काण्डस्य योऽधस्तनश्चरमान्त एतदन्तरं कियद् अबाधया प्रज्ञप्तम् ?, भगवानाह–गौतम ! अशीत्युत्तरं योजनशतसहस्रम्। घनोदधेरुपरितने चरमान्ते पृष्टे एतदेव निर्वचनमशीत्युत्तरयोजनशतसहस्रम्, अधस्तने पृष्टे इदं निर्वचनं–द्वे योजनशतसहस्र अबाधयाऽन्तरं प्रज्ञप्तम्। धनवातस्योपरितने चरमन्ते पृष्टि इदमेव निर्वचनं, घनोदध्यधस्तनचरमान्तस्य घनवातोपरितनचरमान्तस्य च परस्परं संलग्नत्वात्। घनवातस्याधस्तने चरमान्ते पृष्टे एतन्निर्वचनम्–असङ्ख्येयानि योजनशतसहस्राण्यबाधयाऽन्तरं प्रज्ञप्तम्। एवं तनुवातस्योपरितने चरमान्ते अधस्तने चरमान्ते अवकाशान्तरस्याप्युपरितनेऽधस्तने च चरमान्ते इत्थमेव निर्वचनं वक्तव्यम्, असङ्ख्येयानि योजनशतसहस्रण्यबाधयाऽन्तरं प्रज्ञप्तमिति, सूत्रपाठस्तु प्रत्येकं सर्वत्रापि पूर्वानुसारेण स्वयं परिभावनीयः सुगमत्वात्।

'दोच्चाए णं' इत्यादि, द्वितीयस्या भदन्त ! पृथिव्या उपरितनाच्चरमान्तात्परतो योऽधस्तनश्चरमान्त एतत् 'कियत्' किंप्रमाणमबाधयाऽन्तरं प्रज्ञप्तम् ?, भगवानाह–गौतम ! 'द्वात्रिंशदुत्तरं' द्वात्रिंशत्सहस्राधिकं योजनशतसहस्रमबाधयाऽन्तरं प्रज्ञप्तम्। घनोदधेरुपरितने चरमान्ते पृष्टे एतदेव निर्वचनं द्वात्रिंशदुत्तरं योजनशतसहस्रम्, अधस्तने चरमान्ते पृष्टे इदं निर्वचनं–द्विपञ्चाशदुत्तरं योजनशतसहस्रम्। एतदेव घनवातस्योपरितनचरमान्तपृच्छायामपि, घनवातस्याघस्तनचरमान्तपृच्छायां तनुवातावकाशान्तरयोरुपरितनाधस्तनचरमान्तपृच्छासु च यथा रत्नप्रभायां तथा वक्तव्यम्, असङ्ख्येयानि योजनशतसहस्रण्यबाधयाऽन्तरं प्रज्ञप्तमिति वक्तव्यमिति भावः।

'तच्चाए णं भंते' इत्यादि, तृतीयस्या भदन्त ! पृथिव्या उपरितनाच्चरमान्ताद् अघस्तनश्चरमान्त एतदन्तरं कियद् अबाधया प्रज्ञप्तम् ?, भगवानाह–गौतम ! अष्टाविंशत्युत्तरं शत(सहस्र)म्–अष्टाविंशतिसहस्राधिकं योजनशतसहस्रमबाधयाऽन्तरं प्रज्ञप्तम्। एतदेव घनोदधेरुपरितनचरमान्तपृच्छायामपि निचनम्। अधस्तनचरमान्तपृच्छायामष्टाचत्वारिंशदुत्तरं योजनशतसहस्रमबाधयाऽन्तरं प्रज्ञप्तमिति वक्तव्यम्। एतदेव घनवातस्योपरितनचरमान्तपृच्छायामपि। अधस्तनचरमान्तपृच्छायां तनुवातावकाशान्तरयोरुपरितनाधस्तनचरमान्तपृच्छासु च यथा रत्नप्रभायां तथा वक्तव्यम्। एवं चतुर्थपञ्चमषष्ठसप्तमपृथिवीविषयाणि सूत्राण्यपि भाव० ॥

मू. (९४) इमा णं भंते ! रयणप्पभा पुढवी दोच्चं पुढविं पणिहाय बाहल्लेणं किं तुल्ला विसेसाहिया संखेज्जगुणा ? वित्थरेणं किं तुल्ला विसेसहीणा संखेज्जगुणहीणा ?, गोयमा ! इमाणं रयण० पु० दोच्चं पुढवीं पणिहाय बाहल्लेणं नो तुल्ला विसेसाहिया नो संखेज्जगुणा, वित्थारेणं नो तुल्ला विसेसहीणा नो संखेज्जगुणहीणा। दोच्चा णं भंते ! पुढवी तच्चं पुढविं पणिहाय बाहल्लेणं किं तुल्ला ? एवं चेव भाणितव्वं। एवं तच्चा चउत्थी पंचमी छट्ठी। छट्ठी णं भंते ! पुढवी सत्तमं पुढविं पणिहाय बाहल्लेणं किं तुल्ला विसेसाहिया संखेज्जगुणा ?, एवं चेव भाणियव्वं। सेवं भंते ! २।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'इमा णं भंते !' इत्यादि, इयं भदन्त ! रत्नप्रभापृथिवी द्वितीयां पृथिवीं शर्कराप्रभां 'प्रणिधाय' आश्रित्य 'बाहल्येन' पिण्डभावेन कं तुल्या विशेषाधिका सङ्ख्येयगुणा ?, बाहल्य-मधिकृत्येदं प्रश्नत्रयम्, ननु एका अशीत्युत्तरयोजनलक्षमाना अपरा द्वात्रिंशदुत्तरयोजनलक्ष-मानेत्युक्तं ततस्तदर्थावगमे सत्युक्तलक्षणं प्रश्नत्रयमयुक्तं, विशेषाधिकेति स्वयमेवार्थपरिज्ञानात्, सत्यमेतत्, केवलं ज्ञप्रश्नोऽयं तदन्मोहापोहार्थ, एतदपि कथमवसीयते ? इति चेत्स्वावबोधाय प्रश्नान्तरोपन्यासात्, तथा चाह–विस्तरेण–विष्कम्भेन किं ? तुल्या विशेषहीना सङ्ख्येयगुणहीना ?

भगवानाह–गौतम ! इयं रत्नप्रभा पृथिवी द्वितीया शर्कराप्रभापृथिवीं प्रमिधाय बाहल्येन न तुल्या किन्तु विशेषाधिका नापि सख्ययेयगुणा, कथमेतदेवम् ? इत चेदुच्यते–इह रत्नप्रभा पृथिवी अशीत्युत्तरयोजनलक्षमाना, शर्कराप्रभा द्वात्रिंशदुत्तरयोजनलक्षमाना, तदत्रान्तरमष्टाच-त्वारिंशद् योजनसहस्राणि ततो विशेषाधिका घटते न तुल्या नापि सङ्ख्येयगुणा, विस्तरेण न तुल्या किन्तु विशेषहीना नापि सङ्ख्येयगुणहीना, प्रदेशादिवृद्धया प्रवर्द्धमाने तावति क्षेत्रे शर्कराप्रभाया एवं [च] वृद्धिसम्भवात्, एवं सर्वत्र भावनीयम् ।

तृतीय प्रतिपतौ नेरयिकस्य उद्देशकः–१ समाप्तः

–: नेरयिकः उद्देशकः–२ :–

वृ. सम्प्रति कस्यां पृथिव्यां कस्मिन् प्रदेशे नरकावासाः ? इत्येतत्प्रतिपादनार्थं प्रथमं तावदिदमाह–

***मू.* (९५)** *कइ णं भंते ! पुढवीओ पन्नत्ताओ ?, गोयमा ! सत्त पुढवीओ प० तं० –रयणप्पभा जाव अहेसत्तमा । इमीसे णं रयणप्प० पु० असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवतियं ओगाहित्ता हेट्ठा केवइयं वज्जित्ता मज्झे केवतिए केवतिया निरयावाससयसहस्सा प० णो० इमीसे णं रयण० पु० असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्सं ओगाहित्ता हेट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अडसत्तरी जोयणसयसहस्सा, एत्थ णं रयणप्पभाए पु० नेरइयाणं तीसं निरयावाससयसहस्साइं भवंतितिमक्खाया ॥*

ते णं नरगा अंतो वट्टा बाहिं चउरंसा जाव असुभा नरएसु वेयणा, एवं एएणं अभिलावेणं उवजुंजिऊण भाणियव्वं ठाणप्पयाणुसारेणं, जत्थ जं बाहल्लं जत्थ जत्तिया वा नरयावाससयसहस्सा जाव अहेसत्तमाए पुढवीए, अहेसत्तमाए मज्झिमं केवतिए कति अनुत्तरा महइ महालता महानिरया पन्नत्ता एवं पुच्छितव्वं वागरेयव्वंपि तहेव ॥

वृ. 'कइ णं भंते !' इत्यादि, कति भदन्त ! पृथिव्यः प्रज्ञप्ताः ? इति, विशेषाभिधा-नार्थमेतदभिहितम्, उक्तञ्च–

॥१॥ "पुव्वभणियंपि जं पुण भन्नई तत्थ कारणं अत्थि ।
पडिसेहो य अणुण्णाकारण (हेउ) विसेसोवलंभो वा ।."

भगवानाह–गौतम ! सप्त पृथिव्यः प्रज्ञप्ताः, तद्यथा–रत्नप्रभा यावत्तमस्तमप्रभा ॥ 'इमीसे ण'मित्यादि, अस्या भदन्त ! रत्नप्रभायाः पृथिव्या उपरि 'कियत्' किंप्रमाणमवगाह्य–उपरितन-भागात् कियद् अतिक्रम्येत्यर्थः अधस्तात् 'कियत्' किंप्रगाणं वर्जयित्वा मध्ये 'कियति' किंप्रमाणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कियन्ति नरकावासशतसहस्राणि प्रज्ञप्तानि ?, भगवानाह–गौतम् ! अस्या रत्नप्रभायाः पृथिव्या अशीत्युत्तरयोजनशतसहस्रबाहल्याया उपर्येकं योजनसहस्रमवगाह्याधस्तादेकं योजनसहस्रं वर्जयित्वा 'मध्ये' मध्यभागे 'अष्टसप्तत्युत्तरे' अष्टसप्ततिसहस्राधिके योजनशतसहस्रे 'अत्र' एतस्मिन् रत्नप्रभापृथिवीनैरयिकाणां योग्यानि त्रिंशन्नरकावासशतसहस्राणि प्रज्ञप्तानि भवन्तीत्याख्यां मया शेषैश्च तीर्थकृद्भिः, अनेन सर्वतीर्थकृतामिसंवादिवचनता प्रवेदिता।

'ते णं नरगा' इत्यादि, ते नरका 'अन्तः' मध्यभागे 'वृत्ताः' वृत्ताकाराः 'बहिः' बहिर्भागे 'चतुरस्राः' चतुरस्राकाराः, इदं च पीठोपरिवर्त्तिनं मध्यभागमधिकृत्य प्रोच्यते, सकलपीठाद्यपेक्षया तु आवलिकाप्रविष्ठा वृत्तत्र्यस्रचतुरस्रसंस्थानाः पुष्पावकीर्णास्तु नानासंस्थानाः प्रतिपत्तव्याः, एतच्चाग्रे स्वयमेव वक्ष्यति, "अहे खुरप्पसंठाणसंठिया" इति, 'अधः' भूमितले क्षुरप्रस्येव–प्रहरणविशेषस्य (इव) यत् संस्थानम्–आकारविशेषस्तीक्ष्णतालक्षणस्तेन संस्थिताः क्षुरप्रसंस्थान-संस्थिताः, तथाहि–तेषु नरकावासेषु भूमितले मसृणत्वाभावतः शर्करिले पादेषु न्यस्यमानेषु शर्करामात्रसंस्पर्शेऽपि क्षुरप्रेणेव पादाः कृत्यन्ते, तथा "निच्चंधयारतमसा नित्यान्धकाराः उद्दयोताभावतो यत्तमस्तेन–तमसा नित्यं–सर्वकालमन्धकारो येषु ते नित्यान्धकाराः, तत्रापवरकादिष्वपि तमोऽन्धकारोऽस्ति केवलं स बहि सूर्यप्रकाशे मन्दतमो भवति नरकेषु तु तीर्थकरजन्मदीक्षाकालव्यतिरेकेणान्यदा सर्वकालमप्युदद्योतलेशस्याप्यभावतो जात्यन्धस्येव मेघच्छन्नकालार्द्धरात्र इवातीव बहलतरो भवति, तत उक्तं तमसानित्यान्धकाराः, तमश्च तत्र सदाऽवस्थितमुदद्योतकारिणामभावात्, तथा चाह–

"ववगयगहचंदसूरनक्खत्तजोइसपहा" व्यपगतः–परिभ्रष्टो ग्रहचन्द्रसूर्यनक्षत्ररूपाणाम् उपलक्षणमेतत्तारारूपाणां च ज्योतिष्काणां पन्था–मार्गो यत्र ते व्यपगतग्रहचन्द्रसूर्यनक्षत्र-ज्योतिष्कपथाः, तथा "मेयवसापूयरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला" इति स्वभावतः संपन्नैर्मेदोवसापूरुधिरमांसैर्यश्चिक्खिल्लः–कर्दमस्तेन लिप्तम्–उपदिग्धम् अनुलेपनेन–सकृल्लिप्तस्य पुनः पुनरुपलेपनेन तलं–भूमिका येषां ते मेदोवशापूतिरुधिरमांसचिक्खिल्ललिप्तानुलेपनतला अत एवाशुचयः–अपवित्रा बीभत्सा दर्शनेऽप्यतिजुगुप्सोत्पत्तेः परमदुरभिगन्धाः–मृतगवादिकडेवरेभ्योऽप्यतीवानिष्टदुरभिगन्धाः।

"काऊअगणिवन्नाभा" इति लोहे धम्यमाने यादृक् कपोतो–बहुकृष्णरूपोऽग्रेर्वर्ण, किमुक्तं भवति ?–यादृशी बहुकृष्णवर्णरूपाऽग्निज्वाला विनिर्गच्छतीति, तादृशी आभा–वर्णस्वरूपं येषां ते कपोताग्निवर्णाभाः, तथा कर्कशः–अतिदुस्सहोऽसिपत्रस्येव स्पर्शो येषां ते कर्कशस्पर्शाः, अत एव 'दुरहियासा' इति दुःखेनाध्यास्यन्ते–सह्यन्ते इति दुरध्यासा अशुभा दर्शनतो नरकाः, तथा गन्धरसस्पर्शशब्दैरशुभा–अतीवासातरूपा नरकेषु वेदना।

एवं सर्वास्वपि पृथिवीष्वालपको वक्तव्यः, स चैवम्–"सक्करप्पभाए णं भंते ! पुढवीए बत्तीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता हेट्ठा केवइयं वज्जेत्ता मज्झे चेव केवइए केवइया निरयावाससयसहस्सा पन्नत्ता ? गोयमा ! सक्करप्पभाए णं पुढवीए बत्तीसुत्तर-जोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहित्ता हेट्ठा गं जोयणसहस्सं वज्जेत्ता मज्झे तीसुत्तरजोयणसयसहस्से एत्थ णं सक्करप्पभापुढविनेरइयाणं पणवीसा नरयावाससयसहस्सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवंतीति मक्खायं, ते णं नरगा अंतो वट्टा जाव असुभा नरएसु वेयणा।

वालुयप्पभाए णं भंते ! पुढवीए अट्ठावीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता हेट्ठा केवइयं वज्जित्ता मज्झे केवइए केवइया निरयावाससयसहस्सा पन्नत्ता ? गोयमा! वालुयप्पभाए पुढवीए अट्ठावीसुत्तरजोणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठं एगं जोयणसहस्सं वज्जित्ता, मज्झे छव्वीसुत्तरे जोयसयसहस्से एत्थ णं वालुयप्पभापुढविनेरइयाणं पन्नरस निरयावाससयसहस्सा भवन्तीति मक्खाय, ते णं नरगा जाव असुभा नरगेसु वेयणा।

पंकप्पभाए णं भंते ! पुढवीए वीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता हेट्ठा केवइयं वज्जित्ता मज्झे केवइए केवइर्य निरयावाससयसहस्सा पण्णत्ता ? , गोयमा ! पंकप्पभाए णं पुढवीए वीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयसहस्सं ओगाहित्ता हिट्ठावि एगं जोयसहस्सं वज्रेत्ता मज्झे अट्ठारसुत्तरे जोयणसयसहस्से, एत्थ णं पंकप्पभा पुढविनेरइयाणं दस निरयावाससयसहस्सा निरयावासा भवंतीति मक्खायं, ते णं नरगा जाव असुभा नगरेसु वेयणा

घूमप्पभाए णं भंते ! पुढवीए अट्ठारसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहेत्ता हेट्ठा केवइयं वज्जित्ता मज्झे केवइए केवइया निरयावाससयसहस्सा प० ? , गोयमा ! घूमप्पभाए णं पुढवीए अट्ठारसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सभोगाहेत्ता हेट्ठा एगं जोयणसहस्सं वज्रेत्ता मज्झे सोलसुत्तरे जोयणसयसहस्से, एत्थ णं धूमप्पभापुढविनेरइयाणं तिन्नि नेरइयावाससयसहस्सा भवंतीति मक्खायं, ते णं नरगा अंतो वट्टा जाव असुभा नरगेसु वेयणा इति।

तमप्पभाए णं भंते ! पुढवीए सोलसुत्तरजोयणसयसहस्सबाहल्लाए उवरि केवतियं ओगाहेत्ता हेट्ठा केवतियं वज्रेत्ता मज्झे केवतिए केवतिया नरगावाससयसहस्सा प० गो० ! तमप्पभाए णं पुढवीए सोलसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सभोगाहेत्ता हेट्ठा एगं जोयसयसहस्सं वज्रेत्ता मज्झे चोद्दसुत्तरे जोयणसयसहस्से एत्थ णं तमापुढविनेर० एगे पंचूणे नरगावाससयसहस्से भवन्तीति मक्खायं, ते णं नरगा अंतो वट्टा जाव असुभा नरगेसु वेयणा।

अहेसत्तमाए णं भंते ! पुढवीए अट्ठोत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहेत्ता हेट्ठा केवइयं वज्रेत्ता मज्झे केवइए केवइया अमुत्तरा महइमहालया महानरगावासा पन्नत्ता ?, गोयमा ! अहेसत्तमाए पुढवीए अट्ठुतक्तरजोयणसयसहस्सबाहल्लाए उवरिं अद्धतेवण्णं जोयसहस्साइं ओगाहेत्ता हेट्ठावि अद्धतेवण्णं जोयणसहस्साइं वज्जित्ता मज्झे तिसु जोयणसहस्सेसु एत्थ मं अहेसत्मपुढविनेरइयाणं पंच अणुत्तरा महइमहालया महानिरया पन्नत्ता, तंजहा–

काले महाकाले रोरुए महारोरुए मज्झे अप्पइट्ठाणे, ते णं महानरगा अंतो वट्टा जाव असुभा महा नगरेसु वेयणा'' इति। इदं च सकलमपि सूत्रं सुगमं, तत्र बाहल्यपरिमाणनरकावास-योग्यमध्यभागपरिमाणमनरकावाससङ्ख्यानामिमाः सङ्ग्रहणिगाथाः–

॥१॥ ''आसीयं बत्तीसं अट्ठावीसं तहेव वीसं च।
अट्ठारस सोलसगं अट्ठुत्तरमेव हेट्ठिमिया॥

॥२॥ अट्ठुत्तरं च तीसं छव्वीसं चेव सयसहस्सं तु।
अट्ठारस सोलसगं चोद्दसमहियं तु छट्ठीए॥

॥३॥ अद्धतिवण्णसहस्सा उवरिमहे वज्जिऊण तो भणिया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मज्झे तिसु सहस्सेसु होंति निरया तमतमाए ॥

॥४॥ तीसा य पन्नवीसा पन्नरस दस चेव सयसहस्साइं ।

तिन्नि य पंचूणेगं पंचेव अनुत्तरा निरया ॥

पाठसिद्धाः ॥ सम्प्रति नरकावाससंस्थानप्रतिपादनार्थमाह–

मू. (९६) *इमीसे णं भंते ! रयणप्पभाए पुढवीए नरका किंसंठिया पन्नत्ता ?, गोयमा ! दुविहा पन्नत्ता, तंजहा–आलवलियपविट्ठा य आवलियबाहिरा य, तत्थ णं जे आवलियपविट्ठा ते तिविहा पन्नत्ता, तंजहा–वट्टा तंसा चउरंसा, तत्थ णं जे ते आवलियबाहिर ते नानासंठाणसंठिया पन्नत्ता, तंजहा–अकोट्ठसंठिता पिट्ठपयणगसंठिता कंडूसंठित लोहीसंठिता कडाहसंठिता थालीसंठिता पिहडगसंठिता किमियडसंठिता किन्नपुडगसंठिआ उडवसंठिया मुरवसंठिता मुयंगसंठया नंदिमुयंगसंठिया आलिंगकसंठिता सुघोससंठिया दद्दरयसंठिता पणवसंठिया पडहसंठिया भेरिसंठिआ झलल्लरीसंयिटा कुतुंबकसंढिया नालिसंठिया, एवं जाव तमाए ।*

अहेसत्तभाए णं भंते ! पुढवीए नरका किंसंठिता पन्नत्ता ?, गोयमा ! दुविहा पन्नत्ता, तंजहा–वट्टे य तंसा य । इमीसे णं भंते ! रयणप्पभाए पुढवीए नरका केवतियं बाहल्लेणं पन्नत्ता ?, गोयमा ! तिन्नि जोयणसहस्साइं बाहल्लेणं पन्नत्ता, तंजहा–हेट्ठा घणा सहस्सं मज्झे झुसिरा सहस्सं उप्पिं संकुइया सहस्सं, एवं जाव अहेसत्तमाए ।

इमीसेणं भंते ! रयणप्प० पु० नरगा केवतियं आयाविक्खंभेणं केवइयं परिक्खेवेणं पन्नत्ता ?, दुविहा पन्नत्ता, तंजहा–संखेज्ञवित्थडा य असंखेज्ञवित्थडाय, तत्थ णं जे ते संखेज्ञवित्थडा ते णं संखेज्ञाइं जोयणसहस्साइं आयामविक्खंभेणं संखेज्ञाइं जोयणसहस्साइं परिक्खेवेणं पन्नत्ता तत्थ णं जे ते असंखेज्ञवित्थडा ते णं असंखेज्ञाइं जोयणसहस्साइं आयामविक्खंभेणं असंखेज्ञाइं जोयसणसहस्साइं परिक्खेवेणं पन्नत्ताए, एवं जाव तमाए । अहेसत्तमाए णं भंते ! पुच्छा, गोयमा दुविहा प०–संखेज्ञवित्थडे य असंखेज्ञ- वित्थडा य, तत्थ णं जे ते संखेज्ञवित्थडे से णं एक्क जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं सोलस सहस्साइं दोन्नि य सत्तावीसे जोयणसए तिन्नि कोसे य अट्ठावीसं च धणुसतं तेरस य अंगुलाइं अद्धंगलुयं च किंचिविसेसाधिए परिक्खेवेणं पन्नत्ता, तत्थ णं जे ते असंखेजवित्थडा ते णं असंखेज्ञाइं जोयणसयसहस्साइं आयामविक्खंभेणं असंखेज्ञाइं जाव परिक्खेवेणं पन्नत्ता ।

वृ. 'इमीसे णं भंते !' इत्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः किमिव संस्थिताः किंसंस्थिताः प्रज्ञप्ताः ?, भगवानाहगौतम ! नरका द्विविधाः प्रज्ञप्ताः, तद्यथा–आवलिकाप्रविष्टाश्च आवलिकाबाह्याश्च, चशब्दावुभयेषामप्यशुभतातुल्यतासूचकौ, आवलिकाप्रविष्टा नामाष्टासु दिक्षु समश्रेण्यवस्थिताः, आवलिकासु–श्रेणिषु प्रविष्टा–व्यवस्थिता आवलिकाप्रविष्टाः, ते संस्थान-मधिकृत्य त्रिविधाः प्रज्ञप्ताः, तद्यथा–वृत्तास्त्र्यस्राश्चतुरस्रा, तत्र ये ते आवलिकाबाह्यास्ते नाना-संस्थान- संस्थिताः प्रज्ञप्ताः, तद्यथा–अयःकोष्ठोलोहमयः कोष्ठस्तद्वत्संस्थिता अयःकोष्ठसंस्थिताः, 'पिट्ठपयण- गसंठिया' इति यत्र सुरासंघानाय पिष्टं पच्यते तत्पिष्टपचनकं तद्वत्संस्थिताः 'पिट्ठपयणगसंठिया' अत्र सङ्ग्रहणिगाथे–

॥१॥ "अयकोट्ठपिट्ठपणगकंडूलोहीकडाहसंठाणा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थाली पिहडग किण्ह(ग) उडए मुरवे मुयंगे य ॥
॥ २ ॥ नंदिमइंगे आलिंग सुघोसे इद्दरे य पणवे य ।
पडहगझल्लरिभेरीकुत्तुबगनाडिसंठाणा ॥

कण्डुःपाकस्थानं लोहीकटाहौ प्रतीतौ तद्वत्संस्थानाः स्थाली—उषा पिहडं—यत्र प्रभूतजनयोग्यं धान्यं पच्यते उटजः—तापसाश्रमो मुरजोमर्द्दलविशेषः नन्दीमृदङ्गो—द्वादशविध-तूर्यान्तर्गतो मृदङ्गः, स च द्विधा, तद्यथा—मुकुन्दो मर्दलश्च, तत्रोपरि सङ्कुचितोऽधो विस्तीर्णो मकुन्दः उपर्यधश्च समो मर्द्दलः आलिङ्गो—मृन्मयो मुरजः सुघोषो—देवलोकप्रसिद्धो घण्टाविशेष आतोद्यविशेषो वा दर्दरो—वाद्यविशेषः पणवो—भाण्डानां पटहः पटहः—प्रतीतः, भेरी—ढक्का, झल्लरी—चर्मावनद्धा विस्तीर्णवलयाकारा, कुस्तुम्बकः—संप्रदायगम्यः, नाडी—घटिका, एवं शेषास्वपि पृथिवीषु तावद्वक्तव्यं यावत्षष्ठ्यां, सूत्रपाठोऽप्येवम्—"सक्करप्पभाए णं भंते ! पुढवीए नरका किंसंठिया प० गो० ! दुविहा प०—आवलिकापविट्ठा य आवलियाहबाहिरा य" इत्यादि ।

अधःसप्तमीविषयं सूत्रं साक्षादुपदर्शयति—'अहेसत्तमाए णं भंते !' इत्यादि, अधःसप्तम्यां भदन्त ! पृथिव्यां नरकाः 'किंसंस्थिताः' किमिव संस्थिताः प्रज्ञप्ताः ?, भगवानाह—गौतम ! द्विविधाः प्रज्ञप्ताः, तद्यथा—'वट्टे य तंसा य' इति, अधःसप्तम्यां हि पृथिव्या नरका आवलिकाप्रविष्टा एव न आवलिकाबाह्याः, आवलिकाप्रविष्टा अपि पञ्च, नाधिकाः, तत्र मध्येऽप्रतिष्ठनाभिधानो नरकेन्द्रो वृत्तः, सर्वेषामपि नरकेन्द्राणां वृत्तत्वात्, शेषास्तु चत्वारः पूर्वादिषु दिक्षु, ते च त्र्यस्राः, तत उक्तं वृत्तश्च त्र्यस्रश्च ।

सम्प्रति नरकावासानां बाहल्यप्रतिपादनार्थमाह—'इमीसे ण'मित्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः कियद्बाहल्येन—बहलस्य भावो बाहल्यं—पिण्डभाव उत्सेध इत्यर्थः तेन प्रज्ञप्ताः ?, भगवानाह—गो० ! त्रीणि योजनसहस्राणि बाहल्येन प्रज्ञप्ताः, तद्यथा—अधस्तने पादपीठे घना—निचिताः सहस्रं—योजनसहस्रं, मध्ये—पीठस्योपरि मध्यभागे सुषिराः सहस्रं—योजनसहस्रं, तत 'उप्पिं'ति उपरि सङ्कुचिताः शिखराकृत्या सङ्कोचमुपगता योजनसहस्रं, तत एवं सर्वसङ्ख्यया नरकावासानां त्रीणि योजनसहस्राणि बाहल्यतो भवन्ति, एवं पृथिव्यां २ तावद्वक्तव्यं यावदधःसप्तम्यां, तथा चोक्तमन्यत्रापि—

॥ १ ॥ "हेट्ठा घणा सहस्सं उप्पिं संकोचतो सहस्सं तु ।
मज्झे सहस्स सुसिरा तिन्नि सहस्सूसिया नरया ॥"

सम्प्रति नरकावासानामायामविष्कम्भप्रतिपादनार्थमाह—'इमीसे मं भंते !' इत्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः किंप्रमाणमायामविष्कम्भेन, समाहारो द्वन्द्वस्तेनायाम-विष्कम्भ्याभ्यामित्यर्थः, कियत् 'परिक्षेपेण' परिरयेण प्रज्ञप्ताः ?, भगवानाह—गौतम ! द्विविधाः प्रज्ञप्ताः, तद्यथा—सङ्ख्येयंविस्तृताश्च असङ्ख्येयविस्तृताश्च, सङ्ख्येययोजनप्रमाणं विस्तृतंविस्तरो येषां ते सङ्ख्येयविस्तृताः, एवमसङ्ख्येयं विस्तृतं येषां ते असङ्ख्येयविस्तृतः, चशब्दौ स्वगतानेक-सङ्ख्याभेदप्रकाशनपरौ, तत्र ये ते सङ्ख्येयविस्तृतास्ते सङ्ख्येयानि योजनसहस्राणि आयामविष्कम्भेन सङ्ख्येयानि योजनसहस्राणि परिक्षेपेण, तत्र ये तेऽसङ्ख्येयविस्तृतास्तेऽसङ्ख्येयानि योजनसहस्राण्या-यामविष्कम्भेन असङ्ख्येयानि योजनसहस्राणि परिक्षेपेण प्रज्ञप्तानि, एवं प्रतिपृथिनवि तावद्वक्तव्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत्षष्ठी पृथिवी, सूत्रपाठस्त्वेवम्-सक्करप्पभाए णं भन्ते! पुढवीए नरगा केवइयं आयामविक्खंभेणं केवइयं परिरयेणं प० गो०! दुविहा प०-संखेज्जवित्थडा य, असंखेज्जवित्थडा य'' इत्यादि।

'अहेसत्तमाए णं भंते!' इत्यादि, अधःसप्तम्यां भदन्त! पृथिव्यां नरकाः कियदायामविष्कम्भेन कियत्परिक्षेपेण प्रज्ञप्ताः?, भगवानाह-गौतम! द्विविधाः प्रज्ञप्ता, तद्यथा-सङ्ख्येयविस्तृत एकः, स चाप्रतिषठानाभिधानो नरकेन्द्रकोऽवसातव्यः, असङ्ख्येयविस्तृताः तेषाश्चत्वारः, तत्र योऽसौ सङ्ख्येयविस्तृतोऽप्रतिष्ठानाभिधानो नरकेन्द्रकः स एवं योजनशतसहस्रमायामविषकम्भेन त्रीणि योजनशतसहस्राणि षोड्श सहस्राणि द्वे योजनशते सप्तविंशत्यधिके त्रयः क्रोशा अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्तम्, इदं च परिक्षेपपरिमाणं गणितभावनया जम्बूद्वीपपरिक्षेपपरिमाणवद्भावनीयं, तत्र ये ते शेषाश्चत्वारोऽसङ्ख्येयविस्तृतास्तेऽसङ्ख्येयानि योजनसहस्राण्यायामविष्कम्भेनासङ्ख्येयानि योजनसहस्राणि परिक्षेपेण प्रज्ञप्तानि। सम्प्रति नरकावासानां वर्णप्रतिपादनार्थमाह-

मू. (९७) *इमीसे णं भंते! रयणप्पभाए पुढवीए नेरइया केरिसया वण्णेणं पन्नत्ता?, गोयमा! काला कालावभासा गंभीरलोमहरिसा भीमा उत्तासणया परमकिण्हा वण्णेणं पन्नत्ता, एवं जाव अधेसत्तमाए। इमीसे णं भंते! रयणप्पभाए पुढवीए नरका केरिसका गंधेणं प० गो०! से जहानामए अहिमडेति वा गोमडेति वा सुणगमडेति वा मज्जारमडेति वा मणुस्समडेति वा महिसमडेति वा मूसगमडेति वा आसमडेति वा हत्थिमडेति वा सीहमडेति वा वग्घमडेति वा विगमडेति वा दीवियमडेति वा मयकुहियचिरविणट्ठकुणिमवावण्णदुब्भिगंधे असुइविलीणविगयबीभत्थदरिसणिज्जे किमिजालाउलसंसत्ते, भवेयारूवे सिया?, नो इणट्ठे समट्ठे, गोयमा इमीसे णं रयणप्पभाए पुढवीए नरगा एत्तो अनिट्ठतरका चेव अकंततरका चेव जाव अमणामतरा चेव गंधेणं पन्नत्ता, एवं जाव अधेसत्तमाए पुढवीए।*

इमीसे णं भंते! रयणप्प० पु० नरया केरिसया फासेणं पन्नत्ता?, गोयमा! से जहानामए असिपत्तेइ वा खुरपत्तेइ वा कलंबचीरियापत्तेइ वा सत्तग्गेइ वा कुंतग्गेइ वा तोमरग्गेति वा नारायग्गेति वा सूलग्गेति वा लउलग्गेति वा भिंडिमालग्गेति वा सूचिकलावेति वा कवियच्छूति वा विंचुयकंटएति वा इंगालेति वा जालेति वा मुम्मुरेति वा, अच्चिति वा अलाएति वा सुद्धागणीइ वा, भवे एतारूवे सिया?, नो तिणट्ठे समट्ठे, गोयमा! इमीसे णं रयणप्पभाए पुढवीए नरगा एत्तो अनिट्ठतरा चेव जाव अमणामतरका चेव फासे णं प०, एवं जाव अधेसत्तमाए पुढवीए॥

वृ. 'इमीसे णं भंते!' इत्यादि, अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः कीदृशा वर्णेन प्रज्ञप्ता?, भगवानाह-गौतम! कालाः, तत्र कोऽपि निष्प्रतिभतया मन्दकालोऽप्याशङ्क्येत ततस्तदाशङ्काव्यवच्छेदार्थं विशेषणान्तरमाह-'कालावभासाः' कालः-कृष्णोऽवभासः-प्रतिभाविनिर्गमो येभ्यस्ते कालावभासाः, कृष्णप्रभापटलोपचिता इति भावः, अत एव 'गम्भीररोमहर्षा' गम्भीरः-अतीवोत्कटो रोमहर्षो-रोमोद्धर्षो भयवशाद् येभ्यस्ते गम्भीररोमहर्षा, किमुक्तं भवति?-एवं नाम ते कृष्णावभासा यद्दर्शनमात्रेणापि नारकजन्तूनां भयसम्पादनेन अनर्गलं रोमहर्षमुत्पादयन्तीति, अत एव भीमा-भयानका भीमत्वादेव उत्त्रासनकाः, उत्त्रास्यन्ते नारका जन्तव एभिरिति उत्त्रासना उत्त्रासना एव उत्त्रासनकाः, किं बहुना?-'वर्णेन' वर्णमधिकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमकृष्णाः प्रज्ञप्ताः, यत ऊर्ध्वं न किमपि भयानकं कृष्णमस्तीति भावः, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तम्याम् ।

गन्धमधिकृत्याह- 'इमीसे णं भंते !' इत्यादि, प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! तद्यथा नाम- 'अहिमृत इति वा' अहिमृतो नाम मृताहिदेहः, एवं सर्वत्र भावनीयं, गोमृत इति वा अश्वमृत इति वा मार्जारमृत इति वा हस्तिमृत इति वा सिंहमृत इति वा व्याघ्रमृत इति वा द्वीपः-चित्रकः, सर्वत्र अहिश्चासौ मृतश्च अहिमृत इत्येवं विशेषणसमासः, इह मृतकं सद्यःसंपन्नं न विगन्धि भवति तत आह- 'मयकुहियविणट्ठकुणिमवावण्णे' त्यादि, मृतः सन् कुथितः-पूतिभावमुपगतो मृतकुथितः, स वोच्छूनावस्थामात्रगतोऽपि भवति, न च स तथा विगन्धस्तत आह-विनष्टः- उच्छूनावस्थां प्राप्य स्फुटित इति भावः, सोऽपि तथा दुरभिगन्धो न भवति तत आह-

'कुणिमवावण्ण' त्ति व्यापन्नं-विशरारुभूतं कुणिमं-मांसं यस्य स तथा, ततो विशेषण-समासः, 'दुरभिगन्धः' इति दुरभि-सर्वेषामभिमुख्येन दुष्टो गन्धो यस्यासौ दुरभिगन्धः, अशुचिश्च बिलीनो-मनसः कलिमलपरिणामहेतुः 'विगय' इति विगतं प्रनष्टं यदभिमुखतया प्राणिनां गतं-गमनं यस्मिन्, तथा बीभत्सया-निन्दया दर्शनीयो बीभत्सादर्शनीयः ततो विशेषणसमासः अशुचिविगतबीभत्सादर्शनीयः 'किमिजालाउलसंसत्ते' इति संसक्तः सन् कृमिजालाकुलो जातः कृमिजालाकुलसंसक्तः, मयूरव्यंसकादित्वात्समासः संसक्तशब्दस्य च परनिपातः,

एतावत्युक्ते गौतम आह- 'भवे एयारूवे सिया ?' इति, स्याद् भवेद्-भवेयुरे-तद्रूपाः-यथोक्तविशेषणविशिष्टा अहिमृतादिरूपा गन्धेनाधिकृता नरकाः, सूत्रे च बहुवच-नेऽप्येकवचनं प्राकृतत्वात्, भगवानाह-गौतम ! 'नायमर्थ समर्थो' नायमर्थ उपपन्नो, यतोऽस्यां रत्नप्रभायां पृथिव्यां नरका इति-यथोक्तविशेषणविशिष्टाहिमृतादेरनिष्टतरा एव, तत्र किञ्चिद्रम्यमपि कस्याप्यनिष्टतरं भवति तत आह-अकान्ततरा एव-स्वरूपतोऽप्यकमनीयतरा एव, अभव्या एवेति भावः, तत्राकान्तमपि कस्यापि प्रियं भवति यथा गर्त्ताशूकरस्याशुचि, तत आह-अप्रियतरा एव न कस्यापि प्रिया इति भावः, अत एवामनोज्ञतरा एवं, अमनापतरा एव गन्धमधिकृत्य प्रज्ञप्ताः, तत्र मनोज्ञं- मनोऽनुकूलमात्रं यत्पुनः स्वविषये मनोऽत्यन्तमासक्तं करोति तन्मनआपम्, एकार्थिका वा एते सर्वे शब्दाः शक्रेन्द्रपुरन्दरादिवत् नानादेशजविनेयजनानुग्रहार्थमुपात्ताः, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं यावदधःसप्तम्याम् ।। स्पर्शमधिकृत्याह- 'इमीसे ण' मित्यादि, प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! तद्यथा नाम-

'असिपत्रमिति वा' असि-खड्गं तस्य पत्रमसिपत्रं क्षुरप्रमिति वा कदम्बचीरिकापत्रमिति वा, कदम्बचीरिका-तृणविशेषः, स च दर्भादप्यतीव छेदकः, शक्ति-प्रहरणविशेषस्तदग्रमिति वा, कुन्ताग्रमिति वा, तोमराग्रमिति वा, भिण्डिमालः-प्रहरणविशेषस्तदग्रमिति वा, सूचीकलाप इति वा, वृश्चिकदंश इति वा, कपिकच्छूरिति वा, कपिकच्छूः-कण्डूविजनको वल्लीविशेषः, अङ्गार इति वा, अङ्गारो-निर्धूमाग्नि, ज्वालेति वा, ज्वाला-अनलसंबद्धा, मुर्मुर इति वा, मुर्मुरः-फुम्फुकादौ मसृणोऽग्नि, अर्चिरिति वा, अर्चि-अनकविच्छिन्ना ज्वाला, अलातम्-उल्मुकं, शुद्धाग्नि-अयस्पिण्डाद्यनुगतोऽग्निर्विद्युदादिर्वा, इतिशब्द सर्वत्रापि उपमाभूतवस्तुस्वरूप-परिसमाप्तिद्योतकः, वाशब्दः परस्परसमुच्चये, इह कस्यापि नरकस्य स्पर्श शरीरावयवच्छेद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोऽपरसय भेदकोऽन्यस्य व्यथाजनकोऽपरस्य दाहक इत्यादि ततः साम्यप्रतिपत्यर्थमसिपत्रादीनां नानाविधानामुपमानानामुपादानं, 'भवे एयारूवे सिया ?' इत्यादि प्राग्वत्।

सम्प्रति नरकावासानां महत्वमभिधित्सुराह–

मू. (९८) *इमीसे णं भंते ! रयणप्पभाए पुढवीए नरका केमहालिया पन्नत्ता ?, गोयमा ! अयण्णं जंबुद्दीवे २ सव्वदीवसमुद्दाणं सव्वब्भंतरए सव्वखुड्डाए वट्टे तेल्लापूवसंठाणसंठिते वट्टे रथचक्कवालसंठाणसंठिते वट्टे पुक्खरकण्णियासंठाणसंठिते वट्टे पडिपुन्नचंदसंठाणसंठिते एक्कं जोयणसतसहस्सं आयामविक्खंभेणं जाव किंचिविसेसाहिए परिक्खेवेणं।*

देवे णं महिड्ढीए जाव महाणुभागे जाव इणामेव इणामेवत्तिकट्टु इमं केवलकप्पं जंबूद्दीवं २ तिहिं अच्छरानिवाएहिं तिसत्तक्खुत्तो अणुपरियट्टित्ता णं हव्वमागच्छेज्ञा, से णं देवे ताए उक्कट्ठाए तुरिताए चवलाए चंडाए सिग्घाए उद्धुयाए जयणाए [छेगाए] दिव्वाए दिव्वगतीए वीतिवयमाणे २ जहन्नेणं एगाहं वा दुयाहं वा तिआहं वा उक्कोसेणं छम्मासेणं वीतिवएज्ञा, अत्थेगतिए वीइवएज्ञा अत्थेगतिए नो वीतिवएज्ञा, एमहालता णं गोयमा ! इमीसे णं रयणप्पभाए पुढवीए नरगा पन्नत्ता, एवं जाव अधेसत्तमाए, नवरं अधेसत्तमाए अत्थेगतियं नरगं वीइवइज्ञा, अत्थेगइए नरगे नो वीतिवएज्ञा ॥

वृ. 'इमीसे ण'मित्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नरकाः 'किंमहान्तः' किंप्रमाणा महान्तः प्रज्ञप्ताः ?, पूर्वं ह्यसङ्ख्येयविस्तृता इति कथितं, तच्चासङ्ख्येयत्वं नावगम्यत इति भूयः प्रश्नः, अत एवात्र निर्वचनं भगवानुपमयाऽभिधत्ते, गौतम ! अयमिति यत्र संस्थिता वयं णमिति वाक्यालङ्कारे अष्टयोजनोच्छ्रितया रत्नमय्या जम्ब्वा उपलक्षितो द्वीपो जम्बूद्वीपः सर्वद्वीप-समुद्राणां–घातकीखण्डलवणादीनां सर्वाभ्यन्तरः–आदिभूतः 'सर्वक्षुल्लकः' सर्वेभ्यो द्वीपसमुद्रेभ्यः क्षुल्लको–ह्रस्वः सर्वक्षुल्लकः, तथाहि–सर्वे लवणादयः समुद्राः सर्वे धातकीखण्डादयो द्वीपा अस्माज्जम्बूद्वीपादारभ्य प्रवचनोक्तेन क्रमेण द्विगुणद्विगुणायामविष्कम्भपरिधयः ततोऽयं शेषसर्वद्वीपसमुद्रापेक्षया सर्वलघुरिति।

तथा वृत्तो यतः 'तैलापूपसंस्थानसंस्थितः' तैलेन पक्वोऽपूपस्तैलापूपः, तैलेन हि पकोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतेन पक इति तैलविशेषणं, तस्येव संस्थानं तैलापूपसंस्थानं तेन संस्थितस्तैलापूपसंस्थानसंस्थितः, तथा वृत्तो यतः पुष्करकर्णिकासंस्थानसंस्थितः, तथा वृत्तो यतो रथचक्रवालसंस्थानसंस्थितः, तथा वृत्तो यतः परिपूर्णचन्द्रसंस्थानसंस्थितः, अनेकधोप-मानोपमेयभावो नानादेशजविनेयप्रतिपत्यर्थ, एकं योजनशतसहस्रमायामविष्कम्भेन त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशे त्रयः क्रोशा अष्टाविंशं धनुःशतं त्रयोदश अङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्तः, परिक्षेपपरिमाणगणितभावना क्षेत्रसमासटीकातो जम्बूद्वीपप्रज्ञप्तिटीकातो वा वेदितव्या।

'देवे ण'मित्यादि, देवश्च णमिति वाक्यालङ्कारे, 'महर्द्धिकः' महती ऋद्धिर्विमान-परिवारादिका यस्य स महर्द्धिकः, महती द्युति शरीराभरणविषया यस्य स महाद्युतिकः, महद् बलं–शारीरः प्राणो यस्य स महाबलः, महद् यशः–ख्यातिर्यस्य स महायशाः, तथा 'महेसक्खे' इति महेश इति महान् ईश्वर इत्याख्या यस्य स महेशाख्यः, अथवा ईशनमीशो भावे धञ्प्रत्यय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एश्वर्यमित्यर्थ, 'ईशं एश्वर्ये' इति वचनात्, तत ईशम्—एश्वर्यमात्मनः ख्याति—अन्तर्भूतण्यर्थतया ख्यापयति—प्रथयति ईशाख्यः, महांश्चासावीशाख्यश्च महेशाख्यः, कचित् 'महासोक्खे' इति पाठः, तत्र महत् सौख्यं यस्य प्रभूतसद्वेदोदयवशात्स महासौख्यः, अन्ये पठन्ति– 'महासक्खे' इति तत्रायं शब्दसंस्कारो—महाश्वाक्षः, इयं चात्र पूर्वाचार्यप्रदर्शिता यस्यासौ महाश्वाक्षः, तथा 'महानुभागे' इति अनुभागो—विशिष्टवैक्रियादिकरणविषयाऽचिन्त्या शक्ति 'भागोऽचिंता सत्ती' इति वचनात्, महान् अनुभागो यस्य स महानुभागः, अमूनि महर्द्धिक इत्यादीनि विशेषणानि तत्सामर्थ्यातिशतयप्रतिपादकानि यावदिति चप्पुटिकात्रयकरणकालावधिप्रदर्शनपरम्।

'इणामेव इणामेवेतिकट्टु' एवमेव मुधिकया एवमेव 'मोरकुल्ला मुहा य मुहियत्ति नायव्वा' इति वचनाद् अवज्ञयेति भावः, उक्तञ्च मूलटीकायाम् ''इणामेव इणामेवेति कट्टु एवमेव मुधिकयाऽवज्ञयेति'' 'इतिकृत्वे'ति हस्तदर्शितचप्पुटिकात्रयकरणसूचकं केवलकल्पं—परिपूर्णं जम्बूद्वीपं त्रिभिरप्सरोनिपातैः, अप्सरोनिपातो नाम चप्पुटिका, तत्र तिसृभिश्चप्पुटिकाभिरिति द्रष्टव्यं, चप्पुटिकाश्च कालोपलक्षणं, ततो यावता कालेन तिस्रश्चप्पुटिकाः पूर्यन्ते तावत्कालमध्य इत्यर्थ, त्रिसप्तकृत्वः—एकविंशतिवारान् अनुपरिवर्त्य—सामस्त्येन परिभ्रम्य 'हव्वं' शीघ्रमागच्छेत्।

स इत्थम्भूतगमनशक्तियोग्यो देवः तया देवजनप्रसिद्धया उत्कृष्टया प्रशस्तविहायोगतिनामोदयात्प्रशस्तया शीघ्रसंचरणात्वरितया त्वरा संजाताऽस्यामिति त्वरिता तया त्वरितया शीघ्रतरमेव तया प्रदेशान्तराक्रमणमिति, चपलेव चपला तया, क्रोधाविष्टस्येव श्रमासंवेदनात् चण्डेव चण्डा तया, निरन्तरं शीग्रत्वगुणयोगात् शीघ्रा तया शीघ्रया, परमोत्कृष्टवेगपरिणामोपेता जवना तया, अन्ये तु जितया विपक्षजेतृत्वेनेति व्याचक्षते, 'छेकया' निपुणया, वातोद्धूतस्य दिगन्तव्यापिनो रजस इवया गति सा उद्धूता तया, अन्ये त्वाहुः—उद्धतया दर्पातिशयेनेति।

'दिव्यया' दिवि—देवलोके भवा दिव्या तया देवगत्या व्यतिव्रजन् जघन्यतः 'एकाहं वा' एकमहर्यावत्, एवं द्वयहं त्र्यहमुत्कर्षतः षण्मासान् यावद् व्यतिव्रजेत्, तत्रास्त्येतद् यदुत् एककान् कांश्चन नरकान् 'व्यतिव्रजेत्' उल्लङ्घ्य परतो गच्छेत्, तथाऽस्त्येतद् यदुत् इत्थंभूतयापि गत्या षण्मासानपि यावन्निरन्तरं गच्छन् एककान् कांश्चन् नरकान् 'न सव्यतिव्रजेत्' नोल्लङ्घ्य परतो गच्छेत्, अतिप्रभूताऽऽयामतया तेषामन्तस्य प्राप्तुमशक्यत्वात्, एतावन्तो महान्तो गौतम! अस्यां रत्नप्रभायां पृथिव्यां नरकाः प्रज्ञप्ताः, एवमेकैकस्यां पृथिव्यां तावद्वक्तव्यं यावदधःसप्तम्यां, नवरमधःसप्तम्यामेवं वक्तव्यम्—''अत्थेगइयं नरगं वीइवएज्ञा अत्थेगइए नरगे नो वीइवएज्ञा'' अप्रतिष्ठानाभिधस्यैकस्य नरकस्य लक्षयोजनायामविष्कम्भतयाऽन्तस्य प्राप्तुं शक्यत्वात् शेषाणां च चतुर्णामतिप्रभूतासङ्खयेययोजनकोटीकोटीप्रमाणत्वेनान्तस्य प्राप्तुमशक्यत्वात्।

सम्प्रति किंमया नरका इति निरूपणार्थमाह—

मू. *(९१) इमीसे णं भंते! रयणप्पभाए पुढवीए नरगा किंमया पन्नत्ता?, गोयमा! सव्ववइरामया पन्नत्ता, तत्थ णं नरएसु बहवे जीवा य पोग्गला य अवक्कमंति विउक्कमंति चयंति उववज्जंति, सासता णं ते नरगा दव्वट्ठयाए वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासया, एवं जाव अहेसत्तमाए॥*

वृ. 'इमीसे णं भंते!' इत्यादि, अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकाः 'किंमयाः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंविकाराः प्रज्ञप्ताः ?, भगवानाह—गौतम ! 'सव्ववइरामया' इति सर्वात्मना वज्रमयाः प्रज्ञप्ताः, वज्रशब्दस्य सूत्रे दीर्घान्तता प्राकृतत्वात्, 'तत्र च' तेषु नरकेषु णमिति वाक्यालङ्कारे बहवो जीवाश्च खरबादरपृथिवीकायिकरूपाः पुद्गलाश्च 'अपक्रमन्ति' च्यवन्ते 'व्युत्क्रामति' उत्पद्यन्ते, एतदेव शब्दद्वयं यथाक्रमं पर्यायद्वयेन व्याचष्टे— 'चयंति उववज्जंति' च्यवन्ते उत्पद्यन्ते, किमुक्तं भवति ? एके जीवाः पुद्गलाश्च यथायोगं गच्छन्ति अपरे त्वागच्छन्ति, यस्तु प्रतिनियतसंस्थानादिरूप आकारः स तदवस्थ एवेति, अत एवाह—शाश्वता णमिति पूर्ववत् ते नरका द्रव्यार्थतया तथाविधप्रतिनियतसंस्थानादिरूपतया वर्णपर्यायैर्गन्धपर्यायै रसपर्यायैः स्पर्शपर्यायैः पुनरशाश्वताः, वर्णादीनामन्यथाऽन्यथाभवनात्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमी पृथिवी ॥

साम्प्रतमुपपातं विचिचिन्तयिषुराह—

मू. (१००) *इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरइया कतोहिंतो उववज्जंति किं असण्णीहिंतो उववज्जंति सरीसिवेहिंतो उववज्जंति पक्खीहिंतो उववज्जंति चउप्पएहिंतो उववज्जंति उरगेहिंतो उववज्जंति इत्थियाहिंतो उववज्जंति मच्छमणुएहिंतो उववज्जंति ?, गोयमा ! असण्णीहिंतो उववज्जंति जाव मच्छमणुएहिंतोवि उववज्जंति ।*

वृ. 'इमीसे ण'मित्यादि, अस्यां भदन्त ! रत्नप्रभायां पृथिव्यां नैरयिकाः कुत उत्पद्यन्ते ?, किमसंज्ञिभ्य उत्पद्यन्ते सरीसृपेभ्य उत्पद्यन्ते पक्षिभ् उत्पद्यन्ते चतुष्पदेभ्य उरगेभ्य उत्पद्यन्ते स्त्रिभ्य उत्पद्यन्ते मत्स्यमनुष्येभ्य उत्पद्यन्ते ?, भगवानाह—गौतम ! असंज्ञिभ्योऽप्युत्पद्यन्ते यावन्मत्स्य-मनुष्येभ्योऽप्युत्पद्यन्ते, 'सेसासु इमाए गाहाए अणुगंतव्वा' इति, 'शेषासु' शर्कराप्रभादिषु पृथिवी-ष्वना गाथया, जातावेकवचनं गाथाद्विकेनेत्यर्थ, उत्पद्यमाना अनुगन्तव्याः, तदेव गाथाद्विकमाह—

मू. (१०१) *असण्णी खलु पढमं दोच्चं च सरीसिवा ततिय पक्खी ।*
सीहा जंति उत्थीं उरगा पुन पंचमीं जंति ॥

वृ. 'अस्सण्णी खलु पढम'मित्यादि, असंज्ञिनः—संमूर्च्छिमपञ्चेन्द्रियाः खलु प्रथमा नरकपृथिवीं गच्छन्ति, खलुशब्दोऽवधारणे, तथा अवधारणमेवम्—असंज्ञिनः प्रथमामेव यावद् गच्छन्ति न परत इति, नतु त एव प्रथमामिति गर्भजसरीसृपादीनामपि उत्तरपृथिवीषट्गामिनां तत्र गमनात्, एवमुत्तरत्राप्यवधारणं भावनीयम्। 'दोच्चं च सरीसिवा' इति द्वितीयामेव शर्कराप्रभाक्यां पृथिवीं यावद्गच्छन्ति सरीसृपाः— गोधानकुलादयो गर्भव्युत्क्रान्त न परतः, तृतीयामेव गर्भजाः पक्षिणो गृध्रादयः, चतुर्थामेव सिंहाः, पञ्चमीमेव गर्भजा उरगाः ।

मू. (१०२) *छट्ठिं च इत्थियाओ मच्छा मणुया य सत्तमिं जंति । जाव अधेसत्तमाए पुढवीए नेरइया नो असण्णीहिंतो उव० जाव नो इत्थियाहिंतो उववज्जंति मच्छमणुस्सेहिंतो उववज्जंति*

इमीसे णं भंते ! रयणप्प० सपु० नेरतिया एक्कसमएणं केवतिया उववज्जंति ?, गोयमा ! जहन्नेणं एक्क वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा वा असंखिज्ञा वा उववज्जंति, एवं जाव अधेसत्तमाए । इमीसे णं भंते ! रयणप्प० नेरतिया समए समए अवहीरमाणा अवहीरमाणा केवतिकालेणं अवहिता सिता ?, गोयमा ! ते णं असंखेज्ञा सम एसमए अवहीरमाणा २ असंखेज्ञाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति नो चेव णं अवहिता सिता जाव अधेसत्तमा ।

इमीसे णं भंते ! रयणप्प० पु० नेरतियाणं केमहालिया सरीरोगाहणा पन्नत्ता ? गोयमा !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुविहा सरीरोगाहणा पन्नत्ता, तंजहा–भवधारणिज्ञा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्ञा सा जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं सत्त धणूइं तिन्नि य रयणीओ छच्च अंगुलाइं, तत्थ णं जे से उत्तरवेउव्विए से जह० अंगुलस्स संखेज्जतिभागं उक्को० पन्नरस धणू अड्डाइज्जाओ रयणीओ, दोच्चाए भवधारणिज्ञे जहण्णओ अंगुलासंखेज्जभागं उक्को० पन्नरस धणू अअड्डाइज्ञातो रयणीओ उत्तरवेउव्विया जह० अंगुलस्स संखज्जभागं उक्को० एक्कतीसं धणूइं एक्क रयणी। तच्चाए भवधारणिज्ञे एक्कतीसं धणू एक्क रयणी, उत्तरवेउव्विया बासट्ठिं धणूइं दोन्नि रयणीओ, चउत्थीए भवधारणिज्ञे बासट्ठ धणूइं दोण्णि य रयणीओ, उत्तरवेउव्विया पणवीसं धणुसयं, पंचमीए भवधारणिज्ञे पणवीसं धणुसयं, उत्तरवे० अड्डाइज्ञाइं धणुसयाइं, छट्ठीए भवधारणिज्ञा अड्डाइज्ञाइं धणुसयाइं, उत्तरवेउव्विया पंचधणुसयाइं, सत्तमाए भवधारणिज्ञा पंचधणुसयाइं उत्तरवेउव्विए धणुसहस्सं ॥

वृ. षष्ठीमेव स्त्रियः स्त्रिरत्नाद्या महाक्रूराध्यवसायिन्यः, सप्तमीं यावद् गर्भजा मत्स्या मनुजा अतिक्रूराध्यवसायिनो महापापकारिणः, आलापकश्च प्रतिपृथिवी एवम्–"सक्करप्पभाए णं भंते पुढवीए नेरइया किं असण्णीहिंतो उववज्जंति जाव मच्छमणुएहिंतो उववज्जंति ?, गोयमा ! नो असन्नीहिंतो उववज्जंति सरीसिवेहिंतो उववज्जंति जाव मच्छमणुस्सेहिंतो उववज्जंति।

वालुयप्पभाए णं भंते ! पुढवीए नेरइया किं असण्णीहिंतो उववज्जंति जाव मच्छमणुएहिंतो उववज्जंति ?, गोयमा ! नो असण्णीहिंतो उववज्जंति नो सरीसिवेहिंतो उववज्जंति पक्खीहिंतो उववज्जंति जाव मच्छमणुस्सेहिंतो उववज्जंति" एतमुत्तरोत्तरपृथिव्यां पूर्वपूर्वप्रतिषेधसहितोत्तरप्रतिषेधस्तावद्वक्तव्यो यावदधःसप्तम्यां स्त्रीभ्योऽपि प्रतिषेधः, तत्सूत्रं चैवम्–"अहेसत्तमाए णं भंते ! पुढवीए नेरइया किं मच्छमणुस्सेहिंतो उव्वज्जंति"।

सम्प्रत्येकस्मिन् समये कियन्तऽस्या रत्नप्रभायां पृथिव्यां नारका उत्पद्यन्ते ? इति निरूपणार्थमाह। (इमीसे णं) 'रयणप्पभापुढविए नेरइया णं भंते !' इत्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! एकसमयेन कियन्त उत्पद्यन्ते ?, भगवानाह–गौतम ! जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया वा, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं यावदधः सप्तम्याम्।

सम्प्रति प्रतिसमयमेकैकनारकापहारे सकलनारकापहारकालमानं विचिचिन्तयिषुरिदमाह–'रयणप्पभापुढविनेरइया णं भंते !' इत्यादि, रत्नप्रभापृथिविनैरयिका भदन्त ! समय समये एकैकसङ्ख्यया अपह्रियमाणाः २ कियता कालेन सर्वात्मनाऽपह्रियन्ते ?, भगवानाह–गौतम ! 'ते णं असंखेज्ञा समए २ अवहीरमाणा' इत्यादि, ते रत्नप्रभापृथिवीनैरयिका असङ्ख्येयास्ततः समये समये एकैकसङ्ख्यया अपह्रियमाणा असङ्ख्येयाभिरुत्सर्प्पिण्यवसर्प्पिणीभिरपह्रियन्ते, इदं च नारकपरिमाणप्रतिपत्यर्थं कल्पनामात्रं, 'नो चेव णं अवहिया सिया' इति न पुनरपहृताः स्यु, किमुक्तं भवति ?–न पुनरेवं कदाचनाप्यपहृता अभवन् नाप्यपह्रियन्ते नाप्यपहरिष्यन्त इति, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं यावदधःसप्तम्याम्।

सम्प्रति शरीरपरिमाणप्रतिपादनार्थमाह–'रयणप्पभापुढवी' इत्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! 'किंमहती' किंप्रमाणा महती शरीरावगाहना प्रज्ञप्ता ?, 'जहा पन्नवणाए ओगाहणसंठाणपदे' इति, यथा प्रज्ञापनायामवगाहनासंस्थानाख्यपदे तथा वक्तव्या, सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैवं–द्विविधा रत्नप्रभापृथिवीनैरयिकाणां शरीरारावगाहना–भवधारणीया उत्तरवैक्रिया च, तत्र या सा भवधारणीया सा जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः सप्त धनूंषि त्रयो हस्ताः षट् परिपूर्णान्यङ्गुलानि, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः पञ्चदश धनूंषि द्वौ हस्तावेका वितस्ति, शर्कराप्रभायां भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः पञ्चदश धनूंषि द्वौ हस्तावेका वितस्ति, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षत एकत्रिंशद्धनूंषि एको हस्तः, वालुकाप्रभायां भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षत एकत्रिंशद्धनूंषि एको हस्तः, सार्द्धानि द्वाषष्टिधनूंषि, उत्तरवैक्रया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः पञ्चविंशं धनुःशतं

–धूमप्रभायां भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः पञ्चविंशं धनुःशतं, उत्तरवैक्रिया जघन्योऽङ्गुलसङ्ख्येयभाग उत्कर्षतोऽर्द्धतृतीयानि धनुःशतानि, तमःप्रभायां भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रा उत्कर्ष,तोऽर्द्धतृतीयानि धनुःशतानि, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग उत्कर्षतः पञ्चधनुःशतानि, तमस्तमःप्रभाया भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः पञ्च धनुःशतानि, उत्तरवैक्रिया जघन्यतोऽङ्गुलसङ्ख्येयभाग, उत्कर्षतो धनुःसहस्रमिति ।

यदि पुनः प्रतिप्रस्तटे चिन्ताक्रियते तदैववगन्तव्या–तत्र जघन्या भवधारणीया सर्वत्राप्यङ्गुलासङ्ख्येयभागः, उत्तरवैक्रिया तु अङ्गुलसङ्ख्येयभागः, उक्तं च मूलटीकाकारेणान्यत्र– "उत्तरवैक्रिया तु तथाविधप्रयत्नाभावादाद्यसमयेऽप्यङ्गुलसङ्ख्येयभागमात्रैवेति, उत्कृष्टा तु भवधारणीयाया रत्नप्रभायाः प्रथमे प्रस्तटे त्रयो हस्ता अत ऊर्ध्वं क्रमेण प्रतिप्रस्तटं सार्द्धानि षटपञ्चाशदङ्गुलानि प्रक्षिप्यन्ते, तत एव परिमाणं भवति, द्वितीये प्रस्तटे धनुरेकमेको हस्तः सार्द्धानि चाष्टावङ्गुलानि, तृतीये धनुरेकं त्रयो हस्ताः सप्तदशाङ्गुलानि, चतुर्थे द्वे धनुषी द्वौ हस्तो सार्द्धमेकमङ्गुलं, पञ्चमे त्रीणि धनूंषि दशाङ्गुलानि, षष्ठे त्रीणि धनूंषि द्वौ हस्तौ सार्द्धान्यष्टादशाङ्गुलानि, सप्तमे चत्वारि धनूंषि एको हस्तस्त्रीणि चाङ्गुलानि, अष्टमे चत्वारि धनूंषि त्रयो हस्ताः सार्द्धान्येकादशाङ्गुलानि, नवमे पञ्च धनूंषि एको हस्तो विंशतिरङ्गुलानि, दशमे षड् धनूंषि सार्द्धानि चत्वार्यङ्गुलानि, एकादशे षड् धनूंषि द्वौ हस्तौ त्रयोदशाङ्गुलानि, द्वादशे सप्त धनूंषि सार्द्धान्येकविंशतिरङ्गुलानि, त्रयोदशे सप्त धनूंषि त्रयो हस्ताः षट् च परिपूर्णान्यङ्गुलानि, उक्तञ्च–

॥ १ ॥ "रयणाए पढमपयरे हत्थतियं देह उस्सए भणियं ।
छप्पन्नंगुलसड्ढा पयरे पयरे हवइ वुड्ढी ॥"

शर्कराप्रभायां प्रथमे प्रस्तटे सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि, अत ऊर्ध्वंतु प्रतिप्रस्तटं त्रयो हस्तास्त्रीणि चाङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति–द्वितीये प्रस्तटेऽष्ट धनूषि द्वौ हस्तौ नव चाङ्गुलानि, तृतीये नव धनूंषि एको हस्तो द्वादश चाङ्गुलानि, चतुर्थे दश धनूंषि पञ्चदशाङ्गुलानि, पञ्चमे दश धनूंषि त्रयो हस्ता अष्टादशाङ्गुलानि, षष्ठे एकादश धनूंषि द्वौ हस्तावेकविंशतिरङ्गुलानि, सप्तमे द्वादश धनूंषि द्वौ हस्तौ, अष्टमे त्रयोदश धनूंषि एको हस्तस्त्रीणि चाङ्गुलानि, नवमे चतुर्दश धनूंषि षट् चाङ्गुलानि, दशमे चतुर्दश धनूंषि त्रयो हस्ता नव चाङ्गुलानि, एकादशे पञ्चदश धनूंषि द्वौ हस्तौ एका वितस्ति, उक्तञ्च–

॥ १ ॥ "सो चेव य बीयाए पढमे पयरंमि होइ उस्सेहो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हत्थ तिय तिन्नि अङ्गुल पयरे पयरे य वुड्ढी य ॥
॥ २ ॥ एक्कारसमे पयरे पन्नरस धणूणि दोण्णि रयणीओ ।
बारस य अंगुलाइं देहपमाणं तु विन्नेयं ॥

अत्र 'सो चेव य बीयाए' इति य एव प्रथमपृथिव्यां त्रयोदशे प्रस्तटे उत्सेधो भणितो यथा सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानीति स एव द्वितीयस्यां शर्कराप्रभायां पृथिव्यां प्रथमे प्रस्तटे उत्सेधो भवति, शेषं सुगमम् ।

वालुकाप्रभायाः प्रथमे प्रस्तटे पञ्चदश धनूंषि द्वौ हस्तौ द्वादश चाङ्गुलानि, अत ऊर्ध्वं तु प्रतिप्रस्तटं सप्त हस्ताः सार्द्धानि चैकोनविंशतिरङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति—द्वितीये प्रस्तटे सप्तदश धनूंषि द्वौ हस्तौ सार्द्धानि सप्ताङ्गुलानि, तृतीये एकोनविंशतिरधनूंषि द्वौ हस्तौ त्रीण्यङ्गुलानि, चतुर्थे एकविंशतिर्धनूंषि एको हस्तः सार्द्धानि च द्वाविंशतिरङ्गुलानि, पञ्चमे त्रयोविंशतिर्धनूंषि एको हस्तोऽष्टादश चाङ्गुलानि, षष्ठे पञ्चविंशतिर्धनूंषि एको हस्तः सार्द्धानि त्रयोदशाङ्गुलानि, सप्तमे सप्तविंशतिर्धनूंषि एको हस्तो नव चाङ्गुलानि, अष्टमे एकोनत्रिंशद् धनूंषि एको हस्तः सार्द्धानि चत्वार्यङ्गुलानि, नवमे एकत्रिंशद्धनूंषि एको हस्तः, उक्तञ्च—

॥ १ ॥ "सो चेव य तइयाए पढमे पयरंमि होइ उस्सेहो ।
सत्त य रयणी अंगुल गुणवीसं सड्ढ वुड्ढी य ॥
॥ २ ॥ पयरे पयरे य तहा नवमे पयरंमि होइ उस्सेहो ।
धणुयाणि एगतीसं एक्कारयणी य नायव्वा ॥

अत्रापि 'सो चेव य तइयाए पढमे पयरंमि होइ उस्सेहो' इति य एव द्वितीयस्यां शर्कराप्रभायामेकादशे प्रस्तटे उत्सेधः स एव तृतीयस्यां वालुकाप्रभायां प्रथमे प्रस्तटे भवति, शेषं सुगमं । पङ्कप्रभायाः प्रथमे प्रस्तटे एकत्रिंशद्धनूंषि एको हस्तः, तत ऊर्ध्वं तु प्रतिप्रस्तटं पञ्च धनूंषि विंशतिरङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति—द्वितीये प्रस्तटे षट्त्रिंशद्धनूंषि एको हस्तो विंशतिरङ्गुलानि, तृतीये एकचत्वारिंशद्धनूंषि द्वौ हस्तौ षोडशाङ्गुलानि, चतुर्थे षटचत्वारिंशद्धनूंषि त्रयो हस्ता द्वादशाङ्गुलानि, पञ्चमे द्विपञ्चाशद्धनूंषि अष्टावङ्गुलानि, षष्ठे सप्तपञ्चाशद्धनूंषि एको हस्तश्चत्वार्यङ्गुलानि, सप्तमे द्वाषष्टि धनूंषि द्वौ हस्तौ, उक्तञ्च—

॥ १ ॥ "सो चेव चउत्थीए पढमे पयरंमि होइ उस्सेहो ।
पञ्च धणु वीस अंगुल पयरे पयरे य वुड्ढी य ॥
॥ १ ॥ जा सत्तमए पयरे नेरइयाणं तु होइ उस्सेहो ।
बासट्ठी धणुयाइं दोन्नि य रयणी य बोद्धव्वा ॥

अत्रापि 'सो चेवे' त्यस्यार्थ पूर्वानुसारेण भावनीयः । धूमप्रभायाः प्रथमे प्रस्तटे द्वाषष्टिर्धनूंषि द्वौ हस्तौ, तत ऊर्ध्वं तु प्रतिप्रस्तटं पञ्चदश धनूंषि सार्द्धहस्तद्वयाधिकानि क्रमेण प्रक्षेप्तव्यानि, तेनेदं परिमाणं भवति—द्वितीये प्रस्तटेऽष्टसप्ततिर्धनूंषि एकावितस्ति, तृतीये त्रिनवतिर्धनूंषि त्रयो हस्ताः, चतुर्थे नवोत्तरं धनुःशतमेको हस्त एका वितस्ति, पञ्चमे पञ्चविंशं धनुःशतं, उक्तञ्च—

॥ १ ॥ "सो चेव पंचमीए पढमे पयरंमि होइ उस्सेहो ।
पनरस धणूणि हो हत्थ सड्ढ पयरेसु वुड्ढी य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह पंचमए पयरे उस्सेहो धणुसयं तु पणवीसं। 'सो चेव य' इत्यस्यार्थोऽत्रापि पूर्ववत्। तमःप्रभायाः प्रथमे प्रस्तटे पञ्चविंशं धनुःशतं ततः परतरे तु प्रस्तटद्वये क्रमेण प्रत्येकं सार्द्धानि द्वाषष्टिर्धनूंषि प्रक्षेप्तव्यानि, तत एवं परिमाणं भवति—द्वितीये सार्द्धसप्ताशीत्यधिकं धनुःशतं तृतीयेऽर्द्धतृतीयानि धनुःशतानि, उक्तञ्च—

॥१॥ "सो चेव य छट्ठीए पढमे पयरंमि होइ उस्सेहो।
बासट्ठि धणु य सड्ढा पयरे पयरे य वुड्ढी य॥
॥२॥ (सड्ढा य सत्तसीइ बीए पयरंमि होइ धणुयसयं)
छट्ठीए तइयपयरे दो सय पण्णासया हंति॥

सप्तमपृथिव्यां पञ्च धनुःशतानि, उत्तरवैक्रया तु सर्वत्रापि भवधारणीयापेक्षया द्विगुण-प्रमाणाऽवसातव्या॥ सम्प्रति संहननप्रतिपादनार्थमाह—

मू. (१०३) *इमीसे णं भंते! रयणप्प० पु० नेरइयाणं सरीया किंसंघयणी पन्नत्ता?, गोयमा! छण्हं संघयणाणं असंघयणा, नेवट्ठी नेव छिरा नवि ण्हारू नेव संघयणमत्थि, जे पोग्गला अनिट्ठा जाव अमणामा ते तेसिं सरीरसंघायत्ताए परिणमंति, एवं जाव अधेसत्तमाए।*

इमीसे णं भंते! रयण० पु० नेरतियाणं सरीरा किंसंठिता पन्नत्ता?, गोयमा! दुविहा पन्नत्ता तंजहा—भवधारणिज्ञा य उत्तरवेउव्विया य, तत्थ णं जे ते भवधारणिज्ञा ते हुंडसंठिया पन्नत्ता, तत्थ णं जे ते उत्तरवेउव्विया तेवि हुंडसंठिता पन्नत्ता, एवं जाव अहेसत्तमाए।

इमीसे णं भंते! रयण० पु० णेरतियाणं सरीरगा केरिसता वण्णेणं पन्नत्ता?, गोयमा! काला कालोभासा जाव परमकिण्हा वण्णेणं पन्नत्ता, एवं जाव अहेसत्तमाए।

इमीसे णं भंते रयम० पु० नेरइयाणं सरीरया केरिसया गंधेणं पन्नत्ता?, गोयमा! से जहानामए अहिमडे इ वा तं चेव जाव अहेसत्तमा।

इमीसे णं रयण० पु० नेरइयाणं सरीरया केरिसया फासेणं पन्नत्ता?, गोयमा! फुडितच्छविविच्छविया खरफरुसझामझुसिरा फासेणं पन्नत्ता, एवं जाव अधेसत्तमा॥

वृ. 'रयणप्पभे' त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त! 'किंसंहननिनः' केन संहननेन संहननवन्तः प्रज्ञप्ताः?, भगवानाह—गौतम! 'छण्हं संघयणाण' मित्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमी।

सम्प्रति संस्थानप्रतिपादनार्थमाह—'रयणप्पभे'त्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त! शरीरकाणि 'किंसंस्थितानि' केन संस्थानेन संस्थानवन्ति प्रज्ञप्तानि?, भगवानाह—गौतम! रत्नप्रभापृथिवीनैरयिकाणां शरीराणि द्विविधानि प्रज्ञप्तानि, तद्यथा—भवधारणीयानि उत्तरवैक्रियाणि च, तत्र यानि भवधारणीयानि तानि तथाभवस्वाभाव्यादवश्यं हुण्डनामकर्मोदयतो हुण्डसंस्थानानि, यान्यपि चोत्तरवैक्रियरूपाणि तान्यपि यद्यपि शुभमहं वैक्रयं करिष्यामीति चिन्तयति तथाऽपि तथाभवस्वाभाव्यतो हुण्डसंस्थाननामकर्मोदयत उत्पाटितसकलरोमपिच्छकपोतपक्षिण इव हुण्डसंस्थानानि भवन्ति, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तम्याम्।

सम्प्रति नारकाणां शरीरेषु वर्णप्रतिपादनार्थमाह—'रयणप्पभे' त्यादि, रत्नप्रभापृथिवीनैरयि-काणां भदन्त! शरीरकाणि कीदृशानि वर्णेन प्रज्ञप्तानि?, भगवानाह—गौतम! 'काला कालोभासा'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमपृथिव्याम् ।

अधुना गन्धप्रतिपादनार्थमाह–रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! शरीरकाणि कीदृशानि गन्धेन प्रज्ञप्तानि ?, भगवानाह–गौतम ! 'से जहनामए अहिमडे इ वा' इत्यादि प्राग्वत्, एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं यावदधःसप्तम्याम् ।

सम्प्रति स्पर्शप्रतिपादनार्थमाह–'रयणप्पभापुढविनेरइयाणं भंते !' इत्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! शरीरकाणि कीदृशानि स्पर्शेन प्रज्ञप्तानि ?, भगवानाह–गौतम ! स्फटिकतच्छविविच्छवयः, इहैकत्र छविशब्दस्त्वग्वाची अपरत्र छायावाची, ततोऽयमर्थ–स्फटितया–राजिशतसङ्कुलया त्वचा विच्छवयो–विगतच्छायाः स्फटितच्छविविच्छवयः, तथा खरम्(राणि)–अतिशयेन परुषाणि खरपरुषाणि ध्यामानि–दग्धच्छायानि शुषिराणि–शुषिरशतकलितानि, ततः पदत्रयस्यापि पदद्वयपदद्वयमीलनेन विशेषणसमासः, सुपक्वेष्टकाध्यामतुल्यानीतिभावः, स्पर्शेन प्रज्ञप्तानि, एवं प्रतिपृथिवि तावद् यावदधःसप्तम्याम् ॥ सम्प्रत्युच्छासप्रतिपादनार्थमाह–

मू. (१०४) *इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरतियाणं केरिसया पोग्गला ऊसासत्ताए परिणमंति ? गोयमा ! जो पोग्गला अनिट्ठा जाव अमणामा ते तेसिं ऊसासत्ताए परिणमंति, एवं जाव अहेसत्तमाए, एवं आहारस्सवि सत्तसुवि ।*

इमीसे णं भंते ! रयण० पु० नेरतियाणं कति लेसाओ पन्नत्ताओ ?, गोयमा ! एक्का काउलेसा पन्नत्ता, एवं सक्करप्पभाएऽवि, वालुयप्पभाए पुच्छा, दो लेसाओ पन्नत्ताओ तं०–नीललेसा कापोतलेसा य, तत्थ जे काउलेसा ते बहुतरा जे नीललेस्सा पन्नत्ता ते थोवा, पंकप्पभाए पुच्छा, एक्का नीललेसा पन्नत्ता, धूमप्पभाए पुच्छा, गोयमा ! दो लेस्साओ पन्नत्ताओ, तंजहा–किण्हलेस्सा य नीललेस्सा य, ते बहुतरका जे नीललेस्सा, ते थोवतरका जे किण्हलेसा, तमाए पुच्छा, गोयमा ! एक्का किण्हलेस्सा, अधे पत्तमाए एक्का परमकिण्हलेस्सा ।

इमीसे णं भंते ! रयण० पु० नेरइया किं सम्मदिट्ठी मिच्छदिट्ठी सम्मामिच्छदिट्ठी ? गोयमा सम्मदिट्ठीवि मिच्छदिट्ठीवि सम्मामिच्छदिट्ठीवि, एवं जाव अहेसत्तमाए ।

इमीसे णं भंते ! रयण० पु० नेरतिया किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि, जे नाणी ते नियमा तिनाणी, तंजहा–आभिनिबोधितणाणी सुयनाणी अवधिनाणी, जे अन्नाणी ते अत्थेगतिया दुअन्नाणी अत्थेगइया तिअन्नाणी, जे दुअन्नाणी ते नियमा मतिअन्नाणी य सुयअन्नाणी य, जे तिअन्नाणी ते नियमा मतिअन्नाणी सुयअन्नाणी विभंगनाणीवि, सेसा णं नाणीवि अन्नाणीवि तिन्नि जाव अधेसत्तमाए ।

इमीसे णं भंते ! रयण० किं मणजोगी वइजोगी कायजोगी ?, तिन्निवि, एवं जाव अहेसत्तमाए ॥ इमीसे णं भंते ! रयणप्पभापु०– नेरइया किं सागारोवउत्ता अनागारोवउत्ता ?, गोयमा ! सागारोवउत्तावि अनागारोवउत्तावि, एवं जाव अहेसत्तमाए पुढवीए ॥

इमीसे णं भंते ! रयणप्प० पु० नेरइया ओहिणा केवतियं खेत्तं जाणंति पासंति ?, गो० जह० अद्धुट्ठगाउताइं उक्कोसेणं चत्तारि गाउयाइं । सक्करप्पभापु० जह० तिन्नि गाउयाइं उक्को० अद्धुट्ठाइं, एवं अद्धद्धगाउयं परिहायति जाव अधेसत्तमाए जह० अद्धगाउयं उक्कोसेणं गाउयं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरतियाणं कति समुग्घाता पन्नत्ता ?, गोयमा ! चत्तारि समुग्घाता पन्नत्ता, तंजहा–वेदनासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए वेउव्विय-समुग्घाए, एवं जाव अहेसत्तमाए ॥

वृ. 'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! कीदृशाः पुद्गला उच्छ्वासतया परिणमन्ति ?, भगवानाह–गौतम ! ये पुद्गला अनिष्टा अकान्ता अप्रिया अशुभा अमनोज्ञा अमनआपाः, अमीषां पदानां व्याख्यानं प्राग्वत्, ते तेषां रत्नप्रभापृथिवीनैरयिकाणामुच्छ्वासतया परिणमन्ति, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तम्याम् ।

साम्प्रतमाहारप्रतिपादनार्थमाह–'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! कीदृशाः पुद्गला आहारतया परिणमन्ति ?, भगवानाह–गौतम ! ये पुद्गला अनिष्टा अकान्ता अप्रिया अशुभा अमनोज्ञा अमनआपास्ते तेषामाहारतया परिमणमन्ति, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तम्याम् । इह पुस्तकेषु बहुधाऽन्यथापाठो दृश्यते, अत एव वाचनाभेदोऽपि समग्रो दर्शयितुं न शक्यते, केवलं बहुषु पुस्तकेषु योऽविसंवादी पाठस्तत्प्रतिपत्यर्थं सुगमान्यप्यक्षराणि संस्कारमात्रेण विव्रियन्तेऽन्यथा सर्वमेतदुत्तानार्थं सूत्रमिति ।

सम्प्रति लेश्याप्रतिपादनार्थमाह–'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! कति लेश्याः प्रज्ञप्ताः ?, भगवानाह–गौतम ! कापोतलेश्या प्रज्ञप्ता, एवं शर्कराप्रभानेरयिकाणामपि, नवरं तेषां कापोतलेश्या सङ्क्लिष्टतरा वेदितव्या, वालुकाप्रभानैरयिकाणां द्वे लेश्ये, तद्यथा–नीललेश्या च कापोतलेश्या च, तत्र ते बहुता ये कापोतलेश्याः, उपरितनप्रस्तटवर्त्तिनां नारकाणां कापोतलेश्याकत्वात् तेषां चातिभूयस्कत्वात्, ते स्तोकतरा ये नीललेश्याकाः, पङ्कप्रभापृथिवी-नैरयिकाणामेका नीललेश्या, सा च तृतीयपृथिवीगतनीललेश्याऽपेक्षयाऽविशुद्धतरा, धूमप्रभापृथिवीनैरयिकाणां द्वे लेश्ये, तद्यथा–कृष्णलेश्या च नीललेश्या च, तत्र ते बहुतरा ये नीललेश्याकाः, ते स्तोकतरा ये कृष्णलेश्याकाः, भावनाऽत्रापि प्राग्वत्, तमःप्रभापृथिवीनैरयिकाणां कृष्णलेश्या, सा च पञ्चमपृथिवीगतकृष्णलेश्याऽपेक्षयाऽविशुद्धतरा, अधःसप्तमपृथिवीनैरयि-काणामेका परमकृष्णलेश्या, उक्तं च व्याख्याप्रज्ञप्ती–

॥ १ ॥　　"काऊ दोसु तइयाऐ मीसिया नीलिया चउत्थीए ।
पंचमियाए मीसा कण्हा तत्तो परमकण्हा ॥"

सम्प्रति सम्यग्दृष्टित्वादिविशेषप्रतिपादनार्थमाह–'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! किं सम्यग्दृष्टयो मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टयो वा ?, भगवानाह–गौतम ! सम्यग्दृष्टयोऽपि मिथ्यादृष्टयोऽपि सम्यग्मिथ्यादृष्टयोऽपि, एवं पृथिव्यां पृथिव्यां तावद्वाच्यं यावत्तमस्तमायाम् ।

सम्प्रति ज्ञान्यज्ञानिचिन्तां कुर्वन्नाह–'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! किं ज्ञानिनोऽज्ञानिनः ?, भगवानाह–गौतम ! ज्ञानिनोऽपि अज्ञानिनोऽपि, सम्यग्दृशां ज्ञानित्वा-न्मिथ्यादृशामज्ञानित्वात्, तत्र ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः, अपर्याप्तावस्थायामपि तेषाम-वधिज्ञानसम्भवात्, संज्ञिपञ्चेन्द्रियेभ्यस्तेषामुत्पादात्, त्रिज्ञानित्वमेव भावयति, तद्यथा–आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनः, येऽज्ञानिनस्ते 'अत्थेगइया' इति अस्तीति-निपातोऽत्र बहुवचनगर्भ सन्त्येकका द्वयज्ञानिनः सन्त्येककास्त्रयज्ञानिनः, तत्र येऽसंज्ञिपञ्चे-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

न्द्रियेभ्य उत्पद्यन्ते तेषामपर्याप्तावस्थायां विभङ्गासम्भवाद् द्वयज्ञानिनः, शेषकालं तु तेषामपि त्र्यज्ञानिता, संज्ञिपञ्चेन्द्रियेभ्य उत्पन्नानां तु सर्वकालमपि त्र्यज्ञानितैव, अपर्याप्तावस्थायामपि तेषां विभङ्गभावात्, तत्र ये द्वयज्ञानिनस्ते मत्यज्ञानिनः, ये त्र्यज्ञानिनस्ते मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च। 'सक्करप्पभापुढवी'त्यादि, शर्कराप्रभापृथिवीनैरयिका भदन्त! किं ज्ञानिनोऽज्ञानिनः ?, भगवानाह-गौतम! ज्ञानिनोऽप्यज्ञानिनोऽपि, तत्रापि सम्यग्दृशां मिथ्यादृशां च भावात्, तत्र ये ज्ञानिनस्ते नियमात्त्रिज्ञानिनः, तद्यथा-आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च, येऽज्ञानिनस्ते नियमात्त्र्यज्ञानिनः, संज्ञिपञ्चेन्द्रियेभ्य एव तत्रोत्पादात्, त्र्यज्ञानित्वमेव दर्शयतीति, तद्यथा-मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च, एवं शेषास्वपि पृथिवीषु वक्तव्यं, तत्रापि संज्ञिपञ्चेन्द्रियेभ्य एवोत्पादात्॥ सम्प्रति योगप्रतिपादनार्थमाह-

'रयणप्पभे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त! किं मनोयोगिनो वाग्योगिनः काययोगिनः?, भगवानाह-गौतम! त्रिविधा अपि, एवं प्रतिपृथिवि तावद् यावदधःसप्तम्याम्

अधुना साकारानाकारोपयोगचिन्तां कुर्वन्नाह-'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त! किं साकारोपयुक्ता अनाकारोपयुक्ताः?, भगवानाह-साकारोपयुक्ता अपि अनाकारोपयुक्ता अपि, एवं तावद् यावदधःसप्तम्याम्॥ अधुना समुद्घातचिन्तां करोति-'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त! कति समुद्घाताः प्रज्ञप्ताः?, भगवानाह-गौतम! चत्वारः समुद्घाताः प्रज्ञप्ताः, तद्यथा-वेदनासमुद्घातः कषायसमुद्घातो मारणान्तिकसमुद्घातो वैक्रियसमुद्घातश्च, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तम्याम्। सम्प्रति क्षुत्पिपासे चिन्तयति-

मू. (१०५) इमीसे णं भंते! रयणप्पभा० पु० नेरतिया केरिसयं खुहप्पिवासं पच्चणुब्भवमाणा विहरंति?, गोयमा! एगमेगस्स णं रयणप्पभापुढविनेरतियस्स असब्भावपट्ठवणाए सव्वोदधी वा सव्वपोग्गले वा आसगंसि पक्खिवेज्जा नो चेव णं से रयणप्प० पु० नेरतिए तित्ते वा सिता वितण्हे वा सिता, एरिसया णं गोयमा! रयणप्पभाए नेरतिया खुधप्पिवासं पच्चणुब्भवमाणा विहरंति, एवं जाव अधेसत्तमाए।

इमीसे णं भंते! रयणप्पभाए पु० नेरतिया किं एकत्तं पभू विउव्वित्तए पुहुत्तंपि पभू विउव्वित्तए?, गोयमा! एगत्तंपि पभू पुहुत्तंपि पभू विउव्वित्तए, एगत्तं विउव्वेमाणा एगं महं मोग्गररूवं वा एवं मुसुंढिकरवत्तअसिसत्तीहलगतामुसलचक्कणारायकुंततोमरसूललउडभिंडमाला य जाव भिंडमालरूवं वा पुहुत्तं विउव्वेमाणा मोग्गररूवाणि वा जाव भिंडमालरूवाणि वा ताइं संखेज्जाइं नो असंखेज्जाइं संबद्धाइं नो असंबद्धाइं सरिसाइं नो असरिसाइं विउव्वंति, विउव्वित्ता अन्नमन्नस्स कायं अभिहणमाणा अभिहणमाणा वेयणं उदीरेंति उज्जलं विउलं पगाढं कक्कसं कडुयं फरुसं निट्ठुरं चंडं तिव्वं दुक्खं दुग्गं दुरहियासं, एवं जाव धूमप्पभाए पुढवीए।

छट्ठसत्तमासु णं पुढवीसु नेरइया बहू महंताइं लोहियकुंथूरूवाइं वइरामइतुंडाइं गोमयकीडसमाणाइं विउव्वंति, विउव्वित्ता अन्नमन्नस्स कायं समतुरंगेमाणा खायमाणा खायमाणा सयपोरागकिमिया विव चालेमाणा २ अंतो अंतो अणुप्पविसमाणा २ वेदणं उदीरंति उज्जलं जाव दुरहियासं। इमीसे णं भंते! रयणप्प० पु० नेरइया किं सीतवेदणं वेइंति उसिणवेदणं वेइंति सीउसिणवेदणं वेदेंति?, गोयमा! नो सीयं वेदणं वेदेंति उसिणं वेदणं वेदेंति नो सीतोसिणं, [ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्पयरा उण्हजोणिया वेदेंति,] एवं जाव वालुयप्पभए, पंकप्पभाए पुच्छा, गोयमा ! सीयंपि वेदणं वेदेंति, उसिणंपि वेयणं वेयंति, नो सीओसिणवेयणं वेयंति, ते बहुतरगा जे उसिणं वेदणं वेदेंति, ते थोवयरगा जे सीतं वेदणं वेइंति ।

धूमप्पभाए पुच्छा, गोयमा ! सीतंपि वेदणं वेदेंति उसिणंपि वेदणं वेदेंति नो सीतो०, ते बहुतरगा जे सीयवेदणं वेदेंति ते थोवयरका ज उसिणवेदणं वेदेंति । तमाए पुच्छा, गोयमा ! सीयं वेदणं वेदेंति नो उसिणं (वेदणं) वेदेंति नो सीतोसिणं वेदणं वेदेंति, एवं अहेसत्तमाए नवरं परमसयं ।इमीसे णं भंते ! रयणप्प० पु० नेरइया केरिसयं निरयभवं पच्चणुभवमाणा विहरंति ?, गोयमा ! ते णं तत्थ निच्चं भीता निच्चं तसिता निच्चं छुहिया निच्चं उव्विग्गा निच्चं उपप्पुआ निच्चं वहिया निच्चं परममसुभमउलमणुबद्धं निरयभवं पच्चणुभवमाणा विहरंति, एवं जाव अधेसत्तमाए णं पुढवीए पंच अणुत्तरा महतिमहालया महाणरगा पन्नत्ता, तंजहा–

काले महाकाले रोरुए महारोरुए अप्पतिट्ठाणे, तत्थ इमे पंच महापुरिसा अनुत्तरेहिं दंडसमादाणेहिं कालमासे कालं किचा अप्पतिट्ठाणे नरए नेरति(य)त्ताए उववन्ना, तंजहा–रामे १, जमदग्गिपुत्ते, दढाउ २, लच्छतिपुत्ते, वसु ३, उवरिचरे, सुभूमे कोरव्वे ४, बंभ ५, दत्ते चुलनिसुते ६, ते णं तत्थ नेरतिया जाया काला कालो० जाव परमकिण्हा वण्णेणं पन्नत्ता, तंजहा–ते णं तत्थ वेदणं वेदेंति उज्जलं विउलं जाव दुरहियासं ।

उसिण वेदणिज्जेसु णं भंते ! नेरतिएसु नेरतिया केरिसयं उसिणवेदणं पच्चणुब्भवमाणा विहरंति ? गोयमा ! से जहानामए कम्मारदारए सिता तरुणे बलवं जुगवं अप्पायंके थिरग्गहत्थे दढपाणिपादपासपिट्ठंतरोरु [संधाय] परिणए लंघणपवणजवमवग्गणपमद्दणसमत्थे तलजमल-जुयलबहुफलिहणिभबाहू धणणिचितवलियवट्टखंधे चम्मेट्ठगदुहणमुट्ठियसमाहयणिचितगत्तगत्ते उरस्सबलसमण्णागए छए दक्खे पट्ठे कुसले निउणे मेहावी निउणसिप्पोवगए एगं महं अयपिंडं उदगवारसमाणं गहाय तं ताविय २ कोट्टित २ उब्भिंदिय २ चुण्णिय २ जाव एगाहं वा दुयाहं वा तियाहं वा उक्कोसेणं अद्धमासं संहणेज्जा । से णं तं सीतं सीतीभूतं अओमएणं गहाय असब्भावपट्ठवणाए उसिणवेदणिज्जेसु नरएसु पक्खिवेज्जा, से णं तं उम्मिसियणिमिसियंतरेणं पुनरवि पच्चुद्धरिस्सामित्तिकट्टु पविरायमेव पासेज्जा पवित्तीणमेव पासेज्जा पविद्धत्थमेव पासेज्जा नो चेव णं संचाएति अविरायं वा अविलीणं वा अविद्धत्थं वा पुनरवि पच्चुद्धरित्तए ।

से जहा वा मत्तमातंगे कुंजरे सट्ठिहायणे पढमसरयकालसमतंसि वा चरमनिदाधकाल-समयंसि वा उण्हाभिहए तण्हाभिहए दवग्गिजालाभिहए आउरे सुसिए पिवासिए दुब्बले किलंते एक्कं महं पुक्खरिणिं पासेज्जा चाउक्कोणं समतीरं अणुपुव्वसुजायवप्पगंभीरसीतलजलं संछण्ण पमत्तभिसमुणालं बहुउप्पलकुमुदणलिणसुभगसोगंधियपुंडरीय सयपत्तसहस्सपत्तकेसरफुल्लोवचियं छप्पयपरिभुज्जमाणकमलं अच्छविमलसलिलपुण्णं परिहत्थभमंतमच्छकच्छभं अणेगसउणगण-मिहुणयविरइयसद्दुन्नइयमहुरसरनाइयं तं पासइ ।

तं पासित्ता तं ओगाहइ, ओगाहित्ता से णं तत्थ उण्हंपि पविणेज्जा तिण्हंपि पविणेज्जा खुहंपि पविणिज्जा जरंपि पवि० दाहंपि पवि० निद्दाएज्ज वा पयलाएज्ज वा सतिं वा रतिं वा धिंतिं वा मतिं वा उवलभेज्जा, सीए सीयभूए संकसमाण संकसमाणे सायासोक्खबहुले यावि विहरिज्जा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवामेव गोयमा ! असब्भावपट्ठवणाए उसिणवेयणिज्जेहिंतो नरएहिंतो कुंभारागणी इ वा नेरइए उव्वट्टिए समाणे जाइं इमाइं मणुस्सलोयंसि भवंति ।

अयागराणि वा तंबाग० वा तउयाग० सीसाग० रुप्पागरा० सुवन्नागराणि वा हिरण्णागरा० कुंभारागणी इ वा मुसागणी वा इट्टयागणी वा कवेल्लुयागणी वा लोहारंबरिसे इ वा जंतबाडचुल्ली वा हंडियलित्थाणि वा सोंडयलि० नलागणी ति वा, तिलागणी वा तुसागणी ति वा, तत्ताइं समज्जोतीभूयाइं फुल्लकिंसुय- समाणाइं उक्कोसहस्साइं विणिम्मुयमाणाइं जालासहस्साइं पमुच्चमाणाइं इंगालसहस्साइं पविक्खरमाणाइं अंतो २ हुहुयमाणाइं चिट्ठंति ताइं पासइ

–ताइं पासित्ता ताइं ओगाहइ ताइं ओगाहित्ता से णं तत्थ उण्हंपि पविणिज्जा तण्हंपि पविणेज्जा खुहंपि पविणेज्जा जरंपि पविणेज्जा दाहंपि पविणेज्जा निद्दाएज्ज वा पयलाएज्ज वा सतिं वा रतिं वा धिइं वा मतिं वा उवलभेज्जा, सीए सीयभूयए संकसमाणे २ सायासोक्खबहुले यावि विहरेज्जा, भवेयारूवे सिया ?, नो इणट्ठे समट्ठे, गो० ! उसिणवेदणिज्जेसु नरएसु नेरतिया एत्तो अनिट्ठतरियं चेव उसिणवेदणं पच्चणुभवमाणा विहरंति । सीयवेदणिज्जेसु णं भंते निरएसु नेरतिया केरिसयं सीयवेदणं पच्चणुब्भवमाणा विहरंति ?, गो० से जहानामए कम्मारदारए सिया तरुणे जुगवं बलवं जाव सिप्पोवगते एगं महं अयपिंडं दगवारसमाणं गहाय ताविय ताविय कोट्टिय कोट्टिय जह० एक्कहं वा दुआहं वा तियाहं वा उक्कोसे णं मासं हणेज्जा, से णं तं उसिणं उसिमभूतं अयोमएणं संदंसएणं गहाय असब्भावपट्ठवणा सीयवेदणिज्जेसु नरएसु पक्खिवेज्जा ।

से तं [उमिसियनिमिसियंतरेण पुनरवि पच्चुद्धरिस्सामीतिकट्टु पविरायमेव पासेज्जा तं चेव णं जाव नो चेव णं संचाएज्जा पुनरवि पच्चुद्धरित्तए, से णं से जहानामए पासेज्जा, तं चेव णं जाव नो चेव णं संचाएज्जा पुनरवि पच्चुद्धरित्तए, से णं से जहानामए मत्तमायंगे तहेव जाव सोक्खबहुले या विहरेज्जा] एवामेव गोयमा ! असब्भावपट्ठवणाए सीतवेदणेहिंतो नरएहिंतो नेरतिए उव्वट्टिए समाणे जाइं इमाइं इहं माणुस्सलोए हवंति, तंजहा–हिमाणि वा हिमपुंजाणि वा हिमपडलाणि वा हिमपड- लपुंजाणि वा तुसाराणि वा तुसारपुंजाणि वा हिमकुंडाणि वा हिमकुंडपुंजाणि वा सीताणि वा ताइं पासति पासित्ता ताइं ओगाहति ओगाहित्ता –

–से णं तत्थ सीतंपि पविणेज्जा तण्हंपि प० खुहंपि प० जरंपि प० दाहंपि प० निद्दाएज्ज वा पयलाएज्ज वा जाव उसिणे उसिणभूए संकसमाणे २ सायासोक्खबहुले यावि विहरेज्जा, गो० ! सीयवेयनिज्जेसु नरएसु नेरतिया एत्तो अणिट्ठयरियं चेव सीतवेदणं पच्चणुभवमाणा विहरंति ।।

वृ. 'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! कीदृशीं क्षुधं पिपासां (च) प्रत्यनुभवन्तः प्रत्येकं वेदयमानाः 'विहरन्ति' अवतिष्ठन्ति ?, भगवानाह–गौतम ! 'एगमेगस्स ण'मित्यादि, एकैकस्य रत्नप्रभापृथिवीनैरयिकस्य 'असद्भाव(प्र) स्थापनया' असद्भावकल्पनया ये केचन पुद्गला उदधयश्चेति शेषः तान् 'आस्यके' मुखे सर्वपुद्गलान् सर्वोदधीन् प्रक्षिपेत्, तथाऽपि 'नो चेव ण'मित्यादि, नैव रत्नप्रभापृथिवीनैरयिकः तृप्तो वा वितृष्णो वा स्यात् लेशतः अत्र प्रबलभस्मकव्यध्युपेतः पुरुषो दृष्टान्तः । 'एरिसिया ण'मित्यादि, ईदृशी णमिति वाक्यालङ्कृतौ गौतम ! रत्नप्रभापृथिवनैरयिकाः क्षुधं पिपासां प्रत्यनुभवन्तो विहरन्ति, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमी ।। सम्प्रति वैक्रियशक्ति विचिचिन्तयिषुरिदमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'रयणप्पभे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! प्रत्येकं किम् 'एकत्वम्' एवं रूपं विकुर्वितुं प्रभवः उत 'पृथक्त्वं' पृथक्त्वशब्दो बहुवाची, आह च कर्म्मप्रकृतिसङ्ग्रहणि-चूर्णिकारोऽपि-''पुहुत्तशब्दो बहुत्तवाई'' इति, प्रभूतानि रूपाणि विकुर्वितुं प्रभवः ?, 'विकुर्व वि-क्रयायाम्' इत्यागमप्रसिद्धो धातुरस्ति यस्य विकुर्वाण इति प्रयोगस्ततो विकुर्वितुमित्युक्तं, भगवानाह-एकत्वमपि प्रभवो विकुर्वितुं पृथक्त्वमपि प्रभवो विकुर्वितुं, तत्रैकं रूपं विकुर्वतो मुद्गररूपं वा मुद्गरः-प्रतीतः मुषण्ढिरूपं वा मुषण्ढि-प्रहरणविशेषः, करपत्ररूपं वा असिरूपं वा शक्तिरूपं वा हलरूपं वा गदारूपं वा मुशलरूपं वा चक्ररूपं वा नाराचरूपं वा कुन्तरूपं वा तोमररूपं वा शूलरूपं वा लकुटरूपं वा भिण्डमालरूपं वा विकुर्वन्ति, करपत्रादयः प्रतीताः, भिण्डमालः-शस्त्रजातिविशेषः, अत्र सङ्ग्रहणिगाथा कचित्पुस्तकेषु-

॥ १ ॥ ''मुग्गरमुसुंढिकरकयअसिसत्ति हलं गयामुसलचक्क ।
नारायकुंततोमरसूललउडभिंडिमाला य ॥''

गतार्था, नवरं 'करकय'त्ति क्रकचं करपत्रमित्यर्थः, पृथक्त्वं विकुर्वन्तो मुद्गररूपाणि वा यावत् भिण्डमालरूपाणि वा, तान्यपि सद्दशानि, 'नोऽसद्दशानि' असमानरूपाणि, तथा 'सङ्ख्येयानि' परिमितानि न 'असङ्ख्येयानि' सङ्ख्यातीतानि, विसदृशकरणेऽसङ्ख्येयकरणे वा शक्त्यभावात्, तथा 'संबद्धानि' स्वात्मनः शरीरसंलग्नानि 'नासंबद्धानि' न स्वशरीरात्पृथग्भूतानि, स्वशरीरात्पृथग्भूतकरणे शक्त्यभावात्, विकुर्वन्ति, विकुर्वित्वाऽ- न्योऽन्यस्य कायमभिघ्नन्तो वेदनामुदीरयन्ति, किंविशिष्टामित्याह-

'उज्ज्वलां' दुःखरूपतया जाज्वल्यमानां सुखलेशेनयकलङ्कितामिति भावः, 'विपुलां' सकलशरीरव्यापितया विस्तीरणां 'प्रगाढां' प्रकर्षेण मर्मप्रदेशव्यापितयाऽतीवसमवगाढां कर्क-शामिव कर्कशां, किमुक्तं भवति ?-यथा कर्कशः पाषाणसंघर्ष शरीरस्य खण्डानि त्रोटयति एवमात्मप्रदेशान् त्रोटयन्तीव या वेदनोपायते सा कर्कशा तां, कटुकामिव कटुकां पित्तप्रकोप-परिकलितवपुषो रोहिणीं-कटुद्रव्यमिवोपभुज्यमानमतिशयेनाप्रीतिजनिकामिति भावः, तथा 'परुषां' मनसोऽतीव रौक्ष्यजनिकां 'निष्ठुराम्' अशक्यप्रतीकारतया दुर्भेदां 'चण्डां' रूद्रां रौद्राध्य-वसायहेतुत्वात् 'तीव्राम्' अतिशायिनीं 'दुःखां' दुःखरूपां 'दुर्गां' दुर्लङ्घ्यामत एव दुरधिसह्याम्, एवं पृथिव्यां तावद्वक्तव्यं यावत्पञ्चम्याम्। 'छट्ठसत्तमीसु ण'मित्यादि, षष्ठसप्तम्योः पुनः पृथिव्या-नैरयिकाः बहूनि महान्ति गोमयकीट- प्रमाणत्वात्, 'लोहितकुन्थुरूपाणि' आरक्तकुन्थुरूपाणि वज्रमयतुण्डानि, गोमयकीटसमानानि विकुर्वन्ति, विकुर्वित्वा 'अन्योऽन्यस्य' परस्परस्य 'कायं' शरीरं समतुरङ्गा इवाचरन्तः समतुरङ्गाय-माणाः, अश्वा इवान्योऽन्यमारुहन्त इत्यर्थः, 'खायमाणा स्वार्थमाणा' भक्षयन्तो २ ऽन्तरन्तः 'अनुप्रवेशयन्तः' अनुप्रविशन्तः 'सयपोरागकिमिया इव' शतपर्वकृमय इव इक्षुपर्वकृमय इव 'चालेमाणा २ शरीरस्य मध्यभागेन संचरन्तः संचरन्तो वेदनामुदीरयन्त्युज्ज्वलामित्यादि प्राग्वत्। सम्प्रति क्षेत्रस्वभावजां वेदनां प्रतिपादयति-

'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! किं शीतां वेदनां वेयन्ते उष्णां वेदनां वेदयन्ते शीतोष्णां वा ?, भगवानाह-गौतम ! न शीतां चेदनां वेदयन्ते किन्तु उष्णां वेदनां वेदयन्ते, ते हि शीतयोनिका योनिस्थानां केवलहिमानीप्रख्यशीतप्रदेशात्मकत्वात्, योनिस्थान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यतिरेकेण चान्यत् सर्वमपि भूम्यादि खादिराङ्गारादपि महाप्रतप्तमतस्ते उष्णवेदनामनुभवन्ति, नापि शीतोष्णां वेदनां वेदयन्ते, शीतोष्णस्वभावतया वेदनाया नरकेषु मूलतोऽप्यसम्भवात् ।

एवं शर्कराप्रभावालुकाप्रभानैरयिका अपि वक्तव्याः, पङ्कप्रभापृथिवीनैरयिकपृच्छायाम् भगवानाह–गौतम ! शीतीमपि वेदनां वेदयन्ते नरकावासभेदेनोष्णामपि वेदनां वेदयन्ते नकरावास-भेदेनैव, न तु शीतोष्णां, तत्र ते बहुतरा ये उष्णां वेदनां वेदयन्ते, प्रभूततराणां शीतयोनित्वात्, ते स्तोकतरा ये शीतां वेदनां वेदयन्ते, अल्पतराणामुष्णयोनित्वात्, एवं धूमप्रभायामपि वक्तव्यं, नवरं ते बहुतरा ये शीतवेदनां वेदयन्ते, बहुनामुष्णयोनित्वात्, ते स्तोकतरा ये उष्णवेदनां वेदयन्ते, अल्पतराणां शीतयोनित्वात् । तमःप्रभापृथिवीनैरयिकपृच्छायां भगवानाह–गौतम ! शीतां वेदना वेदयन्ते नोष्णां नापि शीतोष्णां, तत्रत्यानां सर्वेषामुष्णयोनित्वात्, योनिस्थानव्यतिरेकेण चान्यस्य सर्वस्यापि नरकभूम्याहेर्महाहिमानीप्रख्यत्वात्, एवं तमस्तमाप्रभापृथिवीनैरयिका अपि वक्तव्याः नवरं परमां शीतवेदनां वेदयन्ते इति वक्तव्यं, तमःप्रभापृथिवीतः तमस्तमप्रभापृथिव्यां शीतवेदनाया अतिप्रबलत्वात् ।

सम्प्रति भवानुभवप्रतिपादनार्थमाह– 'रयणे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! कीदृशं नरकभवं प्रत्यनुभवतः प्रत्येकं वेदयमानाः 'विहरन्ति' अवतिष्ठन्ते ?, भगवानाह–गौतम ! रत्नप्रभापृथिवीनैरयिका 'नित्यं' सर्वकालं क्षेत्रस्वभावजमहानिबिडान्धकारदर्शनतो भीताः, सर्वत उपजातशङ्कत्वात्, तथा 'नित्यं' सर्वकालं स्वत एवाग्रेऽपि 'त्रस्ताः' परमाधार्मिकदेवपरस्परो-दीरितदुःखसंपातभयास्त्रसमुपपन्नाः, तथा 'नित्यं' सर्वकालं परमाधार्मिकैः परस्परं वा 'त्रासिताः' त्रासं ग्राहिताः, तथा 'नित्यमुद्विग्नाः' यथोक्तरूपदुःखानुभवतस्तद्गतावासराङ्मुखचित्ताः, तथा 'नित्यं' सर्वकालम् 'उपप्लुताः' उपप्लवेनोपेता न तु मनागपि रतिमासादयन्ति, एवं 'नित्यं' सर्वकालं परममशुभम् 'अतुलम्' अशुभत्वेनानन्यसदृशम् 'अनुबद्धम्' अशुभत्वेन निरन्तरमुपचितं निरयभवं 'प्रत्यनुभवन्तः' प्रत्येकं वेदयमाना विहरन्ति ।

एवं पृथिव्यां पृथिव्यां तावद्वक्तव्यं यावदधःसप्तमी, अस्यां चाधःसप्तम्यां क्रूरकर्माणः पुरुषा उत्पद्यन्ते नान्ये, तथा चास्यैवार्थस्य प्रदर्शनार्थं पञ्च पुरुषान् उपन्यस्यति–'अहेसत्तमाए ण'मित्यादि, अधःसप्तम्यां पृथिव्यामप्रतिष्ठाने नरके 'इमे' अनन्तरं वक्ष्माणस्वरूपाः पञ्च पुरुषान् उपन्यस्यति–'अहेसत्तमाए ण'मित्यादि, अधःसप्तम्यां पृथिव्यामप्रतिष्ठाने नरके 'इमे' अनन्तरं वक्ष्यमाणस्वरूपाः पञ्च महापुरुषाः 'अनुत्तरैः' सर्वोत्तमप्रकर्षप्राप्तैः 'दण्डसमादानैः' समादीयते कर्म एभिरिति समादानानि–कर्म्मोपादानहेतवः दण्डा एव–मनोदण्डादयः प्राणव्यपरोपणाध्य-वसायरूपाः समादानानि दण्डसमादानानि तैः कालमासे कालं कृत्वोत्पन्नाः ।

तद्यथा–रामो जामदग्निसुतः पर्शुराम इत्यर्थः, दाढादालः छातीसुतः, वसू राजा उपरिचरः, स हि देवताऽधिष्ठिताकाशस्फटिकसिंहासनोपविष्टः सन्नाकाशस्फटिकमयस्य सिंहासनस्यादर्शनतो लोकेष्वेवं प्रसिद्धिमगमत–सत्यवादी किलैष वसुराजा न प्राणात्ययेऽप्यलीकं भाषते ततः सत्त्वावर्जितदेवताकृतप्रातिहार्य एवमुपर्याकाशे चरतीति, स चान्यदा हिंस्रवेदार्थप्ररूपकस्य पर्वतस्य पक्षमभिगृह्य सम्यग्दृष्टेर्नारदस्य पक्षमनभिगृह्णन्नलीकवादित्वात्प्रकुपितदेवताचपेटाहतः सिंहासनात्परिभ्रष्टो रौद्राध्यानमभिरूढः सप्तमपृथिव्यामप्रतिष्ठाननरकमयासीत्, सुभूमोऽष्टमश्चक्रवर्त्ती

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कैरव्यः कौरव्यगोत्री ब्रह्मदत्तश्चुलनीसुतः 'ते णं तत्थ वेयणं वेयंती' त्याति, 'ते' परशुरामादयस्तत्र-अप्रतिष्ठाने नरके वेदनां वेदयन्ते उज्ज्वलां यावद् दुरध्यासामिति प्राग्वत्।

सम्प्रति नेरकेषूष्णवदनायाः स्वरूपमभिधित्सुराह-'उसिणवेदणिज्ञेसु णं भंते!' इत्यादि, उष्णवेदनेषु णमिति पूर्ववत् भदन्त! नरकेषु नैरयिकाः कीदृशीमुष्णवेदनां प्रत्यनुभवन्तः-प्रत्येकं वेदयमाना विहरन्ति?, भगवानाह-गौतम! स 'यथानामकः' अनिर्दिष्टनामकः कश्चित् 'कर्म्मार-दारकः' लोहकारदारकः स्यात्, किंविशिष्टः? इत्याह-

'तरुणः' प्रवर्द्धमानवयाः, आह-दारकः प्रवर्द्धमानवया एव भवति ततः किमनेन विशेषणेन?, न, आसन्नमृत्योः प्रवर्द्धमानवयस्त्वाभावात्, न ह्यासन्नमृत्यु प्रवर्द्धमानवया भवति, न च तस्य विशिष्टसामर्त्यसम्भवः, आसन्नमृत्युत्वादेव, विशिष्टसामर्थ्यप्रतिपादनार्थश्चैष आरम्भस्त-तोऽर्थवद्विशेषणम्, अन्ये तु व्याचक्षते-इह यद्द्रव्यं विशिष्टवर्णादिगुणोपेतमभिनवं च तत्तरुणमिति लोके प्रसिद्धं, यथा तरुणमिदमश्वत्थपत्रमिति, ततः स कर्मारदारकस्तरुण इति किमुक्तं भवति?-अभिनवो विशिष्टवर्णादिगुणोपेतश्चेति, बलं-सामर्थ्यं तदस्यास्तीति बलवान, तथा युगं-सुषमदुष्षमादिकालः स स्वेन रूपेण यस्यास्ति न दोषदुष्टः स युगवान्, किमुक्तं भवति?-

कालोपद्रवोऽपि सामर्थ्यविघ्नहेतुः स चास्य नास्तीति प्रतिपत्यर्थमेतद्विशेषणं, युवा-यौवनस्थः, युवावस्थायां हि बलातिशय इत्येतदुपादानम्, 'अप्पायंके' इति अल्पशब्दोऽभाववाची अल्पः-सर्वथाऽविद्यमान आतङ्को-ज्वरादिर्यस्यासावल्पातङ्कः, 'थिरग्गहत्थे' स्थिरौ अग्रहस्तौ यस्य स स्थिराग्रहस्तः, 'दढपाणिपायपासपिट्ठंतरोरुपरिणए' इति दृढानि-अतिनिबिडचयापन्नानि पाणिपादपार्श्वपृष्ठान्तरोरूणि परिणतानि यस्य स दृढपाणिपादपार्श्वपृष्ठान्तरोरुपपरिणतः, सुखादिदर्शनात्पाक्षिको निष्ठान्तस्य परनिपातः, तथा घनम्-अतिशयेन निचितौ-निबिडतर-चयमापन्न वलिताविव वलितौ वृत्तौ स्कन्धौ यस्य स घननिचितवलितवृत्तस्कन्धः।

'चम्मेट्ठगदुघणमुट्ठियसमाहयनिचियगायगत्ते' चर्मेष्टकेन द्रुघणेन मुष्टिकया च-मुष्ट्या च समाहत्य ये निचितीकृतगात्रास्ते चर्मेष्टकद्रुघणमुष्टिकसमाहतनिचितगात्रास्तेषामिव गात्रं यस्य स चर्मेष्टकद्रुघणमुष्टिकसमाहतनिचितगात्रगात्रः, 'उरस्सबलसमन्नागए' इति उरसि भवमुरस्यं तच्च तद्बलं च उरस्यबलं तच्च समन्वागतः-समनुप्राप्त उरस्यबलसमन्वागतः, आन्तरोत्साहवीर्ययुक्त इति भावः, 'तलजमलजुयलबाहू' इति, तलौ-तालवृक्षौ तयोर्यमलयुगलं-समश्रेणीकं युगलं तलयमलयुगलं, तद्वदतिसरलौ पीवरौ च बाहू यस्य स तलयमलयुगलबाहुः।

'लंघणपवणजवणपमद्दणसमत्थे' इति, लङ्घने-अतिक्रमणे प्लवने-मनाक् पृथुतर-विक्रमगतिगमने जवने अतिशीघ्रगतौ प्रमर्दने-कठिनस्यापि वस्तुनश्चूर्णनकरणे समर्थः लङ्घनप्लवनजवनप्रमर्दनसमर्थः, क्वचित् 'लंघणपवणजवणवायामणसमत्थे' इति पाठस्तत्र व्यायामने-व्यायामकरणे इति व्याख्येयं, 'छेकः' द्वासप्ततिकलापण्डितः 'दक्षः' कार्याणाम-विलम्बितकारी, 'प्रष्ठः' वाग्गमी 'कुशलः' सम्यक्क्रियापरिज्ञानवान् 'मेधावी' परस्पाव्याहत-पूर्वापरानुसन्धानदक्षः, अत एव 'निपुणसिप्पोवगए' इति नुपणं यथा भवति एवं शिल्पं-क्रियासु कौशलमुपगतः-प्राप्तो निपुणशिल्पोपगतः, एकं महान्तमयस्पिण्डम् 'उदकवारकसमानं' लघुपानीयघटसमानं गृहीत्वा 'तम्' अयस्पिण्डं तापयित्वा तापयित्वा ततो घनेन कुट्टयित्वा कुट्टयित्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावदेकाहं वा द्वयहं वा यावदुत्कर्षतोऽर्द्धमासं संहन्यात्, ततो णमिति वाक्यालङ्कारे 'तम्' अयस्पिण्डं शीतं, स च शीतो बहिर्मनाग्मात्रेणापि स्यादत आह–

'शीतीभूतं' सर्वात्मना शीतत्वेन परिणतं अयमयेन संदंशकेन गृहीत्वा 'असद्भावस्थापनया' असद्भावकल्पनया नैतदभूत् न भवति भविष्यति वा केवलमसद्भूतमिदं कल्प्यत इति, उष्णवेदनेषु नरकेषु प्रक्षिपेत्, प्रक्षिप्य च स पुरुषो णमिति वाक्यालङ्कारे 'उम्मिसियनिमिसियंतरेण' उन्मिषित-निमिषितान्तरेण यावताऽन्तरेण–यावता व्यवधानेन उन्मेषनिमेषौ क्रियेते तावदन्तरप्रमाणेन कालेनातिक्रान्तेन पुनरपि प्रत्युद्धरिष्यामीतिकृत्वा यावद् द्रष्टुं प्रवर्त्तते तावत् 'प्रवितरमेव' प्रस्फुटितमेव, यदिवा 'प्रविलीनमेव' नवनीतमिव सर्वथा गलितमेव, यदिवा 'प्रविध्वस्तमेव' सर्वथा भस्मसाद्भूतमेव पश्येत्, न पुनः शक्नुयाद् अचिरात्तं अप्रस्फुटितं अविलीनं वा अविध्वस्तं वा पुनरपि प्रत्युद्धर्तुम्, एवंरूपा नाम तत्रोष्णवेदना ॥

अस्यैवार्थस्य स्पष्टतरभावनार्थं दृष्टान्तान्तरमाह–'से जहानामए' इत्यादि, 'से' सकलजन-प्रसिद्धो यथेति दृष्टान्तत्वोपदर्शने वाशब्दो विकल्पने, अयं वा दृष्टान्तो विवक्षितार्थप्रतिपत्तये बोद्धव्य इति विकल्पनभावना, 'मत्तः' मदकलितः 'मातङ्गः' हस्ती, इह मातङ्गोऽन्त्यजोऽपि संभवति ततस्तदाशङ्काव्युदासार्थं नानादेशजविनेयजनानुग्रहाय (वा) पर्यायद्वयमाह–'द्विपः' द्वाभ्यां मुखेन करेण चेत्यर्थः पिबतीति द्विपः, 'मूलविभुजादय' इति कप्रत्ययः, कौजीर्यतीति कुञ्जरः, यदिवा कुञ्जे–वनगहने रमति–रतिमाबध्नातीति कुञ्जरः षष्टिर्हायनाः–संवत्सरा यस्य स षष्टिहायनः 'प्रथमशरत्कालसमये' कार्त्तिकमाससमये, इह प्राय ऋतव सूर्यर्त्तवो गृह्यन्ते ते चाषाढादयो द्विद्विमासप्रमाणाः, प्रवचने च क्रमेणैवंनामानः, तद्यथा–प्रथमः प्रावृट् द्वितीयो वर्षारात्रः तृतीयः शरत् चतुर्थो हेमन्तः पञ्चमो वसन्तः षष्ठो ग्रीष्मः, तथा चाह पादलिप्तसूरि–

॥१॥ "पाउस वासारत्तो, सरओ हेमंत वसन्त गिम्हो य ।
एए खलु छप्पि रिऊ, जिनवरदिट्ठा मए सिट्ठा ॥"

ततः प्रथमशरत्कालसमयः कार्त्तिकसमय इति विवृत्तम्, आह च मूलटीकाकृत्– "प्रथमशरत्–कार्त्तिकमासः" तस्मिन् वाशब्दो विकल्पने 'चरमनिदाधकालसमये वा' चरमनिदाघ-कालसमयो–ज्येष्ठमासपर्यन्तस्तस्मिन्, वाशब्दो विकल्पने, 'उष्णाभिहतः' सूर्यखरकिरणप्रतापाभि-भूतः, अत एवोष्णैः सूर्यकिरणैः सर्वतः प्रतप्ताङ्गतया शोषभावतस्तृषाभिहतः, तत्रापि पानीयग-वेषणार्थमितस्ततः स्वेच्छया परिभ्रमतः कथञ्चिद्दवाग्निप्रत्यासत्तौ गमनतो दवाग्निज्वालाभिहतः अत एव 'आतुरः' कचिदपि स्वास्थ्यमलभमानः सन् आकुलः, सर्वाङ्गपरितापसम्भवेन गलतालुशोष-भावात् शुषितः, कचित् 'झिज्झिए' इति पाठस्तत्र 'क्षितः' क्षीणशरीर इति व्याख्येयम्, असाधारण-तृड्वेदनासमुच्छलनात्पिपासितः ।

अत एव दुर्बलः शारीरमानसावष्टम्भरहितत्वात्, 'क्लान्तः' ग्लानिमुपगतः 'क्लमू ग्लानौ' इति वचनात्, एकां महतीं 'पुष्करिणीं' पुष्कराण्यस्यां विद्यन्ते इति पुष्करिणी तां, किंविशिष्टा-मित्याह–'चतुष्कोणां' चत्वारः कोणा–अश्रयो यस्याः सा तथा तां, समं–विषमोन्नतिवर्जितं सुखावतारं तीरं–तटं यस्याः सा समतीरा ताम्, आनुपूर्व्येण–नीचैर्नीचैस्तरभावरूपेण न त्वेकहेलयैव क्वचिद्गर्त्तारूपा क्वचिदुन्नतिरूपा इति भावः, सुष्ठु–अतिशयेन यो जातो वप्रः–केदारो जलस्थानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र गम्भीरम्—अलब्धस्ताधं शीतलं जल यस्यां सा आनुपूर्व्यसुजातवप्रगम्भीरशीतजलला ताम् 'संछण्णपत्तभिसमुणाल' मिति संछन्नानि—जलेनान्तरितानि पत्रबिसमृणालानि यस्यां सा संछन्नपत्रबिसमृणाला ताम्, इह विसमृणालसाहचर्यात् पत्राणि—पद्मिनीपत्राणि द्रष्टव्यानि, बिसानि—कन्दाः मृणालानि—पद्मनालाः, तथा बहुभिरुत्पलकुमुदनलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डरीकशतपत्रसहस्रपत्रैः केसरैः—केसरप्रधानैः फुल्लैः—विकसितैरुपचिता बहूत्पलकुमुदनलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डरीकशतपत्रसहस्रपत्रकेसरफुल्लोपचिता तां, तथा षट्पदैः—भ्रमरैः परिभुज्यमानानि कमलानि उपलक्षणमेतत् कुमुदादीनि यस्याः सा षटपदपरिभुज्यमानकमला तां, तथाऽच्छेन—स्वरूपतः स्फटिकवच्छुद्धेन विमलेन—आगन्तुकमलरहितेन सलिलेन पूर्णा अच्छविमलसलिलपूर्णा तां। तथा पडिहत्था—अतिरेकता अतिप्रभूता इत्यर्थः भ्रमन्तो मत्स्यकच्छपा यस्यां सा पडिहत्थभ्रमन्मत्स्यकच्छपा, तता अनेकैः शकुनिगणमिथुनकैः गणशब्दस्य प्राकृतत्वादस्थानेऽप्युपनिपातः, शकुनिमिथुनकैर्विचरितैः—इतस्ततः स्वेच्छया प्रवृत्तैः शब्दोन्नतिकम्—उन्नतशब्दं मधुरस्वरं नादितं यस्यां सा अनेकशकुनिगणमिथुनकविचरितशब्दोन्नतिकमधुरस्वरनादिता, ततः पूर्वपदेन विशेषणसमासः, तां दृष्ट्वाऽवगाहेत, अवगाह्य च 'उष्णमपि' परिदाहमपि शरीरस्य तत्र 'प्रविनयेत्' प्रकर्षेण सर्वात्मना स्फोटयेत्, तथा क्षुधामपि प्रविनयेत् प्रत्यासन्नतटवर्त्तिशल्लक्यादिकिसलयभक्षणात्, तृषमपि प्रविनयेत् जलपानात्, ज्वरमपि परिसंतापसमुत्थं प्रविनयेत् परिदाधक्षुत्पिपासाऽपगमात्, एवं सकलक्षुदादिदोषापगमतः सुखासिकाभावेन निद्रायेत प्रचलायेत, तत्र अनिद्रावान् निद्रावान् भवतीति च्व्यर्थविवक्षायां निद्रादिभ्यो धर्मिणि क्यबिति कर्म्मणि क्यपूप्रत्ययः, एवं प्रचलाशब्दादपि निद्रादेराकृतिगणत्वात्, निद्राप्रचलयोस्त्वयं विशेषः—सुखप्रबोधा स्वापावस्था निद्रा, ऊर्द्धस्थितस्यापि या पुनश्चैतन्यमस्फुटीकुर्वती समुपजायते निद्रा सा प्रचला, एवं च क्षणमात्रनिद्रालाभतोऽतिस्वस्थीभूतः।

'स्मृतिं वा' पूर्वानुभूतस्मरणं 'रतिं वा' तदवस्थाऽऽसक्तिरूपां 'धृतिं वा' चित्तस्वास्थ्यं 'मतिं वा' सम्यगीहापोहरूपाम् 'उपलभेत' प्राप्नुयात्, ततः 'शीतः' बाह्यशरीरप्रदेशशीतीभावात्, 'शीतीभूतः' शरीरान्तरपि निर्वृतीभूतः सन् 'संकसमाणे' इति सम्—एकीभावेन कसन्—गच्छ् 'सातसौख्यबहुलश्चापि' सातम्—आह्लादस्तत्प्रधानं सख्यं सातसौख्यं न त्वभिमानमात्रजनितमाह्लादविरहितं सातसौख्येन बहुलो—व्याप्तः सातसौख्यबहुलश्चापि 'विहरेत्' स्वेच्छया परिभ्रमेत्

'एवमेव' अनेनैवानन्तरोदितदृष्टान्तप्रकारेण हे गौतम! 'असद्भावप्रस्थापनया' असद्भावकल्पनया नेदं वक्ष्यमाणमभूत् केवलं नरकगतोष्णवेदनायाथात्म्यप्रतिपत्तयेऽसत्कल्प्यत इति भावः, उष्णवेदनेभ्यो नरकेभ्यो नैरयिकोऽनन्तरमुद्वर्त्तितो विनिर्गतः सन् 'यानि' इमानि प्रत्यक्षत उपलभ्यमानानि 'इह' मनुष्यलोके स्थानानि भवन्ति, तद्यथा—''गोलियालिंगाणि वा, सोंडियालिंगाणि वा, भिंडियालिंगाणि वा, एते अग्रेराश्रयविशेषाः, अन्ये तु देशभेदनीत्या पिष्टपाचनकाग्यादिभेदेनैतेषां स्वरूपं कथयन्ति, तदप्यविरुद्ध मेवेति, तैलाग्निरिति वा तुषाग्निरिति वा बुसा० वा नडा० वा, नडः—तृणविशेषः। 'अयागराणीति वा' आर्षत्वान्नपुंसकनिर्देशः अयआकरा इति वा, येषु निरन्तरं महामूषा-स्वयोदलं प्रक्षिप्याऽय उत्पाटयते ते अयआकराः, एवं ताम्राकरा इति वा त्रप्वाकरा इति वा सीसकाकरा इति वा रूप्या० सुवर्णा० हिरण्याकरा इति वा, सुवर्णहिरण्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योरत्र विशेषो वर्णादिकृतो वेदितव्यः, इष्टकापाक इति वा कुम्भकारापाक इति वा कवेल्लुकापाक इति वा लोहकाराम्बरीष इति वा, अम्बरीषः—कोष्टकः, यन्त्रवाडचुल्ली इवेति, यन्त्रम्—इक्षुपीडनयन्त्रं तत्प्रधानः पाटको यन्त्रपाटकः तत्र चुल्ली यत्रेक्षुरसः पच्यते, इत्थम्भूतानि यानि मनुष्यलोके स्थानानि 'तप्तानि' वह्निसंपर्कतस्तप्तीभूतानि, तानि च कानिचिद् अयआकरप्रभृतीनि कदाचिदुष्णस्पर्शमात्राण्यपि संभवन्ति ततो विशेषप्रतिपानार्थमाह—

'समजोईभूयाइ' प्राकृतत्वात्समशब्दस्य पूर्वनिपातः, 'ज्योतिसमभूतानि' साक्षादग्निवर्णानि जातानीति भावः, एतदेवोपमया स्पष्टयति—'फुल्लकिंशुकसमानानि' प्रफुल्पलाशकुसुमकल्पानि 'उक्कासहस्साइ' इति ये मूलाग्नितो वित्रुटय वित्रुटयाग्निकणाः प्रसर्पन्ति ते उल्का इत्यच्यन्ते तासां सहस्राणि उल्कासहस्राणि मुञ्चन्ति ज्वालासहस्राणि विनिर्मुञ्चन्ति अङ्गारसहस्राणि प्रविक्षरन्ति 'अन्तरन्तर्हूयमानानि' अतिशयेन जाज्वल्यमानानि, कचित् 'अंतो अंतो सुहुयहुयासणा' इति पाठः।

'अन्तरन्तः सुहुतहुताशनानि' सुष्ठु हुतो हुताशनो येषु तानि तथा तिष्ठन्ति तानि पश्येत् दृष्ट्वा चवगाहेत, अवगाह्य च 'उष्णमपि' नरकोष्णवेदनाजनितं बहिशरीरस्य परितापमपि प्रविनयेत्, नरकगतादुष्णस्पर्शादयआकरादिषूष्णस्पर्शस्यातीव मन्दत्वात्, एवं च सुखासिकाभावतस्तृषामपि क्षुधमपि दाहमपि अन्तःशरीरसमुत्थं प्रविनयेत्, तथा च सति तृडादिदोषापगमतो निद्रायेत वा प्रचलायेत वा स्मृतिं वा रतिं वा धृतिं वा उपलभेत, ततः शीतः शीतीभूतः सन् 'संकसन् संकसन्' संक्रमन् संक्रमन् सातसौख्यबहुलो विहरेत्, अमीषां पदानामर्थ प्राग्वद्भावनीयः

एतावत्युक्ते भगवान् गौतमः पृच्छति—'भवे एयारूवे सिया ?' 'स्यात्' संभाव्यते एतद् यथा भवेद् उष्णवेदनीयेषु नरकेषु एतद्रूपा उष्णवेदना ?, भगवानाह—गौतम ! नायमर्थ समर्थो यदुष्णवेदनीयेषु नरकेषु नैरयिका इति अनन्तरं प्रतिपादितस्वरूपाया उष्णवेदनायाः अनिष्टतरिकामेव अप्रियतरिकामेव अमनोज्ञतरिकामेव अमनआपतरिकामेव वेदनां 'प्रत्यनुभवन्तः' प्रत्येकं वेदयमाना विहरन्ति।

सम्प्रति शीतवेदनीयेषु नरकेषु शीतवेदना स्वरूपं प्रतिपादयति—'सीयवेयणिज्जेसु ण'मित्यादि, शीतवेदनीयेषु भदन्त! निरयेषु नैरयिकाः कीदृशीं शीतवेदनां प्रत्यनुभवन्तो विहरन्ति ?, स यथानामकः कर्म्मकरदारकः स्यात् तरुण इत्यादिविशेषणकदम्बकं प्राग्वत्तावद् यावत्संहन्यात् नवरमुत्कर्षतो मासमित्यत्र ब्रूयात्, ततः 'सः' कर्म्मकरदारकः 'तम्' अयस्पिण्डमुष्णं स चोष्णो बाह्यप्रदेशमात्रापेक्षयाऽपि स्यादत आह—'उष्णीभूतं' सर्वात्मनाऽग्निवर्णीभूतमिति भावः, अयोमयेन संदंशकेन गृहीत्वाऽसद्भावप्रस्थापनया शीतवेदनीयेषु नरकेषु प्रक्षिपेत्, ततः 'स' पुरुषः 'तम्' अयस्पिण्डमित्यादि प्राग्वत्तावद्वक्तव्यं यावद्विहरत, तच्चैवम्—

'से णं तं उम्मिसियनिमिसियंतरेण पुनरवि पच्चुद्धरिस्सामित्तिकट्टु पविरायमेव पासेज्ञा पविलीणमेव पासेज्ञा पविद्धत्थमेव पासेज्ञा नो चेव णं संचाएइ अविरायं अविलीणं अविद्धत्थं पुनरवि पच्चुद्धरित्तए से जहानामए मत्तमायंगे जाव सायासोक्खबहुलेयावि विहरइत्ति' 'एवामेवे'-त्यादि, अनेनैवाधिकृतदृष्टान्तोक्तेन प्रकारेण गौतम ! असद्भावप्रस्थापनया शीतवेदनीयेभ्यो नरकेभ्योऽनन्तरमुद्वृत्तः सन् यानीमानि मनुष्यलोके स्थानानि भवन्ति, तद्यथा—हिमानि वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिमपुञ्जानि वा, सूत्रे नपुसकनिर्देशः प्राकृतत्वात्, हिमपटलानि वा हिमकूटानि वा, एतान्येव पदानि नानादेशजविनेयानुग्रहाय पर्यायैर्व्याचष्टे–

'सीयाणि वा सीयपुंजाणि वा' इत्यादि, तानि पश्येत्, दृष्ट्वा तान्यवगाहेत, अवगाह्य 'शीत-मपि' नरकजनितं शीतत्वमपि प्रविनयेत्, ततः सुखासिकाभावतस्तृषमपि क्षुधमपि ज्वरमपि नरकवेदनीयनरकसंपर्कसमुत्थं जाडयमपि प्रविनयेत्, ततः शीतत्वादिदोषापगमतोऽनुत्तरं स्वास्थ्यं लभमानो निद्रायेत वा प्रचलायेत वा स्मृतिं वा रतिं वा धृतिं वा लभेत, ततो नरकगजाड्यापगमाद् उष्णः, स च बहिप्रदेशमात्रतोऽपि स्यात्तत आह–'उष्णीभूतः' अन्तरपि नरकगतजाड्यापगमात् जातोत्साह इत्यर्थः, स एवंभूतः सन् यथास्वसुखं संक्रमन् सातसौख्यबहुलो विहरेत्, एवमुक्ते गो०–'भवेयारुवे सिया ?' इत्यादि प्राग्वत्। सम्प्रति नैरयिकाणां स्थितिप्रतिपादनार्थमाह–

मू. (१०६) *इमीसे णं भंते! रयणप्प० पु० नेरतियाणं केवतियं कालं ठिती पन्नत्ता ?, गोयमा! जहण्णेणवि उक्कसेणवि ठिती भाणितव्वा जाव अधेसत्तमाए ॥*

वृ. 'रयणप्पभे'त्यादि, रत्नप्रभापृथिवीनैरयिकाणां भदन्त ! कियन्तं कालं स्थिति प्रज्ञप्ता ?, भगवानाह–गौतम ! जघन्येन दश वर्षसहस्राणि उत्कर्षतः सागरोपमं, एवं शर्करा-प्रभापृथिवीनैरयिकाणां जघन्यत एकं सागरोपममुत्कर्षतस्त्रीणि सागरोपमाणि, वालुकाप्रभा-पृथिवीनैरयिकाणां जघन्यतस्त्रीणि सागरोपमाणि उत्कर्षतः सप्त, पङ्कप्रभापृथिवीनैरयिकाणां जघन्यतः सप्त सागरोपमाणि उत्कर्षतो दश, धूमप्रभापृथिवीनैरयिकाणां जघन्यतो दश सागरोपमाणि उत्कर्षतः सप्तदश, तमःप्रभापृथिवीनैरयिकाणां जघन्यतः सप्तदश सागरोपमाणि उत्कर्षतो द्वाविंशति, तमस्तमःप्रभायां जघन्यतो द्वाविंशतिसागरोपमाणि उत्कर्षतस्त्रयस्त्रिंशत्।

क्वचित् 'जहा पन्नवणाए ठिइपदे' इत्यतिदेशः सोऽप्येवमेवार्थतो भावनीयः, तदेवं प्रतिपृथिवी स्थितिपरिमाणमुक्तं, यदा तु प्रतिप्रस्तटं स्थितिपरिमाणं चिन्त्यते तदैवमवग-न्तव्यम्–रत्नप्रभायां प्रथमे प्रस्तटे जघन्या स्थितिर्दशवर्षसहस्राणि उत्कृष्टा नवति द्वितीये प्रस्तटे एषैव शतगुणिती जघन्या उत्कृष्टा च वेदितव्या, तद्यथा–जघन्या दशवर्ष- लक्षा उत्कृष्टा नवतिवर्षलक्षाः , तृतीये प्रस्तटे जघन्यतो नवतिवर्षलक्षा उत्कृष्टा पूर्वकोटी, चतुर्थे जघन्या पूर्वकोटी उत्कृष्टा सागरोपमस्य दशमो भागः, पञ्चमे जघन्या सागरोपमस्यैको दशभाग उत्कृष्टा द्वौ दशभागौ, षष्ठे जघन्या सागरोपमस्य द्वौ दशभागावुत्कृष्टा त्रयः, सप्तमे जघन्या त्रयः सागरोपमस्य दशभागा उत्कृष्टाश्चत्वारः, अष्टमे जघन्या चत्वारः सागरोप- मस्य दशभागा उत्कृष्टा पञ्च, नवमे जघन्या पञ्च सागरोपमस्य दशभागा उत्कृष्टा षट्, दशमे जघ- न्या षट् सागरोपमस्य दसभागा उत्कृष्टा सप्त, एकादषे जघन्या सप्त उत्कृष्टाऽष्टौ, द्वादशे जघन्याऽष्टौ उत्कृष्टा नव, त्रयोदशे जघन्या नव सागरोपमस्य दशभागा उत्कृष्टा दश, परिपूर्णमेकं सागरोपममिति भावः

शर्कराप्रभायां प्रथमे प्रस्तटे प्रस्तटे जघन्या एकं सागरोपमं उत्कृष्टा एकं सागरोपमं द्वौ च सागरोपमस्यैकादशभागौ, द्वितीये प्रस्तटे जघन्या एकं सागरोपमं द्वौ सागरोपमस्यैकादशभागौ उत्कृष्टा एकं सागरोपमं चत्वारः सागरोपमस्यैकादशभागाः, तृतीये जघन्या एकं सागरोपमं चत्वारः सागरोपमस्यैकादशभागा उत्कृष्टा एकं सागरोपमं षट् सागरोपमस्यैकादशभागाः, चतुर्थे जघन्या एकं सागरोपमं अष्टौ सागरोपमस्यैकादशभागाः उत्कृष्टा एकं सागरोपमं दश सागरोपमस्यैकादश

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

भागाः, षष्ठे जघन्या एकं सागरोपमं दश सागरोपमस्यैकादशभागा उत्कृष्टा द्वे सागरोपमे एकः सागरोपमस्यैकादशभागः, सप्तमे जघन्या द्वे सागरोपमे एकः सागरोपमस्यैकादशभाग उत्कृष्टा द्वे सागरोपमे त्रयः सागरोपमस्यैकादशभागाः, अष्टमे जघन्या द्वे सागरोपमे त्रयः सागरोपमस्यै-कादशभागाः उत्कृष्टा द्वे सागरोपमे पञ्चसागरोपमस्यैकादशभागाः, नवमे जघन्या द्वे सागरोपमे पञ्च सागरोपमस्यैकादशभागाः उत्कृष्टा द्वे सागरोपमे सप्त सागरोपमस्यैकादशभागाः, दशमे जघन्या द्वे सागरोपमे सप्त सागरोपमस्यैकादशभागाः उत्कृष्टा द्वे सागरोपमे नव सागरोप-मस्यैकादशभागाः, एकादशे जघन्या द्वे सागरोपमे नव सागरोपमस्यैकादशभागाः उत्कृष्टानि परिपूर्णानि त्रीणि सागरोपमाणि ।

वालुकाप्रभायां प्रथमे प्रस्तटे जघन्या स्थितिस्त्रिणि सागरोपमाणि उत्कृष्टा त्रीणि सागरोपमाणि चत्वारः सागरोपमस्य नवभागाः, द्वितीये जघन्या त्रीणि सागरोपमाणि चत्वारः सागरोपमस्य नवभागाः उत्कृष्टा त्रीणि सागरोपमाणि अष्टौ सागरोपमस्य नवभागाः, तृतीये जघन्या त्रीणि सागरोपमाणि अष्टो सागरोपमस्य नवभागाः उत्कृष्टा चत्वारि सागरोपमाणि त्रयः सागरोपमस्य नवभागाः, चतुर्थे जघन्या चत्वारि सागरोपमाणि त्रयः सागरोपमस्य नवभागाः उत्कृष्टा चत्वारि सागरोपमाणि सप्त सागरोपमस्य नवभागाः, पञ्चमे जघन्या चत्वारि सागरोपमाणि सप्त सागरोपमस्य नवभागाः उत्कृष्टा पञ्च सागरोपमाणि द्वौ सागरोपमस्य नवभागौ, षष्ठे जघन्येन पञ्च सागरोपमाणि द्वौ सागरोपमस्य नवभागौ उत्कृष्टा पञ्च सागरोपमाणि षट् सागरोपमस्य नवभागः, अष्टमे जघन्य षट् सागरोपमाणि एकः सागरोपमस्य नवभागः उत्कृष्टा षट् सागरोपमाणि पञ्च सागरोपमस्य नवभागाः, नवमे जघन्या षट् सागरोपमाणि पञ्च सागरोपमस्य नवभागाः उत्कृष्टा परिपूर्णानि सप्त सागरोपमाणि, एषोऽत्र तात्पर्यार्थः—सागरोपमत्रयस्योपरि प्रतिप्रस्तटं क्रमेण चत्वारः सागरोपमस्य नवभागा वर्द्धयितव्यास्ततो यथोक्तपरिमाणं भवति ।

पङ्कप्रभायां प्रथमे प्रस्तटे जघन्या स्थिति सप्त साग० उत्कृष्टा सप्त सागरोपमाणि त्रयः सागरोपमस्य सप्तभागाः, द्वितीये जघन्या सप्त सागरोपमाणि त्रयः सागरोपमस्य सप्तभागाः उत्कृष्टा सप्त साग० षट् सागरोपमस्य सप्तभागाः, तृतीये जघन्या सप्त सागरोपमाणि षट् सागरोपमस्य सप्तभागाः उत्कृष्टाऽष्टौ सागरोपमाणि द्वौ सागरोपमस्य सप्तभागौ, चतुर्थे जघन्याऽष्टौ सागरोपमाणि द्वौ सागरोपमस्य सप्तभागौ उत्कृष्टाऽष्टौ साग० पञ्चसागरोपमस्य सप्तभागाः, पञ्चमे जघन्याऽष्टौ साग० पञ्च सागरोपमस्य सप्तभागाः उत्कृष्टा नव साग० एकः सागरोपमस्य सप्तभागः, षष्ठे जघन्या नव सागरोपमाणि एकः सागरोपमस्य सप्तभागः उत्कृष्टा नव सागोपमाणि चत्वारः सागरोपमस्य सप्तभागाः सप्तमे जघन्या नव सागरोपमाणि चत्वारः सागरोपमस्य सप्तभागाः उत्कृष्टा परिपूर्णानि दश साग० अत्रापीयं भावना—सागरोपम- सप्तकस्योपरि त्रयस्त्रयः सागरोपमस्य सप्तभागाः प्रतिप्रस्तटं क्रमेण वर्द्धयितव्यास्ततो भवति यथोक्तं परिमाणमिति ।

धूमप्रभायाः प्रथमे प्रस्तटे जघन्या स्थितिर्दश सागरोपमाणि उत्कृष्टा एकादश सागरोपमाणि द्वौ सागरोपमस्य पञ्चभागौ, द्वितीये जघन्य एकादश सागरोपमाणि द्वौ सागरोपमस्य पञ्चभागौ उत्कृष्टा द्वादश सागरोपमाणि चत्वारः सागरोपमस्य पञ्चभागाः, तृतीये जघन्या द्वादश सागरोपमाणि चत्वारः सागरोपमस्य पञ्चभागाः उत्कृष्टा चतुर्दश सागरोपमाणि त्रयः सागरोपमस्य पञ्चभागाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्थे जघन्या चतुर्दश सागरोपमाणि एकः सागरोपमस्य पञ्चभागः उत्कृष्टा परिपूर्णानि सप्तदश सागरोपमाणि त्रयः सागरोपमस्य पञ्चभागाः, पञ्चमे जघन्या पञ्चदश सागरोपमाणि त्रयः सागरोपमस्य पञ्चभागाः उत्कृष्टा परिपूर्णानि सप्तदश सागरोपमाणि, एष चात्र भावार्थ– सागरोपमदशकस्योपरि प्रतिप्रस्तटं क्रमेणैकं सागरोपमं द्वौ च सागरोपमस्य पञ्चभागाविति वर्द्धयितव्यं ततो यथोक्तं परिमाणं भवति।

तमःप्रभायां प्रथमे प्रस्तटे जघन्या स्थिति सप्तदश सागरोपमाणि उत्कृष्टाऽष्टादश साग०-द्वौ च सागरोपमस्य त्रिभागौ, द्वितीये जघन्याऽष्टादश साग० द्वौ च सागरोपमस्यं त्रिभागौ उत्कृष्टा विंशति साग० एकः सागरोपमस्य त्रिभागः, तृतीये जघन्या विंशति साग० एकः सागरोपमस्य त्रिभागः उत्कृष्टा द्वाविंशति साग०, अत्राप्येष तात्पर्यार्थ– सप्तदश सागराणामुपरि प्रतिप्रस्तटं क्रमेणैकं सागरोपमं द्वौ च सागरोपमस्य त्रिभागाविति वर्द्धयितव्यं, ततो यथोक्तं परिमाणं भवति। सप्तम्यां तु पृथिव्यामेक एव प्रस्तट इति तत्र पूर्वोक्तमेव परिमाणं द्रष्टव्यम्।

मू. (१०७) *इमीसे णं भंते! रयणप्पभाए नेरतिया अनंतरं उव्वट्टिय कहिं गच्छंति? कहिं उववज्जंति? किं नेरतिएसु उववज्जंति? किं तिरिक्खजोणिएसु उववज्जंति?, एवं उव्वट्टणा भाणितव्वा जहा वक्कंतीए तहा इहवि जाव अहसेत्तमाए॥*

वृ. सम्प्रति नैरयिकाणामुद्वर्त्तनामाह–'रयणप्पभापुढवि' इत्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त! अनन्तरमुद्वृत्य क्व गच्छन्ति?, एतदेव व्याचष्टे–कोत्पद्यन्ते इत्यादि, यथा प्रज्ञापनायां व्युत्क्रान्तिपदे तथा वक्तव्यं यावत्तमस्तमायां, तच्चातिप्रभूतमिति तत एवावधार्यम्, एष च सङ्क्षेपार्थः रत्नप्रभापृथिवीनैरयिका यावत्तमःप्रभापृथिवीनैरयिका अनन्तरमुद्वृत्ता नैरयिकदेवैकेन्द्रिय-विकलेन्द्रियसंमूर्च्छिमपञ्चेन्द्रियासङ्ख्येयवर्षायुष्कवर्जेषु शेषेषु तिर्यङ्मनुष्येषूत्पद्यन्ते, सप्तमपृथि-वीनैरयिकास्तु गर्भजतिर्यकपञ्चेन्द्रियेष्वेव न शेषेषु।

सम्प्रति नरकेषु पृथिव्यादिस्पर्शस्वरूपमाह–

मू. (१०८) *इमीसे णं भंते! रयण० पु० नेरतिया केरिसयं पुढविफासं पच्चणुब्भवमाणा विहरंति?, गोयमा! अनिट्ठं जाव अमणामं, एवं जाव अहेसत्तमाए, इमीसे णं भंते! रयण–पु० नेरइया केरिसयं आउफासं पच्चणुब्भवमाणा विहरंति?, गोयमा! अनिट्ठं जाव अमणामं, एवं जाव अहेसत्तमाए, एवं जाव वणप्फतिफासं अधेसत्तमाए पुढवीए।*

इमा णं भंते! रयणप्पभापुढवी दोच्चं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं सव्वक्खुड्डिया सव्वंतेसु?, हंता! गोयमा! इमा णं रयणप्पभापुढवी दोच्चं पुढविं पणिहाय जाव सव्वक्खुड्डिया सव्वंतेसु, दोच्चा णं भंते! पुढवी तच्चं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं पुच्छा, हंता गोयमा दोच्चा णं पुढवी जाव सव्वक्खुड्डिया सव्वंतेसु। एवं एएणं अभिलावेणं जाव छट्ठिता पुढवी अहेसत्तमं पुढविं पणिहाय सव्वक्खुड्डिया सव्वंतेसु।

वृ. 'रयणप्पभे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त! कीदृशं पृथिवीस्पर्शं प्रत्यनुभवन्तो विहरन्ति?, भगवानाह–गौतम! 'अनिट्ठं अकंतं अप्पियं अमणुन्नं अमणामं' अस्यार्थ प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावत्तमस्तमायाम्, एवमप्तेजोवायुवनस्पतिस्पर्शसूत्राण्यपि भावनीयानि, नवरं तेजःस्पर्शउष्णरूपतापरिणतनरककुड्यादिस्पर्श परोदीतवैक्रियरूपो वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदितव्यो न तु साक्षाद् बादराग्निकायस्पर्श, तत्रासम्भवात्।

मू. (१०९) *इमीसे णं भंते! रयणप्पभाए पु० निरयपरिसामंतुसे जे पुढविक्काइया जाव वणप्फतिकाइया ते णं भंते! जीवा महाकम्मतरा चेव महाकिरियतरा चेव महाआसवतरा चेव महावेयणतरा चेव?, हंता गोयमा! इमीसे णं [भंते!] रयणप्पभाए पुढवीए निरयपरिसामंतेसु तं चेव जाव महावेदनतरका चेव, एवं जाव अधेसत्तमा।*

वृ. 'इमीसे ण'मित्यादि, अस्यां भदन्त! रत्नप्रभायां पृथिव्यां त्रिंशति नरकावासशतसहस्रेषु एकैकस्मिन् नरकावासे 'सर्वे प्राणाः' द्वीन्द्रिया 'सर्वे भूताः' वनस्पतिकायिकाः 'सर्वे सत्वाः' पृथिव्यादयः 'सर्वे जीवाः' पञ्चेन्द्रियाः, उक्तञ्च—

॥१॥ "प्राणा द्वित्रिचतुः प्रोक्ता, भूताश्च तरवः स्मृताः।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्वा उदीरिताः॥"

पृथिवीकायिकतया अप्कायिकतया वायुकायिकतया वनस्पतिकायिकतया नैरयिकतया उत्पन्नाः उत्पन्नपूर्वा?, भगवानाह—'हंते'त्यादि, हन्तेति प्रत्यधारणे गौतम! 'असकृत्' अनेकवारम्, अथवा 'अनन्तकृत्वः' अनन्तान् वारान्, संसारस्यानादित्वात्, एवं प्रतिपृथिवितावद्वक्तव्यं यावदधःसप्तमी, नवरं यत्र यावन्तो नरकास्तत्र तावन्त उपयुज्य वक्तव्याः।

मू. (११०) *इमीसे णं भंते! रयणप्प० पु० तीसाए नरयावाससयसहस्सेसु इक्कमिक्कंसि निरयावासंसि सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता पुढवीकाइयत्ताए जाव वणस्सइकाइयत्ताए नेरइयत्ताए उववन्नपुव्वा?, हंता गोयमा! असतिं अदुवा अनंतखुत्तो, एवं जाव अहेसत्तमाए पुढवीए नवरं जत्थ जत्तिया नरका।*

वृ. क्वचिदिदमपि सूत्रं दृश्यते—"इमीसे णं भंते! रयणप्पभाए पुढवीए निरयपरिसामंतेसु जाव महावेयणतरा चेव, एवं जाव अहेसत्तमा। अस्यां भदन्त! रत्नप्रभायां पृथिव्यां नरकपरिसमन्तेषु—नरकावासपर्यन्तवर्त्तिषु प्रदेशेषु बादरपृथिवीकायिकाः 'जाव वणप्फइकाइय'त्ति बादराप्कायिका बादरवायुकायिका बादरवन- स्पतिकायिकास्ते भदन्त! जीवाः 'महाकम्मतरा चेव' महत्—प्रभूतमसातवेदनीयं कर्म्म येषां ते महाकर्म्माणः, अतिशयेन महाकर्म्माणो महाकर्म्मतराः, 'चेवं' त्यवधारणे, महाकर्म्मतरा एव कुतः? इत्याह—

'महाकिरियतरा चेव' महती क्रिया—प्राणातिपातादिकाऽऽसीत् प्राग् जन्मनि तद्भवेषु तदध्यवसायानिवृत्या येषां ते महाक्रियाः, अतिशयेन महाक्रिया महाक्रियतराः, 'निमित्तकारणहेतुषु सर्वासा विभक्तीनां प्रायो दर्शन'मिति न्यायाद्धेतावत्र प्रथमा, ततोऽयमर्थ—यतो महाक्रयतरा एव ततो महाकर्म्मतरा एव, महाक्रियतरत्वमपि कुतः? इत्याह—

'महाश्रवतरा एव' महान्त आश्रवाः—पापोपादानहेतव आरम्भादयो येषामासीरन् ते महाश्रवाः, अतिशयेन महाश्रवा महाश्रवतराः, 'चेवे'ति पूर्ववत्, तदेवं यतो महाकर्म्मतरा एव ततो महावेदनतरा एव, नरकेषु क्षेत्रस्वभावजाया अपि वेदनाया अतिदुःसहत्वात्, भगवानाह—हंता गो० 'ते णं जीवा महाकम्मतरा चेवे'त्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमी

मू. (१११) *पुढवीं ओगाहित्ता, नरगा संठाणमेव बाहल्लं।
विक्खंभपरिक्खेवे वण्णो गंधो य फासो य॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (११२) *तेसिं महालयाए उवमा देवेण होइ कायव्वा ।*
जीवा य पोग्गला वक्कमंति तह सासया निरया ॥

मू. (११३) *उववायपरीमाणं अवहारुच्चत्तमेव संघयणं ।*
संठाणवण्णगंधा फासा ऊसासमाहारे ।

मू. (११४) *लेसा दिट्ठी नाणे जोगुवओगे तहा समुग्घाया ।*
तत्तो खुहापिवासा विउव्वणा वेयणा य भए ॥

मू. (११५) *उववाओ पुरिसाणं ओवम्मं वेयणाए दुविहाए ।*
तत्तो खुहापिवासा विउव्वणा वेयणा य भए ॥

मू. (११६) *एयाओ संगहणिगाहाओ ।*

वृ. सम्प्रत्युद्देशकार्थसङ्ग्रहणिगाथाः प्राह–आसामक्षरमात्रगमनिका–प्रथमं 'पुढवीओ' इति पृथिव्योऽभिधेयास्तद्यथा–"कइ णं भंते ! पुढवीओ पन्नत्ताओ ?" इत्यादि । तदनन्तरम् 'ओगाहित्ता नरगा' इति, यस्यां पृथिव्यां यदवगाह्य यादृशाश्च नरकास्तदभिधेयं, यथा–"इमीसे णं भंते ! रयण० असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं केवइयं ओगाहित्ता" इत्यादि ।

ततो नरकाणां संस्थानं ततो बाहल्यं तदनन्तरं विष्कम्भपरिक्षेपौ ततो वर्णस्ततो गन्धस्तदन्तरं स्पर्शस्ततस्तेषां नरकाणां महत्तायामुपमा देवेन भवति कर्त्तव्या, ततो जीवाः पुद्गलाश्च तेषु नरकेषु व्युत्क्रमन्तीति, तथा शाश्वताशाश्वता नरका इति वक्तव्यं, तत उपपातो वक्तव्यः, तद्यथा– "इमीसे णं भंते ! रयणप्पभाए पुढवीए कतो उववज्जंति ?" इत्यादि, तत एकसमयेनोत्पद्यमानानां परिमाणं ततोऽपहारस्तत उच्चत्वं तदनन्तरं संहननं ततः संस्थानं ततो वर्णस्तदनन्तरं गन्धस्तः स्पर्शस्तत उच्छ्वासवक्तव्यता तदनन्तरमाहारस्ततो लेश्या ततो दृष्टिस्तदनन्तरं ज्ञानं ततो योगस्ततोऽप्युपयोगस्तदनन्तरं समुद्घातस्ततः क्षुत्पिपासे ततो विकुर्वणा, तद्यथा–

"रयणप्पभापुढविनेरइया णं भंते ! किं एगत्तं पभू विउव्वित्तए पुहुत्तं पहू विउव्वित्तए" इत्यादि, ततो वेदना ततो भयं तदनन्तरं पञ्चानां पुरुषाणामधःसप्तम्यामुपपातस्तत औपम्यं वेदनाया द्विविधायाः, उष्णवेदनायाः शीतवेदनायाश्चेत्यर्थः, ततः स्थितिर्वक्तव्या तदनन्तरमुद्वर्त्तना ततः स्पर्श पृथिव्यादिस्पर्शो वक्तव्यः, ततः सर्वजीवानामुपपातः, तद्यथा–

"इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि सव्वे पाणा सव्वे भूया" इत्यादि ॥ सम्प्रति तृतीय आरभ्यते, तत्र चेदमादिसूत्रम्–

तृतीया प्रतिपत्तौ नैरयिकस्य उद्देशकः २ समाप्तः

–: "नैरयिकः उद्देशकः–३ :–

मू. (११७) *इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरतिया केरिसयं पोग्गलपरिणामं पच्चणुभवमाणा विहरंति ?, गोयमा ! अनिट्ठं जाव अमणामं, एवं जाव अहेसत्तमाए एवं नेयव्वं*

वृ. 'रयणप्पभे'त्यादि, रत्नप्रभापृथिवीनैरयिका भदन्त ! कीदृशं 'पुद्गलपरिणामं' आहारादिपुद्गलविपाकं 'प्रत्यनुभवन्तः' प्रत्येकं वेदयमाना विहरन्ति ?, भगवानाह–गौतम ! अनिष्टमित्यादि प्राग्वत्, एवं प्रतिपृथिवि तावद्वक्तव्यं यावदधःसप्तमी, एवं वेदनालेश्यानामगोत्रारतिभयशोक- [illegible] ...भयाहारभयमैथुनपरिग्रहसंज्ञिसूत्राणि वक्तव्यानि,

अत्र सङ्ग्रहणिगाथे–

॥१॥ "पोग्गलपरिणामे वेयणा य लेसा य नाम गोए य
अरई भए य सोगे खुहा पिवासा य वाही य ॥

॥२॥ उस्सासे अनुतावे कोहे माणे य मायलोभे य।
चत्तारि य सण्णाओ नेरइयाणं तु परिणामे ॥

सम्प्रति सप्तमनरकपृथिव्यां य गच्छन्ति तान् प्रतिपादयति–इह परिग्रहसंज्ञा-परिणामवक्तव्यतायां चरमसूत्रं सप्तमनरकपृथ्वीविषयं तदनन्तरं चेयं गाथा ततः।

मू. (११८) *एत्थ किर अतिवयंती नरवसभा केसवा जलचरा य।*
मंडलिया रायाणो जे य महारंभकोडुंबी ॥

वृ. 'एत्थे' त्यनन्तरमुक्ताऽधःसप्तमी पृथिवी परामृश्यते, 'अत्र' अधःसप्तमनरकपृथिव्यां 'किल' इत्याप्तवादसूचने आप्तवचनमेतदिति भावः, 'अतिव्रजन्ति' अतिशयेन–बाहुल्येन गच्छन्ति नरवृषभाः 'केशवाः' वासुदेवाः 'जलचराश्च' तन्दुलमत्स्यप्रभृतयः 'माण्डलिकाः' वसुप्रभृतय इव 'राजानः' चक्रवर्त्तिनः सुभूमादय इव ये च महारम्भाः कुटुम्बिनः–कालसौकरिकादय इव।

मू. (११९) *भिन्नमुहुत्तो नरएसु होति तिरियमणुएसु चत्तारि।*
देवेसु अद्धमासो उक्कसे विउव्वणा भणिया ॥

वृ. सम्प्रति नरकेषु प्रस्तावात्तिर्यगादिषु चोत्तरवैक्रयावस्थानकालमानमाह–भिन्नः–खण्डो मुहूर्तो भिन्नमुहूर्तः अन्तर्मुहूर्त्तमित्यर्थः, नरकेषूत्कर्षतो विकुर्वणास्थितिकालः, तिर्यङ्मनुष्येषु चत्वार्यन्तर्मुहूर्त्तानि, देवेष्वर्द्धमास उत्कर्ष्तो विकुर्वणाऽवस्थानकालः भणितः एष उत्कर्षतो विकुर्वणाऽवस्थानकालो भणितस्तीर्थकरगणधरैः।

मू. (१२०) *जे पोग्गला अनिट्ठा नियमा सो तेसि होइ आहारो।*
संठाणं तु जहन्नं नियमा हुंडं तु नायव्वं ॥

वृ. सम्प्रति नरकेष्वाहारादिस्वरूपमाह–ये पुद्गला अनिष्टा नियमात्स तेषां भवत्याहारः, 'संस्थानंतु' संस्थानं पुनस्तेषां हुण्डं हुण्डमपि जघन्यमतिनिकृष्टमनिष्टं वेदितव्यं, एतच्च भवधारणीय-शरीरमधिकृत्य वेदितव्यम्, उत्तरवैक्रियसंस्थानस्याग्रे वक्ष्यमाणत्वात्, इयंच प्रागुक्तार्थसङ्ग्रहगाथा ततो न पुनरुक्तदोषः।

मू. (१२१) *असुभा विउव्वणा खलु नेरइयाणं तु होइ सव्वेसिं।*
वेउव्वियं सरीरं असंघयण हुंडसंठाणं ॥

वृ. सम्प्रति विकुर्वणास्वरूपमाह–सर्वेषां नैरयिकाणां विकुर्वणा 'खलु' निश्चितमशुभा भवति, यद्यपि शुभं विकुर्विष्याम इति ते चिन्तयन्ति तथाऽपि तथाविधप्रतिकूल-कर्मोदयतस्तेषामशुभैव विकुर्वणा 'खलु' निश्चितमशुभा भवति, यद्यपि शुभं विकुर्विष्याम इति ते चिन्तयन्ति तताऽपि तथाविधप्रतिकूलकर्मोदयतस्तेषाशुभैव विकुर्वणा भवति, तदपि च वैक्रियं–उत्तरवैक्रियशरीरमसंहननम्, अस्थ्यभावात्, उपलक्षणमेतत् भवधारणीयं च वैक्रियशरीरमसंहननं, तथा हुण्डसंस्थानं तत् उत्तरवैक्रियशरीरं, हुण्डसंसथाननाम्न एव भवप्रत्ययत उदयभावात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१२२) *अस्साओ उववन्नो अस्साओ चेव चयइ निरयभवं ।*
सव्वपुढवीसु जीवो सव्वेसु ठिइविसेसेसुं ॥

वृ. कश्चित् जीवः 'सर्वास्वपि पृथिवीषु' रत्नप्रभादिषु तमस्तमापर्यन्तासु सर्वेष्वपि च 'स्थितिविशेषेषु' जघन्यादिरूपेषु 'असातः' असातोदयकलित उपपन्नः, उत्पत्तिकालेऽपि प्राग्भवमरणकालानुभूतमहादुःखानुवृत्तिभावात्, उत्पत्यनन्तरमपि 'असात एव' असातोदयकलित एव सकलमपि निरयभवं 'त्यजति' क्षपयति, न तु जातुचिदपि सुखलेशमप्यास्वादयति ।

मू. (१२३) *उववाएण व सायं नेरइओ देवकम्मुणा वावि ।*
अज्झवसाणनिमित्तं अहवा कम्माणुभावेणं ॥

वृ. आह–किं तत्र कदाचित्सातोदयोऽपि भवति येनेदमुच्यते ?, उच्यते, भवति, तथा चाह–'उववाएण' इत्यत्र सप्तम्यर्थे तृतीया, उपपातकाले 'सातं' सातवेदनीयकर्मोदयं कश्चिद्वेदयते, यः प्राग्भवे दाघच्छेदादिव्यतिरेकेण मरणमुपगतोऽनतिसङ्क्लिष्टाध्यवसायी समुत्पद्यते, तदानीं हि न तस्य प्राग्भवानुबद्धमाधिरूपं दुःखं नापि क्षेत्रस्वभावजं नापि परमाधार्म्मिककृतं नापि परस्परोदीरितं तत एवंविधदुःखाभावादसौ सातं कश्चित् वेदयते इत्युच्यते ।

'देवकम्मुणा वावि' इति देवकर्म्मणा पूर्वसाङ्गतिकदेवप्रयुक्तया क्रियया, तथाहि–गच्छति पूर्वसाङ्गतिको देवः पूर्वपरिचितस्य नैरयिकस्य वेदनोपशमनार्थं यथा बलदेवः कृष्णवासुदेवस्य, स च वेदनोपशमो देवकृतो मनाक्कालमात्र एव भवति, तत ऊर्ध्वं नियमात्क्षेत्रस्वभावजाऽन्योऽन्या वा वेदना प्रवर्त्तते, तथास्वाभाव्यात्, ।

'अज्झवसाणनिमित्त' मिति अध्यवसानिमित्तं सम्यक्तोत्पादकाले तत ऊर्ध्वं कदाचित्तथाविधविशिष्टशुभाध्यवसायप्रत्ययं कश्चिद् नैरयिको बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽपि सातोदयमेवानुभवति, सम्यक्त्वोत्पादकाले हि जात्यन्धस्य चक्षुर्लाभ इव महान् प्रमोद उपजायते, तदुत्तरकालमपि कदाचितीर्थकरगुणानुमोदनाद्यनुगतां विशिष्टां भावनां भावयतः, ततो बाह्यक्षेत्रस्वभावजवेदनासद्भावेऽप्यन्तः सातोदयो विजृम्भमाणो न विरुध्यते ।

'अहवा कम्माणुभावेण' मिति अथवा 'कर्म्मानुभावेन' बाह्यतीर्थकरजन्मदीक्षाज्ञानापवर्ग्गकल्याणसंभूतिलक्षणबाह्यनिमित्तमधिकृत्य तथाविधस्य च सातवेदनीयस्य कर्म्मणोऽनुभावेन–विपाकोदयेन कश्चित्सातं वेदयते, न चैतद्वयाख्यानमनार्थं यत उक्तं वसुदेवचरिते ।

मू. (१२४) *नेरइयाणुप्पाओ उक्कोसं पंचजोयणसयाइं ।*
दुक्खेणभिदुयाणं वेयणसयसंपगाढाणं ॥

वृ. इह नैरयिकाः कुम्भ्यादिषु पच्यमानाः कुन्तादिभिर्भिद्यमाना वा भयोत्रस्तास्तथाविधप्रयत्नवशादूर्द्धमुत्प्लवन्ते, ततस्तदुत्पातपरिमाणप्रतिपादनार्थमाह–नैरयिकाणां दुःखेनाभिद्रुतानां–सर्वात्मना व्याप्तानां 'वेदनाशतसंप्रगाढानां' वेदनाशतानि–अपरिमिता वेदनाः संप्रगाढानि–अवगाढानि येषां ते वेदनाशतसंप्रगाढाः सुखादिदर्शनात् निष्ठान्तस्य परनिपातः, तेषां हेतुहेतुमद्भावश्चात्र, यतो वेदनाशतसंप्रगाढास्ततो दुःखेनाभिद्रुताः, तेषां जघन्यत उत्पातो गव्यूतमात्रम्, एतच्च संप्रदायादवसीयते, तथा च श्रयते कचिदेवमपि पाठः–"नेरइयाणुप्पाओ गाउय उक्कोस पंचजोयणसयाइं" इति, उत्कर्षतः पञ्च योजनशतानि इति ।

मू. (१२५) *अच्छिनिमीलियमेत्तं नत्थि सुहं दुक्खमेव पडिबद्धं ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नरए नेरइयाणं अहोनिसं पच्चमाणाणं ।

वृ. दुःखेनामिहतानामित्युक्तं ततो दुःखमेव निरूपयति—नरके नैरयिकाणामुष्णवेदनयता शीतवेदनया वाऽहर्निशं पच्यमानानां न 'अक्षिनिनीलनमात्रमपि' अक्षिनिकोचकालमात्रमपि अस्ति सुखं, किन्तु दुःखमेव केवलं 'प्रतिबद्धम्' अनुबद्धं सदाऽनुगतमिति भावः ।

मू. (१२६) *तेयाकम्मसरीरा सुहुमसरीरा य जे अपज्जत्ता ।*
जीवेण मुक्कमेत्ता वच्चंति सहस्ससो भेयं ॥

वृ. अथ यत्तेषां वैक्रयशरीरं तत्तेषां मरणकाले कथं भवति ? इति तन्निरूपणार्थमाह— तैजसकार्म्मणशरीराणि यानि 'सूक्ष्मशरीराणि' (च) सूक्ष्मनामकर्म्मोदयवतां पर्याप्तानामपर्याप्तानां चौदारिकशरीराणि वैक्रियाहारकशरीराणि च तेषामपि प्रायो मांसचक्षुरग्राह्यतया सूक्ष्मत्वात् तथा तानि 'अपर्याप्तानि' अपर्याप्तशरीराणि तानि जीवेन मुक्तमात्राणि सन्ति सहस्रशो भेदं व्रजन्ति विसकलितास्तत्परमाणुसङ्घाता भवन्तीत्यर्थः ।

मू. (१२७) *अतिसीतं अतिउण्हं अतितण्हा अतिखुहा अतिभयं वा ।*
निरए नेरइयाणं दुक्खसयाइं अविस्सामं ॥

मू. (१२८) *एत्त य भिन्नमुहुत्तो पोग्गल असुहा य होइ अस्साओ ।*
उववाओ उप्पाओ अच्छि सरीरा उ बोद्धव्वा ॥

वृ. एतासामेव गाथानां संग्राहिकां गाथामाह—'एत्थ' इति पदोपलक्षिता प्रथमा द्वितीया 'भिन्नमुहुत्तो' इति तृतीया 'पोग्गला' इति 'जे पोग्गला अणिट्ठा' इत्यादि चतुर्थी 'अशुभा' इति (जे) 'असुभा विउव्वणा खलु' इत्यादि, एवं शेषपदान्यपि भावनीयानि ॥

मू. (१२९) *से तं नेरतिया ॥*

वृ. तदेवमुक्तो नारकाधिकारः सम्प्रति तिर्यगधिकारो वक्तव्यः, तत्र चेदमादिसूत्रमं—

तृतीय प्रतिपत्तौ "नरयिकस्य" द्वितीय उद्देशकः समाप्तः

—: तिर्यंच योनिकः— उद्देशकः—१ :—

मू. (१३०) *से किं तं तिरिक्खजोणिया ?, तिरिक्खजोणिया पंचविधा पन्नत्ता, तंजहा—एगिंदियतिरिक्खजोणिया बेइंदियतिरिक्खजोणिया तेइंदियतिरिक्खजोणिया चउरिंदियतिरिक्खजोणिया पंचिंदियतिरिक्खजोणियाय ।*

से किं तं एगिंदियतिरिक्खजोणिया ?, २ पंचविहा पन्नत्ता, तंजहा— पुढविकाइ-एगिंदियतिरिक्खजोणिया जाव वणस्सइकाइयएगिंदियतिरिक्खजोणिया । से किं तं पुढविकाइयएगिंदियतिरिक्खजोणिया ?, २ दुविहा पन्नत्ता, तंजहा—सुहुमपुढविकाइयएगिंदि-यतिरिक्खजोणिया बादरपुढविकाइयएगिंदियतिरिक्खजोणिया य ।

से किं तं सुहुमपुढविकाइयएगिंदियतिरित० ? २ दुविहा प०, पज्जत्तसुहुम० अपज्जत्तसुहुम० से तं सुहुमा । से किं तं बादरपुढविकाइय० ?, २ दुविहा पन्नत्ता, तंजहा—पज्जत्तबादरपु० अपज्जत्त- बादरपु०, से तं बायरपुढविकाइयएगिंदिय० । से तं पुढवीकाइयएगिंदिया ।

से किं तं आउक्काइयगिंदिय० ?, २ दुविहा पन्नत्ता, एवं जहेव पुढविकाइयाणं तहेव, वाउकायभेदो एवं जाव वणस्सतिकाइया से तं वणस्सइकाएगिंदियतिरिक्ख० । से किं तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बेइंदियतिरि० एवं जाव चउरिंदिया।

से किं तं पंचेंदियतिरिक्खजोणिया ?, २ तिविहा पन्नत्ता, तंजहा–जलयरपंचेंदियतिरिक्खजोणिया थलयरपंचेंदियतिरिक्खजो० खहयरपंचेंदियतिरिक्खजोणिया।

से किं तं जलयरपंचेंदियतिरिक्खजोणिया ?, २ दुविहा पन्नत्ता, तंजहा–संमुच्छिमजलयरपंचेंदियतिरिक्खजोणिया य गब्भवक्कंतियजलयरपंचेंदियतिरिक्खजोणिया य। से किं तं संमुच्छिमजलयरपंचिंदियतिरिक्खजोणिता ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगसंमुच्छिम–अपज्जत्तगसंमुच्छिम० जलयरा, से तं संमुच्छिम० पंचिंदियतिरिक्ख०। से किं तं गब्भवक्कंतियजलयरपंचेंदियतिरिक्खजोणिया ?, २ दुविधा पन्नत्ता, तंजहा–पज्जत्तगगब्भवक्कंतिय० अपज्जत्तगब्भ० से तं गब्भवक्कंतियजलयर०, से तं जलयरपंचेंदियतिरि०।

से किं तं थलयरपंचेंदियतिरिक्खजोणिता ?, २ दुविधा पन्नत्ता, तंजहा–चउप्पयथलयरपंचेंदिय० परिसप्पथलयरपंचेंदियतिरिक्खजोणिता। से किं तं चउप्पदथलयरपंचिंदिय० ? चउप्पय० दुविहा पन्नत्ता, तंजहा–संमुच्छिमचउप्पयथलयरपंचेंदिय० गब्भवक्कंतियचउप्पयथलयरपंचेंदियतिरिक्खजोणिता य, जहेव जलयराणं तहेव चउक्कतो भेदो, सेत्तं चउप्पदथलयरपंचेंदिय०। से किं तं परिसप्पथलयरपंचेंदियतिरिक्ख० ?, २ दुविहा पन्नत्ता, तंजहा–उरगपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता भुयगपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता। से किं तं उरगपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता ?, उरगपरि० दुविहा पन्नत्ता, तंजहा–जहेव जलयराणं तहेव चउक्कतो भेदो, एवं भुयगपरिसप्पाणवि भाणितव्वं, से तं भुयगपरिसप्पथलयरपंचेंदियतिरिक्खजोणिता, से तं थलयरपंचेंदियतिरिक्खजोणिता।

से किं तं खहयरपंचेंदियतिरिक्खजोणिया ? खह० २ दुविहा प०, संमुच्छिमखहयरपंचेंदियतिरिक्खजोणिता गब्भवक्कतियखहयरपंचेंदियतिरिक्खजोणिता य। से किं तं संमुच्छिमखहयरपंचेंदियतिरिक्खजोणिता ? संमु० २ दुविहा प०– पज्जत्तगसंमुच्छिमखहयरपंचेंदियतिरिक्खजोणिया अपज्जत्तगसंमुच्छिमखहयरपंचेंदियतिरिक्खजोणिया य, एवं गब्भवक्कंतियावि जाव पज्जत्तगगब्भवक्कतियावि जाव अपज्जत्तगगब्भवक्कंतियावि खहयरपंचेंदियतिरिक्खजोणियाणं भंते कतिविधे जोणिसंगहे पण्णत्ते ?, गोयमा ! तिविहे जोणिसंगहगे प०–अंडया पोयया संमुच्छिमा, अंडया तिविधा प०–इत्थी पुरिसा नपुंसगा, पोतया तिविधा प०–इत्थी पुरिसा नपुंसया, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसका॥

वृ. 'से किं त' मित्यादि, अथ के ते तिर्यग्योनिकाः ?, सूरिराह–तिर्यग्योनिकाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा–एकेन्द्रिया इत्यादि सूत्रं प्रायः सुगमं केवलं भूयान् पुस्तकेषु वाचनाभेद इति यथाऽवस्थितवाचनाक्रमप्रदर्शनार्थमक्षरसंस्कारमात्रं क्रियते–एकेन्द्रिया यावत्पञ्चेन्द्रियाः।

अथ के ते एकेन्द्रियाः ?, एकेन्द्रियाः पञ्चविधाः प्रज्ञप्ताः, तद्यथा–पृथिवीकायिका यावद्वनस्पतिकायिकाः। अथ के ते पृथिवीकायिकाः ?, पृथिवीकायिका द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च। अथ के ते सूक्ष्मपृथिवीकायिकाः ?, सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्तास्तद्यथा–पर्याप्तका अपर्याप्तकाश्च। अथ के ते बादरपृथिवीकायिकाः ?, बादरपृथिवीकायिका द्विविधाः प्रज्ञप्तास्तद्यथा–पर्याप्तका अपर्याप्तकाश्च, एवं तावद्वक्तव्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावद्वनस्पतिकायिकाः । अथ के ते द्वीन्द्रियाः ?, द्वीन्द्रिया द्विविधाः प्रज्ञप्ताः–पर्याप्तका अपर्याप्तकाश्च, एवं त्रीन्द्रियचतुरिन्द्रिया अपि वक्तव्याः ।

अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः, पञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्तास्तद्यथा–जलचराः स्थलचराः खचराश्च । अथ के ते जलचराः ?, जलचरा द्विविधाः प्रज्ञप्तास्तद्यथा–संमूर्च्छिमा गर्भव्युत्क्रान्तिकाश्च । अथ के ते संमूर्च्छिमाः ?, संमूर्च्छिमा द्विविधाः प्रज्ञप्तास्तद्यथा–पर्याप्तका अपर्याप्तकाश्च । अथ के ते गर्भव्युत्क्रान्तिकाः ?, द्विविधाः प्रज्ञप्तास्तद्यथा–पर्याप्तका अपर्याप्तकाश्च, एवं चतुष्पदा उरःपरिसर्प्पा भुजपरिसर्पा पक्षिणश्च प्रत्येकं चतुष्प्रकारा वक्तव्याः

सम्प्रति पक्षिणां प्रकारान्तरेण भेदप्रतिपादनार्थमाह–'पक्खिणं (खहयरपंचिंदियतिरि०) भंते !' भगवानाह–गौतम ! त्रिविधो योनिसङ्ग्रहः प्रज्ञप्तस्तद्यथा–अण्डजा–मयूरादयः पोतजा–वागुल्यादयः संमूर्च्छिमाः खञ्जरीटादयः, अण्डजास्त्रिविधाः प्रज्ञप्तास्तद्यथा–स्त्रियः पुरुषा नपुंसकाश्च, पोतजास्त्रिविधाः प्रज्ञप्तास्तद्यथा–स्त्रियः पुरुषा नपुंसकाश्च, तत्र येते संमूर्च्छिमास्ते सर्वे नपुंसकाः, संमूर्च्छिमानावश्यं नपुंसकवेदोदयभावात् ॥

मू. (१३१) *एतेसि णं भंते ! जीवाणं कति लेसाओ पन्नत्ताओ ?, गोयमा ! छल्लेसाओ प० तं० कण्हलेसा जाव सुक्कलेसा ।। ते णं भंते ! जीवा किं सम्मदिट्ठी मिच्छदिट्ठी सम्मामिच्छदिट्ठी गोयमा ! सम्मदिट्ठीवि मिच्छदिट्ठीवि सम्मामिच्छदिट्ठीवि सम्मामिच्छदिट्ठीवि*

ते णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि तिन्नि नानाइं तिन्नि अन्नाणाइं भयणाए ।। ते णं भंते ! जीवा किं मणजोगी वइजोगी कायजोगी ?, गोयमा ! तिविधावि। ते णं भंते जीवा किं सागारोवउत्ता अणागारोवउत्ता ?, गो० ! सागारोवउत्तावि अनागारोवउत्तावि ते णं भंते ! जीवा कओ उववज्जंति किं नेरतिएहिंतो उव० तिरिक्खजोणिएहिंतो उव० ?, पुच्छा, गोयमा ! असंखेज्जवासाउयअकम्मभूमगअंतरदीवगवज्जेहिंतो उववज्जंति ।

तेसि णं भंते ! जीवाणं केवतियं कालं ठिती पन्नत्ता, ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पलिओवमस्स असंखेज्जतिभागं ।। तेसि णं भंते ! जीवाणं कति समुग्घाता पन्नत्ता ?, गोयमा ! पंच समुग्घाता पन्नत्ता, तंजहा–वेदणासमुग्घाए जाव तेयासमुग्घाए ।। ते णं भंते ! जीवा मारणांतियसमुग्घाएणं किं समोहता मरंति असमोहता मरंति ?, गोयमा ! समोहतावि म० असमोहयावि मंति । ते णं भंते ! जीवा अनंतरं उव्वट्टित्ता कहिं गच्छंति ? कहिं उववज्जंति ?–किं नेरतिएसु उववज्जंति ? तिरिक्ख० पुच्छा, गोयमा ! एवं उव्वट्टणा भाणियव्वा जहा वक्कंतीए तहेव ।। तेसि णं भंते ! जीवाणं कति जातीकुलकोडिजोणिपमुहसयसहस्सा पन्नत्ता ?, गोयमा ! बारस जातीकुलकोडीजोणीपमुहसयसहस्सा ।

भुयगपरिसप्पथलयरपंचेंदियतिरिक्खजोणियाणं भंते ! कतिविधे जोणीसंगहे पन्नत्ते ?, गोयमा ! तिविहे जोणीसंगहे पन्नत्ते, तंजहा–अंडगा पोयगा संमुच्छिमा, एवं जहा खहयराणं तहेव, नाणत्तं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता दोच्चं पुढविं गच्छंति, नव जातीकुलकोडीजोणीपमुहसतसहस्सा भवंतीति मक्खायं, सेसं तहेव ।।

उरगपरिसप्पथलयरपंचेंदियतिरिक्खजोणियाणं भंते ! पुच्छा, जहेव भुयगपरिसप्पाणं तहेव, नवरं ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, उव्वट्टित्ता जाव पंचमिं पुढविं गच्छंति, दस जातीकुलकोडी ।। चउप्पयथलयरपंचेंदियतिरिक्ख० पुच्छा, गोयमा ! दुविधे पन्नत्ते, तंजहा–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जराउया (पोयया) य संमुच्छिमा य, (से किं तं) जराउया (पोयया) ?, २ तिविधा पन्नत्ता, तंजहा–इत्थी पुरिसा नपुंसका, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसया।

तेसि णं भंते ! जीवाणं कति लेस्साओ पन्नत्ताओ ?, सेसं जहा पक्खीणं, नाणत्तं ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं, उव्वट्टित्ता चउत्थिं पुढविं गच्छंति, दस जातीकुलकोडी॥ जलयरपंचेंदियतिरिक्खजोणियाणं पुच्छा, जहा भुयगपरिसप्पाणं नवरं उव्वट्टित्ता जाव अधेसत्तमं पुढविं अद्धतेरस जातीकुलकोडीजोणीपमुह० जाव प०।

चउरिंदियाणं भंते ! कति जातीकुलकोडीजोणीपमुहसतसहस्सा प० ?, गोयमा ! नव जाईकुलकोडीजोणीपमुहसयसहस्सा [जाव] समक्खाया। तेइंदियाणं पुच्छा, गो० ! अट्ठाजाईकुल जावमक्खाया। बेइंदियाणं भंते ! कइ जाई० ?, पुच्छा, गो० ! सत्त जाईकुल-कोडीजोणीपमुह०

वृ. ''एएसि ण''मित्यादि, 'एतेषां' पक्षिणां भदन्त ! जीवानां कति लेश्याः प्रज्ञप्ताः ?, भगवानाह–गौतम ! षड् लेश्याः प्रज्ञप्ताः, तद्यथा कृष्णलेश्या यावत् शुक्ललेश्या, तेषां द्रव्यतो भावतो वा सर्वा लेशयाः, परिणामसम्भवात्॥ 'ते णं भंते !' इत्यादि, ते भदन्त ! पक्षिणो जीवाः किं सम्यग्दष्टयो मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टयश्च ?, भगवानाह–गौतम ! त्रिविधा अपि 'ते णं भंते !' इत्यादि, ते भदन्त ! जीवाः किं ज्ञानिनोऽज्ञानिनः ?, भगवानाह–गौतम ! द्वयेऽपि, ज्ञानिनोऽज्ञानिनोऽपीत्यर्थः, तत्र ये ज्ञानिनस्ते द्विज्ञानिनस्त्रिज्ञानिनो वा येऽप्यज्ञानिनस्तेऽपि द्वयज्ञानिनयस्त्र्यज्ञानिनो वा।

'ते ण'मित्यादि, ते भदन्त ! जीवाः किं मनोयिगनो वाग्योगिनः काययोगिनः ?, भगवानाह–गौतम ! त्रयोऽपि॥ 'ते णं भंते !' इत्यादि, ते भदन्त ! जीवाः किं साकारोपयुक्ता अनाकारोपयुक्ताः ?, भगवानाह–द्वयेऽपि, साकारोपयुक्ता अनाकारोपयुक्ताश्चेत्यर्थः।

'ते णं भंते !' इत्यादि, ते भदन्त ! पक्षिणो जीवाः कुत उत्पद्यन्ते ? नेरयिकेभ्य इत्यादि यथा प्रज्ञापनायां व्युत्क्रान्तिपदे तथा द्रष्टव्यम्॥ 'तेसि ण'मित्यादि, तेषां भदन्त ! पक्षिणां कियन्तं कालं स्थिति प्रज्ञप्ता ?, भवगानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासङ्ख्येयभागः 'तेसि ण'मित्यादि, तेषां भदन्त ! जीवानां कति समुद्घाताः प्रज्ञप्ताः ?, भगवानाह–गौतम ! पञ्च समुद्घाताः प्रज्ञप्ताः, तद्यथा–वेदनासमुद्घातः कषायसमुद्घातो मारणान्तिकसमुद्घातो वैक्रियसमुद्घातस्तैजससमुद्घातश्च॥ 'ते णं भंते !' इत्यादि, ते भदन्त ! जीवा मरणान्तिक-समुद्घातेन किं समवहता म्रियन्ते असमवहता म्रियन्ते ?, भगवानाह–गौतम ! समवहता अपि म्रियन्ते असमहवहात अपि म्रियन्ते।

'ते णं भंते !' इत्यादि, ते भदन्त ! जीवा अनन्तरमुद्वृत्य क्वगच्छन्ति ?, एतदेव व्याचष्टे–'एवं उव्वट्टणा' इत्यादि, यथा द्विविधप्रतिपत्तौ तथा द्रष्टव्यम्॥ 'तेसि ण'मित्यादि, तेषां भदन्त ! जीवानां 'कति' किंप्रमाणानि जातिकुलकोटीनां योनिप्रमुखाणि–योनिप्रवाहानि शतसहस्राणि योनिप्रमुखशतसहस्राणि जातिकुलकोटियोनिप्रमुखशतसहस्राणि भवन्ति ?, भगवानाह–द्वादश जातिकुलकोटीयोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि, तत्र जातिकुलयोनीनामिदं परिस्थूरमुदाहरणं पूर्वाचार्यैरुपादर्शि–जातिरिति किल तिर्यग्जातिस्तस्याः कुलानि–कृमिकीटवृश्चिकादीनि, इमानि च कुलानि योनिप्रमुखाणि, तथाहि–एकस्यामेव योनौ अनेकानि कुलानि भवन्ति, तथाहि–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छगणयोनौ कृमकुलं कीटकुलं वृश्चिककुलमित्यादि, अथवा जातिकुलमित्येकं पदं, जातिकुलयोन्योश्च परस्परं विशेषः एकस्यामेव योनावनेकजातिकुलसम्भवात् । तद्यथा—एकस्यामेव छगणयोनौ कृमिजातिकुलं कीटजातिकुलं वृश्चिकजातिकुलमित्यादि, एवं चैकस्यामेव योनाववान्तर-जातिभेदभावादनेकानि योनिप्रवाहाणि जातिकुलानि संभवन्तीत्युपपद्यते, खचरपञ्चेन्द्रियति-र्यग्योनिजानां द्वादश जातिकुलकोटिशतसहस्राणि, अत्र सङ्ग्रहणिगाथा—

॥ १ ॥ "जोणीसंगहेस्सादिट्ठी नाणे य जोग उवओगे ।
उववायठिईसमुग्घाय चयणं जाई कुलविही उ ॥"

अस्या अक्षरगमनिका—प्रथमं योनिसङ्ग्रहद्वारं ततो लेश्याद्वारं ततो दृष्टिद्वारमित्यादि । 'भुयगाणं भंते!' इत्यादि, भुजगानां भदन्त! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः ?, इत्यादि पक्षिवत् सर्वं—निरवशेषं वक्तव्यं, नवरं स्थितिच्यवनकुलकोटिषु नानात्वं, तद्यथा—स्थितिर्जघन्येना-न्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, च्यवनम्—उद्वर्त्तना, तत्र नरकगतिचिन्तायामधो यावद्द्वितीया पृथिवी उपरि यावत्सहस्रारः कल्पस्तावदुत्पद्यते, नव तेषां जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि । एवमुरःपरिसर्पाणामपि वक्तव्यं, नवरं तत्र च्यवनद्वारेऽधश्चिन्तायां यावत्पञ्चमी पृथिवीति वक्तव्यं, कुलकोटिचिन्तायां दश जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि ।

'चउप्पयाण'मित्यादि, चतुष्पदानां भदन्त! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः ?, भगवानाह—गौतम! द्विविधो योनिसङ्ग्रहः प्रज्ञप्तः, तद्यथा—पोतजाः संमूर्च्छिमाश्च, इह येऽण्डजव्यतिरिक्ता गर्भव्युत्क्रान्तास्ते सर्वे जरायुजा अजरायुजा वा पोतजा इति [पूर्वमपि विवक्षिताः परमत्र तु सर्वेऽपि गर्भव्युत्क्रान्तिकाः पोतजतया] विवक्षितमतोऽत्र द्विविधो यथोक्तस्वरूपो योनिसङ्ग्रह उक्तः, अन्यथा गवादीनां जरायुजत्वात् तृतीयोऽपि जरायु लक्षणो योनिसङ्ग्रहो वक्तव्यः स्यादिति, तत्र ये ते पोतजास्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा—स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः, शेषद्वारकलापः पूर्ववत्, नवरं स्थितिर्जघन्येनान्तर्मुहूर्त्त-मुत्कर्षतस्त्रिणि पल्योपमानि, च्यवनद्वारेऽधश्चिन्तायां यावच्चतुर्थी पृथिवी ऊर्ध्वं यावत्सहस्रारः, जातिकुलकोटियोनिप्रमुख-शतसहस्रण्यत्रापि दश । 'जलचराणा'मित्यादि, जलचराणां भदन्त ! कतिविधो योनिसङ्ग्रहः प्रज्ञप्तः ?, भगवानाह— गौतम ! त्रिविधो योनिसङ्ग्रहः प्रज्ञप्तः, तद्यथा—अण्डजाः पोतजाः संमूर्च्छिमाश्च, अण्डजास्त्रिविधाः प्रज्ञप्ताः, तद्यथा—स्त्रियः पुरुषा नपुंसकाश्च, पोतजास्त्रिविधाः प्रज्ञप्ताः, तद्यथा—स्त्रियः पुरुषा नपुंसकाश्च, तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः, शेषद्वारकला-पचिन्ता प्राग्वत्, नवरं स्थितिच्यवन-जाति-कुलकोटिषु नानात्वं, स्थितिर्जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पूर्वकोटी, च्यवनद्वारेऽधश्चिन्तायां यावत्सप्तमी ऊर्ध्वं यावत्सहस्रारः, कुलकोटियोनिप्रमुख-शतसहस्राणि अर्द्धत्रयोदश सार्द्धानि द्वादशेत्यर्थः ।

'चउरिंदियाण'मित्यादि चतुरिन्द्रियाणां भदन्त ! कति जातिकुलकोटियोनिप्रमुखशत-सहस्राणि प्रज्ञप्तानि ?, भगवानाह नव जातिकुलकोटियोनिप्रमुखशतसहस्राणि प्रज्ञप्तानि, एवं त्रीन्द्रियाणामष्टौ जातिकुलकोटियोनिप्रमुखशतसहस्राणि, द्वीन्द्रियाणां सप्त जातिकुलकोटियोनि-प्रमुखशतसहस्राणि प्रज्ञप्तानि । इह जातिकुलकोटयो योनिजातीयास्ततो भिन्नजातीयाभिधानप्रसङ्गतो गन्धाङ्गानि भिन्नजातीयत्वात् प्ररूपयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१३२) कइ णं भंते! गंधा पन्नत्ता? कइ णं भंते! गंधसया पन्नत्ता?, गोयमा! सत्त गंधा सत्त गंधसया पन्नत्ता ॥ कइ णं भंते! पुप्फजाई कुलकोडीजोणिपमुहसयसहस्सा पन्नत्ता?, गोयमा! सोलसपुप्फजातीकुलकोडीजोणीपमुहसयसहस्सा पन्नत्ता, तंजहा–चत्तारि जलयराणं चत्तारि थलयराणं चत्तारि महारुक्खियाणं चत्तारि महागुम्मिताणं।

कति णं भंते! वल्लीओ कति वल्लिसता पन्नत्ता?, गोयमा! चत्तारि वल्लीओ चत्तारि वल्लीसता पन्नत्ता ॥ कति णं भंते! लताओ कति लतासता पन्नत्ता?, गोयमा! अट्ठ लयाओ अट्ठ लतासता प० । कति णं भंते! हरियकाया हरियकायसया प० गो० तओ हरियकाया तओ हरियकायसया पन्नत्ता, फलसहस्सं च बिंटबद्धाणं फलसहस्सं च णालबद्धाणं, ते सव्वे हरितकायमेव समोयरंति, ते एवं समणुगम्ममाणा २ एवं समणुगाहिज्जमाणा २ एवं समणुपेहिज्जमाणा २ एवं समणुचिंतिज्जमाणा २ एएसु चेव दोसु काएसु समोयरंति, तंजहा–

तसकाए चेव थावरकाए चेव, एवमेव सपुव्वावरेणं आजीवियदिट्ठंतेणं चउरासीति जातिकुलकोडीजोणीपमुहसतसहस्सा भवंतीति मक्खाया ॥

वृ. 'कइ ण'मित्यादि, कति भदन्त! गन्धाङ्गानि, क्वचिद् गन्धा इति पाठस्तत्र पदैकदेशे पदसमुदायोपचाराद् गन्धा इति गन्धाङ्गनीति द्रष्टव्यं प्रज्ञप्तानि?, तता कति गन्धाङ्गशतानि प्रज्ञप्तानि?, भगवानाह–गौतम! सप्त गन्धाङ्गानि सप्त गन्धाङ्गशतानि प्रज्ञप्तानि, इह सप्त गन्धङ्गानि परिस्तूरजातिभेदादमूनि, तद्यथा–मूलं त्वक् काष्ठं निर्यासः पत्रं पुष्पं फलं च, तत्र मूलं मुस्तावालुकोशीरादि, त्वक् सुवर्णछल्लीत्वचाप्रभृति, काष्ठं चन्दनागुरुप्रभृति, निर्यासः कर्पूरादि, पत्रं जातिपत्रतमालपत्रादि, पुष्पं प्रियङ्गुनागरपुष्पादि, फलं जातिफलकर्कोलकैलालवङ्गप्रभृति।

एते च वर्णमधिकृत्य प्रत्येकं कृष्णादिभिदात्पञ्चपञ्चभेदा इति वर्णपञ्चकेन गुण्यन्ते जाताः पञ्चत्रिंशत्, गन्धचिन्तायामेते सुरभिगन्धय एवेत्येकेन गुणिताः पञ्चत्रिंशत् जाताः पञ्चत्रिंशदेव 'एकेन गुणितं तदेव भवती'ति न्यायात्, तत्राप्येकैकस्मिन् वर्णभेदे रसपञ्चकं द्रव्यभेदेन विविक्तं प्राप्यते इति सा पञ्चत्रिंशत् रसपञ्चकेन गुण्यते जाताः पञ्चसप्ततिशतं, स्पर्शाश्च यद्यप्यष्टौ भवन्ति तथाऽपि गन्धाङ्गेषु यथोक्तरूपेषु प्रशस्या व्यवहारतश्चत्वार एव मृदुलघुशीतोष्णरूपास्ततः पञ्चसप्ततं शतं स्पर्शचतुष्टयेन गुण्यते जातानि सप्त शतानि, उक्तञ्च–

॥ १ ॥ "मूलतयकट्ठनिज्जासपत्तपुप्फफलमेय गंधंगा।
वण्णादुत्तरभेया गंधंगसया मुणेयव्वा ॥

अस्य व्याख्यानरूपं गाथाद्वयम्–

॥ १ ॥ "मुत्थासुवण्णछल्ली अगुरू वाला तमालपत्तं च।
तह य पियंगू जाईफलं च जाईए गंधगा ॥

॥ २ ॥ गुणणाए सत्त सया पंचहिं वण्णेहिं सुरभिगंधेणं।
रसपणएणं तह फासेहि य चउहिं मित्ते (पसत्थे) हि ॥

अत्र 'जाईए गंधंगा' इति जात्या जातिभेदेनामूनि गन्धाङ्गानि, सेषं भावितम् ॥ 'कइ ण'मित्यादि, कति भदन्त! पुष्पजातिकुलकटिशतसहस्राणि प्रज्ञप्तानि?, भगवानाह–गौतम! षोडश पुष्पजातिकुलकोटिशतसहस्राणि प्रज्ञप्तानि, तद्यथा–चत्वारि 'जलजानां' पद्मानां जातिभेदेन,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा चत्वारि 'स्थलजानां' कोरण्टकादीनां जातिभेदेन, चत्वारि महागुल्मिकादीनां जात्यादीनां, चत्वारि 'महावृक्षाणां' मधुकादीनामिति ।

'कइ णं'मित्यादि, कति भदन्त ! वल्लयः ? कति वल्लिशतानि प्रज्ञप्तानि ?, भगवानाह—गौतम ! चतस्रो वल्लयस्त्रपुष्यादिमूलभेदेन, ताश्च मूलटीकाकृता वैविक्त्येन व्याख्याता इति संप्रदायादवसेयाः, चत्वारि वल्लिशतान्येवावान्तरजातिभेदेन ।। 'कइण'मित्यादि, कति भदन्त ! लताः कति लताशतानि प्रज्ञप्तानि ?, भगवानाह—गौतम ! अष्टौ लता या मूलभेदेन ता अपि संप्रदायादवसातव्याः, मूलटीकाकारेणाव्याख्यानात्, अष्टौ लताशतानि प्रज्ञप्तानि, अवान्तरजातिभेदेन ।

'कइ ण'मित्यादि, कति भदन्त ! हरितकायाः कति हरितकायशतानि प्रज्ञमानि ?, भगवानाह—गौतम ! त्रयो हरितकायाः प्रज्ञप्ताः—जलजाः स्थलजा उभयजाः, एकैकस्मिन् शतमवान्तभेदानामिति, त्रीणि हरितकायशतानि । 'फलसहस्सं चे'त्यादि, फलसहस्रं च 'वुन्तबन्धानां' वृन्ताकप्रभृतीनां फलसहस्र च नालबद्धानां, 'तेऽवि सव्वे' इत्यादि, तेऽपि सर्वे भेदा अपिशब्दादन्येऽपि तथाविधाः 'हरितकायमेव समवतरन्ति' हरितकयेऽन्तर्भवन्ति हरितकायोऽपि वनस्पतौ वनस्पतिरपि स्थावरेषु स्थावरा अपि जीवेषु, तत एवं समनुगम्यमाना २ स्तथा जात्यन्तर्भाविन स्वत एव सूत्रतः, तथा समनुग्राह्यमाणाः समनुग्राह्यमाणाः परेण सूत्रत एव, तथा समनुप्रेक्ष्यमाणाः समनुप्रेक्ष्यमाणा अनुप्रेक्षया अर्थालोचनरूपया, तथा समनुचिन्त्यमानाः समनुचिन्त्यमानास्तथा तथा तन्त्रयुक्तिभि, एतयोरेव द्वयोः काययोः समवतरन्ति, तद्यथा—

त्रसकाये च स्थावरकाये च, 'एवामेव' इत्यादि, 'एवमेव' उक्तेनैव प्रकारेण 'सपुव्वावरेणं' पूर्वं चापरं च पूर्वापरं सह पूर्वापरं येन स सपूर्वापरः उक्तप्रकारस्तेन, उक्तविषयपौर्वापर्यालोचनयेति भावार्थ, 'आजीवगदिट्ठंतेणं'ति आ—सकलजगदभिव्याप्तया जीवानां यो दृष्टान्तः—परिच्छेदः स आजीवदृष्टान्तस्तेन सकलजीवदर्शनेनेत्यर्थः, आह च मूलटीकाकारः—

''आजीवदृष्टान्तेन सकलजीवनिदर्शनेने''ति, चतुरशीतिजातिकुलकोटियोनिप्रमुखशतसहस्राणि भवन्तीत्याख्यातं मयाऽन्यैश्च ऋषभादिभिरिति, अत्र चतुरशीतिसङ्ख्योपादानमुपलक्षणं, तेनान्यान्यपि जातिकुलकोटियोनिप्रमुखशतसहस्राणि वेदितव्यानि, तथाहि—पक्षिणां द्वादश जातिकुलकोटियोनिप्रमुखशतसहस्राणि भुजगपरिसर्पाणां नव उरगपरिसर्पाणां दश चतुष्पदानां दश जलचराणामर्द्धत्रयोदशानि चतुरिन्द्रियाणां नव त्रीन्द्रियाणामष्टौ द्वीन्द्रियाणां सप्त पुष्पजातीनां षोडश, एतेषां चैकत्र मीलने त्रिनवतिजातिकुलकोटियोनिप्रमुखशतसहस्राणि सार्द्धानि भवन्ति, ततश्चतुरशीतिसङ्ख्योपादानमुपलक्षणमवसेयं, न चैतद् व्याख्यानं स्वमनीषिकाविजृम्भितं ।

यत उक्तं चूर्णौ—'आजीवगदिट्ठंतेणं'ति अशेषजीवनिदर्शनेन चउरासीजातिकुलकोडियोनिप्रमुखशतसहस्रा एतत्प्रमुखा अन्येऽपि विद्यन्ते इति ।। कुलकोटिचारणे विशेषाधिकाराद्विमानान्यप्यधिकृत्य विशेषप्रश्नमाह—

मू. (१३३) *अत्थि णं भंते ! विमाणाइं सोत्थीयाणि सोत्थियावत्ताइं सोत्थियपभाइं सोत्थियकंताइं सोत्थियवन्नाइं सोत्थियलेसाइं सोत्थियज्झयाइं सोत्थिसिंगाराइं सोत्थिकूडाइं सोत्थिसिट्ठाइं सोत्थुत्तरवडिंसगाइं ?, हंता अत्थि ।*

ते णं भंते ! विमाणा केमहालता प० ? गोयमा ! जावतिए णं सूरिए उदेति जावइएणं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूरिए अत्थमति एवतिया तिन्नोवासंतराइं अत्थेगतियस्स देवस्स एगे विक्कमे सिता, से णं देवे ताए उक्किट्ठाए तुरियाए जाव दिव्वाए देवगतीए वीतीवयमाणे २ जाव एकाहं वा दुयाहं वा उक्कोसेणं छम्मासा वितीवएज्ञा, अत्थेगतिया विमाणं वितीवइज्ञा अत्थेगतिया विमाणं नो वीतीवएज्ञा, एमहालता णं गोयमा ! ते विमाणा पन्नत्ता।

अत्थि णं भंते ! विमाणाइं अच्चीणि अच्चिरावत्ताइं तहेव जाव अच्चुत्तरवडिंसगातिं ?, हंता अत्थि, ते विमाणा केमहालता पन्नत्ता ?, गोयमा ! एवं जाह सोत्थी (याइ)णि नवरं एवतियाइं पंच उवासंतराइं अत्थेगतियस्स देवस्स एगे विक्कमे सिता सेसं तं चेव।

अत्थि णं भंते ! विमाणाइं कामाइं कामावत्ताइं जाव कामुत्तरवडिंसयाइं ?, हंता अत्थि, ते णं भंते ! विमाणा केमहालया पण्णत्ता ?, गोयमा ! जहा सोत्थीणि णवरं सत्त उवासंतराइं विक्कमे सेसं तहेव। अत्थि णं भंते ! विमाणाइं विजयाइं वेजयंताइं जयंतां अपराजिताइं ?, हंता अत्थि, ते णं भंते ! विमाणा के० ?, गोयमा ! जावतिए सूरिए उदेइ एवइयाइं नव ओवासंतराइं, सेसं तं चेव, नो चेव णं ते विमाणे वीईवएज्ञा एमहालया णं विमाणा पन्नत्ता, समणाउसो ! ॥

वृ. 'अत्थि णं भंते' इत्यादि, अस्तीति निपातो बह्वर्थे 'सन्ति' विद्यन्ते णमिति वाक्यालङ्कारे 'विमानानि' विशेषतः पुण्यप्राणिभिर्मन्यन्ते–तद्गतसौख्यानुभवनेनानुभूयन्ते इति विमानानि, तान्येव नामग्राहमाह–अर्चीषि–अर्चिर्नामानि, एवमर्चिरावर्त्तानि अर्चिप्रमाणि अर्चिकान्तानि अर्चिर्वर्णानि अर्चिर्लेश्यानि अर्चिर्ध्वजानि अर्चिश्रृङ्गा(राणि) अर्चिसृ(शि)ष्टानि अर्चिकूटानि अर्चिरुत्तरावतंसकानि सर्वसङ्ख्यया एकादश नामानि, भगवानाह–'हंता अत्थि' हंतेति प्रत्यवधारणे अस्तीति निपातो बह्वर्थे सन्त्येवैतानि विमानानीति भावः।

'केमहालया ण'मित्यादि, किंमहान्ति कियत्प्रमाणमहत्वानि णमिति पूर्ववत् भदन्त ! तानि विमानानि प्रज्ञप्तानि ?, भगवानाह–गौतम ! 'जाव य उएइ सूरो' इत्यादि, जम्बूद्वीपे सर्वोत्कृष्टे दिवसे सर्वाभ्यन्तरे मण्डले वर्त्तमानः सूर्यो यावति क्षेत्रे उवदेति यावति च क्षेत्रे सूर्योऽस्तमुपयाति, एतावन्ति त्रीणि अवकाशान्तराणि, उदयास्तमितप्रमितमधिकृतं क्षेत्रं त्रिगुणमित्यर्थ,: अस्त्येतद्–बुद्ध्या परिभावनीयसेतद् यथैकस्य विवक्षितस्य देवस्यैको विक्रमः स्यात्, तत्र जम्बूद्वीपे सर्वोत्कृष्टे दिवसे सूर्य उदेति सप्तचत्वारिंशत्सहस्राणि द्वे शते त्रिषष्ट्यधिके योजनानामेकस्य च योजनस्यैकविंशति षष्टिभागा एतावति क्षेत्रे, उक्तश्च–

॥१॥ "सीयालीससहस्सा, दोण्णि सया जोयणाण तेवट्ठी।
इगवीस सट्ठिभागा कक्कडमाइंमि पेच्छ नरा॥"

एतावत्येव क्षेत्रे तस्मिन् सर्वोत्कृष्टे दिवसेऽस्तमुपयाति, तत एतत्क्षेत्रं द्विगुणीकृतमुदयास्तापान्तरालप्रमाणं भवति, तच्चैतावत्–चतुर्नवति सहस्राणि पञ्च शतानि षड्शत्यधिकानि योजनानामेकस्य च योजनस्य विं द्वाचत्वारिंशत्षष्टिभागाः एतावत्रिगुणीकृतं यथोक्तविमानपरिमाणकरणाय देवस्यैको विक्रमः परिकल्प्यते, स चैवंप्रमाणः–द्वे लक्षे त्र्यशीति सहस्राणि पञ्च शतानि अशीत्यधिकानि योजनानाम् एकस्य च योजनस्य षष्टिभागाः षट् इति।

'से णं देवे' इत्यादि, 'सः' विवक्षितो देवः 'तया' सकलदेवजनप्रसिद्धया उत्कृष्टया त्वरितया चपलया चण्डया शीघ्रया उद्धतया जवनया छेकया दिव्यया देवगत्या, अमीषां पदानामर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राग्वद्भावनीयः, व्यतिव्रजन् व्यतिव्रजन् जघन्यत एकाहं वा द्वयहं वा यावदुत्कर्षतः षण्मासान् यावद् 'व्यतिव्रजेत्' गच्छेत्, तत्रैवं गमने अस्त्येतद् यथैकं किञ्चन विमानं पूर्वोक्तानां विमानानां मध्ये 'व्यतिव्रजेत्' अतिक्रमेत्, तस्या पारं लभेतेति भावः, तताऽस्त्येतद् यथैककं विमानं न व्यतिव्रजेत्, न तस्य पारं लभेत, उभयत्रापि जातावेकवचनं, ततोऽयं भावार्थ–उक्तप्रमाणेनापि क्रमेण यथोक्तरूपयाऽपि च गत्या षण्मासानपि यावदधिकृतो देवो गच्छति तथापि केषाञ्चिद्विमानानां पारं लभते केषाञ्चित्पारं न लभते इति, एतावन्महान्ति तानि विमानानि प्रज्ञप्तानि हे श्रमण! हे आयुष्मन्!। 'अत्थि णं भंते!' इत्यादि, सन्ति भदन्त! विमानानि स्वस्तिकानि स्वस्तिकवर्त्तानि स्वस्तिकप्रमाणि स्वस्तिकान्तानि स्वस्तिकवर्णानि स्वस्तिकलेश्यानि स्वस्तिकध्वजानि स्वस्तिकश्रृङ्गाराणि स्वस्तिकशिष्टानि स्वसतिककूटानि स्वस्तिकोत्तरावतंसकानि?, 'हंता अत्थि' इत्यादि, समस्तं प्राग्वत्, नवरमत्र 'एवइयाइं पंच ओवासंतराइं' इति कण्ठयं, उदयास्तापान्तरालक्षेत्रं पञ्चगुणं क्रियत इति भावः।

'अत्थि णं भंते!' इत्यादि, सन्ति भदन्त! विमानानि कामानि कामावर्तानि कामप्रमाणि कामकान्तानि कामवर्णानि कामलेश्यानि कामध्वजानि कामश्रृङ्गाराणि कामशिष्टानि कामकूटानि कामोत्तरावतंसकानि?, 'हंता अत्थि' इत्यादि सर्वं पूर्ववत् नवरमत्रोदयास्तापान्तरालक्षेत्रं सप्तगुणं कर्त्तव्यं, 'अत्थि णं भंते!' इत्यादि, सन्ति भदन्त! विजयवेजयन्तजयन्तापराजितानि विमानानि?, 'हंता अत्थी'त्यादि प्राग्वत्, नवरमत्र 'एवइयाइंनव ओवासंतराइं' इति वक्तव्यं उक्तञ्च–

॥१॥ "जावइ उदेइ सूरो जावइ सो अत्थमेइ अवरेणं।
तियपणसत्तनवगुणं काउं पत्तेय पत्तेयं॥

॥२॥ सीयालीस सहस्सा दो य सया जोयणाण तेवट्ठा।
इगवीस सट्ठिभागा कक्खडमाइंमि पेच्छ नरा॥

॥३॥ एयं दुगुणं काउं गुणिज्जए तिपणसत्तमाईहिं।
आगयफलं च जं तं कमपिमाणं वियाणाहि॥

॥४॥ चत्तारिवि सकमेहिं चंडादिगईहिं जंति छम्मासं।
तहवि य न जंति पारं केसिंचि सुरा विमाणाणं॥

उक्तः प्रथमोद्देशकः, इदानीं द्वितीयस्यावसरः, तत्रेदमादिसूत्रम्–

तृतीय प्रतिपत्तौ–तिर्यचयोनिकस्य उद्देशकः–१ समाप्तः

–: तिर्यचयोनिकः उद्देशकः–२ :–

मू.(१३४) *कतिविहा णं भंते! संसारसमावन्नगा जीवा पन्नत्ता?, गोयमा! छव्विहा पन्नत्ता, तंजहा–पुढविकाइया जाव तसकाइया। से किं तं पुढविकाइया?, पुढविकाइया दुविहा पन्नत्ता, तंजहा– सुहुमपुढविकाइया बादरपुढविकाइया य। से किं तं सुहुमपुढविकाइया २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य, सेत्तं सुहुमपुढविकाइया।*

से किं तं बादरपुढविकाइया?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य, एवं जहा पन्नवणापदे, सण्हा सत्तविधा पन्नत्ता, खरा अणेगविहा पन्नत्ता, जाव असंखेज्जा, से त्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बादर पुढविक्काइया। सेत्तं पुढविक्काइया। एवं चेव जहा पन्नवणापदे तहेव निरवसेसं भाणितव्वं जाव वणप्फतिकाइया, एवं जाव जत्थेको तत्थ सिता संखेज्ञा सिय असंखेज्ञा सिता अनंता, सेत्तं बादरवणप्फतिकाइया, से तं वणस्सइकाइया।

से किं तं तसकाइया ?, २ चउव्विहा पन्नत्ता, तंजहा—बेइंदिया तेइंदिया चउरिंदिया पंचेंदिया। से किं तं बेइंदिया ?, २ अनेगविधा पन्नत्ता, एवं जं चेव पन्न वणापदे तं चेव निरवसेसं भाणितव्वं जाव सव्वट्ठसिद्धगदेवा, सेतं अनुत्तरोववाइया, से तं देवा, से तं पंचेंदिया, से तं तसकाइया॥

वृ. 'कइविहा ण'मित्यादि, कतिविधा भदन्त ! संसारसमापन्नका जीवाः प्रज्ञप्ताः ?, भगवानाह—गौतम ! षड्विधाः प्रज्ञप्तास्तद्यथा— पृथीविकायिका यावत्त्रसकायिकाः। अथ के ते पृथिवीकायिकाः ?, इत्यादि प्रज्ञापनागतं प्रथमं प्रज्ञापनापदं निरवशेषं वक्तव्यं यावदन्तिमं 'से तं देवा' इति पदम् सम्प्रति विशेषाभिधानाय भूयोऽपि पृथिवीकायविषयं सूत्रमाह—

मू. *(१३५) कतिविधा णं भंते ! पुढवी पन्नत्ता ?, गोयमा ! छव्विहा पुढवी पन्नत्ता, तंजहा—सण्हापुढवी सुद्धपुढवी वालुयापुढवी मणोसिलापु० सक्करापु० खरपुढवी।*

सण्हापुढवीणं भंते केवतियं कालं ठिती प० गो० ! जह० अंतोमु० उक्कोसेणं एगं वाससहस्सं सुद्धपुढवीए पुच्छा, गो० ! जह० अंतोमु० उक्को० बारस वाससहस्साइं। वालुयापुढवीपुच्छा, गो० ! जह० अंतोमु० उक्को० चोद्दस वाससहस्साइं। मणोसिलापुढवीणं पुच्छा, गो० ! जह० अंतोमु० उक्को सोलस वाससहस्साइं। सक्करापुढवीए पुच्छा, गोयमा ! जह० अंतोमु० उक्को० अट्ठारस वाससहस्साइं। खरपुढविपुच्छा, गो० ! जह० अंतोमु० उक्को० बावीस वाससहस्साइं।

नेरइयाणं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जह० दस वाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं ठिती, एयं सव्वं भाणियव्वं जाव सव्वट्ठसिद्धदेवत्ति।

जीवे णं भंते ! जीवेत्ति कालतो केवच्चिरं होइ ?, गोयमा ! सव्वद्धं, पुढविकाइए णं भंते ! पुढविकाइएत्ति कालतो केवच्चिरं होति ?, गोयमा ! सव्वद्धं, एवं जाव तसकाइए॥

वृ. 'कइविहा ण'मित्यादि, कतिविधा णमिति पूर्ववत्, भदन्त ! पृथिवी प्रज्ञप्ता ?, भगवानाह—गौतम ! षड्विधा प्रज्ञप्ता, तद्यथा—'श्लक्ष्णपृथिवी' मृद्वी चूर्णितलोष्टकल्पा, 'शुद्धपृथिवी' पर्वतादिमध्ये, मनःशिला—लोकप्रतीता, वालुका—सिकतारूपा, शर्करा—मुरुण्डपृथिवी, 'खरा-पृथिवी' पाषाणादिरूपा। अधुना एतासामेव स्थितिनिरुपणार्थमाह—'सण्हपुढवीकाइयाण'मित्यादि, श्लक्ष्णपृथिवी- कायिकानां भदन्त ! कियन्तं कालं स्थिति प्रज्ञप्ता ?, भगवपानाह—गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षत एकं वर्षसहस्रं। एवमनेनाभिलापेन शेषाणामपि पृथिवीनामनया गाथया उत्कृष्टनुगन्तव्यं, तामेव गाथामाह—'सण्हा य'इत्यादि।

॥१॥ सण्हा य सुद्धवालुअ मणोसिला सक्करा य खरपुढवी।
इगबारचोद्दससोलढारबावीससमसहसा॥

श्लक्ष्णपृथिव्या एकं वर्षसहस्रमुत्कर्षतः स्थिति, शुद्धपृथिव्या द्वादश वर्षसहस्राणि, वालुकापृथिव्याश्चतुर्दश सहस्राणि, मनःशिलापृथिव्याः षोडश वर्षसहस्राणि, शर्करापृथिव्या अष्टादश वर्षसहस्राणि, खरपृथिव्या द्वाविंशतिवर्सहस्राणि, सर्वासामपि चामीषां पृथिवीनां जघन्येन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थिति- रन्तर्मुहूर्त्तं वक्तव्या ॥ सम्प्रति स्थितिनिरूपणाप्रस्तावान्नैरयिकादीनां चतुर्विंशतिदण्डकक्रमेण स्थितिं निरूपयितुकाम आह– 'नेरइयाणं भंते !' इत्यादि, नैरयिकाणां भदन्त ! कियन्तं कालं स्थिति प्रज्ञप्ता ?, इत्येवं प्रज्ञापनागतस्थितिपदानुसारेण चतुर्विंशतिदण्डकक्रमेण तावद्वक्तव्यं यावत्सर्वार्थसिद्धविमान- देवानां स्थितिनिरूपणा, इह तु ग्रन्थगौरवभयान्न लिख्यते ॥ तदेवं भवस्थितिनिरूपणा कृता, सम्प्रति कायस्थितनिरूपणार्थमाह–

'जीवे णं भंते !' इत्यादि, अथ कायस्थितिरिति कः शब्दार्थ ?, उच्यते, कायो नाम जीवस्य विवक्षितः सामान्यरूपो विशेषरूपो वा पर्यायविशेषस्तस्मिन् स्थिति कायस्थिति, किमुक्तं भवति ? –यस्य वस्तुनो येन पर्यायेण–जीवत्वलक्षणेन पृथिवीकायादित्वलक्षणेन वाऽऽदिश्यते व्यवच्छेदेन यद्भवनं सा कायस्थिति, तत्र जीव इति "जीव प्राणधारणे" जीवति–प्राणान् धारयतीति जीवः, प्राणाश्च द्विधाःद्रव्यप्राणा भावप्राणाश्च, तत्र द्रव्यप्राणा आयुःप्रभृतयः, उक्तश्च–

॥ १ ॥ "पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिश्वासमथान्यदायुः ।
प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा ॥"

भावप्राणा ज्ञानादयः यैर्मुक्तोऽपि जीवतीति व्यपदिश्यते, उक्तश्च– "ज्ञानादयस्तु भावप्राणा मुक्तोऽपि जीवति स तैर्हि" ति, इह च विशेषानुपादानादुभयेषामपि ग्रहणं णमिति वाक्यालङ्कारे भदन्त ! जीव इति–जीवनपर्यायविशिष्टः कालतः–कालमधिकृत्य कियच्चिरं भवति ?, भगवानाह– सर्वाद्धां, संसार्यवस्थायां द्रव्यभावप्राणानधिकृत्य मुक्त्यवस्थायां भावप्राणानधिकृत्य सर्वत्रापि जीवनस्य विद्यमानत्वात्, अथवा जीव इति न एकः प्रतिनियतो जीवो विवक्ष्यते किन्तु जीवसामान्यं, ततः प्राणधारणलक्षणजीवनाभ्युपगमेऽपि न कश्चिद्दोषः, तथाहि–

'जीवे णं भंते !' इत्यादि, जीवो णमिति पूर्ववद् भदन्त ! जीव इति–जीवन्निति प्राणान् धारयन्नित्यर्थ कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! सर्वाद्धां, जीवसामान्यस्यानाद्यनन्तत्वात्, न चैतद् व्याख्यानं स्वमनीषिकाविजृम्भितं, यत उक्तं मूलटीकायां– "जीवे णं भंते इत्यादि, एषा ओघकायस्थिति सामान्यजीवोपेक्षिणीति सर्वाद्धया निर्वचनम्" । एवं च पृथिवीकायादिष्वप्यदोषः, एवत्सामान्यस्य सर्वदैव भावादिति । एवं गतीन्द्रियकायादिद्वारैर्यथा प्रज्ञापनायामष्टादशे कायस्थितिनामके पदे कायस्थितिरुक्ता तथाऽत्र सर्वं निरवशेषं वक्तव्यं यथा उपरि तत्पदगतं न किमपि तिष्ठति, गतीन्द्रियकायादिद्वारसङ्ग्राहके चेमे गाथे–

॥ १ ॥ "गइ इंदिए य काए जोगे वेए कसाय लेसा य ।
सम्मत्तनाणदंसणसंजयउवओगआहारे ॥

॥ २ ॥ भासगपरित्तपज्जत्तसुहुम सण्णी भवऽत्थि चरिमे य ।
एएसिं तु पयाणं कायठिई होइ नायव्वा ॥

सूत्रपाठस्तु लेशतो दर्श्यते– 'नेरइया णं भंते ! नेरइयत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं । तिरिक्खजोणिए णं भंते ! तिरिक्खजोणियत्ति कालतो केवच्चिरं होइ ?, गोयमा! जहन्नेणं अंतोमुहुत्तमुक्कोसेणमनंतं कालं अनंता उस्सप्पिणीओसप्पिणीओ कालतो खेत्ततो अनंता लोगा असंखेज्जा पुग्गलपरियट्टा आवलियाए असंखेज्जइभागो" इत्यादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति सामान्यपृथिवीकायादिगतकायस्थितिनिरूपणार्थमाह–'पुढविक्काइए णं भंते!' इत्यादि, पृथिवीकायिको भदन्त !, सामान्यरूपोऽत एव जातोवेकवचनं न व्यक्तयेकत्वे पृथिवीकाय इति कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! सर्वाद्धां, पृथिवीकायामान्यस्य सर्वदैव भावात् । एवमत्तेजोवायुवनस्पतित्रसकायसूत्राण्यपि भावनीयानि ।। सम्प्रति विवक्षिते काले जघन्यपदे उत्कृष्टपदे वा कियन्तोऽभिनवा उत्पद्यमानाः पृथिवीकायिकादयः ? इत्येतन्निरूपणार्थमाह

मू. (१३६) *पडुप्पन्नपुढविकाइया णं भंते ! केवतिकालस्स निल्लेवा सिता ?, गोयमा ! जहन्नपदे असंखेज्जहिं उस्सप्पिणिओसप्पिणीहिं उक्कोसपए असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं, जहन्नपदातो उक्कोसपए असंखेज्जगुणा, एवं जाव पडुप्पन्नवाउक्काइया ।*

पडुप्पन्नवणप्फइकाइयाणं भंते ! केवतिकालस्स निल्लेवा सिता ?, गोयमा ! पडुप्पन्नवण० जहन्नपदे अपदा उक्कोसपदे अपदा, पडुप्पन्नवणप्फतिकाइयाणं णत्थि निल्लेवणा ।

पडुप्पन्नतसकाइयाणं पुच्छा, जहन्नपदे सागरोवमसतपुहुत्तस्स उक्कोसपदे सागरोवमसतपुहुत्तस्स, जहन्नपदा उक्कोसपदे विसेसाहिया ।।

वृ. 'पडुप्पन्नपुढविक्काइया णं भंते ! केवइकालस्स निल्लेवा सिया' इत्यादि, प्रत्युत्पन्नपृथिवीकायिकाः–तत्कालमुत्पद्यमानाः पृथिवीकायिका भदन्त ! 'केवइकालस्स'त्ति तृतीयार्थे षष्ठी कालेन निर्लेपाः स्यु ?, प्रतिसमयमेकैकापहारेणापह्रियमाणाः कियता कालेन सर्व एव निष्ठामुपयान्तीति भावः, भगवानाह–गौतम ! जघन्यपदे यदा सर्वस्तोका भवन्ति तदेत्यर्थः, असङ्ख्येयाभिरुत्सर्पिण्यवसर्प्पिणीभिरुत्कृष्टपदेऽपि यदा सर्वबहवो भवन्ति तदाऽपीति भावः असङ्ख्येयाभिरुत्सर्पिण्यवसर्प्पिणीभिर्नवरं जघन्यपदादुत्कृष्टपदिनोऽसङ्ख्येयगुणाः । एवमत्तेजोवायुसूत्राण्यपि भावनीयानि । वनस्पतिसूत्रमाह–'पडुप्पन्ने'त्यादि, प्रत्युत्पन्नवनस्पतिकायिका भदन्त ! कियता कालेन निर्लेपः स्यु ?, भगवानाह–गौतम ! प्रत्युत्पन्नवनस्पतिकायिका जघन्यपेऽपदा–इयता कालेनापह्रियन्ते इत्येततपदविरहिता अनन्तानन्तत्वात्, उत्कृष्टपदेऽप्यपदा, अनन्तानन्तया निर्लेपनाऽ- सम्भवात्, तथा चाह–'पडुप्पन्नवणस्सइकाइयाणं नत्थि निल्लेवणा' इति सुगमं, नवरमनन्तानन्त- त्वादिति हेतुपदं स्वयमभ्यूह्यम् ।

'पडुप्पन्नतसकाइया ण'मित्यादि, प्रत्युत्पन्नत्रसकायिका भदन्त ! कियता कालेन निर्लेपाः स्यु :?, भगवानाह–गौतम ! जघन्यपदे सागरोपमशतपृथक्त्वस्य–तृतीयार्थे षष्ठी प्राकृतत्वात् सागरोपमशतपृथक्त्वेन, उत्कृष्टपदेऽपि सागरोपमशतपृथक्त्वेन नवरं जघन्यपदादुत्कृष्टपदं विशेषाधिकमवसेयं । इदं च सर्वमुच्यमानं विशुद्धलेश्यसत्वमभि प्रासं यथाऽवस्थिततया सम्यगवभासते नान्यथेत्यविशुद्धविशुद्धलेश्यविषयं किञ्चिद्विवक्षुराह–

मू. (१३७) *अविसुद्धलेस्से णं भंते ! अनगारे असमोहतेणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अनगारं जाणइ पासइ ?, गोयमा ! नो इणट्ठे समट्ठे । अविसुद्धलेस्से णं भंते ! अनगारे असमोहएणं अप्पाणएणं विसुद्धलेस्सं देवं देविं अनगारं जाणाइ पासइ ?, गोयमा ! नो इणट्ठे समट्ठे ।*

अविसुद्धलेस्से अनगारे समोहएणं अप्पाणेणं अविसुधलेस्सं देवं देविं अनगारं जाणति पासति ?, गोयमा ! नो इणट्ठे समट्ठे । अविसुद्धलेस्से अनगारे समोहतेणं अप्पाणेणं विसुद्धलेस्सं देवं देविं अनगारं जाणति पासति ?, नो तिणट्ठे समट्ठे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविसुद्धलेस्से णं भंते ! अनगारे समोहयासमोहतेणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अनगारं जाणति पासति ?, नो तिणड्ढे समट्ठे । अविसुद्धलेस्से अनगारे समोहतासमोहतेणं अप्पाणेणं विसुद्धलेस्सं देवं देविं अनगारं जाणति पासति ?, नो तिणड्ढे समड्ढे ।

विसुद्धलेस्से णं भंते ! अनगारे असमोहतेणं अप्पाणेणं अविसुद्धलेस्सं देवं देविं अनगारं जाणति पासति ?, हंता जाणति पासति जहा अविसुद्धलेस्सेणं आलावगा एवं विसुद्धलेस्सेणवि छ आलावगा भाणितव्वा । जाव विसुद्धलेस्से णं भंते ! अणगारे समोहतासमोहतेणं अप्पाणेणं विसुद्धलेस्सं देवं देविं अनगारं जाणति पासति ?, हंता जाणति पासति ॥

वृ. 'अविसुद्धलेस्से ण'मित्यादि, 'अविसुद्धलेश्यः' कृष्णादिलेश्यो भदन्त ! 'अनगारः' न विद्यते अगारं-गृहं यस्यासौ अनगारः-साधुः 'असमवहतः' वेदनादिसमुद्घातरहितः 'समवहतः' वेदनादिसमुद्घाते गतः । एवमिमे द्वे सूत्रे असमवहतसमवहताभ्यामात्मभ्याम-विशुद्धलेश्यपरविषये प्रतिपादिते एवं समवहतासमवहताभ्यामात्मभ्यां विशुद्धलेश्यपरविषये द्वे सूत्रे भावयितव्ये । तथाऽन्ये अविसुद्धलेश्यविशुद्धलेश्यपरविषये द्वे सूत्रे समवहतासमवहते-नात्मनेति पदेन, समहवतासमवहतो नाम वेदनादिसमुद्घातक्रियाविष्टो न तु परिपूर्ण समवहतो नाप्यसमवहतः सर्वथा तदेवमविशुद्धलेश्ये ज्ञातरि साधौ षट् सूत्राणि प्रवृत्तानि, एवमेव विशुद्धलेश्येऽपि साधौ ज्ञातरि षट् सूत्राणि भावनीयानि, नवरं सर्वत्र जानाति पश्यतीति वक्तव्यं विशुद्धलेश्याकतया यथाऽवस्थितज्ञानदर्शनभावात्, आह च मूलटीकाकारः- "शोभनमशोभनं वा वस्तु यथावद्विशुद्धलेश्यो जानाती"ति, समुद्घातोऽपि च तस्याप्रतिबन्धक एव, न च तस्य समुद्घातोऽत्यन्ताशोभनो भवति, उक्तं च मूलटीकायाम्-"समुद्घातोऽपि तस्याप्रतिबन्धक एवे"त्यादीति ॥ तदेवं यतोऽविशुद्धलेश्यो न जानाति विशुद्धलेश्यो जानाति ततः सम्यग्मिथ्याक्रिययोरेकदा निषेधमभिधित्सुराह-

मू. (१३८) *अन्नउत्थिया णं भंते ! एवमाइक्खंति एवं भासेन्ति एवं पन्नवेंति एवं परूवेंति-एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेति, तंजहा-सम्मत्तकिरियं च मिच्छत्तकिरियं च । जं समयं संमत्तकिरियं पकरेति तं समयं मिच्छत्तकिरियं पकरेति, जं समयं मिच्छत्तकिरियं पकरेइ तं समयं संमत्तकिरियं पकरेइ, समत्तकिरियापकरणताए मिच्छत्तकिरियं पकरेति मिच्छत्तकिरियापकरणताए संमत्तकिरियं पकरेति ।*

एवं खलु एगे जीवे एगेणं समएणं दो किरितातो पकरेति, तंजहा-संमत्तकिरियं च मिच्छत्तकिरियं च, से कहमेतं भंते ! एवं ?, गोयमा ! जन्नं ते अन्नउत्थिया एवमाइक्खंति वं भासंति एवं पन्नवेंति एवं परूवेंति एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेंति, तहेव जाव सम्मत्तकिरियं च मिच्छत्तकिरियं च, जे ते एवमाहंसु तं णं मिच्छा ।

अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि-एवं खलु एगे जीवे एगेणं समएणं एगं किरियं पकरेति, तंजहा-सम्मत्तकिरियं वा मिच्छत्तकिरियं वा, जं समयं संमत्तकिरियं पकरेति नो तं समयं मिच्छत्तकिरियं पकरेति, तं चेव जं समयं मिच्छत्तकिरियं पकरेति नो तं समयं संमत्तकिरियं पकरेति, संमत्तकिरियापकरणयाए नो मिच्छत्तकिरियं पकरेति मिच्छत्तकिरियाप-करणयाए णो संमत्तकिरियं पकरेति । एवं खलु एगे जीवे एगेमं समएणं एगं किरियं पकरेति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तंजहा–सम्मत्तकिरियं वा मिच्छत्तकिरियं वा ॥

वृ. 'अन्नउत्थिया णं भंते !' इत्यादि, 'अन्ययूथिकाः' अन्यतीर्थिका भदन्त ! चरकादय एवमाचक्षते सामान्येन 'एवं भाषन्ते' स्वशिष्यान् श्रवणं प्रत्यभिमुखानवबुध्य विस्तरेण व्यक्तं कथयन्ति, एवं 'प्रज्ञापयन्ति' प्रकर्षेण ज्ञापयन्ति यथा स्वात्मनि व्यवस्थितं ज्ञानं तथा परेष्वप्यापादयन्तीति, एवं 'प्ररूपयन्ति' तत्वचिन्तायामसंदिग्धमेतदिति निरूपयन्ति, इह खल्वेको जीव एकेन समयेन युगपद्द्वे क्रिये प्रकरोति, तद्यथा–

'सम्यक्त्वक्रिया च' सुन्दराध्यवसायात्मिकां 'मिथ्यात्वक्रिया च' असुन्दराध्यवसायात्मिका, 'जं समय'मिति प्राकृतत्वात्सप्तम्यर्थे द्वितीया यस्मिन् समये सम्यक्त्वक्रया प्रकरोति 'तं समय'मिति तस्मिन् समये मिथ्यात्वक्रिया प्रकरोति, यस्मिन् समये मिथ्यात्वक्रिया प्रकरोति तस्मिन् समये सम्यक्त्वक्रियां प्रकरोति, अन्योऽन्यसंवलितोभयनियमप्रदर्शनार्थमाह–सम्यक्त्वक्रियाप्रकरणेन मिथ्यात्वक्रिया प्रकरोति मिथ्यात्वक्रियाप्रकरणेन सम्यक्त्वक्रिया प्रकरोति, तदुभयकरणस्वभावस्य तत्तक्रियाकरणात्सर्वात्मना प्रवृत्तेः, अन्यथा क्रियाऽयोगादिति, 'एवं खल्वि'त्यादि निगमनं प्रतीतार्थं। 'से कहमेयं भंते !' इत्यादि, तत् कथमेतद् भदन्त ! एवम् ?, तदेवं गौतमेन प्रश्ने कृते सति भगवानाह–गौतम ! यत् णमिति वाक्यालङ्कारे 'अन्ययूथिकाः' अन्यतीर्थिका एवमाचक्षते इत्यादि प्राग्वत् यावत्तत् मिथ्या ते एवमाख्यातवन्तः ।

अहं पुनर्गौतम ! एवमाचक्षे एवं भाषे एवं प्रज्ञापयामि एवं प्ररूपयामि, इह खल्वेको जीव एकेन समयेनैकां क्रियां प्रकरोति, तद्यथा–सम्यक्त्वक्रियां वा मिथ्यात्वक्रियां वा, अत एव यस्मिन् समये सम्यक्त्वक्रियां प्रकरोति न तस्मिन् समये मिथ्यात्वक्रिया प्रकरोति यस्मिन् समये मिथ्यात्वक्रियां प्रकरोति न तस्मिन् समये सम्यक्त्वक्रियां प्रकरोति, परस्परवैविक्त्यनियमप्रदर्शनार्थमाह–सम्यक्त्वक्रियाप्रकरणेन न मिथ्यात्वक्रियांप्रकरोति मिथ्यात्वक्रियाप्रकरणेन न सम्यक्त्वक्रियां प्रकरोति, सम्यक्त्वक्रियामिथ्यात्वक्रिययोः परस्परपरिहारावस्थानात्मकतया जीवस्य तदुभयकरणस्वभावत्वायोगात्, अन्यथा सर्वथा मोक्षाभावप्रसक्तेः, कदाचिदपि मिथ्यात्वानिवर्त्तनात् ॥

तृतीय प्रतिपतौ– तिर्यंचयोनिकस्य उद्देशकः–२ समाप्तः

–: मनुष्य अधिकार :–

व्याख्यातस्तिर्यग्योनिजाधिकारः, सम्प्रति मनुष्याधिकारव्याख्यावसरः, तत्रेदमादिसूत्रम्–

मू. (१४०) *से किं तं मणुस्सा ?, मणुस्सा दुविहा पन्नत्ता, तंजहा०–संमुच्छिममणुस्सा य गब्भवक्कंतियमणुस्सा य ॥*

से किं तं संमुच्छिममणुस्सा ?, २ एगागारा पन्नत्ता ॥ कहि णं भंते ! संमुच्छिममणुस्सा संमुच्छंति ?, गोयमा ! अंतोमणुस्सखेत्ते जहा पन्नवणाए जाव सेत्तं संमुच्छिममणुस्सा ॥

वृ. 'से किं त'मित्यादि, अथ के ते मनुष्याः ?, सूरिराह–मनुष्या द्विविधाः प्रज्ञप्तास्तद्यथा–संमूर्च्छिममनुष्याश्च गर्भव्युत्क्रान्तिकमन० चशब्दौ द्वयानामपि मनुष्यत्वजातितुल्यतासूचकौ ।

'से किं त'मित्यादि, अथ के ते संमूर्च्छिममनुष्याः ?, सूरिराह–संमूर्च्छिममनुष्याः 'एकाकारः' एकस्वरूपाः प्रज्ञप्ताः । अथ क तेषं सम्भवः ? इति जिज्ञासिषुर्गौतमः पृच्छति–

'कहि णं भंते !' इत्यादि, क भदन्त ! संमूर्च्छिममनुष्याः संमूर्च्छन्ति ?, भगवानाह–अन्त-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

र्मनुष्यक्षेत्रे इत्यादि सूत्रं प्राग्वद्भावनीयं यावत् अंतोमुहुत्तद्धाउया चेव कालं पकरेंति, उपसंहारमाह– 'सेत्तं संमुच्छिममणुस्सा' ।। सम्प्रति गर्भव्युक्रान्तिकमनुष्यप्रतिपादनार्थमाह–

मू. (१४१) *से किं तं गब्भवक्कंतियमणुस्सा ?, २ तिविधा पन्नत्ता, तंजहा–कम्मभूमगा अकम्मभूमगा अतरदीवगा ।।*

वृ. 'से किं त'मित्यादि, अथ के ते गर्भव्युक्रान्तिकमनुष्याः ? सूरिराह–गर्भव्युक्रान्तिकमनुष्यास्त्रिविधाः प्रज्ञप्तास्तद्यथा–कर्मभूमका अकर्म्मभूमका आन्तरद्वीपकाः, तत्र 'अस्त्यनानुपूर्व्यपी'ति न्यायप्रदर्शनार्थमान्तरद्वीपकप्रतिपादनार्थमाह–

मू. (१४२) *से किं तं अंतरदीवगा ?, २ अट्ठावीसतिविधा पन्नत्ता, तंजहा–एगुरूया आभासिता वेसाणिया णांगोली हयकण्णगा० आयंसमुहा० आसमुहा० आसकण्णा० उक्कमुहा० घनदंता जाव सुद्धदंता ।।*

वृ. 'से किं त'मित्यादि, अथ के ते आन्तरद्वीपकाः ?, लवणसमुद्रमध्ये अन्तरे अन्तरे द्वीपा अन्तरद्वीपा अन्तरद्वीपेषु भवा आन्तरद्वीपकाः, 'राष्ट्रेभ्यः' इति वुञ्, सूरिराह–आन्तरद्वीपका अष्टाविंशतिविधाः प्रज्ञप्ताः, तानेव तद्यथेत्यादिना नामग्राहमुपदर्शयति–

एकोरुकाः १ आभाषिकाः २ वैषाणिकाः ३ नाङ्गोलिकाः ४ हयकर्मा ५ गजकर्णा ६ गोकर्णा ७ शष्कुलीकर्णा ८ आदर्शमुखाः ९ मेण्ढमुखाः १० अयोमुखाः ११ गोमुखा १२ अश्वमुखाः १३ हस्तिमुखाः १४ सिंहमुखाः १५ व्याघ्रमुखाः १६ अश्वकर्मा १७ सिंहकर्णा १८ अकर्णा १९ कर्णप्रावरणाः २० उल्कामुखाः २१ मेघमुखाः २२ विद्युद्दन्ताः २३ विद्युज्जिह्वाः २४ धनदन्ताः २५ लष्टदन्ताः २६ गूढदन्ताः २७ शुद्धदन्ताः २८, इह एकोरुकादिनामानो द्वीपाः परं 'तात्स्थ्यात्तद्व्यपदेश' इति न्यायान्मनुष्या अप्येकोरुकादय उक्ता यथा पञ्चालदेशनिवासिनः पुरुषाः पञ्चाला इति । तथा चैकोरुकमनुष्याणामेकोरुकद्वीपं पिपृच्छिषुराह–

मू. (१४३) *कहि णं भंते ! दाहिणिल्लाणं एगोरूमणुस्साणंएगोरूदीवे नामं दीवे पन्नत्ते ?, गोयमा ! जंबुद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासघरपव्वयस्स उत्तरपुरच्छिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणसयाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं एगोरुयमणुस्साणं एगुरुयदीवे नामं दीवे पन्नत्ते तिन्नि जोयसयाइं आयामविक्खंभेणं नव एकूणपन्नजोयणसए किंचि विसेसेण परिक्खेवेणं एगाए पउमवरवेदियाए एगेणं च वनसंडेणं सव्वओ समंता संपरिक्खित्ते*

साणं पउमवरवेदिया अट्ठ जोयणाइं उड्ढं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं एगूरुयदीवं समंता परिक्खेवेणं पन्नत्ता । तीसे णं पउम- वरवेदियाए अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा–वइरामया निम्मा एवं वेतियावण्णओ जहा रायपसेणईए तहा भाणियव्वो ।।

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! दाक्षिणात्यानां इह एकोरुकादयो मनुष्याः शिखरिण्यपि पर्वते विद्यन्ते ते च मेरोरुत्तरदिग्वर्त्तिन इति तद्व्यवच्छेदार्थं दाक्षिणात्यानामित्युक्तं, एकोरुकमनुष्याणामेकोरुकद्वीपः प्रज्ञप्तः ?, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मन्दरपर्वतस्यान्यत्रासम्भवात् अस्मिन् जम्बूद्वीपे द्वीपे इति प्रतिपत्तव्यं ।

'मन्दरपर्वतस्य' मेरोर्दक्षिणेन–दक्षिणस्यां दिशि क्षुल्लहिमवद्वर्षधरपर्वतस्य, क्षुल्लग्रहणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाहिमवद्वर्षधरपर्वतस्य व्यवच्छेदार्थं, पूर्वस्मात् पूर्वरूपाश्चरमान्ताद् उत्तरपूर्वेण–उत्तरपूर्वस्यां दिशि लवणसमुद्रं त्रीणि योजनशतान्यवगाह्यात्रान्तरे क्षुल्लहिमवद्दंष्ट्राया उपरि दाक्षिणात्यानामेकोरुकमनुष्याणामेकोरुकद्वीपो नाम द्वीपः प्रज्ञप्तः, स च त्रीणि योजनशतान्यायामविष्कम्भेण समाहारो द्वन्द्वः आयामेन विष्कम्भेन चेत्यर्थ, नव 'एकोनपञ्चाशानि' एकोनपञ्चाशदधिकानि योजनशतानि ९४९ परिक्षेपेण, परिमाणगणितभावना–''विक्खंभवग्गदहगुणकरणी वट्टस्स परिरओ होइ'' इति करणवशात्स्वयं कर्त्तव्या सुगमत्वात् ॥

मू. (१४४) *सा णं पउमवरवेतिया एगेणं वनसंडेणं सव्वओ समंता संपरिक्खित्ता। से णं वनसंडे देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं वेतियासमेणं परिक्खेवेणं पन्नत्ते, से णं वनसंडे किण्हे किण्होभासे। एवं जहा रायपसेणइयवनसंडवण्णओ तहेव निरवसेसं भा० तणाण य वण्णगंधफासो सद्दो तणाणं वावीओ उप्पायपव्वया पुढविसिलापट्टगा य भा० जाव तत्थ णं बहवे वाणमंतरा देवा य देवीओ य आसयंति जाव विहरंति ॥*

वृ. 'से ण'मित्यादि, स एकोरुकनामा द्वीप एकया पद्मवरवेदिकया एकेन वनषण्डेन 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन परिक्षिप्तः, तत्र पद्मवरवेदिकावर्णको वनषण्डवर्णकश्च वक्ष्यमाणजम्बूद्वीपजगत्युपरिपद्मवरवेदिकावनषण्डवर्णकवद् भावनीयः, स च तावद् यावच्चरमं 'आसयंती'ति पदम् ॥

मू. (१४५) *एगोरूयदीवस्स णं दीवस्स अंतो बहुसमरमणिज्जे भूमिभागे पन्नत्ते, से जहानामए आलिंगपुक्खरेति वा, एवं सयणिज्जे भाणितव्वे जाव पुढविसिलापट्टगंसि तत्थ णं बहवे एगुरूयदीवया मणुस्सा य मणुस्सीओ य आसयंति जाव विहरंति।*

एगुरूयदीवे णं दीवे तत्थ तत्थ देसे तहिं २ बहवे उद्दालका कोद्दालका कतमाला नयमाला नट्टमाला सिंगमाला संखमाला दंतमाला सेलमालगा नाम दुमगणा पन्नत्ता समणाउसो! कुसविकुसविसुद्धरुक्खमूला मूलमंतो कंदमंतो जाव बीयमंतो पत्तेहि य पुप्फेहि य अच्छण्णपडिच्छण्णा सिरीए अतीव २ उवसोभेमाणा उवसोहेमाणा चिट्ठंति, एक्करुयदीवे णं दीवे रुक्खा बहवे हेरुयालवणा भेरुयालवणा मेरुयालवणा सेरुयालवणा सालवणा सरलवणा सत्तवण्णवणा पूतफलिवणा खज्जूरिवणा णालिएरिवणा कुसविकुसवि० जाव चिट्ठंति।

एगुरूदीवे णं तत्थ २ बहवे तिलया लवया नग्गोधा जाव रायरुक्खा नंदिरुक्खा कुसवकुसवि० जाव चिट्ठंति, एगुरूयदीवे णं तत्त बहूओ पउमलयाओ जाव सामलयाओ निच्चं कुसुमिताओ एवं लयावण्णओ जहा उववाइए जाव पडिरूवाए, एकोरूयदीवे णं तत्थ २ बहवे सेरियागुम्मा जाव महाजातिगुम्मा ते णं गुम्मा दसद्धवण्णं कुसुमं कुसुमंति विधूयग्गसाहा जेण वायविधूयग्गसाला एगुरूयदीवस्स बहूसमरमणिज्जभूमिभागं मुक्कपुप्फपुंजोवयारकलियं करेंति।

एकोरूयदीवे णं तत्थ २ बहूओ वणरातीओ पन्नत्ताओ, ताओ णं वणरातीतो किण्हातो किण्होभासाओ जाव रम्माओ महामेहनिगुरुंबभूताओ जाव महतीं गंधद्धणिं मुयंतीओ पासादीताओ ४

एगुरूयदीवे तत्थ २ बहवे मत्तंगा नाम दुमगणा पन्नत्ता समणाउसो! जहा से चंदप्पभमणिसिलागवरसीधुपवरवारुणिसुजातफलपत्तपुप्फचोयणिज्जा संसारबहुदव्वजुत्तसंभारकालसंधयासवा महुमेरगरिट्ठाभदुद्धजातीपसन्नमेल्लगसताउ खज्जूरमुद्दियासारकाविसायणसुपक्कखोयरसवर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरावण्णरसगंधफरिसजुत्तबलवीरियपरिणामा मज्जविहित्थबहुप्पगारा तहेवं ते मत्तंगयावि दुमगणा अनेगबहुविविहवीससापरिणयाए मज्जविहीए उववेदा फलेहिं पुण्णा वीसंदंति कुसविकुसविसुद्धरुक्खमूला जाव चिट्ठंति १ । एक्कोरुए दीवे तत्थ २ बहवो भिंगंगया नाम दुमगणा प० समणाउसो जहा से बारगघडकरगकलसकक्करिपायंकंचणिउदंकवद्धणिसुपविट्ठकसुत्तिचारुपिणयाकंचणमणिरयणभत्तिविचित्ता भायणविधीए बहुप्पगारा तहेव ते भिंगंगयावि दुमगणा अनेगबहुगविविहवीससाए परिणताए भाजणविधीए उववेया फलेहिं पुन्नाविव विसट्टंति कुसविकुस० जाव चिट्ठंति २ । एगोरूगदीवे णं दीवे तत्थ २ बहवे तुडियंगा नाम दुमगणा प० सम० !, जहा से आलिंगमुयंगपणवपडहदद्दरगकरडिडिंडिमभंभाहोरंभकण्णियारखरमुहिमुगुंदसंखियपरिलीवव्वगपरिवाइणिवंसावेणुवीणासुघोस विवंचिमहतिकच्छभिरगसगातलतालकंसतालसुसंपउत्ता आतोज्जविधीणिउणगंधव्वसमयकुसलेहिं फंदिया तिट्ठाणसुद्धा तहेव ते तुडियंगयावि दुमगणा अनेगबहुविविधवीससापरिणामाए ततविततघनसुसिराए चउव्विहाए आतोज्जविहीए उववेया फलेहिं पुण्णा विसट्टन्ति कुसविकुसविसुद्धरुक्खमूला जाव चिट्ठंति ३ ।

एगोरुयदी० तत्थ २ बहवे दीवसिहा नाम दुमगणा पन्नत्ता समणाउसो !, जहा से संझाविरागसमए नवणिहिपतिणो दीविया चक्कवालविंदे पभूयवट्टिपलित्ताणेहिं धणिउज्जालियतिमिरमद्दए कणगनिगरकुसुमितपालियातयवणप्पगासो कंचणमणिरयणविमलमहरिहतवणिज्जुज्जलविचित्तदंडाहिं दीवियाहिं सहसा पज्जलिऊसवियणिद्धतेयदिप्पंतविमलगहगणसमप्पहाहिं वितिमिरकरसूरपसरिउज्जोयचिल्लियाहिं जावुज्जलपहसियाभिरामाहिं सोभेमाणा तहेव ते दीवसिहावि दुमगणा अनेगबहुविविहवीससापरिणामाए उज्जोयविधीए उववेदा फलेहिं पुण्णा विसट्टंति कुसविकुसवि० जाव चिट्ठंति ४ ।

एगुरूयदीवे तत्थ २ बहवे जोतिसिहा नाम दुमगणा पन्नत्ता समणाउसो !, जहा से अचिरुग्गयसरयसूरमंडलपडंतउक्कसहस्सदिप्पंतविज्जुज्जालहुयवहनिद्धूमजलियनिद्धंतधोयतत्ततवमिज्जकिंसुयाजोसयजासुयणकुसुमविमउलियपुंजमणिरणकिरणजच्चहिंगुलुयनिगररूवाइरेगरूवा तहेव ते जोतिसिहावि दुमगणा अनेगबहुविहवीससापरिणयाए उज्जोयविहीए उववेदा सुहलेस्सा मंदलेस्सा मंदायवलेस्सा कूडाय इव ठाणठिया अन्नमन्नसमोगाढाहिं लेस्साहिं साए पभाए सपदेसे सव्वओ समंता ओभासंति उज्जोवेंति पभासेंति कुसविकुसवि० जाव चिट्ठंति ५ ।

एगुरुयदीवे तत्थ २ बहवे चित्तंगा नाम दुमगणा पन्नत्ता समणाउसो !, जहा से पेच्छाघरे विचित्ते रम्मे वरुसुमदाममालुज्जले भासंतमुक्कपुप्फपुंजोवयारकलिए विरल्लिविचित्तमल्लसिरिदाममल्लसिरिसमुदयप्पगब्भे गंथिमवेढिमपूरिमसंघाइमेण मल्लेण छेयसिप्पियं विभारतिएण सव्वतो चेव समणुबद्धे पविरललवंतविप्पइट्ठेहिं पंचवण्णेहिं कुसुमदामेहिं सोभमाणेहिं सोभमाणे वनमालतग्गए चेव दिप्पमाणे तहेव ते चित्तगयावि दुमगणा अनेगबहुविविहवीससापरिणयाए मल्लविहीए उववेया कुसविकुसवि० जाव चिट्ठंति ६ । एगुरूयदीवे तत्थ २ बहवे चित्तरसा णाम दुमगणा प० सम० !, जहा से सुगंधवर- कलमसालिविसिट्ठणिरुवहतदुद्धरद्धे सारयघयगुडखंडमहुमेलिए अतिरसे परमन्ने होज्ज उत्तमवण्णगंधमंते रन्नो जहा वा चक्कवट्टिस्स होज्ज निउणेहिं सूतपुरिसेहिं सज्जिएहिं वाउकप्पसे- असित्ते इव ओदणे कलमसालिणिज्जत्तिएवि एक्के सव्वप्फमिउवसयसगसित्थे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेगसालणगसंजुत्ते अहवा पडिपुन्नदव्वुवक्खडेसु सक्कए वण्णगंधरसफरिसजुत्तबलविरियपरिणामे इंदियबल-पुट्ठिविद्धणे खुप्पिवासमहणे पहाणे गुलकटियखंडमच्छंडियउवणीए पमोयगे सण्हसमियगब्भे हवेज्ज परमइट्ठंगसंजुत्ते तहेव ते चित्तरसावि दुमगणा अनेगबहुविविहवीससापरिणयाए भोजणविहीए उववेदा कुसविकुसवि० जाव चिट्ठंति ७।

एगुरूए दीवे ण तत्थ २ बहवे मणियंगा नाम दुमगणा पन्नत्ता समणाउसो !, जहा से हारद्धहारवट्टणगमउडकुंडलवासुत्तगहेमजालमणिजालकणगजालगमुत्तगउच्चिइयकडगाखुडियएकावलिकंठसुत्तमंगरिमउरत्थगे वेज्जसोणिसुत्तगचूलामणिकणगतिलगफुल्लसिद्धत्थयकण्णवालिससिसूरउसभचक्कगतलभंगतुडियहत्थिमालगवलक्खदीणा मालिता चंदसूरमालिता हरिसयकेयूरवलयपालंबअंगुलेज्जगकंचीमेहलाकलावपयरगपायजालघंटियखिंखिनिरयणोरुजालत्थिगियवरणेउरचलणमालिया कणगनिगरमालिया कंचणमणिरयणभत्तिचित्ता भूसणविधी बहुप्पगारा तहेव ते मणियंगावि दुमगणा अनेगबहुविविहवीससापरिणताए भूसणविहीए बहुप्पगारा तहेव ते मणियंगावि दुमगणा अनेगबहुविविहवीससापरिणताए भूसणविहीए उववेया कुसवि० जाव चिट्ठंति ८।

एगुरूयए दीवे तत्थ २ बहवे गेहागारा नाम दुमगणा पन्नत्ता समणाउसो !, जहा से पागारट्टालगचरियदारगोपुरपासायाकासतलमंडवएगसालबिसालगतिसालगचउरंसचउसालगब्भघरमोहणघरवलभिघरचित्तसालमालयभत्तिघरवट्टतंसचतुरंसणंदियावत्तसंठियायतपंडुरतलमुंडमालहम्मियं अहव णं धवलहरअद्धमागहविब्भमसेलद्धसेलसंठियकूडागारड्ढसुविहिकोट्ठगअनेगघरसरणलेणआवणविडंगजालचंदणिज्जूहअपवरकदोवालिचंदसालियरूवविभत्तिकलिता भवणविही बहुविकप्पा तहेव ते गेहागारावि दुमगणा अनेगबहुविविधवीससापरिणयाए सुहारुहणे सुहोत्ताराए सुहनिक्खमणप्पवेसाए इद्दरसोपाणपंतिकलिताए पइरिक्कए सुहविहाराए मणोऽणुकूलाए भवनविहीए उववेया कुसवि० जावचिट्ठंति ९।

एगोरुयदीवे तत्थ २ बहवे अनिगणा नामं दुमगणा पन्नत्ता समणाउसो ! जहा से अनेगसो मंतणुतं कंबलदुगुल्लकोसेज्जकालमिगपट्टचीणंसुयबरणातवारवणिगयतुआभरणचित्तसहिणगकल्लाणगभिंगिणीलकज्जलबहुवण्णरत्त पीतसुक्कलमक्खयमिगलोमहेमप्फरुण्णगअवसर्तगसिंधुओसभदामिलवंगकलिंगनेलिणतंतुमयभत्तिचित्ता वत्थविही बहुप्पकारा हवेज्ज वरपट्टणुग्गता वण्णरागकलिता तहेव ते अनियणावि दुमगणा अनेगबहुविविहवीससापरिणताए वत्थविधीए उववेया कुसविकुसवि० जाव चिट्ठंति १०। एगोरुयद्दीवे णं भंते ! दीवे मणुयाणं केरिसए आगारभावपडोयारे पन्नत्ते ?, गोयमा ! ते णं मणुया अनुवमतरसोमचारुरूवा भोगुत्तमगयलक्खणा भोगसस्सिरीया सुजायसव्वंगसुंदरंगा सुपतिट्ठियकुम्मचारुचलणा रत्तुप्पलपत्तमउयसुकुमालकोमलतला नगनगरसागरमगरचक्ककवरंकलक्खणंकियचलणा अणुपुव्वसुसाहतंगुलीया उन्नयतणुतंबणिद्धणखा संठियसुसि- लिट्ठगूढगुप्फा एणीकुरुविंदावत्तवट्टाणुपुव्वजंघा समुग्गणिमग्गगूढजाणू गतससणसुजातसण्णिभोरू वरवारणमत्ततुल्लविक्कमविलासितगती सुजातवरतुरगगुज्झदेसा आइण्णहतोव निरुवलेवा पमुइयवरतुरियसीहअतिरेगवट्टियकडी साहयसोणिंदमुसलदप्पणणिगरितवरकणगच्छक- (रु)सरिसवरवइरपलितमज्झा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—उज्जुयसमसहितसुजातजच्चतणुकसिणनिद्धआदेज्जलडहसुकुमालमउयरमणीज्जरोमराती गंगावत्तपयाहिणावत्ततरंगभंगुररविकिरणतरुणबोधितअकोसायंतपउमगंभीरवियडणाभी झसविहगसुजातपीणकुच्छी झसोदरा सुइकरणा पम्हवियडणाभा सण्णयपासा संगतपासा सुंदरपासा सुजातपासा मितमाइयपीणरतियपासा अकरुंडुयकणगरुयगनिम्मलसुजायनिरुवहयदेहधारी पसत्थबत्तीसलक्खणधरा कणगसिलातलुज्जलपसत्थसमयलोवचियविच्छिन्नपिहुलवच्छी सिरिवच्छंकियवच्छा पुरवरफलिहवट्टियभुया भुयगीसरविपुलभोगआयाणफलिहउच्छूढदीहबाहू जूयसन्निभपीणरतियपीवरपउट्ठसंठियसुसिलिट्ठविसिट्ठघणथिरसुबद्धसुनिगूढपव्वसंधी रत्ततलोवइतमउयमंसलपसत्थलक्खणसुजायअच्छिद्दजालपामी पीवरवट्टियसुजायकोमल-वरंगुलीया तंबतलिणसुचिरुइरनिद्धणक्खा । चंदपाणिलेहा सूरपाणिलेहा संखपाणिलेहा चक्कपाणिलेहा दिसासोअत्थियपाणिलेहा चंदसूरसंखचक्कदिसासो अत्थियपाणिलेहा अनेगवर-लक्खणुत्तमपसत्थसुचिरतियपाणिलेहा वरमहिसवराहसीहसद्दूलउसभणागवरपडिपुन्नविउलउन्नत-मइंदखंधा चउरंगुलसुप्पमाणकंबुवरसरिसगीवा अवट्ठितसुविभत्तसुजातचित्तमंसूमंसलसंठिय पसत्थसद्दूलविपुलहणुयाओतवितसिलप्पवालबिंबफलसन्निभाहरोट्ठा पंडुरससिसगलविमल-निम्मलसंखगोखीरफेणदगरयमुणालिया धवलदंतसेढी अखंडदंता अफुडियदंता अविरलदंता सुजातदंता एगदंतसेढिव्व अनेगदंता हुतवहनिद्धंतघोततत्ततवणिज्जरत्ततलतालुजीहा गरुलाय-यउज्जुतुंगणासा अवदालियपोंडरीयनयणा कोकासितधवलपत्तलच्छा आणामियचावरुइलकिण्ह-पुराइयसंठियसंगतआयातसुजाततणुकसिणनिद्धभुमया ।

—अल्लीणप्पमाणजुत्तसवणा सुस्सवणा पीणमंसलकवोलदेसभागा अचिरुग्गयबालचंद-संठियपसत्थविच्छिन्नसमणिडाला उडुवतिपडिपुण्णसोमवदणा छत्तागारुत्तमंगदेसा घननिचिय-सुबद्धलक्खणुण्णयकूडागारणिभपिंडियसिरसे दाडिमपुप्फपगासतवणिज्जसरिसनिम्मलसुजाय-केसंतकेसभूमी सामलिबोंडघणणिचयछोडियमिउविसयपसत्थसुहुमलक्खणसुगंधसुंदरभूय-मोयगभिंगिणीलकज्जलपहट्ठभमरगणनिद्धनिकुरुंब निचियकुंचियचियपदाहिणावत्तमुद्धसिरया लक्खणवंजणगुणोववेया सुजायसुविभत्तसुरूवगा पासाइया दरिसणिज्जा अभिरूवा पडिरूवा ।

ते णं मणुया हंसस्सरा कोंचस्सरा नंदिघोसा सीहस्सरा सीहघोसा मंजुस्सरा मंजुघोसा सुस्सरा सुस्सरनिग्घोसा छायाउज्जोतियंगमंगा वज्जरिसभनारायसंघयणा समचउरंससंठाणसंठिया सिणिद्धछवी निरायंका उत्तमपसत्थअइसेसनिरुवमतणू जल्लमलकलंकसेयरयदोसवज्जियसरीरा निरुवमलेवा अणुलोमवाउवेगा कंकग्गहणी कवोतपरिणामा सउणिव्व पोसपिट्ठंतरोरुपरिणता विग्गहियउन्नयकुच्छी पउमुप्पलसरिसगंधणिस्सासुरभिवदणा अट्ठधणुसयं ऊसिया, तेसिं मणुयाणं चउसट्ठि पिट्ठिकरंडगा पन्नत्ता समणाउसो ! —

—ते णं मणुया पगतिभद्दगा पगतिविणीतगा पगतिउवसंता पगतिपयणुकोहमाणमायालोभा मिउमद्दवसंपण्णा अल्लीणा भद्दगा विणीता अप्पिच्छा असंनिहिसंचया अचंडा विडिमंतरपरिवसणा जहिच्छियकामगामिणो य ते मणुयगणा पन्नत्ता समणाउसो ! । तेसि णं भंते ! मणुयाणं केवति-कालस्स आहारट्ठे समुप्पज्जति ?, गोयमा ! चउत्थभत्तस्स आहारट्ठे समुप्पज्जति ।

एगोरुयमणुईणं भंते ! केरिसए आगारभावपडोयारे पन्नत्ते ?, गोयमा ! ताओ णं मणुईओ

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

सुजायसव्वंगसुंदरीओ पहाणमहिलागुणेहिं जुत्ता अच्चंतविसप्पमाणपउमसूमालकुम्पसंठितविसिट्ठ-चलणाओ जुम्मिओ पीवरनिरंतरपुट्ठसाहितंगुलीता उन्नयरतियनलिणंव सुइणिद्धणखा रोमर-हियवट्टलट्ठसंठियअजहण्णपसत्थलक्खणअकोप्पजंघजुयला सुनिम्मियसुगूढजाणुमंडलसुबद्ध-संध कयलिक्खंभातिरेगसंठियणिव्वणसुकुमालमउयकोमलअविरलसमसहितसुजातव्टपी-वरणिरंतरोरू अट्ठावयवीचीपट्टसंठियपसत्थविच्छिन्नपिहुलसोणी वदणायामप्पमाणदुगुणित-विसालमंसलसुबद्धजहणवरधारणीतो वज्जविराइयपसत्थलक्खणणिरोदरा तिवलिवलीय-तणुणमियमज्झिताती उज्जुयसमसहितजच्चतणुकसिणणिद्धआदेज्जालडहसुविभत्तसुजातंकंतसो-भंतरुइलरमणिज्जरोमराई।

–गंगावत्तपदाहिणावत्ततरंगभंगुररविकिरणतरुणबोधितअकोसायंतपउमवणगंभीरविय-डणाभी अणुब्भडपसत्थपीणकुच्छी सण्णयपासा संगयपासा सुजायपासा मितमातियपीणरइयपासा अकरंडुयकणगरुयगनिम्मलसुजायणिरुवहयगातलट्ठी कंचणकलससमपमाणसमसहितसु-जातलट्ठचूचुयआमेलगजमलजुगलवट्टियअब्भुण्णयरतियसंठियपयोधराओ भुयंगणुपुव्व-तणुयगोपुच्छवट्टसमसहियणमियआएज्जललियवाहाओ तंबणहा मंसलग्गहत्था पीवरकोमल-वरंगुलीओ निद्धपाणिलेहा रविससिसंखचक्कसोत्थियसुविभत्तसुविरतियपाणिलेहा।

–पीणुण्णयकक्खवत्थिदेसा पडिपुन्नगलकवोला चउरंगुलसुप्पमाणकंबुवरसरिसगीवा मंसलसंठियपसत्थहणुया दाडिमपुप्फप्पगासपीवरकुंचियवराधरा सुंदरोत्तरोट्ठा दधिदगरयचंदकुंद-वासंतिमउलअच्छिद्दविमलदसणा रत्तुप्पलपत्तमउयसुकुमालतालुजीहा कणय(व)रमुउल-अकुडिलअब्भुग्गतउज्जुतुंगणासा सारदणवकमलकुमुदकुवलयविमुक्कदलणिगरसरिसल-क्खणअंकियकंतणयणा पत्तलचवलायंततंबलोयणाओ –

–आणामितचावरुइलकिण्हब्भराइसंठियसंगतआययसुजातकसिणनिद्धभमुया अल्लीणपमाणजुत्तसवणा पीणमट्ठरमणिज्जगंडलेहा चउरंसपसत्थसमणिडाला कोमुतिरयणि-करविमलपडिपुन्नसोमवयणा छत्तुन्नयउत्तिमंगा कुडिलसुसिणिद्धदीहसिरया छत्तज्झय-जुगथूभदामिणिकमंडलुकलसवाविसोत्थियपडागजवमच्छकुम्मरहवरमगरसुकथालअंकुस-अट्ठावयवीइसुपइट्ठकमयूरसि रिदामाभिसेयतोरणमेइणिउदधिवरभवणगिरिवरआयंसललिय-गतउसभसीहचमरउत्तमपसत्थबत्तीसलक्खणधरातो हंससरिसगतीतो कोतिलमधुरगिरसुस्सराओ

–कंता सव्वस्स अणुनताती ववगतवलिपलिया वंगदुव्वण्णवाहीदोभग्गसोगमुक्काओ उच्चत्तेण य नराण थोवूणमूसियाओ सभावसिंगाराचारचारुवेस संगतगतहसितभणियचेट्ठियविला-ससंलावणिउणजुत्तोवयारकुसला सुंदरथणजहनवदनकरचलणनयनमाला वण्णलावण्णजोव-णविलासकलिया नंदनवनविवरचारिणीउव्व अच्छराओ अच्छेरगपेच्छणिज्जा पासाईतातो दरिसणिज्जातो अभिरूवाओ पडिरूवाओ। तासि णं भंते ! मणुईणं केवतिकालस्स आहारट्ठे समुप्पज्जति ?, गोयमा ! चउत्थभत्तस्स आहारट्ठे समुप्पज्जति। ते णं भंते ! मणुया किमाहारमाहारेंति गोयमा ! पुढविपुप्फफलाहारा ते मणुयगणा पन्नत्ता समणाउसो !।

तीसे णं भंते ! पुढवीए केरिसए आसाए पन्नत्ते ?, गोयमा ! से जहानामए गुलेति वा खंडेति वा सक्कराति वा मच्छंडियाति वा भिसकंदेतिवा पप्पडमोयएति वा पुप्फउत्तराइ वा पउमुत्तराइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा अकोसितातिं वा विजतातिं वा महाविजयाइ वा आयंसोवसाति वा अणोवसाति वा चाउरक्के गोखीरे चउठाणपरिणए गुडखंडमच्छंडिउवणीए मंदग्गिकर्डीए वण्णेणं उववेए जाव फासेणं, भवेतारूवे सिता ?, नो इणट्ठे समट्ठे । तीसे णं पुढवीए एत्तो इट्ठयराए चेव जाव मणामतराए चेव आसाए णं पन्नत्ते, तेसि णं भंते ! पुप्फफलाणं केरिसए आसाए पन्नत्ते ?, गोयमा ! से जहानामए चाउरंतचक्कवट्टिस्स कल्लाणे पवरभोयणे सतसहस्सनिप्फन्ने वण्णेणं उववेते गंधेणं उववेते रसेणं उववेते फासेणं उववेते आसाइणिज्जे वीसाइणिज्जे दीवणिज्जे बिंहणिज्जे दप्पणिज्जे मयणिज्जे सव्विंदियगातपल्हायणिज्जे, भवेतारूवे सिता ?, नो तिणट्ठे समट्ठे ।

तेसि णं पुप्फफलाणं एत्तो इट्ठतराए चेव जाव आस्साए णं पन्नत्ते । ते णं भंते ! मणुया तमाहारमाहारित्ता कहिं वसहिं उवेंति ?, गोयमा ! रुक्खगेहालता णं ते मणुयगणा पन्नत्ता समणाउसो ! । ते णं भंते ! रुक्खा किंसंठिया पन्नत्ता ?, गोयमा ! कूडागारसंठिता पेच्छाघरसंठिता सत्तागारसंठिया झयसंठिया थूभसंठिया तोरणसंठिया गोपुरचेतियपा(या)लगसंठिया अट्टालग-संठिया पासादसंठिया हम्मतलसंठिया गवक्खसंठिया वालग्गपोत्तियसंठिता वलभीसंठिता अन्ने तत्थ बहवे वरभवणसयणासणविसिट्ठसंठाणसंठिता सुहसीयलच्छाया णं ते दुमगणा पन्नत्ता समणाउसो ! अत्थि णं भंते ! एगोरुयदीवे दीवे गेहाणि वा गेहावणाणि वा ?, नो तिणट्ठे समट्ठे, रुक्खगेहा-लया णं ते मणुयगणा प० सम० । अत्थि णं भंते ! एगूरूयदीवे २ गामाति वा नगराति वा जाव सन्निवेसाति वा ?, नो तिणट्ठे समट्ठे, जहिच्छितकामगामिणो ते मणुयगणा पन्नत्ता समणाउसो !

–अत्थि णं भंते ! एगूरुयदीवे असीति वा मसीइ वा कसीइ वा पणीति वा वणिज्जाति वा नो तिणट्ठे समट्ठे, ववगयअसिमसिकिसिपणियवाणिज्जा णं ते मणुयगणा पन्नत्ता समणाउसो !

अत्थि णं भंते ! एगूरुयद्दीवे हिरण्णेति वा सुवन्नेति वा कंसेति वा दूसेति वा मणीति वा मुत्तिएति वा विपुलधणकणगरयणमणिमोत्तियसंखसिलप्पवालसंतसारसावएज्जेति वा ?, हंता अत्थि, नो चेव णं तेसिं मणुयाणं तिव्वे ममत्तभावे समुप्पज्जति ।

अत्थि णं भंते ! एगोरुयदीवे रायाति वा जुवरायाति वा ईसरेति वा तलवरेइ वा माडंबियाति वा कोडुंबियाति वा इब्भाति वा सेट्ठीति वा सेनावतीति वा सत्थवा हाति वा ?, नो तिणट्ठे समट्ठे, ववगयइड्ढीसक्करा णं ते मणुयगणा पण्णत्ता समणाउसो !

–अत्थि णं भंते ! एगूरूयदीवे २ दासाति वा पेसाइ वा सिस्साति वा भयगाति वा भाइल्लगाइ वा कम्मगरपुरिसाति वा ?, नो तिणट्ठे समट्ठे, ववगतआभिओगिता णं ते मणुयगणा पण्णत्ता समणाउसो ! अत्थि णं भंते ! एगोरुयदीवे दीवे माताति वा पियाति वा भायाति वा भइणीति वा भज्जाति वा पुत्ताति वा धूयाइ वा सुण्हाति वा ?, हंता अत्थि, नो चेव णं तेसि णं मणुयाणं तिव्वे पेमबंधणे समुप्पज्जति, पयणुपेज्जबंधणा णं ते मणुयगणा पन्नत्ता समणाउसो ! ।

–अत्थि णं भंते ! एगुरुयदीवे अरीति वा वेरिएति वा घातकाति वा वहकाति वा पडिनीताति वा पच्चमित्ताति वा ?, नो तिणट्ठे समट्ठे, ववगतवेराणुबंधा णं ते मणुयगणा पन्नत्ता समणा-उसो ! । अत्थि णं भंते ! एगोरूए दीवे मित्ताति वा वतंसाति वा घडिताति वा सहीति वा सुहियाति महाभागाति वा संगतियाति वा ?, नो तिणट्ठे समट्ठे, ववगतपेम्मे ते मणुयगणा पन्नत्ता समणाउसो ! । अत्थि णं भंते ! एगोरूयदीवे आवाहाति वा वीवाहाति वा जण्णाति वा सद्धाति वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थालियापाकाति वा चेलोवणतणाति वा सीमंतुण्णयणाइ वा पिति(मत)पिंडनिवेदणाति वा ?, णो तिणट्ठे समट्ठे, ववगतआवाहविवाहजण्णभद्दथालिपागचोलोवणतणसीमंतुण्णयण-मतपिंडनिवेदणा णं ते मणुयगणा पण्णत्ता समणाउसो ! –

–अत्थि णं भंते ! एगोरुयदीवे २ इंदमहाति वा खंदमहाति वा रुद्दमहाति वा सिवमहाति वा वेसमणमहाइ वा मुगुंदमहाति वा नागमहाति वा जक्खमहाति वा भूतमहाति वा चेइयमहाइ वा थूभमहाति वा ?, नो तिणट्ठे समट्ठे, ववगतमहमहिमा णं ते मणुयगणा प० समणाउसो ! ।

–अत्थि णं भंते ! एगोरुयदीवे दीवे नडपेच्छाति वा नट्टपेच्छाति वा मल्लपेच्छाति वा मुट्ठियपेच्छाइ वा विडंबगपेच्छाइ वा कहगपेच्छाति वा णट्टपेच्छाति वा मल्लपेच्छाति वा मुट्ठियपेच्छाइ वा विडंबगेच्छाइ वा कहगपेच्छाति वा पवगपेच्छाति वा अक्खायगपेच्छाति वा लासगपेच्छाति वा लंखपे० मंखपे० तूणइल्लपे० तुंबवीणपे० कावणपे० मागहपे० जल्लपे० ?, नो तिणट्ठे समट्ठे, ववगतकोउहल्ला णं ते मणुयगणा पण्णत्ता समणाउसो ! –

–अत्थि णं भंते ! एगुरूयदीवे सगडाति वा रहाति वा जाणाति वा जुग्गाति वा गिल्लीति वा थिल्लीति वा पिपिल्लीइ वा पवहणाणि वा सिवियाति वा संदमाणियाति वा ?, नो तिणट्ठे समट्ठे, पादचारविहारिणो णं ते मणुस्सगणा पन्नत्ता समणाउसो ! । अत्थि णं भंते ! एगूरुयदीवे आसाति वा हत्थीति वा उट्टाति वा गोणाति वा महिसाति वा खराति वा घोडाति वा अजाति वा एलाति वा हंता अत्थि, नो चेव णं तेसिं मणुयाणं परिभोगत्ताए हव्वमागच्छंति ।

अत्थि णं भंते ! एगूरुयगदीवे दीवे सीहाति वा वग्घाति वा विगाति वा दीवियाइ वा अच्छाति वा परच्छाति वा परस्सराति वा तरच्छाति वा बिडालाइ वा सुणगाति वा कोलसुणगाति वा कोकंतियाति वा ससगाति वा चित्तलाति वा चिल्ललगाति वा ?, हंता अत्थि, नो चेव णं ते अन्नमन्नस्स तेसिं वा मणुयाणं किंचि आबाहं वा पबाहं वा उप्पायंति वा छविच्छेदं वा करेंति, पगतिभद्दका णं ते सावयगणा प० सम० ।अत्थि णं भंते ! एगुरूयदीवे दीवे सालीति वा वीहीति गोधूमाति वा जवाति वा तिलाति वा इक्खूति वा ?, हंता अत्थि, नो चेव णं तेसिं मणुयाणं परिभोगत्ताए हव्वमागच्छंति । अत्थि णं भंते ! एगूरुयदीवे दीवे गत्ताइ वा दरीति वा घंसाति वा भिगूति वा उवाएति वा विसमेति वा विज्ञलेति वा धूलीति वा रेणूति वा पंकेइ वा चलणीति वा ?, नो तिणट्ठे समट्ठे, एगूरुयदीवे णं दीवे बहुसमरमणिज्जे भूमिभागे पन्नत्ते समणाउसो ! ।

–अत्थि णं भंते ! एगूरुयदीवे दीवे खाणूति वा कंटएति वा हीरएति वा सक्कराति वा तणकयवराति वा पत्तकयवराइ वा असुतीति वा पूतियाति वा दुब्भिगंधाइ वा अचोक्खाति वा ? नो तिणट्ठे समट्ठे, ववगयखाणुकंटकहीरसक्करतणकयवरपत्तकयवरअसुतिपूतियदुब्भिगंधम-चोक्खपरिवज्जिए णं एगुरुयदीवे पन्नत्ते समणाउसो ! ।

अत्थि णं भंते ! एगुरुयदीवे दीवे दंसाति वा मसगाति वा पिसुयाति वा जूताति वा लिक्खाति वा ढंकुणाति वा ?, नो तिणट्ठे समट्ठे, ववगतदंसमसगपिसुतजूतलिक्खढंकुणपरिवज्जिए णं एगुरुयदीवे पन्नत्ते समणाउसो ! । अत्थि णं भंते ! एगुरुयदीवे अहीइ वा अयगराति वा महोरगाति वा ?, हंता अत्थि नो चेव णं ते अन्नमन्नस्स तेसिं वा मणुयाणं किंचि आबाहं वा पबाहं वा छविच्छेयं वा करेंति, पगइभद्दगा णं ते वालगगणा पन्नत्ता समणाउसो ! ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थि णं भंते ! एगुरुयदीवे गहदंडाति वा गहमुसलाति वा गहगज्जिताति वा गहजुद्धाति वा गहसंघाडगाति वा गहअवसव्वाति वा अब्भाति वा अब्भरुक्खाति वा संझाति वा गंधव्वनगराति वा गज्जिताति वा विज्जुताति वा उक्कपाताति वा दिसादाहाति वा निग्घाताति वा पंसुविट्ठीति वा जुवगाति वा जक्खालित्ताति वा धूमिताति वा महिताति वा रउग्घाताति वा चंदोवरागाति वा सूरोवरागाति वा चंदपरिवेसाइ वा सूरपरिवेसाति वा पडिचंदाति वा पडिसूराति वा इंदधणूति वा उदगमच्छाति वा अमोहाइ वा कविहसियाइ वा पाईणवायाइ वा पडीणवायाइ वा जाव सुद्धवाताति वा गामदाहाति वा नगरदाहाति वा जाव सण्णिवेसदाहाति वा पाणक्खतजणक्खयकुलक्खय-धणक्खयवसणभूतमणारिताति वा ?, नो तिणट्ठे समट्ठे ।

अत्थि णं भंते ! एगुरुयदीवे दीवे डिंबाति वा डमराति वा कलहाति वा बोलाति वा खाराति वा वेराति वा विरुद्धरज्जाति वा ?, नो तिणट्ठे समट्ठे, ववगतडिंबडमरकलहबोल-खारवेरविरुद्धरज्जविवज्जिता णं ते मणुयगणा पन्नत्ता समणाउसो ! ।

अत्थि णं भंते ! एगुरुयदीवे दीवे महजुद्धाति वा महासंगामाति वा महासत्थनिवयणाति वा महापुरिसवाणाति वा महारुधिरवाणाति वा नागवाणाति वा खेणवाणाइ वा तामसवाणाइ वा दुब्भूतियाइ वा कुलरोगाति वा गामरोगाति वा नगररोगाति वा मंडलरोगाति वा सिरोवेदणाति वा अच्छिवेदणाति वा कण्णवेदणाति वा नक्कवेदणाइ वा दंतवेदणाइ वा नखवेदणाइ वा कासाति वा सासाति वा जराति वा दाहाति वा कच्छूति वा खसरातिवा कुद्धाति वा कुडाति वा दगराति वा अरिसाति वा अजीरगाति वा भगंदराइ वा ।

—इंदग्गहाति वा खंदग्गहाति वा कुमारग्गहाति वा नागग्गहाति वा जक्खग्गहाति वा भूतग्गहाति वा उव्वेयग्गहाति वा धणुग्गहाति वा एगाहियग्गहाति वा बेयाहियगहिताति वा तेयाहिय- गहियाइ वा चाउत्थगाहियाति वा हिययसूलाति वा मत्थगसूलाति वा पाससूलाइ वा कुच्छिसूलाइ वा जोणिसूलाइ वा गाममारीति वा जाव सन्निवेसमारी वा पाणक्खय जाव वसणभूतमणारिताति या ?, नो तिणट्ठे समट्ठे ववगतरोगायंका णं ते मणुयगणा पन्नत्ता समणाउसो

—अत्थि णं भंते ! एगुरूयदीवे दीवे अतिवासाति वा मंदवासाति वा सुवुट्ठीइ वा मंदवुट्ठीति वा उद्दवाहाति वा पवाहाति वा दगुब्भेयाइ वा दगुप्पीलाइ वा गामवाहाति वा जाव सन्निवेसवाहाति वा पाणक्खय० जाव वसणभूतमणारिताति वा ?, नो तिणट्ठे समट्ठे, ववगतदगोवद्दवा णं ते मणुयगणा पन्नत्ता समणाउसो ! – अत्थि णं भंते ! एगुरूयदीवे दीवे अयागराति वा तम्बागराइ वा सीसागराति वा सुवण्णागराति वा रतणागराति वा वइरागराइ वा वसुहाराति वा हिरण्णवासाति वा सुवण्णवासाति वा रयणवासाति वा वइरवासाति वा आभरणवासाति वा पत्तवासाति वा पुप्फवासाति वा फलवासाति वा बीयवासा० मल्लवासा० गंधवासा० वण्णवासा० चुण्णवासा० खीरवुट्ठीति वा रयणवुट्ठीति वा हिरण्णवुट्ठीति वा सुवण्ण० तहेव जाव चुण्णवुट्ठीति वा सुकालाति वा दुकालाति वा सुभिक्खाति वा दुभिक्खाति वा अप्पग्घाति वा महग्घाति वा कयाइ वा महाविक्कयाइ वा सण्णिहीइ वा सचयाइ वा निधीइ वा निहाणाति वा चिरपोरामाति वा पहीणसामियाति वा पहीणसेउयाइ पहीणगोत्तागाराइं वा जाइं इमाइं गामागरनगरखेडकब्बडमडंबदोणमुहपट्टणा-समसंवाहसन्निवेसेसु सिंघाडगतिगचउक्कचच्चरचउमुहमहापहपहेसु नगरणिद्धमणसुसाणगिरि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कंदर- सन्तिसेलोवट्ठाणभवणगिहेसु सन्निक्खित्ताइं चिट्ठंति, नो तिणट्ठे समट्ठे ।

एगुरुयदीवे णं भंते ! दीवे मणुयाणं केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं पलिओवमस्स असंखेज्जइभागं असंखेज्जतिभागेण ऊणगं उक्कोसेण पलिओवमस्स असंखेज्जतिभागं । ते णं भंते ! मणुया कालमासे कालं किच्चा कहिं गच्छंति कहिं उववज्जंति ?, गोयमा ! ते णं मणुया छम्मासावसेसाउया मिहुणताइं पसवंति अउणासीइं राइंदियाइं मिहुणाइं सारक्खंति संगोविंति य, सारक्खित्ता २ उस्ससित्ता निस्ससित्ता कासित्ता अक्कट्ठा अव्वहिता अपरियाविया [पलिओवमस्स असंखिज्जइभागं परियाविय] सुहंसुहेणं कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवन्ति, देवलोयपरिग्गहा णं ते मणुयगणा पन्नत्ता समणाउसो ! ।

कहि णं भंते ! दाहिणिल्लाणं आभासियमणुस्साणं आभासियदीवे नामं दीवे पन्नत्ते ?, गोयमा ! जंबूद्दीवे दीवे चुल्लहिमवंतस्स वासधरपव्वतस्स दाहिणपुरच्छिमिल्लातो चरिमंतातो लवणसमुद्दं तिन्नि जोयण० सेसं जहा एगुरूयामं निरवसेसं सव्वं ।

कहि णं भंते ! दाहिणिल्लाणं नंगोलिमणुस्साणं पुच्छा, गोयमा ! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासधरपव्व० उत्तरपुरचछिमिल्लातो चरिमंतातो लवणसमुद्दं तिण्णि जोयणसताइं सेसं जहा एगुरुयमणुस्साणं । कहि णं भंते ! दाहिणिल्लाणं वेसाणियमणुस्साणं पुच्छा, गो० ! जंबूद्दीवे दीवे मंद० पव्व० दाहिणेणं चुल्लहिमवंतस्स वासधरपव्व० दाहिणपच्चत्थिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयण० सेसं जहा एगुरुयाणं ।

वृ. 'एगोरुयदीवस्स णं भंते !' इत्यादि, एकोरुकद्वीपस्य णमिति पूर्ववत् भदन्त ! 'कीदृशः' क इव दृश्यः 'आकारभावप्रत्यवतारः' भूम्यादिस्वरूपसम्भवः प्रज्ञप्तः ?, भगवानाह–गौतम ! एकोरुकद्वीपे 'बहुसमरमणीयः' प्रभूतसमः सन् रम्यो भूमिभागः प्रज्ञप्तः । 'से जहानामए आलिंग-पुक्खरेइ वा' इत्यादिरुत्तरकुरुगमस्तावदनुसर्त्तव्यो यावदनुसज्जनासूत्रं, नवरमत्र नानात्विदं–मनुष्या अष्टौ धनुःशतान्युच्छ्रिता वक्तव्याश्चतुःषष्टि पृष्ठकरण्डकाः–पृष्ठवंशाः, बृहत्प्रमाणानां हि ते बहवो भवन्ति, एकोनाशीतिं च रात्रिन्दिवानि स्वापत्यान्यनुपालयन्ति, स्थितिस्तेषां जघन्येन देशोनः पल्योपमासङ्ख्येयभागः, एतदेव व्याचष्टे–पल्योपमासङ्ख्येयभागन्यूनः, उत्कर्षतः परिपूर्ण पल्योपमासङ्ख्येयभागः । 'कहि णं भंते !' इत्यादि, क भदन्त ! दाक्षिणात्यानामाभाविकमनुष्याणा-माभाधिकद्वीपो नाम द्वीपः प्रज्ञप्तः ?, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य दक्षिणेन–दक्षिणस्यां दिशि क्षुल्लहिमवतो वर्षधरपर्वतस्य पूर्वस्माच्चरमान्तात् 'दक्षिणपूर्वेण' दक्षिणपूर्वस्यां दिशि लवणसमुद्रं क्षुल्लहिमवद्दंष्ट्राया उपरि त्रीणि योजनशतान्यवगाह्यात्रान्तरे दंष्ट्राया उपरि दाक्षिणात्यानामा- भाषिकमनुष्याणामाभाषिकद्वीपो नाम द्वीपः प्रज्ञप्तः, शेषवक्तव्यता एकोरुकवद्वक्तव्या यावत्स्थितिसूत्रम् ॥

'कहि णं भंते !' इत्यादि, क्व भदन्त ! दाक्षिणात्यानां नाङ्गोलिकमनुष्याणां नाङ्गोलिकद्वीपो नाम द्वीपः प्रज्ञप्तः ?, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मंदरस्य पर्वतसय 'दक्षिणेन' दक्षिणस्यां दिशि क्षुल्लहिमवतो वर्षधरपर्वतस्य पाश्चात्याच्चरमान्ताद् 'दक्षिणपश्चिमेन' दक्षिणपश्चिमायां दिशि लवणसमुद्रं त्रीणि योजनशतान्यवगाह्यात्रान्तरे दंष्ट्राया उपरि दाक्षिणात्यानां नाङ्गोलिकमनुष्याणां नाङ्गोलिकद्वीपो नाम द्वीपः प्रज्ञप्तः, शेषं यथैकोरुकाणां तथा वक्तव्यं यावत्स्थितिसूत्रम् ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

'कहि णं भंते !' इत्यादि, क्व भदन्त ! वैशालिकमनुष्यामां वैशालिकद्वीपो नाम द्वीपः प्रज्ञप्तः ?, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य 'दक्षिणेन' दक्षिणस्यां दिशि क्षुल्लहिमवतो वर्षधरपर्वतस्य पाश्चात्याच्चरमान्ताद् 'उत्तरपश्चिमेन' उत्तरपश्चिमायां दिशि लवणसमुद्रं त्रीणि योजनशतान्यवगाह्यात्रान्तरे दंष्ट्राया उपरि वैशालिकमनुष्याणां वैशालिकद्वीपो नाम द्वीपः प्रज्ञप्तः, शेषमेकोरुकवद् वक्तव्यं यावत्स्थितिसूत्रम् ॥

मू. (१४६) *कहि णं भंते ! दाहिणिल्लाणं हयकण्णमणुस्साणं हयकण्णदीवे नामं दीवे पन्नत्ते ?, गोयमा ! एगुरूयदीवस्स उत्तरपुरच्छिमिल्लातो चरिमंतातो लवणसमुद्दं चत्तारि जोयणसयाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं हयकण्णमणुस्साणं हयकण्णदीवे नामं दीवे पन्नत्ते, चत्तारि जोयणसयाइं आयामविक्खंभेणं बारस जोयणसया पन्नट्ठी किंचिविसेसूणा परिक्खेवेणं, से णं एगाए पउमवरवेतियाए अवसेसं जहा एगुरूयाणं ।*

कहि णं भंते ! दाहिणिल्लाणं गजकण्णमणुस्साणं पुच्छा, गोयमा ! आभासियदीवस्स दाहिणपुरच्छिमिल्लातो चरिमंतातो लवणसमुद्दं चत्तारि जोयणसताइं सेसं जहा हयकण्णाणं । एवं गोकण्णमणुस्साणं पुच्छा । वेसाणितदीवस्स दाहिणपच्चत्थिमिल्लातो चरिमंतातो लवणसमुद्दं चत्तारि जोयणसताइं सेसं जहा हयकण्णाणं । सक्कुलिकण्णाणं पुच्छा, गोयमा ! नंगोलियदीवस्स उत्तरपच्चत्थिमिल्लातो चरिमंतातो लवणसमुद्दं चत्तारि जोयणसताइं सेसं जहा हयकण्णाणं ।

आतंसमुहाणं पुच्छा, हतकण्णयदीवस्स उत्तरपुरच्छिमिल्लातो चरिमंतातो पंच जोयणसताइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं आयंसमुहमणुस्साणं आयंसमुहदीवे नामं दीवे पन्नत्ते, पंच जोयणसयाइं आयामविक्खंभेणं, आसमुहाईणं छ सया, आसकन्नाईणं सत्त, उक्कमुहाईणं अट्ठ, घनदंताइणं जाव नव जोयणसयाइं–

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! हयकर्णमनुष्याणां हयकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः ?, भगवानाह–गौतम ! एकोरुकद्वीपस्य पूर्वस्माच्चरमान्ताद् उत्तरपूर्वस्यां दिशि लवणसमुद्रं चत्वारि योजनशतान्यवगाह्यात्रान्तरे क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीपवेदिकान्तादपि चतुर्योजन-शतान्तरे दाक्षिणात्यानां हयकर्णमनुष्याणां हयकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः, से च चत्वारि योजश-तान्यायामविष्कम्भेन द्वादश पञ्चषष्ठानि योजनशतानि किञ्चिद्विशेषाधिकानि परिक्षेपेणे, शेषं यथैकोरुकमनुष्याणां । एवमाभाषिकद्वीपस्य पूर्वस्माच्चरमान्ताद्दक्षिणपूर्वस्यां दिशि चत्वारि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीपवेदिकान्ताच्चतुर्योज-नशतान्तरे गजकर्णमनुष्याणां गजकर्णो द्वीपो नाम द्वीपः प्रज्ञप्तः, आयामविष्कम्भपरिधिपरिमाणं हयकर्ण- द्वीपवत् । नाङ्गोलिकद्वीपस्य पश्चिमाच्चरमानताद्दक्षिणपश्चिमेन चत्वारि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे क्षुल्लहिमवद्दंष्ट्राया हयकर्णद्वीपवत् । नाङ्गोलिकद्वीपस्य पश्चिमाच्चर-मान्ताद्दक्षिण-पश्चिमेन चत्वारि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीप- वेदिकान्ताच्चतुर्योजनशतान्तरे गोकर्णमनुष्याणां गोकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः, आयाम-विष्कम्भपरिधिपरिमामं हयकर्णद्वीपवत् ।

वैशालिकद्वीपस्य पश्चिमाच्चरमान्ताद् उत्तरपश्चिमायां दिशि लवणसमुद्रमवगाह्य चत्वारि योजनशतानि अत्रान्तरे क्षुल्लहिमवद्दंष्ट्राया उपरि जम्बूद्वीपवेदिकान्ताच्चतुर्योजनशतान्तरे दाक्षि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णात्यानां शष्कुलीकर्णमनुष्याणां शष्कुलीकर्णद्वीपो नाम द्वीपः प्रज्ञप्तः, आयामविष्कम्भपरिधिपरिमाणं हयकर्णद्वीपवत्, पद्मवरवेदिकावनषण्डमनुष्यादिस्वरूपं च समस्तमेकुरकद्वीपवत्।

एवमेतेनाभिलापेनामीषां हयकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु पञ्च योजनशतानि लवणसमुद्रमवगाह्या पञ्चयोजनशतायामविष्कम्भा एकाशीत्यधिकपञ्चदशयोजनशतपरिक्षेपाः पद्मवरवेदिकावनषण्डमण्डितबाह्यप्रदेशा जम्बूद्वीपवेदिकान्तात्पञ्चयोजनशतप्रमाणान्तरा आदर्शमुखमेण्ढमुखायोमुखगोमुखनामानश्चत्वारो द्वीपा वक्तव्याः, तद्यथा–हयकर्णस्य परत आदर्शमुखो गजकर्णस्य परतो मेण्ढमुखो गोकर्णस्य परतोऽयोमुखः शष्कुलीकर्णस्य परतो गोमुखः। एतेषामप्यादर्शमुखादीनां चतुर्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं लवणसमुद्रं षट् षड् योजनशतान्यवगाह्य षडयोजनशतायामविष्कम्भाः सप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेपाः पद्मवरवेदिकावनषण्डमण्डितपरिसरा जम्बूद्वीपवेदिकान्तात् षड्योजनशतप्रमाणान्तरा अश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखनामानश्चत्वारो द्वीपा वक्तव्याः, तद्यथा–आदर्शमुखस्य परतोऽश्वमुखः, मेण्ढमुखस्य परतो हस्तिमुखः, अयोमुखस्य परतः सिंहमुखः, गोमुखस्य परतो व्याघ्रमुखः।

एतेषामश्वमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं सप्त सप्त योजनशतानि लवणसमुद्रमवगाह्य सप्तयोजनशतायामविष्कम्भास्त्रयोदशाधिकद्वाविंशतियोजनशतपरिरयाः पद्मवरवेदिकावनषण्डसमवगूढाः जम्बूद्वीपवेदिकान्तात्सप्तयोजनशतप्रमाणान्तरा अश्वकर्णहरिकर्णाकर्णकर्णप्रावरणनामानश्चत्वारो द्वीपा बोध्याः, तद्यथा–अश्वमुखस्य परतोऽश्वकर्ण हस्तिमुखस्य परतो हरिकर्ण सिंहमुखस्य परतोऽकर्ण व्याघ्रमुखस्य परतः कर्णप्रावरणः, तत एतेषामप्यश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकमष्टौ अष्टौ योजनशतानि लवणसमुद्रमवगाह्याष्टयोजनशतायामविष्कम्भा एकोनत्रिंशदधिकपञ्चविंशतियोजनशतपरिक्षेपाः पद्मवरवेदिकावनखण्डमण्डितपरिसरा जम्बूद्वीपवेदिकान्तादष्टयोजनशतप्रमाणान्तरा उल्कामुखमेघमुखविद्युन्मुखविद्युद्दन्ताभिधानाश्चत्वारो द्वीपा वक्तव्याः

तद्यथा–अश्वकर्णस्य परत उल्कामुखः हरिकर्णस्य परतो मेघमुखः अकर्णस्य परतो विद्युन्मुखः कर्णप्रावरणस्य परतो विद्युद्दन्तः, एतेषामप्युल्कामुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं नव नव योजनशतानि लवणसमुद्रमवगाह्य नवनवयोजनशतायामविष्कम्भाः पञ्चचत्वारिंशदधिकाष्टाविंशतियोजनशतपरिक्षेपाः पद्मवरवेदिकावनखण्डसमवगूढा जम्बूद्वीपवेदिकान्तात् नवयोजनशतप्रमाणान्तरा घनदन्तलष्टदन्तगूढदन्तशुधदन्तनामानश्चत्वारो द्वीपाः, तद्यथा–उल्कामुखस्य परतो घनदन्तः मेघमुखस्य परतो लष्टदन्तः विद्युन्मुखस्य परता गूढदन्तः विद्युद्दन्तस्य परतः शुद्धदन्तः।

एतेषामेव द्वीपानानवगाहायमविष्कम्भपरिरयपरिमाणसङ्ग्रहगाथाषट्कमाह–

॥१॥ "पढमंमि तिन्नि उ सया सेसाण सउत्तरा नव उ जाव।
ओगाहं विक्खंभं दीवाणं परिरयं वोच्छं॥

॥२॥ पढमचउक्कपरिरया बीयचउक्कस्स परिरओ अहिओ।
सोलेहिं तिहि उ जोयणसएहिं एमेव सेसाणं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ३ ॥ एगोरुयपरिखेवो नव चेव सयाइं अउणपण्णाइं ।
बारस पण्णट्ठाइं हयकण्णाणं परिक्खेवो ॥
॥ ४ ॥ पणरस एक्कासीया आयंसमुहाण परिरओ होइ ।
अट्ठार सत्तनउया आसमुहाणं परिक्खेवो ॥
॥ ५ ॥ बावीसं तेराइं परिखेवो होइ आसकन्नाणं ।
पणुवीस अउणतीसा उक्कामुहपरिरओ होइ ॥
॥ ६ ॥ दो चेव सहस्सां अट्ठेव सया हवंति पणयाला ।
घणदंतद्दीवाणं विसेसगहिओ परिक्खेवो ॥

व्याख्या—प्रथमे द्वीपचतुष्के चिन्त्यमाने त्रीणि योजनशतान्यवगाहनां—लवणसमुद्रावगाहं विष्कम्भं च, विष्कम्भग्रहणादायामोऽपि गृह्यते तुल्यपरिमाणत्वात्, जानीहि इति क्रियाशेषः, शेषाणां द्वीपचतुष्कानां शतोत्तराणि त्रीणि त्रीणि शतानि अवगाहनाविष्कम्भं तावज्ञानीयाद् यावन्नव शतानि, तद्यथा—द्वितीयचतुष्के चत्वारि शतानि, तृतीये पञ्च शतानि, चतुर्थे षट् शतानि, पञ्चमे सप्त शतानि, षष्ठेऽष्टौ शतानि, सप्तमे नव शतान, अत ऊर्ध्वं द्वीपानामेकरुकप्रभृतीनां 'परिरयं' परिरयप्रमाणं वक्ष्ये । प्रतिज्ञातमेव निर्वाहयति—'पढमचउक्क'त्यादि, 'प्रथमचतुष्के परिरयात्' प्रथमद्वीपचतुष्के परिरयपरिमाणात् द्वितीयचतुष्कस्य—द्वितीयद्वीपचतुष्टयस्य परिरयः—परिरयपरिमाणमधिकः षोडशैः षोडशोत्तरैस्त्रिभिर्योजनशतैः, 'एवमेव' अनेनैव प्रकारेण शेषाणां 'द्वीपानां' द्वीपचतुष्कानां परिरयपरिमाणमधिकं पूर्वपूर्वचतुष्कपरिरयपरिमाणादवसातव्यम

मू. (१४७) एगूरुयपरिक्खेवो नव चेव सयाइं अउणन्नाइं ।
बारसपन्नट्ठाइं हयकण्णाईणं परिक्खेवो ॥

वृ. एतदेव चैतेन दर्शयति—'एकोरुये'त्यादि 'एकोरुकपरिक्षेपे' एकोरुकोपलक्षितप्रथमद्वीपचतुष्कपरिक्षेपे नव शतानि एकोनपञ्चाशानि—एकोनपञ्चाशदधिकानि । ततस्त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु 'हयकण्णाण'मिति वचनात् हयकर्णप्रमुखाणां द्वितीयानां चतुर्णां द्वीपानां परिक्षेपो भवति, स च द्वादश योजनशतानि पञ्चषष्टानि—पञ्चषष्ट्यधिकानि । तत्रापि त्रिषु योजनशतेषु षोडसोत्तरेषु प्रक्षिप्तेषु ।

मू. (१४८) *आयंसमुहाईणं पन्नरसेकासीए जोयणसते किंचिविसेसाधिए परिक्खेवेणं, एवं एतेणं कमेणं उवउज्जिऊण नेतव्वा चत्तारि चत्तारि एगपमाणा, नाणत्तं ओगाहे, विक्खंभे परिक्खेवे पढमबीततितियचउक्कणं उग्गहो विक्खंभो परिक्खेवो भणितो, चउत्थचउक्क छजोयणसयाइं आयामविक्खंभेणं अट्ठारसत्ताणउते जोयणसते विक्खंभेणं । पंचमचउक्क सत्त जोयणसताइं आयामविक्खंभेणं बावीसं तेरसोत्तरे जोयणसए परिक्खेवेणं । छट्ठचउक्क अट्ठजोयणसताइं आयामविक्खंभेणं पणुवीसं गुणतीसजोयणसए परिक्खेवेणं । सत्तमचउक्क नवजोयणसताइं आयामविक्खंभेणं दो जोयणसहस्साइं अट्ठ पणयाले जोयणसए परिक्खेवेणं ।*

वृ. 'आयंसमुहाणं'ति आदर्शमुखप्रमुखाणां तृतीयानां चतुर्णां द्वीपाना परिरयपरिमाणं भवति, तच्च पञ्चदश योजनशतान्येकाशीत्यधिकानि । ततो भूयोऽपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु 'आसमुहाणं'ति अश्वमुखप्रभृतीनां चतुर्थानां चतुर्णां द्वीपानां परिक्षेपः, तद्यथा—अष्टादश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योजनशतानि सप्तनवतानि–सप्तनवत्यधिकानि। तेष्वपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु 'आसकण्णाणं'ति अश्वकर्णप्रमुखाणां पञ्चानां चतुर्णां द्वीपानां परिक्षेपो भवति, तद्यथा–द्वाविंसतियोजनशतानि त्रयोदशानि–त्रयोदशाधिकानि। ततो भूयऽपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु 'उल्कामुखपरिरयः' उल्कामुखषष्ठद्वीपचतुष्कपरिरयपरिमाणं भवति, तद्यथा–पञ्चविंशतियोजनशतानि एकोनत्रिंशानि–एकोनत्रिंशदधिकानि।

ततः पुनरपि त्रिषु योजनशतेषु षोडशोत्तरेषु प्रक्षिप्तेषु 'घनदन्तद्वीपस्य' (पानां) घनदन्त-प्रमुखसप्तमद्वीपचतुष्कस्य परिक्षेपः, तद्यथा–द्वे सहस्र अष्टौ शतानि पञ्चचत्वारिंशानि–पञ्चचत्वा-रिंशदधिकानि 'विसेसमहिओ' इति किञ्चिद्विशेषाधिकः अधिकृतः परिक्षेपः, पञ्चचत्वारिंशानि किञ्चिद्विशेषाधिकानीति भावार्थ, इदं च पदमन्तेऽभिहितत्वात्सर्वत्राप्यभिसम्बन्धनीयं, तेन सर्वत्रापि किञ्चिद्विशेषाधिकमुक्तरूपं परिरयपरिमाणमवसातव्यं।

तदेवमेते हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसङ्ख्ययाऽष्टाविंशति, एवं हिमवत्तुल्यवर्णप्रमाणपद्महृदप्रमाणायामविष्कम्भावगाहपुण्डरीकहृदोपशोभिते शिखरिण्यपि पर्वते लवणोदार्णवजलसंस्पर्शादारभ्य यथोक्तप्रमाणान्तराश्चतसृषु विदिक्षु एकोरुकादिनामानोऽ-क्षूणापान्तरालायमविष्कम्भा अष्टाविंशतिसङ्ख्या द्वीपा वेदितव्याः, तथा चाह–

मू. (१४९) *जस्स य जो विक्खंभो उग्गहो तस्स तत्तिओ चेव।*
पढमाइयाण परिरतो जाण सेसाण अहिओ उ॥

मू. (१५०) *सेसा जहा एगुरूयदीवस्स जाव सुद्धदंतदीवे देवलोकपरिग्गहा णं ते मणुयगणा पन्नत्ता समणाउसो!। कहि णं भंते! उत्तरिल्लाणं एगुरूयमणुस्साणं एगुरूयदीवे नामं दीवे प०?, गोयमा! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं सिहरिस्स वासधरपव्वयस्स उत्तरपुरच्छिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणसताइं ओगाहित्ता एवं जहा दाहिणिल्लाण तहा उत्तरिल्लाण भाणितव्वं, नवरं सिहरिस्स वासहरपव्वयस्स विदिसासु, एवं जाव सुद्धदंतदीवेत्ति जाव सेत्तं अंतरदीवका॥*

"कहि णं भंते! उत्तरिल्लाणं एगोरुयमणुस्साणं एगोरुयदीवे नामं दीवे पन्नत्ते? गोयमा जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं सिहरिपव्वयस्स पुरच्छिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणसयाइं ओगाहित्ता तत्थ णं उत्तरिल्लाणं एगोरुयमणुस्साणं एगोरुयदीवे नामं दीवे पण्णत्ते" इत्यादि सर्वं तदेव, नवरमुत्तरेण विभाषा कर्त्तव्या, सर्वसङ्ख्यया षड्पञ्चाशदन्तरद्वीपाः, उपसंहारमाह–'सेत्तमंतरदीवगा'ते एतोऽन्तरद्वीपकाः

मू. (१५१) *से किं तं अकम्मभूमगमणुस्सा?, २ तीसविधा पन्नत्ता, तंजहा–पंचहिं हेमवएहिं, एवं जहा पन्नवणापदे जाव पंचहिं उत्तरकुरूहिं, सेत्तं अकम्मभूमगा।*

से किं तं कम्मभूमगा?, २ पन्नरसविधा पन्नत्ता, तंजहा–पंचहिं भरहेहिं पंचहिं एरवएहिं पंचहिं महाविदेहेहिं, ते समासतो दुविहा पन्नत्ता, तंजहा–आयरिया मिलेच्छा, एवं जहा पन्नवणापदे जाव सेत्तं आयरिया, सेत्तं गब्भवक्कंतिया, सेत्तं मणुस्सा॥

वृ. अकर्म्मभूमकाः कर्म्मभूमकाश्च यता प्रज्ञापनायां प्रथमे प्रज्ञापनाख्ये पदे तथैव वक्तव्या यावत् 'सेत्तं चरित्तारिया सेत्तं मणुस्सा' इति पदम्, इह तु ग्रनथगौरवभयान्न लिख्यत इति, उप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संहारमाह–'सेत्तं मणुस्सा' त एते मनुष्याः ॥ तदेवमुक्ता मनुष्याः, सम्प्रति देवानभिधित्सुराह–

तृतीय प्रतिपतौ मनुष्याधिकारः समाप्तः

–: देव अधिकारः–

मू. (१५२) *से किं तं देवा ?, देवा चउव्विहा पन्नत्ता, तंजहा–भवणवासी वाणमंतरा जोइसिया वेमाणिया ।*

वृ. 'से किं त' मित्यादि, अख के त्ते देवाः ?, सूरिराह–देवाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा–भवनवासिनो वानमन्तरा ज्योतिष्का वैमानिकाः, अमीषां च शब्दानां व्युत्पत्तिर्यथा प्रज्ञापनाटीकायां तथा वेदितव्या ।

मू. (१५३) *से किं तं भवणवासी ?, २ दसविहा पन्नत्ता, तंजहा–असुरकुमारा जहा पन्नवणापदे देवाणं भेओ तहा भाणितव्वो जाव अणुत्तरोववाइया पंचविधा पन्नत्ता, तंजहा–विजयवेजयंत जाव सव्वट्ठसिद्धगा, सेत्तं अनुत्तरोववातिया ॥*

वृ. 'से किं त'मित्यादि, अथ के ते भवनवासिनः ?, सूरिराह–भवनवासिनो दशविधाः प्रज्ञप्ताः, एवं देवानां प्रज्ञापनागतप्रथमप्रज्ञापनाख्यपद इव तावद्भेदो वक्तव्यो यावत्सर्वार्थदेवा इति ॥

मू. (१५४) *कहि णं भंते ! भवणवासिदेवाणं भवना पन्नत्ता ?, कहि णं भंते ! भवणवासी देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए, एवं जहा पन्नवणाए जाव भवणवासाइता । त(ए)त्थ णं भवणवासीणं देवाणं सत्त भवणकोडीओ बावत्तरि भवणवाससयसहस्सा भवंतितित्तिमक्खाता, तत्थ णं बहवे भवणवासी देवा परिवसंति–असुरा नाग सुवन्ना य जहा पन्नवणाए जाव विहरंति ॥*

वृ. सम्प्रति भवनवासिनां देवानां भवनवसनप्रतिपादनार्थमाह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! भवनवासिनां देवानां भवनानि प्रज्ञप्तानि ?, क भदन्त ! भवनवासिनो देवाः परिवसन्ति ?, भगवनाह–गौतम ! 'इमीसे ण'मित्यादि, 'अस्याः' प्रत्यक्षत उपलभ्यमानाया यत्र वयमास्महे रत्नप्रभायाः पृथिव्याः 'अशीत्युत्तरयोजनशतसहस्रबाहल्यायाः' अशीत्युत्तरम्–अशीतिसहस्राधिकं योजनशतसहस्रं बाहल्यं–पिण्डभावो यस्याः सा तथा, तस्यां उपर्येकं योजनसहस्रमवगाह्याधस्तादेकं योजनसहस्रं वर्जयित्वा मध्ये 'अष्टसप्तते' अष्टसप्ततिसहस्राधिके योजनशतसहस्रे ।

'अत्र' एतस्मिन् स्थाने भवनवासिनं देवनां सप्त भवनकोटयो द्विसप्ततिर्भवनावासशतसहस्राणि भवन्तीति आख्यातानि मया शेषैश्च तीर्थकृद्भिः, तत्र सप्तकोटयादिभावनैवं–चतुःषष्टि शतसहस्राणि भवनानामसुरकुमाराणां चतुरशीति शतसहस्राणि नागकुमाराणां द्विसप्तति शतसहस्राणि सुवर्ण्णकुमाराणां षण्णवति शतसहस्राणि वायुकुमाराणां, द्वीपकुमारादीनां षण्णां प्रत्येकं षटसप्तति शतसहस्राणि भवनानां, ततः सर्वसङ्ख्यया यथोक्तं भवनसङ्ख्यानं भवति ।

'ते णं भवणा' इत्यादि, तानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, णमिति वाक्यालङ्कारे भवनानि बहिः 'वृत्तानि' वृत्ताकाराणि अन्तः समचतुरस्राणि अधस्तलभागेषु पुष्करकर्णिकासंस्थानसंस्थितानि, 'भवणवण्णओ भाणियव्वो जहा ठाणपदे जाव पडिरूवा' इति, उक्तप्रकारेण भवनवर्णको भणितव्यो यथा प्रज्ञापनायां द्वितीये स्थानाख्ये पदे, स च तावद् यावत् 'पडिरूवा' इति पदं।

स चैवम्–"उक्किण्णंतरविउलगंभीरखायपरिखा पागारट्टालयकचाडतोरणपडिदुवारदेस-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागा जंतसयग्घिमुसलमुसंडिपरिवारिया अजोज्झा सयाजया सयागुत्ता अडयालकोट्टरइया अडयालकयवणमाला खेमा सिवा किंकरअमरदंडोवरक्खियालाउल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिण्णपंचंगुलितला उवचियचंदणकलसा चंदणघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारियमल्लादमकलावा पंचवण्णसरसमुक्कपुप्फपुंजोवयराकलिया कालागुरुपवरकुंदुरुक्कतुरुक्कधूमवघमघेंत गंधुद्धुयाभिरामा सुगन्धवरगंधगंधिया गंधवट्टिभूया अच्छरगणसंघसंविकिण्णा दिव्वतुडियसद्दसंपणदिया सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्ककडच्छाया सप्पभा समिरीया सउज्जोया पासाईया दरसणिज्जा अभिरूवा पडिरूवा'' इति, अस्य व्याख्या–उत्कीर्णमिव उत्कीर्ण अतीव व्यक्तमिति भावः, उत्कीर्णमन्तरं यासां खातपरिखानां ता उत्कीर्णान्तराः किमुक्तं भवति ?

खातानां परिखाणांच स्पष्टवैविक्त्योन्मीलनार्थमपान्तराले महती पाली समस्तीति, खातानि च परिखाश्च खातपरिखाः उत्कीर्णान्तरा विपुलाविस्तीर्णा गम्भीरा–अलब्धमध्यभागाः खातपरिखा येषां भवनानां परितस्तानि उत्कीर्णान्तरविपुलगम्भीरखातपरिखानि, खातपरिखाणां चायं प्रतिविशेषः–परिखा उपरि विशालऽघः सङ्कुचिता, खातं तूभयत्रापि सममिति, 'पागारट्टालककवाडपडिदुवारदेसभागा' इति प्रतिभवनं प्राकारेषु अट्टालककपाटतोरणप्रतिद्वाराणि–अट्टालककपाटतोरणप्रतिद्वाररूपा देशभागा–देशविशेषा येषु तानि प्राकाराट्टालककपाटतोरणप्रतिद्वारदेशभागानि, तत्राट्टालकाः–प्राकारस्योपरि भृत्याश्रयविशेषाः कपाटानि–प्रतोलीद्वारसत्कानि, एतेन प्रतोल्यः सर्वत्र सूचिता अन्यथा कपाटानामसम्भवात, तोरणानि–प्रतीतानि, तानि च प्रतोलीद्वारेषु, प्रतिद्वाराणि–मूलद्वारापान्तरालवर्त्तीनि लघुद्वाराणि ।

तथा 'जंतसयग्घिमुसलमुसंढिपरिवारिया' इति यन्त्राणि–नानाप्रकाराणि शतघ्नो–महायष्टयो महाशिला वा याः पातिताः सत्यः पुरुषाणां शतानि घ्नन्ति मुशलानि–प्रतीतानि मुषण्ढयः–शस्त्रविशेषास्तैः परिवारितानि–समन्ततो वेष्टितानि अत एवायोध्यानि–परैर्योद्धुमशक्यानि अयोध्यत्वादेव 'सदाजयानि' सदा–सर्वकालं जयो येषु तानि सदाजयानि सर्वकालं जयवन्तीति भावः, तथा सदा–सर्वकालं गुप्तानि प्रहरणैः पुरुषैश्च योद्धृ भि :सर्वतः–समन्ततो निरन्तरं परिवारिततया परेषामसहमानानां मनागपि प्रवेशासम्भवात् 'अडयालकोट्टरइया' इति अष्टाचत्वारिंशद्भेदभिन्नविच्छित्तिकलिताः कोष्ठका–अपवरका रचिताः स्वयमेव रचनां प्राप्ता येषु तान्यष्टचत्वारिंशत्कोष्ठकरचितानि, सुखादिदर्शनात्पाक्षिको निष्ठान्तस्य परनिपातः, तथाऽष्टाचत्वारिंशद्भेदभिन्नविच्छित्तयः कृता वनमाला येषु तानि अष्टचत्वारिंशत्कृतवनमालानि, अन्ये त्वभिदधति–अडयालशब्दो देशीवचनात् प्रशंसावाची, ततोऽयमर्थः–

'प्रशस्तकोष्ठकरचितानि प्रशसतकृतवनमालानी' ति तथा 'क्षेमाणि' परकृतोपद्रवरहितानि, 'शिवानि' सदा मङ्गलोपेतानि, तथा किङ्कराः–किङ्करभूता येऽमरास्तैर्दण्डैः कृत्वा उपरक्षितानि–सर्वतः समन्ततो रक्षितानि किङ्करामरदम्डोपरक्षितानि, 'लाउल्लोइयमहिया' इति लाइयं नाम यद्भूमेर्गोमयादिना उपलेपनम् 'उल्लोइयं' कुडयानां मालस्य सेटिकादिभि संमृष्टीकरणं लाइयोल्लोइयाभ्यां महितानि–पूजितानि लाइयोल्लोइयमहितानि, तथा गोशीर्षेण–गोशीर्षनामकेन चन्दनेन सरसरक्तचन्दनेन च दर्दरेण–बहलेन चपेटाप्रकारेण वा दत्ताः पञ्चाङ्गुलयस्तला–हस्तका येषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तानि गोशीर्षसरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितलानि, तथा उपचिता–निवेशिताः चन्दनकलशा–मङ्गल्यकलशा येषु तानि उपचितचन्दनकलशानि, 'चंदणघडसुकयतोरणपडिदुवारदेसभागा' इति चन्दनघटैः–चन्दनकलशैः सुकृतानि शोभितानीति तात्पर्यार्थ यानि तोरणानितानि चन्दनघट-सुकृतानि तोरणानि प्रतिद्वारदेशभागं–द्वारदेशभागे येषु तानि चन्दनघटसुकृततोरणप्रति-द्वारदेशभागानि। तथा 'आसत्तोसत्तविपुलवट्टवग्घारियमल्लदामकलावा' इति आ–अवाङ् अधोभूमौ सक्त–आसक्तो भूमौ लग्न इत्यर्थ ऊर्ध्वं सक्त उत्सक्तः उल्लोचतले उपरि संबद्ध इत्यर्थ विपुलो–विस्तीर्णो वृत्तो–वर्त्तुलः 'वग्घारिय' इति प्रलम्बितो माल्यदामकलापः–पुष्पमालासमूहो येषु तानि आसक्तोत्सक्तविपुलवृत्तप्रलम्बितमाल्यदामकलापानि, तथा पञ्चवर्णेन सुरभिणा–सुरभिगन्धेन मुक्तेन–क्षिप्तेन पुष्पपुञ्जलक्षणेनोपचारेण–पूजया कलितानि पञ्चवर्णसुरभिमुक्त-पुष्पपुञ्जोपचारकलितानि, तथा कालागुरु–प्रसिद्धः प्रवरः–प्रधानः कुन्दुरुष्कः–चीडा तुरुष्कं–सिल्हकं कालागुरुश्च प्रवरकुन्दुरुष्कतुरुष्के च कालागुरुप्रवरकुन्दुरुष्कतुरुष्कामि तेषां धूपस्य यो मधमधायमानो गन्ध उद्धूत–इतस्ततो विप्रसृतस्तेनाभिरामाणि–रमणीयानि काला-गुरुप्रवरुकन्दुरुष्कतुरुष्कधूपमघमघायमानगन्धोद्धुताभिरामाणि।

तथा शोभनो गन्धो येषां ते सुगन्धाः ते च ते वरगन्धाश्च–वासाः सुगन्धवरगन्धास्तेषां गन्धः स एष्वस्तीति सुगन्धवरगन्धगन्धिकानि 'अतोऽनेकस्वरा'दितीकप्रत्ययः, अत एव गन्धवर्त्तिभूतानि, सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पानीति भावः, तथाऽप्सरोगणानां सङ्घः–समुदायस्तेन सम्यग्–रमणीयतया विकीर्णानि–व्याप्तानि अप्सरोगणसङ्घविकीर्णानि, तथा दिव्यानामातोद्यानां–वेणुवीणामृदङ्गानां ये शब्दास्तैः संप्रणदितानि–सम्यकश्रोत्रमनोहारितया प्रकर्षेण सर्वकालं नदितानि–शब्दवन्ति दिव्यत्रुटितशब्दसंप्रणदितानि सर्वरत्नमयानि–सर्वात्मना सामस्त्येन रत्नमयानि न त्वेकदेशेन सर्वरत्नमयानि–समस्तरत्नमयानि।

–अच्छानि–आकाशस्फटिकवदतिस्वच्छानि श्लक्ष्णानि–श्लक्ष्णपुद्गलस्कन्धनिष्पन्नानि श्लक्ष्णदलनिष्पन्नपटवत् लण्हानि–मसृणानि घुण्टितपटवत् 'घट्ठा' इति घृष्ठानीव घृष्टानि खरशानया पाषाणप्रतिमावत्, 'मट्ठा' इति मृष्टानीव मृष्टानि सुकुमारशानया पाषाणप्रतिमावदेव, अत एव नीरजांसि स्वाभाविकरजोरहितत्वात् 'निर्मलानि' आगन्तुकमलासम्भवात् 'निष्पङ्कानि' कलङ्कविक-लानि कर्दमरहितानि वा 'निक्ककडच्छाया' इति निष्कङ्कटा–निष्कवचा निरावरणा निरुपघातेति भावार्थ छाया–दीप्तिर्येषां तानि निष्कङ्कटच्छायानि 'सप्रभाणि' स्वरूपतः प्रभावन्ति 'समरीचीनि' बहिर्विनिर्गतकिरणजालानि 'सोद्द्योतानि' बहिर्व्यवस्थितवस्तुस्तोमप्रकाशकराणि 'प्रासादीयानि' प्रसादाय–मनःप्रसत्तये हितानि मनःप्रसत्तिकारीणीति भावः, तथा 'दर्शनीयानि' दर्शनयोग्यानि यानि पश्यतश्चक्षुषी न श्रमं गच्छत इति भावः, 'अभिरूवा' इति अभि–सर्वेषां द्रष्टणां मनःप्रसादा-नुकूलतयाऽभिमुखं रूपं येषां तानि अभिरूपाणि–अत्यन्कमनीयानीत्यर्थः अत एव 'पडिरूवा' इति प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपाणि, अथवा प्रतिक्षणं नवं नवमिव रूपं येषां तानि प्रतिरूपाणि। तदेवं भवनस्वरूपमुक्तमिदानीं यत्पृष्टं 'क भदन्त!' भवनवासिनो देवाः परिवसन्ती'ति तत्रोत्तरमाह–'तत्थ णं बहवे भवणवासी देवा परिवसंति असुरा नागा भेदो भाणियव्वो जाव

9 | 12

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहरंति एवं जाव ठाणपदे वत्तव्वया सा भाणियव्वा जाव चमरेणं असुरकुमारिंदे असुरकुमारराया परिवसइ' इति, 'तत्र' तेष्वनन्तरोदितस्वरूपेषु भवनेषु बहवो भवनवासिनो देवाः परिवसन्ति, तानेव जातिभेदत आह–'असुरा नागा' इत्यादि यावत्करणादेवं परिपूर्ण पाठः–

॥१॥ "असुरा नाग सुवण्णा विज्जू अग्गी य दीव उदही य
दिसिपवणथणियनामा दसहा एए भवणवासी ॥

चूडामणिमउडरयणा १ भूसणनागफण २ गरुल ३ वइर ४ पुण्णकलसअंकउप्फेस ५ सीह ६ हयवर ७ गय ८ मगरंक ९ वरवद्धमाण १० निजुत्तचित्तचिंधगया सुरूवा महिड्ढिया महज्जुइया महायसा महाबला महाणुभागा महासोक्खा हारविराइयवच्छा कडगतुडियथंभियभुया अंगयकुंडलमट्ठगंडतलकण्णा पीढधारी विचित्तहत्थाभरणा विचित्तमालामउली (मउडा) कल्लाणगपवरवत्थपरिहिया कल्लाणगपवरमल्लाणुलेवणवरा भासुरबोंदी पलंबवणमालधरा दिव्वेणं वण्णेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पहाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेस्साए दस दिसाओ उज्जोवेमाणा।

ते णं तत्थ साणं २ भवणावाससयसहस्साणं साणं साणं सामाणियसाहस्सीणं साणं साणं तायत्तीसगाणं साणं साणं लोगपालाणं साणं २ अग्गमहिसीणं साणं २ अणीयाणं साणं साणं अणियाहिवईणं साणं २ आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं भवणवासीणं देवाणं देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महयरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महयाऽऽहयनट्टगीयवाइयतंतीतलतालघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति" अस्य व्याख्या–

'असुराः' असुरकुमाराः, एवं नागकुमाराः सुवर्णकुमारा विद्युत्कुमारा अग्निकुमारा द्वीपकुमारा उदधिकुमारा दिक्कुमाराः पवनकुमाराः स्तनितकुमाराः, 'दशधा' दशप्रकाराः 'एते' अनन्तरोदिता असुरकुमारादयो भवनवासिनो यथाक्रमं चूडामणिमुकुटरत्नभूषणनियुक्तनागस्फटादिविचित्रचिह्नगताश्च, तथाहि–असुरकुमारा भवनवासिनश्चूडामणिमुकुटरत्नाः, चूडामणिर्नाम मुकुटे रत्नं चिह्नभूतं येषां ते तथा, नागकुमारा भूषणनियुक्तनागस्फटारूपचिह्नधराः, सुवर्णकुमाराः भूषणनियुक्तागरुडरूपचिह्नधराः, विद्युत्कुमाराः भूषणनियुक्तवज्ररूपचिह्नधराः, वज्रं नाम शक्रस्यायुधं, अग्निकुमारा भूषणनियुक्तपूर्णकलशरूपचिह्नधराः, द्वीपकुमारा भूषणनियुक्तसिंहरूपचिह्नधराः, उदधिकुमारा भूषणनियुक्तहयवररूपचिह्नधारिणः, दिक्कुमारा भूषणनियुक्तगजरूपचिह्नधारिणः, वायुकुमारा भूषणनियुक्तमकररूपचिह्नधराः, स्तनितकुमारा भूषणनियुक्तवर्द्धमानकरूपचिह्नधारिणः, भूषणमत्र मुकुटो द्रष्टव्योऽन्यत्र 'मउडवरवद्धमाणनिजुत्तचित्तचिंधगया' इति पाठदर्शनाद्, वर्द्धमानकं–शरावसंपुटं, पुनः सर्वे कथम्भूताः ? इत्याह–

'सुरूपाः' शोभनं रूपं येषां ते तथा, अत्यन्तकमनीयरूपाय इत्यर्थः, 'महिड्ढिया महज्जुइया महायसा महाबला महाणुभागा महासोक्खा' इति प्राग्वत्, 'हारविराइयवच्छा' इति हारैर्विराजितं वक्षो येषां ते हारविराजितवक्षसः, 'कडगतुडियथंभियभुया' इति कटकानि–कलाचिकाभरणानि त्रुटितानि–बाहुरक्षकास्तैः स्तम्भिताविव स्तम्भितौ भुजौ येषां त कटकत्रुटितस्तम्भितभुजाः, तथाऽङ्गदानि–बाहुशीर्षाभरणविशेषरूपाणि कुण्डले–कर्णाभरणविशेषरूपे, तथा मृष्टौ–मृष्टीकृतौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गण्डौ–कपोलौ यैस्तानि मृष्टगण्डानि कर्णपीठानि–आभरणविशेषरूपाणि धारयन्तीत्येवंशीला अङ्गदकुण्डलमृष्टगण्डकर्णपीठधारिणः, तथा विचित्राणि–नानारूपाणि हस्ताभरणानि येषां ते विचित्रहस्ताभरणाः। तथा 'विचित्तमालामउलिमउडा' इति, विचित्रा माला–कुसुमस्रग् मौलौ–मस्तके मुकुटं च येषां ते विचित्रमालामौलिमुकुटाः, तथा कल्याणकं–कल्याणकारि प्रवरं वस्त्रं परिहितं यैस्ते कल्याणकवस्त्रपरिहिताः, सुखादिदर्शनान्निष्ठान्तस्यात्र पाक्षिकः परनिपातः, तथा कल्याणकं– कल्याणकारि यत् प्रवरं माल्यं–पुष्पदाम यच्चानुलेपनं तद्धरन्तीत कल्याणकप्रवर-माल्यानुलेपनधराः, तथा भास्वरा–देदीप्यमाना बोन्दिशरीरं येषां ते भास्वरबोन्दयः, तथा प्रलम्बत इति प्रलम्बा या वनमालां तां धरन्तीति प्रलम्बवनमालाधराः।

दिव्येन 'वर्णेन' कृष्णादिना 'दिव्येन गन्धेन' सुरभिणा 'दिव्येन स्पर्शेन' मृदुस्निग्धादिरूपेण दिव्येन शक्तिविशेषमपेक्ष्य संहनननेव संहननेन न तु साक्षात्संहननेन, देवानां संहननासम्भवात्, संहननं हि अस्थिरचनात्मकं, न च देवानामस्थीनि सन्ति, तथा चोक्तं प्रागेव–"देवा असंघयणी तेसिं नेव सिरा" इत्यादि, 'दिव्येन संस्थानेन' समचतुरस्रूपेण भवधारणीयशरीरस्य, तेषा-मन्यसंस्थानासम्भवात्, 'दिव्यया ऋद्धया' परिवारादिकया 'दिव्यया द्युत्या' इष्टार्थसंप्रयोगलक्षणया, 'द्युअभिगमने' इतिवचनात् 'दिव्यया प्रभया' भवनावासगतया 'दिव्यया छायया' समुदायशोभया 'दिव्येनार्चिषा' स्वशरीरगतरत्नादितेजोज्वालया 'दिव्येन तेजसा' शरीरप्रभवेन 'दिव्यया लेश्यया' देवर्णसुन्दरतया दश दिशः 'उदद्योतयन्तः' प्रकाशयन्तः 'पभासेमाणा' इति शोभयन्तस्ते भवन-वासिनो देवा णमिति वाक्यालङ्कारे 'तत्र' स्वस्थाने 'साणं साणं'ति स्वेषां स्वेषामात्मीयात्मीयानां भवनावासशतसहस्रणां स्वेषां स्वेषां सामानिकसहस्रणां स्वेषां स्वेषां त्रायस्त्रिंशकानां स्वेषां स्वेषां लोकपालानां स्वासां स्वासाम् 'अग्गमहिषीणा' पट्टराज्ञीनां स्वेषां स्वेषामनीकानां स्वेषां स्वेषाम-नीकाधिपतीनां स्वेषां स्वेषामात्मरक्षदेवसहस्रणाम्, अन्येषां च बहूनां स्वस्वभवनावासनगरी-वास्तव्यानां भवनवासिनां देवानां देवीनां च।

–'आहेवच्च'मित्यादि, अधिपतेः कर्म्म आधिपत्यं रक्षेत्रय्थः, सा च रक्षा सामानेयनापि (आ)रक्षकेणेव क्रियते तत आह–पुरस्य पति पुरपतिस्तस्य कर्म्मपौरपत्यं, सर्वेषामात्मी-यानामग्रेसरत्वमिति भावः, तच्चाग्रेसरत्वं नायकत्वमन्तरेणापि नायकनियुक्ततथाविध-गृहचिन्तकसामान्यपुरुषस्येव भवति ततो नायकत्वप्रतिपत्यर्थमाह–'स्वामित्वं' स्वमस्यास्तीति स्वामी तद्भावो नायकत्वमित्यर्थः, तदपि च नायकत्वं कथञ्चित्पोषकत्वमन्तरेणापि भवति यथा हरिणयूथाधिपतेर्हरिणस्य, तत आह–'भर्तृत्वं' पोषकत्वमत एव महत्तरकत्वं, तदपि महत्तरकत्वं कस्यचिदाज्ञाविकलस्यापि संभवति यथा कस्यचिद्वणिजः स्वदासदासीर्गं प्रति, तत आह–

'आणाईसरसेणावच्चं' आज्ञया ईश्वर आज्ञेश्वरः सेनायाः पति सेनापति आज्ञेश्वरश्चासौ सेनापतिश्च आज्ञेश्वरसेनापतिस्तस्य कर्म्म आज्ञेश्वरसेनापत्यं स्वस्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्य-मिति भावः कारयन्तोऽन्यैर्नियुक्तकैः पुरुषैः पालयन्तः स्वयमेव, महता रवेणेति योगः, 'आहय' इति आख्यानकप्रतिबद्धानि यदिवा 'अहतानि' अव्याहतानि नित्यानुबन्धीनीति भावः ये नाट्यगीते नाट्यं–नृत्यं गीतं–गानं यानि च वादितानि तन्त्रीतलतालत्रुटितानि तन्त्री–वीणा तलौ–हस्ततलौ तालः–कंसिका त्रुटितानि–वादित्राणि, तथा यश्च घनमृदङ्गः पटुना पुरुषेण प्रवादितः, तत्र घनमृदङ्गो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाम धनसमानध्वनिर्यो मृदङ्गः । तत एतेषां द्वन्द्वस्तेषां रवेण 'दिव्यान्' दिवि भवान् प्रधानानिति भावः, भोगार्हा भोगाः– शब्दादयो भोगभोगास्तान् भुञ्जमानाः 'विहरन्ति' आसते ।

मू. (१५५) *कहि णं भंते ! असुरकुमाराणं देवाणं भवणा प० ?, पुच्छा, एवं जहा पन्नवणाठाणपदे जाव विहरंति ॥ कहि णं भते ! दाहिणिल्लाणं असुरकुमारदेवाणं भवना पुच्छा, एवं जहा ठाणपदे जाव चमरे, तत्थ असुरकुमारिंदे असुरकुमारराय परिवसति जाव विहरति ॥*

वृ. "कहि णं भंते ! असुरकुमाराणं देवाणं भवणा पन्नत्ता ?, कहि णं भंते ! असुरकुमारा देवा परिवसंति ?, एवं जा ठाणपए वत्तव्वया सा भाणियव्वा जाव चमरे एत्थ असुरकुमारिंदे असुरकुमारराया परिवसति जाव विहरति" क्व भदन्त ! असुरकुमाराणां देवानां भवनानि प्रज्ञप्तानि ?, तथा क्व भदन्त ! असुरकुमारा देवाः परिवसन्ति ?, 'एवम्' उक्तेन प्रकारेण या स्थानपदे वक्तव्यता सा भणितव्या यावच्चमरः असुरकुमारेन्द्रः असुरकुमारराजा परिवसति यावद्विहरतीति, सा चैवम्– "गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबा -हल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हिट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं असुरकुमाराणं देवाणं चोसट्ठी भवणावाससयसहस्सा भवंतीति मक्खायं

ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकण्णियासंठाणसंठिता उक्कन्नंतरविउल-गम्भीरखायपरिहा जाव पडिरूवा, एत्थ णं असुरकुमाराणं देवाणं भवणा पन्नत्ता, एत्थ णं बहवे असुरकुमारा देवा परिवसंति काला लोहियक्खबिंबोट्ठा धवलपुप्फदंता असियकेसा वामेयकुंडलधरा अद्दचंदनानुलित्तगत्ता ईसिसिलिंधपुप्फपगासाइं असंकिलिट्ठाइं सुहुमाइं वत्थाइं पवरपरिहिया पढमं वयं च समइक्कता बिइयं च असंपत्ता भद्दे जोव्वणे वट्टमाणा तलभंगयतुडियवर-भूसणनिम्मलमणिरयणमंडियभुया दसमुद्दामंडियग्गहत्था चूडामणिचित्तचिंधगया सुरूवा महिड्ढिया महज्जुइया महाजसा महब्बला महाणुभागा महासोक्खा हारविराइयवच्छा कडगतुडिय-थंभियभुया जाव दस दिसाओ उज्जोवेमाणा पभासेमाणा ।

ते णं तत्थ साणं साणं भवणावाससयसहस्साणं जाव दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति, चरमबलिणो य एत्थ दुवे असुरकुमारिंदा असुरकुमाररायाणो परिवसंति काला महानील-सरिसा नीलगुलियगवलपगासा वियसियसयवत्तनिम्मलईसिसियरत्ततंबनयणा गरुलाययउज्जुतुंग-नासा उवचियसिलप्पवाल बिंबफलसन्निभाधरोट्ठा पंडुरससिसगलविमलनिम्मल (दहिघण) संखगोखीरकुंदधवलमुणालियादंतसेढी हुयवहनिद्धंतधोयतत्तवणिज्जरत्ततलतालुजीहा अंजणघणमसिणरुयगरमणिज्जनिद्धकेसा वामेयकुंडलधरा जाव पभासेमाणा, ते णं तत्थ साणं साणं भवणावाससयसहस्साणं जाव भुंजमाणा विहरंति ।

कहि णं भंते ! दाहिणिल्लाणं असुरकुमाराणं देवाणं भवणा पन्नत्ता ?, कहि णं भंते ! दाहिणिल्ला असुरकुमारा देवा परिवसंति ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्समोगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं दाहिणिल्लाणं असुर-कुमाराणं देवाणं चोत्तीसं भवणावाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा व्रहेव जाव पडिरूवा, तत्थ णं बहवे दाहिणिल्ला असुरकुमारा देवा परिवसंति काला लोहियक्खा

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

तहेव भुंजमाणा विहरंति, चमरे य एत्थ असुरकुमारिंदे असुकुमारराया परिवसइ काले महानीलसरिसे जाव पभासेमाणे, से णं तत्थ चोत्तीसाए भवणावाससयसहस्साणं चउसट्ठीए सामाणियसहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं पिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं चउण्हं चउसट्ठीणं आदरक्खदेवसाहस्सीणं, अन्नेसिं च बहूणं दाहिणिल्लाणं देवामं देवीण य आहेवच्चं पोरेवच्चं जाव विहरइ'' ।। इति ।

इदं प्रायः समस्तमपि सुगमं नवरं 'काला लोहियक्ख' इत्यादि, 'कालाः' कृष्णवर्णा 'लोहियक्खबिंबोट्ठा' लोहिताक्षरत्नवद् बिम्बवच्च–बिम्बीफलवद् ओष्ठौ येषां ते लोहिताक्षबिबौष्ठाः आरक्तौष्ठा इति भावः, धवलाः पुष्पवत् सामध्यार्तकुन्दकलिका इव दन्ता येषां ते धवलपुष्पदन्ताः, असिताः–कृष्णाः केशा येषां ते असितकेशाः, दन्ताः केशश्चामीषां वैक्रया द्रष्टव्या न स्वाभाविकाः, वैक्रयशरीरत्वात्, 'वामेयकुण्डलधराः' एककर्णावसक्तकुण्डलधारिणः, तथाऽऽर्द्रेण–सरसेन चन्दनेनानुलिप्तं गात्रं यैस्ते आर्द्रचन्दनानुलिप्तगात्राः, तथा ईषत्–मनाक् 'शिलिन्ध्रपुष्पप्रकाशानि' शिलिन्ध्रपुष्पसदृशवर्णानि 'असंक्लिष्टानि' अत्यन्तसुखजनकतया मनागपि सङ्क्लेशानुत्पादकत्वात् 'सूक्ष्माणि' मृदुलघुस्पर्शानि अच्छानि चेति भावः वस्त्राणि प्रवरं सुशोभं यथा भवति एवं परिहिताः–परिहितवन्तः प्रवरवस्त्रपरिहिताः, तथा वयः प्रथमं–कुमारत्वलक्षणमतिक्रान्तास्तत्पर्यन्तर्तिन इत्यर्थ, यत आह–द्वितीयं च–मध्यलक्षणं वयोऽसंप्राप्ताः, एतदेव व्यक्तीकरोति–'भद्रे' अतिप्रशस्ये यौवने वर्त्तमानाः 'तलभंगयतुडियवरभूसणनिम्मलमणिरयणमंडियभुया' तलभङ्गका–बाह्वाभरणविशेषाः त्रुटितानि–बाहुरक्षकाः, अन्यानि च यानि वराणि भूषणानि बाह्वाभरणानि तेषु ये निर्म्मला मणयः–चन्द्रकान्ताद्या यानि रत्नानि–इन्द्रनीलादीनि तैर्मण्डितौ भुजौ येषां ते तथा, तता दशभिर्मुद्राभिर्मण्डितौ अग्रहस्तौ येषां ते (दशमुद्रा) मण्डिताग्रहस्ताः ।

'चूडामणिचित्तचिंधगया' चूडामणि–चूडामणिनामकं चित्रम्–अद्भुतं चिह्नं गतं–स्थितं येषां ते चूडामणिचित्रचिह्नगताः, चमरबलिसामान्यसूत्रे 'कालाः' कृष्णवर्णा, एतदेवोपमानतः प्रतिपादयति–'महानीलसरिसा' महानीलं यत्किमपि वस्तुजातं लोके प्रसिद्धं तेन सदृशाः, एतदेव व्याचष्टे–नीलगुटिका–नील्या गुटिका गवलं–माहिषं श्रृङ्गं तयोरिव प्रकाशः–प्रतिभा येषां ते नीलगुटिकागवलप्रकाशाः, तथा विकसितशतपत्रमिव निर्मले ईषद्देशविभागेन सिते रक्ते ताम्रे च नयने येषां ते विकसितशतपत्रनिर्म्मलेषत्सितरक्तताम्रनयनाः, तथा गरुडस्येवायता–दीर्घा ऋज्वी–अकुटिला तुङ्गा–उन्ना नासा–नासिका येषां ते गरुडायतर्जुतुङ्गनासाः ।

तथा ओयवियं–तेजितं यत् शिलाप्रवाहं–विद्रुमं रत्नं यच्च बिम्बफलं तत्सन्निभोऽधरः–ओष्ठो येषां ते थथा, तथा पाण्डुरं न तु सन्ध्याकालभावि आरक्तं शशिशकलं–चन्द्रखण्डं, तदपि च कथम्भूतमित्याह–विमलं–रजसा रहितं कलङ्कविकलं वा तथा निर्म्मलो यो दधिघनः शङ्खो गोक्षीरं यानि कुन्दानि–कुन्दकुसुमानि दकरजः–पानीयकणा मृणालिका च द्वद् धवला दन्तश्रेणिर्येषां ते तथा, विमलशब्दस्य विशेष्यात्परनिपातः प्राकृतत्वात्, तथा वैश्वानरेण निर्ध्मातं सत् यद् जायते धौतं–निर्म्मलं तप्तम्–उत्तप्तं तपनीयमू आरक्तं सुवर्णं तद्वद्रक्तानि तलानि–हस्तपादतलानि तलुजिह्वे च येषां ते हुतवहनिर्ध्मातधौततप्ततपनीयरक्ततलतालुजिह्वाः, तथाऽञ्जनं–सौवीराञ्जनं घनः–प्रावृट्कालभावी मेघस्तद्वत् कृष्णाः रुचकवद्–रुचकरत्नवद् रमणीयाः स्निग्धाश्च केशा

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

येषां ते अञ्जनघनकृष्णरुचकरमणीयसनिग्धकेशाः, शेषं प्राग्वत्।

चमरसूत्रे 'तिण्हं परिसाण'मित्युक्तं ततः पर्षद्विशेषपरिज्ञानाय सूत्रमाह--

मू. (१५६) *चमरस्स णं भंते! असुरिंदस्स असुररन्नो कति परिसातो पं० ?, गो० ! तओ परिसातो पं०, तं०--समिता चंडा जाता, अब्भितरिता समिता मज्झे चंडा बाहिं च जाया।*

चमरस्स णं भंते! असुरिंदस्स असुररन्नो अब्भितरपरिसाए कति देवसाहस्सीतो पन्नत्ता ओ ?, मज्झिमपरिसाए कति देवसाहस्सीओ पन्नत्ताओ ?, बाहिरियाए परिसाए कति देवसाहस्सीओ पन्नत्ताओ ?, गोयमा! चमरस्स णं असुरिंदस्स २ अबिभिंतरपरिसाए चउवीसं देवसाहस्सीतो प० ज्झिमिताए परिसाए अट्ठावीसं देव०, बाहिरिताए परिसाए बत्तीसं देवसा०

चमरस्स णं भंते ! असुरिंदस्स असुरन्नो अब्भितरिताए कति देविसता पन्नत्ता ?, मज्झिमियाए परिसाए कति देविसया पन्नत्ता ?, बाहिरियाए परिसाए कति देविसता पन्नत्ता ?, गोयमा! चमरस्स णं असुरिंदस्स असुररन्नो अब्भितरियाए परिसाए अद्धुट्ठा देविसता पं० मज्झिमियाए परिसाए तिन्नि देवि० बाहिरियाए अड्डाइज्ञा देवि०।

चमरस्स णं भंते! असुरिंदस्स असुररन्नो अब्भितरियाए परिसाए देवाणं केवतियं कालं ठिती पन्नत्ता ? मज्झिमियाए परिसाए० बाहिरियाए परिसाए देवाणं केवतियं कालं ठिती पन्नत्ता ? अब्भितरियाए परि० देवीणं केवतियं कालं ठिती पन्नत्ता ? मज्झिमियाए परि० देवीणं केवतियं० बाहिरियाए परि० देवीणं के० ? गोयमा! चमरस्स णं असुरिंदस्स २ अब्भितरियाए परि० देवामं अड्डाइज्ञाइं पलिओवमाइं ठिई पं० मज्झिमाए परिसाए देवाणं दो पलिओवमाइं ठिई पन्नत्ता बाहिरियाए परिसाए देवाणं दिवड्ढं पलि० अब्भितरियाए परिसाए देवीणं दिवड्ढं पलिओवमं ठिती पन्नत्ता मज्झिमियए परिसाए देवीणं पलिओवमं ठिती पन्नत्ता बाहिरियाए परि० देवीणं अद्धपलिओवमं ठिती पन्नत्ता।

से केणट्ठेणं भंते ! एवं वुच्चति ?--चमरस्स असुरिंदस्स तओ परिसातो पन्नत्ताओ, तंजहा--समिया चंडा जाया, अब्भितरिया समिया मज्झिमिया चंडा बाहिरिया जाया ? गोयमा मरस्स णं असुरिंदस्स असुरन्नो अब्भितरपरिसा देवा वाहिता हव्वमागच्छंति नो अव्वाहिता, मज्झिमपरिसाए देवा वाहिता हव्वमागच्छंति अव्वाहितावि, बाहिरपरिसा देवा अव्वाहिता हव्वमागच्छंति। अदुत्तरं च णं गो०! चमरे असुरिंदे असुरराया अन्नयरेसु उच्चावएसु कज्जकोडुंबेसु समुप्पन्नेसु अब्भितरियाए परिसाए सद्धिं संमइसंपुच्छणाबहुले विहरइ मज्झिमपरिसाए सद्धिं पयं एवं पवंचेमाणे २ विहरति बाहिरियाए परिसाए सद्धिं पयंडेमाणे २ विहरति

से तेणट्ठेणं गोयमा! एवं वुच्चइ चमरस्स णं असुरिंदस्स असुरकुमाररण्णो तओ परिसाओ पन्नत्ताओ समिया चंडा जाता, अब्भितरिया समिया मज्झिमिया चंडा बाहिरिया जाता॥

वृ. 'चमरस्स ण'मित्यादि, चमरस्य भदन्त ! असुरेन्द्रस्य असुकरुमारराजस्य 'कति' कियत्सङ्ख्याकाः पर्षदः प्रज्ञप्ताः ?, भगवानाहगौतम ! तिस्रः पर्षदः प्रज्ञप्ताः, तद्यथा--समिता चण्डा जाता, तत्राभ्यन्तरिका पर्षत् 'समिता' समिताभिधाना, एवं मध्यमिका चण्डा बाह्या जाता।

'चमरस्स ण'मित्यादि, चमरस्य भदन्त! असुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि कति देवसहस्राणि प्रज्ञप्तानि ?, मध्यमिकायां पर्षदि कति देवसहस्राणि प्रज्ञप्तानि ?, बाह्यायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्षदि कति देवसहस्राणि प्रज्ञप्तानि ?, भगवानाह गौतम ! चमरस्यासुरेन्द्रस्यासुरकुमार-राजस्याभ्यन्तरिकायां पर्षदि चतुर्विंशतिर्देवसहस्राणि प्रज्ञप्तानि, मध्यमिकायामष्टाविंशति- र्देवसहस्राणि, बाह्यायां द्वात्रिंशद्देवसहस्राणि प्रज्ञप्तानि। 'चमरस्स णं भंते' ! इत्यादि, चमरस्य भदन्त ! असुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि कति देवीशतानि प्रज्ञप्तानि ? मध्यमिकायां पर्षदि कति देवीशतानि प्रज्ञप्तानि ? बाह्यायां पर्षदि कति देवीशतानि प्रज्ञप्तानि ?, भगवानाह–गौतम ! अभ्यन्तरिकायां पर्षदि अर्द्धतृतीयानि देवीशतानि प्रज्ञप्तानि, मध्यमिकायां पर्षदि त्रीणि देवीशतानि प्रज्ञप्तानि, बाह्यायां पर्षदि अर्द्धचतुर्थानि देवीशतानि प्रज्ञप्तानि।

'चमरस्स णं भंते !' इत्यादि, चमरस्य भदन्त ! असुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि देवानां कियन्तं कालं स्थिति प्रज्ञप्ता ? मध्यमिकायां पर्षदि देवानां कियन्तं कालं स्थिति प्रज्ञप्ता ?, एवं बाह्यपर्षद्विषयमपि प्रश्नसूत्रं वक्तव्यं, तथाऽभ्यन्तरिकायां पर्षदि देवीनां कियन्तं कालं स्थिति प्रज्ञप्ता ?, एवं मध्यमिकाबाह्यपर्षद्विषये अपि प्रश्नसूत्रे वक्तव्ये, भगवानाह–गौ० चमरस्यासुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरिकायां पर्षदि देवानामर्द्धतृतीयानि पल्योपमानि स्थिति प्रज्ञप्ता, मध्यमिकायां पर्षदि देवानां द्वे पल्योपमे स्थिति प्रज्ञप्ता, बाह्यायां पर्षदि देवानां द्वयर्द्धं पल्योपमं स्थिति प्रज्ञप्ता, तथाऽभ्यन्तरिकायां पर्षदि देवीनां द्वयर्द्धपल्योपमं स्थिति प्रज्ञप्ता, मध्यमिकायां प० पल्योपमं स्थिति, प्रज्ञप्ता, बाह्यायां प० अर्द्धपल्योपमं स्थिति प्रज्ञप्ता, इह भूयान् वाचनाभेद इत यथाऽवस्थितसूत्रे पाठनिर्णयार्थं सुगममपि सूत्रमक्षरसंस्कारमात्रेण विव्रियते

सम्प्रत्यभ्यन्तरिकादिव्यपदेशकारणं पिपृच्छिषुरिदमाह–'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते ? चमरस्य असुरकुमारराजस्य तिस्रः पर्षदः प्रज्ञप्ताः, तद्यथा समिता चण्डा जाता, अभ्यन्तरा समिता मध्यमिका चण्डा बाह्या जाता भगवानाह–गौतम ! चमरस्यासुरेन्द्रस्यासुरकुमारराजस्याभ्यन्तरपर्षत्का देवाः 'वाहिता' आहूताः 'हव्वं' शीघ्रमागच्छन्ति नो 'अव्वाहिता' अनाहूताः, अनेन गौरवमाह, मध्यमपर्षद्गा देवा आहूता अपि शीघ्रमागच्छन्ति अनाहूता अपि, मध्यमप्रतिपत्तिविषयत्वात्, बाहयपर्षद्गा देवा अनाहूताः शीग्रमागच्छन्ति, तेषामाकारणलक्षण-गौरवानर्हत्वात्, 'अदुत्तरं च ण'मित्यादि, 'अथोत्तरम्' अथान्यद् अभ्यन्तरत्वादिविषये कारणं गौतम ! चमरोऽसुरेन्द्रोऽसुरकुमारराजोऽन्यतरेषु 'उच्चावचेषु' शोभनासोभनेषु 'कज्ञकोडुंबेसु' इति कौटुम्बिकेषु कार्येषु कुटुम्बे भवानि कौटुम्बानि स्वराष्ट्रविषयाणीत्यर्थ तेषु कार्येषु समुत्पन्नेषु अभ्यन्तरिकया पर्षदा सार्द्धं संमतिसंप्रश्नबहुलश्चापि विहरति।

सन्मत्याउत्तमया मत्या यः संप्रश्नः–पर्यालोचनं तद्बहुलश्चापि 'विहरति' आस्ते, स्वल्पमपि प्रयोजनं प्रथमतस्तया सह पर्यालोच्य विदधातीति भावः, मध्यमिकया पर्षदा सार्द्ध यदभ्यन्तरिकया पर्षदा सह पर्यालोच्य कर्त्तव्यतया निश्चितं पदं 'तव्रपञ्चयन् विहरति' एवमिदमस्माभि पर्यालोचितमिदं कर्त्तव्यमन्यथा दोष इति विस्तारयन्नास्ते, बाह्यया पर्षदा सह यदभ्यन्तरिकया पर्षदा सह पर्यालोचितं मध्यमिकया सह गुणदोषप्रपञ्चकथनतो विस्तारितं पदं तत्।

'प्रचण्डयन् प्रचण्डयन् विहरति' आज्ञाप्रधानः सन्नवश्यं कर्त्तव्यतया निरूपयन् तिष्ठति, यथेदं युष्माभि कर्त्तव्यमिदं न कर्त्तव्यमिति, तदेवं या एकान्ते गौरवमेव केवलमर्हति यया च सहोत्तममतित्वात्स्वल्पमपि कार्यं प्रथमतः पर्यालोचयति सा गौरवविषये पर्यालोचनायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चात्यन्तमभ्यन्तरा वर्त्तते इत्यभ्यन्तरिका, या तु गौरवार्हा पर्यालोचितं चाभ्यन्तरिकया पर्षदा सह अवश्यकर्त्तव्यतया निश्चितं न तु प्रथमतः सा किल गौरवे पर्यालोचनायां च मध्यमे भागे वर्त्तत इति मध्यमिका, या तु गौरवं न जातुचिदप्यर्हति न च यया सह कार्यं पर्यालोचयति केवलमादेश एव यस्मै दीयते सा गौरवानर्हा पर्यालोचनयाश्च बहिर्भावे वर्त्तत इति बाह्या।

तदेवमभ्यन्तरिकादिव्यपदेशनिबन्धनमुक्तं, सम्प्रत्येतदेवोपसंहरन्नाह–'से एएण (तेण)-ट्ठेण'मित्यादि पाठसिद्धं, यानि तु समिया चंडा जाता इति नामानि तानि कारणान्तरनिबन्धनानि, कारणान्तरं च ग्रन्थान्तरादवसातव्यं, अत्र सङ्ग्रहणिगाथे–

॥१॥ "चउवीस अट्ठवीसा बत्तीससहस्स देव चमरस्स।
अद्धुट्ठा तिन्नि तहा अड्ढाइज्ञा य देविसया॥

॥२॥ अड्ढाइज्ञा य दोन्नि य दिवड्ढपलियं कमेण देवठिई।
पलियं दिवड्ढमेगं अद्धो देवीण परिसासु॥

मू. (१५७) *कहि णं भंते! उत्तरिल्लाणं असुरकुमारामं भवणा पन्नत्ता?, जहा ठाणपदे जाव बली, एत्थ वइरोयणिंदे वइरोयणराया परिवसति जाव विहरति।*

बलिस्स णं भंते! वयरोयणिंदस्स वइरोयणरन्नो कति परिसाओ पन्नत्ताओ?, गोयमा! तिन्नि परिसा, तंजहा–समिया चंडा जाया, अब्भितरियाए परिसाए कति देवसहस्सा! मज्झिमियाए परिसाए कति देवसहस्सा जाव बाहिरियाए परिसाए कति देविसया पन्नत्ता?, गोयमा! बलिस्स णं वइरोयणिंदस्स २ अब्भितरियाए परिसाए वीसं देवसहस्सा पन्नत्ता, मज्झिमियाए पिरसाए चउवीसं देवसहस्सा पण्णत्ता, बाहिरियाए परिसाए अट्ठावीसं देवसहस्सा पन्नत्ता, अब्भितरियाए परिसाए अद्धपंचमा देविसता, मज्झिमियाए परिसाए चत्तारि देविसया पन्नत्ता, बाहिरियाए परिसाए अद्धुट्ठा देविसता प० बलिस्स ठितीए पुच्छा जाव बाहिरियाए परिसाए देवीणं केवतियं कालं ठिती पन्नत्ता?, गोयमा! बलिस्स णं वइरोयणिंदस्स २ अब्भितरियाए परिसाए देवाणं अद्धुट्ठपलिओवमा ठिती प०, मज्झिमियाए परिसाए तिन्नि पलिओवमाइं ठिती प० बाहिरियाए परिसाए देवाणं अड्ढाइज्ञाइं पलिओवमाइं ठिई पन्नत्ता, अब्भितरियाए परिसाए देवीणं अड्ढाइज्ञाइं पलिओवमाइं ठिती प० मज्झिमियाए परिसाए देवीणं दो पलिओवमाइं ठिती प० बाहिरियाए परिसाए देवीणं दिवड्ढं पलिओवमं ठिती प० सेसं जहा चमरस्स असुरिंदस्स असुरकुमाररन्नो॥

वृ. 'कहि णं भंते! उत्तरिल्लाणं असुरकुमाराणं देवाणं भवना पन्नत्ता' इत्यादि, क्व भदन्त उत्तराणामसुरकुमाराणां भवनानि प्रज्ञप्तानि? इत्येवं यथा प्रज्ञापनायां द्वितीये स्थानाख्ये पदे तथा तावद्वक्तव्यं यावद्बलि, अत्र वैरोचनेन्द्रो वैरोचनराजः परिवसति, तत ऊर्द्धमपि तावद्वक्तव्यं यावद्विहरत, तच्चैवम्– "कहि णं भंते! उत्तरिल्ला असुरकुमारा देवा परिवसंति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरे जोयणसयस-हस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से एत्थ उत्तरिल्लाणं असुरकुमाराणं देवाणं तीसं भवणवाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा अंतो चउरंसा सेसं जहा दाहिणिल्लाणं जाव विहरंति, बली य एत्थ वइरोयणिंदे वइरोयणराया परिवसइ काले महानीलसरिसे जाव पभासेमाणे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से णं तत्थ तीसाए भवणवाससयसहस्साणं सट्ठीए सामाणियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालामं पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्ह-मनियाणं सत्तण्हमनियाहिवईणं चउण्ह य सट्ठीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं उत्तरिल्लाणं असुरकुमाराणं देवाणं देवीण य अहेवच्चं जाव विहरइ'' समस्तमिदं प्राग्वत् ।

सम्प्रति पर्षन्निरूपणार्थमाह–'बलिस्स णं भंते !' इत्यादि प्राग्वत्, नवरमिदमत्र देवदेवीसङ्ख्यास्थितिनानात्वम्–

॥ १ ॥ ''वीस उ चउवीस अट्ठावीस सहस्साण (होंति) देवाणं ।
अद्धपणचउद्धुट्ठा देविसय बलिस्स परिसासु ॥

॥ २ ॥ अद्धुट्ठ तिन्नि अड्ढाइज्ञाइं (होंति) पलियदेवठिई ।
अड्ढाइज्ञा दोन्नि दिवड्ढ देवीण ठिइ कमसो ॥

मू. (१५८) कहि णं भंते ! नागकुमाराणं देवाणं भवना पन्नत्ता ?, जहा ठाणपदे जाव दाहिणिल्लावि पुच्छियव्वा जाव धरणे इत्थ नागकुमारिंदे नागकुमारराया परिवसति जाव विहरति

धरणस्स णं भंते ! णागकुमारिंदस्स नागकुमाररन्नो कति परिसाओ ? पं०, गोयमा ! तिन्नि पिसाओ, ताओ चेव जहा चमरस्स । धरणस्स णं भंते ! नागकुमारिंदस्स नागकुमाररन्नो अब्भिंतरियाए परिसाए कति देवसहस्सा पन्नत्ता ?, जाव बाहिरियाए परिसाए कति देवीसता पन्नत्ता ?, गोयमा ! धरणस्स णं नाग- कुमारिंदस्स नागकुमाररन्नो अब्भिंतरियाए परिसाए सट्ठिं देवसहस्साइं मज्झिमियाए परिसए सत्तरिं देवसहस्साइं बाहिरियाए असीतिदेवसहस्साइं अब्भितरपरिसाए पन्नत्तरं देविसतं पन्नत्तं मज्झिमियाए परिसाए पण्णासं देविसतं प० ।ाहिरियाए परिसाए पण्णासं देवितं प० बाहिरियाए परिसाए पणवीसं देविसतं प०

धरणस्स णं रन्नो अब्भिंतरियाए परिसाए देवाणं केवतियं कालं ठिती पन्नत्ता ? मज्झिमियाए परिसाए देवाणं केवतियं कालं ठिती पन्नत्ता ? बाहिरियाए परिसाए देवाणं केवतियं कालं ठिती पन्नत्ता ? अब्भिंतरियाए परिसाए देवीणं केवतियं कालं ठिती पन्नत्ता ? मज्झिमियाए परिसाए देवीणं केवइयं कालं ठिती पन्नत्ता ? बाहिरियाए परिसाए देवीं केवतियं कालं ठिती पन्नत्ता ?

गोयमा ! धरणस्स रन्नो अब्भिंतरियाए परिसाए देवाणं सातिरेगं अद्धपलिओवमं ठिती पन्नत्ता, मज्झिमियाए परिसाए देवाणं अद्धपलिओवमं ठिती पन्नत्ता, बाहिरियाए परिसाए देवाणं देसूणं अद्धपलिओवमं ठिती पन्नत्ता, अब्भिंतरियाए परिसाए देवीणं देसूणं अद्धपलिओवमं ठिती पन्नत्ता, मज्झिमियाए परिसाए देवीणं सातिरेगं चउब्भागपलिवमं ठिती पन्नत्ता, बाहिरिया परिसाए देवीणं सातिरेगं चउब्भागपलिओवमं ठिती पन्नत्ता, बाहिरियाए परिसाए देवाणं चउभागपलिओवमं ठिती पन्नत्ता, अट्ठो जहा चमरस्स । कहि णं भंते ! उत्तरिल्लाणं नागकुमाराणं जहा ठाणपदे जाव विहरति ।

भूयानंदस्स णं भंते ! नागकुमारिंदस्स नागकुमाररण्णो अब्भिंतरियाए परिसाए कति देवसाहस्सीओ पन्नत्ताओ ?, मज्झिमियाए परिसाए कति देवसाहस्सीओ पन्नत्ताओ ?, बाहिरि-याए परिसाए कइ देवसाहस्सीओ पन्नत्ताओ? अब्भिंतरियाए परिसाए कइ देविसया पन्नत्ता? मज्झिमियाए परिसाए कइ देविसया पन्नत्ता ? बाहिरियाए परिसाए कइ देविसया पन्नत्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा ! भूयानंदस्स णं नागकुमारिंदस्स नागकुमाररन्नो अब्भिंतरिए परिसाए पन्नासं देवसहस्सा पन्नत्ता, मज्झिमियाए परिसाए सट्ठिं देवसाहस्सीओ पन्नत्ताओ, बाहिरियाए परिसाए सत्तरि देवसाहस्सीओ पन्नत्ताओ, अब्भिंतरियाए परिसाए दो पणवीसं देविसयाणं पन्नत्ता, मज्झिमियाए परिसाए दो देवीसया पन्नत्ता, बाहिरियाए परिसाए पन्नत्तरं देविसयं पन्नत्तं ।

भूयानंदस्सं णं भंते ! नागकुमारिंदस्स नागकुमाररन्नो अब्भिंतरियाए परिसाए देवाणं केवतियं कालं ठिती पन्नत्ता ? जाव बाहिरियाए परिसाए देवीणं केवइयं कालं ठिई पन्नत्ता ?

गोयमा ! भूतानंदस्स णं अब्भिंतरियाए परिसाए देवाणं देसूणं पलिओवमं ठिती पन्नत्ता, मज्झिमियाए परिसाए देवाणं साइरेगं अद्धपलिओवमं ठिती पन्नत्ता, बाहिरियाए परिसाए देवामं अद्धपलिओवमं ठिती पन्नत्ता, अब्भिंतरियाए परिसाए अद्धपलिओवमं ठिती पन्नत्ता, मज्झिमियाए परिसाए देवीमं देसूणं अद्धपलिओवमं ठिती पन्नत्ता, बाहिरियाए परिसाए देवीणं साइरेगं चउब्भागपलिओवमं ठिती पन्नत्ता, अत्थो जहा चमरस्स ।

अवसेसाणं वेणुदेवादीणं महाघोसपज्जवसाणाणं ठाणपदवत्तव्वया निरवयवा भाणियव्वा, परिसातो जहा धरणभूताणंदाणं (सेसाणं भवणवईणं) दाहिणिल्लाणं जहा धरणस्स उत्तरिल्लाणं जहा भूतानंदस्स, परिमाणंपि ठितीवि ॥

वृ. 'कहि णं भंते ! नागकुमाराणं देवाणं भवणा पन्नत्ता ?' इत्यादि, क्व भदन्त ! नागकुमाराणां देवानां भवनानि प्रज्ञप्तानि ?, एवं यथा प्रज्ञापनायां स्थानाख्ये द्वितीयपदे तथा वक्तव्यं यावद् दाक्षिणात्या अपि प्रष्टव्या यावद्धरणोऽत्र नागकुमारेन्द्रो नागकुमारराजः परिवसति यावद्विहरति, तच्चैवम्– "कहि णं भंते ! नागकुमारा देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं नागकुमाराणं देवाणं चुलसी भवणावाससय- सहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टाजाव पडिरूवा, एत्थ णं नागकुमाराणं देवाणं भवणा पन्नत्ता, तत्थ णं बहवे नागकुमारा देवा परिवसंति महिड्ढीया महज्जुतिया, सेसं जहा ओहियाणं जाव विहरंति, धरणभूयानंदा एत्थ दुवे नागकुमारिंदा नागकुमाररायाणो परिवसंति महिड्ढीया महज्जुतिया, सेसं जहा ओहियाणं जाव विहरंति, धरणभूयानंदा एत्थ दुवे नागकुमारिंदा नागकुमाररायाणो परिवसंति महिड्ढीया सेसं जहा ओहियाणं जाव विहरंति ।

कहि णं भंते ! दाहिणिल्लाणं नागकुमाराणं देवाणं भवणा पन्नत्ता ? कहि णं भंते ! दाहिणिल्ला नागकुमारा देवा परिवसंति ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं दाहिणिल्लाणं नागकुमाराणं देवाणं चोयालीसं भवणावाससयसहस्सा भवंतीति मक्खायं ।

ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं नागकुमाराणं देवाणं भवणा पन्नत्ता, एत्थ णं बहवे दाहिणिल्ला नागकुमारा परिवसंति महिड्ढीया जाव विहरंति, धरणे एत्थ नागकुमारिंदे नागकुमारराया परिवसइ महिड्ढीए जाव पभासेमाणे, से णं तत्थ चोयालीसाए भवणावाससयसहस्साणं छण्हं सामाणियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं चउवीसाए आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दाहिणिल्लाणं नागकुमाराणं देवाणं देवीण य आहेवच्चं जाव विहरंति'' पाठसिद्धं ॥ सम्प्रति पर्षन्निरूपणार्थमाह–

'धरणस्स णं भंते!' इत्यादि, प्राग्वत्, नवरमत्राभ्यन्तरपर्षदि षष्टिर्देवसहस्राणि मध्यमिकायां सप्ततिर्देवसहस्राणि बाह्यायामशीतिर्देवसहस्राणि, तथाऽभ्यन्तरिकायां पर्षदि पञ्चसप्ततं देवीशतं, 'मज्झिमियाए परिसाए पन्नासं देविसतं पन्नत्तं' मध्यमिकायां पर्षदि पञ्चाशं देवीशतं बाह्यायां पञ्चविंशं देवीशतं, तथाऽभ्यन्तरिकायां पर्षदि देवानां स्थिति सातिरेकमर्द्धपल्योपमं मध्यमिकायामरद्धपल्योपमं बाह्यायां देशोनमर्द्धपल्योपमं, तथाऽभ्यन्तरिकायां पर्षदि देवीनां स्थितिर्देशोनमर्द्धपल्योपमं मध्यमिकायां सातिरेकं चतुर्भागपल्योपमं बाह्यायां चतुर्भागपल्योपमं, शेषं प्राग्वत्। 'कहि णं भंते! उत्तरिल्लामं नागकुमाराणं भवणा पन्नत्ता जहा ठाणपदे जाव विहरइ'त्ति, क्व भदन्त! उत्तराणां नागकुमाराणां भवनानि प्रज्ञप्तानि? इत्यादि यथा प्रज्ञापनायां स्थानाख्ये पदे तथा वक्तव्यं यावद्विहरतीति पदं, तच्चैवम्–'कहि णं भंते! उत्तरिल्ला नागकुमारा परिवसन्ति?, गोयमा! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए असीउत्तर-जोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं उत्तरिल्लाणं नागकुमाराणं चत्तालीसं भवणावास-सयसहसास हवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा सेसं जहा दाहिणिल्लाणं जाव विहरंति, भूयानंदे एत्थ नागकुमारिंदे नागकुमारराया परिवसति महिड्ढीए जाव पभासेमाणे, से णं चत्तालीसाए भवणावाससयसहस्साणं सेसं तं चेव जाव विहरइ' इति निगदसिद्धं।

पर्षन्निरूपणार्थमाह–'भूयानंदस्स ण'मित्यादि प्राग्वत् नवरमत्राभ्यन्तरिकायां पर्षदि पञ्चाशद्देवसहस्राणि मध्यमिकायां षष्टिर्देवसहस्राणि बह्यायां सप्ततिर्देवसहस्राणि, तथाऽभ्यन्तरि-कायां पर्षदि पञ्चविंशे द्वे देवीशते मध्यमिकायां परिपूर्णे द्वे देवीशते बाह्यायां पञ्चसप्ततं देवीशतं, तथाऽभ्यन्तरिकायां पर्षदि देवानां स्थितिर्देशोनं पल्योपमं मध्यमिकायां सातिरेकमर्द्धपल्योपमं बाह्यायामर्द्धपल्योपमं, तथाऽभ्यन्तरिकायां पर्षदि देवीनां स्थितिरर्द्धपल्योपमं मध्यमिकायां देशोनमर्द्धपल्योपमं बाह्यायां सातिरेकं चतुर्भागपल्योपमं, शेषं प्राग्वत्।

'अवसेसाणं वेणुदेवाईणं महाघोसपज्जवसासाणं ठाणपयवत्तव्वया भाणियव्वा' इति, 'अवशेषाणां' नागकुमारराजव्यतिरिक्तानां वेणुदेवादीनां महाघोषपर्यवसानानां स्थानाख्यप्रज्ञाप-नागतद्वितीयपदवक्तव्यता भणितव्या, सा चैवम्–''कहि णं भंते! सुवन्नकुमाराणं देवाणं भवणा पन्नत्ता? कहि णं भंते! सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहेत्ता हेट्ठावि एगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयस हस्से, एत्थ णं सुवण्णकुमाराणं देवाणं भवणा पण्णत्ता, तत्थ मं बहवे सुवण्णकुमारा देवा परिवसंति महिड्डिया सेसं जाह ओहियाणं जाव विहरंति, वेणुदेवे वेणुदाली एत्थ दुवे सुवण्णकुमारिंदा सुवण्णकुमाररायाणो परिवसंति महिड्डिया जाव विहरंति। कहि णं भंते! दाहिणिल्लाणं सुवण्णकुमाराणं भवणा पन्नत्ता? कहि णं भंते! दाहिणिल्ला सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयस-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्सबाहल्लाए उवरिं एगं जोयणसयसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं दाहिणिल्लाणं सुवण्णकुमाराणं अट्ठत्तीसं भवणावाससयसहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं सुवण्णकुमाराणं भवणा पन्नत्ता, एत्थ णं बहवे दाहिणिल्ला सुवण्णकुमारा परिवसंति, वेणुदेवे एत्थ सुवण्णकुमारिंदे सुवण्णकुमारराया परिवसति महिड्ढिए जाव पभासेमाणे, से णं तत्थ अट्ठत्तीसाए भवणावास-सयसहस्साणं जाव विहरति।

पर्षद्वक्तव्यताऽपि धरणवन्निरवशेषा वक्तव्या। 'कहि णं भंते! उत्तरिल्लाणं सुवण्णकुमाराणं भवणा पन्नत्ता? कहि णं भंते! उत्तरिल्ला सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए जाव मज्झे अट्ठहत्तरे जोयणसयसहस्से, एत्थ णं उत्तरिल्लाणं सुवण्णकुमाराणं देवाणं चोत्तीसं भवणावाससयसहस्सा भवंतीतिमक्खायं, ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं बहवे उत्तरिल्ला सुवण्णकुमारा देवा परिवसंति महिड्ढिए जाव पभासे०, (से णं) तत्थ चोत्तीसाए भवणावाससयसहस्साणं सेसं जहा नागकुमाराणं।

पर्षद्वक्तव्यताऽपि भूतानन्दवन्निरवशेषा वक्तव्या।

यथा सुवर्ण्णकुमाराणं वक्तव्यता भणिता तथा शेषाणामपि वक्तव्या, नवरं भवननानात्वमिन्द्रनानात्वं परिमाणनानात्वं चैताभिर्गाथाभिरनुगन्तव्यम्–

॥१॥ "चउसट्ठी असुराणं चुलसीई चेव होइ नागाणं।
बावत्तरिं सुवण्णे वाउकुमाराण छन्नउई॥

॥२॥ दीवदिसाउदहीणं विज्जुकुमारिंदथनियमग्गीणं।
छण्हंपि जुयलयाणं बावत्तरिमो सयसहस्सा॥

॥३॥ चोत्तीसा १ चोयाला २ अट्ठत्तीसं ३ च सयहस्साइं।
पण्णा ४ चत्तालीसा १० दाहिणतो होंति भवणाइं॥

॥४॥ तीसा १ चत्तालीसा २ चोत्तीसं ३ चेव सयसहस्साइं।
छायाला ४ छत्तीसा १० उत्तरतो होंति भवणाइं॥

॥५॥ चमरे १ धरणे २ तह वेणुदेव ३ हरिकंत ४ अग्गिसीहे ५ य।
पुण्णे ६ जलकंते या अमिए ८ लंबे य ९ घोसे य १०॥

॥६॥ बलि १ भूयानंदे २ वेणुदालि ३ हरिस्सह ४ अग्गिमानव ५ विसिट्ठे ६।
जलप्पभ अभियवाहण ८ पभंजणे ९ चेव महघोसे १०॥

॥७॥ चउसट्ठी सट्ठी खलु छच्च सहस्सा उ असुरवज्जाणं।
सामाणिया उ एए चउग्गुणा आयरक्खा उ॥

पर्षद्वक्तव्यताऽपि दाक्षिणात्यानां धरणवत्, उत्तराणां भूतानन्दवत्, तथा चाह– "परिसाओ सेसाणं भवणवईणं दाहिणिल्लाणं जहा धरणस्स, उत्तरिल्लाणं जहा भूयानंदस्से"ति॥ तदेवं भवन(पति)वक्तव्यतोक्ता, सम्प्रति वानमन्तरवक्तव्यताभिधित्सुराह–

मू. (१५९) *कहि णं भंते! वाणमंतराणं देवाणं भवणा (भोमेज्जा नगरा) पन्नत्ता?, जहा ठाणपदे जाव विहरंति। कहि णं भंते! पिसायाणं देवाणं भवणा पन्नत्ता?, जहा ठाणपदे जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहरंति काल- महाकाला य तत्थ दुवे पिसायकुमाररायाणो परिवसंति जाव विहरंति, कहि णं भंते! दाहिणिल्लाणं परिसायकुमाराणं जाव विहरंति काले य एत्थ पिसायकुमारिंदे पिसायकुमारराया परिवसति महड्ढिए जाव विहरति।

कालस्स णं भंते ! पिसायकुमारिंदस्स पिसायकुमाररन्नो कति परिसाओ पन्नत्ताओ ?, गोयमा ! तिन्नि परिसाओ पन्नत्ताओ, तंजहा—ईसा तुडिया दढरहा, अब्भिंतरिया ईसा मज्झिमिया तुडिया बाहिरिया दढरहा।

कालस्स णं भंते ! पिसायकुमारिंदस्स पिसायकुमाररन्नो अब्भिंतरपरिसाए कति देवसाहस्सीओ पन्नत्ताओ ? जाव बाहिरियाए परिसाए कइ देविसया पन्नत्ता ?, गो० कालस्स णं पिसायकुमारिंदस्स पिसायकुमाररायस्स अब्भिंतरियपरिसाए अट्ठ देवसाहस्सीओ पन्नत्ताओ मज्झिमपरिसाए दस देवसाहस्सीओ पन्नत्ताओ बाहिरियपरिसाए बारस देवसाहस्सीओ पन्नत्ताओ अब्भिंतरियाए परिसाए एगं देविसतं पन्नत्तं मज्झिमियाए परिसाए एगं देविसतं पन्नत्तं बाहिरियाए परिसाए एगं देविसतं पन्नत्तं।

कालस्स णं भंते ! पिसायकुमारिंदस्स पिसायकुमाररन्नो अब्भिंतरिए परिसाए देवाणं केवतियं कालं ठिती प० ? मज्झिमियाए परिसाए देवाणं केवतियं कालं ठिती प० ? बाहिरियाए परिसाए देवाणं केवतियं कालं ठिती प० ? जाव बाहिरियाए देवीणं केवतियं कालं ठिती पन्नत्ता

गोयमा ! कालस्स णं पिसायकुमारिंदस्स पिसायकुमाररन्नो अब्भिंतरपरिसाए देवाणं अद्धपलिओवमं ठिती पन्नत्ता, मज्झिमियाए परि० देवाणं देसूणं अद्धपलिओवमं ठिती प० बाहिरियाए परि० देवाणं सातिरेगं चउब्भागपलिओवमं ठिती प० अब्भंतरपरि० देवीणं सातिरेगं चउब्भागपलिओवमं ठिती प० मज्झिमपरि० देवीणं चउब्भागपलिओवमं ठिती पन्नत्ता, बाहिरपरिसाए देवीणं देसूणं चउब्भागपलिओवमं ठिती पन्नत्ता, मज्झिमपरिसाए देवीणं चउब्भागपलिओवमं ठिती पन्नत्ता, बाहिरपरिसाए देवीणं देसूणं चउब्भागपलिओवमं ठिती पन्नत्ता, अट्ठो जो चेव चमरस्स, एवं उत्तरस्सवि, एवं णिरंतरं जाव गीयजसस्स॥

वृ. 'कहि णं भंते ! वाणमंतराणं देवाणं भोमेज्जा नगरा पन्नत्ता ?' क्व भदन्त ! वानमन्तराणां देवानां भौमेयानि नगराणि प्रज्ञप्तानि ?, 'जहा ठाणपदे जाव विहरंति' इति, यथा स्थानाख्ये प्रज्ञापनायां द्वितीये पदे तथा वक्तव्यं यावद्विहरन्तीति, तच्चैवं—

"गोयमा ! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहेत्ता हेट्ठावि एगं जोयणसयं वज्जेत्ता मज्झे अट्ठसु जोयणसएसु, एत्थ णं वाणमन्तराणं तिरियमसंखेज्जा भोमेज्जा नगरवाससयसहस्स भवंतीतिमक्खायं, ते णं भोमेज्जा नगरा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकण्णियासंठाणसंठिया उक्किण्णंतरविउलगंभीर-खायपरिहा पागारट्टालयकवाडतोरणपडिदुवारदेसभागा जंतसयग्घमुसलमुसुंढिपरियरिया अयोज्झा सयाजया सयागुत्ता अडयालकोट्ठरयइया अडयालकयवणमाला सेरमा सिवा किंकरामरदंडोव-रक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितला उवचियचंदनकलसा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावा पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलिया कालागुरुपवरकुन्दुरुक्कतुरुक्कधूवमघमघेंत-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

गंधुद्धुयाभिरामा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकड-च्छाया सप्पभा समिरीया सउज्जोया पासाईया दरसणिज्जा अभिरूवा पडिरूवा ।

एत्थ णं वाणमंतराणं देवाणं भोमेज्जा नगरा पन्नत्ता, तत्थ णं बहवे वाणंतरा देवा परिवसंति, तंजहा–पिसाया भूया जक्खा रक्खसा किंनरा किंपुरिसा भुयगपतिणो महाकाया गंधव्वगणा य निउणगंधव्वगीयरमणा अणपन्निियपणपन्निय इसिवाइय भूयवाइय कंदिय महाकंदिया य कुहंडपयंगदेवा चंचलचवलचित्तकीलणदवप्पिया गहिरहसियगीयणच्चणरई वणमालामेलमउड-कुंडलसच्छंदविउव्वियाभरणचारुभूसणधरा सव्वोउयसुरहिकुसुमरइयपलंबसोहंतकंत-वियसंतचित्तवणमालरइयवच्छा कामकामा कामरूवदेहधारी नाणाविहवण्णरगवरवत्थचिल्लल-गनियंसणा विविहदेसनेवत्थगहियवेसा पमुइयकंदप्पकलहकेलिकोलाहलप्पिया हासबोलबहुला असिमोग्गरसत्तिहत्था अनेगमणिरयणविविह (निजुत्त) चित्तचिंधगया सुरूवा महिड्ढिया महायसा जाव महासोक्खा हारविराइयवच्छा जाव दस दिसाओ उज्जोवेमाणा पभासेमाणा ।

ते णं तत्थ साणं साणं भोमेज्जनगरावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनीयाणं साणं २ अनीयाहिवईणं सासं साणं आयरक्खदेवसाहस्सीणं, अन्नेसिं च बहूणं वाणमंतराणं देवाण य देवीण य आहेवच्चं जाव भुंजमाणा विहरंति'' प्रायः सुगमं, नवरं 'भुयगवइणो महाकाया' इति, महाकाया–महोरगाः, किंविशिष्टाः ? इत्याह–भुजगपतयः, 'गन्धर्वगणाः' गन्धर्वसमुदायाः, किंविशिष्टाः ? इत्याह–

'निपुणगन्धर्वगीतरतयः' निपुणाः–परमकौशलोपेता एवं गन्धर्वा–गन्धर्वजातीया देवास्तेषां यद् गीतं तत्र रतिर्येषां ते तथा, एते व्यन्तराणामष्टौ मूलभेदाः, इमे चान्येऽवान्तरभेदा अष्टौ–'अणपन्निय'इत्यादि, कथम्भूता एते षोडशापीत्यत आह–'चंचलचवलचित्तकीलणदवप्पिया' चञ्चला–अनवस्थितचित्तास्तथा चलपचपलम्–अतिशयेन चपलं यच्चित्रं–नानाप्रकारं क्रीडनं यच्च चित्रो–नानाप्रकारो द्रवः–परिहासस्तौ प्रियौ येषां ते चलचपलचित्रक्रीडनद्रवप्रियाः, ततश्चञ्चलशब्देन विशेषणसमासः ।

तथा 'गहिरहसियगीयनच्चणरई' इति गम्भीरेषु हसितगीतनर्त्तनेषु रतिर्येषां ते तथा, तथा 'वणमालामेंडमउलकुंडलसच्छंदविउव्वियाभरणभूसणधरा' इति वनमाला–वनमालामयानि आमेलमुकुटकुण्डलानि, आमेलः–आपीडशब्दस्य प्राकृतलक्षणवशाद् आपीडः–शेखरकः, तथा स्वच्छन्दं विकुर्वितानि यानि आभरणानि तैर्यच्चारु भूषणं–मण्डनं तद्धरन्तीति वनमालाऽऽ-पीडमुकुटकुण्डलस्वच्छन्दविकुर्विताभरणचारुभूषणधराः, लिहादित्वादच् ।

तथा सर्वर्त्तुकैः–सर्वर्त्तुभाविभि सुरभिकुसुमैः सुरचिताः–शोभनं निर्वर्त्तिताः तथा गप्रलम्बत इति प्रलम्बा शोभत इति शोभमाना कान्ता–कमनीया विकसन्ती–अमुकुलिता अम्लानपुष्पमयी चित्रानानाप्रकारा वनमाला रचिता वक्षसि यैस्ते सर्वर्त्तुकसुरभिकुसुमरचितप्रलम्बशोभमान-कान्तविकसच्चित्रवनमालारचितवक्षसः, तथा कामं स्वेच्छया गमो येषां ते कामगमाः–स्वेच्छाचारिणः, क्वचित् 'कामकामाः' इति पाठः, कामेन–स्वेच्छया कामो–मैथुनसेवा येषां ते कामकामा अनियतकामा इत्यर्थः ।

तथा कामं–स्वेच्छया रूपं येषां ते कामरूपास्ते च दे देहाश्च कामरूपदेहास्तान् धरन्ती-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्येवंशीलाः कामरूपदेहधारिणः, खेच्छाविकुर्वितनानारूपदेहधारिण इत्यर्थः, तथा नानाविधैर्वर्णै रागो–रक्तता येषां तानि नानाविधवर्णरागाणि वराणि–प्रधानानि चित्राणि–नानाविधानि अद्भुतानि वा (वस्त्राणि) चेल्ललकानि–देशीवचनाद् देदीप्यमानानि नियंसणं–परिधानं येषां ते नानाविधवर्णरागवरवस्तरचेल्ललकनिवसनाः तथा विविधैर्देशनेपथ्यैर्गृहीतो वेषो यैस्ते विविधदेशनेपथ्यगृहीतवेषाः, 'पमुइयकंदप्पकलहकेलिकोलाहलप्पिया' कन्दर्प–कामोद्दीपनं वचनं चेष्टा च कलहो–राटि केलि–क्रीडा कोलाहलो–बोलः कन्दर्प्पकलहकेलिकोलाहलाः प्रिया येषां ते कन्दर्प्पकलहकेलिकोलाहलप्रियाः, ततःप्रमुदितशब्देन सह विशेषणसमासः।

'हासबोलबहुला' इति हासबोलौ बहुलौ–अतिप्रभूतौ येषां ते हासबोलबहुलाः, तथाऽसिमुद्गरशक्तिकुन्ता हस्ते येषां ते असिमुद्गरशक्तिकुन्तहस्ताः, 'प्रहरणात् सप्तमी चे'ति सप्तम्यन्तस्य पाक्षिकः परनिपातः, 'अनेगमणिरयणविविहनिजुत्तचित्तचिंधगया' इति, मणयः– चन्द्रकान्ताद्या रत्नानिकर्केतनादीनि अनेकैर्मणिरत्नैर्विविधं–नानाप्रकारं नियुक्तानि विचित्राणि–नानाप्रकाराणि चिह्नानि गतानि–स्थितानि येषां ते तथा, शेषं प्राग्वत्।

'कहि णं भंते ! पिसायाणं देवाणं भोमेज्जा नगरा पन्नत्ता ?' क्व भदन्त ! पिशाचानां देवानां भौमेयानि नगराणि प्रज्ञप्तानि ? इत्यादि, 'जहा ठाणपदे जाव विहरंति' यथा प्रज्ञापनायां स्थानाख्ये पदे तथा वक्तव्यं यावद्विहरन्तीति पदं, तच्चैवं– "कहि णं भंते ! पिसाया देवा परिवसंति ? गोयमा ! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहेत्ता हेट्ठा चेगं जोयणसयं वज्जेत्ता मज्झे अट्ठसु जोयणसएसु, एत्थ णं पिंसायाणं देवाणं तिरियमसंखेज्जा भोमेज्जनगरावाससयसहस्सा भवंतीतिमक्खायं, ते णं भोमेज्जनगरा बाहिं वट्टा जो ओहिओ भोमेज्जनगरवण्णतो सो भाणियव्वो जाव पडिरूवा।

एत्थ णं पिसायाणं भोमेज्जनगरा पन्नत्ता, तत्थ णं बहवे पिसाया देवा परिवसंति महिड्ढिया जहा ओहिया जाव विहरंति" सुगमं, "कालमहाकाला य एत्थ दुवे पिसाइंदा पिसायरायाणो परिवसंति महिड्ढिया जाव विहरंति, कहि णं भंते ! दाहिणिल्लाणं पिसायाणं भोमेज्जा नगरा० बाहिं वट्टा जो ओहिओ बोमेज्जनगरवण्णतो सो भाणियव्व जाव पडिरूवा, एत्थ णं पिसायाणं भोमेज्जनगरा पन्नत्ता। कहि णं भंते ! दाहिणिल्ला पिसाया देवा परिवसंति ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहेत्ता हेट्ठावि एवंग जोयणसयं वज्जेत्ता मज्झे अट्ठसु जोयणसएसु एत्थ णं दाहिणिल्लाणं पिसायाणं देवाणं भोमेज्जा नगरा पन्नत्ता, तत्थ णं बहवे दाहिणिल्ला पिसाया देवा परिवसंति महिड्ढिया जाव विहरंति, काले य तत्थ पिसाइंदे पिसायराया परिवसति महिड्ढिए जाव पभासेमाणे, से णं तत्थ तिरियमसंखेज्जाणं भोमेज्जनगरावाससयसहस्साणं चउण्हं सामानियसाहस्सीणं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दाहिणिल्लाणं वाणमन्तराणं देवाणं देवीण य आहेवच्चं जाव विहरति" पाठसिद्धं। सम्प्रति पर्षन्निरूपणार्थमाह–

'कालस्स णं भंते ! पिसायइंदस्स पिसायरन्नो कति परिसाओ पन्नत्ताओ ?, गोयमा ! तिन्नि परिसाओ प० तं०–ईसा तुडिया दढरहा अब्भिंतरिया ईसा' इत्यादि सर्वं प्राग्वत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरमत्राभ्यन्तरिकायामष्टौ देवसहस्राणि मध्यमिकायां दश देवसहस्राणि बाह्यायां द्वादश देवसहस्राणि, तथाऽभ्यन्तरिकायां पर्षदि एकं देवीशतं मध्यमिकायामप्येकं देवीशतं बाह्यायामप्येकं देवीशतं, अभ्यन्तरिकायां पर्षदि देवानां स्थितिरर्द्धपल्योपमं मध्यमिकायां देशोनमर्द्धपल्योपमं बाह्यायां सातिरेक चतुर्भागपल्योपमं, तथाऽभ्यन्तरिकायां पर्षदि देवीनां सातिरेकं चतुर्भागपल्योपमं मध्यमिकायां चतुर्भागपल्योपमं बाह्यायां देशोनं चतुर्भागपल्योपमं, शेषं प्राग्वत् ।

"कहि णं भंते ! उत्तरिल्लाणं पिसायाणं भोमेज्जा नगरा पन्नत्ता ?, कहि णं भंते ! उत्तरिल्ला पिसाया देवा परिवसंति ?, गोयमा ! जंबुद्दीवे दीवे जहेव दाहिणिल्लाणं वत्तव्वया तहेव उत्तरिल्लाणंपि, नवरं मन्दरस्स उत्तरेणं, महाकाले इत्थ पिसाइंदे पिसायराया परिवसति जाव विहरति" पाठसिद्धं, पर्षद्वक्तव्यताऽपि कालवत्, "एवं जाह पिसायाणं तहा भूयाणवि जाव गंधव्वाणं नवरं इंदेसु नाणत्तं भाणियव्वं, इमेण विहिणा–भूयाणं सुरूवपडिरूवा, जक्खाणं पुन्नभद्दमाणिभद्दा, रक्खसाणं भीममहाभीमा, किंनराणं किंनरकिंपुरिसा, किंपुरिसाणं सप्पुरिसमहापुरिसा, महोरगाणं अइकायमहाकाया, गंधव्वाणं गीयरईगीयजसा–

॥१॥ 'काले य महाकाले सुरूवपडिरूवपुन्नभद्दे य ।
अमरवइमाणिभद्दे भीमे य तहा महाभीमे ॥

॥२॥ किंनरकिंपुरिसे खलु सप्पुरिसे खलु तहा महापुरिसे ।
अइकायमहाकाए गीयरई चेव गीयजसे ॥

सुगमम्, पर्षद्वक्तव्यताऽपि कालवन्निरन्तरं वक्तव्या यावद्गीतयशसः ॥ तदेवमुक्ता वानमन्तरवक्तव्यता सम्प्रति ज्योतिष्काणामाह–

मू. (१६०) *कहि णं भंते ! जोइसियाणं देवाणं विमाणा पन्नत्ता ? कहि णं भंते ! जोतिसिया देवा परिवसंति ?, गोयमा ! उप्पिं दीवसमुद्दाणं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जातो भूमिभागातो सत्तनउए जोयणसते उड्ढं उप्पतित्ता दसुत्तरसया जोयणबाहल्लेणं ।*

तत्थ णं जोइसियाणं देवामं तिरियमसंखेज्ञा जोतिसियविमाणावाससतसहस्सा भवंतीतिमक्खायं, ते णं विमाणा अद्धकविट्ठकसंठाणसंठिया एवं जहा ठाणपदे जाव चंदमसूरिया य तत्थ णं जोतिसिंदा जोतिसरायाणो परिवसंति महिड्डिया जाव विहरंति ।

सूरस्स णं भंते ! जोतिसिंदस्स जतिसरण्णो कति परिसाओ पण्णत्ताओ ?, गोयमा ! तिन्नि परिसाओ प० तं० तुंबा तुडिया पेच्चा, अब्भिंतरया तुंबा मज्झिमिया तुडिया बाहिरिया पेच्चा । सेसं जहा कालस्स परिमाणं, ठितीवि । अट्ठो जहा चमरस्स । चंदस्सवि एवं चेव ॥

वृ. 'कहि णं भंते ! जोइसियाण'मित्यादि, क्व भदन्त ! ज्योतिष्कानां देवानां विमानानि प्रज्ञप्तानि ? क्व भदन्त ! ज्योतिष्का देवाः परिवसन्ति ?, भगवानाह–गौतम ! अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागाद् रुचकोपलक्षितात् 'सप्तनवतिशतानि' सप्तनवत्यधिकानि योजनशतान्यूर्द्धमुत्पलत्य–बुद्धयाऽतिक्रम्य दशोत्तरयोजशतबाहल्ये तिर्यगसङ्ख्येयेऽसङ्ख्येय-योजनकोटीकोटीप्रमाणे ज्योतिर्विषये 'अत्र' एतस्मिन् प्रदेशे ज्योतिष्काणां देवानां तिर्यगसङ्ख्येयानि ज्योतिष्कविमानशतसहस्राणि भवन्तीत्याख्यातं मया शेषैश्च तीर्थकृद्भि, तानि च विमाना-न्यर्द्धकपित्थसंस्थानसंस्थितानि । अत्राक्षेपपरिहारौ चन्द्रप्रज्ञप्तिटीकायां सूर्यप्रज्ञप्तिटीकायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ग्रहणिटीकायां चाभिहितातिं ततोऽवधार्यों, 'सव्वफालियामया' सर्वात्मना स्फटिकमयानि सर्वस्फटिकमयानि 'जहा ठाणपदे जाव चंदमसूरिया एत्थ दुवे जोइसिंदा जोइसरायाणो परिवसंति महिड्डिया जाव विहरंति' यथा प्रज्ञापनायां स्थानाख्ये द्वितीये पदे तथा वक्तव्यं यावच्चन्द्रसूर्यो, द्वावत्र ज्योतिष्केन्द्रौ ज्योतिष्कराजानौ परिवसतस्ततोऽप्यूर्ध्वं यावद्विहरन्तीति, एतच्चैवं ।

"अब्भुग्गयमूसियपहसिया इव विविहमणिकणगरयणभत्तिचित्ता वाउद्धुयविजयवेजयंतीपडागछत्तातिछत्तकलिया तुंगा गगनतलमभिलंघमाणसिहरा जालंतररयणा पंजरुम्मिल्लियव्व मणिकणगथूभियागा वियसयसयवत्तपोंडरीया तिलगरयणद्धचंदचित्ता नानामणिमयदामालंकिया अंतो बहिं च सण्हा तवणिज्जरुइलवालुयापत्थडा सुहफासा सस्सिरीया सुरूवा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं जोइसियाणं विमाणा पन्नत्ता ।

एत्थ णं जोइसिया देवा परिवसंति, तंजहा–बिहस्सती चंदसूरा सुक्कसनिच्छरा राहू धूमकेउबूहा अंगारका तत्ततवणिज्जकणगवण्णा जया तहा जोइसंमि चारं चरंति केऊ य गइरतीया अट्ठावीसइविहा य नक्खत्तदेवगणा नानासंठाणसंठिया य पंचवण्णा य तारगाओ ठियलेसाचारिणो अविस्सामंडलगई पत्तेयनामंकपायडियचिंधमउडा महिड्डिया जाव पभासेमाणा, ते णं तत्थ साणं साणं अनियाणं साणं साणं अनियाहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं, अन्नेसिं च बहूणं जोइसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति, चंदिमसूरिया य एत्थ दुवे जोइसिंदा जोइसियरायाणो परिवसंति महिड्डिया जाव पभासेमाणा ।

ते णं तत्थ साणं साणं जोइसियविमाणावाससयसहस्साणं चउण्हं चउण्हं सामानियसाहस्सीणं चउण्हं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं जोइसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति" इति, अभ्युद्गता–आभिमुख्येन सर्वतो गता उत्सृता–प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा–दीप्तिस्तया सितानिधवलानि अभ्युद्गतोत्सृतप्रभासितानि, तथा विविधानां मणिकनकरत्नानां या भक्तयो–विच्छित्तिविशेषास्ताभिश्चित्राणि–आश्चर्यभूतानि विविधमणिकनकभक्तिचित्राणि, 'वाउद्धुयविजयवेजयंतीपडागच्छत्तातिच्छत्तकलिया' वातोद्धूता–वायुकम्पिता विजयः–अभ्युदयस्तत्संसूचिका वैजयन्त्यभिधाना याः पताकाः, अथवा विजय इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः–पताकास्ता एव विजयवर्जिता वैजयन्त्यः छत्रातिच्छत्राणि–उपर्युपरि स्थितानि छत्राणि तैः कलितानि वातोद्धूतविजयवैजयन्ती- पताकाछत्रातिच्छत्रकलितानि 'तुङ्गानि' उच्चानि, तथा गगनतलम्–अम्बरतलमनुलिखन्– अभिलङ्घयन् शिखरं येषां तानि गगनतलानुलिखच्छिखराणि, तथा जालानि–जालकानि तानि च भवनभित्तिषु लोकप्रतीतानि, तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि यत्र तानि जालान्तररत्नानि, तथा पञ्जराद् उन्मीलितवद् यथा हि किल किमपि वस्तु पञ्जराद्–वंशादिमयप्रच्छादनविशेषाद् बहिष्कृतमत्यन्तमनष्टच्छायत्वात् शोभते तथा तान्यपि विमानानीति भावः, तथा मणिकनकानां सम्बन्धिनी स्तूपिका–शिखरं येषां तानि मणिकनकस्तूपिकानि, ततः पूर्वपदाभ्यां सह विशेषणसमासः ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादिषु प्रतिकृतित्वेन स्थितानि तिलकाश्च–मित्यादिषु पुण्ड्राणि रत्नमयाश्चार्द्धचन्द्रा द्वारादिषु तैश्चित्राणि विकसितशतपत्रपुण्डरीकतिलकरत्नार्द्धचन्द्रचित्राणि, तथा नानामणिमयीभिर्दामभिरलङ्क तानि नानामणिमयदामालङ्क तानि, तथाऽन्तर्बहिश्च श्लक्ष्मानि–मसृणानि, तथा तपनीयं–सुवर्णविशेषस्तन्मय्या रुचिराया वालुकायाः–सिकतायाः प्रस्तटः–प्रतरो येषु तानि तपनीयरुचिरवालुकाप्रस्तटानि, तथा सुखस्पर्शानि शुभस्पर्शानि वा शेषं प्राग्वद् यावद् 'बहस्सइचंदा' इत्यादि।

बृहस्पतिचन्द्रसूर्यशुक्रशनैश्चरराहुधूमकतुबुधाङ्गारकाः तप्ततपनीयकनकवर्णा–ईषत्कनकवर्णा, तथा ये ग्रहा ज्योतिष्के–ज्योतिश्चक्र चारं चरन्ति केतवः ये च बाह्यद्वीपसमुद्रेष्वगतिरतिकाः ये चाष्टाविंशतिविधा नक्षत्रदेवगणास्ते सर्वेऽपि नानाविधसंस्थानसंस्थिताः चशब्दात्तप्ततपनीयकनकवर्णाश्च, तारकाः पञ्चवर्णा, एते च सर्वेऽपि स्थितलेश्या अवस्थिततेजोलेश्याकाः, तथा ये चारिणः–चाररतास्तेऽविश्राममण्डलगतिकाः, तथा सर्वेऽपि प्रत्येकं नामाङ्केन–स्वस्वनामाङ्कपातेन प्रकटितं चिह्नं मुकुटो येषां ते प्रत्येकं स्वनामाङ्कप्रकटितमुकुटचिह्नाः, किमुक्तं भवति ?–

चन्द्रस्य स्वमुकुटे चण्द्रमण्डलं लाञ्छनं स्वनामाङ्कप्रकटितं सूर्यस्य सूर्यमण्डलं ग्रहस्य ग्रहमण्डलं नक्षत्रस्य नक्षत्रमण्डलं तारकस्य तारकाकारमिति, शेषं प्राग्वत्॥ पर्षन्निरूपणार्थमाह–'सूरस्स णं भंते !' जोइंदिस्स जोइसरन्नो कइ परिसाओ पन्नत्ताओ ?, गोयमा ! तिन्नि परिसाओ पन्नत्ताओ, तंजहा–तुंबा तुडिया पेच्चा, अब्भिंतरिया तंबा मज्झिमिया तुडिया बाहिरिया पेच्चा, सेसं जहा कालस्स, अट्ठो जहा चमरस्स, चन्दस्सवि एवं चेव' पाठसिद्धं।

ज्योतिष्कास्तिर्यग्लोक इति तिर्यगलोकप्रस्तावाद्वीपसमुद्रवक्तव्यतामाह–

–ः देवाधिकार अन्तर्गतः द्वीपसमुद्र अधिकार ः–

मू. (१६१) *कहि णं भंते ! दीवसमुद्दा ? केवइया णं भंते ! दीवसमुद्दा ? केमहालया णं भंते ! दीवसमुद्दा ? किंसंठिया णं भंते ! दीवसमुद्दा ? कीमाकारभावपडोयारा णं भंते ! दीवसमुद्दा णं पन्नत्ता ? गोयमा ! जंबुद्दीवाइया दीवा लवणादीया समुद्दा संठाणतो एकविहविधाणा वित्थारतो अनेगविधविधाणा दुगुणादुगुणे पडुप्पाएमाणा २ पवित्थरमाणा २ ओभासमाणवीचीया बहुउप्पलपउमकुमुदणलिणसुभगसोगंधियपोंडरीयमहापोंडरीयसतपतसहस्सपत्तपप्फुल्लकेसरोवचिता पत्तेयं पत्तेयं पउमवरवेइयापरिक्खित्ता पत्तेयं पत्तेयं वनसंडपरिक्खित्ता अस्सिं तिरितलोए असंखेज्ञा दीवसमुद्दा सयंभुरमणपज्ञवसाणा पन्नत्ता समणाउसो ! ॥*

वृ. 'कहि णं भंते ! दीवसमुद्दा' इत्यादि, 'क्व' कस्मिन् णमिति वाक्यालङ्कारे 'भदन्त !' परमकल्याणयोगिन् ! द्वीपसमुद्राः प्ररूपिता ?, अनेन द्वीपसमुद्राणामवस्थानं पृष्टं, 'केवइया णं भंते ! दीवसमुद्दा' इति 'कियन्तः' कियत्सङ्ख्याका णमिति वाक्यालङ्कारे भदन्त ! द्वीपसमुद्राः प्रज्ञप्ताः ?, अनेन द्वीपसमुद्राणां सङ्ख्यानं पृष्टं, 'केमहालिया णं भंते ! दीवसमुद्दा' इति किं महानालय–आश्रयो व्याप्यक्षेत्ररूपो येषां ते महालयाः किंप्रमाणमहालया णमिति प्राग्वद् द्वीपसमुद्रा–प्रज्ञप्ताः ?, किंप्रमाणं द्वीपमसुद्राणां महत्वमिति भावः, एतेन द्वीपसमुद्राणामायामादिपरिमाणं पृष्टं, तथा 'किंसंठिया णं भंते ! दीवसमुद्दा' इति किं संस्थितं–संस्थानं येषां ते किंसंस्थिता णमिति पूर्वद् भदन्त ! द्वीपसमुद्राः प्रज्ञप्ताः ?, अनेन संस्थानं पप्रच्छ, 'किमागारभावपडोयारा णं भंते !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीवसमुद्दा पन्नत्ता' इति आकारभावः—स्वरूपविशेषः कस्याकारभावस्य प्रत्यवतारो येषां ते किमाकारभावप्रत्यवताराः, बहुलग्रहणाद्वैयधिकरण्येऽपि समासः, णमिति पूर्ववद्, द्वीपसमुद्राः प्रज्ञप्ताः ?, किं स्वरूपं द्वीपसमुद्राणामिति भावः, अनेन स्वरूपविशेषविषयः प्रश्नः कृतः,

भगवानाह— 'गोयमे' त्यादि, गौ० ! जम्बूद्वीपादयो द्वीपा 'लवणादिकाः' लवणसमुद्रादिकाः समुद्राः, अनेन द्वीपानां समुद्राणां चादिरुक्तः, एतच्चापृष्टमपि भगवता कथितमुत्तरत्रोपयोगित्वात् गुणवते शिष्यायापृष्टमपि कथनीयमिति स्थापनार्थं च, 'संठाणतो' इत्यादि, 'संस्थानतः' संस्थानमाश्रित्य 'एगविहिविहाणा' इति एकविधि—एकप्रकारं विधानं येषां ते एकविधिविधानाः, एकस्वरूपा इति भावः, सर्वेषां वृत्तसंस्थानसंस्थितत्वाद्, 'विस्तारतः' विस्तारमधिकृत्य पुनरनेकविधिविधानाः अनेकविधानि—अनेकप्रकाराणि विधानानि येषां ते तथा, विस्तारमधिकृत्य नानास्वरूपा इत्यर्थः, तदेव नानास्वरूपत्वमुपदर्शयति—'दुगुणादुगुणे पडुप्पाएमाणा २ पवित्थरमाणा' इति, द्विगुणं द्विगुणं यथा भवति एवं प्रत्युत्पद्यमाना गुण्यमाना इत्यर्थः, 'प्रविस्तरन्तः' प्रकर्षेण विस्तारं गच्छन्तः तथाहि—जम्बूद्वीप एकं लक्षं लवणसमुद्रो द्वे लक्षे धातकीखण्डश्चत्वारि लक्षाणीत्यादि, 'ओभासमाणवीचीया' इति अवभासमाना वीचयः—कल्लोला येषां ते अवभासमानवीचयः, इदं विशेषणं समुद्राणां प्रतीतमेद ।

द्वीपानामपि च वेदितव्यं, तेष्वपि ह्रदनदीतडागादिषु कल्लोलसम्भवात्, तथा बहुभिरुत्पलपद्मकुमुदनलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डीकशतपत्रसहस्रपत्रैः 'पप्फुल्ल'त्ति प्रफुल्लैः—विकसितैः 'केसरे' ति केसरोपलक्षितैरुपचिताः—उपचितशोभाका बहूत्पलपद्मकुमुदनलिनसुभगसौगन्धिकपुण्डरीकमहापौण्डरीकशतपत्रसहस्रपत्रप्रफुल्लकेसरोपचिताः, तत्रोत्पलं—गर्दभकं पद्मं—सूर्यविकासि कुमुदं—चन्द्रविकासि नलिनम्—ईषद्रक्तं पद्मं सुभगं—पद्मविशेषः सौगन्धिकं—कल्हारं पौण्डरीकं—सिताम्बुजं तदेव बृहत् मपौण्डरीकं शतपत्रसहस्रपत्रे—पद्मविशेषौ पत्रसङ्ख्याकृतभेदौ, 'पत्तेयं २' इति प्रतिशब्दोऽत्राभइणउख्ये 'लक्षणेनाभिप्रती आभिमुख्ये' इति च समासस्ततो वीप्साविवक्षायां प्रत्येकशब्दस्य द्विर्वचनं पद्मवरवेदिकापरिक्षिप्ताः प्रत्येकं वनखण्डपरिक्षिप्ताश्च । 'सयंभूरमणप्जवसाणा' इति जम्बूद्वीपादयो द्वीपाः स्वयम्भूरमणद्वीपपर्यवसाना लवणसमुद्रादयः समुद्राः स्वयम्भूरमणसमुद्रपर्यवसाना अस्मिन् तिर्यग्लोके यत्र वयं स्थिता असङ्ख्येया द्वीपसमुद्राः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! इह 'अस्सिं तिरियलोए' इत्यनेन स्थामुक्तम्, 'असंखेज्जा' इत्यनेन सङ्ख्यानं, 'दुगुणादुगुण' मित्यादिना महत्वं 'संठाणतो' इत्यादिना संस्थानम् ।। सम्प्रत्याकारभाप्रत्यवतारं विवक्षुरिदमाह—

मू. (१६२) *तत्थ णं अयं जंबुद्दीवे नामं दीवे दीवसमुद्दाणं अब्भितरिए सव्वखुड्डाए वट्टे तेल्लापूयसंठाणसंठिते वट्टे रहचक्कवालसंठाणसंठिते वट्टे पुक्खरकण्णियासंठाणसंठिते वट्टे पडिपुन्नचंदसंठाणसंठिते, एक्कं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं सोलस य सहस्साइं दोन्नि य सत्तावीसे जोयणसते तिन्नि य कोसे अट्ठावीसं च धणुसयं तेरस अंगुलाइं अद्धंगुलकं च किंचिविसेसाहियं परिक्खेवेणं पन्नत्ते ।। से णं एक्काए जगतीए सव्वतो समंता संपरिक्खित्ते ।।*

सा णं जगती अट्ठ जोयणाइं उड्ढं उच्चत्तेणं मूले बारस जोयणाइं विक्खंभेणं मज्झे अट्ठ

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

जोयणाइं विक्खंभेणं उप्पिं चत्तारि जोयणाइं विक्खंभेणं मूले विच्छिण्णा मज्झे संखित्ता उप्पिं तणुया गोपुच्छसंठाणसंठिता सव्ववइरामई अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा ॥ सा णं जगती एक्केणं जालकडएणं सव्वतो समंता संपरिक्खित्ता ॥

से णं जालकडए णं अद्धजोयणं उड्ढं उच्चत्तेणं पंचधणुसयाइं विक्खंभेणं सव्वरयणामए अच्छे सण्हे लण्हे (जाव) घट्ठे मट्ठे नीरए निम्मले निप्पंके निक्ककंडच्छाए सप्पभे सस्सिरीए समरीए सउज्जोए पासादीए दरिसणिज्जे अभिरूवे पडिरूवे ॥

वृ. 'तत्थ ण'मित्यादि, 'तत्र' तेषु द्वीपसमुद्रेषु मध्ये 'अयं' यत्र वयं वसामो जम्बूद्वीपो नाम द्वीपः, कथम्भूतः ? इत्याह—सर्वद्वीपसमुद्राणां 'सर्वाभ्यन्तरकः' सर्वात्मना—सामस्त्येनाभ्यन्तरः सर्वाभ्यन्तर एव सर्वाभ्यन्तरकः, प्राकृतलक्षणात्स्वार्थे कप्रत्ययः, केषां सर्वात्मनाऽभ्यन्तरकः ?, उच्यते, सर्वद्वपसमुद्राणां, तथाहि—सर्वेऽपि शेषा द्वीपसमुद्रा जम्बूद्वीपादारभ्यागमाभिहितेन क्रमेण द्विगुणद्विगुणविस्तारास्ततो भवति सर्वद्वीपसमुद्राणां सर्वाभ्यन्तरकः, अनेन जम्बूद्वीपस्यावस्थानमुक्तं ।

'सव्वखुड्डाग' इति सर्वेभ्योऽपि शेषद्वीपसमुद्रेभ्यः क्षुल्लको—लघुः सर्वक्षुल्लकः, तथाहि—सर्वे लवणादयः समुद्राः सर्वे च धातकीखण्डादयो द्वीपा जम्बूद्वीपादारभ्य द्विगुणद्विगुणायामविष्कम्भपरिधयस्ततः शेषद्वीपसमुद्रापेक्षयाऽयं लघुरिति, एतेन सामान्यतः परिमाणमुक्तं, विशेषतस्त्वयामादिगतं परिमाणमग्रे वक्ष्यति, तथा वृत्तोऽयं जम्बूद्वीपो जतस्तैलापूपसंस्थानसंस्थितः, तैलेन पकोऽपूपस्तैलापूपः, तैलेन हि पकोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतपक्वइति, तैलविशेषणं, तस्येव यत्संस्थानं तेन संस्थितस्तैलापूपसंस्थानसंस्थितः, तथा वृत्तोऽयं जम्बूद्वीपो यतो—

—'रथचक्रवालसंस्थानसंस्थितः' रथस्य—रथाङ्गस्य चक्रस्यावयवे समुदायोपचाराच्चक्रवालं—मण्डलं तस्येव यत् संस्थानं तेन संस्थितो रथचक्रवालसंस्थानसंस्थितः, एवं वृत्तः पुष्करकर्णिकासंस्थानसंस्थितः पुष्करकर्णिकाःपद्मबीजकोशः वृत्तः परिपूर्णचन्द्रसंस्थानसंस्थितः परद्वयं भवानीयम्, एतेन जम्बूद्वीपस्य संस्थानमुक्तम् ।

सम्प्रत्यायामदिपरिमाणमाह—'एक्क ण'मित्यादि, एकं जनशतसहस्रमायामविष्कम्भेन, आयामश्च विष्कम्भश्च आयामविष्कम्भं, समाहारो द्वन्द्वः, तेन, आयामेन विष्कम्भेन चेत्यर्थः, त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशत्यधिके त्रयः क्रोशा अष्टाविंशम्—अष्टाविंशत्यधिकं धनुःशतं त्रयोदशाङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकमित्येतावान् परिक्षेपेण प्रज्ञप्तः, इदं च परिक्षेपपरिमाणं 'विक्खंभवग्गदहगुणकरणी वट्टस्स परिरओ होइ ।' इति करणवशात्स्वयमानेतव्यं क्षेत्रसमासटीका वा परिभावनीया, तत्र गणितभावनायाः सविस्तरं कृतत्वात् । सम्प्रत्याकारभावप्रत्यवतारप्रतिपादनार्थमाह—'से ण'मित्यादि, 'सः' अनन्तरोक्तायामविष्कम्भपरिक्षेपपरिमाणो जम्बूद्वीपो णमिति वाक्यालङ्कारे एकया जगत्या सुनगरप्राकारकल्पया 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन 'संपरिक्षिप्तः' सम्यग्वेष्टितः ।

'सा णं जगई' इत्यादि, सा च जगती ऊर्ध्वम्—उच्चैस्त्वेनाष्टौ योजनानि मूले द्वादश योजनानि विष्कम्भेन मध्येऽष्टौ उपरि चत्वारि, अत एव मूले विष्कम्भमधिकृत्य विस्तीर्णा, मध्ये संक्षिप्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिभागोनत्वात्, उपरि तनुका, मूलापेक्षया त्रिभागमात्रविस्तारभावात्, एतदेवोपमया प्रकटयति–'गोपुच्छसंठाणसंठिया' गोपुच्छस्येव संस्थानं गोपुच्छसंस्थानं तेन संस्थिता गोपुच्छसंस्थानसंस्थिता ऊर्ध्वीकृतगोपुच्छाकारा इति भावः, 'सव्ववइरामई' सर्वात्मना–सामस्त्येन वज्रमयी–वज्ररत्नात्मिका 'अच्छा' आकाशस्फटिकवदतिस्वच्छा 'सण्हा लण्हा' श्लक्ष्णा–श्लक्ष्णपुद्गलस्कन्धनिष्पन्ना श्लक्ष्ण- दलनिष्पन्नपटवत् 'लण्हा' मसृणा घुण्टितपटवत् 'घट्ठा' घृष्टा इव घृष्टा खरशानया पाषाणप्रतिमावत् 'मट्ठा' मृष्टा इव मृष्टा सुकुमारशानया पाषाणप्रतिमावत् 'नीरजा' स्वाभाविकरजोरहितत्वात् 'निर्मला' आगन्तुकमलाभावात् 'निष्पङ्का' कलङ्कविकला कर्दमरहिता वा 'निक्कंकडच्छाया' इति निष्कङ्कटा निष्कवचा निरावरणा निरुपघातेति भावार्थ छाया–दीप्तिर्यस्याः सा निष्कङ्कटच्छाया 'सप्रभा' स्वरूपतः प्रभावती 'समरीचा' बहिर्विनिर्गतकिरणजाला ।

अत एव 'सोद्योता' बहिर्व्यवस्थितवस्तुस्तोमप्रकाशकरी 'प्रासादीया' प्रसादाय–मनःप्रसत्तये हिता तत्कारित्वात् प्रासादीया मनःप्रह्लत्तिकारिणीति भावः 'दर्शनीया' सदर्शनयोग्या यां पश्यतश्चक्षुषी श्रमं न गच्छत इति 'अभिरूवा' इति अभि–सर्वेषां द्रष्टृणां मनःप्रसादानुकूलतयाऽभिमुखं रूपं यस्याः सा अभिरूपा, अत्यन्तकमनीयेति भावः, अत एव 'प्रतिरूपा' प्रतिविशिष्टम्–असाधारणं रूपं यस्याः सा प्रतिरूपा, अथवा प्रतिक्षणं नवं नवमिव रूपं यस्याः सा प्रतिरूपा ।

'सा णं जगती' इत्यादि, 'सा' अनन्तरोदितस्वरूपा णमिति वाक्यालङ्कारे जगती एकेन 'जालकटकेन' जालानि जालकानि यानि भवनभित्तिषु लोकेऽपि प्रसिद्धानि तेषां कटकः–समूहो जालकटको जालकाकीर्णो रम्यसंस्थानप्रदेशविशेषपङ्क्तिरिति भावः, तेन जालकटकेन 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्ता ।

'से णं जालकडए' इत्यादि, 'सः' जालकटक ऊर्द्धमुच्चैस्त्वेनार्द्धयोजनं–द्वे गव्यूते विष्कम्भेन पञ्च धनुःशतानि, किमुक्तं भवति ? –जगत्या प्रायो बहुमध्यभागे सर्वत्र जालकानि तानि च प्रत्येकमूर्द्धमुच्चैस्त्वेन द्वे गव्यूते विष्कम्भतः पञ्चधनुःशतानीति, स च जालकटकः 'सव्वरयणामए' इति सर्वात्मना रत्नमयः 'अच्छे सण्हे लण्हे जाव पडिरूवे' इति यावच्छब्दकरणात् 'घट्ठे मट्ठे नीरए निम्मले निप्पंके निक्कंकडच्छाये सप्पभे समरीए सउज्जोए पासाइए दरिसणिज्जे अभिरूवे' इति परिग्रहः, एतेषां पदानामार्थ प्राग्वत् ॥

–: "पद्मवर वेदिका" अधिकार :–

मू. (१६३) *तीसे णं जगतीए उप्पिं बहुमज्झदेसभाए एत्थ णं एगा महई पउमवरवेदिया पं०, सा णं पउमवरवेदिया अद्धजोयणं उड्डं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं सव्वरयणामए जगतीसमिया परिक्खेवेणं सव्वरयणामई० ।*

तीसे णं पउमवरवेइयाए अयमेयारूवे वन्नावासे पन्नत्ते, तंजहा–वइरामया नेमा रिट्ठामया पइट्ठाणा वेरुलियामया खंभा सुवण्णरुप्पमया फलगा वइरामया संधी लोहितक्खमईओ सूईओ नानामणिमया कलेवरा कलेवरसंघाडा नानामणिमया रूवा नानामणिमया रूवसंघाडा अंकामया पक्खा पक्खबाहाओ जोतिरसामया वंसा वंसकवेलुया य रययामईओ पट्टियाओ जातरूवमयीओ ओहाडणीओ वइरामयीओ उवरिं पुञ्छणीओ सव्वसेए रययामते साणं छादणे ॥

सा णं पउमवरवेइया एगमेगेणं हेमजालेणं (एगमेगेणं गवक्खजालेणं) एगमेगेणं

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

खिंखिणिजालेणं जाव मणिजालेणं (कणयजालेणं रयणजालेणं) एगमेगेणं पउमवरजालेणं सव्वरयणामएणं सव्वतो समंता संपरिक्खित्ता।

ते णं जाला तवणिज्जलंबूसगा सुवण्णपयरगमंडिया नानामणिरयणविविहहारद्धहार-उवसोभितसमुदया ईसिं अन्नमन्नमसंपत्ता पुव्वावरदाहिणउत्तरागतेहिं वाएहिं मंदागं २ एज्जमाणा २ कंपिज्जमाणा २ लंबमाणा २ पझंझमाणा २ सद्दायमाणा २ तेणं ओरालेणं मणुण्णेणं कण्णमण-णेव्वुतिकरेणं सद्देणं सव्वतो समंता आपूरेमाणा सिरीए अतीव उवखोभेमाणा उव० चिट्ठंति।

तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे हयसंघाडा गयसंघाडा नरसंघाडा किन्नरसंघाडा किंपुरिससंघाडा महोरगसंघाडा गंधव्वसंघाडा वसहसंघाडा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरिया सउज्जोया पासाईया दरसणिज्जा अभिरूवा पडिरूवा। तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे हयपंतीए तहेव जाव पडिरूवाओ। एवं हयवीहीओ जाव पडिरूवाओ। एवं हयमिहुणाइं जाव पडिरूवाइं।

तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहवे पउमलयाओ नागलताओ, एवं असोग० चंपग० चूयवण० वासंति० अतिमुत्तग० कुंद० सामलयाओ णिच्चं कुसुमियाओ जाव सुविहत्तपिंडमंजरिवडिंसकधरीओ सव्वरयणामईओ सण्हाओ लण्हाओ घट्ठाओ मट्ठाओ नीरयाओ निम्मलाओ निप्पंकाओ निक्ककडच्छायाओ सप्पभाओ समिरीयाओ सउज्जोयाओ पासाईयाओ दरिसणिज्जाओ अभिरूवाओ पडिरूवाओ।

से केणट्ठेणं (भंते!) एवं वुच्चइ–पउमवरवेइया पउमवरवेइया?, गोयमा! पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं वेदियासु वेतियाबाहासु वेदियासीसफलएसु वेदियापुडंतरेसु खंभेसु खंभबाहासु खंभसीसेसु खंभपुडंतरेसु सूईसु सुईमुहेसु सूईफलएसु सूईपुडंतरेसु पक्खेसु पक्खबाहासु पक्खपेरंतरेसु बहूइं उप्पलाइं पउमाइं जाव सतसहस्सपत्ताइं सव्वरयणामयाइं अच्छाइं सण्हाइं लण्हाइं घट्ठाइं मट्ठाइं णीरयाइं णिम्मलाइं निप्पंकाइं निक्कंकडच्छायाइं सप्पभाइं समिरियाइं सउज्जोयाइं पासादीयाइं दरिसणिज्जाइं अभिरूवाइं पडिरूवाइं महता २ वासिक्कच्छत्तसमयाइं पन्नत्ताइं समणाउसो से तेणट्ठेणं गोयमा! एवं वुच्चइ पउमवरवेदिया २।

पउमवरवेइया णं भंते! किं सासया असासया?, गोयमा! सिय सासया सिय असासया से केणट्ठेणं भंते! एवं वुच्चइ–सिय सासया सिय असासया?, गोयमा! दव्वट्ठयाए सासता वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता, से तेणट्ठेणं गोयमा! एवं वुच्चइ–सिय सासता सिय असासता।

पउमवरवेइया णं भंते! कालओ केवच्चिरं होति?, गोयमा! न कयावि नासि णनकयावि नत्थि न कयावि न भविस्सति॥ भुविं च भवति य भविस्सति य धुवा नियया सातता अक्खया अव्वया अवट्ठिया निच्चा पउमवरवेदिया॥

वृ. 'तीसे णं जगतीए' इत्यादि, 'तस्याः' यतोक्तरूपाया जगत्याः 'उपरि' उपरितने तले यो बहुमध्यदेशभागः, सूत्र एकारान्तता मागधदेशभाषालक्षणानुरोधात् यथा 'कयरे आगच्छइ दित्तरूवे?' इत्यत्र, 'एत्थ ण'मिति 'अत्र' एतस्मिन् बहुमध्यदेशभागे णमिति पूर्ववत् महती

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एका पद्मवरवेदिका प्रज्ञप्ता मया शेषैश्च तीर्थकृद्भिः, सा चोर्ध्वमुच्चैस्त्वेनार्द्धयोजनं–द्वे गव्यूते पञ्च धनुःशतानि विष्कम्भेन 'जगतीसमिया' इति जगत्याः समा–समाना जगतीसमा सैव जगतीसमिका 'परिक्षेपेण' परिरयेण यावान् जगत्या मध्यभागे परिरयस्तावान् तस्या अपि परिरय इति भावः, 'सर्वरत्नमयी' सामस्त्येन रत्नात्मिका 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकं पाठतोऽर्थतश्च प्राग्वत् ।

'तीसे ण'मित्यादि, तस्या णमिति पूर्ववत् पद्मवरवेदिकायाः 'अयं' वक्ष्यमाणः 'एतद्रूपः' एवंस्वरूपः 'वर्णावासः' वर्ण–श्लाघा यथावस्थितस्वरूपकीर्त्तनं तस्यावासो–निवासो ग्रन्थपद्धति-रूपो वर्णावासो वर्णकनिवेश इत्यर्थः 'प्रज्ञप्तः' प्ररूपितः, तद्यथेत्यादिना तदेव दर्शयति–'वइरामया नेमा' इति नेमा नाम पद्मवरवेदिकाया भूमिभागादूर्द्ध निष्कामन्तः प्रदेशास्ते सर्वे 'वज्रमयाः' वज्ररत्नमयाः, वज्रशब्दस्य दीर्घत्वं प्राकृतत्वात्, एवमन्यत्रापि द्रष्टव्यं, रिष्ठमयानि प्रतिष्ठानानि–मूलपादाः 'वेरुलियमया खंभा' इति वैडूर्यरत्नमयाः स्तम्भाः सुवर्णरूप्यमयानि फलकानि लोहिताक्षर-त्नात्मिकाः सूचयः फलकद्वयसम्बन्धविघटनाभावहेतुपादुकास्थानीयास्ते सर्वे 'वइरामया संधी' वज्रमयाः सन्धयः–सन्धिमेलाः फलकानां, किमुक्तं भवति ?

वज्ररत्नापूरिताः फलकानां सन्धयः 'नानामणिमया कलेवरा' इति नानामणिमयानि कलेवराणि–मनुष्यशरीराणि नानामणिमयाः कलेवरसङ्घाटा–मनुष्यशरीरयुग्मानि नानामणिम-यानि रूपाणि–रूपकाणि नानामणिमया रूपसङ्घाटाः–रूपयुग्मानि 'अङ्कामया पक्खा पक्खबाहातो य' इति अङ्को–रत्नविशेषस्तन्मयाः पक्षास्तदेकदेशाः पक्षबाहवोऽपि तदेकदेशभूता एवाङ्कमयाः, आह च मूलटीकाकारः– "अङ्कमयाः पक्षास्तदेकदेशभूताः, एवं पक्षबाहवोऽपि द्रष्टव्या" इति, 'जोईरसामया वंसा वंसकवेल्लुया य' इति ज्योतीरसं नाम रत्नं तन्मया वंशाः–महान्तः पृष्ठवंशाः 'वंशकवेल्लुया य' इति महतां पृष्ठवंशानामुभयतस्तिर्यक् स्थाप्यमाना वंशाः कवेल्लुकानि–प्रतीतानि 'रययामईओ पट्टियाओ' इति रजतमय्यः पट्टिका वंशानामुपरि कम्बास्थानीयाः 'जायरूवमईओ ओहाडणीओ' जातरूपं–सुवर्णविशेषस्तन्मय्यः 'ओहाडणीओ' अवघाटिन्यः आच्छादनहेतु-कम्बोपरिस्थाप्यमान-महाप्रमाणकिलिञ्चस्थानीयाः, 'वइरामईओ उवरिं पुंछणीओ' इति 'वज्रमय्यो' वज्ररत्नात्मिका अवघाटनीनामुपरि पुञ्छन्यः–निबिडतरच्छादनहेतुश्लक्ष्णतरतृणविशेषस्थानीयाः, उक्तं च मूलटीकाकारेण –

"ओहाडणी हीरग्गहणं महत् क्षुल्लकं तु पुञ्छनी इति, 'सव्वसेए रययामए सा णं छाणे' इति, सर्वश्वेतं रजतमयं पुञ्छनीनामुपरि कवेल्लुकानामध आच्छादनम् ।। 'सा ण'मित्यादि, 'सा' एवंस्वरूपा णमिति वाक्यालङ्कारे पद्मवरवेदिका तत्र तत्र प्रदेसे एकैकेन 'हेमजालेन' सर्वात्मना हेममयेन लम्बमानेन दामसमूहेन एकैकेन 'गवाक्षजालेन' गवाक्षाकृतिरत्नविशेषदामसमूहेन एकैकेन 'किङ्किणीजालेन' किङ्किण्यः–क्षुद्रघण्टिकाः एकैकेन घण्टाजालेन, किङ्किण्यपेक्षया किञ्चिन्महत्यो घण्टा घण्टाः, तथा एकैकेन 'मुक्ताजालेन' मुक्ताफलमयेन दामसमूहेन एकैकेन 'मणिजालेन' मणिमयेन दामसमूहेन एकैकेन 'कनकजालेन' कनकं पीतरूपः सुवर्णविशेषस्तन्मयेन दामसमूहेन एकैकेन 'मणिजालेन' मणिमयेन दामसमूहेन एकैकेन 'कनकजालेन' कनकं पीतरूपः सुवर्णविशेषस्तन्मयेन दामसमूहेन एकैकेन रत्नजालेन एकैकेन रत्नजालेन एकैकेन (वर) पद्म-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जालेन–सर्वरत्नमयपद्मात्मकेन दामसमूहेन 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सर्वासु विदिक्षु परिक्षिप्ता, एतानि च दामसमूहरूपाणि हेमजालादीनि जालानि लम्बमानान वेदितव्यानि, तथा चाह–

'ते णं जाला' इत्यादि, तानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, प्राकृते हि लिङ्गमनियतमिति, णमिति पूर्ववत् हेमजालादीनि कचित् दामा इति पाठः तत्र ता हेमजालादिरूपा दामान इति व्याख्येयं, 'तवणिज्जलंबूसगा' तपनीयम्–आरक्तं सुवर्णं तन्मयो लम्बूसगो–दाम्नामग्रिमभागे मण्डनविशेषो येषां तानि तपनीयलम्बूसकानि 'सुवण्णपयरगमंडिया' इति पार्श्वतः सामस्त्येन सुवर्णप्रतरकेण–सुवर्णपत्रकेण मण्डितानि सुवर्ण प्रतरकमण्डितानि, 'नानामणिरयणविविहहार-द्धहारउवसोभियसमुदया' इति नानारूपाणां मणीनां रत्नानां च ये विविधा–विचित्रवर्णा हारा–अष्टादशसरिका अर्द्धहारा–नवसरिकास्तैरुपशोभितः समुदायो येषां तानि।

तथा 'ईसिसन्नमन्नमसंपत्ता' इथि ईषत्–मनाग् अन्योऽन्यं–परस्परमसंप्राप्तानि–असंलग्नानि पूर्वापरदक्षिणोत्तरागतैर्वातैः 'मंदायं मंदायं' इति मन्दं मन्दम् एज्यमानानि–कम्प्यमानानि 'भृशाभीक्ष्णयाविच्छेदे द्वि प्राक्मबादेः' इत्यविच्छेदे द्विर्वचनं यथा पचति पचतीत्यत्र, एवमुत्तरत्रापि, ईषत्कम्पनवशादेव च प्रकर्षत इतस्ततो मनाक् चलनेन लम्बमानानि प्रलम्बमानानि, ततः परस्परसंपर्कवशतः 'पझंझमाणा पझंझमाणा' इति शब्दायमानानि शब्दायमानानि 'उदारेण' स्फारेण शब्देनेति योगः, स च स्फारशब्दो मनःप्रतिकूलोऽपि भवति तत आह–'मनोज्ञेन' मनोऽ-नुकूलेन, तच्च मनोऽनुकूलत्वं लेशतोऽपि स्यादत आह–'मनोहरेण' मनांसि श्रोतृणां हरति–आत्मवशं नयतीति मनोहरः, 'लिहादे'राकृतिगणत्वादचप्रत्ययः, तेन, तदपि मनोहरत्वं कुतः ? इत्याहकर्णमनोनिर्वृतिकरेण–'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन' मिति वचनाद् हेतौ तृतीया, ततोऽयमर्थः–यतः श्रोतृकर्णयोर्मनसश्च निर्वृतिकरः–सुखोत्पादकस्ततो मनोहरस्तेन, इत्थम्भूतेन शब्देन तान् प्रत्यासन्नान् प्रदेशान् 'सर्वतः' दिक्षु 'समन्ततः' विदिक्षु आपूरयन्ति शत्रन्तस्य शाविदं रूपं, तत एव 'श्रिया' शोभयाऽतीव उपशोभमानानि उपशोभमानानि तिष्ठन्ति ॥

'तीसे ण'मित्यादि, तस्याः पद्मवरवेदिकायास्तत्र तत्र देशे २ 'तहिं तहिं' इति तस्यैव देशस्य तत्र तत्रैकदेशे, एतावता किमुक्तं भवति ?–यत्र देशे एकस्तत्रान्येऽपि विद्यन्त इति, बहवे 'हयसंघाडा' हययुग्मानि सङ्घाटशब्दो युग्मवाची यथा साधुसङ्घाट इत्यत्र, एवं गजनरकिं-नरकिंपुरुष,महोरगगन्धर्ववृषभसङ्घाटा अपि वाच्याः, एते च कथम्भूताः ? इत्याह–' सव्वरयणामया' सर्वात्मना रत्नमयाः 'अच्छा' आकाशस्फटिकवदतिस्वच्छाः 'जाव पडिरूवा' इति यावत्करणात् 'सण्हा लण्हा घट्ठा मट्ठा' इत्यादिविशेषणकदम्बकपरिग्रहस्तच्च प्राग्वत्।

एते च सर्वेऽपि हयसङ्घाटादयः सङ्घाटाः पुष्पावकीर्णका उक्ताः, सम्प्रत्येतेषामेव हयादीनां पङ्क्यादिप्रतिपादनार्थमाह–'एवं पंतीओ वीहीओ एवं मिहुणगा' इति यथाऽमीषां हयादीनामष्टानां सङ्घाटा उक्तास्तथा पङ्क्योऽपि वक्तव्या वीथयोऽपि मुथिनकानि च, तानि चैवम्–'तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे देसे तहिं तहिं बहुयाओहयपंतीओ गयपंतीओ' इत्यादि, नवरमेकस्यां दिशि या श्रेणि सा पङ्क्तिरभिधीयते, उभयोरपि पार्श्वयोरेकैकश्रेणिभावेन यच्छ्रेणिद्वयं सा वीथी, एते च वीथीपङ्क्तिसङ्घाटा हयादीनां पुरुषाणामुक्ताः, साम्प्रतमेतेषामेव हयादीनां स्त्रीपुरुषयुग्म-प्रतिपादनार्थं 'मिहुणाइं' इत्युक्तम्, उक्तेनैव प्रकारेण हयादीनां मिथुनकानि स्त्रीपुरुषयुग्मरूपाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्यानि, यथा 'तत्थ तत्थ तहिं २ देसे देसे बहूइं हयमिहुणाइं गयमिहुणाइं' इत्यादि ॥

'तीसे ण' मित्यादि, तस्यां णमिति पूर्ववत् पद्मवरवेदिकायां तत्र तत्र देशे २ 'तहिं २' इति तस्यैव देशस्य तत्र तत्रैकदेशे, अत्रापि 'तत्थ २ देसे २ तहिं २' इति वदता यत्रैका लता तत्रान्या अपि बह्व्यो लताः सन्तीति प्रतिपादितं द्रष्टव्यं, 'बहुयाओ पउमलयाओ' इत्यादि, बह्व्यः 'पद्मलताः' पद्मिन्यः 'नागलताः' नागा–द्रुमविशेषाः त एव लतास्तिर्यकशाखाप्रसराभावात् नागलताः, एवमशोकलताश्चम्पकलता वणलताः, वणा–तरुविशेषाः, वासन्तिकलता अतिमुक्तकलताः कुन्दलताः श्यामलताः, कथम्भूता एताः ? इत्याह–'नित्यं' सर्वकालं षटस्वपि ऋतिष्वित्यर्थ : 'कुसुमिताः' कुसुमानि–पुष्पाणि संजातान्यास्विति कुसुमिताः, तारकादिदर्शनादितप्रत्ययः, एवं नित्यं मुकुलिताः, मुकुलानि नाम कुडमलानि कलिका इत्यर्थ नित्यं 'लवइयाओ' इति पल्लविताः, नित्यं 'थवइयाओ' इति स्तबकिताः, नित्यं 'गुम्मियाओ' इति गुल्मिताः, स्तबकगुल्मौ गो (गु)-च्छविशेषौ, नित्यं गुच्छाः, नित्यं यमलं नाम समानजातीययोर्लतयोर्युग्मं तत्संजातमास्विति यमलिताः, नित्यं 'युगलिताः' युगलं सजातीयविजातीययोर्लतयोर्द्वन्द्वं, तथा 'नित्यं' सर्वकालं फलभारेण नता–ईषन्नता नित्यं प्रणता–महता फलभारेण दूरं नताः, तथा नित्यं 'सुविभक्ते' त्यादि सुविभक्तिकः–सुविच्छित्तिकः प्रतिविशिष्टो मञ्जरीरूपो योऽवतंसकस्तद्धराः–तद्धारिण्यः ।

एष सर्वोऽपि कुसुमितत्वादिको धर्म एकैकस्या एकैकस्या लताया उक्तः, साम्प्रतं कासाञ्चिल्लतानां सकलकुसुमितत्वादिधर्म्मप्रतिपादनार्थमाह–'निच्चं कुसुमियमउलियलवइयथव-इयगुलइयगोच्छियविणमियपममियसुविभत्तपडिमंजरिवडंसगधरीउ' एताश्च सर्वा अपि लता एवंरूपाः, किंरुपाः ? इत्याह–'सव्वरयणामईओ' सर्वात्मना रत्नमय्यः, 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकं प्राग्वत् ।

अधुना पद्मवरवेदिकाशब्दप्रवृत्तिनिमित्तं जिज्ञासुः पृच्छति–'से केणट्ठेणं भंते !' इत्यादि, सेशब्दोऽथशब्दार्थ, अथ 'केनार्थेन' केन कारणेन भदन्त ! एवमुच्यते–पद्मवरवेदिका पद्मवर-वेदिकेति ?, किमुक्तं भवति ?–पद्मवरवेदिकेत्येवंरूपस्य शब्दस्य तत्र प्रवृत्तौ किं निमित्त मिति ?, एवमुक्ते भगवानाह–गौतम ! पद्मवरवेदिकायां तत्र तत्र प्रदेशे तस्यैव देशस्य तत्र तत्रैकदेशे 'वेदिकासु' उपवेशनयोग्यमत्तवारणरूपासु 'वेदिकावाहासु' वेदिकापार्श्वेषु 'वेइयापुडंतरेसु' इति द्वे वेदिक वेदिकापुटं तेषामन्तराणि–अपान्तरालानि वेदिकापुटान्तराणि तेषु, तथा स्तम्भेषु सामान्यतः तथा 'स्तम्भबाहासु' स्तम्भपार्श्वेषु 'खंभसीसेसु' इति स्तम्भशीर्षेषु 'खंभपुडंतरेसु' इति द्वौ स्तम्भौ स्तम्भपुटं तेषामन्तराणि तेषु 'सूचीषु' फलकसम्बन्धविघट-नाभावहेतुपादुकास्थानीयासु तासामुपरीति तात्पर्यार्थ, 'सूइमुहेसु' इति यत्र प्रदेशे सूचि फलकं भित्वा मध्ये प्रविशति तत्प्रत्यासन्नो देशः सूचीमुखं तेषु ।

तथा सूचीफलकेषु–सूचीभिः संबन्धिता ये फलकप्रदेशास्तेऽप्युपचारात्सूचीफलकानि तेषु सूचीनामध उपरि च वर्त्तमानेष, तथा 'सुईपुडंतरेसु' इति द्वे सूच्यौ सूचीपुटं तेषामन्तरेषु, पक्षाः पक्षबाहा–वेदिकैकदेशास्तेषु बहूनि 'उत्पलकानि' गर्दभकानि बहूनि 'पद्मानि' सूर्यविकासीनि बहूनि 'कुमुदानि' चन्द्रविकासीनि, एवं नलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डरीकशत-पत्रसहस्रपत्राण्यपि वाच्यानि, एतेषां च विशेषः प्रागेवोपदर्शितः, एतानि कथम्भूतानि ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याह–'सर्वरत्नमयानि' सर्वात्मना रत्नमयानि, 'अच्छा' इत्यादि विशेषणकदम्बकं प्राग्वत् 'महयावासिक्कछत्तसमाणा' इति 'महान्ति' महाप्रमाणानि वार्षिकाणि–वर्षाकाले यानि पानीयरक्षणार्थं कृतानि तानि वार्षिकाणि तानि च तानि छत्राणि च तत्समानानि च प्रज्ञप्तानि हे श्रमण ! हे आयुष्मन् ! –

'से एएणट्ठेण'मित्यादि, तदेतेनार्थेन गौतम ! एवमुच्यते पद्मवरवेदिका पद्मवरवेदिकेति तेषु तेषु यथोक्तरूपेषु प्रदेशेषु यथोक्तरूपाणि पद्मानि पद्मवरवेदिकाशब्दस्य प्रवृत्तिनिमित्त-मितिभावः, व्युत्पत्तिश्चैवं–पद्मवरा पद्मप्रधाना वेदिका पद्मवरवेदिका पद्मवरवेदिकेति ।।

'पउमवरवेइया णं भंते ! किं सासया ?' इत्यादि, पद्मवरवेदिका णमिति पूर्ववत किं शाश्वती उताशाश्वती ?, आबन्ततया सूत्रे निर्देशः प्राकृतत्वात्, किं नित्या उतानित्येति भावः, भगवानाह–गौतम ! स्यात् शाश्वती स्यादशाश्वती–कथञ्चिन्नित्या कथञ्चिदनित्येत्यर्थः, स्याच्छब्दो निपातः कथञ्छिदित्येदर्थवाची । 'से केणट्ठेणं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौ० ! 'द्रव्यार्थतया' द्रव्यास्तिक- नयमतेन शाश्वती, द्रव्यास्तिकनयो हि द्रव्यमेव तात्त्विकमभिमन्यते न पर्यायान्, द्रव्यं चान्वयि परिणामित्वाद्, अन्यथा द्रव्यत्वायोगाद्, अन्वयित्वाच्च सकलकालभावीति भवति द्रव्यार्थतया शाश्वती, 'वर्णपर्यायैः' तदन्यसमुत्पद्यमानवर्णवशेषरूपैरेवं गन्धपर्यायै रस-पर्यायैः स्पर्शपर्यायैः, उपलक्षणमेतत्तदन्यपुद्गलविचटनैश्चाशाश्वती, किमुक्तं भवति ? –पर्यायास्तिकनयमतेन पर्यायप्राधान्यविवक्षायामशाश्वती, पर्यायाणां प्रतिक्षणभावितया कियत्कालभावितया वा विनाशित्वात्, 'से एएणट्ठेण'मित्यादि उपसंहारवाक्यं सुगमं, इह द्रव्यास्तिकनयवादी स्वमत- प्रतिस्थापनार्थमेवमाह–नात्यन्तासत उत्पादो नापि सतो विनाशो, 'नासतो विद्यते भावो, नाभावो विद्यते सत' इति वचनात्, यौ तु दृश्येते प्रतिवस्तु उत्पादविनाशौ तदाविर्भावतिरोभावमात्रं यथा सर्प्पस्योत्फणत्वविफणत्वे, तस्मात्सर्वं वस्तु नित्यमिति ।

एवं च तन्मतचिन्तायां संशयः–किं घटादिवद्द्रव्यार्थतया शाश्वती उत सकलकालमेवंरूपा ? इति, ततः संशयापनोदार्थं भगवन्तं भूयः पृच्छति–'पउमवरवेइया ण'मित्यादि, पद्मवरवेदिका णमिति पूर्ववद् 'भदन्त !' परमकल्याणयोगिन् ! 'कियच्चिरं' कियन्तं कालं यावद्-भवति ?, एवंरूपा कियन्तं कालमवतिष्ठते ? इति, भगवानाह गौतम ! न कदाचिन्नासीत् सर्वदैवा-सीदिति भावः, अनादित्वात्, तथा न कदाचिन्न भवति, सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, सदैव भावात्, तथा न कदाचिन्न भविष्यति, किन्तु भविष्यच्चिन्तायां सर्वदैव भविष्यतीति प्रतिपत्तव्यं, अपर्यवसितत्वात्, तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति– 'भूविं चे'त्यादि, अभूच्च भवति च भविष्यति चेति, एवं त्रिकालावस्थायित्वाद् 'ध्रुवा' मेर्वादिवद् ध्रुवत्वादेव सदैव स्वस्वरूपे नियता, नियतत्वादेव च 'शाश्वती' शश्वद्भवन-स्वभावा, शाश्वतत्वादेव च सततगङ्गासिन्धुप्रवाहप्रवृत्तावपि पौण्डरीकह्रद इवानेकपुद्गलवि-चटनेऽपि तावन्मात्रान्यपुद्गलोच्चटनसम्भवाद् 'अक्षया' न विद्यते क्षयो–यथोक्तस्वरूपाकार-परिभ्रंशो यस्याः साऽक्षया, अक्षयत्वादेव 'अव्यया' अव्ययशब्दवाच्या, मनागपि स्वरूपचलनस्य जातुचिदप्यसम्भवात्, अव्ययत्वादे स्वप्रमाणेऽवस्थिता मानुषोत्तरपर्वताद् बहि समुद्रवत्, एवं स्वस्वप्रमाणे सदाऽवस्थानेन चिन्त्यमाना नित्या धर्मास्तिकायादिवत् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-: "वनखण्ड" अधिकार :-

मू. (१६४) तीसे णं जगतीए उप्पिं बाहिं पउमवरवेइयाए एत्थ णं एगे महं वनसंडे पन्नत्ते देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं जगतीसमए परिक्खेवेणं, किण्हे किण्होभासे जाव अनेगसगडरहजाणजुग्गपरिमोयणे सुरम्मे पासातीए सण्हे लण्हे घट्ठे मट्ठे नीरए निप्पंके निम्मले निक्ककडच्छाए सप्पभे समिरीए सउज्जोए पासादीए दरिसणिज्जे अभिरूवे पडिरूवे।

तस्स णं वनसंडस्स अंतो बहुसमरमणिज्जे भूमिभागे पन्नत्ते से जहानामए-आलिंगपुक्खरेति वा मुइंगपुक्खरेति वा सरतलेइ वा करतलेइ वा आयंसमंडलेति वा चंदमंडलेति वा सूरमंडलेति उरब्भचम्मेति वा उसभचम्मेति वा वराहचम्मेति वा सीहचम्मेति वा वग्घचम्मेति वा विगचम्मेति वा दीवितचम्मेति वा अनेगसंकुकीलगसहस्सवितते आवडपच्चावडसेढीपसेढीसोत्थियसोवत्थिय-पूसमाणवद्धमाणमच्छंडकमकरंडकजारमारफुल्लावलिपलमपत्तसागरतरंगवासंतिलयपउमलयभत्तिचित्तेहिं सच्छाएहिं समिरीएहिं सउज्जोएहिं नानाविहपंचवण्णेहिं तणेहि य मणिहि य उवसोहिए तंजहा-किण्हेहिं जाव सुक्किलेहिं।

तत्थ णं जे ते किण्हा तणा य मणी य तेसि णं अयमेतारूवे वण्णावासे पन्नत्ते, से जहानामए-जीमूतेति वा अंजणेति वा खंजणेति वा कज्जलेति वा मसीइ वा गुलियाइ वा गवलेइ वा गवलगुलियाति वा भमरेति वा भमरावलियाति वा भमरपत्तगयसारेति वा जंबुफलेति वा अद्दारिट्ठेति वा पुरिपुट्ठए (ति) वा गएति वा गयकलभेति वा कण्हसप्पेइ वा कण्हकेसरेइ वा आगासथिग्गलेति वा कण्हासोएति वा किण्हकणवीरेइ वा कण्हबंधुजीवएति वा, भवे एयारूवे सिया?, गोयमा! नो तिणट्ठे समट्ठे, तेसि णं कण्हाणं तणाणं मणीण य इत्तो इट्ठयराए चेव कंततराए चेव पिययराए चेव मणुण्णतराए चेव मणामतराए चेव वण्णेणं पन्नत्ते।

तत्थ णं जे ते नीलगा तणा य मणी य तेसि णं इमेतारूवे वण्णावासे पन्नत्ते, से जहानामए-भिंगेइ वा भिंगपत्तेति वा चासेति वा चासपिच्छेति वा सुएति वा सुयपिच्छेति वा नीलीति वा नीलीभेएति वा नीलीगुलियाति वा सामाएति वा उच्चंतएति वा वनराईइ वा हलहरवसमेइ वा मोरग्गीवाति वा पारेवयगीवाति वा अयसिकुसुमेति वा अंजणकेसिगाकुसुमेति वा नीलुप्पलेति वा नीलासोएति वा नीलकणवीरेति वा नीलबंधुजीवएति वा, भवे एयारूवे सिता?, नो इणट्ठे समट्ठे, तेसि णं नीलगाणं तणाणं मणीण य एत्तो इट्ठतराए चेव कंततराए चेव जाव वण्णेणं पन्नत्ते।

तत्थ जे ते लोहितगा तणा य मणी य तेसि मं अयमेयारूवे वण्णावासे पन्नत्ते, से जहानामए-ससकरुहिरेति वा उरब्भरुहिरेति वा नररुहिरेति वा वराहरुहिरेति वा महिसरुहिरेति वा बालिंदगोवएति वा बालदिवागरेति वा संझब्भरागेति वा गुंजद्धराएति वा जातिहिंगुलुएति वा सिलप्पवालेति वा पवालंकुरेति वा लोहितक्खमणीति वा लक्खारसएति वा किमिरागेइ वा रत्तकंबलेइ वा चीणपिट्ठरासीइ वा जासुयणकुसुमेइ वा किंसुअकुसुमेइ वा पालियाइकुसुमेइ वा रत्तुप्पलेति वा रत्तासोगेति वा रत्तकणयारेति वा रत्तबंधुजीवेइ वा, भवे एयारूवे सिया?, नो तिणट्ठे समट्ठे, तेसि मं लोहियगाणं तणाण य मणीण य एत्तो इट्ठतराए चेव जाव वण्णेणं पन्नत्ते।

तत्थ णं जे ते हालिद्दगा तणा य मणी य तेसि णं अयमेयारूवे वण्णावासे पन्नत्ते, से जहानामए-चंपए वा चंपगच्छल्लीइ वा चंपयभेएइ वा हालिद्दाति वा हालित्तभेएति वा

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

हालिद्दगुलियाति वा हरियालेति वा हरियालभेएति वा हरियालगुलियाति वा चिउरेति वा चिउरंगरागेति वा वरकणएति वा वरकणगनिघसेति वा सुवण्णसिप्पिएति वा वरपुरिसवसणेति वा सल्लइकुसुमेति वा चंपककुसुमेइ वा कुहुंडियाकुसुमेति वा (कोरंटकदामेइ वा) तडउडाकुसुमेति वा घोसाडियाकुसुमेति वा सुवण्णजूहियाकुसुमेति वा सुहरिन्नियाकुसुमेइ वा [कोरिंटवरमल्लदामेति वा] बीयगकुसुमेति वा पीयासोएति वा पीयकणवीरेति वा पीयबंधुजीएति वा, भवे एयारूवे सिया ?, नो इणट्ठे समट्ठे, ते णं हालिद्दा तणा य मणी य एत्तो इट्ठयरा चेव जाव वण्णेणं प०

तत्थ णं जे ते सुक्किल्लगा तणा य मणी य तेसि णं अयमेयारूवे वण्णावासे पन्नत्ते, से जहानामए-अंकेति वा संखेति वा चंदेति वा कुंदेति वा कुसुमे (मुए)ति वा दयरएति वा (दहिघणेइ वा खीरेइ वा खीरपूरेइ वा) हंसावलीति वा कोंचावलीति वा हारावलीति वा बलायावलीति वा चंदावलीति वा सारतियबलाहएति वा धंतधोयरुप्पपट्टेइ वा सालिपिट्ठरासीति वा कुंदपुप्फरासीति वा कुमुयरासीति वा सुक्कछिवाडीति वा पेहुणमिंजाति वा बिसेति वा मिणालियाति वा गयदंतेति वा लवंगदलेति वा पोंडरीयदलेति वा सिंदुवारमल्लदामेति वा सेतासोएति वा सेयकणवीरेति वा सेयबंधुजीएइ वा, भवे एयारूवे सिया ?, नो तिणट्ठे समट्ठे, तेसि णं सुक्किल्लाणं तणाणं मणीण य एत्तो इट्ठतराए चेव जाव वण्णेणं पन्नत्ते ।

तेसि णं भंते ! तणाण य मणीण य केरिसए गंधे पन्नत्ते ?, से जहानामए-कोट्ठपुडाण वा पत्तपुडाण वा चोयपुडाण वा तगरपुडाण वा एलापुडाण वा [किरिमेरिपुडाण वा] चंदणपुडाण वा कुंकुमपुडाण वा उसीरपुडाण वा चंपगपुडाम वा मरुयगपुडाण वा दमणगपुडाण वा जातिपुडाण वा जूहियापुडाण वा मल्लियपुडाण वा नोमालियपुडाण वा वासंतियपुडाण वा केयतिपुडाण वा कप्पूरपुडाण वा अणुवायंसि उब्भिज्जमाणाण य निब्भिज्जमाणाण य कोट्टेज्जमाणाण वा रुविज्जमाणाण वा उक्किरिज्जमाणाण वा विकिरिज्जमाणाण वा परिभुज्जमाणाण वा भंडाओ वा भंडं साहरिज्जमाणामं ओराला मणुण्णा घाणमणनिव्वुतिकरा सव्वतो समंता गंधा अभिनिस्सवंति, भवे एयारूवे सिया?, नो तिणट्ठे समट्ठे, तेसि णं तणाणं मणीण य एत्तो उ इट्ठतराए चेव जाव मणामतराए चेव गंधे प० ।तेसि णं भंते ! तणाण य मणीण य केरिसए फासे प० । से जहानामए-आईणेति वा रूएति वा बूरेति वा नवणीतेति वा हंसगब्भतूलीति वा सिरीसकुसुमणिचतेति वा बालकुमुद- पत्तरासीति वा, भवे एतारूवे सिया ?, नो तिणट्ठे समट्ठे, तेसि णं तणाण य मणीण य एत्तो इट्ठतराए चेव जाव फासेणं पन्नत्ते ।

तेसि णं भंते ! तणाणं पुव्वावरदाहिणउत्तरागतेहिं वाएहिं मंदायं मंदायं एइयाणं वेइयाणं कंपियाणं खोभियाणं चालियाणं फंदियाणं घट्टियाणं उदीरियाणं केरिसए सद्दे पन्नत्ते ?, से जहानामए-सिवियाए वा संदमाणीयाए (वा) रहवरस्स वा सछत्तस्स सज्झयस्स सघंटयस्स सतोरणवरस्स सनंदिघोसस्स सखिंखिणिहेमजालपेरंतपरिखित्तस्स हेमवयखेत्त (चित्तविचित्त) तिणिसकणगनिज्जुत्तदारुयागस्स सुपिणिद्धारकमंडलधुरागस्स कालायससुकयणेमिजंतकम्मस्स आइण्णवरतुरगसुसंपउत्तस्स कुसलणरछेयसारहिसुसंपरिगहितस्स सरसतबत्तीसतोरण- (परि)मंडितस्स सकंकडवडिंसगस्स सचावसरपहरनावरणहरियस्स जोहजुद्धस्स रायंगणंसि वा अंतेपुरंसि वा रम्मंसि वा मणिकोट्टिमतंसि अभिक्खणं २ अभिघट्टिज्जमाणस्स वा णियट्टिज्जमाणस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा [परूढवरतुरंगस्स चंडवेगइट्ठस्स] ओराला मणुण्णा कण्णमणणिव्वुतिकरा सव्वतो समंता सद्दा अभिनिस्सवंति, भवे एतारूवे सिया ?, नो तिणट्ठे समट्ठे ।

से जहानामए—वेयालियाए वीणाए उत्तरमंदामुच्छिताए अंके सुपइट्ठियाए वंदणसार-काणपडिपट्टियाए कुसलणरणारिसंपगहिताए पदोसपच्चूसकालसमयंसि मंदं मंदं एइयाए वेइयाए खोभियाए उदीरियाए ओराला मणुण्णा कण्णमणणिव्वुतिकरा सव्वतो समंता सद्दा अभिनिस्सवंति, भवे एयारूवे सिया ? नो तिणट्ठे समट्ठे ।

से जहानामए—किन्नराण वा किंपुरिसाण वा महोरगाण वा गंधव्वाण वा भद्दसालवन-गयाण वा नंदनवनगयाण वा सोमनसवनगयाण वा पंडगवनगयाण वा हिमवंतमलयमंदरगिरि-गुहसमण्णागयाण वा एगतो सहिताणं संमुहागयाणं समुविट्ठाणं संनिविट्ठाणं पमुदियपक्कलियाणं गीयरतिगंधव्वहरिसियमणाणं गेज्जं पज्जं कत्थं गेयं पयविद्धं पायविद्धं उक्खित्तयं पवत्तयं मंदायं रोचियावसामं सत्तसरसमण्णागयं अट्ठरससुसंपउत्तं छद्दोसविप्पमुक्कं एकारसगुमालंकारं अट्ठगुणोववेयं गुंजंतवंसकुहरोवगूढं रत्तं तित्थाणकरणसुद्धं मधुरं समं सुललियं सकुहरगुंजंत-वंसतंतीसुसंपउत्तं तालसुसंउत्तं तालसुसंपउत्तं तालसमं (रयसुसंपउत्तं गहसुसंपउत्तं) मनोहरं मउयरिभियपयसंचारं सुरभिं सुणतिं वरचारुरूवं दिव्वं नट्टं सज्जं गेयं पगीयाणं, भवे एयारूवे सिया ।

हंता गोयमा ! एवंभूए सिया ।।

वृ. 'तीसे णं जगतीए' इत्यादि, तस्या णमिति पूर्वत् जगत्या उपरि पद्मवरवेदिकाया बहिर्वर्त्ती प्रदेशः 'तत्र' तस्मिन् णमिति पूर्वत्, महानेको वनषण्डः प्रज्ञप्तः, अनेकजातीयानामुत्तमानां महीरुहाणां समूहो वनषण्डः, आह च मूलटीकाकारः—'एगजाईएहिं रुक्खेहिं वणं अनेगजाईएहिं उत्तमेहिं रुक्खेहिं वनसंडे' इति, स चैकैको देशोने द्वे योजने विष्कम्भतो जगतीसमकः 'परिक्षेपेण' परिरयेण । कथम्भूतः ? इत्याह—

'किण्हे' इत्यादि, इह प्रायो वृक्षाणां मध्यमे वयसि वर्त्तमानानि पत्राणि नीला (कृष्णा)नि तद्योगाद् वनखण्डोऽपि कृष्णः, न चोपचारमात्रात्कृष्ण इति व्यपदेशः किन्तु तथाप्रतिभासनात्, तथा चाह—'कृष्णावभासः' यावति भागे कृष्णानि पत्राणि सन्ति तावति भागे स वनखण्डः कृष्णोऽवभासतेऽतः कृष्णोऽवभासो यस्यासौ कृष्णावभासः, तथा हरितत्वमतिक्रान्तानि कृष्णत्वमसंप्राप्तानि पत्राणि नीलानि तद्योगाद् वनखण्डोऽपि नीलः, न चैतदप्युपचारमात्रणोच्यते किन्तु तथाऽवभासात्, तथा चाह—नीलावभासः, समासः प्राग्वत्, यौवने तान्येव पत्राणि किशलयत्वं रक्तत्वं चातिक्रान्तानि ईषद्धरितालाभानि पाण्डूनि सन्ति हरितानीत्युपदिश्यन्ते, ततस्तद्योगाद्वनषण्डोऽपि हरितः, न चैतदुपचारमात्रं, किन्तु तथाप्रतिभासोऽप्यस्ति तथा चाह—हरितावभासः, तथा बाल्यादतिक्रान्तानि वृक्षाणां पत्राणि शीतानि भवन्ति ततस्तद्योगाद् वनषण्डोऽपि सीतः, न चासौ न गुणतः किन्तु गुणत एव, तथा चाह—

'शीतावभासः' अधोभागवर्त्तिनां व्यन्तराणां देवानां देवीनां च तद्योगे शीतवातसंस्पर्श ततः स शीतो वनषण्डोऽवभासते इति, तथा एते कृष्णनीलहरितवर्णा यथा (तः) स्वस्मिन् रूपेऽत्यर्थमुत्कटाः स्निग्धा भण्यन्ते तीव्राश्च ततस्द्योगाद्वनखण्डोऽपि स्निग्धस्तीव्रश्चोक्तः, न चैतदुपचारमात्रं, किन्तु तथा प्रतिभासोऽपि तत उक्तं स्निग्धावभासस्तीव्रावभास इति, इहावभासो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्रान्तोऽपि भवति यथा मरुमरीचिकासु जलावभासः ततो नावभासमात्रोपदर्शनेन यथाऽवस्थितं वस्तुस्वरूपमुक्तं वर्णितं भवति किन्तु यथास्वरूपप्रतिपादनेन ततः कृष्णत्वादीनां तथास्वरूपप्रतिपादनार्थमनुवादपुरस्सरं विशेषणान्तरमाह–

'किण्हे किण्हच्छाये' इत्यादि, कृष्णो वनखण्डः, कुतः ? इत्याह–कृष्णच्छायः, 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मितिवचनाद्धेतौ प्रथमा, ततोऽयमर्थ–यस्मात् कृष्णा छाया–आकारः सर्वाविसंवादितया तस्य तस्मात्कृष्णः, एतदुक्तं भवति–सर्वाविसंवादितया तत्र कृष्ण आकार उपलभ्यते, न च भ्रान्तावभाससंपादितसत्ताकः सर्वाविसंवादी भवति, ततस्तत्त्ववृत्या स कृष्णो न भ्रान्तावभसमात्रव्यवस्थापित इति, एवं नीलो नीलच्छाय इत्याद्यपि भावनीयं, नवरं शीतः शीतच्छाय इत्यत्र छायाशब्द आतपप्रतिपक्षवस्तुवाची द्रष्टव्यः ।

'घणकडियडच्छाए' इति इह शरीरस्य मध्यभागे कटिस्ततोऽन्यस्यापि मध्यभागः कटिरिव कटिरित्युच्यते, कटिस्तटमिव कटितटं घना–अन्यान्यशाखाप्रशाखानुप्रवेशतो निबिडा कटितटे–मध्यभागे छाया यस्य स घनकटितटच्छयाः, मध्यभागे निबिडतरच्छाय इत्यर्थः, क्वचित्पाठः 'घनकडियकडच्छाए' इति, तत्रायमर्थ–कटः सञ्जातोऽस्येति कटितः कटान्तरेणोपरि आवृत इत्यर्थ कटितश्चासौ कटश्च कटितकटः घना–निबिडा कटितकटस्येवाधोभूमौ छाया यस्य स घनकटिकटच्छायः अत एव रम्यो–रमणीयः, तथा महान्–जलभारावनतः प्रावृट्कालभावी मेघनिकुरम्बो–मेघसमूहस्तं भूतो–गुणैः प्राप्तो महामेघनिकुरम्बभूतः महामेघवृन्दोपम इत्यर्थः ।

'ते णं पायवा' इत्यादि, 'ते' वनषण्डान्तर्गताः पादपा 'मूलवन्तः' मूलानि प्रभूतानि दूरावगाढानि च सन्त्यषामिति मूलवन्तः, कन्द एषामस्तीति कन्दवन्तः, एवं स्कन्धवन्तस्त्वग्वन्तः शालावन्तः प्रवालवन्तः पत्रवन्तः पुष्पवन्तः फलवन्तो बीजदन्त इत्यपि भावनीयं, तत्र मूलानि–प्रसिद्धानि यानि कन्दस्याधः प्रसरन्ति कन्दास्तेषां मूलानामुपरिवर्त्तिनस्तेऽपि प्रतीताः, स्कन्धः–स्थुडं यतो मूलशाखाः प्रभवन्ति, त्वक्–छल्ली शाला–शाखा प्रवालः–पल्लवाङ्कुरः पत्रपुष्पफलबीजानि सुप्रसिद्धानि, सर्वत्रातिशायने कचिद्भूम्नि वा मतुपप्रत्ययः ।

'अणुपुव्वसुजाइरुइलवट्टभावपरिणया' इति आनुपूर्व्या–मूलादिपरिपाटया सुष्ठु जाता आनुपूर्वीसुजाता रुचिलाः--स्निग्धतया देदीप्यमानच्छविमन्तः, तथा वृत्तभावेन परिणता वृत्तभावपरिणताः, किमुक्तं भवति ? – एवं नाम सर्वासु दिक्षु विदिक्षु च शाखाभि प्रशाखाभिश्च प्रसृता यथा वर्त्तुलाः संजाता इति, आनुपूर्वीसुजाताश्च ते रुचिराश्च ते च ते वृत्तभावपरिणताश्च आनुपूर्वीसुजातरुचिरवृत्तभावपरिणताः, तथा ते पादपाः प्रत्येकमेकस्कन्धाः, प्राकृते वाऽस्य स्त्रत्वमिति 'एगखंधी' इति पाठः, तथाऽनेकाभि शाखाभि प्रशाखाभिश्च मध्यभागे विटपो–विस्तारो येषां तेऽनेकशाखाप्रशाखाविटपाः, तथा तिर्यग्बाहुद्वयप्रसारणप्रमाणो व्यामः अनेकैर्नरव्यामैः–पुरुषव्यामैः सुप्रसारितैरग्राह्यः–अप्रमेयो घनो–निबिडो विपुलो–विस्तीर्ण स्कन्धो येषां ते अनेकनरव्यामसुप्रसारिताग्राह्यघनविपुलवृत्तस्कन्धाः, तथाऽच्छिद्राणि पत्राणि येषांते अच्छिद्रपत्राः, किमुक्तं भवति ? –न तेषां पत्रेष वातदोषतः कालदोषतो वा गड्डरिकादिरीतिरुप- जायते, न तेषु पत्रेषु छिद्राणि भवन्तीत्यच्छिद्रपत्राः, अथवा एवंनामान्योऽन्यं शाखाप्रशाकानु-प्रवेशात्पत्राणिपत्राणामुपरि जातानि येन मनागप्यपान्तरालरूपं छिद्रं नोपलक्ष्यत इति, तथा चाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अविरलपत्ता' इति, अत्र हेतौ प्रथमा ततोऽयमर्थ—यतोऽविरलपत्रा अतोऽच्छिद्रपत्राः, अविरलपत्रा अपि कुतः ? इत्याह—'अवातीनपत्राः' वातीनानि—वातोपहतानि वातेन पातिता-नीत्यर्थः न वातीनानि अवातीनानि पत्राणि येषां ते तथा, किमुक्तं भवति ? —न तत्र प्रबलो वातः खरपरुषो वाति येन पत्राणि त्रुटित्वा भूमौ निपतन्ति, ततोऽवातीनपत्रत्वादविरलपत्रा इति, अच्छिद्रपत्रा इत्यत्र प्रथमव्याख्यानपक्षमधिकृत्य हेतुमाह—

'अणईइपत्ता' न विद्यते ईतिः—गड्डरिकादिरूपा येषां तान्यनीतीनि जरठानि पाण्डूनि पत्राणि येभ्यस्ते निर्द्धूतजरठपाण्डुपत्राः, किमुक्तं भवति ? —यानि वृक्षस्थानि जरठानि पाण्डूनि पत्राणि तानि वातेन निर्द्धूय निर्द्धूय भूमौ पात्यन्ते भूमेरपि च प्रायो निर्द्धूय निर्द्धूयान्यत्रापसार्यन्त इति, 'नवहरियभिसंतपत्तंधयारगंभीरदरसणिज्जा' इति नवेन—प्रत्यग्रेण हरितेन—नीलेन भास-मानेन—स्निग्धत्वचा दीप्यमानेन पत्रभारेण—दलसञ्चयेन यो जातोऽन्धकारस्तेन गम्भीरा—अलब्ध-मध्यभागाः सन्तो दर्शनीया नवहरितभासमानपत्रान्धकारगम्भीरदर्शनीयाः, तथा उपविनिर्गतैः—निरन्तरविनिर्गतैर्नवतरुणपल्लवैः तथा कोमलैः—मनोज्ञैरुज्ज्वलैः—शुद्धैश्चलद्भि—ईषत्कम्पमानैः किशलयैः—अवस्थाविशेषोपेतैः पल्लवविशेषैः तथा सुकुमारैः प्रवालैः—पल्लवाङ्कुरैः शोभितानि वराङ्कुराणि—वराङ्कुरोपेतानि अग्रशिखराणि येषां ते उपविनिर्गतवतरुणपत्रपल्लवकोमलोज्ज्वल-चलत्किशलयसुकुमारप्रवालशोभितवराङ्कुराग्रशिखराः, इहाङ्कुरप्रवालयोः कालकृतावस्थाविशे-षाद्विशेषो भावनीयः । 'निच्चं कुसुमिया निच्चं मउलिया निच्चं लवइया निच्चं थवइया निच्चं गोच्छिया निच्चं जमलिया निच्चं जुयलिया निच्चं विणमिया निच्चं पणमिया निच्चं कुसुमियमउलियलव-इयथवइयगुलइय- गोच्छियजमलियजुगलियवणमियपणमियसुविभत्तप(पिं)डिमंजरिव-डंसगधरा' इति पूर्ववत्, तथा शुकवर्हिणमदनशलाकाकोकिलकोरकभिङ्गारककोंडलजी-वंजीवकनन्दीमुखकपिलपिङ्गलाक्षका-रण्डवचक्रवाककलहंससारसाख्या नामनेकेषां शकुनगणानां मिथुनैः—स्त्रीपुंसयुग्मैर्विचरितं— इतस्ततो गतं यच्च शब्दोन्नतिकम्—उन्नतशब्दकं मधुरस्वरं च नादितं—लपितं येषु ते तथा, अत एव सुरम्याः—सुष्ठु रमणीयाः, अत्र शुकाः—कीराः बर्हिणो—मयूरा मदनशलाकाशारिका कोकिला- ऽपि चक्रवाककलहंससारसाः—प्रतीताः, शेषास्तु जीवविशेषा लोकतो वेदितव्याः ।

तथा संपिण्डिताः—एकत्र पिण्डीभूता दृप्ता—मदोन्मत्ततया दर्पाध्माता भ्रमरमधुकरीणां पहकराः—सङ्घाताः, 'पहकरओरोहसंघाया' इति देशीनाममालावचनात्, यत्र ते संपिण्डितदृप्तमधु-करभ्रमरमधुकरीपहकराः, तथा परिलीयमानाः—अन्यत आगत्यागत्य श्रयन्तो मत्ताः षट्पदाः कुसुमासवलोलाः—किञ्जल्कपानलम्पटा मधुरं गुमगुमायमानाः गुञ्जन्तश्च—शब्दविशेषं च विदधाना देशभागेषु तस्मिन् तस्मिन् देशभागे येषां ते परिलीयमानमत्तषटपदकुसुमासवलोलमधुरगुम-गुमायमानगुञ्जन्तदेशभागाः, गमकत्वादेवमपि समासः, ततो भूयः पूर्वपदेन सह विशेषणसमासः, तथाऽभ्यन्तराणि—अभ्यन्तरवर्त्तीनि पुष्पाणि फलानि च पुष्पफलानि येषां ते तथा, 'बाहिरपत्तच्छन्ना' इति बहिपत्रैश्छन्ना—व्याप्ता बहिपत्रछन्नाः, तथा पत्रैश्च पुष्पैश्च 'अवच्छन्नपरिच्छन्ना' अत्यन्त-माच्छादिताः ।

तथा 'नीरोगाः' रोगवर्जिताः 'अकण्टकाः' कण्टकरहिताः, नैतेषु मध्ये बब्बूलकादिवृक्षाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्तीति भावः, तथा स्वादूनि फलानि येषां ते स्वादुफलाः, तथा स्निग्धानि फलानि येषां ते स्निग्धफलाः, तथा प्रत्यासन्नैर्नानाविधैः—नानाप्रकारैर्गुच्छैः—वृन्ताकीप्रभृतिभिर्गुल्मैः—नवमालिकादिभिर्मण्डपैःद्राक्षामण्डपकैरुपशोभिता नानाविधगुच्छगुल्ममण्डपकशोभिताः, तथा विचित्रैः—नानाप्रकारैः शुभैः—मङ्गलभूतैः केतुभः—ध्वजैर्बहुलाव्याप्ता विचित्रशुभकेतुबहुलाः।

तथा 'वाविपुक्खरिणीदीहियासु य निवेसियरम्मजालघरगा' वाप्यः—चतुरस्राकारास्ता एव वृत्ताः पुष्करिण्यः यदिवा पुष्कराणि विद्यन्ते यासु ताः पुष्करिण्यः दीर्धिका—ऋजुसारिण्यः वापीपुष्करिणीषु दीर्धिकासु च सुष्ठु निवेशितानि रम्याणि जालगृहकाणि येषु ते वापीपुष्करिणीदीर्धिकासुनिवेशितरम्यजालगृहकानि, तथा पिण्डिता सती निर्हारिमादूरे विनिर्गच्छन्ती पिण्डिमनीर्हारिमा तां सुगन्धि—सुद्गन्धिकां शुभसुरभिभ्यो गन्धात्रेभ्यः सकाशान्मनोहरा शुभसुरभिमनोहरा तां च 'महया' इति प्राकृतत्वाद्वितीयार्थे तृतीया महतीमित्यर्थ, गन्धघ्राणिं यावद्भिर्गन्धपुद्गलैर्गन्धविषये घ्रामिरुपजायते तावती गन्धपुद्गलसंहतिरुपचाराद् गन्धघ्राणिरित्युच्यते तां निरन्तरं मुञ्चन्तः।

तथा 'सुहसेउकेउबहुला' इति शुभाः—प्रधानाः सेतवो—मार्गा आलवालपाल्यो वा केतवो—ध्वजा बहुला—अनेकरूपा येषां ते तथा, 'अनेगरहजाणजुग्गसिबियसंदमाणिपडिमोयणा' इति, तथा रथा द्विविधाः—क्रीडारथाः सङ्ग्रामरथाश्च, यानानि सामान्यतः, शेषाणि वाहनानि, युग्यानि—गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि वेदिकोपशोभितानि जम्पानानि शिबिकाः—कूटाकारेणाच्छादिता जंपानविशेषाः स्यन्दमानिकाः—पुरुषप्रमाणा जम्पानविशेषाः, अनेकेषां रथादीनामधो विस्तीर्णत्वात् प्रतिमोचनं येषु ते तथा, 'पासाइया' इत्यादि पदचतुष्टयं प्राग्वत्।

'तस्स णं वनसंडस्से'त्यादि, तस्य णमिति पूर्ववद् वनषण्डस्य 'अन्तः' मध्य बहुसमः सन् रमणीयो बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, किंविशिष्ट ? इत्याह— 'से जहा नामए' इत्यादि, 'तत्' सकललोकप्रसिद्धं यथेति दृष्टान्तोपदर्शने नामेति शष्यामन्त्रणे 'ए' इति वाक्यालङ्कारे 'आलिंगपुक्खरेइ वा' इति आलिङ्गो—मुरजो वाद्यविशेषस्तस्य पुष्करं—चर्म्मपुटकं तत् किलात्यन्तसममिति तेनोपमा क्रियते, इतिशब्दाः सर्वेऽपि स्वस्वोपमाभूतवस्तुपरिसमाप्तिद्योतकाः वाशब्दाः समुच्चये मृदङ्गो—लोकप्रतीतो मर्दलस्तस्य पुष्करं मृदङ्गपुष्करं परिपूर्णं—पानीयेन भृतं तडागं—सरस्तस्य तलं—उपरितनो भागः सरस्तलं 'करतलं' प्रतीतं, चन्द्रमण्डलं च यद्यपि तत्ववृत्या उत्तानीकृतकपित्थाकारपीठप्रासादापेक्षया वृत्तालेखमिति तद्गतो दृश्यमानो भागो न समतलस्तथाऽपि प्रतिभासते समतल इति तदुपादानम्, आदर्शमण्डलं सुप्रसिद्धम्।

'उरब्भचम्मेइ वे'त्यादि, अत्र सर्वत्रापि 'अनेगसंकुकीलगसहस्सवितते' इति विशेषणयोगः, उरभ्रः—ऊरणः वृषभवराहसिंहव्याघ्रछगलाः प्रतीताः द्वीपी—चित्रकः, एतेषां प्रत्येकं चर्म्म अनेकैः शङ्कुप्रमाणैः कीलकसहस्रैः—महद्भिः कीलकैरताडितं प्रायो मध्यक्षामं भवति न समतलं तथारूपतडाकासम्भवात् अतः शङ्कुग्रहणं, विततं—विततीकृतं ताडितमिति भावः, यथाऽत्यन्तं बहुसमं भवति तथा तस्यापि वनषण्डस्यान्तर्बहुसमो भूमिभागः, पुनः कथम्भूतः ? इत्याह—

'नानाविहपंचवन्नेहिं मणीहिं तणेहि य उवसोभिए' इति योगः, नानाविधा—जातिभेदान्नानाप्रकारा ये पञ्चवर्णा मणयस्तृणानि च तैरुपशोभितः, कथम्भूतैर्मणिभि ? इत्याह—'आवडे'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यादि, आवर्तादीनि मणीनां लक्षणानि, तत्रावर्त्तः प्रतीत एकस्यावर्त्तस्य प्रत्यभिमुख आवर्त्त : प्रत्यावर्त्तः श्रेणि–तथाविधबिन्दुजातादेः पङ्क्ति तस्याश्च श्रेणेर्या विनिर्गताऽन्या श्रेणि सा प्रश्रेणि स्वस्तिकः प्रतीतः सौवस्तिकपुष्यमाणवौ–लक्षणविशेषौ लोकात्प्रत्येतव्यौ वर्द्धमानकं–शरावसंपुटं मत्स्यकाण्डकमकराण्डके–प्रतीते 'जारमारे'ति लक्षणविशेषौ सम्यग्मणिलक्षणवेदिनो लोकाद्वेदितव्यौ, पुष्पावलिपद्मपत्रसागरतरङ्गवासन्तीलतापद्मलताः प्रतीतास्तासां भक्त्या–विच्छित्या चित्रम्–आलेखो येषु ते आवर्त्तप्रत्यावर्त्तश्रेणिप्रश्रेणिस्वस्तिकसौवस्तिकपुष्पमाण-ववर्धमानकमत्स्याण्डकमकराण्डकजारमापुष्पावलिपद्मपत्रसागरतरङ्गवासन्तीपद्मलताभक्ति-चित्रास्तैः, किमुक्तं भवति ?–आवरत्तादिलक्षणोपेतैः, तथा सच्छायैः सती–शोभना प्रभा–कान्तिर्येषां ते सत्प्रभास्तैः 'समरीएहिं'ति समरीचिकैः–बहिर्विनिर्गतकिरणजालसहितैः 'सोदद्योतैः' बहिर्व्यवस्थितप्रत्यासन्नवस्तुस्तोमप्रकाशकरोदद्योतसहितैः, एवंभूतैर्नानाजातीयैः पञ्चवर्णैर्मणि-भिस्तृणैश्चोपशोभितः, तानेव पञ्च वर्णानाह–'तंजहा कण्हे' इत्यादि ॥

'तत्थ ण'मित्यादि, तत्र तेषां पञ्चवर्णानां मणीनां तृणानां च मध्ये णमिति वाक्यालङ्कारे ये ते कृष्णा मणयस्तृणानि च, ये इत्येव सिद्धे ये ते इति वचनं भाषाक्रमार्थं, तेषां णमिति पूर्ववत् 'अयम्' अनन्तरमुद्दिश्यमानः 'एतद्रूपः' अनन्तरमेव वक्ष्यमाणस्वरूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा–

'से जहा नाम ए' इत्यादि, स यथा नाम–'जीमूत' इति 'जीमूतः' बलाहकः, स चेह प्रावृट्प्रारम्भसमये जलभृतो वेदितव्यः, तस्यैव प्रायोऽतिकालिमसम्भवात्, इतिशब्द उपमाभूतवस्तुनापरिसमाप्तिद्योतकः, वाशब्द उपमानान्तरापेक्षया समुच्चये, एवं सर्वत्रेतिवाशब्दौ द्रष्टव्यौ, 'अञ्जनं' सौवीराञ्जनं रत्नविशेषो वा 'खञ्जनं' दीपमल्लिकामलः 'कज्जलं' दीपशिखापतितं 'मषी' तदेव कज्जलं ताम्रभाजनादिषु सामग्रीविशेषेण घोलितं मषीगुलिका–घोलितकज्जलगुटिका, क्वचित् 'मसी इति मसीगुलिया इति वे'ति न दृश्यते, गवलं–माहिषं श्रृङ्गं तदपि चोपरित-नत्वग्भागापसारणेन द्रष्टव्यं, तत्रैव विशिष्टस्य कालिम्नः सम्भवात्, तथा तस्यैव माहिषश्रृङ्गस्य निबिडतरसारनिर्वर्त्तिता गुडिका गवलगुडिका 'भ्रमरः' प्रतीतः 'भ्रमरावली' भ्रमरपङ्क्ति 'भ्रमरप-तङ्गसारः' भ्रमरपक्षान्तर्गतो विसिष्टकालिमोपचितः प्रदेश 'जम्बूफलं' प्रतीतम् 'आर्द्रारिष्टः' कोमलकाकः 'परपुष्टः' कोकिलः गजो गजकलभश्च प्रतीतः 'कृष्णसर्प' कृष्णवर्णसर्प्पजातिविशेषः 'कृष्णकेसरः' कृष्णबकुलः 'आकाशथिग्गलं' शरदि मेघविनिर्मुक्तमाकाशखण्डं तद्धि कृष्णमतीव प्रतिभातीति तदुपादानं, कृष्णाशोककृष्णकणवीरकृष्णबन्धुजीवाः अशोककणवीर-बन्दुजीववृक्षभेदाः, अशोकादयो हि पञ्चवर्णा भवन्ति ततः शेषवर्णव्युदासार्थं कृष्णग्रहणम् ।

एतावत्युक्ते गौतमो भगवन्तं पृच्छति–'भवे एयारूवे' इति भवेन्मणीनां तृणानां च कृष्णो वर्ण 'एतद्रूपः' जीमूतादिरूपः ?, भगवानाह–गौतम ! 'नायमर्थ समर्थ' नायमर्थ उपपन्नो यदुतैवंभूतः कृष्णो वर्णो मणीनां तृणानां च, किन्तु ते कृष्णा मणयस्तृणानि च 'इतः' जीमूतादेः 'इष्टतरका एव' कृष्णवर्णेनाभीप्सिततरका एव, तत्र किञ्चिदकान्तमपि केषाञ्चिदिष्टतरं भवति ततोऽकान्त-ताव्यवच्छित्यर्थमाह–'कान्ततरका एव' अतिस्निग्धमनोहारिकालिमोपचिततया जीमूतादेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कमनीयतरका एव, अत एव 'मनोज्ञतरकाः' मनसा ज्ञायन्ते—अनुकूलतया स्वप्रवृत्तिविषयीक्रियन्त इति मनोज्ञा—मनोऽनुकूलास्ततः प्रकर्षविवक्षायां तरपप्रत्ययः, तत्र मनोज्ञतरमपि किञ्चिन्मध्यमं भवति ततः सर्वोत्कर्षप्रतिपानार्थमाह—'मनआपतरका एव' द्रष्टॄणां मनांसि आप्नुवन्ति—प्राप्नुवन्ति आत्मवशतां नयन्तीति मनआपास्ततः प्रकर्षविवक्षायां तरपप्रत्ययः, प्राकृतत्वाच्च पकारस्य मकारे मणामतरा इति भवति ।तथा 'तत्थ ण'मित्यादि, तत्र तेषां मणीनां तृणानां च मध्ये ये ते नीला मणयस्तृणानि च तेषामयमेतद्रूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा—

'से जहा नाम ए' इत्यादि, स यथा नाम—'भृङ्गः' कीटविशेषः पक्ष्मलः भृङ्गपत्रं—तस्यैव भृङ्गाभिधानस्य कीटविशेषस्य पक्ष्म 'शुकः' कीरः 'शुकपिच्छं' शुकस्य पत्रं 'चाषः' पक्षिविशेषः 'चाषपिच्छं' चाषपक्षः 'नीली' प्रतिता 'नीलीभेदः' नीलीच्छेदः 'नीलीगुलिया' नीलीगुटिका 'श्यामाकः' धान्यविशेषः 'उच्चंतगे वा' इति 'उच्चन्तगः' दन्तरागः 'वनराजी' प्रतिता हलधरो—बलदेवस्तस्य वसनं हलधरवसनं तच्च किल नीलं भवति, सदैव तथास्वभावतया हलधरस्य नीलवस्त्रपरिधानात्, मयूरग्रीवापारापतग्रीवाऽतसीकुसुमबाणकुसुमानि प्रतीतानि, अत ऊर्द्ध क्वचित् 'इंदनीलेइ वा महानीलेइ वा मरगतेइ वा' तत्र इन्द्रनीलमहानीलमरकता रत्नविशेषाः प्रतीताः, अञ्जनकेशिका—वनस्पतिविशेषस्तस्याः कुसुममञ्जनकेशिकाकुसुमं 'नीलोत्पलं' कुवलयं नीलाशोकनीलकणवीरनीलबन्धुजीवा अशोकादिवृक्षविशेषाः, 'भवे एयारूवे' इत्यादि प्राग्वद् व्याख्येयम् । तथा 'तत्थ ण'मित्यादि, तत्र तेषां मणीनां मध्ये ये ते लोहिता मणयस्तृणानि च तेषामयमेतद्रूपो वर्णावासः प्रज्ञप्तः, तद्यथा—

'से जहा नाम ए' इत्यादि, स यथा नाम शशकरुधिरमुरभ्र—ऊरणस्तस्य रुधिरं वराहः—शूकरस्तस्य रुधिरं मनुष्यरुधिरं महिषरुधिरं च प्रतीतं, एतानि हि किल शेषरुधिरेभ्यो लोहित-वर्णोत्कटानि भवन्ति तत एतेषामुपादानं, 'बालेन्द्रगोपकः' सद्योजात इन्द्रगोपकः, स हि प्रवृद्धः सन्नीषत्पाण्डुरक्तो भवति ततो बालग्रहणम्, इन्द्रगोपकः—प्रथमप्रावृट्कालभावी कीटविशेषः 'बालदिवाकरः' प्रथममुद्गच्छन् सूर्य 'सन्ध्याभ्ररागः' वर्षासु सन्ध्यासमयभावी अभ्ररागः गुञ्जा—लोकप्रतीता तस्या अर्द्धे रागो गुञ्जार्द्धरागः, गुञ्जाया हि अर्द्धमतिरक्तं भवति अर्द्धमतिकृष्णं ततो गुञ्जार्द्धग्रहणं, जपाकुसुमकिंशुककुसुमपारिजातकुसुमजात्यहिङ्गुलकाः—प्रतीताः 'सिलाप्रवालं' प्रवालनामा रत्नविशेषः प्रवालाङ्कुरः तस्यैव रत्नविशेषस्य प्रवालाभिधस्याङ्कुरः, स हि प्रथमोद्गतत्वेनात्यन्तरक्तो भवति ततस्तदुपादानं, लोहिताक्षमणिर्नाम रत्नविशेषः, लाक्षारसकृमिरागरक्तकम्बलचीनपिष्टराशिरक्तोत्पलरक्ताशोकरक्तकणवीररक्तबन्धुजीवाः प्रतीताः 'भवे एयारूवे' इत्यादि प्राग्वत् ।। 'तत्थ ण'मित्यादि, तत्र तेषां मणीनां तृणानां च मध्य ये हरिद्रा मणयस्तृणानि च तेषामयमेतद्रूपो 'वर्णावासः' वर्णकविशेषः प्रज्ञप्तः, तद्यथा—

'से जहा नाम ए' इत्यादि, स यथा नाम—चम्पकः सामान्यतः सुवर्णचम्पको वृक्षः 'चम्प-कच्छल्ली' सुवर्णचम्पकत्वक् 'चम्पकभेदः' सुवर्णचम्पकच्छेदः 'हरिद्रा' प्रतीता 'हरिद्राभेदः' हरिद्राच्छेदः 'हरिद्रागुलिका' हरिद्रासारनिर्वर्त्तिता गुलिका 'हरितालिका' पृथ्वीविकाररूपा प्रतीता 'हरितालिकाभेदः' हरितालिकाच्छेदः 'हरितालिकागुलिका' हरितालिकासारनिर्वर्त्तिता गुटिका 'चिकुरः' रागद्रव्यविशेषः 'चिकुराङ्गरागः' चिकुरसंयोगनिमित्तो वस्त्रादौ रागः, वरकनकस्यात्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुवर्णस्य यः कषपट्टके निघर्ष स वरकनकनिघर्ष, वरपुरुषो—वासुदेवस्तस्य वसनं वरपुरुषवसनं, तद्धि किल पीतेव भवतीति तदुपादनम्, अ(स)ल्लकीकुसुमं लोकतोऽवसेयं 'चम्पककुसुमं' सुवर्णचम्पककुसुमं 'कूष्माण्डीकुसुमं' पुष्पफलीकुसुमं कोरण्टकः—पुष्पजातिविशेषस्तस्य दाम कोरण्टकदाम तडवडा आउली तस्याः कुसुमं तडवडाकुसुमं घोषातकीकुसुमं सुवर्णयूथिकाकुसुमं च प्रतीतं सुहरिण्यका—वनस्पतिविशेषस्तस्याः कुसुमं सुहरिण्यकाकुसुमं बीयको—वृक्षः प्रतीतस्तस्य कुसुमं बीयककुसुमं पीताशोकपीतकणवीरपीतबन्धुजीवाः प्रतीताः 'भवे एयारूवे' इत्यादि प्राग्वत् 'तत्थ ण'मित्यादि, तत्र तेषां मणीनां तृणानां च मध्ये ये ते शुक्ला मणयस्तृणानि च तेषामयमेतद्रूपो वर्णावासः प्रज्ञप्तः, तद्यथा—

'से जहा नाम ए' इत्यादि, स यथा नाम—'अङ्कः' रत्नविशेषः शङ्खचन्द्रकुमुदोदकरजोदधिघन-क्षीरपूरक्रश्चावलिहारावलिहंसावलिबलाकावलयः प्रतीताः 'चन्द्रावली' तडाकादिषु जलमध्य-प्रतिबिम्बितचन्द्रपङ्क्ति 'सारइयबलाहगेइ वा' इति शारदिकः—शरत्कालभावी बलाहको—मेघः 'धंतधोयरुप्पपट्टेइ वे'ति, ध्मातः—अग्निसंपर्केण निर्मलीकृतो धौतो—भूतिखरण्टितहस्त-सन्मार्जनेनातिनिशितीकृतो यो रूप्यपट्टो—रजतपत्रं स ध्मातधौतरूप्यपट्टः, अन्ये तु व्याचक्षते—ध्मातेन—अग्नसंयोगेन यो धौतः—शोधितो रूप्यपट्टः स ध्मातरूप्यपट्टः, शालिपिष्टराशि—शालिक्षोदपुञ्जः कुन्दपुष्पराशि कुमुदराशिश्च प्रतीतः, 'सुकुकछेवाडियाइ वा' इति छेवाडी नाम—वल्लादिफलिका, सा च कचिद्देशविशेषे शुष्का सती शुक्ला भवति ततस्तदुपादानं, 'पेहुणमिंजियाइ वा' इति पेहुणं—मयूरपिच्छं तन्मध्यवर्त्तिनी मिञ्जा पेहुणमिञ्जिका सा चातिशुक्लेति तदुपन्यासः, बिसं—पद्मिनीकन्दः मृमालं—पद्मतन्तुः, गजदन्तलवङ्गदलपुण्डरीकदलश्वेतकणवीरश्वेतबन्धुजीवाः प्रतीताः, 'भवेयारूवे' इत्यादि प्राग्वत् ॥ तदेवमुक्तं वर्णस्वरूपं, सम्प्रति गन्धस्वरूपप्रतिपाद-नार्थमाह—'तेसि णं मणीणं तणाण य' इत्यादि, तेषां मणीनां तृणानां च कीदृशो गन्धः प्रज्ञप्तः?, भगवानाह—

'से जहा नाम ए' इत्यादि, प्राकृतत्वात् 'से' इति बहुवचनार्थ, ते यथा नाम गन्धा अभिनिश्रवन्तीति सम्बन्धः, कोष्ठं—गन्धद्रव्यं तस्य पुटाः कोष्ठपुटास्तेषां, वाशब्दाः सर्वत्राप समुच्चये, इहैकस्य पुटस्य न तादृशो गन्ध आयाति द्रव्यस्याल्पत्वात् ततो बहुवचनं, तगरमपि गन्धद्रव्यम्, 'एलाः' प्रतीताः 'चोयगं' गन्धद्रव्यं चम्पकदमनककुङ्कुमचन्दनोशीरमरुबकजातीयूथिकामल्लिका-स्नानमल्लिकाकेतकीपाटलानवमालिकावासकर्पूराणि प्रतितानि नवरमुशीरं—वीरणीमूलं स्नानमल्लिका—स्नानयोग्यो मल्लिकाविशेषः एतेषामनुवाते—आघ्रायकविवक्षितपुरुषाणामनुकूले वाते वाति सति 'उद्भिद्यमानानाम्' उद्घाटयमानानां, चशब्दः सर्वत्रापि समुच्चये, 'निर्भिद्यमानानां' नितरां—अतिशयेन भिद्यमानानां 'कोट्टिज्जमाणाण वा' इति, इह पुटैः परिमितानि यानि कोष्ठादिगन्धद्रव्याणि तान्यपि परिमेये परिमाणोपचारात्कोष्ठपुटानीत्युच्यन्ते तेषां 'कुट्टयमानानाम्' उदूखले कुट्टयमानानां 'रुविज्जमाणाण वा' इति श्लक्ष्णखण्डीक्रियमाणानाम्, एतच्च विशेषणद्वयं कोष्ठादिद्रव्याणामवसेयं, तेषामेव प्रायः कुट्टनश्लक्ष्णखण्डीकरणसम्भवात्, न तु यूथिकादीनाम्

'उक्किरिज्जमाणाण वा' इति क्षुरिकादिभि कोष्ठादिपुटानां कोष्ठादिद्रव्याणां वा उत्कीर्यमाणानां 'विक्खरिज्जमाणाम वा' इति 'विकीर्यमाणानाम्' इतस्ततो विप्रकीर्यमाणानां 'परिभुज्जमाणाण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा' परिभोगायोपभुज्यमानानां, क्वचित्पाठः 'परिभाएज्जमाणाण दा' इति, तत्र 'परिभाज्यमानानां' पार्श्ववर्त्तिभ्यो मनाग् २ दीयमानानां 'भंडाओ भंडं साहरिज्जमाणाण वा' इति 'भाण्डात्' स्थानादेकस्माद् अन्यद् भाण्डं–भाजनान्तरं संह्रियमाणानाम् 'उदाराः' स्फाराः, ते चामनोज्ञा अपि स्युरत आह–'मनोज्ञाः' मनोऽनुकूलाः, तच्च मनोज्ञत्वं कुतः ? इत्याह–'मनोहराः' मनोहरन्ति–आत्मवशं नयन्तीति मनोहराः, यतस्ततो मनोहरत्वं कुतः ? इत्याह–घ्राणमनोनिर्वृतिकराः, एवंभूताः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन गन्धाः 'अभिनिस्रवन्ति' जिघ्रतामभिमुखं निस्सरन्ति, एवमुक्ते शिष्यः पृच्छति–'भवे एयारूवे' इत्यादि प्राग्वत् ॥ तेषां मणीनां तृणानां च कीदृशः स्पर्श प्रज्ञप्तः ?, भगवानाह–गौतम ! 'से जहा नाम ए' इत्यादि, तद्यथा–

'अजिनकं' चर्म्ममयं वस्त्र रूतं च प्रतीतं 'बूरः' वनस्पतिविशेषः 'नवनीतं' म्रक्षणं हंसगर्भतूली शिरीषकुसुमनिचयश्च प्रतीतः 'बालकुमुदपत्तरासीइ वे'ति बालानि–अचिरकालजातानि यानि कुमुदपत्राणि तेषां राशिर्बाकुमुदपत्रराशि, क्वचित् बालकुसुमपत्रराशिरिति पाठः, 'भवे एयारूवे' इत्यादि प्राग्वत् ॥ 'तेसि णं भंते !' इत्यादि, तेषां भदन्त ! तृणानां पूर्वापरदक्षिणोत्तरागवैर्वातैः 'मन्दायं मन्दाय'मिति मन्दं मन्दम् 'एजितानां' कम्पितानां 'व्येजितानां' विशेषतः कम्पितानाम्, एतदेव पर्यायशब्देन व्याचष्टे–कम्पितानां तथा 'चालितानाम्' इतस्ततो विक्षिप्तानाम्, एतदेव पर्यायेण व्याचष्टे–स्पन्दितानां तथा 'संघट्टितानां' परस्परं गर्षयुक्तानां, कथं घट्टिताः ? इत्याह–'क्षोभितानां' स्वस्थानाच्चालितानां, स्वस्थानाच्चालनमपि कुतः ? इत्याह– 'उदीरितानाम्' उत्प्राबल्येनेरितानां–प्रेरितानां, कीदृशः शब्दः प्रज्ञप्तः ?

भगवानाह–'गोयमे' त्यादि, गौतम ! स यथानामकः– शिबिकाया वा स्पन्दमानिकायां वा रथस्य वा, तत्र शिबिका–जम्पानविशे,रूपा उपरिच्छादिता कोष्ठाकारा, तथा दीर्घो–जम्पान-विशेषः पुरुषस्य स्वप्रमाणावकाशदायी स्यन्दमानिका, अनयोश्च शब्दः पुरुषोत्पाटितयोः क्षुद्रहेमघण्टिकादिचलनवशतो वेदितव्यः, रथश्चेह सङ्ग्रामरथः प्रत्येयो, न क्रीडारथः, तस्यग्रेतन-विशेषणानामसंभवात्, तस्य च फलकवेदिका यस्मिन् काले (यः) पुरुषस्तदपेक्षया कटिप्रमाणाऽ-वसेया, तस्य च रथस्य विशेषणान्यभिधत्ते–

'सच्छत्तस्से'त्यादि, सच्छत्रस्य सध्वजस्य 'सघण्टाकस्य' उभयपार्श्वावलम्बिमहा-प्रमाणघण्टोपेतस्य सपताकस्य सह तोरणवरं–प्रधानं तोरणं यस्य स सतोरणवरस्तस्य सह नन्दिघोषो–द्वादशतूर्यनिनादो यस्य सय सनन्दिघोषस्तस्य, तथा सह किङ्किणीभि–क्षुरघण्टाभिर्वर्त्तन्त इति सकिङ्किणीकानि यानि हेमजालानि–हेममयदामसमूहास्तैः सर्वासु दिक्षु पर्यन्तेषु–बहिःप्रदेशेषु परिक्षिप्तो–व्याप्तः सकिङ्किणीकहेमजालपर्यन्तपरिक्षिप्तस्तस्य, तथा हैमवतं–हिमवत्पर्वतभावि चित्रविचित्रं–मनोहारिचित्रोपेतं तैनिशं–तिनिशदारुसम्बन्धि कनकनियुक्तं–कनकविच्छुरितं दारु–काष्ठं यस्य स हैमवतचित्रविचित्रतैनिशकनकनियुक्तदारुस्तस्य, सूत्रे च द्वितीयककारः स्वार्थिकः पूर्वस्य च दीर्घ प्राकृतत्वात्, तथा सुष्ठु–अतिशयेन सम्यक् पिनद्धमरकमण्डलं धूश्च यस्य स सुपिनद्धारकमण्डलधूष्कस्तस्य ।

तथा कालायसेन–लोहेन सुष्ठु–अतिशयेन कृतं नेमेः–बाह्यपरिधेर्यन्त्रस्य च–अरकोपरि फलकचक्रवालस्य कर्म्म यस्मिन् स कालायससुकृतनेमियन्त्रकर्म्मा तस्य, तथा आकीर्णा–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणैर्व्यापृता ये वराः–प्रधानास्तुरगास्ते सुष्ठु–अतिशयेन सम्यक् प्रयुक्ता–योत्रिता यस्मिन् स आकीर्णवरतुरसुसंप्रयुक्तः, प्राकृतत्वाद् बहुव्रीहावपि निष्ठान्तस्य परनिपातः, तथा सारथिकर्म्मणि ये कुशला नरास्तेषां मध्येऽतिशयेन छेको–दक्षः सारथिस्तेन सुष्ठु सम्यकपरिगृहीतस्य, तथा 'सरसयबत्तीसतोणमंडियस्स' इति शराणां शतं प्रत्येकं येषु तानि शरशतानि तानि च तानि द्वात्रिंशत्तोणानि च–बामाश्रयाः शरशतद्वात्रिंशत्तोणानि तैर्मण्डितः शरशतद्वात्रिंशत्तोणमण्डितः, किमुक्तं भवति ?–एवं नाम तानि द्वात्रिंशच्छरशतधृतानि तूणानि रथस्य सर्वतः पर्यन्तेष्ववलम्बितानि यथा तानि तस्य सङ्ग्रामायोपकल्पितस्यातीव मण्डनाय भवन्तीति, तथा कङ्कटं–कवचं सह कङ्कटं यस्य स सकङ्कटः सकङ्कटोऽवतंसः–शेखरो यस्य स सकङ्कटावतंसस्तस्य, तथा सह चापं येषां ते सचापा ये शरा यानि च कुन्तभल्लिमुषण्ढिप्रभृतीनि नानाप्रकाराणि यानि च कवचखेटकप्रमुखाणि आवरणानि तैर्भृतः–परिपूर्ण, तथा योधानां युद्धं तन्निमित्तं सद्यः प्रगुणभूतो यः स योधयुद्धसज्ञः, ततः पूर्वपदेन सह विशेषणसमासः ।

तस्येत्थंभूतस्य राजाङ्गणे अन्तःपुरे वा रम्ये वा मणिकुट्टिमतलेमणिबद्धभूमितले अभिक्षणमभीक्ष्णं मणिको(कु)ट्टिमतलप्रदेशे राजाङ्गणप्रदेशे वा 'अभिघट्टिज्जमाणस्से'त अभिघट्टयमानस्य वेगन गच्छतो ये उदारा–मनोज्ञाः कर्णमनोनिर्वृतिकराः सर्वतः समन्तात् शब्दा अभिनिस्सरन्ति, 'भवे एयारूवे सिया' इति 'स्याद्' कथञ्चिद् भवेद् एतद्रूपस्तेषां मणीनां तृणानां च शब्दः ?, भगवानाह–नायमर्थः समर्थः, पुनरपि गोतमः प्राह–स यथा नामकः–प्रातः सन्ध्यायां देवतायाः पुरतो या वादनायोपस्थाप्यते सा किल मङ्गलपाठिका तालाभावे च वाद्यते इति विताले–तालाभावे भवतीति वैतालिकी तस्या वैतालिक्या–वीणाया 'उत्तरामन्दा मुच्छियाए' इति मूर्छनं सा संजाताऽस्या इति मूर्च्छिता उत्तरमन्दया–उत्तरमन्दाभिधानया मूर्च्छनया–गान्धारस्वरान्तर्गतया सप्तम्या मूर्च्छिता उत्तरमन्दामूर्च्छिता ।

किमुक्तं भवति ?–गान्धारस्वरस्य सप्त मूर्च्छना भवन्ति, तद्यथा–

॥ १ ॥ "नंदी य खुट्टिमा पूरिमा य चोत्थी अ सुद्धगंधारा ।
उत्तरगन्धाराविय हवई सा पंचमी गुच्छा ॥

॥ २ ॥ सुहुमुत्तरआयामा छट्ठी सा नियमसो उ बोद्धव्वा ।
उत्तरमंदा य तहा हवई सा सत्तमी मुच्छा ॥

अथ किंस्वरूपा मूर्च्छनाः ?, उच्यते, गान्धारादिस्वरूपमाचनेन गायतोऽतिमधुरा अन्यान्यस्वरविशेषा यान् कुर्वन्नास्तां श्रोतॄन् मूर्च्छितान् करोति किन्तु स्वयमपि मूर्च्छित इव तान् करोति, यदिवा स्वयमपि साक्षान्मूर्च्छा करोति, तथा चोक्तम्–

॥ १ ॥ "अन्नन्नसरविसेसे उप्पायंतस्स मुच्छणा भणिया ।
कत्ताविमुच्छितो इव कुणए मुच्छं व सोवेति ॥"

गान्धारस्वारान्तर्गतानां च मूर्च्छनानां मध्ये सप्तमी उत्तरमन्दाभिदाना मूर्च्छना किलातिप्रकर्षप्राप्ता ततस्तदुत्पादनया च मुख्यवृत्त्या वादयिता मूर्च्छितो भवति, परमभेदोपचारात् वीणाऽपि मूर्च्छितेत्युक्ता, साऽपि यद्यङ्के सुप्रतिष्ठिता न भवति ततो न मूर्च्छनाप्रकर्ष विदधाति तत आह–अङ्के–स्त्रियाः पुरुषस्य वा उत्सङ्गे सुप्रतिष्ठितायाः, तथा कुशलेनवादननिपुणेन नरेण पुरुषेण

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

नार्या वा सुष्ठु—अतिशयेन सम्यग् गृहीतायाः, तथा चन्दनस्य सारः चन्दनसारस्तेन निर्मापितो यः कोणोवादनदण्डस्तेन परिघट्टितायाः—संस्पृष्टायाः 'पच्चूसकालसमयंसि' इति 'प्रत्यूषकालसमये' प्रभातवेलायां, क्वचित् 'पुव्वरत्तावरत्तकाल०' इति पाठस्तत्र प्रदोषसमये प्रातःसमये चेत्यर्थः

'मन्दं मन्दं' शनैः शनैः 'एजितायाः' चन्दनसारकोणेन मनाक् कम्पितायाः 'व्येजितायाः' विशेषतः कम्पितायाः, एतदेव पर्यायेण व्याचष्टे—चालितायास्तथा घट्टितायाः, ऊर्ध्वाधोगच्छता चन्दनसारकोणेन गाढतरं वीणादण्डेन सह तन्त्रयाः स्पृष्टाया इत्यर्थः, तथा 'स्पन्दितायाः' नखाग्रेण स्वरविशेषोत्पादनार्थमीषच्चालितायाः 'क्षोभितायाः' मूर्च्छां प्रापिताया ये 'उदारा' मनोज्ञाः कर्णमनोनिर्वृतिराः सर्वतः समन्ताच्छब्दा अभिनिस्सरन्ति, 'स्यात्' कथञ्चिद् भवेदेतद्रूपस्तेषां तृणानां मणीनां च शब्द ?, भगवानाह—नायमर्थः समर्थः, पुनरपि गौतमः प्राह—स यथा नामकः—किंनराणां वा किंपुरुषाणां वा महोरगाणां वा गन्धर्वाणां वा, वाशब्दाः सर्वेऽपि विकल्पार्थाः, किंनरादयो व्यन्तरविशेषाः, तेषां कथम्भूतानाम् ? इत्याह—

'भद्रशालवनगतानां वा' इत्यादि, तत्र मेरोः समन्ततो भूमौ भद्रशालवनं प्रथममेखलायां नन्दनवनं शिरसि चूलिकायाः पार्श्वेषु सर्वतः पण्डकवनं 'महाहिमवंतमलयमन्दरगिरिगुहासमन्नागयाणं' इति महाहिमवान्—हैमवतक्षेत्रस्योत्तरतः सीमाकारी वर्षधरपर्वतः, उपलक्षणं शेषवर्षधरपर्वतानां, मलयपर्वतस्य मन्दरगिरेश्च—मेरुपर्वतस्य च गुहा समन्वागतानां, वाशब्दा विकल्पार्थाः, एतेषु हि स्थानेषु प्रायः किंनरादयः प्रमुदिता भवन्ति तत एतेषा मुपादानम्, 'एगतो सहियाणं'ति एकस्मिन् स्थाने सहितानां—समुदितानां 'समुहागयाणं'ति परस्परसंमुखागतानां—संमुखं स्थितानां, नैकोऽपि कस्यापि पृष्ठं दत्वा स्थित इत्यर्थः, पृष्ठदाने हर्षविघातोत्पत्तेः, तथा 'समुविट्ठाणं' सम्यक् परस्परानाबाधया उपविष्टाः समुपविष्टास्तेषां समुपविष्टानां, तथा 'संनिविट्ठाण'मिति सम्यक् स्वशरीरानाबाधया न तु विषमसंस्थानेन निविष्टाः संनिविष्टास्तेषां।

'पमुइयपक्कीलियाणं'ति प्रमुदिताः—प्रहर्ष गताः प्रक्रीडिताः—क्रीडितुमारब्धवन्तस्ततो विशेषणसमासस्तेषां, तथा गीते रतिर्येषां ते गीतरतयो गन्धर्व—नाटयादि तत्र हर्षितमनसो गन्धर्वहर्षितमनसस्ततः पूर्वपदेन विशेषणसमासस्तेषां गद्यादिभेदादष्टविधं गेयं, तत्र गद्यं यत्र स्वरसञ्चारेण गद्यं गीयते, यत्र तु पद्यं—वृत्तादि गीयते तत्पद्यं, यत्र कथिकादि गीयते तत्कथ्यं, पदबद्धं यदेकाक्षरादि यथा ते ते इत्यादि, पादबद्धं यद् वृत्तादिचतुर्भागमात्रे पदे बद्धम्, 'उक्खित्ताय'मिति उक्षिप्तकं प्रथमतः समारभ्यमाणं, दीर्घत्वं ककारात्पूर्वं प्राकृतत्वात्, एवमुत्तरत्रापि द्रष्टव्यं, 'प्रवृत्तकं' प्रथमसमारम्भादूर्द्धमाक्षेपपूर्वकप्रवर्त्तमानं। 'मंदाय'मिति मन्दकं मध्यभागे सकलमूर्च्छनादिगुणोपेतं मन्दं मन्दं संचरन्, तथा 'रोइया-वसाणं'ति रोचितंसम्यग्भावितमवसानं यस्य तद् रोचितावसानं, शनैः शनैः प्रक्षिप्यमाणस्वरं यस्य गेयस्यावसानं तद् रोचितावसानमिति भावः, तथा 'सप्तस्वरसमन्वागतं' सप्त स्वराः षड्जादयः, उक्तञ्च—

॥१॥ "सज्जे रिसह गंधारे, मज्झिमे पंचमे सरे।
धेवए चेव नेसाए, सरा सत्त वियाहिया॥"

ते च सप्त स्वराः पुरुषस्य स्त्रया वा नाभीतः समुद्भवन्ति 'सत्त सरा नाभीतो' इति पूर्वमहर्षिवचनात्, तथाऽष्टमी रसैः—शृङ्गारादिभि सम्यक् प्रकर्षेण युक्तमष्टरससंप्रयुक्तं, तथा एकादश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलङ्काराः पूर्वान्तर्गते स्वरप्राभृते सम्यगभिहिताः, तानि च पूर्वाणि सम्प्रति व्यवच्छिन्नानि ततः पूर्वेभ्यो लेशतो विनिर्गतानि यानि भरतविशाखिलप्रभृतीनि तेभ्यो वेदितव्याः, 'छद्दोसविप्पमुक्क' ति षड्भिर्दोषैर्विप्रमुक्तं षडदोषविप्रमुक्तं, ते च षड् दोषा अमी–'भीयं दुयमुप्पिच्छं उत्तालं कागस्सर-मणुणासं च' । उक्तञ्च–

॥१॥ "भीयं दुयमुप्पिच्छत्थमुत्तालं च कमसो मुणेयव्वं ।
काकस्सरमणुनासं छद्दोसा होंति गेयस्स ॥"

तत्र 'भीतम्' उत्रस्तं, किमुक्तं भवति ? –यदुत्रस्तेन मनसा गीयते तद्भीतपुरुषनिबन्धन-धर्म्मानुवृत्तत्वाद्भीतमुच्यते, 'द्रुतं' यत्वरितं गीयते, 'उप्पिच्छं' नाम आकुलम्, उक्तञ्च–"आहित्थं उप्पिच्छं च आउलं रोसभरियं च" अस्यायमर्थ–आहित्थमुप्पिच्छं च प्रत्येकमाकुलं रोषभृतं वोच्यत इति, आकुलता च श्वासेन द्रष्टव्या तथा पूर्वसूरिभिव्यार्खयानात्, उक्तञ्च मूलटीकायाम्–"उप्पिच्छं श्वासयुक्त''मिति, तथा उत्–प्राबल्येनातितालमस्थानतालं वा उत्तालं, श्लक्ष्णस्वरेण काकस्वरं, सानुनासिकमनुनासं, नासिकाविनिर्गतस्वरानुगतमिति भावः, तथा 'अट्ठगुणोववेय'मिति अष्टभिर्गुणैरुपेतमष्टगुणोपेतं, ते चाष्टावमी गुणाः–पूर्णं रिक्तमलङ्कृतं व्यक्तमविपु(घु)ष्टं मधुरं समं सललितं च, तथा चोक्तम्–

॥१॥ "पुण्णं रत्तं च अलंकियं च वत्तं तहेव अविपु(घु)ट्ठं ।
महुं समं सललियं अट्ठ गुणा होंति गेयस्स ॥"

तत्र यत्स्वरकलाभिः पूर्णं गीयते तत्पूर्णं, गेयरागानुरक्तेन यद् गीयते तद्रक्तम्, अन्योऽ-न्यस्वरविशेषकरणेन यदलङ्कृतमेव गीयते तदलङ्कृतम्, अक्षरस्वरस्फुटकरणतो वयक्तं, विस्वरं क्रशतीव विपु(घु)ष्टं न विघुष्टमविपु(घु)ष्टं, मधुरस्वरेण गीयमानं मधुरं कोकिलारुतवत्, तालवंशस्वरादिसमनुगतं समं, तथा यत्स्वरघोलनाप्रकारेण ललतीव तत् सह ललितेनेति सललितं, यदिवा यच्छ्रोत्रेन्दिरयस्य शब्दस्पर्शनमतीव सूक्ष्ममुत्पादयति सुकुमारमिव च प्रतिभासते तत्

इदानीमेतेषामेवाष्टानां गुणानां मध्ये कियतो गुणान् अन्यच्च प्रतिपिपादयिषुराह–'रत्तं तिट्ठाणकरणसुद्धं'मित्यादि, 'रक्तं' पूर्वोक्तस्वरूपं तथा च 'त्रिस्थानकरणशुद्धं' त्रीणि स्थानानि–उरःप्रभृतीनि तेषु करणेन–क्रियया शद्धं त्रिस्थानकरणशुद्धं, तद्यथा–उरःशुद्धं कण्ठशुद्धं शिरोविशुद्धं च, तत्र यदि उरसि स्वरः स्वभूमिकानुसारेण विशालो भवति तत उरोविशुद्धं, स एव यदि कण्ठे वर्त्तितो भवति अस्फुटितश्च ततः कण्ठविशुद्धं, यदि पुनः शिरः प्राप्तः सन् सानुनासिको भवति ततः शिरोविशुद्धं, यदिवा यद् उरःकण्ठशिरोभि श्लेष्मणाऽव्याकुलितैर्विशुद्धैर्गीयते तद् उरःकण्ठशिरोविशुद्धत्वात्त्रिस्थानकरणविशुद्धं, तथा सकुहरो गुञ्जन् यो वंशो यत्र तन्त्रीतल-तालयग्रहसुसंप्रयुक्तं भवति सकुहरे वंशे गुञ्जति तन्त्र्यां च वाद्यमानायां यत्तन्त्रीस्वरेणाविरुद्धं तत् सकुहरगुञ्जद्वंशतन्त्रीसुसंप्रयुक्तं ।

तथा परस्पराहतहस्ततालस्वरानुवर्त्ति यद् गीतं तत्तालसुसंप्रयुक्तं, यत् मुरजकंसिकादी-नामातोद्यानामाहतानां यो ध्वनिर्यश्च नृत्युन्त्या नर्त्तक्याः पादोत्क्षेपस्तेन समं तत्तालसुसंप्रयुक्तं, तथा श्रृङ्गमयो दारुमयो वंशमयो वाऽङ्गुलिकोशस्तेनाहतायास्तभ्याः स्वरप्रकारो लयस्तमनुसरद् गेयं लयसुसंप्रयुक्तं, तथा यः प्रथमं वंशतव्यादिभि स्वरो गृहीस्तन्मार्गानुसारि ग्रहसुसंप्रयुक्तं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'महुर'मिति मधुरं प्राग्वत्, तथा 'सम'मिति तालवंशस्वरादिसमनुगतं समं सललितं प्राग्वद् अत एव मनोहरं, पुनः कथम्भूतम् ? इत्याह–

'मउयरिभियपयसंचारं' तत्र मृदु–मृदुना स्वरेण युक्तं न निष्ठुरेण तथा यत्र स्वरोऽक्षरेषु–घोलनास्वरविशेषेषु संचरन् रागेऽतीव प्रतिभासते स पदसञ्चारो रिभितमुच्यते मृदुरिभितपदेषु गेयनिबद्धेषु सञ्चारो यत्र गेये तत् मृदुरिभितपदसञ्चारं, तथा 'सुरइं' इति शोभना रतियस्मिन् श्रोतृणां तत्सुरति, तथा शोभना नति रचनातोऽवसाने यस्मिन् तत्सुनति, तथा वरं–प्रधानं चारु–विशिष्टचङ्गिमोपेतं रूपं–स्वरूपं यस्य तद् वरचारुरूपं 'दिव्यं' प्रधानं नृत्यं गेयं प्रगीतानां–गानानुसारध्वनिव(म)तां यादृशः शब्दोऽतिमनोहरो भवति 'स्यात्' कथञ्चिद् भवेद् एतद्रूपस्तेषां तृणानां मणीनां च शब्दः ? एवमुक्ते भगवानाह–गौतम ! स्यादेवंभूतः शब्द इति ॥

मू. (१६५) *तस्स णं वनसंडस्स तत्थ तत्थ देसे २ तहिं तहिं बहवे खुड्डा खुड्डियाओ वावीओ पुक्खरिणीओ गुंजालियाओ दीहियाओ (सरसीओ) सरपंतियाओ सरसरपंतीओ बिलपंतीओ अच्छाओ सण्हाओ रयतामयकूलाओ वइरामयपासाणाओ तवणिज्जमयतलाओ वेरुलियमणिफालियपडलपच्चोयडाओ नवनीयतलाओ सुवण्णसुब्भ(ज्झ) रययमणिवालुयाओ सुहोयारासुउत्ताराओ नानामणितित्थसुबद्धाओ चारु(चउ)क्कोणाओ समतीराओ आणुपुव्वसुजायवप्पगंभीरसीयलजलाओ संछण्णपत्तभिसमुणालाओ।*

बहुउप्पलकुमुयणलिणसुभगसोगंधितपोंडरीयसयपत्तसहस्सपत्तफुल्लकेसरोवइयाओ छप्पयपरिभुज्जमाणकमलाओ अच्छविमलसलिलपुण्णाओ परिहत्थभमंतमच्छकच्छभअनेगसउणमिहुणपरिचरिताओ पत्तेयं पत्येयं पउमवरवेदियापरिक्खित्ताओ पत्तयं पत्तेयं वनसंडपरिक्खित्ताओ अप्पेगतियाओ आसवोदाओ अप्पेगतियाओ वारुणोदाओ अप्पेगतियाओ खीरोदाओ अप्पेगतियाओ धओदाओ अप्पेगतियाओ इक्खुखो(दो)दाओ (अमयरससमरसोदाओ) अप्पेगतियाओ पगतीए उदग(अमय)रसेणं पन्नत्ताओ पासाइयाओ ४।

तासि णं खुड्डियाणं वावीणं जाव बिलवंतियाणं तत्थ २ देसे २ तहिं २ जाव बहवे तिसोवाणपडिरूवगा पन्नत्ता। तेसि णं तिसोवाणपडिरूवाणं अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा–वइरामया नेमा रिट्ठामय पतिट्ठाणा वेरुलियामया खंभा सुवण्णरुप्पामया फलगा वइरामया संधी लोहितक्खमईओ सूईओ णाणामणिमया अवलंबणा अवलंबणबाहाओ ॥ तेसि णं तिसोवाणपडिरूवगाणं पुरतो पत्तेयं २ तोरणा पं०। ते णं तोरणा नानामणिमयखंभेसु उवनिविट्ठसन्निविट्ठा विविहमुत्तंतरोवइता विविहताराख्वोवचिता ईहामियउसभतुरगणरमगरविहगवालगकिन्नररुरुसरभचमरकुंजरवण-लयपउमलयभत्तिचित्ता खंभुग्गयवइरवेदियापरिगताभिरामा विज्ञाहरजमलजुयलजंतजुत्ताविव अच्चिसहस्समालणीया भिसमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा पासातिया ४।

तेसि णं तोरणाणं उप्पिं बहवे अट्ठट्ठमंगलगा पन्नत्ता–सोत्थियसिरिवच्छनंदियावत्तवद्धमाणभद्दासणकलसमच्छदप्पणा सव्वरतणामया अच्छा सण्हा जाव पडिरूवा।

तेसि णं तोरणाणं उप्पिं बहवे किण्हचामरज्झया नीलचामरज्झया लोहियचामरज्झया हारिद्दचामरज्झया सुक्किल्लचामरज्झया अच्छा सण्हा रुप्पपट्टा वइरदंडा जलयामलगंधीया सुरूवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पासाइया ४। तेसि णं तोरणाणं उप्पिं बहवे छत्ताइछत्ता पडागाइपडागा घंटाजुयला उप्पलहत्थया जाव सयसहस्सवत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा।

तासि णं खुड्डियाणं वावीणं जाव बिलपंतियाणं तत्थ तत्थ देसे २ तहिं तहिं बहवे उप्पायपव्वया नियइपव्वया जगतिपव्वया दारुपव्वयगा दगमंडवगा दगमंचकादगमालका दगपासायगा ऊसडा खुल्ला खडहडगा अंदोलगा पक्खंदोलगा सव्वरयणामया अच्छा जाव पडिरूवा।

तेसु णं उप्पायपव्वतेसु जाव पक्खंदोलएसु बहवे हंसासणाइं कोंचासणाइं गरुलासणाइं उण्णयासणाइं पणयासणाइं दीहासणाइं भद्दासणाइं पक्खासणाइं मगरासणाइं उसभासणाइं सीहासणाइं पउमासणाइं दिसासोवत्थियासणाइं सव्वरयणामयाइं अच्छाइं सण्हाइं लण्हाइं घट्ठाइं मट्ठाइं नीरयाइं णिम्मलाइं निप्पंकाइं निक्कंकडच्छायाइं सप्पभाइं सम्मिरीयाइं सउज्जोयाइं पासादीयाइं दरिसणिज्जाइं अभिरूवाइं पडिरूवाइं।

तस्स णं वनसंडस्स तत्थ तत्थ देसे २ तहिं तहिं बहवे आलिघरा मालिघरा कयलिघरा लयाघरा अच्छणघरा पेच्छणघरा मज्जणघरगा पसाहणघरगा गब्भघरगा मोहणघरगा सालघरगा जालघरगा कुसुमघरगा चित्तघरगा गंधव्वघरगा आयंसघरगा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा णीरया णिम्मला णिप्पंका निक्कंकडच्छाया सप्पभा सम्मिरीया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा। तेसु णं आलिघरएसु जाव आयंसघरएसु बहूइं हंसासणाइं जाव दिसासोवत्थियासणाइं सव्वरयणामयाइं जाव पडिरूवाइं।

तस्स णं वनसंडस्स तत्थ तत्थ देसे २ तहिं तहिं बहवे जाइमंडवगा जूहियामंडवगा मल्लियामंडवगा णवमालियामंडवगा वासंतीमंडवगा दधिवासुयामंडवगा सूरिल्लिमंडवगा तंबोलीमंडवगा मुद्दियामंडवगा णागलयामंडवगा अतिमुत्तमंडवगा अप्फोतामंडवगा मालुयामंडवगा सामलयामंडवगा निच्चं कुसुमिया निच्चं जाव पडिरूवा।

तेसु णं जातीमंडवएसु बहवे पुढविसिलापट्टगा पन्नत्ता, तंजहा—हंसासणसंठिता कोंचासणसंठिता गरुलासणसंठिता उण्णयासणसंठिता पणयासणसंठिता दीहासणसंठिता भद्दासणसंठिता पक्खासणसंठिता मगरासणंठिता उसभासणसंठिता सीहासणसंठिता पउमासणसंठिता दिसासोत्थियासणसंठिता पं०, तत्त बहवे वरसयणासणविसिट्ठसंठाणसंठिया पन्नत्ता समणाउसो! आइण्णगरूयबूरणवणीततूलफासा मउया सव्वरयणामया अच्छा जाव पडिरूवा।

तत्थ णं बहवे वाणमंतरा देवा देवीओ य आसयंति सयंति चिट्ठंति निसीदंति तुयट्टंति रमंति ललंति कीलंति मोहंति पुरापोराणाणं सुचिण्णाणं सुपरिक्कताणं सुभाणं कल्लाणाणं कडाणं कम्माणं कल्लाणं फलवित्तिविसेसं पच्चणुब्भवमाणा विहरंति।

तीसे णं जगतीए उप्पिं अंतो पउमवरवेदियाए एत्थ णं एगे महं वणसंडे पन्नत्ते देसूणाइं दो जोयणाइं विक्खंभेणं वेइयासमएणं परिक्खेवेणं किण्हे किण्होभासे वनसंडवण्णओ (मणि) तणसद्दविहूणो णेयव्वो, तत्थ णं बहवे वाणमंतरा देवा देवीओ य आसयंति सयंति चिट्ठंति निसीयंति तुयट्टंति रमंति ललंति कीडंति मोहंति पुरा पोराणाणं सुचिण्णाणं सुपरिक्कताणं सुभाणं कंताणं कम्माणं कल्लाणं फलवित्तिविसेसं पच्चणुब्भवमाणा विहरंति॥

वृ. 'तस्स णं वनसंडस्से'त्यादि, तस्य णमिति वाक्यालङ्कारे वनखण्डस्य मध्ये तत्र तत्र

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

देशे स्यैव देशस्य तत्र तत्रैकदेशे 'बहूईओ' इति बह्वयः 'खुड्डा खुड्डियाओ' इति क्षुल्लिकाः क्षुल्लिका लघवो लघव इत्यर्थः, 'वाप्यः' चतुरस्राकाराः 'पुष्करिण्यः' वृत्ताकाराः अथवा पुष्कराणि विद्यन्ते यासु ताः पुष्करिण्यः 'दीर्घिकाः' सारिण्यस्ता एव वक्र गुञ्जालिकाः, बहूनि केवलकेवलानि पुष्पावकीर्णकानि सरांसि, सूत्रे स्त्रीत्वं प्राकृतत्वात्, बहूनि सरांसि एकपङ्क्त्या व्यवस्थितानि सरःपङ्क्तिस्ता बह्वयः सरःपङ्क्त्यः, तथा येषु सरस्सु पङ्क्त्या व्यवस्थितेषु कूपोदकं प्रणालिकया संचरति सा सरःसरःपङ्क्तिस्ता बह्वयः सरःसरःपङ्क्त्यः, तथा बिलानीव बिलानि—कूपास्तेषां पङ्क्त्यो बिलपङ्क्त्यः, एताश्च सर्वा अपि कथम्भूताः ? इत्याह—

'अच्छा' स्फटिकवद्बहिर्निर्मलप्रदेशाः 'श्लक्ष्माः' श्लक्ष्णपुद्गलनिष्पादितबहिप्रदेशाः, तथा रजतमयं—रूप्यमयं कूलं यासां ता रजतमयकूलाः, तथा समं—अगर्त्तासद्भावतोऽविषमं तीरं तीरावर्त्तिजलापूरितं स्थानं यासां ताः समतीराः, तथा वज्रमयाः पाषाणा यासां ता वज्रमयपाषाणाः, तथा तपनीयं—हेमविशेषस्तपनीयं—तपनीयमयं तलं—भूमितलं यासां तास्तपनीयतलाः, तथा 'सुवण्णसुज्झरययालुयाओ' इति सुवर्णं—पीतकान्तिहेम सुज्झं—रूप्यविशेषः रजतं—प्रतीतं तन्मय्यो वालुका यासु ताः सुवर्णसुज्झरजतवालुकाः, 'वेरुलियमणिफालिहपडलपच्चोयडाओ य'त्ति वैडूर्यमणिमयानि स्फाटिकपटलमयानि प्रत्यवतटानि तटसमीपवर्त्तिनोऽत्युन्नतप्रदेशा यासां ता वैडूर्यमणिस्फटिकपटलप्रत्यवतटाः 'सुहोयारासुउत्तारा' इति सुखेनावतारो—जलमध्ये प्रवेशनं यासु ताः स्ववताराः।

तथा सु—सुखेन उत्तारो—जलमध्याद्बहिर्विनिर्गमनं यासु ताः सुखोत्ताराः ततः पूर्वदेन विशेषणमासः 'नानामणितित्थसुबद्धाओ' इति नानामणिभिः—नानाप्रकारैर्मणिभिस्तीर्थानि सुबद्धानि यासां ता नानामणितीर्थसुबद्धाः, अत्र बहुव्रीहावपि क्तान्तस्य परनिपातो भार्यादिदर्शना-त्प्राकृतशैलीवशाद्वा, 'चउक्कोणाओ' इति चत्वारः कोणा यस्यां सा चतुष्कोणाः एतच्च विशेषणं वापीः कूपांश्च प्रति द्रष्टव्यं, तेषामेव चतुष्कोणतवसम्भवात् न शेषाणां, तथाआनुपूर्व्वेण—क्रमेण नीचैर्नीचैस्तरभावरूपेण सुष्ठु—अतिशयेन यो जातो वप्रः—केदारो जलस्थानं तत्र गम्भीरं—अलब्धस्थानं शीतलं जलं यासु ता आनुपूर्व्यसुजातवप्रगम्भीरशीतलजलाः।

'संछण्णपत्तभिसमुणालाओ' संछन्नानि—जलेनान्तरितानि पत्रबिसमृणालानि यासु ताः संछन्नपत्रबिसमृणालाः, इह बिसमृणालसाहचर्यात्पत्राणि—पद्मनीपत्राणि द्रष्टव्यानि, बिसानि—कन्दा मृणालानि—पद्मनालाः, तथा बहुभिरुत्पलकुमुदनलिनसुभगसौगन्धिकपुण्डरीकशतपत्र-सहस्रपत्र-केसरफुल्लोपचिताः, तथा षटपदैः—भ्रमरैः परिभुज्यमानानि कमलानि उपलक्षणमेतत् कुमुदादीनि च यासु ताः षट्पदपरिभुज्यमानकमलाः, तथाऽच्छेन—स्वरूपतः स्फटिकवच्छुद्धेन विमलेन—आगन्तुकमलरहितेन सलिलेन पूर्णा अच्छविमलसलिलपूर्णा, तथा 'पडिहत्था' अतिरेकिताः अतिप्र-भूता इत्यर्थः "पडिहत्थमुद्धुमायं अहिरेइयं च जाण आउण्णं" इति वचनात्, उदाहरणं चात्र—

॥१॥ "घणपडिहत्थं गयणं सराइं नवसलिलसुद्ध (उद्धु) मायाइं।
अहिरेइयं महं उण चिंताए मणं तुहं विरहे॥" इति।

भ्रमन्तो मत्स्यकच्छपा यत्र ताः पडिहत्थभ्रमन्मत्स्यकच्छपाः, तथाऽनेकैः—शकुनमिथुनकैः प्रविचरिता—इतस्ततो गमनेन सर्वतो व्याप्ता अनेकशकुनमिथुनकप्रविचरिताः, ततः पूर्वपदेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषणसमासः, एता वाप्यादयः सरस्सरःपङ्क्तिपर्यवसानाः प्रत्येकं प्रत्येकमिति, एकमेकं प्रति प्रत्येकम्, अत्राभिमुख्ये प्रतिशब्दो न वीप्साविवक्षायां, पश्चात्प्रत्येकशब्दस्य द्विर्वचनमिति, पद्मवरवेदिकया परिक्षिप्ताः प्रत्येकं वनषण्डपरिक्षिप्ताश्च, 'अप्पेगतियाओ' इत्यादि, अपिर्बाढार्थे बाढमेककाः—काश्चन वाप्यादय आसवमिव—चन्द्रहासादिपरमासवमिव उदकं यासां ता आसवोदकाः, अप्येकका वारुणस्य वारुणसमुद्रस्येव उदकं यासां ता वारुणोदकाः, अप्येककाः क्षीरमिवोदकं यासां ताः क्षीरोदकाः, अप्येकका घृमिवोदकं यासां ता घृतोदकाः, अप्येककाः क्षेद इव—इक्षुरस इव उदकं यासां ताः क्षोदोदकाः, अप्येकका अमृतरससमरसमुदकं यासां ता अमृतरससमरसोदकाः, अप्येकका अमृतरसेन स्वाभाविकेन प्रज्ञप्ताः ।

'पासाईया(ओ) इत्यादि विशेषणचतुष्टयं प्राग्वत्, तासां क्षुल्लिकानां यावद्बिलपङ्क्तीनां प्रत्येकं २ चतुर्दिशि चत्वारि, एकैकस्यां दिशि एकैकभावात्, 'त्रिसोपानप्रतिरूपकाणि' प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपकाणि त्रयाणां सोपानानां समाहारस्त्रिसोपानं त्रिसोपानानि 'अयं' वक्ष्यमाणः 'एतद्रूपः' अनन्तरं वक्ष्यमाणस्वरूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा –

'वज्रमयाः' वजर्रत्नमया 'नेमाः' भूमेरूर्ध्वं निष्कामन्तः प्रेशाः 'रिष्ठमयाः' रिष्ठरत्नमयाः 'प्रतिष्ठानाः' त्रिसोपानमूलपादा वैडूर्यमयाः स्तम्भाः सुवर्णरूप्यमयानि फलकानि—त्रिसोपानाङ्गभूतानि वज्रमयानि वज्ररत्नापूरिताः सन्धयः—फलकद्वयापान्तरालप्रदेशाः लोहिताक्षमय्यः सूच्यः—फलकद्वयसम्बन्धविघटनाभावहेतु पादुकास्थानीयाः नानामणिमया अवलम्ब्यन्ते इति अवलम्बना—अवतरतामुत्तरतां चालम्बने हेतुभूता उवलम्बनबाहातो विनिर्गताः केचिदवयवाः 'अवलंबणबाहाओ' इति अवलम्बनबाहा अपि नानामणिमयाः, अवलम्बनबाहा नाम उभयो—उभयोः पार्श्वयोरवलमबनाश्रयबूता भित्तयः, 'पासाईयाओ' इत्यादि पदचतुष्टयं प्राग्वत् ।

'तेसि ण'मित्यादि, तेषां त्रिसोपानप्रतिरूपकाणां प्रत्येकं प्रत्येकं तोरणानि प्रज्ञप्तानि, तेषां च तोरणानामयमेतद्रूपो 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा 'ते णं तोरणा नानामणिमया' इत्यादि, तानि तोरणानि नानाणिमयानि, मणयः—चन्द्रकान्तादयः, विविधमणिमयानि, नानामणिमयेषु स्तम्भेषु 'उपविष्ठानि' सामीप्येन स्थितानि, तानि च कदाचिच्चलानि अथवाऽपदपतितानि वाऽऽशङ्क्येरन् तत आह—सम्यग्—निश्चलतयाऽपदपरिहारेण च निविष्टानि ततो विशेषणसमासः उपविष्टसन्निविष्टानि 'विविहमुत्तंतरोचिया' इति विविधा—विविधविच्छित्तिकलिता मुक्ता—मुक्ताफलानि 'अंतरे'ति अन्तराशब्दोऽगृहीतवीप्सोऽपि सामध्यार्दवीप्सां गमयति, अन्तरा २ 'ओचिया' आरोपिता यत्र तानि तथा, 'विविहतारारूवोवचिया' इति विविधैस्तारारूपैः—तारिकारूपैरुपचितानि, तोरणेषु हि शोभार्थं तारका निबध्यन्ते इति लोकेऽपि प्रतीतं इति विविधतारारूपोपचितानि, 'ईहामिगउसभतुरगनरमगरविहगवालगकिंनररुरुसरगचमर- इति ईहामृगाःवृका व्यालाः—श्वापदभुजगाः, ईहामृगऋषभतुरग- नरमकरविह- गव्यालकिंनररुरुसरभकुञ्जरवनलतापद्मलतानां भक्त्या—विच्छित्या विचित्रं—आलेखो येषु तानि तथा ।

स्तम्भोद्गताभिः—स्तम्भोपरिवर्त्तिनीभिर्वज्ररत्नमयीभिर्वेदिकाभि परिगतानि सन्ति यानि अभिरणीयानि तानि स्तम्भोद्गतवज्रवेदिकापरिगताभिरामाणि, तथा 'विज्ञाहरजंतजुत्ताविव अच्चीसहस्समालिणीया' इति विद्याधरयोर्यद् यमलं—समश्रेणीकं युगलं—द्वन्द्वं विद्याधरयमलयुगलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां यन्त्राणि—प्रपञ्चास्तैर्युक्तानीव, अर्चिषां सहस्रैर्मालनीयानि—परिवारणीयानि अर्चिसहस्रमालनीयानि, किमुक्तं भवति ? —एवं नाम प्रभासमुदायोपेतानि येनैवं संभावनोपजायते यथा नूनमेतानि न स्वाभाविकप्रभासमदयोपेतानि किन्तु विशिष्टविद्याशक्तिमत्पुरुषविशेषप्रपञ्चयुक्तानीति, 'रूवगसहस्सकलिया' इति रूपकाणां सहस्राणि रूपकसहस्राणि तैः कलितानि रूपकसहस्रकलितानि 'भिसमाणा' इति दीप्यमानानि 'भिब्भिसमाणा' इति अतिशयेन दीप्यमानानि 'चक्खुल्लोयणलेसा' इति चक्षु कर्तृ लोकने—अवलोकने लिसतीव—दर्शनीयत्वातिशयतः श्लिष्यतीव यत्र तानि चक्षुर्लोकनलेसानि 'सुहफासा' इति शुभस्पर्शानि सशोभाकानि रूपाणि यत्र तानि सश्रीकरूपाणि, 'पासाइया' इत्यादि विशेषणचतुष्टयं प्राग्वत् ।

'तेसिं तोरणामं उवरिं अट्ठट्ठमंगले'त्यादि सुगमं, नवरं 'जाव पडिरूवा' इति यावत्करमात् 'घट्ठा मट्ठा नीरया' इत्यादिपरिग्रहः ॥ 'तेसि ण'मित्यादि, तेषां तोरणानामुपरि बहवः 'कृष्णचामरध्वजः' कृष्णचामरयुक्ता ध्वजाः कृष्णचामरध्वजाः एवं बहवो नीलचामरध्वजा लोहितचामरध्वजा हारिद्रचामरध्वजाः शक्लचामरध्वजाः, कथम्भूता इत्याह एते सर्वेऽपि ? इति, अत आह—'अच्छा' आकाशस्फटिकवदतिनिर्मलाः 'कृष्णाः' कृष्णपुद्गलस्कंधनिर्मापिता 'रूप्यपट्टा' इति रूप्योरूप्यमयो वज्रमयस्य दण्डस्योपरि पट्टे येषां ते रूप्यपट्टाः 'वइरदंडा' इति वज्रो—वज्ररत्नमयो दण्डो रूप्यपट्टमध्यवर्त्ती येषां ते वज्रदण्डाः, तथा जलजानामिव—जलजकुसुमानां पद्मादीनामिवामलो—निर्म्मलो न तु कुद्रव्यगंधसम्मिश्रो यो गन्धः स विद्यते येषां ते जलजामलगन्धिका 'अतः अनेकस्वरा'दितीकप्रत्ययः, अत एव सुरम्याः, 'पासादीया' इत्यादि विशेषणचतुष्टयं प्राग्वत्

'तेसि ण'मित्यादि, तेषां तोरणानामुपरि बहूनि 'छत्रातिच्छत्राणि' छत्रात्—लोकप्रसिद्धादेकसङ्ख्याकादतिशायीनि द्विसङ्ख्यानि त्रिसङ्ख्या वा छत्रातिच्छत्राणि, बह्वयः पताकाभ्यो—लोकप्रसिद्धाभ्योऽतिशायिन्यो दीर्घत्वेन विस्तारेण च पताकाः पताकातिपताकाः, बहूनि घण्टायुगलानि बहूनि चामरयुगलानि बहवः 'उत्पलहस्तकाः' उत्पलाख्यजलजकुसुमसमूहविशेषाः, एवं पद्महस्तका बहवो निलनहस्तका बहवः सुभगहस्तका बहवः सौगन्धिकहस्तका बहवः पुण्डरीकहस्तका बहवः शतपत्रहस्तकाः बहवः सहसरपत्रहस्तकाः, उत्पलादीनि प्रागेव व्याख्यातानि, एते च छत्रातिच्छत्रादयः सर्वेऽपि सर्वरत्नमयाः 'जाव पडिरूवा' इति यावतकरणात् 'अच्छा सण्हा लण्हा' इत्यादि विशेषणकदम्बकपरिग्रहः ॥

'तासि ण'मित्यादि, तासां क्षुल्लिकानां वापीनां यावद्बिलपङ्क्तीनाम्, अत्र यावच्छब्दात् पुष्करिण्यादिपरिग्रहः, अपान्तरालेषु तत्र तत्र देशे तस्यैव देशस्य तत्र तत्रैकदेशे बहव उत्पातपर्वता—यत्रागत्य बहवो व्यन्तरदेवा देव्यश्च विचित्रक्रीडानिमित्तं वैक्रियशरीरमारचयन्ति 'नियइपव्वया' इति नियत्या—नैयत्येन पर्वता नियतिपर्वताः, कचित् 'निययपव्वया' इति पाठस्तत्र नियताः—सदा भोग्यत्वेनावस्थिताः पर्वता नियपर्वताः, यत्र वानमन्तरा देवा देव्यश्च भवधारणीयेन वैक्रियशरीरेण प्रायः सदा रममाणा अवतिष्ठन्ते इति भावः, 'जगतीपर्वतकाः' पर्वतविशेषाः 'दारुप्रवर्तकाः' दारुनिर्मापिता इति पर्वतकाः 'दगमंडवगा' इति 'दकमण्डपकाः' स्फटिकमण्डपकाः, उक्तं च मूलटीकायां— "दकमण्डपकाः स्फाटिकमण्डपका" इति, एवं दकमञ्चका दकमालका दकप्रासादाः, एते च दकमण्डपादयः केचित् 'ऊसडा' इति उत्सृता उच्चा इत्यर्थः, केचित् 'खुड्डा' इति क्षुल्ला

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

लघवः कचित् 'खडखडगा' इति लघव आयताश्च, तथा अन्दोलकाः पक्ष्यन्दोलकाश्च, तत्र यत्रागत्य मनुष्या आत्मानमन्दोलयन्ति ते अन्दोलका इति लोके प्रसिद्धाः, यत्र तु पक्षिण आगत्यात्मानमन्दोलयन्ति ते पक्ष्यन्दोलकाः, ते चान्दोलकाः पक्ष्यन्दोलकाश्च तस्मिन् वनषण्डे तत्र तत्र प्रदेशे वानमन्तरदेवदेवीक्रडायोग्या बहवः सन्ति, ते चोत्पातपर्वतादयः कथम्भूताः ? इत्याह– 'सर्वरत्नमयाः' सर्वात्मना रत्नमयाः, 'अच्छा सण्हा' इत्यादि विशेषणजातं पूर्ववत् ।

'तेसु णं'मित्यादि, तेषु उत्पातपर्वतेषु यावत्पक्ष्यन्दोलकेषु, यावत्करणान्नियतिपर्वतकादिपरिग्रहः, बहूनि हंसासनानि तत्र येषामासानामधोभागे हंसा व्यवस्थिता यथा सिंहासने सिंहाः तानि हंसासनानि, एवं क्रोञ्चासनानि गरुडासनानि च भावनीयानि, उन्नतासनानि नाम यानि उच्चासनानि प्रणतासनानि–निम्नासनानि दीर्घासनानि–श्ययारूपाणि भद्रासनानि येषामधोभागे पीठिकाबन्धः पक्ष्यासनानि येषामधोभागे नानास्वरूपाः पक्षिणः, एवं मकरासनानि सिंहासननानि च भावनीयानि, पद्मासनानि–पद्माकाराणि आसनानि 'दिसासोवत्थियासणाणि' येषामधोभागे दिक्सौवस्तिका आलिखिताः सन्ति, अत्र यथाक्रममासनानां सङ्ग्राहिका सङ्ग्रहणिगाथा–

॥१॥ "हंसे १ कोंचे २ गरुडे ३ उण्णय ४ पणए य ५ दीह ६ भद्दे य ७ ।
पक्खे ८ मयरे ९ उसहे १० सीह ११ दिसासोवृत्थि १२ बारसमे ॥"

एतानि सर्वाण्यपि कथम्भूतानि ? इत्यत आह–'सव्वरयणामया' इत्यादि प्राग्वत् ।

'तस्स णं वनसंडस्से'त्यादि, प्राग्वत् तस्य वनखण्डस्य मध्ये तत्र तत्र प्रदेशे तस्यैव देशस्य तत्र तत्रैकदेशे बहूनि 'आलिगृहकाणि' आलि–वनस्पतिविशेषस्तन्मयानि गृहकाणि मालिरपि–वनस्पतिविशेषस्तन्मयानि गृहकाणि मालिगृहकणि कदलीगृहकाणि लतागृहकाणि प्रतीतानि 'अच्छणघरका' इति अवस्थानगृहकाणि येषु यदा तदा वाऽऽगत्य बहवः सुखासिकयाऽवतिष्ठन्ते, प्रेक्षणकगृहाणि यत्रागत्य प्रेक्षणकानि विदधति निरीक्षन्ते च, मज्जनकगृहकाणि यत्रागत्य स्वेच्छया मज्जनं कुर्वन्ति प्रसाधनगृहकाणि यत्रागत्य स्वं परं च मण्डयन्ति गर्भगृहकाणि–गर्भगृहाकाराणि, 'मोहनघरगा' इति मोहणं–मैथुनसेवा "रमियमोहणरयाइं" इति नाममालावचनात्, तत्प्रधानानि गृहकाणि मोहनगृहकाणि वासभवनानीति भावः, 'शालागृहकाणि' पट्टशालाप्रधानानि गृहकाणि 'जालगृहकाणि' जालकयुक्तानि गृहकाणि 'कुसुमगृहकाणि' कुसुमप्रकरोपचितानि गृहकाणि 'चित्रगृहकाणि' चित्रप्रधानानि गृहकाणि 'गन्धर्वगृहकामि' गीतनृत्याभ्यासयोग्यानिगृहकाणि 'आदर्शगृहकाणि' आदर्शमयानीव (आदर्श) गृहकाणि, एतानि च कथम्भूतानि ? इत्यत आह– 'सव्वरयणामया' इत्यादिविशेषणकदम्बकं प्राग्वत् । 'तेसु ण'मित्यादतेषु आलिगृहकेषु यावच्छब्दान्मालिगृहकादिपरिग्रहः, बहूनि हंसासनानि इत्यादि प्राग्वत् ॥ 'तस्स ण'मित्यादि, तस्य वनखण्डस्य मद्ये तत्र देशे तस्यैव देशस्य तत्र तत्रैकदेशे बहवो जातिमण्डपका यूथिकामण्डपका मल्लिकामण्डपका नवमालिकामण्डपका वासन्तीमण्डपका दधिवासुका नाम वनस्पतिविशेषस्तन्मया मण्डपका दधिवासुकमण्डपकाः, सूरिल्लिरपि वनस्पतिविशेषस्तन्मया मण्डपकाः सूरिल्लिमण्डपकाः, ताम्बूली–नागवल्ली तन्मया मण्डप- कास्ताम्बूलीमण्डपकाः, नागो–द्रुमविशेषः स एव लता नागलता, इह यस्य तिर्यक् तथाविधा शाखा प्रशाखा न प्रसृता सा लतेत्यभिधीयते, नागलताम-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

यमण्डपकाः, अतिमुक्तकमण्डपकाः, 'अप्फोया' इति वनस्पतिविशेषस्तन्मया मण्डपका अप्फोया-मण्डपकाः, मालुका–एकास्थिकफला वृक्षविशेषास्तद्युक्ता मण्डपका मालुकामण्डपकाः, एते च कथम्भूताः ? इत्याह–'सव्वरयणामया' इत्यादि प्राग्वत्।

'तेसु ण'मित्यादि, तेषु जातीयमण्डपेषु यावन्मालुकामण्डपेषु, यावत्करणाद् यूथिका-मण्डपकादिपरिग्रहः, बहवः शिलापट्टकाः प्रज्ञप्तास्तद्यथा–अप्येकका हंसासनवत्संस्थिता हंसास-नसंस्थिताः यावदप्येकका दिकसौवस्तिकासनसंस्थिताः, यावत्करणात् 'अप्पेगइया कोंचासण-संठिया अप्पेगइया गरुडासणसंठिया अप्पेगइया उन्नयासणसंठिया अप्पेगइया पणयासणसंठिया अप्पेगइया भद्दासणसंठिया अप्पेगइया पक्खासणसंठिया अप्पेगइया मयरासणसंठिया अप्पेगइया उसभासणसंठिया अप्पेगइया सीहासणसंठिया अप्पेगइया पउमासणसंठिया अप्पेगइया दीहासणसंठाण' इति परिग्रहः ।अन्ये च बहवः शिलापट्टका यानि विसिष्टचिह्नानि विशिष्टनामानि च वराणि–प्रधानानि शयनानि आसनानि च तद्वत्संस्थिता वरशयनासनविशिष्टसंस्थानसंस्थिताः, क्वचित् 'मांसल- सुघुट्ठविसिट्ठसंठाणसंठिया' इति पाठस्तत्रान्ये च बहवः शिलापट्टका मांसला इव मांसलाः अकठिना इत्यर्थः सुघुष्ठ इव सुघुष्टा अतिशयेन मसृणा इति भावः विशिष्टसंस्थान-संस्थिताश्च 'आईणगरूयबूरन- वणीयतुलफासा मउया सव्वरयणामया अच्छा' इत्यादि प्राग्वत्, तत्रैतेषु उत्पातपर्वतादिगत- हंसासनादिषु यावन्नानारूपसंस्थासंस्थितपृथिवीशिलापट्टकेषु णमिति पूर्वद् बहवो वानमन्तरा देवा देव्यश्च यथासुखमासते 'शेरते' दीर्घकायप्रसारणेन वर्त्तन्ते, न तु निद्रां कुर्वन्ति, तेषु देवयोनिक- तया निद्राया अभावात्, 'तिष्ठन्ति' ऊर्ध्वस्थानेन वर्त्तन्ते 'निषीदन्ति' उपविशन्ति 'तुयट्टंति' इति त्वग्वर्त्तनं कुर्वन्ति वामपार्श्वतः परावृत्य दक्षिणपार्श्वेनावतिष्ठन्ति दक्षिणपार्श्वतो वा परावृत्य वामपार्श्वेनावतिष्ठन्ति 'रमन्ते' रतिमाबध्नन्ति 'ललन्ति' मनईप्सितं यथा भवति तथा वर्त्तन्त इति भावः।

'क्रीडन्ति' यथासुखमितस्ततो गमनविनोदेन गीतनृत्यादिविनोदेन वा तिष्ठन्ति 'मोहन्ति' मैथुनसेवां कुर्वन्ति, इत्येवं 'पुरा पोराणाण' मित्यादि, 'पुरा' पूर्वं प्राग्भवे इति भावः कृतानां कर्म्मणामिति योगः, अत एव पौराणानां सुचीर्णानां–सुचरितानामितिभावः, इह सुचरितजनितं कर्म्मापि कार्ये कारणोपचारात्सुचरितमिति विवक्षितं, ततोऽयं भावार्थ–विशिष्टतथाविध-धर्म्मानुष्ठानविषयाप्रमादकरणक्षान्त्यादिसुचरितानामिति, तथा सुपराक्रान्तानाम्, अत्रापि कारणे कार्योपचारात् सुपराक्रान्तजनितानि कर्माण्येव सुपराक्रान्तानि इत्युक्तं भवति, सकलसत्वमैत्री-सत्यभाषणपरद्रव्यानपहारसुशीलादिरूपसुपराक्रमजनितानामिति, अत एव सुभानां शुभफलानाम्, इह किञ्चिदशुभफलमपीन्द्रियमतिविपर्यासात् शुभफलमाभाति ततस्तात्विकशुभत्वप्रतिपत्यर्थमस्यैव प्यायशब्दमाह– 'कल्याणानां' तत्ववृत्या तथाविधविशिष्टफलदायिनाम्, अथवा कल्याणानाम्–अनर्थेपशमकारिणां, कल्याणं–कल्याणरूपं फलविपाकं 'पच्चणुभवमाणा' प्रत्येकमनुभवन्तः–'विहरन्ति' आसते।

तदेवं पद्मवरवेदिकाया बहिर्यो वनखण्डस्तद्वक्तव्यतोक्ता, सम्प्रति तस्या एव पद्मवरवेदिकाया अर्वाग् जगत्या उपरि यो वनखण्डस्तद्वक्तव्यतामभिधित्सुराह–'तीसे णं जगतीए' इत्यादि, तस्या जगत्या उपरि पद्मवरवेदिकाया 'अन्तः' मध्यभागे अत्र महानेको वनषण्डः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञप्तः 'देसोणाइं दो जोयणाइं विक्खंभेण'मित्यादि सर्वं बहिर्वनखण्डवदविशेषेण वक्तव्यं, नवरमत्र मणीनां तृणानां च शब्दो न वक्तव्यः, पद्मवरवेदिकान्तरिततया तथाविधवाताभावतो मणीनां तृणानां च लनाभावतः परस्परसंघर्षाभावात्, तथा चाह–"वनसंडवण्णतो सद्दवज्जो जाव विहरंति" इति ॥ सम्प्रति जम्बूद्वीपस्य द्वारसङ्ख्याप्रतिपादनार्थमाह–

–: "विजय द्वार" अधिकार :–

मू. (१६६) *जंबुद्दीवस्स णं भंते ! दीवस्स कति दारा पन्नत्ता ? गोयमा ! चत्तारि दारा पन्नत्ता, तंजहा– विजये वेजयंते जयंते अपराजिए ॥*

वृ. 'जंबुद्दीवस्स णं भंते !' इत्यादि, जम्बूद्वीपस्य णमिति प्राग्वत् भदन्त ! द्वीपस्य कति द्वाराणि प्रज्ञप्तानि ?, भगवानाह–गौतम ! चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा–विजयं वैजयन्तं जयन्तमपराजितं च ।

मू. (१६७) *कहि णं भंते ! जंबुद्दीवस्स विजये नामं दारे पन्नत्ते ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमेणं पणयालीसं जोयणसहस्साइं अबाधाए जंबुद्दीवे दीवे पुरच्छिमपेरंते लवणसमुद्दपुरच्छिमद्धस्स पच्चत्थिमेणं सीताए महानदीए उप्पिं एत्थ णं जंबद्दीवस्स दीवस्स विजये णामं दारे पन्नत्ते अट्ठ जोयणाइं उड्ढं उच्चत्तेणं चत्तारि जोयणाइं विक्खंभेणं तावतियं चेव पवेसेणं सेए वरकणगथूभियागे ईहामियउसभतुरगनरमगरविहगवालगकिन्नररुरुसरभचमर- कुंजरवणलतपउमलयभत्तिवित्ते खंभुग्गतवइरवेदियापरिगताभिरामे विज्जाहरजमलजुयलजंतजुत्ते इव च्चीसहस्समालिणीए रूवगसहस्सकलिते भिसिमाणे भिब्भिसमाणे चक्खुल्लोयणलेसे सुहफासे सस्सिरीयरूवे वण्णो दारस्स (तस्सिमो होइ) तं० –*

वइरामया निम्मा रिट्ठामया पतिट्ठाणा वेरुलियामया खंभा जायरूवोवचियपवर- पंचवण्णमणिरयणकोट्टिमतले हंसगब्भमए एलुए गोमेज्जमते इंदक्खीले लोहितक्खमईओ दारचिडाओ जोतिरसामते उत्तरंगे वेरुलियामया कवाडा वइरामया संधी लोहितक्खमईओ सूईओ नानामणिमया समुग्गगा वईरामई अग्गलाओ अग्गलपासाया वइरामई आवत्तणपेढिया अंकुत्तरपासेत निरंतरितघणकवाडे भित्तीसु चेव भित्तीगुलिया छप्पण्णा तिन्नि होंति गोमाणसी ततिया नानामणिरयमवालरूवगलीलट्ठियसालिभंजिया वइरामए ।

कूडे रययामए उस्सेहे सव्वतवणिज्जमए उल्लोए नानामणिरयणजालपंजरमणिवंसग- लोहतक्खपडिवंसगरयतभोम्मे अंकामया पक्खबाहाओ जोतिरसामया वंसा वंसकवेल्लगा य रयतामयी पट्टिताओ जायरूवमती ओहाडणी वइरामयी उवरि पुच्छणी सव्वसेतरययमए च्छायणे अंकतमकणगकूडतवणिज्जथूभियाए सेते संखतलविमलणिम्मलदधिघनगोखीरफेणरययणि- गरप्पगासे तिलगरयणद्धचंदचित्ते नानामणिमयदामालंकिए अंतो य बहिं च सण्हे तवणिज्ज रुइल- वालुयापत्थडे सुहप्फासे सस्सिरीयरूवे पासातीए ४ ।

विजयस्स णं दारस्स उभयो पासिं दुहतो निसीहियाते दो दो चंदनकलसपरिवाडीओ पन्नत्ताओ, ते णं चंदनकलसा वरकमलपइट्ठाणा सुरभिवरवारिपडिपुन्ना चंदणकयचच्चागा आबद्धकंठेगुणा पउमुप्पलपिहाणा सव्वरयणामया अच्छा जाव पडिरूवा महता २ महंदकुंभसमाणा पन्नत्ता समणाउसो ! ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विजयस्स णं दारस्स उभओ पासिं दुहतो निसीहिआए दो दो नागदंतपरिवाडीओ, ते णं नागदंतगा मुत्ताजालंतरूसितहेमजालगवक्खजालखिंखिणीघंटाजालपरिक्खित्ता अब्भुग्गता अभिनिसिट्ठा तिरियं सुसंपगहिता अहेपन्नगद्धरवा पन्नगद्धसंठाणसंठिता सव्वरयणामया अच्छा जाव पडिरूवा महता महया गयदंतसमाणा प० समणाउसो ! ।

तेसु णं नागदंतएसु बहवे किण्हसुत्तबद्धवग्घारितमल्लदामकलावा जाव सुक्किल्लसुत्तबद्धवग्घारियमल्लदामकलावा । ते णं दामा तवणिज्जलंबूसगा सुवण्णतरगमंडिता नानामणिरयणविविधहारद्धहार (उवसोभितसमुदया) जाव सिरीए अतीव अतीव उवसोभेमाणा उवसोभेमाणा चिट्ठंति तेसि णं नागदंतकाणं उवरिं अन्नाओ दो दो नागदंतपरिवाडीओ पन्नत्ताओ, तेसि णं नागदंतगाणं मुत्ताजालंतरूसिया तहेव जाव समणाउसो ! ।

तेसु णं नागदंतएसु बहवे रयतामया सिक्कया पन्नत्ता, तेसु णं रयणा मएसु सिक्कएसु बहवे वेरुलियामतीओ धूवघडीओ पन्नत्ताओ, तंजहा–ताओ णं धूवघडीओ कालागुरुपवरकुंदरुक्कतुरुक्कधूवमधमधंतगंधुद्धुयाभिरामाओ सुगंधवरगंधगंधियाओ गंधवट्टिभूयाओ ओरालेणं मणुण्णेणं घाणमणनिव्वुइकरेणं गंधेणं तप्पएसे सव्वतो समंता आपूरेमाणीओ आपूरेमाणीओ अतीव अतीव सिरीए जाव चिट्ठंति ।

विजयस्स णं दारस्स उभयतो पासिं दुहतो निसीधियाए दो दो सालिभंजियापरिवाडीओ पन्नत्ताओ, ताओ णं सालभंजियाओ लीलट्ठिताओ सुपयट्ठियाओ सुअलंकिताओ नानागारवसणाओ नानमल्लपिणद्धिओ मुट्ठीगेज्झमज्झाओ आमेलगजमलजुयलवट्टिअब्भुण्णयपीणरचियसंठियपओहराओ रत्तावंगाओ असियकेसीओ मिदुविसयपसत्थलक्खणसंवेल्लितग्गसिरयाओ ईसिं । असोगवरपादवसमुट्ठिताओ वामहत्थहितग्गसालाओ ईसिं अदच्छिकडक्खविद्धिएहिं लूसेमाणीतो इव चक्खुल्लोयणलेसाहिं अन्नमन्नं खिज्जमाणीओ इव पुढविपरिणामाओ सासयभावमुवगताओ चंदाननाओ चंदविलासिणीओ चंदद्धसमनिडालाओ चंदाहियसोमदंसणाओ उक्का इव उज्जोएमाणीओ विज्जुघणमरीचिसूरदिप्पंततेयअहिययरसंनिकासाओ सिंगारागारचारुवेसाओ पासाइयाओ ४ तेयसा अतीव २ सोभेमाणीओ२ चिट्ठंति ।

विजयस्स णं दारस्स उभयतो पासिं दुहतो निसीहियाए दो दो जालकडगा पन्नत्ता, ते णं जालकडगा सव्वरयणामया अच्छा जाव पडिरूवा ।

विजयस्स णं दारस्स उभओपासिं दुहओ निसीधियाए दो दो घंटापरिवाडिओ पन्नताओ, तासि णं घंटाणं अयमेयारूवे वन्नावासे पन्नत्ते, तंजहा–जंबूणतमतीओ घंटाओ वइरामतीओ लालाओ नानामणिमया घंटापासगा तवणिज्जमतीओ संकलाओ रयतामतीओ रज्जूओ ।

ताओ णं घंटाओ ओहस्सराओ मेहस्सराओ हंसस्सराओ कोंचस्सराओ नंदिस्सराओ नंदिघोसाओ सीहस्सराओ सीहघोसाओ मंजुस्सराओ मंजुघोसाओ सुस्सराओ सुस्सरनिग्घोसाओ ते पदेसे ओरालेणं मणुण्णेणं कण्णमणनिव्वुइकरेण सद्देण जाव चिट्ठंति ।

विजयस्स णं दारस्स उभओपासिं दुहतो निसीधिताए दो दो वणमालापरिवाडीओ प० ताओ णं वणमालाओ नानादुमलताकिसलयपल्लवसमाउलाओ छप्पयपरिभुज्जमाण-कमलसोभंतसस्सिरीयाओ पासाईयाओ ते पएसे उरालेणं जाव गंधेणं आपूरेमाणीओ जाव चिट्ठंति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! जम्बूद्वीपस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तं ?, भगवानाह–गौतम ! जम्बूद्वीपे मन्दरस्य पर्वतस्य 'पुरच्छिमेणं'ति पूर्वस्यां दिशि पञ्चचत्वारिंशद्-योजनसहस्रप्रमाणया 'अबाधया' अपान्तरालेन यो जम्बूद्वीपस्य 'पुरच्छिमे पेरंते' इति पूर्व पर्यन्तो लवणसमुद्रपूर्वार्द्धस्य 'पच्चत्थिमेणं'ति पश्चिमे भागे सीताया महानद्या उपरि 'अत्र' एतस्मिन् प्रदेशे जम्बूद्वीपस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तम्, अष्टौ योजनानि उच्चैस्त्वेन चत्वारि योजनानि विष्कम्भेन, 'तावइयं चेव पवेसेणं' ति तावन्त्येव चत्वारीत्यर्थः योजनानि प्रवेशेन, कथम्भूतमित्यर्थ,: 'सेए' इत्यादि, 'श्वेतं' श्वेतवर्णोपेतं बाहल्येनाङ्करत्नमयत्वात् 'वरकणगथूमियाए' इति वरकनका–वरकनकमयी स्तूपिका–शिखरं यस्य तद् वरकनकस्तुपिकाकम्, 'ईहामियउसभतुरगनरमगर-विहगवालगकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ते खंभुग्गयवरवेइयापरिग-याभिरागे विज्ञाहरजमलजुगलजंतंजुत्ते इव अच्चीसहस्समालणीए रूवगसहस्सकलिए भिसमाणे भिब्भिसमाणे चक्खुल्लोयणलसे सुहफासे सस्सिरीयरूवे' इति विशेषणजातं प्राग्वत् ।

'वण्णो दारस्स तस्सिमो होइ' इति 'वर्ण' वर्णकनिवेशो द्वारस्य 'तस्य' विजयाभिधानस्य 'अयं' वक्ष्यमाणो भवति, तमेवाह–'तंजहे'त्यादि, तद्यथा–वज्रमया नेमा–भूमिभागादूर्ध्वं निष्क्रामन्तः प्रदेशा रिष्ठमयान प्रतिष्ठानानि–मूलपादाः 'वेरुलियरुइलखंभे' इति वैडूर्या–वैडूर्यरत्नमया रुचिराः स्तम्भा यस्य तद् वैडूर्यरुचिरस्तम्भं 'जायरूवोवचियपवरपंचवण्णमणिर-यणकुट्टिमतले' इति जातरूपेण–सुवर्णेनोपचितैः–युक्तैः प्रवरैः प्रधानैः पञ्चवर्णैर्मणिभिः–चन्द्रकान्तादिभि रत्नैः–कर्केतनादिभि कुट्टिमतलं–बद्धभूमितलं यस्य तत्तथा 'हंसगब्भमए एलुगे' इति हंसगर्भो–रत्नविशेषस्तन्मय एलुको–देहली –

–'गोमेज्ञमयइंदकीले' इति गोमेयकरत्नमय इन्द्रकी लोहिताक्षरत्नमय्यौ द्वारपिण्डी-(चेटयौ)–द्वारशाखे 'जोइरसामए उत्तरंगे' इति ज्योतीरसमयमुत्तरङ्गं–द्वारस्योपरि तिर्यगव्यवस्थितं काष्ठं वैडूर्यमयौ कपाटौ लोहिताक्षमय्यो–लोहिताक्षरत्नात्मिकाः सूचयः–फलकद्वयसम्बन्ध-विघटनाभावहेतुपादुकास्थानीयाः 'वइरामया संधी' वज्रमयाः 'सन्धयः' सन्धिमेलाः फलकानां, किमुक्तं भवति ?–वज्ररत्नापूरिताः फलकानां सन्धयः, 'नानामणिमया समुग्गया' इति समुद्गका इव समुद्गकाः–सूतिकागृहाणि तानि नानामणिमयानि 'वइरामय अग्गला अग्गलपासाया' अर्गलाः–प्रतीताः अर्गलाप्रासादा यत्रार्गला नियम्यन्ते, आह च मूलटीकाकारः–

"अर्गलाप्रासादा यत्रार्गला नियम्यन्ते" इति, एतौ द्वावपि वज्ररत्नमयौ, 'रययामयी आवत्तणपेढिया' इति आवर्त्तनपीठिका यत्रेन्द्रकीलिका, उक्तं च मूलटीकायाम्–

"आवर्त्तनपीठिका यत्रेन्द्रकीलको भवति" 'अंकुत्तरपासाए' इति अङ्का अङ्करत्नमया उत्तरपार्श्वा यस्य तद् अङ्कोत्तरपार्श्वं 'निरंतरियघमकवाडे' इति निर्गता अन्तरिका–लघ्वन्तररूपा ययोस्तौ निरन्तरिकौ अत एव घनौ कपाटौ यस्य तन्निरन्तरघनकपाटं 'भित्तिसु चेव भित्तिगुलिया छप्पन्ना तिन्नि होंति' इति तस्य द्वारस्योभयोः पार्श्वयोर्भित्तिषु–भित्तिगता भित्तिगुलिकाः–पीठकसंस्थानीयास्तिस्र षट्पञ्चाशत्त्रिकसङ्ख्याका इत्यर्थः, 'नानामणिरयणवालरूवगली-लट्ठियसालभंजियाए' इति इदं द्वारविशेषणं, नानामणिरत्नानि–नानामणिरत्नमयानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यालरूपकाणि लीलास्थितशालभञ्जिकाश्च–लीलास्थितपुत्रिकाश्च यस्य तत्तथा 'वाइरामए कूडे' वज्रमयो–वज्ररत्नमयः कूटो–माडभागः रजतमय उत्सेधः–शिखरम्, आह च मूलटीकाकारः–

"कूडो–माडभाग उच्छ्रयः–शिखर"मिति, केवलं शिखरमत्र तस्यैव माडभागस्य संबन्धि द्रष्टव्यं न द्वारस्य, तस्य प्रागेवोक्तत्वात्, 'सव्वतवणिज्जमए उल्लोए' सर्वात्मना तपनीयमय उल्लोकः–उपरिभागः 'नानामणिरयणजालपंजरमणिवंसगलोहियक्खपडिवंसगरययभोमे' इति, मणयो–मणिमया वंशा येषां तानि मणिमयवंशकानि लोहिताक्षा–लोहिताक्षमयाः प्रतिवंशा येषां तानि लोहिताक्षप्रतिवंशकानि रजता–रजतमयी भूमिर्येषां तानि रजतभूमानि, प्राकृतत्वात्समासान्तो मकारस्य च द्वित्वं, मणिवंशकानि लोहिताक्षप्रतिवंशकानि रजतभूमानि नानामणिरत्नानि–नानामणिरत्नमयानि जालपञ्जराणि–गवाक्षापरपर्यायाणि यस्मिन् द्वारे तत्तथा, पदानामन्यथोपनिपातः प्राकृतत्वात्, 'अंकमया पक्खा पक्खबाहाओ जोईरसामया वंसा वंसकवेल्लुगा य रययामईओ पट्टियाओ जायरूवमईओ ओहाडणीओ वइरामईओ उवरिंपुंछणीओ सव्वसेयरययामए छा(य)णे' इति पद्मवरवेदिकावद्भावनीयम्।

'अंकमयकणगकूडतवणिज्जथूभियागे' इति अङ्कमयं–बाहुल्येनाङ्करत्नमयं पक्षबाह्वादीनामङ्करत्नात्मकत्वात् कनकं–कनकमयं कूटं–शिखरं यस्य तत् कनककूटं तपनीया–तपनीयमयी स्तूपिका–लघुशिखररूपा यस्य तत्तपनीयस्तूपिकाकं, ततः पदत्रयस्य पदद्वयमीलनेन कर्म्मधारयः, एतेन यत् प्राक् सामान्यत उत्क्षिप्तं 'सेए वरकणगथूभियागे' इति तदेव प्रपञ्चतो भावितमिति।

सम्प्रति तदेव श्वेतत्वमुपसंहारव्याजेन भूय उपदर्शयति–'सेए' श्वेतं, श्वेतत्वमेवोपमया द्रढयति– 'संखतलविमलनिम्मलदधिघणगोखीरफेणरययनिगरप्पगासे' इत विमलं–विगतमलं यत् शङ्खतलं शङ्खस्योपरितनो भामो यश्च निर्मलो दधिघनोघनीभूतं दधिगोक्षीरफेनो रजतनिकरश्च तद्वत्प्रकाशः–प्रतिमता यस्य तत्तथा, 'तिलगरयणद्धचंदचित्ते' इति तिलकरत्नानि–पुण्ड्रविशेषास्तैरर्द्धचन्द्रैश्च चित्राणि–नानारूपाणि तिलकार्द्धचन्द्रचित्राणि, क्वचित् संखतलविमलनिम्मलदधिघणगोखीरफेणरययनियरप्पगासद्धचंदचित्ता' इति पाठस्तत्र पूर्ववत् पृथक् पृथग् व्युत्पत्तिं कृत्वा पश्चात्पदद्वयस्य २ कर्मधारयः, 'नानामणिदामालंकिए' नानामणयो–नानामणिमयानि दामानि–मालास्तैरलङ्कृ तं नानामणिदामालङ्कृ तम् अन्तर्बहिश्च 'श्लक्ष्णं' श्लक्ष्णपुद्गलस्कन्धनिर्मापितं 'तवणिज्जवालुयापत्थडे' इति तपनीयाः–तपनीयमय्यो या वालुकाः–सिकतास्तासां प्रस्तटः–प्रस्तारो यस्मिन् तत्तथा, 'सुहफासे सस्सिरीयरूवे पासाईए जाव पडिरूवे' इति प्राग्वत्

'विजयस्स णं दारस्से' त्यादि, विजयस्य णमिति प्राग्वत् द्वारस्य उभयोः पार्श्वयोरेकैकनैषेधिकीभावेन 'दुहतो' इति द्विधातो द्विप्रकारायां नैषेधिक्यां, नैषेधिकी–निषीदनस्थानम्, उक्तं च मुलटीकाकारेण–"नैषेधिकी निषीदनस्थान"मिति प्रत्येकं द्वौ द्वौ चन्दनकलशौ प्रज्ञप्तौ, ते च चन्दनकलशाः 'वरकमलपइट्ठाणा' इति वरं–प्रधानं यत्कमलं तत्प्रतिष्ठानं आधारो येषां ते वरकमलप्रतिष्ठानाः, तथा सुरभिवरवारिप्रतिपूर्णाश्चन्दनकृतचर्चाकाः–चन्दनकृतोपरागाः 'आविद्धकंठेगुणा' इति आविद्धः–आरोपिताः कण्ठे गुणो–रक्तसूत्ररूपो येषु ते आविद्धकण्ठेगुणाः, कण्ठेकालवत्सप्तम्या अलुक्, 'पउमुप्पलपिहाणा' इति पद्ममुत्पलं च यथायोगं पिधानं येषां ते पद्मोत्पलपिधानाः 'सव्वरयणामया अच्छा जाव पडिरूवा' इति प्राग्वत् 'महयामहया' इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतिशयेन महान्तो महेन्द्रकुम्भसमानाः, कुम्भानामिन्द्र इन्द्रकुम्भो, राजदन्तादिदर्शनादिन्द्रशब्दस्य पूर्वनिपातः, महांश्चासौ इन्द्र कुम्भश्च तस्य समाना महेन्द्रकुम्भसमाना–महाकलशप्रमाणाः प्रज्ञप्ताः हे श्रमण ! हे आयुषम्न् ! ।

'विजयस्स ण' मित्यादि, विजयस्य द्वारस्य उभयो– पार्श्वयोरेकैकनैषेधिकीभावेन द्विघातो नैषेधिक्यां द्वौ द्वौ 'नागदन्तकौ' नर्कुटकौ अङ्कुटकावित्यर्थः प्रज्ञप्तौ, ते च नागदन्तका 'मुत्ताजालंतरूसियहेमजालगवक्खजालखिंखिणीजालपरिक्खित्ता' इति मुक्ताजालानामन्तरेषु यानि उत्सृतानि–लम्बमनानि हेमजालानि–हेममयदामसमूहाः यानि च गवाक्षजालानि–गवाक्षाकृतिरत्नविशेषदामसमूहाः यानि च किङ्किणी–क्षुद्रघण्टा किङ्किणी जालानि–क्षुद्रघण्टा-(सङ्घाता)स्तैः परिक्षिप्ताः–सर्वतो व्याप्ताः 'अब्भुग्गया' इति अभिमुखमुद्गता अभ्युद्गता अग्रिमभागे मनाग् उम्रता इति भावः 'अभिनिसिट्ठा' इति अभिमुखं–बहिर्भागाभिमुखं निसृष्टाः 'तिरियं सुसंपग्गहिया' इति तिर्यग्–भित्तिप्रदेशे सुष्ठु अतिशयेन सम्यग्–मनागप्यचलनेन परिगृहीताः सुसंगपरिगृहीताः 'अहेपन्नगद्धरूवा' इति अधः–अधस्तनं यत्पन्नगस्य–सर्पस्यार्द्ध तस्येव रूपं–आकारो येषां ते तथा अधःपन्नगार्द्धवदतिसरला दीर्घाश्चेति भावः, एतदेव व्याचष्टे–'पन्नगार्द्धसंस्थानसंस्थिताः' अधःपन्नगार्द्धसंस्थानसंस्थिताः 'सव्ववइरामया' सर्वात्मना वज्रमयाः 'अच्छा सण्हा जाव पडिरूवा' इति प्राग्वत्, 'महयामहया' इति अतिशयेन 'गजदन्तसमानाः' गजदन्ताकाराः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'तेसु णं नागदंतएसु' इत्यादि, तेषु च नागदन्तकेषु बहवः कृष्णसूत्रे बद्धाः 'वग्घारिया' इति अवलम्बिताः 'माल्यदाकलापाः' पुष्पमालासमूहा बहवो नीलसूत्रबद्धा माल्यदामकल्पाः, एवं लोहितहारिद्रशुक्लसूत्रबद्धा अपि वाच्याः ।

'ते णं दामा' इत्यादि, तानि दामानि 'तवनिज्जलं बूसगा' इति तपनीयः–तपनीयमयो लम्बूसगो–दाम्रामग्रिमभागे प्राङ्गणे लम्बमानो मण्डिनविशेषो गोलकाकृतिर्येषां तानि तपनीयलम्बूसकानि ''सुवण्णपयरगमंडिया इति पार्श्वतः सामस्त्येन सुवर्णप्रतरेण–सुवर्णपत्रकेण मणिडितानि सुवर्णप्रतरकमणिडातानि 'नानामणिरयणविविहहारद्धहारउवसोभियसमुदया' इति नानारूपाणां मणीनां रत्नानां च ये विविधा–विचित्रवर्णा ह्रार–अष्टादशसरिरा अर्द्धहारा–नवसरिकास्तैरुपशोभितः समुदाय येषां तानि तथा 'जाव सिरीए अतीव उवसोभेमाणा चिट्ठंति' अत्र यावत्करणादेवं परिपूर्ण पाठो द्रष्टव्यः– 'ईसिमण्णमण्णमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायमेइज्जमाणा पलंबमाणा पलंबमाणा परुंभ(झंझ)माणा परुंभ(झंझ)माणा ओरालेणं मणुन्नेणं मणहरेणं कण्णमणनिव्वुइकरेणं सद्देणं ते पएसे सव्वतो समंता आयूरेमाणा आपूरेमाणा सिरीए उवसभेमाणा उवसोभेमाणा चिट्ठंति ।' एतच्च प्रागेव पद्मवरवेदिकावर्णने व्याख्यामिति भूयो न व्याख्यायते । 'तेसि णं नागदंताण' मित्यादि, तेषं नागदन्तानामुपरि अन्यौ द्वौ नागदन्तकौ प्रज्ञप्तो, ते च नागदन्तकाः 'मुत्ताजालंतरूसियहेमजालगवक्खजाल' इत्यादि प्रागुक्तं सर्वं द्रष्टव्यं यावद् गजदन्त- समाना– प्रज्ञप्ता हे श्रमण ! हे आयुषम्न् ! ।

'तेसु णं नागदंसएण' इत्यादि, तेषा नागदन्तकेषु बहूनि रजतमयानि सिक्ककानि प्रज्ञप्तानि, तेषु च रजतमयेषु निक्ककेषु बहवो 'वैडुर्यरत्नमय्यो' वैडूर्यरत्नात्मिकाः ''धूपघट्यो धूपघटिकाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञप्ताः, ताश्च धूपघटिकः 'कालागुरुपवरकुंदरुक्कतुरुक्कधूवमघमघेंतगंधुद्धुयाभिरामा' कालागुरु प्रसिद्धः प्रवरः—प्रधानः कुन्दुरुष्कः—चीडा तुरुष्कं—सिल्हकं कालागुरुश्च प्रवरकुन्दुरुष्कतुरुष्के च कालागुरुप्रवरकुन्दुरुष्कतुरुष्काणि तेषां धूपस्य यो मधमधायमानो गन्ध उद्धुत—इतस्ततो विप्रसृतस्तनाभिरामाः कालागुरुप्रवरकुन्दुरुष्कतुरुक्कधूमपमघमघायमानगन्धोद्धुताभिरामाः, तथा शोभनो गन्धो येषां ते सुगन्धास्ते च ते वरगन्धास्तेषां गन्धः स आस्वस्तीति सुगन्धवरगन्धिकाः 'अतोऽनेकस्वरादि' तीकप्रत्ययः, अत एव गन्धवर्त्तिभूताः—सौरभ्यवर्त्तिभूताः सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पाः 'उदारेण' स्फारेण 'मनोज्ञेन' मनोऽनुकूलेन, कथं मनोऽनुकूलत्वम्? अत आह—घ्राणमनोनिर्वृतिकरेण हेतौ तृतीया यतो घ्राणमनोनिर्वृतिकरणस्ततो मनोज्ञस्तेन गन्धेन तान् प्रत्यासन्नान् प्रदेशान् आपूरयन्त्य आपूरयन्त्यः अत एव श्रियाऽतीव शोभमानास्तिष्ठन्ति।

'विजयस्स णं दारस्से'त्यादि, विजयस्य द्वारस्योभयोः पार्श्वयोरेकैकनैषेधिकीभावेन द्विघातो—द्विप्रकारायां नैषेधिक्यां द्वे द्वे शालभञ्जिके प्रज्ञप्ते, ताश्च शालभञ्जिका लीलया ललिताङ्गनिवेशरूपया स्थिता लीलास्थिताः 'सुपइट्ठियाओ' इति सुष्ठुमनोज्ञतया प्रतिष्ठिताः सुप्रतिष्ठिताः 'सुअलंकियाओ' इति सुष्ठु—अतिशयेन रमणीयतयाऽलङ्कृताः स्वलङ्कृ ताः 'नानाविहरागवसणाओ' इति नानाविधो—नानाप्रकारो रागो येषां तानि नानाविधरागाणि तानि वसनानि—वस्त्राणि संवृततया यासां ता नानाविधरागवसनाः 'रत्तावंगाओ' इति रक्तोऽपाङ्गो—नयनोपान्तं यासां ता रक्तापाङ्गाः 'असियकेसीओ' इति असिताः—कृष्णाः केशा यासां ता असितकेश्यः – 'मिउविसयपसत्थलक्खणसंवेल्लियग्गसिरयाओ' मृदवः—कोमला विशदा—निर्म्मलाः प्रशस्तानि—शोभनानि अस्फुटितत्वप्रभृतीनि लक्षणानि येषां ते प्रशस्तलक्षणाः संवेल्लितं—संवृतमग्रं येषां शेखरककरणात् ते संवेल्लिताग्राः शिरोजाः—केशा यासां ता मृदुविशदप्रशस्तलक्षण-संवेल्लिताग्रशिरोजाः 'नानामल्लपिणद्धाओ' इति नानारूपाणि मल्यानि—पुष्पामि पिनद्धानि—आविद्धानि यासां ता नानामाल्यपिनद्धाः, निष्ठान्तस्य परनिपातो भार्यादिदर्शनात्, 'मुट्ठिगेज्झ-सुमज्झा' इति मुष्टिग्राह्यं सुष्ठु—शोभनं मध्यं—मध्यभागो यासां ता मुष्टिग्राह्यसुमध्याः 'आमेलग-जमलजुगलवट्टियअब्भुण्मयवीणरइयसंठियपओहराओ' पीनं—पीवरं रचितं संस्थितं—संस्थानं यकाभ्यां तौ पीनरचितसंस्थितौ आमेलक—आपीडः शेखरक इत्यर्थ तस्य यमलं—समश्रेणीकं युगलं तद्वत् वर्त्तितौ—बद्धस्वभावावुपचितकठिनभावाविति भावः अभ्युन्नतौ पीनरचितसंस्थितौ च पयोधरौ यासां तास्तथा।

'ईसिं असोगवरपायवसमुट्ठियाओ' इति ईषत्—मनाक् अशोकवरपादपे समवस्थिता—आश्रिता ईषदशोकवरपादपसमवस्थिताः, तथा वामहस्तेन गृहीतमग्रं शालायाः शाखाया अर्थाद-शोकपापस्य यकाभिस्ता वामहस्तगृहीताग्रशालाः, 'ईसिंअड्डऽच्छिकडक्खचिट्ठिएहिं लूसेमाणीओ विवे'ति ईषत्—मनाग् 'अड्डं' तिर्यग्वलितम् अक्षि येषु कटाक्षरूपेषु चेष्टितेषु तैर्मुष्णन्त्य इव सुरजनानां मनंसि 'चक्खुल्लोयणलेसेहि य अन्नन्नं विज्झेमाणीओ इव' अन्नमन्नं—परस्परं चक्षुषां लोकनेन—अवलोकनेन लेशाः—संश्लेषास्तैर्विध्यमाना इव, किमुक्तं भवति?—एवं नाम तास्तिर्यग्व-लिताक्षिकटाक्षैः परस्परमवलोकमाना अवतिष्ठन्ते यथा नूनं परस्परसौभाग्यासहनतस्तिर्यग्वलि-ताक्षिकटाक्षैः परस्परं खिद्यन्त इवेति 'पुढविपरिणामाओ' इति पृथिवीपरिणामरूपाः शाश्वत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावमुपागता विजयद्वारवत् ।

'चंदाननाओ' इति चन्द्रवद् आननं—मुखं यासां ताश्चन्द्रानना: 'चंदविलासिणीओ' इति चन्द्रवन्मनोहरं विलसन्तीत्येवंशीलाश्चन्द्रविलासिन्य: 'चंदद्धसमनिडालाओ' इति चन्द्रार्द्धेन—अष्टमीचन्द्रेण समं—समानं ललाटं यासां ताश्चन्द्रार्द्धसमललाटा: 'चंदाहियसोमदंसणाओ' इति चन्द्रादप्यधिकं सोमं—सुभगं कान्तिमद्दर्शनं—आकारो यासां तास्तथा, उल्का इव द्योतमाना: 'विज्जुघणमरीचिसूरदिप्पंततेयअहिययरसन्निकासाओ' इति विद्युतो ये घना—बहुलतरा मरीचय-स्तेभ्यो यच्च सूर्यस्य दीप्यमानमनावृतं तेजस्तस्मादप्यधिकतर: सन्निकाश:—प्रकाशो यासां तास्तथा 'सिंगारागारचारुवेसाओ' इति श्रृङ्गारो—मण्डनभूषणाटोपस्तत्प्रधान आकार—आकृतिर्यासां ता: श्रृङ्गाराकारा: चारु वेषो—नेपथ्यं यासां ताश्चारुवेषास्तत: कर्म्मधारये श्रृङ्गाराकारचारुवेषा: 'पासाईयाओ' इत्यादि विशेषणचतुष्टयं प्राग्वत् ।

'विजयस्स णं दारस्से'त्यादि, विजयस्य द्वारस्य उभयो: पार्श्वयोरेकैकनैषेधिकीभावेन 'द्विघातो' द्विप्रकारायां नैषेधिक्यां द्वौ द्वौ जालकटकौ प्रज्ञप्तौ, 'ते णं जालकडगा' इत्यादि, ते च जालकटकाकीर्णा रम्यसंस्थाना— प्रदेशविशेषा: 'सव्वरयणामया अच्छा सण्हा जाव पडिरूवा' इति प्राग्वत् ।। 'विजयस्से'त्यादि, विजयस्य द्वारस्योभयो: पार्श्वयोर्द्विघातो नैषेधिक्यां द्वे द्वे घण्टे प्रज्ञप्ते, तासां च घण्टानामयमेतद्रूप: 'वर्णावास:' वर्णकनिवेश: प्रज्ञप्त:, तद्यथा—जाम्बूनदमय्यो घण्टा: वज्रमय्यो लाला: नानामणिमया घण्टापार्श्वा: तपनीयमय्य: श्रृङ्खला यासु ता अवलम्बि-तास्तिष्ठन्ति रजतमय्यो रज्जव: ।

'ताओ णं घंटाओ' इत्यादि, ताश्च घण्टा: 'ओघस्वरा:' ओघेन—प्रवाहेण स्वरो यासां ता ओघस्वरा:, मेघस्येवातिदीर्घ: स्वरो यासां ता मेघस्वरा:, हंसस्येव मधुर: स्वरो यासां ता हंसस्वरा:, एवं क्रोञ्चस्वरा:, सिंहस्येव प्रभूतदेशव्यापी स्वरो यासां ता: सिंहस्वरा:, एवं दुन्दुभिस्वरा नन्दिस्वरा:, द्वादशतूर्यसङ्घातो नन्दि:, नन्दिवद् घोषो निनादो यासां ता नन्दिघोषा:, मञ्जु:—प्रिय: स्वरो यासां ता मञ्जुस्वरा:, एवं मञ्जुघोषा:, किं बहुना ?, सुस्वरा: सुस्वरघोषा:, 'ओरालेण'मित्यादि प्राग्वत्

'विजयस्स ण'मित्यादि, विजयस्य द्वारस्योभयो: पाश्वयोर्द्विघातो नैषेधिक्यां द्वे द्वे वनमाले प्रज्ञप्ते, ताश्च वनमाला नानाद्रुमाणां नानालतानां च ये किशलयरूपा अतिकोमला इत्यर्थ: पल्लवास्तै: समाकुला:—सम्मिश्रा: 'छप्पयपरिभुज्जमाणसोमंतसस्सिरीया' इति षट्पदै: परिभुज्यमाना सती शोभमाना षट्पदपरिभुज्यमानशोभमाना अत एव सश्रीका तत: पूर्वपदेन विशेषणसमास:, 'पासाईया' इत्यादि पदचतुष्टयं प्राग्वत् ।।

मू. (१६८) *विजयस्स णं दारस्स उभओ पासिं दुहतो निसीहियाए दो दो पगंठगा पण्णत्ता, ते णं पगंठगा चत्तारि जोयणाइं आयामविक्खंभेणं दो जोयणाइं बाहल्लेणं सव्ववइरामता अच्छा जाव पडिरूवा । तेसि णं पयंठगाणं उवरिं पत्तेयं पत्तेयं पासायवडेंसगा प०, ते णं पासायवडिंसगा चत्तारि जोयणाइं उड्ढं उच्चत्तेणं दो जोयणाइं आयामविक्खंभेणं अब्भुग्गयमूसितपहसिताविव विविहमणिरयणभत्तिचित्ता वाउद्धुयविजयवेजयंतीपडागच्छत्तातिछत्तकलिया तुंगा गगनत-लमभिलंघमाण सिहरा जालंतररयणपंजरुम्मिलितव्व मणिकणगथूभियागा वियसियसयवत्तोंड-रीयतिलकरयणद्धयंदचित्ता नानामणिमयदामालंकिया अंतो य बाहिं च सण्हा तवणिज्जरुइल-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वालुयापत्थडगा सुह फासा सस्सिरीयरूवा पासातीया ४।

तेसि णं पासायवडेंसगाणं उल्लोया पउलता जाव सामलयाभत्तिचित्ता सव्वतणिज्जमता अच्छा जाव पडिरूवा ॥

तेसि णं पासायवडिंसगाणं पत्तेयं पत्तेयं अंतो बहुसमरमणिज्जे भूमिभागे पन्नत्ते, से जहानामए आलिंगपुक्खरेति वा जाव मणीहिं उवसोभिए, मणीण गंधो वण्णो फासो य नेयव्वो ॥

तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं मणिपेढियाओ पन्नत्ताओ, ताओ णं मणिपेढियाओ जोयणं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वरयणामईओ जाव पडिरूवाओ, तासि णं मणिपेढियाणं उवरिं पत्तेयं २ सीहासणे पन्नत्ते, तेसि णं सीहासणाणं अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा—

तवणिज्जमया चक्कवाला रयतामया सीहा सोवण्णिया पादा नानामणिमयाइं पायवीढगाइं जंबूणयमताइं गत्ताइं वतिरामया संधी नानामणिमए वेच्चे, ते णं सीहासणा ईहामियउसभ जाव पउमलयभत्तिचित्ता ससारसारोवइयविविहमणिरयणपायपीढा अच्छरगमिउमसूरगनवतयकुसंत-लिच्चसीहकेसरपच्चुत्थताभिरामा उयचियखोमदुगुल्लपडिच्छयणा सुविरचितरयत्ताणा रत्तंसुयसंवुया सुरम्मा आईनगरुयबूरणवनीततूलमउयफासा मउया पासाईया ४।

तेसि णं सीहासणाणं उप्पिं पत्तेयं पत्तेयं विजयदूसं पन्नत्ते, ते णं विजयदूसा सेता संखकुंददगरयअमतमहियफेणपुंजसन्निकासा सव्वरयणामया अच्छा जाव पडिरूवा ॥

तेसि णं विजयदूसाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं वइरामया अंकुसा पन्नत्ता, तेसु णं वइरामएसु अंकुसेसु पत्तेयं २ कुंभिक्का मुत्तादामा पन्नत्ता, ते णं कुंभिक्का मुत्तादामा अन्नेहिं चउहिं चउहिं तदद्धुच्चप्पमाणमेत्तेहिं अद्धकुंभिक्केहिं मुत्तादामेहिं सव्वतो समंता संपरिक्खित्ता, ते णं दामा तवणिज्जलंबूसका सुवण्णपयरगमंडिता जाव चिट्ठंति, तेसि णं पासायवडिंसगाणं उप्पिं बहवे अट्ठट्ठमंगलगा पन्नत्ता सोत्थिय तधेव जाव छत्ता ॥

वृ. 'विजयस्स ण'मित्यादि, विजयस्य द्वारस्योभयोः पार्श्वयोर्द्विधातो नैषेधिक्यां द्वौ द्वौ प्रकण्ठकौ प्रज्ञप्तौ, प्रकण्ठको नाम पीठविशेषः, आह च मूलटीकाकारः—"प्रकण्ठौ पीठविशेषौ," चूर्णिकारस्त्वेवमाह—"आदर्शवृत्तौ पर्यन्तावनतप्रदेशौ पीठौ प्रकण्टावि"ति, ते च प्रकण्ठकाः प्रत्येकं चत्वारि योजनानि 'आयामविष्कम्भेन' आयामविष्कम्भाभ्यां द्वे योजने बाहल्येन 'सव्व-वइरामया' इति सर्वात्मना ते प्रकण्ठका वज्रमयाः 'अच्छा सण्हा य' इत्यादि विशेषणकदम्बकं प्राग्वत्।

'तेसि णं पकंठयाण'मित्यादि, तेषां च प्रकण्ठकानामुपरि प्रत्येकं प्रासादावतंसकः प्रज्ञप्तः, प्रासादावतंसको नाम प्रासादविशेषः, उक्तं च मूलटीकायां—"प्रासादावतंसकः प्रासादविशेष" इति, व्युत्पत्तिश्चैवम्—प्रासादानामवतंसक इव—शेखरक इव प्रासादावतंसकः, ते च प्रासादावत-संकाः प्रत्येकं चत्वारि योजनान्यूर्द्धमुच्चैस्त्वेन द्वे योजने आयामविष्कम्भाभ्याम्, 'अब्भुग्गय-मूसियपहसियाविवे'ति अभियुद्गता—आभिमुख्येन सर्वतो विनिर्गता उत्सृता—प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा तया सिता इव—बद्धा इव तिष्ठन्तीति गम्यते, अन्यथा कथमिव तेऽत्युच्चा निरालम्बास्तिष्ठन्तीति भावः, अथवा प्रबलश्वेतप्रभापटलया प्रहसिताविव प्रकर्षेण हसिताविव

तथा 'विविहमणिरयणभत्तिचित्ता' विविधा अनेकप्रकारा ये मणयः—चन्द्रकान्ताद्या यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च रत्नानि—कर्केतनादीनि येषां भक्तिभि—विच्छित्तिभिश्चित्रा—नानारूपा आश्चर्यवन्तो वा नानाविध-मणिरत्नभक्तिविचित्राः 'वाउद्धुयविजयवेजयंतीपडागछत्तातिछत्तकलिया' वातोद्धूता—वायु-कम्पिता विजयः अभ्युदयस्तत्संसूचिका वैजयन्तीनामानो (नाम्न्यो) याः पताकाः, अथवा विजया इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः पताकास्ता एव विजयवर्जिता वैजयन्त्यः, छत्रातिछत्राणि—उपर्युपरिस्थितान्यातपत्राणि तैः कलिता वातोद्धूतविजयवैयन्तीपताकाछत्रातिच्छत्रकलिताः 'तुङ्गाः' उच्चा उच्चैस्त्वेन चतुर्योजनप्रमाणत्वात्

अत एव 'गगनतलमणुलिहन्तसिहरा' इति, गगनतलम्—अम्बरम् अनुलिखन्ति—अभिलङ्घयन्ति शिखराणि येषां ते गगनतलानुलिखच्छिखराः, तथा जालानि—जालकानि यानि भवनभित्तिषु लोके प्रतीतानि तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि येषु ते जालान्तररत्नाः, सूत्रे चात्र विभक्तिलोपः प्राकृतत्वात्, तथा पञ्जराद् उन्मीलिता इव—बहिष्कृता इव, यथा हि किल किमपि वस्तु वशादिमयप्रच्छादनविशेषाद् बहिष्कृतमत्यन्तविनष्टच्छायं भवति एवं तेऽपि प्रासादावतंसका इति भावः, तथा मणिकनकानि—मणिकनकमय्यः स्तूपिकाः—शिखराणि येषां ते मणिकनकस्तूपिकाः, तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादौ प्रतिकृतित्वेन स्थितानि तिलकरत्नानि भित्यादिषु पुण्ड्रविशेषा अर्द्धचन्द्राश्च द्वारादिषु तैश्चित्रा—नानारूपा आश्चर्यभूता विकसितशतपत्रपुण्डरीकतिलकार्द्धचन्द्रचित्राः अन्तर्बहिश्च 'श्लक्ष्णाः' मसृणाः, तथा तपनीयंसुवर्ण विशेष स्तन्मय्या वालुकायाः प्रस्तटं—प्रतरो येषु ते तपनीयवालुकाप्रस्तटाः 'सुहफासा सस्सिरीयरूवा पासाईया' इत्यादि प्राग्वत्। 'तेसि ण'मित्यादि, तेषां च प्रासादावतंस-कानाम् 'उल्लोकाः' उपरितनभागाः पद्मलता-भक्तिचित्रा अशोकलताभक्तिचित्राश्चम्पकलता-भक्तिचित्राश्चूतलताभक्तिचित्रा वनलता- भक्तिचित्रा वासन्तिकलताभक्तिचित्राः सर्वात्मना तपनीयमयाः 'अच्छा जाव पडिरूवा' इति विशेषणकदम्बकं प्राग्वत् 'तेसि ण'मित्यादि, तेषां प्रासादावतंसकानामन्तर्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, 'से जहा नामए आलिंगपुक्खरे इ वा' इत्यादि समस्तं भूमिवर्णनं मणीनां वर्णपञ्चकसुर- भिगन्धशुभस्पर्शवर्णनं प्राग्वत्।

'तेसि ण'मित्यादि, तेषां प्रासादावतंसकानामन्तर्बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं सिंहासनं प्रज्ञप्तं, तेषां च सिंहासनानामयमेतद्रूपो 'वर्णावासो' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा—रजतमयाः सिंहा तैरुपशोभितानि सिंहासनानि 'सौवर्णिकाः' सुवर्णमयाः पादाः तपनीयमयानि चक्कलानि—पादानामधःप्रदेशाः भवन्ति [मुक्तानानामणिमयानि पादानामधःप्रदेशाः] प्रयुक्ता, नानामणिमयानि 'पादशीर्षकाणि' पादानामुपरितना अवयवविशेषा जाम्बूनदमयानि गात्राणि ईषदच्छाः 'वज्रमयाः' वज्ररत्नापूरिताः 'सन्धयः' गात्राणां सन्धिमेला नानामणिमयं 'वेच्चं' वयूतं वानमित्यर्थ, आह च चूर्णिकृत—

''वेच्चे वाणक्कतेण''मित्यादि, तानि च सिंहासनानि ईहामृगऋषभतुरगनरमकरव्यालकिन्नर-रुरुसरभचमरकुञ्जरवनलतापद्मलताभक्तिचित्राणि 'ससारसारोवचियविविहमणिरयमपादपीढा' इति, सारसारैः—प्रधानप्रधानैर्विविधैर्मणिरत्नैरुपचितैः पादीठैः सह यानि तानि तथा, प्राकृतत्वाच्च उपचितशब्दस्यान्तरुपन्यासः, 'अच्छरमउयमसूरगनवतयकुसन्तलित्तकेसरपच्चत्थुयाभिरामा' इति, आस्तरक—आच्छादनं मृदु येषां मसूरकाणां तानि आस्तरकमृदूनि, विशेषणस्य परनिपातः

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

प्राकृतत्वात्, नवा त्वग् येषां ते नवत्वचः कुशान्ता–दर्भपर्यन्ताः, नवत्वचश्च ते कुशान्ताश्च नवत्वक्कुशान्ताः प्रत्यग्रत्वगदर्भपर्यन्तरूपाणि त्वतिकोमलानि लित्तानि–नम्र(मन)शीलानि च केसराणि, क्वचित् सिंहकेसरेति पाठस्तत्र सिंहकेसराणीव केसराणि मध्ये मसूरकाणां तानि नवत्वकुशान्तचिल्लकेसराणि, सिंहकेसरेति पाठपक्षे एकस्य केसरशब्दस्य शाकपार्थिवादिदर्शनाल्लोपः, आस्तरकमृदुभिर्मसूरकैर्नवत्वक्कुशान्तलिद्ध(त्त)केसरैः प्रत्यवस्तृतानि–आच्छादितानि सन्ति यानि अभिरामाणि तानि तथा, विशेषणपूर्वापरनिपातो याद्दच्छिकः प्राकृतत्वात्।

'आईणगरुयबूरनवणीयतलफासा' इति आजिनकंचर्म्ममयं वस्त्रं तच्च स्वभावादतिकोमलं वति रूतं–कर्पासपक्ष्म बूरो–वनस्पतिवशेषः नवनीतं–म्रक्षणं तूलं–अर्कतूलं तेषामिव स्पर्शो येषां तानि तथा, तथा सुविरचितं रजस्त्राणं प्रत्येकमुपरि येषां तानि सुविरचितरजस्त्रणानि 'उवचिय-(खोम)दुगुल्लपट्टपडिच्छायणे' इति उपचितं–परिकर्म्मितं यत्क्षौमं दुकूलं–कार्पासिकं वस्त्र तत्प्रतिच्छादनं–रजस्त्राणस्योपरि द्वितीयमाच्छादनं प्रत्येकं येषां तानि तथा, तत उपरि 'रत्तंसुयसंवुया' इति रक्तांशुकेन–अतिरमणीयेन रक्तेन वस्त्रण संवृतानि–आच्छादितानि रक्तांशुकसंवृतानि अत एव सुरम्याणि 'पासाइया' इत्यादि पदचतुष्टयं प्राग्वत्।

'तेसि णं'मित्यादि, तेषां च सिंहासनानामुपरि प्रत्येकं प्रत्येकं विजयदूष्यं–वस्त्रविशेषः प्रज्ञप्तः, आह च मूलटीकाकारः–"विजयदूष्यं वस्त्रविशेष" इति। 'ते णं'मित्यादि, तानि च विजयदूष्याणि 'शङ्खकुन्ददकरजोऽमृतमथितफेनपुञ्जसन्निकाशानि' शङ्खःप्रतीतः कुन्देति–कुन्दकुसुमं दकरजः–उदककणाः अमृतस्य–क्षीरोदधिजलस्य मथितस्य यः फेनपुञ्जो–डिण्डीरोत्करस्तत्सन्निकाशानि–तत्समप्रमाणि, पुनः कथम्भूतानि? इत्यत आह–'सव्वरयणामया' सर्वात्मना रत्नमयानि 'अच्छा सण्हा जाव पडिरूवा' इति विशेषणकदम्बकं प्राग्वत्।

'तेसि णं'मित्यादि, तेषां–सिंहासनोपरस्थितानां विजयदूष्याणां प्रत्येकं प्रत्येकं बहुमध्यदेशभागे वज्रमयाः वज्ररत्नात्मकाः 'अङ्कुशाः' अङ्कुशाकारा मुक्तादामावलम्बनाश्रयभूताः प्रज्ञप्ताः, तेषु च वज्रमयेष्वङ्कुशेषु प्रत्येकं प्रत्येकं 'कुम्भाग्रं' मगधदेशप्रसिद्धं कुम्भप्रमाणमुक्तामयं मुक्तादाम प्रज्ञप्तं, तानि च कुम्भाग्राणि मुक्तादामानि प्रत्येकं प्रत्येकमन्यैश्चतुर्भि कुम्भाग्रैर्मुक्तादामभिस्तदर्धोच्चप्रमाणमात्रैः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तानि।

'ते णं दामा तवणिज्जलंबूसगा नानामणिरयणविविहहारद्धहारउवसोभियसमुदाया ईसिमन्नमन्नमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं मंदायं एइज्जमाणा २ वेइज्जमाणा २ पकंपमाणा पकंपमाणं पझंझमाणा पझंझमाणा ओरालेणं मणुण्णेणं मनहरेणं कण्णमणनिव्वुइकरेणं ते पएसे सव्वतो समंता आपूरेमाणा सिरीए उवसोभमोणा चिट्ठंति' ॥

मू. (१६९) *विजयस्स णं दारस्स उभओ पासिं दुहओ णिसीहियाए दो दो तोरणा पन्नत्ता, ते णं तोरणा नानामणिमया तहेव जाव अट्ठट्ठमंगलका य छत्तातिछत्ता ॥ तेसि णं तोरणाणं पुरतो दो दो सालभंजिताओ पन्नत्ताओ, जहेव णं हेट्ठा तहेव।*

तेसि णं तोरणाणं पुरतो दो दो नागदंतगा पन्नत्ता, तेणं नागदंतगा मुत्ताजालंतरूसिया तहेव, तेसु णं नागदंतएसु बहवे किण्हे सुत्तवट्टवग्घारितमल्लदामकलावा जाव चिट्ठंति।

तेसि णं तोरणाणं पुरतो दो दो हयसंघाडगा पन्नत्ता सव्वरयणामया अच्छा जाव पडिरूवा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं पंतीओ वीहीओ मिहुणगा, दो दो पउमलयाओ जाव पडिरूवाओ तेसि णं तोरणाणं पुरतो (अक्खाअसोवत्थिया सव्वरयणामया अच्छा जाव पडिरूवा) तेसि णं तोरणाणं पुरतो दो दो चंदनकलसा पन्नत्ता, ते णं चंदनकलसा वरकमलपइट्ठाणा तहेव सव्वरयणामया जाव पडिरूवा समणाउसो!। तेसि णं तोरणाणं पुरओ दो दो भिंगारगा प० वरकमलपइट्ठाणा जाव सव्वरयणामया अच्छा जाव पडिरूवा महता२ मत्तगयमुहागितिसमाणा प० समणाउसो!।

तेसि णं तोरणाणं पुरतो दो दो आतंसगा पन्नत्ता, तेसि णं आतंसगाणं अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा–तवणिज्ञमा पयंठगा वेरुलियमया छरुहा (थंभया) वइरामया वरंगा नानामणिणा वलक्खा अंकमया मंडला अणोघसियनिम्मलासाए छायाए सव्वतो चेव सगणुबद्धा चंदमंडलपडिणिकासा महतामहता अद्धकायसमाणा पन्नत्ता समणाउसो!।

तेसि णं तोरणाणं पुरतो दो दो वइरनाभे थाले पन्नत्ते, ते णं थाला अच्छतिच्छडिय-सालितंदुलनहसंदट्ठबहुपडिपुण्णा चेव चिट्ठति सव्वजंबूणतामता अच्छा जाव पडिरूवा महतामहता रहचक्कसमाणा समणाउसो!।

तेसि णं तोरणाणं पुरतो दो दो पातीओ पन्नत्ताओ, ताओ णं पातीओ अच्छोदयपडिहत्थाओ नानाविधपंचवण्णस्स फलहरितगस्स बहुपडिपुन्नाओ विव चिट्ठंति सव्वरयणामतीओ जाव पडिरूवाओ महयामहया गोकलिंजगचक्कसमाणाओ पन्नत्ताओ समणाउसो!।

तेसि णं तोरणाणं पुरतो दो जो सुपतिट्ठगा पन्नत्ता, ते णं सुपतिट्ठगा नानाविध(पंचवण्ण)-पसाहणगभंडविरचिया सव्वोसधिपडिपुण्णा सव्वरयणामया अच्छा जाव पडिरूवा ।। तेसि णं तोरणाणं पुरतो दो दो मनोगुलियाओ पन्नत्ताओ।

–तासु णं मनोगुलियासु बहवे सुवण्णरुप्पामया फलगा पन्नत्ता, तेसु णं सुवण्णरुप्पामएसु फलएसु बहवे वइरामया नागदंतगा मुत्ताजालंतरुसिता हेम जाव गयंदगसमाणा पन्नत्ता, तेसु णं वइरामएसु नागदंतएसु बहवे रययामया सिक्कया पन्नत्ता, तेसु णं रययामएसु सिक्कएसु बहवे वायकरगा पण्णत्ता। ते णं वायकरगा किण्हसुत्तसिक्कगवत्थिया जाव सुक्कलसुत्तसिक्कगवत्थिया सव्वे वेरुलियामया अच्छा जाव पडिरूवा।

तेसि णं तोरणाण पुरओ दो दो चित्ता रयणकरंडगा पन्नत्ता, से जहानामए–रन्नो चाउरंतचक्कवट्टिस्स चित्ते रयणकरंडे वेरुलियमणिफालियपडलपच्चोयडे साए पभाए ते पदेसे सव्वतो समंता ओभासइ उज्ञोवेति तावेइ पभासेति, एवामेव ते चित्तरयणकरंडगा पन्नत्ता वेरुलियपडलपच्चोयडा साए पभाए ते पदेसे सव्वतो समंता ओभासेति।

तेसि णं तोरणाणं पुरतो दो दो हयकंठगा जाव दो दो उसभकंठगा पन्नत्ता सव्वरयणामया अच्छा जाव पडिरूवा ।। तेसु णं हयकंठएसु जाव उसभकंठएसु दो दो पुप्फचंगेरीओ, एवं मल्लगंधचुण्णवत्थाभरणचंगेरीओ सिद्धत्थचंगेरीओ लोमहत्थचंगेरीओ सव्वरयणामतीओ अच्छाओ जाव पडिरूवाओ।

तेसि णं तोरणाणं पुरतो दो दो पुप्फपडलाइं जाव लोमहत्थपडलाइं सव्वरयणामयाइं जाव पडिरूवाइं ।। तेसि णं तोरणाणं पुरतो दो दो सीहासणाइं पन्नत्ताइं, तेसि णं सीहासणाणं अयमेयारूवे वण्णावासे प० तहेव जाव पासातीया ४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसि णं तोरणाणं पुरतो दो दो रुप्पछदाछत्ता पन्नत्ता, ते णं छत्ता वेरुलियभिसंतविमलदंडा जंबूणयकन्निकावइरसंधी मुत्ताजालपरिगता अट्ठसहस्सवरकंचणसलागा दद्दरमलयसुगंधी सव्वोउअसुरभिसीयलच्छाया मंगलभत्तिचित्ता चंदागारोवमा वट्टा ॥

तेसि णं तोरणाणं पुरतो दो दो चामराओ पन्नत्ताओ, ताओ णं चामराओ (चन्दप्पभवइरवेरुलियनानामणिरयणखचियदंडा) नानामणिकणगरयणविमलमहरिहतवणिज्जुज्जलविचित्तदंडाओ चिल्लिआओ संखंककुंददगरयअमयमहियफेणपुंजसण्णिकासाओ सुहुमरयतदीहवालाओ सव्वरयणामताओ अच्छाओ जाव पडिरूवाओ। तेसि णं तोरणाणं पुरतो दो दो तिल्लसमुग्गा कोट्ठसमुग्गा पत्तसमुग्गा चोयसमुग्गा तयरसमुग्गा एलासमुग्गा हरियालसमुग्गा हिंगुलयसमुग्गा मणोसिलासमुग्गा अंजणसमुग्गा सव्वरयणामया अच्छा जाव पडिरूवा ॥

वृ. 'विजयस्स ण'मित्यादि, विजयस्य द्वारस्योभयोः पार्श्वयोर्द्विधातो नैषेधिक्यां द्वे द्वे तोरणे प्रज्ञप्ते, तानि च तोरणानि नानामणिमयानीत्यादि तोरणवर्णनं निरवशेषं प्राग्वत् ।। 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे शालभञ्जिके प्रज्ञप्ते, शालभञ्जिकावर्णनं प्राग्वत् ।

'तेसि ण'मित्यादि, तेषां तोरणानां द्वौ द्वौ नागदन्तकौ प्रज्ञप्तौ, तेषां च नागदन्तकानां वर्णनं यथाऽधस्तादनन्तरमुक्तं तथा वक्तव्यं, नवरमत्रोपरि नागदन्तका न वक्तव्या अभावात् 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वौ हयसंघाटकौ द्वौ द्वौ गजसङ्घाटकौ द्वौ द्वौ नरसङ्घाटकौ द्वौ द्वौ किन्नरसङ्घाटकौ द्वौ द्वौ किंपुरुषसङ्घाटकौ द्वौ द्वौ महोरगसङ्घाटकौ द्वौ द्वौ गन्धर्वसङ्घाटकौ द्वौ द्वौ वृषभसङ्घाटकौ, एते च कथम्भूताः ? इत्याह—'सव्वरयणामया अच्छा सण्हा' इत्यादि प्राग्वत्, एवं पङ्क्तिवीथीमिथुनकान्यपि प्रत्येकं वाच्यानि ।

'तेसिं तोरणाण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे पद्मलते यावत्करणाद् द्वे द्वे नागलते द्वे द्वे अशोकलते द्वे द्वे चम्पकलते द्वे द्वे चूतलते द्वे द्वे वासन्तीलते द्वे द्वे कुन्दलते द्वे द्वे अतिमुक्तकलते इति परिग्रहः, द्वे द्वे श्यामलते, एताश्च कथम्भूताः ? इत्याह—'निच्चं सुकुमियाओ' इत्यादि यावत्करणात् 'निच्चं मउलिया निच्चं लवइयाओ निच्चं थइयाओ निच्चं गोच्छियाओ निच्चं जमलियाओ निच्चं विणमिया निच्चं सुविभत्तपडिमंजरिवडंसगधरीओ निच्चं कुसुमियमउलियलवइयथवइयनिच्चंगोच्छियविणमियपणमियसुविभत्तपडिमंजरिवडंसगधरीओ' इति परिगृह्यते, अस्य व्याख्यानं प्राग्वत् । पुनः कथम्भूताः ? इत्याह—'सव्वरयणामया जाव पडिरूवा' इति, अत्रापि यावत्करणात् 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकपरिग्रहः स च प्राग्वद्भावनीयः

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वौ चन्दनकलशौ प्रज्ञप्तौ, वर्णकश्च चन्दनकलशानां 'वरकमलपइट्ठाणा' इत्यादिरूपः सर्व प्राक्तनो वक्तव्यः ।। 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौद्वौ भृङ्गारकौ प्रज्ञप्तौ, तेषामपि चन्दनकलशानामिव वर्णको वक्तव्यः, नवरं पर्यन्ते 'मत्तगयमहामुहागिइसमाणा पन्नता समणाउओइति वक्तव्यं 'मत्तगयमहा-मुहागिइसमाणा' इति मत्तो यो गजस्तस्य महद्—अतिविशालं यन्मुकं तस्याकृति—आकार- स्तत्समानाः—तत्सदृशाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वावादर्शकौ प्रज्ञप्तौ, तेषां चादर्शकानामयमेतद्रूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा—तपनीयमयाः 'प्रकण्ठकाः' पीठकविशेषाः 'वैडूर्यम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

याथंमया' आदर्शकगण्डप्रतिबन्धप्रदेशाः, आदर्शकगण्डानां मुष्टिग्रहणयोग्याः प्रदेशा इति भावः, वज्ररत्नमया वरङ्गा गण्डा इत्यर्थः, 'नानामणिमया वलक्षाः' वलक्षणो नाम श्रृङ्खलादिरूपमवलम्बनम्, अङ्कमयानि–अङ्करत्नमयानि मण्डलानि यत्र प्रतिबिम्बसंभूति 'अणोहसियणिम्मला छायाए' इति, अवघर्षणमवघर्षितं, भावे क्तप्रत्ययः, भूत्यादिना निमज्जनमित्यर्थः, अवघर्षितस्याभावोऽनवघर्षितं तेन निर्म्मला अनवघर्षितनिर्म्मला तया छायया समनुबद्धाः 'चंदमंडलपडिनिकासा' इति चन्द्रमण्डलसदृशाः 'महयामहया' अतिशयेन महान्तः 'अर्द्धकायसमानाः' द्रष्टुः शरीरार्द्धप्रमाणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! । 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे वज्रनामे स्थाले प्रज्ञप्ते, तानि च स्थालानि तिष्ठन्ति] 'अच्छतिच्छडियसालितंदुलनहसंदट्ठपडिपुण्णा इव चिट्ठंति' अच्छा–निर्म्मलाः शुद्धस्फटिकवत्रिच्छटिता अत एव नखसंदष्टः–नखाः संदष्टा मुसलादिभिश्चुम्बिता येषां ते तथा, भार्यादिदर्शनात्परनिपातो निष्ठान्तस्य, अच्छैस्त्रिच्छटितैः शालितन्दुलैर्नखसंदष्टैः परिपूर्णानीव अच्छत्रिच्छटितशालितन्दुलनखसंदष्टपरिपूर्णानीव पृथिवीपरिमाणरूपाणि तानि तथा स्थितानि केवलमेवमाकाराणीत्युपमा, तथा चाह– 'सव्वजंबूनदमया' सर्वात्मना जम्बूनदमयानि 'अच्छा सण्हा' इत्यादि प्राग्वत् 'महयामहया' इत अतिशयेन महान्ति रथचक्रसमानानि प्रज्ञप्तानि हे श्रमण ! हे आयुष्मन् ! ।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे 'पाईओ' इति पात्र्यौ प्रज्ञप्ते, ताश्च पात्र्यः 'अच्छोदकपडिहत्थाओ' इति स्वच्छपानीयपरिपूर्णाः 'नानाविहस्स फलहरियस्स बहुपडिपुण्णाओ विवे'ति अत्र षष्ठी तृतीयार्थे बहुवचन चैकवचनंप्राकतत्वात्, नानाविधैः 'फलहरितैः' हरितफलैर्बहु–प्रभूतं प्रतिपूर्णा इव तिष्ठन्ति, न खलु तानि फलानि जलं वा किन्तु तथारूपाः शाश्वतभावमुपगताः पृथिवीपरिणामास्तत उपमानमिति, 'सव्वरयणामईओ' इत्यादि प्राग्वत्, 'महयामहया' इति अतिशयेन महत्यो गोकलिञ्ज चक्रसमानाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वौ सुप्रतिष्ठकौ आधारविशेषौ प्रज्ञप्तौ, ते च सुप्रतिष्ठकाः सुसर्वौषधिप्रतिपूर्णा नानाविधैः पञ्चवर्णैः प्रसाधनामाण्डैश्च बहुपरिपूर्णा इव तिष्ठन्ति, अत्रापि तृतीयार्थे षष्ठी बहुवचने चैकवचनं प्राकृतत्वात्, उपमानभावना प्राग्वत्, 'सव्वरयणामया' इत्यादि तथैव ।। 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे मनोगुलिके प्रज्ञप्ते, मनोगुलिका नाम पीठिका, उक्तं च मुलटीकायां– ''मनोगुलिका पीठिके''ति, ताश्च मनोगुलिकाः सर्वात्मना 'वैडूर्यमय्यो' वैडूर्यरत्नात्मिकाः 'अच्छा' इत्यादि प्राग्वत् ।

'तासु णं मनोगुलियासु बहवे' इत्यादि, तासु मनोगुलिकासु बहूनि स्वर्णमयानि रूप्यमयानि च फलकानि प्रज्ञप्तानि, तेषु सुवर्णरूप्यमयेषु फलकेषु बहवो वज्रमयाः 'नागदन्तकाः' अङ्कुटकाः प्रज्ञप्ताः, तेषु नागदन्तकेषु बहूनि 'रजतमयानि' रूप्यमयानि सिक्ककानि प्रज्ञप्तानि, तेषु च रजतमयेषु सिक्ककेषु बहवो 'वातकरकाः' जलशून्याः करका इत्यर्थ प्रज्ञप्ताः ।। 'ते ण'मित्यादि ते वातकरकाः 'कृष्णसूत्रसिक्कगवस्थिताः' इति, आच्छादनं गवस्थाः (ताः) संजाता एष्विति गवस्थिताः कृष्णसूत्रैः– कृष्णसूत्रमयैर्गवस्थैरिति गम्यते, सिक्ककेषु गवस्थिताः कृष्णसूत्रसिक्कगवस्थिताः, एवं नीलसूत्रसिक्ककगवस्थिता इत्याद्यपि भावनीयं, ते च वातकरकाः सर्वात्मना वैडूर्यमया अच्छा इत्यादि प्राग्वत् ।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वौ 'चित्रौ' चित्रवर्णोपेतावाश्चर्यभूतौ वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रत्नकरण्डकौ प्रज्ञप्तौ, 'से जहा नामए' इत्यादि, स यथा नाम—राज्ञश्चतुरन्तचक्रवर्त्तिनः, चतुर्षु—पूर्वापरदक्षिणोत्तररूपेषु पृथ्वीपर्यन्तेषु चक्रेण वर्त्तितुं शीलं यस्य तस्य 'चित्रः' आश्चर्यभूतो नानामणिमयत्वेन नानावर्णो वा 'वेरुलियमणिकालियपडलपच्चोयडे' इति बाहुल्येन वैडूर्यमणिमयः, तथा 'स्फाटिकपटलप्रयवतटः' स्फाटिकपटलमयाच्छादनः 'साय पभाए' इति स्वकीयया प्रभया 'तान्' प्रत्यासन्नान् प्रदेशान् 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येनावभासयति, एतदेव पर्यायत्रयेण व्याचष्टे—उद्द्योतयति तापयति प्रभासि, 'एवमेवे'त्यादि सुगमम्।

'तेसि णं तोरणाण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वौ 'हयकण्ठौ' हयकण्ठप्रमाणौ रत्नविशेषौ,'' एवं सर्वेऽपि कण्ठावाच्या इति, तथा चाह 'सव्वरयणामया' सर्वे 'रत्नमयाः' रत्नविशेषरूपा 'अच्छा' इत्यादि प्राग्वत्॥ 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे पुष्पचङ्गेर्यौ प्रज्ञप्ती, एवं माल्यचूर्णगन्धवस्त्रभरणसिद्धार्थकलोमहस्तकचङ्गेर्योऽपि वक्तव्याः, एताश्च सर्वा अपि सर्वात्मना रत्नमय्यः, 'अच्छा' इत्यादि प्राग्वत्। एवं पुष्पादीनामष्टानां पटलकान्यपि द्विद्विसङ्ख्याकानि वाच्यानि। 'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे सिंहासने प्रज्ञप्ते, तेषां च सिंहासनानां वर्णकः प्रागुक्तो निरवशेषो वक्तव्यो यावद्दामवर्णनम्।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे 'रूप्यच्छदे' रूप्याच्छादने छत्रे प्रज्ञप्ते, तानि च छत्राणि वैडूर्यरत्नमयविमलदण्डानि जाम्बूनदकर्णिकानि 'वज्रसन्धीनि' वज्ररत्नापूरितदण्ड-शलाकासन्दीनि मुक्ताजालपरिगतानि अष्टौ सहस्राणि—अष्टसहस्रसङ्ख्याका वरकाञ्चनशलाका—वरकाञ्चनमय्यः शलाका येषु तानि अष्टसहस्रवरकञ्चनशलाकानि 'दद्दरमलयसुगन्धिसव्वोउय-सुरहिसीयलच्छाया' इति दर्दरः—चीवरावनद्धं कुण्डिकादिभाजनमुखं तेन गालितास्तत्र पक्वा वा ये मलय इति—मलयोद्भवं श्रीखण्डं तत्सम्बन्धिनः सुगन्धयो गन्धवासास्तद्वत्सर्वेषु ऋतुषु सुरभिः शीतला च छाया येषां तानि, तथा 'मंगलभत्तिचित्ता' तेषां अष्टानां मङ्गलानां भक्त्या—विच्छित्या चित्रं—आलेखो येषां तानि मङ्गलभक्तिचित्राणि, तथा 'चंदागारोवमा' इति चन्द्राकारः—चन्द्राकृति स उपमा येषां तानि तथा चन्द्रमण्डलवद्ध त्तानीति भावः।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वे द्वे चामरे प्रज्ञप्ते, तानि च चामरामि 'चंदप्पभवइ-रवेरुलियनाणामणिरयणखचियदंडा' इति चन्द्रप्रभः—चन्द्रकान्तो वज्रं वैडूर्यं च प्रतीतं चन्द्रप्रभवज्रवैडूर्याणि शेषाणि च नानामणिरत्नानि खचितानि येषु दण्डेषु ते तथा, एवंरूपाश्चित्रा—नानाकारा दण्डा येषां चामराणां तानि तथा, सूत्रे स्त्रत्वं प्राकृतत्वात्, तथा 'सुहुमरययदीहवालाओ' इति सूक्ष्मा रजतमया दीर्घा वाला येषां तानि तथा, 'संखंककुंददगरयअमयमहियफेणपुंजसंनि-कासाओ' इति शङ्खः—प्रतीतोऽङ्को—रत्नविशेषः कुन्देति—कुन्दपुष्पं दकरजः—उदककणाः अमृत-मथितफेनपुञ्जः—क्षीरोदजलमथनसमुत्थफेनपुञ्जस्तेषामिव संनिकाशः—प्रभा येषां तानि तथा, अच्छा इत्यादि प्राग्वत्।

'तेसि ण'मित्यादि, तेषां तोरणानां पुरतो द्वौ द्वौ 'तैलसमुद्गकौ' सुगन्धितैलाधारविशेषौ, उक्तं च जीवाभिगममूलटीकायां—''तैलसमुद्गकौ सुगन्धितैलाधारौ'' एवं कोष्ठादिसमुद्गका अपि वाच्याः, अत्र सङ्ग्रहणिगाथा—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ "तेल्लो कोट्ठसमुग्गा पत्ते चोए य तगर तला य।
हरियाले हिंगलए मनोसिला अंजणसमुग्गो ॥"

'सव्वरयणामया' इति एते सर्वेऽपि सर्वात्मना रत्नमयाः 'अच्छा सण्हा' इत्यादि प्राग्वत्

मू. (१७०) *विजये णं दारे अट्ठतचक्कद्धयाणं अट्ठसयं मिगद्धयाणं अट्ठसयं गरुडज्झयाणं अट्ठसयं विगद्धयाणं (अट्ठसयं रुरुयज्झयाणं) अट्ठसतं छत्तज्झयाणं अट्ठसयं पिच्छज्झयाणं अट्ठसयं सउणिज्झयाणं अट्ठसतं सीहज्झयाणं अट्ठसतं उसभज्झयाणं अट्ठसतं सेयाणं चउविसाणाणं नागवरकेतूणं एवामेव सपुव्वावरेणं विजयदारे य आसीयं केउसहस्सं भवतितित्ति मक्खायं।*

विजये णं दारे नव भोमा पन्नत्ता, तेसि णं भोमाणं अंतो बहुसमरमणिज्ञा भूमिभागा पन्नत्ता जाव मणीणं फासो, तेसि णं भोमाणं उप्पिं उल्लोया पउमलया जाव सामलताभत्तिचित्ता जाव सव्वतवणिज्रमता अच्छा जाव पडिरूवा।

तेसि णं भोमाणं बहुमज्झदेसभाए जे से पंचमे भोम्मे तस्स णं भोमस्स बहुमज्झदेसभाए एत्थ णं एगे महं सीहासणे प० सीहासणवण्णतो विजयदूसे जाव अंकुसे जाव दामा चिट्ठंति

तस्स णं सीहासणस्स अवरुत्तरेणं उत्तरेणं उत्तरपुरत्थिमेणं एत्थ णं विजयस्स देवस्स चउण्हं सामाणियसहस्साणं चत्तारि भद्दासणसाहस्सीओ प० तस्स णं सीहासणस्स पुरच्छिमेणं एत्थ णं विजयस्स देवस्स चउण्हं अग्गमहिसीणं सपरिवाराणं चत्तारि भद्दासणा प०।

तस्स णं सीहासणस्स दाहिणपुरत्थिमेणं एत्थ णं विजयस्स देवस्स अब्भिंतरियाए परिसाए अट्ठण्हं देवसाहस्सीणं अट्ठण्हं भद्दासणसाहस्सीओ पन्नत्ताओ।

तस्स णं सीहासणस्स दाहिणेणं विजयस्स देवस्स मज्झिमियाए परिसाए दसण्हं देवसाहस्सीणं दस भद्दासणसाहस्सीओ पन्नत्ताओ, तस्स णं सीहासणस्स दाहिणपच्चत्थिमेणं एत्थ णं विजयस्स देवस्स बाहिरियाए परिसाए बारसण्हं देवसाहस्सीणं बारस भद्दासणसाहस्सीओ प०॥

तस्स णं सीहासणस्स पच्चत्थिमेणं एत्थ णं विजयस्स देवस्स सत्तण्हं अनियाहिवतीणं सत्त भद्दासणा पन्नत्ता, तस्स णं सीहासणस्स पुरत्थिमेणं दाहिणेणं पच्चत्थिमेणं उत्तरेणं एत्थ णं विजयस्स देवस्स सोलस आयरक्खदेवसाहस्सीणं सोलस भद्दासणसाहस्सीओ प० तंजहा—

पुरत्थिमेणं चत्तारि साहस्सीओ, एवं चउसुवि जाव उत्तरेणं चत्तारि साहस्सीओ, अवसेसेसु भोमेसु पत्तेयं पत्तेयं भद्दासणा पन्नत्ता॥

वृ. 'विजये णं दारे' इत्यादि, तस्मिन् विजये द्वारे 'अष्टशतम्' अष्टाधिकं शतं 'चक्रध्वजानां' चक्रलेखरूपचिह्नोपेतानां ध्वजानाम्, एवं मृगगरुडरुरुकच्छत्रपिच्छशकुनिसिंहवृषभ-चतुर्दन्तहस्तिध्वजानामपि प्रत्येकमष्टशतमष्टशतं वक्तव्यम्, 'एवामेव सपुव्वावरेणं' 'एवमेव' अनेन प्रकारेण सपूर्वापरेण सह पूर्वैरपरैश्च वर्त्तत इति सपूर्वापरं सङ्ख्यानं तेन विजयद्वारे 'अशीतम्' अशीत्यधिकं केतुसहस्रं भवतीत्याख्यातं मयाऽन्यैश्च तीर्थकृद्भिः।

'विजयस्स ण'मित्यादि, विजयस्य द्वारस्य पुरतो नव 'भौमानि' विशिष्टानि स्थानानि प्रज्ञप्तानि, तेषां च भौमानां भूमिभागा उल्लोकाश्च पूर्ववद्वक्तव्याः, तेषां च भौमानां बहुमध्यदेशभागे यत्पञ्चमं भौमं तस्य बहुमध्यदेशभागे विजयद्वाराधिपतिविजयदेवयोग्यं सिंहासनं प्रज्ञप्तं, तस्य च सिंहासनस्य वर्णनं विजयदूष्यं कुम्भाग्रमुक्तादामवर्णनं प्राग्वत्, तस्य च सिंहासनस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरोत्तरस्यं' वायव्यकोणे उत्तरस्यामुत्तरपूर्वस्यांचविजयदेवस्य संबन्धिनां चतुर्णां सामानिकसहस्राणां चत्वारि भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य पूर्वस्यामत्र विजयस्य देवस्य चतुसृणामग्रमहिषीणां चत्वारि भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य दक्षिणपूर्वस्या-माग्नेयकोण इत्यर्थः। अत्र विजयदेवस्य 'अभ्यन्तरपर्षदाम्' अभ्यन्तरपर्षद्रूपाणामष्टानां देवसहस्राणां योग्यानि अष्टौ भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य दक्षिणस्यां दिशि अत्र विजयदेवस्य मध्यपर्षदो दशानां देवसहस्राणां योग्यानि दश भद्रासनसहस्राणि प्रज्ञप्तानि, तस्य सिंहासनस्य दक्षिणापरस्यां दिशि नैर्ऋतकोण इत्यर्थ अत्र विजयदेवस्य बाह्यपर्षदो द्वादशानांदेवसहस्राणां योग्यानि द्वादश भद्रासनसहस्रणि प्रज्ञप्तानि।

'तस्स णं सीहासणस्से'त्यादि, तस्य सिंहासनस्य पश्चिमायां दिशि अत्र विजयस्य देवस्य सम्बन्धिनां सप्तानामनीकाधिपतीनां योग्यानि सप्त भद्रासनानि प्रज्ञप्तानि, तस्य सिंहासनस्य 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन अत्र विजयस्य देवस्य संबन्धिनां षोडशानामात्मर-क्षदेवसहस्राणां योग्यानि षोडश भद्रासनसहस्राणि प्रज्ञप्तानि, अवशेषेषु प्रत्येकं प्रत्येकं सिंहासनम-परिवारं सामानिकादिदेवयोग्यभद्रासनरूपपरिवाररहितं प्रज्ञप्तम्॥

मू. (१७१) *विजयस्स णं दारस्स उवरिमागारा सोलसविहेहिं रतणेहिं उवसोभिता, तंजहा—रयणेहिं वयरेहिंवेरुलिएहिं जाव रिट्ठेहिं।*

विजयस्स णं दारस्स उप्पिं बहवे अट्ठट्ठंगलगा पण्णत्ता, तंजहा—सोत्थितसिरिवच्छ जाव दप्पणा सव्वरयणामया अच्छा जाव पडिरूवा।

विजयस्स णं दारस्स उप्पिं बहवे कण्हचामरज्झया जाव सव्वरयणामया अच्छा जाव पडिरूवा। विजयस्स णं दारस्स उप्पं बहवे छत्तातिच्छत्ता तहेव॥

वृ. 'विजयस्स ण'मित्यादि, विजयस्य द्वारस्य 'उवरिमाकारा' इति उपरितन आकारः—उत्तरङ्गादिरूपः षोडशविधै रत्नैरुपशोभितः, तद्यथा—रत्नैः सामान्यतः कर्केतनादिभि १ वज्रैः २ वैडूर्यं ३ लोहिताक्षैः ४ मसारगल्लैः ५ हंसगर्भै ६ पुलकैः ७ सौगन्धिकैः ८ ज्योतीरसैः ९ अङ्कैः १० अञ्जनैः ११ रजतैः १२ जातरूपैः १३ अञ्जनपुलकैः १४ स्फटिकैः १५ रिष्ठैः १६॥ 'विजयस्स ण'मित्यादि, विजयस्य द्वारस्य उपरि अष्टावष्टौ स्वस्तिकादीनि मङ्गलकानि प्र०, तद्यथेत्यादिना तान्येवोपदर्शयति—'सव्वरयणामया' इत्यादि प्राग्वत्॥

मू. (१७२) *से केणट्ठेणं भंते! एवं वुच्चति? —विजए णं दारे २, गोयमा! विजए णं दारे विजए नाम देवे महिड्डीए महज्जुतीए जाव महाणुभावे पलिओवमट्ठितीए परिवसति।*

से णं तत्थ चउण्हं सामाणियसाहस्सीणं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं विजयस्स णं दारस्स विजयाए रायहाणीए अन्नेसिं च बहूणं विजयाए रायहाणीए वत्थव्वगाणं देवाणं देवीण य आहेवच्चं जाव दिव्वाइं भोगभोगाइं भुंजमाणे विहरइ।

से तेणट्ठेणं गोयमा! एवं वुच्चति—विजये दारे विजये दारे, [अदुत्तरं च णं गोयमा! विजयस्स णं दारस्स सासए नामधेज्जे पन्नत्ते जन्न कयाइ नत्थि न कयाइ न भविस्सति जाव अवट्ठिए निच्चे विजए दारे]॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'से केणट्ठेणं भंते ! एवं वुच्चइ' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–'गोयमे'त्यादि, गौतम ! विजये द्वारे विजयो नाम, प्राकृतत्वाद् अव्ययत्वाच्च नामशब्दात्परस्य टावचनस्य लोपस्ततोऽयमर्थः–प्रवाहतोऽनादिकालसन्ततिपतितेन विजय इति नाम्ना देवः 'महर्द्धिकः' महती ऋद्धिः–भवनपरिवारादिका यस्यासौ महर्द्धिकः 'महाद्युतिकः' महती द्युति शरीरगता आभरणगता च यस्यासौ महाद्युतिकः तथा महद् बलं–शारीरः प्राणो यस्य स महाबलः, तथा महद् यशः–ख्यातिर्यस्यासौ महायशाः, महेश इत्याख्या–प्रसिद्धिर्यस्य स महेशाख्यः, अथवा ईशनमीशो भावे धञ्प्रत्ययः एश्वर्यमित्यर्थ 'ईश एश्वर्ये' इति वचनात् तत ईशनमैश्वर्य आत्मनः ख्याति अन्तर्भूतण्यर्थतया ख्यापयति–प्रथयति यः स ईशाख्यः महांश्चासावीशाख्यश्च महेशाख्यः ।

क्वचित् 'महासोक्खे' इति पाठस्तत्र महत् सौख्यं प्रभूतसद्वेद्योदयवशाद् यस्य स महासौख्यः पल्योपमस्थितिकः परिवसति, स च तत्र चतुर्णां सामानिकसहस्राणां चतसृणाग्रमहिषीणां सपरिवाराणां प्रत्येकमेकैकसहस्रसङ्ख्यपरिवारसहितानां तिसृणां अभ्यन्तरमध्यमबाह्यरूपाणां यथाक्रममष्टदशद्वादशदेवसहस्रसङ्ख्यकानां पर्षदां सप्तानामनीकानां–हयानीकगजानीकरथानीकपदात्यनीकमहिषानीकगन्धर्वानीकनाट्यानीकरूपाणां सप्तानामनीकाधिपतीनां षोडशानामात्रक्षसहस्राणां विजयस्य द्वारस्य विजयाया राजधान्या अन्येषां च बहूनां विजयराजधानीवास्तव्यानां देवानां देवीनां च 'आहेवच्चं'ति आधिपत्यम् अधिपतेः कर्म आधिपत्यं रक्षा इत्यर्थः, सा च रक्षा सामान्येनाप्यारक्षकेणेव क्रियते तत आह–पुरस्य पति पुरपतिस्तस्य कर्म्म पौरपत्यंसर्वेषामग्रेसरत्वमिति भावः, तच्चाग्रेसरत्वं नायकत्वमन्तरेणापि स्वनायकनियुक्ततथाविधगृहचिन्तकसामान्यपुरुषस्येव (स्यात्) ततो नायकत्वप्रतिपत्यर्थमाह–

'स्वामित्वं' स्वमस्यास्तीति स्वामी तद्भावः स्वामित्वं नायकत्वमित्यर्थ, तदपि च नायकत्वं कदाचित्पोषकत्वमन्तरेणापि भवति यथाहरिणयूथाधिपतेर्हरिणस्य तत आह–भर्तृत्वं–पोषकत्वं 'डुभृञ् धारणपोषणयोः' इति वचनात्, अत एव महत्तरकत्वं, तदपि चेह महत्तरकत्वं कस्यचिदाज्ञाविकलस्यापि भवति यथा कस्यचिद्वणिजः स्वदासदासीवर्गं प्रति तत आह–

'आणाईसरसेनावच्चं' आज्ञया ईश्वर आज्ञेस्वरः सेनायाः प्रति सेनापति आज्ञेश्वरश्वासौ सेनापतिश्च आज्ञेश्वरसेनापतिस्तस्य कर्म्म आज्ञेश्वरसेनापत्यं स्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः 'कारयन्' अन्यैर्नियुक्तैः पुरुषैः पालयन् स्वयमेव, महता रवेणेति योगः 'अहय'त्ति आख्यानकप्रतिबद्धानि यदिवा 'अहतानि' अव्याहतानि नित्मयानि नित्यानुबन्धीनीति भावः, ये नाट्यगीते नाट्यं–नृत्यं गीतं–गानं यानि च वादितानि 'तन्त्रीतलतालत्रुटितानि' तन्त्री–वीणा तलौ–हस्ततलौ तालः–कंसिला त्रुटितानि–वादित्राणि, तथा यश्च धनमृदङ्गः पटुना पुरुषेण प्रवादितः, तत्र धनमृदङ्गो नाम धनसमानध्वनिर्यो मृदङ्गस्तत एतेषां द्वन्द्वस्तेषां रवेण 'देव्यान्' प्रधानान् भोगार्हा भोगाः–शब्दादयो भोगभोगास्तान् भुञ्जानः 'विहरति' आस्ते ।

'से एएणट्ठेण'मित्यादि, तत एतेन 'अर्थेन' कारणेन गौतम ! एवमुच्यते–विजयद्वारे विजयद्वारमिति, विजयाभिधानदेवस्वामिकत्वाद् विजयमिति भावः ॥

–: "विजया राजधानी" अधिकार :–

मू. (१७३) कहि णं भंते ! विजयस्स देवस्स विजया नाम रायहाणी पन्नत्ता ?,

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

गोयमा ! विजयस्स णं दारस्स पुरत्थिमेणं तिरियमसंखेज्जे दीवसमुद्दे वीतिवतित्ता अन्नंमि जंबुद्दीवे दीवे बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं विजयस्स देवस्स विजया नाम रायहाणी प० बारस जोयणसहस्साइं आयामविक्खंभेणं सत्ततीसजोयणसहस्साइं नव य अडयाले जोयणसए किंचिविसेसाहिए परिक्खेवेणं पन्नत्ते ।

सा णं एगेणं पागारेणं सव्वतो समंता संपरिक्खित्ता ।। से णं पागारे सत्ततीसं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं मूले अद्धतेरस जोयणाइं विक्खंभेणं मज्झेत्थ सक्कोसाइं छजोयणाइं विक्खंभेणं उप्पिं तिन्नि सद्धकोसाइं जोयणाइं विक्खंभेणं मूले विच्छिन्ने मज्झे संखित्ते उप्पिं तणुए बाहिं वट्टे अंतो चउरंसे गोपुच्छसंठाणसंठिते सव्वकणगामए अच्छे जाव पडिरूवे ।

से णं पागारे नानाविहपंचवण्णेहिं कविसीसएहिं उवसोभिए, तंजहा–किण्हेहिं जाव सुक्किल्लेहिं ।। ते णं कविसीसका अद्धकोसं आयामेणं पंचधणुसताइं विक्खंभेणं देसोणमद्धकोसं उड्ढं उच्चत्तेणं सव्वमणिमया अच्छा जाव पडिरूवा ।

विजयाए णं रायहाणीए एगमेगाए बाहाए पणुवीसं पणुवीसं दारसतं भवीतिति मक्खायं ते णं दारा बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसंच विक्खंभेणं तावतियं चेव पवेसेणं सेता वरकणगथूभियागा ईहामिय० तहेव जधा विजए दारे जाव तवणिज्जवालुगपत्थडा सुहफासा सस्सि(म)रीए सरूवा पासातीया ४ ।

तेसि णं दाराणं उभयपासिं दुहतो निसीहियाए दो वंदनकलसपरिवाडीओ पन्नत्ताओ तहेव भाणियव्वं जाव वणमालाओ ।

तेसि णं दाराणं उभओ पासिं दुहतो निसीहियाए दो दो पगंठगा पन्नत्ता, ते णं पगंठगा एक्कतीसं जोयणाइं कोसं च आयामविक्खंभेणं पन्नरस जोयणाइं अड्डाइज्जे कोसे बाहल्लेणं पन्नत्ता सव्ववइरामया अच्छा जाव पडिरूवा ।। तेसि णं पगंठगाणं उप्पिं पत्तेयं २ पासायवडिंसगा पन्नत्ता ।

ते णं पासायवडिंसगा एक्कतीसं जोयणाइं कोसं च उड्ढं उच्चत्तेणं पन्नरस जोयणाइं अड्डाइज्जे य कोसे आयामविक्खंभेणं सेसं तं चेव जाव समुग्गया नवरं बहुवयणं भाणितव्वं ।

विजयाएणं रायधानीए एगमेगे दारे अट्ठसयं चक्कज्झयाणं जाव अट्ठसतं सेयाणं चउविसाणाणं नागवरकेऊणं, एवामेव स वुव्वावरेणं विजयाए रायहाणीए एगमेगे दारे आसीतं २ केउसहस्सं भवतीति मक्खायं ।

विजयाए णं रायहानीए एगमेगे दारे सत्तरस भोमा पन्नत्ता, तेसि णं भोमाणं (उल्लोया (य) पउमलया० भत्तिचित्ता ।

तेसि णं भोमाणं बहुमज्झदेसभाए जे ते नवमनवमा भोमा तेसि णं भोमाणं बहुमज्झदेसभाए पत्तेयं २ सीहासणा पन्नत्ता, सीहासणवण्णओ जाव दामा जहा हेट्ठा, एत्थ णं अवसेसेसु भोमेसु पत्तेयं पत्तेयं भद्दासणा पन्नत्ता ।

तेसि णं दाराणं उत्तिमं (उवरिमा) गारा सोलसविधेहिं रयणेहिं उवसोभिया तं चेव जाव छत्ताइछत्ता, एवामेव पुव्ववरेण विजयाए रायहाणीए पंच दारसता भवंतीति मक्खाया ।।

वृ. 'कहि णं भंते ! विजयस्से'त्यादि, क्व भदन्त ! विजयस्य देवस्य विजया नाम राजधानी प्रज्ञप्ता ?, भगवानाह–गौतम ! विजयस्य द्वारस्य पूर्वस्यां दिशि तिर्यग् असङ्ख्येयान् द्वीपसमुद्रान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'व्यतिव्रज्य' अतिक्रम्य अत्रान्तरे योऽन्यः जम्बूद्वीपः अधिकृतद्वीपतुल्याभिधानः, अनेन जम्बूद्वीपानामप्यसङ्ख्येयत्वं सूचयति, तस्मिन् द्वादश योजनसहस्राणि अवगाह्य अत्रान्तरे विजयस्य देवस्य योग्या विजया नाम राजधानी प्रज्ञप्ता मया शेषैश्च तीर्थकृद्भिः, सा च द्वादश योजनसहस्राणि 'आयामविष्कम्भेन' आयामविष्कम्भाभ्यां, सप्तत्रिंशद् योजनसहस्राणि नव शतानि 'अष्टाचत्वारिंशानि' अष्टचत्वारिंशदधिकानि किञ्चिद्विशेषाधिकानि परिक्षेपेण, इदं च परिक्षेपपरिमाणं 'विक्खंभवग्गदहगुणकरणी वट्टस्स परिरओ होइ' इति करणवशात्स्वयमानेतव्यम्।

'सा ण'मित्यादि, 'सा' विजयाभिधाना राजधानी णमिति वाक्यालङ्कारे एकेन महता प्राकारेण 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन परिक्षिप्ता ।। 'से ण'मित्यादि, स प्राकारः सप्तत्रिंशतं योजनानामर्द्धयोजनमूर्द्धमच्चैसत्वेन मूलेऽर्द्धत्रयोदश योजनानि विष्कम्भेन मध्ये षड् योजनानि सक्रोशानि—एकेन क्रोशेनाधिकानि विष्कम्भेन उपरि त्रीणि योजनानि सार्द्धक्रोशानि योजनानि सार्द्धानि द्वादश अर्द्धक्रोशाधिकानि (द्वादश) विष्कम्भेन, मूले विस्तीर्णो मध्ये संक्षिप्तो, मूलविष्कम्भतोऽर्द्धस्य त्रुटितत्वात्, उपरि तनुको, मध्यविष्कम्भादप्यर्द्धस्य त्रुटितत्वात्, बहिर्वृत्तोऽन्तश्चतुरस्र 'गोपुच्छसंस्थानसंस्थितः' ऊर्ध्वीकृतगोपुच्छसंस्थानसंस्थितः 'सव्वकणगमए' सर्वात्मना कनकमयः 'अच्छे' इत्यादि विशेषणजातं प्राग्वत्।

'से ण'मित्यादि, स प्राकर नानाविधानि च तानि पञ्चवर्णानि च नानाविधपञ्चवर्णानि तैः, नानाविधत्वं च पञ्चवर्णापेक्षया कृष्णादिवर्णतारतम्यापेक्षया वा द्रष्टव्यं, पञ्चवर्णत्वमेवोपदर्शयति—'किण्हेहिं' इत्यादि।। 'तेणं कविसीसगा' इत्यादि, तानिकपिशीर्षकाणि प्रत्येकमर्द्धकशं—धनुःसहस्रप्रमाणमायामेन—दैर्ध्येण पञ्च धनुःशतानि 'विष्कम्भेन' विस्तारेण, देशोनमर्द्धक्रशमूर्द्धमुच्चैस्त्वेन 'सव्वमणिमया' इत्यादि सर्वात्मना मणिमया 'अच्छा' इत्यादि विशेषणकदम्बकं प्राग्वत्। 'विजयाए णं रायहाणीए' इत्यादि, विजयाया राजधान्या एकैकस्यां बाहायां पञ्चविंशं—पञ्चविंशत्यधिकं द्वारशतं २ प्रज्ञप्तं, सर्वसङ्ख्यया पञ्च द्वारशतानि ।। 'ते णं दारा' इत्यादि, तानि द्वाराणि प्रत्येकं द्वाषष्टियोजनानि अर्द्धयोजनं चोर्द्धमुच्चैस्त्वेन, एकत्रिंशतं योजनानि क्रोशं च विष्कम्भतः, 'तावइयं चेव पवेसेणं' एतावदेव—एतत्रिंशद् योजनानि क्रोशं चेत्यर्थः प्रवेशेन, 'सेया वरकणगथूभियागा' इत्यादि द्वारवर्णनं निरवशेषं तावद्वक्तव्यं यावद्वनमालावर्णनम्।

'तेसि णं दाराण'मित्यादि, तेषां द्वाराणां प्रत्येकमुभयोः पार्श्वयोरेकैकनैषेधिकीभावेन 'द्विघातो' द्विप्रकारायं नैषेधिक्यां द्वौ द्वौ 'प्रकण्ठकौ' पीठविशेषौ प्रज्ञप्तौ, ते च प्रकण्ठकाः प्रत्येमेकत्रिंशतं योजनानि क्रोशमेकं च आयामविष्कम्भाभ्यां, पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् बाहल्येन 'सव्ववइरामया' इति सर्वात्मनाते प्रकण्ठका वज्ररत्नमयाः 'अच्छा सण्हा' इत्यादि विशेषणजालं प्राग्वत्।। 'तेसिं पगंठगाण'मित्यादि, तेषां प्रकण्ठकानामुपरि प्रत्येकं 'प्रासादावतंसकः' प्रासादविशेषः प्रज्ञप्तः।

'ते णं पासायवडेंसगा' इत्यादि, ते प्रासादावतंसका एकत्रिंशतं योजनानि क्रशं चैकमूर्ध्वमुच्चैस्तेवन, पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रशान् आयामविष्कम्भाभ्यां, तेषां च प्रासादानाम् 'अब्भुग्गयमूसियपहसियाविव' इत्यादि सामान्यतः स्वरूपवर्णनम् उल्लोकवर्णनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मध्यभूमिभागवर्णनं सिंहासनवर्णनं विजयदूष्यवर्णनं मुक्तादामोपवर्णनं च विजयद्वारवत्, शेषमपि तोरणादिकं विजयद्वारवदिमाभिर्वक्ष्यमाणाभिर्गाथाभिरनुगन्तव्यं ।

ता एव गाथा आह–'तोरणे'त्यादि गाथात्रयं । [मयासंपादिता आगम सुत्ताणि पुस्तके एता त्रया गाथाः वर्तते आगमसुत्ताणि–१४ पुष्ठांक ६४] द्वारेषु प्रत्येकमेकैकस्यां नैषेधिक्यां द्वे द्वे तोरणे वक्तव्ये, तेषां च तोरणानामुपरि प्रत्येकमष्टावष्टौ मङ्गलकानि, तेषां तोरणानामुपरि कृष्णचामरध्वजादयो ध्वजाः, तदनन्तरं तोरणानां तुरतः शालभञ्जिकाः तदनन्तरं नागदन्तकास्तेषु च नागदन्तकेषु दामानि ततो हयसङ्घाटादयः सङ्घाटा वक्तव्याः ततो हयपङ्क्त्यादयः पङ्क्तयस्तदनन्तरं हयवीथ्यादयो वीथयस्ततो हयमिथुनकादीनि मिथुनानि ततः पद्मलतादयो लताः ततः 'सोत्थिया' चतुर्दिकसौवस्तिका वक्तव्यास्ततो वन्दनकलाशास्तदनन्तरं भृङ्गारकास्तत आदर्शकास्ततः स्थालानि ततः पात्र्यस्तदनन्तरं सुप्रतिष्ठानि ततो मनोगुलिकास्तासु 'वातकरकाः' वातभृताः करका वातकरका जलशून्या इत्यर्थः ।

तदनन्तरं त्रा रत्नकरण्डकास्ततो हयकण्ठा गजकण्ठा नरकण्ठाः, उपलक्षणमेतत् किंनरकिंपुरुषमहोरगगन्धर्ववृषभकण्ठकाः क्रमेण वक्तव्याः, तदनन्तरं पुष्पादिचङ्गेर्यो वक्तव्यास्ततः पुष्पादिपटलकानि ततः सिंहासनानि तदनन्तरं छत्राणि ततश्चामराणि ततस्तैलादिसमुद्गका वक्तव्यास्ततो ध्वजाः, तेषां च ध्वजानामिदं चरमसूत्रम्– 'एवामेव सपुव्वावरेणं विजयाए रायहाणीए एगमेगंसि दारंसि असीयं असीयं केउसहस्सं भवतीति मक्खायं' तदनतंर भौमानि वक्तव्यानि, तत्सूत्रं साक्षादुपदर्शयति–'तेसि णं दाराण'मित्यादि, तेषां द्वाराणां पुरतः सप्तदश सप्तदश भौमानि प्रज्ञप्तानि, तेषां च भौमानां भूमिभागा उल्लोकाश्च प्राग्वद्वक्तव्याः ।

'तेसि णं भोमाण'मित्यादि, तेषां च भौमानां बहुमध्यदेशभागे यानि नवमनवमानि भौमानि तेषां बहुमध्यदेशभागेषु प्रत्येकं विजयदेवयोग्यं (सिंहासनं यथा) विजयद्वारपञ्चमभौमे किन्तु सपरिवारं सिंहासनं वक्तव्यम्, अवशेषेषु च भौमेषु प्रत्येकं सपरिवारं सिंहासनं प्रज्ञप्तं, 'तेसि णं दाराणं उवरिमागारा सोलसविहेहिं रयणेहिं उवसोमिता' इत्यादि प्राग्वत् ।।

–: विजया राजधान्यो–वनखण्ड :–

मू. (१७४) *विजयाए णं रायहाणीए चउद्दिसिं पंचजोयणसताइं अबाहाए, एत्थ णं चत्तारि वनसंडा पन्नत्ता, तंजहा– असोगवने सत्तवण्णवने चंपगवने चूतवणन, पुरत्थिमेणं असोगवने दाहिणेणं सत्तवण्णवने पच्चत्थिमेणं चंपगवने उत्तरेणं चूतवणन ।*

ते णं वनसंडा साइरेगाइं दुवालस जोयणसहस्साइं आयामेणं पंच जोयणसयाइं विक्खंभेणं पन्नत्ता पत्तेयं पत्तेयं पागारपरिक्खितता किण्हा किण्होभासा वनसंडवण्णओ भाणियव्वो जाव बहवे वाणमंतरा देवा य देवीओ य आसयंति सयंति चिट्ठंति निसीदंति तुयट्टंति रमंति ललंति कीलंति मोहंति पुरापोराणाणं सुचिण्णाणं सुपरिक्कंताणं सुभाणं कम्माणं डाणं कल्लाणं फलवित्तिविसेसं पच्चणुभवमाणा विहरंति ।।

तेसि णं वनसंडाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं पासायवडिंसगा पन्नत्ता, ते णं पासायवडिंसगा बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसं च आयामविक्खंभेणं अब्भुग्गतमूसिया तहेव जाव अंतो बहुसमरमणिज्ञा भूमिभागा पन्नत्ता लल्लोया पउमभत्तिचित्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाणियव्वा, तेसि णं पासायवडेंसगाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं सीहासणा पन्नत्ता वण्णावासो सपरिवारा, तेसि णं पासायवडिंसगाणं उप्पिं बहवे अट्ठट्ठ मंगलगा झया छत्तातिछत्ता।

तत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओवमट्ठितीया परिवसंति, तंजहा—असोए सत्तवन्ने चंपए चूते। तत्थ णं ते णं साणं वनसंडाणं साणं साणं पासायवडेंसयाणं साणं साणं सामानियाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं आयरक्खदेवाणं आहेवच्चं जाव विहरति।

विजयाए णं रायहाणीए अंतो बहुसमरमणिज्जे भूमिभागे पन्नत्ते जाव पंचवण्णेहिं मणीहिं उवसोभिए तणसद्दविहूणे जाव देवा य देवीओ य आसयंति जाव विहरंति।

तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगे महं ओवरियालेणे पन्नत्ते बारस जोयणसयाइं आयामविक्खंभेणं तिन्नि जोयणसहस्साइं सत्त य पंचानउते जोयणसते किंचिविसेसाहिए परिक्खेवेणं अद्धकोसं बाहल्लेणं सव्वजंबूणतामतेणं अच्छे जाव पडिरूवे।

से णं एगाए पउमवरवेइयाए एगेणं वनसंडेणं सव्वतो समंता संपरिक्खित्ते पउमवरवेतियाए वण्णओ वनसंडवण्णओ जाव विहरंति, से णं वनसंडे देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं-ओवारियालयणसमपरिक्खेवेणं।

तस्स णं ओवारियालयणस्स चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पन्नत्ता, वण्णओ, तेसि णं तिसोवाणपडिरूवगाणं पुरतो पत्तेयं पत्तेयं तोरणा पन्नत्ता छत्तातिछत्ता।

तस्स णं उवारियालयणस्स उप्पिं बहुसमरमणिज्जे भूमिभागे पन्नत्ते जाव मणीहिं उवसोभिते मणिवण्णओ, गंधरसफासो, तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगे महं मूलपासायवडिंसए पन्नत्ते, से णं पासायवडिंसए बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसं च आयामविक्खंभेणं अब्भुग्गयमूसियप्पहसिते तहेव तस्स णं पासायवडिंसगस्स अंतो बहुसमरमणिज्जे भूमिभागे पन्नत्ते जाव मणिफासे उल्लोए।

तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभागे एत्थ णं एगा महं मणिपेढिया पन्नत्ता, सा च एगं जोयमायामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमई अच्छा सण्हा।

तीसे णं मणिपेढियाए उवरिं एगे महं सीहासणे पन्नत्ते, एवं सीहासणवण्णओ सपरिवारो, तस्स णं पासायवडिंसगस्स उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता।

से णं पासायवडिंसए अन्नेहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासायडिंसएहिं सव्वतो समंता संपरिक्खित्ते, ते णं पासायवडिंसगा एक्कतीसं जोयणाइं कोसं च उड्ढं उच्चत्तेणं अद्धसोल-सजोयणाइं अद्धकोसं च आयामविक्खंभेणं अब्भुग्गत० तहेव, तेसि णं पासायवडिंसयाणं अंतो बहुसमरमणिज्जा भूमिभागा उल्लोया।

तेसि णं बहुसमरमणिज्जाणं भूमिभागाणंबहुमज्झदेसभाए पत्तेयं पत्तेयं सीहासणं पन्नत्तं, वण्णओ, तेसिं परिवारभूता भद्दासणा पन्नत्ता, तेसि णं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।

ते णं पासायवडिंसका अन्नेहिं चउहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासायवडेंसएहिं सव्वतो समंता संपरिक्खित्ता। ते णं पासायवडेंसका अद्धसोलासजोयणाइं अद्धकोसं च उड्ढं

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

उच्चत्तेणं देसूणाइं अट्ठ जोयणाइं आयामविक्खंभेणं अब्भुग्गय० तहेव, तेसि णं पासायवडेंसगाणं अंतो बहुसमरमणिज्ञा भूमिभागा उल्लोया, तेसि णं बहुसमरमणिज्ञाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं पत्तेयं पउमासणा पन्नत्ता, तेसि णं पासायाणं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।

ते णं पासायवडेंसगा अण्णेहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासायवडेंसएहिं सव्वतो समंता संपरिक्खित्ता। ते णं पासायवडेंसका देसूणाइं अट्ठ जोयणाइं उड्ढं उच्चत्तेणं देसूणाइं चत्तारि जोयणाइं आयामविक्खंभेणं अब्भुग्गत० भूमिभागा उल्लोया भद्दासणाइं उवरिं मंगलगा झया छत्तातिछत्ता, ते णं पासायवडिंसगा अण्णेहिं चउहिं तदद्धुच्चत्तप्पमाणमेत्तेहिं पासायवडिंसएहिं सव्वतो समंता संपरिक्खित्ता।

ते णं पासायवडिंसगा देसूणाइं चत्तारि जोयणाइं उड्ढं उच्चत्तेणं देसूणाइं दो जोयणाइं आयामविक्खंभेण अब्भुग्गयमूसिय० भूमिभागा उल्लोया पउमासणाइं उवरिं मंगलगा झया छत्ताइच्छत्ता॥

वृ. 'विजयाए णं रायहाणीए' इत्यादि, विजयाया राजधान्याः 'चउदिसि'मिति चतस्रो दिशः समाहृताश्चतुर्दिक् तस्मिन् चतुर्दिशि—चतसृषु दिक्षु पञ्च पञ्च योजनशतानि 'अबाहाए' इति बाधनं बाधा—आक्रमणं तस्यामबाधायां कृत्वेति गम्यते, अपान्तरालेषु मुक्त्वेति भावः, चत्वारो वनखण्डाः प्रज्ञप्ताः, 'तद्यथे'त्यादि, तानेव वनषण्डान् नामतो दिग्भेदतश्च दर्शयति, अशोकवृक्षप्रधानं वनमशोकवनम्, एवं सप्तपर्णवनं चम्पकवनं चूतवनमपि भावनीयं, 'पुव्वेण असोगवण'मित्यादिरूपा गाथा पाठसिद्धा 'ते णं वनसंडा' इत्याद, ते वनखण्डाः सातिरेकाणि द्वादश योजनसहस्राण्यायामेन पञ्चयोजनशतानि विष्कम्भेन प्रत्येकं प्रज्ञप्ताः प्रत्येकं प्राकारपरिक्षिप्ताः, पुनः कथम्भूतास्ते वनषण्डाः ? इत्यादि पद्मवरवेदिकाबहिर्वनषण्ड- वत्तावदविशेषेण वक्तव्यं यावत् 'तत्थ णं बहवे वाणमंतरा देवा य देवीओ य आसयंति जाव विहरंति'।

'तेसि ण'मित्यादि, तेषां वनषण्डानां बहुमध्यदेशभागे प्रत्येकं प्रासादावतंसकाः प्रज्ञप्ताः, ते च प्रासादावतंसका द्वाषष्टिर्योजनान्यर्द्धयोजनं चोर्द्धमुच्चैस्त्वेन एकत्रिंशतं योजनानि क्रशं च विष्कम्भेन 'अब्भुग्गयमूसियपहसियाविव' इत्यादि प्रासादावतंसकानां वर्णनं निरवशेषं तावद्वक्तव्यं यावत्तत्र प्रत्येकं सिंहासनं सपरिवारं। 'तत्थ ण'मित्यादि, तेषु वनषण्डेषु प्रत्येकमेकैकदेवभावेन चत्वारो देवा महर्द्धिका यावत् 'महज्जुइया महाबला महायसा महासोक्खा महाणुभावा' इतिपरिग्रहः पल्योपमस्थितिकाः परिवसन्ति, तद्यथा—'असोए' इत्यादि, असोकवनेऽशोकः सप्तपर्णवने सप्तपर्ण चम्पकवने चम्पकः चूतने चूतः।

'तेसि ण'मित्यादि, ते अशोकादयो देवास्तस्य वनखण्डस्य स्वस्य प्रासादा- वतंसकस्य, सूत्रे बहुवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययो भवतीति, स्वेषां स्वेषां सामानिकसहस्राणां स्वासां स्वासामग्रमहिषीणां सपरिवाराणां स्वासां स्वासां पर्षदां स्वेषां स्वेषामनीकानां (अनीकाधिपतीनां) स्वेषां स्वेषामात्मरक्षकाणाम् 'आहेवच्चं पोरेवच्च'मित्यादि प्राग्वत्।

'विजयाए ण'मित्यादि, विजयाया राजधान्या अन्तर्बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, तस्य 'से जहानामए आलिंगपुक्खरेइ वा' इत्यादि वर्णनं प्राग्वत् निरवशेषं तावद्वक्तव्यं यावन्मणीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्श, तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे, अत्र महद् एकमुपकारिकालयनं प्रज्ञप्तं, राजधानीस्वामिसत्कप्रासादावतंसकादीन् उपकरोति–उपष्टभ्नातीत्युपकारिका–राजधानीस्वामिसत्कप्रासादावतंसकादीनां पीठिका, अन्यत्र त्वियमुपकार्योपकारकेति प्रसिद्धा, उक्तञ्च–"गृहस्थानं स्मृतं राज्ञामुपकार्योपकारका" इति, उपकारिकालयनमिव उपकारिकालयनं तद् द्वादश योजनशतानि 'आयामविष्कम्भेन' आयामविष्कम्भाभ्यां, त्रीणि योजनसहस्राणि सप्त योजनशतानि पञ्चनवतानि–पञ्चनवत्यधिकानि किञ्चिद्विशेषाधिकानि परिक्षेपेण प्रज्ञप्तानि, परित्रेपपरिमाणं चेदं प्रागुक्तकरणवशात्स्वयमानेतव्यम्, अर्द्धक्रोशं–धनुःसहस्रपरिमाणं बाहल्येन 'सव्वजंबूणयामए' इति सर्वात्मना जाम्बूनदमयम्, 'अच्छे' इत्यादि विशेषणजातं प्राग्वत् ॥

'से ण'मित्यादि, 'तद्' उपकारिकालयनम् एकया पद्मवरवेदिकया तत्पृष्ठविन्या एकेन च वनषण्डेन 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तं, पद्मवरवेदिकावर्णको वनषण्डवर्णकः प्राग्वन्निरवशेषो वक्तव्यो यावत् 'तत्थ बहवे वाणमंतरा देवा य देवीओ य आसयंति सयंति जाव विहरंति' इति ॥ 'तस्स ण'मित्यादि, तस्य उपकारिकालयनस्य 'चउदिसिं'ति चतुर्दिशि चतसृषु दिक्षु एकैकस्यां दिशि एकैकभावेन चत्वारि त्रिसोपानप्रतिरूपकाणि–प्रतिविशिष्टरूपाणि त्रिसोपानानि प्रज्ञप्तानि, त्रिसोपानवर्णकः पूर्ववद्वक्तव्यः, तेषां च त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं प्रत्येकं तोरणं प्रज्ञप्तं, तेषां च तोरणानां वर्णनं प्राग्वद्वक्तव्यम्

'तस्स ण'मित्यादि, 'तस्य' उपकारिकालयनस्य उपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, 'से जहानामए' इत्यादि भूमिभागवर्णनं प्राग्वत्तावद्वाच्यं यावन्मणीनां स्पर्श, तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्येशभागेऽत्र महानेको मूलप्रासादावतंसकः प्रज्ञप्तः, स च द्वाषष्टिर्योजनानि अर्द्धं च योजनमूर्द्धमुच्चैस्त्वेन, एकत्रिंशतं योजनानि क्रोशं चायामविष्कम्भाभ्याम्, 'अब्भुग्गयमूसियपहसियाविवे' त्यादि, तस्य वर्णनं मध्येभूमिभागवर्णनं सिंहासनवर्णनं शेषाणि च भद्रासनानि तत्परिवारभूतानि विजयद्वारबहिस्थितप्रासादवद्भावनीयानि ।

'तस्स ण'मित्यादि, तस्य मूलप्रासादावतंसकस्य बहुमध्यदेशभागेऽत्र महती एका मणिपीठिका प्रज्ञप्ता, सा चैकं योजनमायामविष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमयी' इति सर्वात्मना मणिमयी 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकं प्राग्वत् ॥ 'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपरि अत्र महदेकं सिंहासनं प्रज्ञप्तं, तस्य च सिंहासनस्य परिवारभूतानि शेषाणि भद्रासनानि प्राग्वद्वक्तव्यानि ॥ 'से ण'मित्यादि, स च मूलप्रासादावतंसकोऽन्यैश्चतुर्भिर्मूलप्रासादावतंसकैस्तदर्द्धोच्चत्वप्रमाणमात्रैः–मूलप्रासादावतंसकार्द्धोच्चत्वप्रमाणैः सर्वतः समन्तात्संपरिक्षिप्तः, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति–एकत्रिंशतं योजनानि क्रोशं चैकमूर्द्धमुच्चैस्त्वेन, पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् आयामविष्कम्भाभ्यां, तेषामपि 'अब्भुग्गयमूसियपहसियाविवे'त्यादि स्वरूपवर्णनं मध्येभूमिभागवर्णनमुल्लोकवर्णनं च प्राग्वत्

'तेसि ण'मित्यादि, तेषां प्रासादावतंसकानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं सिंहासनं प्रज्ञप्तं, तेषां च सिंहासनानां वर्णनं प्राग्वत्, नवरमत्र सिंहासनानां शेषाणि परिवारभूतानि न वक्तव्यानि ॥ 'ते णं पासायवडेंसया' इत्यादि, ते प्रासादावतंसका अन्यैश्चतुर्भि प्रासादावतंसकैस्तदर्द्धोच्चत्वप्रमाणमात्रैः–मूलप्रासादावतंसकपरिवारभूतप्रासादावतंसकार्द्धोच्चत्वप्रमाणमात्रैर्मूलप्रासादा-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पेक्षया चतुर्भागमात्रप्रमाणैरित्यर्थ सर्वतः समन्तात्संपरिक्षिप्ताः, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति—'ते ण'मित्यादि, ते प्रासादावतंसकाः पञ्चदश योजनानि अर्द्धतृतीयांश्च क्रोशान् ऊर्द्धमुच्चैस्त्वेन देशोनानि अष्टौ योजनानि आयामविष्कम्भाभ्यां, सूत्रे च 'आयामविक्खंभेणं' ति एकवचनं समाहारविवक्षणात्, एवमन्यत्रापि भावनीयम्, एतेषामपि 'अब्भुग्गयमूसिये'त्यादि स्वरूपवर्णनं मध्येभूमिभाग-वर्णनमुल्लोकवर्णनं सिंहासनवर्णनं च प्राग्वत् केवलमत्रापि सिंहासनमपरिवारं वक्तव्यम् ॥

'ते ण'मित्यादि, तेऽपि प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्च-प्रमाणमात्रैः—अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणैर्मूलप्रासादापेक्षयाऽष्टभागमात्रप्रमाणैरित्यर्थ सर्वतः समन्तात्संपरिक्षिप्ताः, तदेव तदर्द्धोच्चत्वप्रमाणमात्रमुपदर्शयति—'ते ण'मित्यादि, ते प्रासाद-वतंसका देशोनानि अष्टौ योजनानि ऊर्द्धमुच्चैस्त्वेन देशोनानि चत्वारि योजनान्यायामविष्कम्भाभ्यां तेषामपि 'अब्भुग्गयमूसियपहसियाविवे'त्यादि स्वरूपादिवर्णनमनन्तरप्रासादवतंसकवत् ।

'ते ण'मित्यादि, तेऽपि च प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैस्तदर्द्धोच्चत्व-प्रमाणमात्रैः—अनन्तरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणमात्रैर्मूलप्रासादवतं- सकापेक्षया षोडशभागप्रमाणमात्रैरित्यर्थः सर्वतः समन्ततः संपरिक्षिप्ताः, तदर्द्धोच्चत्वप्रमाणमेव दर्शयति—'ते ण'मित्यादि, ते प्रासादवतंसका देशोनानि चत्वारि योजनान्यूर्द्धमुच्चैस्त्वेन देशोने द्वे योजने आयामविष्कम्भाभ्यां, तेषामपि स्वरूपवर्णनं मध्येभूमिभागवर्णनमुल्लोकवर्णनं सिंहासनवर्णनं च परिवारवर्जितं प्राग्वत्, तदेवं चतस्रः प्रासादावतंसकपरिपाटयो भवन्ति, क्वचित्तिस्र एव दृश्यन्ते न चतुर्थी ॥

—: "विजयदेवस्य सभा" अधिकार :—

मू. (१७५) *तस्स णं मूलपासायवडेंसगस्स उत्तरपुरत्थिमे णं एत्थ णं विजयस्स देवस्स सभा सुधम्मा पन्नत्ता अद्धत्तेरसजोयणाइं आयामेणं छ सक्कोसाइं जोयणाइं विक्खंभेणं नव जोयणाइं उड्ढं उच्चत्तेणं, अनेगखंभसतसंनिविट्ठा अब्भुग्गयसुकयवइरवेदिया तोरणवररतियसाल- भंजिया सुसिलिट्ठविसिट्ठलट्ठसंठियपसत्थवेरुलियविमलखंभा नानामणिकनगरयणखइय- उज्जल-बहुसमसुविभत्तचित्त(निचिय)रमणिज्जकुट्टिमतला ईहामियउसभतुरगनरमगर- विहग-वालगकिण्णररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ता थंभुग्गयवइरवेइया- परिगयाभिरामा विज्ञाहरजमलजुयजंतजुत्ताविव ।*

—अच्चिसहस्समालणीया रूवगसहस्सकलिया भिसमाणी भिब्भिसमाणी चक्खुलोयणलेसा सुहफासा सस्सिरीयरूवा कंचणमणिरयणथूभियागानाणाविहपंचवण्णघंटापडागपडिमंडित-ग्गसिहरा धवला मिरीइकवचं विणिम्मुयंती लाउल्लोइयमहिया गोसीससरसरत्तचंदन-दद्दरदिन्नपंचंगुलितला उवचियचंदनकलसा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोस-त्तविउलवट्टवग्घारियमल्लदामकलावा पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलिता कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघेंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया अच्छर-गणसंघसंविकिन्ना दिव्वतुडियमधुरसद्दसंपणाइया सुरम्मा सव्वरयणामती अच्छा जाव पडिरूवा

तीसे णं सोहम्माणे सभाए तिदिसिं तओ दारा पन्नत्ता ॥ ते णं दारा पत्तेयं पत्तेयं दो दो जोयणाइं उड्ढं उच्चत्तेणं एगं जोयणं विक्खंभेणं तावइयं चेव पवेसेणं सेया वरकणगथूभियागा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाव वणमालादारवन्नओ । तेसि णं दाराणं पुरओ मुहमंडवा पन्नत्ता, ते णं मुहमंडवा अद्धतेरसजोयणाइं आयामेणं छजोयणाइं सक्कोसाइं विक्खंभेणं साइरेगाइं दो जोयणाइं उड्ढं उच्चत्तेणं मुहमंडवा अनेगखंभसय-संनिविट्ठा जाव उल्लोया भूमिभागवण्णओ ।। तेसि णं मुहमंडवाणं उवरिं पत्तेयं पत्तेयं अट्ठट्ठ मंगला पन्नत्ता सोत्थिय जाव मच्छ० ।

तेसि णं मुहमंडवाणं पुरओ पत्तेयं पत्तेयं पेच्छाघरमंडवा पन्नत्ता, ते णं पेच्छघरमंडवा अद्धतेरसजोयणाइं आयामेणं जाव दो जोयणाइं उड्ढं उच्चत्तेणं जाव मणिफासो ।। तेसिणं बहुमज्झ-देसभाए पत्तेयं पत्तेयं वइरामयअक्खाडगा पन्नत्ता, तेसि णं वइरामयाणं अक्खाडगाणं बहुमज्झ-देसभाए पत्तेयं २ मणिपीढिया पन्नत्ता, ताओ णं मणिपीठियाओ जोयणमेगं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमईओ अच्छाओ जाव पडिरूवाओ ।

तासि णं मणिपीढियाणं उप्पिं पत्तेयं पत्तेयं सीहसणा पन्नत्ता, सीहासणवण्णओ जाव दामा परिवारो । तेसि णं पेच्छाघरमंडवाणं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता ।। तेसि णं पेच्छाघरमंडवाणं पुरतो तिदिसिं तओ मणिपेढियाओ पं० ताओ णं मणिपेढियाओ दो जोयणाइं आयामविक्खंभेणं जोयणं बाहल्लेणं सव्मणिमतीओ अच्छाओ जाव पडिरूवाओ ।

तासि णं मणिपेढियाणं उप्पिं पत्तेयं पत्तेयं चेइयथूभा पन्नत्ता, ते णं चेइयथूभा दो जोयणाइं आयामविक्खंभेणं सातिरेगाइं दो जोयणाइं उड्ढं उच्चत्तेणं सेया संखंककुंददगरयामयमहितफेण-पुंजसन्निकासा सव्वरयणामया अच्छा जाव पडिरूवा ।। तेसि णं चेइयथूभाणं उप्पिं अट्ठट्ठ मंगलगा बहुकिण्हचामरझया पन्नत्ता छत्तातिछत्ता ।

तेसि णं चेतियथूभाणं चउद्दिसिं पत्तेयं पत्तेयं चत्तारि मणिपेढियाओ पताओ णं मणि-पेढियाओ जोयणं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमईओ ।। तासि णं मणि-पीठियाणं उप्पिं पत्तेयं पत्तेयं चत्तारि जिनपडिमाओ जिणुस्सेहपमाणमेत्ताओ पलियंकनिसण्णाओ तूभाभिमुहीओ सन्निविट्ठाओ चिट्ठंति, तंजहा—उसभा वद्धमाणा चंदानना वारिसेणा ।

तेसि णं चेतियथूभाणं पुरतो तिदिसिं पत्तेयं पत्तेयं मणिपेढियाओ पन्नत्ताओ, ताओ णं मणिपेढियाओ दो दो जोयणाइं आयामविक्खंभेणं जोयणं बाहल्लेणं सव्वमणिमईओ अच्छाओ लण्हाओ सण्हाओ घट्ठाओ मट्ठाओ निप्पंकाओ नीरयाओ जाव पडिरूवाओ ।

तासि णं मणिपेढियाण उप्पिं पत्तेयं पत्तेयंम चेइयरुक्खा पन्नत्ता, ते णं चेतियरुक्खा अट्ठजोयणाइं उड्ढं उच्चत्तेणं अद्धजोयणं उव्वेहेणं दो जोयणाइं खंधी अद्धजोयणं विक्खंभेणं छजोयणाइं विडिमा बहुमज्झदेसभाए अट्ठजोयणाइं आयामविक्खंभेणं साइरेगाइंअट्ठजोयणाइं सव्वग्गेणं पन्नत्ताइं ।

तेसि णं चेइयरुक्खाणं अयमेतारूवे वण्णावासे पन्नत्ते, तंजहा—वइरामया मूला रययसुपतिट्ठिता विडिमा रिट्ठामयविपुलकंदवेरुलियरुतिलखंधा सुजातरूवपढमगविसालाली नानामणिरयणविविधसाहप्पसाहवेरुलियपत्ततवणिज्जपत्तवेंटा जंबूणयरत्तमउयसुकुमालपवाल-पल्लवसोभंतवरंकुरग्गसिहरा विचित्तमणिरयणसुरभिकुसुमफलभरणमियसाला सच्छाया सप्पभा समिरीया सउज्जोया अमयरससमरसफला अधियं नयनमननिव्वुतिकरा पासातीया दरिसणिज्जा अभिरूवा पडिरूवा ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ते णं चेइयरुक्खा अन्नेहिं बहूहिं तिलयलवयछत्तोवगसिरीससत्तवन्नदहिवन्नलोद्धधवचंदन-नीवकुडयकयंबपणसतालतमालपियालपियंगुपारावयरायरुक्खनंदिरुक्खेहिं सव्वओ समंता संपरिक्खित्ता ।। ते णं तिलया जाव नंदिरुक्खा मूलवंतो कंदमंतो जाव सुरम्मा ।

ते णं तिलया जाव नंदिरुक्खा अन्नेहिं बहूहिं पउमलयाहिं जाव सामलयाहिं सव्वतो समंता संपरिक्खित्ता, ताओ णं पउमलयाओ जाव सामलयाओ निच्चं कुसुमियाओ जाव पडिरूवाओ तेसि णं चेतियरुक्खाणं उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता ।

तेसि णं चेइयरुक्खाणं पुरतो तिदिसिं तओ मणिपेढियाओ पन्नत्ताओ, ताओ णं मणिपेढियाओ जोयणं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमतीओ अच्छा जाव पडिरूवाओ ।

तासि णं मणिपेढियाणं उप्पिं पत्तेयं पत्तेयंमाहिंदझया अद्धट्ठमाइं जोयणाइं उद्धं उच्चत्तेणं अद्धकोसं उव्वेहेणं अद्धकोसं विक्खंभेणं वइरामयवट्टलट्ठसंठियसुसिलिट्ठपरिघट्ठमट्ठसुपतिट्ठिता विसिट्ठा अनेगवरपंचवण्णकुडभीसहस्सपरिमंडियाभिरामा वाउद्धुयविजयवेजयंतीपडागा छत्तातिछत्तकलिया तुंगा गगनतलमभिलंघमाणसिहरा पासादीया जाव पडि० ।

तेसि णं महिंदज्झयाणं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता ।। तेसि णं महिंदज्झयाणं पुरतो तिदिसिं तओ नंदाओ पुक्खरिणीओ पं० ताओ णं पुक्खरिणीओ अद्धतेरजोयणाइं आयामेणं सक्कोसाइं छ जोयणाइं विक्खंभेणं दसजोयणाइं उव्वेहेणं अच्छाओ सण्हाओ पुक्खरिणीवण्णओ पत्तेयं पत्तेयं पउमवरवेइयापरिक्खित्ताओ पत्तेयं पत्तेयं वनसंडपरिक्खित्ताओ वण्णओ जाव पडिरूवाओ । तेसि णं पुक्खरिणीणं पत्तेयं २ तिदिसिं तिसोवाणपडिरूवगा पं०, तेसि णं तिसोवाणपडिरूव- गाणं वण्णओ, तोरणा भाणियव्वा, जाव छत्तातिच्छत्ता सभाए णं सुहम्माए छ मणोगुलिसाहस्सीओ पन्नत्ताओ, तंजहा–

पुरत्थिमे णं दो साहस्सीओ पच्चत्थिमेणं दो साहस्सीओ दाहिणेणं एगसाहस्सी उत्तरेणं एगा साहस्सी, तासु णं मनोगुलियासु बहवे सुवण्णरुप्पामया फलगा पन्नत्ता, तेसु णं सुवण्ण-रुप्पामएसु फलगेसु बहवे वइरामया नागदंतगा पन्नत्ता, तेसु णं वइरामएसु नागदंतएसु बहवे किण्हसुत्तवट्टवग्घारितमल्लदामकलावा जाव सुक्किलवट्टवग्घारितमल्लदामकलावा, ते णं दामा तवणिज्जलंबूसगा जाव चिट्ठंति ।

सभाए णं सुहम्माणे छगोमाणसीसाहस्सीओ पन्नत्ताओ तंजहा–पुरत्थिमेणं दो साहस्सीओ, एवं पच्चत्थिमेणवि दाहिणेणं सहस्सं एवं उत्तरेणवि, तासु णं गोमाणसीसु बहवे सुवण्णरुप्पमया फलगा पं० जाव तेसु णं वइरामएसु नागदंतएसु बहवे रयतामया सिक्कता पन्नत्ता ।

तेसु णं रयतामएसु सिक्कएसु बहवे वेरुलियामईओ धूवघडिताओ पन्नत्ताओ, ताओ णं धूवघडियाओ कालागुरुपवरकुंदुरुक्कतुरुक्क जाव घाणमननिव्वुइकरेणं गंधेणं सव्वतो समंता आपूरेमाणीओ चिट्ठंति । सभाए णं सुधम्माए अंतो बहुसमरमणिज्जे भूमिभागे प० जाव मणीणं फासो उल्लोया पउमलयभत्तिचित्ता जाव सव्वतवणिज्जमए अच्छे जाव पडिरूवे ।।

वृ. 'तस्स ण'मित्यादि, तस्य मूलप्रासादावतंसकस्य 'उत्तरपूर्वस्याम्' ईशानकोण इत्यर्थः, 'अत्र' एतस्मिन् भागे विजयस्य देवस्य योग्या सभा सुधर्मा नाम विशिष्टच्छन्दकोपेता साऽर्द्धत्रयोद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शयोजनान्यायामेन षट्सक्रोशानि योजनानि विष्कम्भेन नव योजनानि ऊर्द्धमुच्चैस्त्वेन 'अप्पेगे' त्यादि अनेकेषु स्तम्भशतेषु सन्निविष्टा अनेकस्तंभशतसन्निविष्टा 'अब्भुग्गयसुकयवरवेइया तोरणवररइय-सालभंजिया सुसिलिट्ठविसिट्ठलट्ठसंठियपसत्थवेरुलियविमलखंभा' अभ्युद्गता–अतिरमणीयतया द्रष्टणां प्रत्यभिमुखमुत्–प्राबल्येन स्थिता सुकृतेव सुकृता निपुणशिल्पिरचितेवेति भावः, अभ्युद्गता चासौ सुकृता च अभ्युद्गतसुकृता वज्रवेदिका–द्वारमुण्डकोपरि वज्ररत्नमयी वेदिका तोरणं चाभ्युद्गतसुकृतं यत्र सा तथा, तथा वराभि–प्रधानाभि रचिताभि–विरचिताभि रतिदाभिर्वा सालमञ्जिकाभि सुश्लिष्टा–संबद्धा विशिष्टं–प्रधानं लष्टं–मनोज्ञं संस्थितं–संस्थानं येषां ते विशिष्टलष्टसंस्थिताः प्रशस्ताः–प्रशंसास्पदीभूता वैडूर्यस्तम्भाः–वैडूर्यरत्नमयाः स्तम्भा यस्यां सा वररचितशालभञ्जिकासुश्लिष्टविसिष्टसंस्थितप्रशस्तवैडूर्यस्तम्भा।

ततः पूर्वपदेन कर्म्मधारयः, तथा नानामणिकनकरत्नानि खचितानि यत्र स नानामणिकनक-रत्नखचितः, निष्ठान्तस्य परनिपातो भार्यादिदर्शनात्, नानामणिकनकरत्नखचितः उज्वलो–निर्म्मलो बहुसमः–अत्यन्तसमः सुविभक्तो निचितो–निबिडो रमणीयश्च भूमिभागो यस्यां सा नानामणि-कनकरत्नखचितोज्वलबहुसमसुविभक्त (निचितरमणीय) भूमिभागा 'ईहामिगउसहतुरगनरमगर-बिहवालगकिन्नररुरुसरभचमरकुअरवणलयपउमलयभत्तिचित्ता' इति तथा स्तम्भोद्गतया–स्तम्भोपरिवर्त्तिन्या वज्रवेदिकया–वज्ररत्नमय्या वेदिकया परिगता सती याऽभिरामा स्तम्भोद्त-वज्रवेदिकापरिगताभिरामा 'विज्ञाहरजमलजुगलजंतजुत्ताविव अच्चिसहस्समालणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीयरूवा' इतिप्राग्वत् 'कंचणमणिरयणथूभियागा' इति काञ्चनमणिरत्नानां स्तूपिका–शिखरं यस्याः सा काञ्चनमणिरत्नस्तूपिकाका।

'नाणाविहपंचवण्णघंटापडागपरिमंडियग्गसिहरा' नानाविधाभि–नानाप्रकाराभिः पञ्चवर्णाभिर्घण्टाभि पताकाभिश्च परि–सामस्त्येन मण्डितमग्रशिखरं यस्याः सा नानाविधपञ्चवर्ण-घण्टापताकापरिमण्डिताग्रशिखरा 'धवला' श्वेता मरीचिकवचं–किरणजालपरिक्षेपं विनिर्मुञ्चन्ती 'लाउल्लोइयमहिया' इति लाइयं नाम यद् भूमेर्गोमयादिना उपलेपनम् उल्लोइयं–कुड्यानां मालस्य च सेटिकादिभिः संमृष्टीकरणं लाउल्लोइयं ताभ्यामिव महिता–पूजिता लाउल्लोइयमहिता, तथा गोशीर्षेण–गोशीर्षनामचन्दनेन सरसरक्तचन्दनेन दर्द्दरेण–बहलेन चपेटाकारेण वा दत्ताः पञ्चाङ्गुलयस्तला–हस्तका यत्र सा गोशीर्षकसरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितला, तथा उपचिता–निवेशिता वन्दनकलशा–मङ्गलकलशा यस्यां सा उपचितवन्दनकलशा 'चंदनघडसुकय-तोरणपडिदुवारदेसभागा' इति चन्दनकलशैः सुकृतानि–सुष्ठु कृतानि शोभनानीति तात्पर्यार्थः यानि तोरणानि तानि चन्दनघटसुकृतानि तोरणानि प्रतिद्वारदेशभागे यस्यांसा चन्दनघट-सुकृततोरणप्रतिद्वारदेशभागा।

तथा 'आसत्तोसत्तवट्टवग्घारिय मल्लदामकलावा' इति आ–अवाङ् अधोभूमौ सक्त आसक्तो भूमौ लग्न इत्यर्थः ऊध्र्ध्व सक्त उत्सक्तः–उल्लोचतले उपरिसंबद्ध इत्यर्थ, विपुलो–विस्तीर्ण वृत्तो–वर्त्तुलः 'वग्घारिय' इति प्रलम्बितो माल्यदामकलापः–पुष्पमालासमूहो यस्यां सा आसक्तोत्सक्तविपुलवृत्तवग्घारितमाल्यदामकलापा, तथा पञ्चवर्णेन सरसेन–सच्छायेन सुरभिणा

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

मुक्तेन—क्षिप्तेन पुष्पपुञ्जलक्षणेनोपचारेण—पूजया कलिता पञ्चवर्णसरससुरभिमुक्तपुष्पपुञ्जोपचार-कलिता 'कालागुरुपवरकुन्दुरुक्कतुरुक्कधूवमघमघेंतगंधुद्धुयाभिरामा सुगंधवरगंधगंधिया गंधवट्टिभूया' इति प्राग्वत्, 'अच्छरगणसंघसंविकिण्णा' इति अप्सरोगणानां सङ्घः—समुदायस्तेन सम्यग्—रमणीयतया विकीर्णाव्याप्ता 'दिव्वतुडियसद्दसंपणादिया' इति दिव्यानां त्रुटितानां—आतोद्यानां वेणुवीणामृदङ्गादीनां ये शब्दास्तैः सम्यक्—श्रोत्रमनोहारितया प्रकर्षेण नादिता—शब्दवती दिव्यत्रुटितसंप्रणादिता 'अच्छा सण्हा जाव पडिरूवा' इति प्राग्वत्।

'तीसे णं सभाए ण'मित्यादि, सभायाः सुधर्मायाः 'त्रिदिशि' तिसृषु दिक्षु एकैकस्यां दिशि एकैकद्वारभावेन त्रीणि द्वाराणि प्रज्ञप्तानि, तद्यथा—एकं पूर्वस्यामेकं दक्षिणस्यामेकमुत्तरस्याम्।

'ते णं दारा' इत्यादि, तानि द्वाराणि प्रत्येकं प्रत्येकं द्वे द्वे योजने ऊर्द्धमुच्चैस्त्वेन योजनमेकं विष्कम्भेन 'तावइयं चेवे'ति योजनेकं प्रवेशेन 'सेया वरकणगथूभियागा' इत्यादि प्रागुक्तं द्वारवर्णनं तदेतावद्वक्तव्यं यावद्वनमाला इति ॥ 'तेसि ण'मित्यादि, तेषां द्वाराणां पुरतः प्रत्येकं प्रत्येकं मुखमण्डपः प्रज्ञप्तः—, ते च मुखमण्डपा अर्द्धत्रयोदश योजनानि आयामेन, षड् योजनानि सक्रोशानि विष्कम्भेन, सातिरेके द्वे योजने ऊध्ध्वंमुच्चैस्त्वेन, एतेषामपि 'अनेगखंभसयसन्निविट्ठा' इत्यादि वर्णनं सुधर्म्मायाः सभाया इव निरवशेषं द्रष्टव्यं, तेषां मुखमण्डपानामुल्लोकवर्णनं बहुसमरमणीय-भूमिभागवर्णनं च यावन्मणीनां स्पर्शः प्राग्वत्।

'तेसि ण'मित्यादि, तेषां मुखण्डपानामुपि अष्टावष्टौ मङ्गलकानि—स्वस्तिकादीनि प्रज्ञप्तानि, तान्येवाह—'तंजहे'त्यादि, एतच्च विशेषणं सुधर्मासभाया अपि द्रष्टव्यम् ॥ 'तेसि ण'मित्यादि, तेषां मुखमण्डपानां पुरतः प्रत्येकं २ प्रेक्षागृहमण्डपः प्रज्ञप्तः, तेऽपि च प्रेक्षागृहमण्डपा अर्द्धत्रयोदश योजनान्यामेन, सक्रोशानि षड् योजनानि विष्कम्भेन, सातिरेके द्वे योजने ऊध्ध्वंमुच्चैस्त्वेन, प्रेक्षागृह- मण्डपानां च भूमिभागवर्णनं पूर्ववत्तावद्वाच्यं यावन्मणीनां स्पर्शः।

'तेसि ण'मित्यादि, तेषां च बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं वज्रमयः 'अक्षपाटकः' चतुरस्राकारः प्रज्ञप्तः, तेषां चाक्षपाटकानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका योजनमेकमायामविष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमईओ' इति सर्वात्मना मणिमय्यः 'अच्छा' इत्यादि विशेषणकदम्बकं प्राग्वत् ॥ 'तासि ण'मित्यादि, तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं सिंहासनं प्रज्ञपतानि, कृष्णमरध्वजादि च प्राग्वद्वक्तव्यम्।

'तेसि ण'मित्यादि, तेषां प्रेक्षागृहमण्डपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिकाः प्रत्येकं द्वे द्वे योजने आयामविष्कम्भाभ्यां योजनमेकं बाहल्येन सर्वात्मना मणिमय्यः अच्छा इत्यादि प्राग्वत् ॥ 'तासि ण'मित्यादि, तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यस्तूपाः प्रज्ञप्ताः, ते च चैत्यस्तूपाः सातिरेके द्वे योजने ऊध्ध्वंमुच्चैस्त्वेन द्वे योजने आयामविष्कम्भाभ्यां शङ्खाङ्ककुन्ददकरजोऽमृतमथितफेनपुञ्जसंनिकाशाः सर्वात्मना रत्नमया अच्छाः श्लक्ष्णा इत्यादि प्राग्वत् ॥ 'तेसि ण'मित्यादि, तेषां चैत्यस्तूपानामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृषमचामरध्वजा इत्यादि प्राग्वत् 'तेसि ण'मित्यादि, तेषां चैत्यस्तूपानां प्रत्येकं प्रत्येकं 'चतुर्दिशि' चतसृषु दिक्ष एकैकस्यां दिशि एकैकमणिपीठिकाभावेन चतस्त्र मणिपीठिकाः प्रज्ञप्ताः,

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ताश्च मणिपीठिका योजनमायामविष्कम्भाभ्यामर्द्ध योजनं बाहल्येन सर्वात्मना मणिमय्यः अच्छा इत्यादि प्राग्वत् ।

'तासि ण'मित्यादि, तासां मणिपीठिकानामुपरि एकैकस्या मणिपीठिकाया उपरि एकैकप्रतिमाभावेन चतस्रो जिनप्रतिमा जिनोत्सेधः—उत्कर्षतः पञ्च धनुःशतानि जघन्यतः सप्त हस्ताः, इह तु पञ्च धनुःशतानि संभाव्यन्ते, 'पलियंकनिसन्नाओ' इति पर्यङ्कासननिषण्णाः स्तूपाभिमुख्यस्तिष्ठन्ति, तद्यथा—ऋषभा वर्द्धमाना चन्द्राननना वारिषेणा ।। 'तेसि ण'मित्यादि, तेषां चैत्यस्तूपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका द्वे द्वे योजने आयामविष्कम्भाभ्यां योजनमेकं बाहल्येन सर्वात्मना मणिमय्यः अच्छा इत्यादि प्राग्वत् । तासांच मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यवृक्षाः प्रज्ञप्ताः । ते चैत्यृक्षा अष्टौ योजनान्यूर्द्धमुच्चैस्त्वेन अर्द्धयोजनमुत्सेधेन उण्डत्वेन द्वे योजने उच्चास्त्वेन स्कन्धः स एवार्द्ध योजनं विष्कम्भेन यावद्बहुमध्यदेशभागे ऊर्ध्वं विनिर्गता शाखा सा विडिमा सा षड् योजनान्यूर्द्धमुच्चैस्त्वेन, साऽपि चार्द्ध योजनं विष्कम्भेन, सर्वाग्रेण सातिरेकाण्यष्टौ योजनानि प्रज्ञप्तः । तेषां च चैत्यवृक्षाणामयमेतद्रूपो वर्णावासः प्रज्ञप्तः, तद्यथा—'वइरामया मूला रययसुपइट्ठिया विडिमा' वज्राणि—वज्ररत्नमयानि मूलानि येषां ते वज्रमूलाः, तथा रजता रजतमयी सुप्रतिष्ठिता विडिमा—बहुमध्यदेशभागे ऊर्द्धविनिर्गता शाखा येषां ते रजतसुप्रतिष्ठितविडिमा, ततः पूर्वपदेन कर्म्मधारयसमासः ।

'रिट्ठमयकरंदवेरुलियरुचिरखंधी' रिष्ठमयो—रिष्ठरत्नमयः कन्दो येषां ते रिष्ठरत्नमयकन्दाः, तथा वैडूर्यो—वैडूर्यरत्नमयो रुचिरः स्कन्धो येषां ते तथा, ततः पूर्वपदेन कर्म्मधारयसमासः, 'सुजायवरजायरूवपढमगविसालसाला' सुजातं—मूलद्रव्यशुद्धं वरं—प्रधानं यज्ञातरूपं तदात्मका प्रथमका—मूलभूता विशाला शाला—शाखा येषां ते सुजातवरजातरूपप्रथमकविशालशालाः 'नानामणिरयणविविहसाहप्पसाहवेरुलियपत्ततवणिज्जपत्तवेंटा' नानामणिरत्नानां नानामणिरत्नात्मिका विविधाः शाखाः प्रशाखाश्च येषां ते तथा, वैडूर्याणि वैडूर्यमयानि पत्राणि येषां ते तथा, तथा तपनीयानि—तपनीयमयानि पत्रवृन्तानि येषां ते तथा, ततः पूर्ववत्पदद्वयपदद्वयमीलनेन कर्म्मधारयः ।

जाम्बूनदा—जाम्बूनदनामकसुवर्णविशेषमया रक्ता—रक्तवर्णा मृदवो—मनोज्ञाः सुकुमाराः—सुकुमारस्पर्शा ये प्रवाला—ईषदुन्मीलितपत्रभावाः पल्लवाः—संजातपरिपूर्णप्रथमपत्रभावरूपा वराङ्कुराः—प्रथममुद्भिद्यमाना अङ्कुरास्तान् धरन्तीति जाम्बूनदरक्तमृदुसुकुमारप्रवालपल्लवाङ्कुरधराः, क्वचित्पाठः 'जंबूनयरत्तमउयसुकुमालकोमलपवालपललवङ्कुरग्गसिहरा' तत्र जाम्बनदानि रक्तानि मृदूनि—अकठिनानि सुकुमाराणि—अकर्कशस्पर्शानि कोमलानि—मनोज्ञानि प्रवालपल्लवाङ्कुराः—यथोदितस्वरूपा अग्रशिखराणि च येषां ते तथा, 'विचित्तमणिरयणसुरभिकुसुमफलभरेण नमियसाला' विचित्रमणिरत्नानि—विचित्रमणिरत्नमयानि यानि सुरभीणि कुसुमानि फलानि च तेषां भरेण नमिता—नामं ग्राहिताः शालाः—शाखा येषां ते तथा, सती—शोभना छाया येषां ते सच्छायाः, तथा सतीशोभना प्रभा—कान्तिर्येषां ते सप्रभाः, सह उद्योते वर्तन्ते मणिरत्नानामुदद्योतभावात् सोद्द्योताः, अधिकं—अतिशयेन नयनमनोनिर्वृतिकराः, अमृतरससमरसानि फलानि येषां ते अमृतरससफलाः 'पासाईया' इत्यादि विशेषणचतुष्टयं प्राग्वत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ते णं चेइयरुक्खा' इत्यादि, ते चैत्यवृक्षा अन्यैर्बहुभिस्तिलकलवङ्गछत्रोपगशिरीषसप्तपर्णदधिपर्णलोध्रधवचन्दननीपकुटजकदम्बपनसतालतमालप्रियालप्रियङ्गुपारापतरा जृक्षनन्दिवृक्षैः सर्वतः समन्तात्संपरिक्षिप्ताः ।। 'ते णं तिलगा' इत्यादि, ते तिलका यावन्नन्दिवृक्षा मूलवन्तः कन्दवन्त इत्यादि वृक्षवर्णनं प्राग्वत्तावद्वक्तव्यं यावदनेकशकटरथयानशिबिकास्यन्दमानिकाप्रतिमोचनासुरम्या इति ।। 'ते णं तिलगा' इत्यादि, ते तिलका यावन्नन्दिवृक्षा अन्याभिर्बहुभिः पद्मलताभिनागलताभिरशोकतलताभिश्चम्पकलताभिश्चूलताभिर्वनलताभिर्वासन्तिकालताभिरतिमुक्तकलताभि कुन्दलताभि श्यामलताभि सर्वतः समन्तात्संपरिक्षिप्ताः, 'ताओ णं पउमलयाओ जाव सामलयाओ निच्चं कुसुमियाओ' इत्यादिलतावर्णनं तावद्वक्तव्यं यावत् 'पडिरूवाओ' इति, व्याख्या चास्य पूर्ववत् ।

'तेसि ण' मित्यादि, तेषां चैत्य वृक्षाणामुपरि अष्टावष्टौ मङ्गलानि बहवः, तेषां चैत्यवृक्षाणां पुरतः प्रत्येकं प्रत्येकं मणि पीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका योजनमायामविष्कम्भाम्यामर्द्धयोजनं बाहल्येन सर्वात्मना मणिमय्यः, अच्छा इत्यादि प्राग्वत् ।। 'तासि ण' मित्यादि तासां मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं महेन्द्रध्वजः प्रज्ञप्तः, ते च महेन्द्रध्वजा 'अर्द्धाष्टमानि' सार्द्धानि सप्त योजनान्यूर्ध्वमुच्चैस्तेन, अद्धक्रोशं- धनुः सहप्रमाणमुद्वेधेन, अर्द्धक्रोशं- धनुः सहस्रप्रमाणं विष्कम्भेन विस्तारेण, "वइरामयवट्टलट्ठसंठियसुसिलिट्ठपरिघट्ठमट्ठसुपइट्ठिया" इति वज्रमयावज्ररत्नमयाः तथा वृतं- वर्तुलं लष्टं मनोज्ञं संस्थितं-संस्थानं येषां ते वृत्त लष्ट संस्थिताः, तथा सुश्लिष्टा यथा भवन्ति एवं परिघृष्टा इव खरशानया पाषाण प्रतिमेव सुश्लिष्ट परिघृष्टाः मृष्टाः सुकुमारशानया पाषाणप्रतिमेव सुप्रतिष्ठिता मनागप्य चलनात्, 'अनेगवरपंचवण्ण कुडभी सहस्स परिमंडिया भिरामाः' अनेकैर्वरैः -प्रधानैः पञ्च वर्णैः कुडभीसहैः- लघुपताका सहैः परिमण्डिताः सन्तोभिरामा अनेकवरपञ्च वर्णकुऽभी सहस्र परिमण्डिताभिरामाः "वाउद्धुयविजयवेजयंती पडागा" छत्ताइछत्तकलिया तुंगा गगनतलमनुलिहंतसिहरा पासाईया जाव पडिरुवा" इति प्राग्वत्

'तेसि ण' मित्यादि, तेषां महेन्द्रध्वजानामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा इत्यादि पूर्ववत् सर्वं वक्तव्यं यावद्बहवः सहस्रपत्रकहस्तका इति ।। 'तेसि ण' मित्यादि, तेषां महेन्द्रध्वजानां पुरतः प्रत्येकं प्रत्येकं 'नन्दा' नन्दाभिधाना पुष्करिणी प्रज्ञप्ता, 'अर्द्धत्रयोदश' सार्द्धानि द्वादश योजनानि आयामेन, षड् योजनानि सक्रोशानि विष्कम्भेन, दश योजनान्युद्वेधेन--उण्डत्वेन, 'अच्छासो सण्हाओ रययमयकूडाओ' इत्यादि वर्णनं जगत्युपरिपुष्करिणीवन्निरवशेषं वक्तव्यं यावत् 'पासाईयाओ उदगरसेणं पन्नत्ताओ' ताश्च नन्दापुष्करिण्यः प्रत्येकं २ पद्मवरवेदिकया प्रत्येकं २ वनषण्डेन च परिक्षिप्ताः, तासां च नन्दापुष्करिणीनां त्रिदिशि त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि तेषां च वर्णनं तोरणवर्णनं च प्राग्वत् ।

'सभाए णं सुहम्माए' इत्यादि, सभायां सुधर्मायां षड् (मनो) गुलिकासहस्राणि प्रज्ञप्तानि, तद्यथा—द्वे सहस्रे पूर्वस्यां दिशि द्वे पश्चिमायामेकं सहस्रं दक्षिणस्यामेकमुत्तरस्यामिति, एतासु च फलकनागदन्तकमाल्यदामवर्णनं प्राग्वत् ।। 'सभाए णं सुहम्माए' इत्यादि, सभायां सुधर्मायां षड् गोमानसिकाः—शय्यारूपाः स्थानविशेषास्तासां सहस्राणि प्रज्ञप्तानि, तद्यथ-द्वे सहस्र पूर्वस्यां दिशि द्वे पश्चिमायामेकं दक्षिणस्यामेकमुत्तरस्यामिति, तास्वपि फलकवर्णनं नागदन्तवर्णनं धूपघटिकावर्णनं च विजयद्वारवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सभाए णं सुहम्माए' इत्यादि उल्लोकवर्णनं 'सभाए णं सुहम्माए' इत्यादि भूमिभागवर्णनं च प्राग्वत् ॥

मू. (१७६) *तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगा महं मणिपीढिया पन्नत्ता, सा णं मणिपीढिया दो जोयणाइं आयामविक्खंभेणं जोयणं बाहल्लेणं सव्वमणिमता। तीसे णं मणिपीढियाए उप्पिं एत्थ णं भावनाए नाम चेइयखंभे पन्नत्ते अद्धट्ठमाइं जोयणाइं उड्ढं उच्चत्तेणं अद्धकोसं उव्वेहेणं अद्धकोसं विक्खंभेणं छकोडीए छलंसे छविग्गहिते वइरामय- वट्टलट्ठसंठिते, एवं जहा महिंदज्झयस्स वण्णओ जाव पासातीए।*

तस्स णं माणवकस्स चेतियखंभस्स उवरिं छक्कोसे ओगाहित्ता हेट्ठावि छक्कोसे वज्रेत्ता मज्झे अद्धपंचमेसु जोयणेसु एत्थ णं बहवे सुवण्णरुप्पमया फलगा पं०, तेसु णं सुवण्णरूप्पमएसु फलएसु बहवे वइरामया नागदंता पन्नत्ता, तेसु णं वइरामएसु नागदंतएसु बहवे रययामता सिक्कगा पन्नत्ता। ते पु णं रययामयसिक्कएसु बहवे वइरामया गोलवट्टसमुग्गका पण्णत्ता, तेसु णं वइरामएसु गोलवट्टसमुग्गएसु बहवे जिनसकहाओ संनिक्खित्ताओ चिट्ठंति, जाओ णं विजयस्स देवस्स अन्नेसिं च बहूणं वाणमंतराणं देवाम य देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूयणिज्जाओ सक्करणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं देवयं चेतियं पज्जुवासणिज्जाओ। माणवस्स णं चेतियखंभस्स उवरिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता।

तस्स णं माणवकस्स चेतियखंभस्स पुरच्छिमेणं एत्थ णं एगा महामणिपेढिया पं०, सा णं मणिपेढिया दो जोयणाइं आयामविक्खंभेणं जोयणं बाहल्लेणं सव्वमणिमई जाव पडिरूवा॥ तीसे णं मणिपेढियाए उप्पिं एत्थ णं एगे महं सीहासणे पन्नत्ते, सीहासणवण्णओ।

तस्स णं माणवगस्स चेतियखंभस्स पच्चत्थिमेणं एत्थ णं एगा महं मणिपेढिया पं० जोयणं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमती अच्छा॥ तीसे णं मणिपेढियाए उप्पिं एत्थ णं एगे महं देवसयणिज्जे पन्नत्ते, तस्स णं देवसयणिज्जस्स अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा—

नानामणिमया पडिपादा सोवण्णिया पादा नानामणिमया पायसीसा जंबूणयमयाइं गत्ताइं वइरामया संधी नानामणिमते चिच्चे रइयामता तूली लोहियक्खमया बिब्बोयणा तवणिज्जमती गंडोवहाणिया, से णं देवसयणिज्जे उभओ विब्बोयणे दुहओ उण्णए म्झेणयगंभीरे सालिंगणवट्टीए गंगापुलिनवालुउद्दालसालिसए ओतवितक्खोमदुगुल्लपट्टपडिच्छायणे सुविरचितरयत्ताणे रत्तंसुयसंवुते सुरम्मे आईणगरूतबूरणवणीयतूलफासमउए पासाईए।

तस्स णं देवसयणिज्जस्स उत्तरपुरत्थिमेणं एत्थ णं महई एगा मणिपीठिका पन्नत्ता जोयणमेगं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमई जाव अच्छा॥ तीसे णं मणिपीढियाए उप्पिं एगं महं खुड्डए महिंदज्झए पन्नत्ते अद्धट्ठमाइं जोयणाइं उड्ढं उच्चत्तेणं अद्धकोसं उव्वेधेणं अद्धकोसं विक्खंभेणं वेरुलियामयवट्टलट्ठसंठिते तहेव जाव मंगला झया छत्तातिछत्ता।

तस्स णं खुड्डमहिंदज्झयस्स पच्चत्थिमेणं एत्थ णं विजयस्स देवस्स चुप्पालए नाम पहरणकोसे पन्नत्ते। त्थ णं विजयस्स देवस्स फलिहरयणपामोक्खा बहवे पहरणरयणा संनिक्खित्ता चिट्ठंति, उज्जलसुणिसियसुतिक्खधारा पासाईया।

तीसे णं सभाए सुहम्माए उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'तस्स णं बहुसमरमणीयस्स भूमिभागस्से'त्यादि, तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे, अत्र महती एका मणिपीठिका प्रज्ञप्ता, द्वे योजने आयामविष्कम्भाभ्यामेकं योजनं बाहल्येन सर्वात्मना मणिमयी 'अच्छा' इत्यादि प्राग्वत्। 'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपरि महानेको माणवकनामा चैत्यस्तम्भः प्रज्ञप्तः, अर्द्धाष्टमानि–सार्द्धानि सप्त योजनान्यूर्द्धमुच्चैस्त्वेन अर्द्धक्रोशं–धनुःसहस्रमानमुद्वेधेन, अर्द्धक्रशं विष्कम्भेन षडस्रिकः–षटकोटीकः षड्विग्रहिकः 'वइरामयवट्टलट्ठसंठिए' इत्यादि महेन्द्रध्वजवद् वर्णनमशेषमस्यापि तावद्वक्तव्यं यावद् 'बहवो सहस्पत्तइत्थगा सव्वरणामया अच्छा जाव पडिरूवा' इति।

'तस्स ण'मित्यादि, तस्य माणवकस्य चैत्यस्तम्भस्योपरि षट् क्रोशान् अवगाह्य उपरितनभागात् षट् क्रोशान् वर्जयित्वेति भावः, अधस्तादपि षट् क्रोशान् वर्जयित्वा मध्येऽर्द्धपञ्चमेषु योजनेषु बहवे 'सुवण्णरूप्पमया फलगा' इत्यादिफलकवर्णनं नागदन्तवर्णनं सिक्कगवर्णनं च प्राग्वत्।

'तेसु ण'मित्यादि, तेषु रजतमयेषु सिक्ककेषु बहवो वज्रमया गोलवृत्ताः समुद्रकाः, तेषु च वज्रमयेषु समुद्रकेषु बहूनि जिनसक्थीनि संनिक्षिप्तानि तिष्ठन्ति तानि विजयस्य देवस्यान्येषां च बहूनां वानमन्तराणां देवानां देवीनां चार्चनीयानि चन्दनतः वन्दनीयानि स्तुत्यादिना पूजनीयानि पुष्पादिना गाननीयानि बहुमानकरणतः सत्कारणीयानि वस्त्रादिना कल्याणं मङ्गलं दैवतं चैत्यमितिबुद्धया पर्युपासनीयानि। 'तस्स ण'मित्यादि, तस्य माणवकस्य चैत्यस्तम्भस्य पूर्वस्यां दिशि अत्र महत्येका मणिपीठिका प्रज्ञप्ता, योजनमेकमायामविष्कम्भाभ्यामर्द्धयोजनं बाहल्येन सर्वात्मना मणिमयी 'अच्चा' इत्यादि प्राग्वत्।

'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपरि अत्र महदेकं सिंहासनं प्रज्ञप्तं तद्वर्णनं शेषाणि च भद्रासनानि तत्परिवारभूतानि प्राग्वत्। 'तस्स ण'मित्यादि, तस्य माणवकना म्नश्चैत्यस्तम्भस्य पश्चिमायां दिशि अत्र महत्येका मणिपीठिकाया उपरि अत्र महदेकं (दिव) शयनीयं प्रज्ञप्तं, तस्य च देवशयनीयस्यायमेतद्रूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा–नानामणिमयाः प्रतिपादाः–मूलपादानां प्रतिविशिष्टोपष्टमभ्करणाय् पादाः प्रतिपादाः 'सौवर्णिकाः' सुवर्णमयाः 'पादाः' मूलपादाः, जाम्बूमदमयानि गात्राणि–ईषादीनि वज्रमया वज्ररत्नपूरिताः सन्धयः, 'नानामणिमये चिच्चे' इति चिच्चं नाम च्युतं वानमित्यर्थ, नानामणिमयं च्युतं–विशिष्टवानं रजतमयी तुली लोहिताक्षमयानि 'बिब्बोयणा' इति उपधआनखआनइष आह च मूलटीकाकारः– ''विव्वोयणा–उपधानकानि उच्यन्त'' इति, तपनीयमय्यो गण्डोपधानकाः।

से णं देवसयणिज्जे' इत्यादि, तद् देवशयनीयं 'सालिङ्गनवर्त्तिकं' सह आलिङ्गनवर्त्या–शरीरप्रमाणेनोपधाने यद् तत्तथा 'उभओविव्वोयणे' इति उभयतः–उभौ–शिरोऽन्तपादान्तावाश्रिय् विव्वोयणे–उपधाने यत्र यद् उभयतोविव्वोयणं 'दुहतो उन्नते' इति उभयत उन्नतं 'मज्झेणयगंभीरे' इति, मध्ये च नतं निम्नत्वाद् गम्भीरं च महत्वात् नतगम्भीरं गङ्गालिनवालुकाया अवदालो–विदलनं पादादिन्यासेऽधोगमनमिति भावः तेन 'सालिसए' इत सद्दशकं गङ्गापुलिनवालुकावदालसद्दशं, तथा 'ओयविय' इति विशिष्टं परिकर्मितं क्षौमं–कार्पासिकं दुकूलं–वस्तंर तदेव पट्ट ओयवियक्षौमदुकूलपट्टः स प्रतिच्छादनं–आच्छादनं यस्य तत्तथा, 'आईणगरूयबूरनवनीयतूलफासे' इति प्राग्वत्, 'रत्तसुयसंवुए' इति रक्तांशुकेन संवृतं रक्तांशुकसंवृतम्, अत एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरम्यं 'पासाइए' इत्यादि पदचतुष्टयं प्राग्वत् ।

'तस्स णं' मित्यादि, तस्य देवशयनीयस्य उत्तरपूर्वस्यां दिशि अत्रम महत्येका मणिपीठिका प्रज्ञप्ता, योजनमेकमायामविष्कम्भाभ्यामर्द्धयोजनं बाहल्येन 'सव्वमणिमयी अच्छा' इत्यादि प्राग्वत् 'तीसे णं' मित्यादि, तस्या मणिपीठिकाया उपरि अत्र क्षुल्लको महेन्द्रध्वजः प्रज्ञप्तः, तस्य प्रमाणं च वर्णकश्च महेन्द्रध्वजद्वक्तव्यः ॥ 'तस्स णं' मित्यादि, तस्य क्षुल्लकरज महेन्द्रध्वजस्य पश्चिमायां दिशि अत्र विजयस्य देवस्य सम्बन्धी महान् एकश्चोप्पालो नाम 'प्रहरणकोशः' प्रहरणस्थानं प्रज्ञप्तं, किंविशिष्टमित्याह— 'सव्ववइरामए अच्छे जाव पडिरूवे' इति प्राग्वत् ।

'तत्थ णं' मित्यादि, तत्र चोप्पालकाभिधाने प्रहरणकोशे बहूनि परिघरत्नप्रमुखाणि प्रहरणरत्नानि संक्षिप्तानि तिष्ठन्ति, कथम्भूतानीत्यत आह—उज्वलानि—निर्मलानि सुनिशितानि—अतितेजितानि अत एव तीक्ष्णधाराणि प्रासादीयानीत्यादि प्राग्वत् ॥ 'तीसे णं सभाए' इत्यादि तस्याः सुधर्म्मायाःसमाया उपरि बहून्यष्टावष्टौ मङ्गलकानि, इत्यादि सर्वं प्राग्वत्तावक्तव्यं यावद्बहवः सहस्रपत्रहस्तकाः सर्वरत्नमया अच्छा यावत्प्रतिरूपाः ॥

मू. (१७७) सभाए णं सुधम्माए उत्तरपुरत्थिमेणं एत्थ णं एगे महं सिद्धायतने पन्नत्ते अद्धतेरस जोयणाइं आयामेणं छजोयणाइं सकोसाइं विक्खंभेणं नव जोयणाइं उड्ढं उच्चत्तेणं जाव गोमाणसिया वत्तव्वया जा चेव सहाए सुहम्माए वत्तव्वया सा चेव निरवसेसा भाणियव्वा तहेव दारा मुहमंडवा पेच्छाघरमंडवा झया थूभा चेइयरुक्खा महिंदज्झया नंदाओ पुक्खरिणीओ, तओ य सुधम्माए जहा पमाणं मनगुलियाणं गोमाणसीया धूवयघडिओ तहेव भूमिभागे उल्लोए य जाव मणिफासे ॥ तस्स णं सिद्धायतनस्स बहुमज्झदेसभाए एत्थ णं एगा महं मणिपेढिया प० दो जोयणाइं आयामविक्खंभेणं जोयणं बाहल्लेणं सव्वमणिमयी अच्छा०, तीसे णं मणिपेढियाए उप्पिं एत्थ णं एगं महं देवच्छंदए प० दो जोयणाइं आयामविक्खंभेणं साइरेगाइं दो जोयणाइं उड्ढं उच्चत्तेणं संनिखित्तं चिट्ठइ । तासि णं जिनपडिमाणं अयमेयारूवे वण्णावासे प०

तवणिज्जमता हत्थतला अंकामयाइं नक्खाइं अंतोलोहियक्खपरसेयाइं कणगमया पादा कणगामया गोप्फा कणगामतीओ जंघाओ कणगामया जाणू कणगामया ऊरू कणगामयाओ गायलट्ठीओ तवणिज्जमतीओ नाभीओ रिट्ठामतीओ रोमरातीओ तवणिज्जमया चुच्चुया तवणिज्जमता सिरिवच्छा कणगमयाओ बाहाओ कणगमईओ पासाओ कणगमतीओ गीवाओ रिट्ठामते मंसु सिलप्पवालमया उट्ठा फलिहामया दंता तवणिज्जमतीओ जीहाओ तवणिज्जमया तालुया कणगमतीओ नासाओ अंतोलोहितक्खपरिसेयाओ अंकामयाइं अच्छीणि अंतोलोहितक्खपरि-सेताइं पुलगमतीओ दिट्ठीओ रिट्ठामतीओ तारगाओ रिट्ठामयाइं अच्छिपत्ताइं रिट्ठामतीओ भमुहाओ कणगामया कवोला कणगामया सवणा कणगामया निडाला वट्टा वइरामतीओ सीसघडीओत-वणिज्जमतीओ केसंतकेसभूमीओ रिट्ठामया उवरिमुद्धजा ।

तासि णं जिनपडिमाणं पिट्ठतो पत्तेयं पत्तेयं छत्तधारपडिमाओ पन्नत्ताओ, ताओ णं छत्तधारपडिमाओ हिमरततकुंदेंदुसप्पकासाइं सकोरेंटमल्लदामधवलाइं आतपत्तातिं सलीलं ओहारमाणीओ चिट्ठंति । तासि णं जिनपडिमाणं उभओ पासिं पत्तेयं पत्तेयं चामरधारपडिमाओ पन्नत्ताओ, ताओ णं चामरधारपडिमाओ चंदप्पहवइरवेरुलियनाणामणिकणगरयणा-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वमलमहरिहतवणिज्जुज्जल- विचित्तदंडाओ चिल्लियाओ सलीलं ओहारेमाणीओ चिट्ठंति।

तासि णं जिनपडिमाणं पुरतो दो दो नागपडिमाओ दो २ जक्खपडिमाओ दो २ भूतपडिमाओ दो २ कुंडधारपडिमाओ विनओणयाओ पायवडियाओ पंजलिउडाओ संनिक्खित्ताओ चिट्ठंति सव्वरयणामतीओ अच्छाओ सण्हाओ लण्हाओ घट्ठाओ मट्ठाओ नीरयाओ निप्पंकाओ जाव पडिरूवाओ। तासि णं जिनपडिमाणंपुरतो अट्ठसतं घंटाणं अट्ठसतं चंदनकलसाणं एवं अट्ठसतं भिंगारगाणं एवं आयंसगाणं थालाणं पातीणं सुपतिट्ठकाणं मणगुलियाणं वातकरगाणं चित्ताणं रयणकरंडगाणं हयकंठगाणं जाव उसभकंठगाणं पुप्फचंगेरीणं जाव लोमहत्थचंगेरीणं पुप्फपडलगाणं अट्ठसयं तेल्लसमुग्गाणं जाव धूवगडच्छुयाणं संनिखित्तं चिट्ठति।

तस्स णं सिद्धायतनस्स णं उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्तातिछत्ता उत्तिमागारा सोलसविहेहिं रयणेहिं उवसोभिया तंजहा–रयणेहिं जाव रिट्ठेहिं॥

वृ. 'सभाए ण'मित्यादि, सभायाः सुधर्म्माया उत्तरपूर्वस्यां दिशि अत्र महदेकं सिद्धायतनं प्रज्ञप्तम्, अर्द्धत्रयोदश योजनान्यायामेन षट् सक्रोशानि योनजानि विष्कम्भतो नव योजनान्यूर्ध्वमुच्चैस्त्वेनेत्यादि सर्वं सुधर्म्मावद्वक्तव्यं यावद् गोमानसीवक्तव्यता, तथा चाह– 'जा चेव सभाए सुधम्माए वत्तव्वया सा चेव निरवसेसा भाणियव्वा जावःगोमाणसियाओ' इति, किमुक्तं भवति? –यथा सुधर्म्मायाः सभायाः पूर्वदक्षिणोत्तरवर्त्तीनि त्रीणि द्वाराणि, तेषां च द्वाराणां पुरतो मुखमण्डपाः, तेषां च मुखमण्डपानां पुरतः प्रेक्षागृहमण्डपाः, तेषां च प्रेक्षागृहमण्डपानां पुरतश्चैत्यस्तूपाः सप्रतिमाः, तेषां च चैत्यस्तूपानां पुरतश्चैत्यवृक्षाः, तेषांचचैत्यवृक्षाणां पुरतो महेन्द्रध्वजाः, तेषां च महेन्द्रध्वजानां पुरतो नन्दापुष्करिण्य उक्ताः, तदनन्तरं च सभायां सुधर्म्मायां षड् गुलिकासहस्राणि षड् गोमानसीसहस्राण्यप्युक्तानि तथाऽत्रापि सर्वमनेनैव क्रमेण निरवशेषं वक्तव्यम्, उल्लोकवर्णनं बहुसमरमणीयभूमि- भागवर्णनमपि तथैव॥

'तस्स ण'मित्यादि, तस्य (सिद्धायतनस्य) बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र महत्येका मणिपीठिका प्रज्ञप्ता द्वे योजने आयामविष्कम्भाभ्यां योजनमेकं बाहल्येन सर्वमणिमयी अच्छा इत्यादि प्राग्वत्। तस्माश्च मणिपीठिकाया उपरि अत्र महानेको देवच्छन्दकः प्रज्ञप्तः सातिरेके द्वे योजने ऊर्ध्वमुच्चैस्त्वेन द्वे योजने आयामविष्कम्भाभ्यां सर्वात्मना रत्नमया अच्छा इत्यादि प्राग्वत् 'तत्थ ण'मित्यादि, तत्र देवच्छन्दके 'अष्टशतम्' अष्टाधिकं शतं जिनप्रतिमानां जिनोत्सेधप्रमाणमात्राणां पञ्चधनुःशतप्रमाणानामिति भावः सन्निक्षिप्तं तिष्ठति।

'तासि णं जिनपडिमाण'मित्यादि, तासां जिनप्रतिमानामयमेतद्रूपो 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तपनीयमयानि हस्ततलपादतलानि 'अङ्कमयाः' अङ्करत्नमया अन्तः–मध्ये लोहिताक्षरत्नप्रतिषेका नखाः, कनकमय्यो जङ्घाः, कनकमयानि जानूनि, कनकमया ऊरवः, कनकमय्यो गात्रयष्टयः, तपनीयमया नाभयः, रिष्ठरत्नमय्यो रोमराजयः, तपनीयमयाः 'चुच्चुकाः' स्तनाग्रभागाः, तपनीयमया–श्रीवृक्षा (वत्साः) 'शिलाप्रवालमयाः' विद्रुममया ओष्ठाः, स्फटिकमया दन्ताः, तपनीयमय्यो जिह्वाः, तपनीयमयानि तालुकानि, कनकमय्यो नासिकाः अन्तर्लोहिताक्षरत्नप्रतिसेकाः, अङ्कमयानि अक्षीणि अन्तर्लोहिताक्षप्रतिसेकानि, रिष्ठरत्नमय्योऽक्षिमध्यगतातारिकाः, रिष्ठरत्नमयानि अक्षिपत्राणि, रिष्ठरत्नमय्यो भ्रुवः, कनकमयाः कपोलाः, कनकमयाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रवणाः, कनकमय्यो ललाटपट्टिकाः, वज्रमय्यः शीर्षघटिकाः, तपनीयमय्यः केशान्तकेशभूमयः, केशानामन्तभूमयः केशभूमयश्चेति भावः, रिष्ठमया उपरि मूर्द्धजाः—केशाः, तासां जिनप्रतिमानां पृष्ठत एकैका छत्रधरप्रतिमा हेमरजतकुन्देन्दु (समान) प्रकाशं सकोरिंटमाल्यदामधवलमातपत्रं गृहीत्वा सलीलं धरन्ती तिष्ठति। 'तासि णं जिणपडिमाण'मित्यादि, तासां जिनप्रतिमानां प्रत्येकमुभयोः पार्श्वयोर्द्वे द्वे चमरधारप्रतिमे प्रज्ञप्ते, 'चंदप्पभवइरवेरुलियनानामणिरयणखचितदंडाओ' इति चन्द्रप्रभः— चन्द्रकान्तो कजं वैडूर्यं च प्रतीतं चन्द्रप्रभवज्रवैडूर्याणि शेषाणि च नानामणिरत्नानि खचित्तानि येषु दण्डेषु ते तथा, एवंरूपाश्चित्राः—नानाप्रकारा दण्डा येषां तानि तथा, सूत्रे स्त्रीत्वं प्राकृतत्वात्, 'सुहुमरययदीहवालाओ' इति सूक्ष्माः—श्लक्ष्णा रजतस्य—रजतमया वाला येषा तानि तथा, 'संखंककुंददगरयअमयमहियफेणपुंजसन्निकासाओ धवलाओ चामराओ' इति प्रतीतं चामराणि गृहीत्वा सलीलं वीजयन्त्यस्तिष्ठन्ति।

'तासि ण'मित्यादि, तासां जिनप्रतिमानां पुरतो द्वे द्वे नागप्रतिमे द्वे द्वे यक्षप्रतिमे द्वे द्वे भूतप्रतिमे द्वे द्वे कुण्डधारपरतिमे संनिक्षिप्ते तिष्ठतः, ताश्च 'सव्वरयणामईओ अच्छाओ' इत्यादि प्राग्वत्। 'तत्थण'मित्यादि, 'तस्मिन्' देवच्छन्दके जिनप्रतिमानां पुरतोऽष्टशतं घण्टानामष्टशतं चन्दनकलशानामष्टशतं भृङ्गाराणामष्टशतमादर्शानामष्टशतं स्थालानामष्टशतं पात्रीणामष्टशतं सुप्रतिष्ठानामष्टशतं मनोगुलिकानां—पीठिकाविशेषरूपाणामष्टशतं वातकरकाणामष्टशतं चित्राणां रत्नकरण्डकाणामष्टशतं हयकण्ठानामष्टशतं गजकण्ठानामष्टशतं नरकण्ठानामष्टशतं किंनरकण्ठानामष्टशतं किंपुरुषकणठानामष्टशतं महोरगकण्ठानामष्टशतं गन्धर्वकण्ठानामष्टशतं वृषभकण्ठानामष्टशतं पुष्पचङ्गेरीणामष्टशतं माल्यचङ्गेरीणामष्टशतं चूर्णचङ्गेरीणामष्टशतं गन्धचङ्गेरीणामष्टशतं वस्त्र चङ्गेरीणामष्टशतमाभरणचङ्गेरीणामष्टशतं लोमहस्तचङ्गेरीणां लोमहस्तका—मयूरपिच्छपुञ्जनिकाः अष्टशतं पुष्पपटलकानामष्टशतंमाल्यपटलकानां मुल्लानि पुष्पाणि ग्रथितानि माल्यानि अष्टशतं चूर्णपटलकानाम्, एवं गन्धवस्त्रभरणसिद्धार्थलोमहस्तकपटलकानामपि प्रत्येकं प्रत्येकमष्टशतं वक्तव्यम्, अष्टशतं सिंहासनानामष्टशतं छत्राणामष्टशतं चामराणामष्टशतं तैलसमुद्रकानामष्टशतं कोष्ठसमुद्रकानामष्टशतं चोयकसमुद्गकानामष्टशतं तगरसमुद्गकानामष्टशतमेलासमुद्गकानामष्टशतं हरितालसमुद्गकानामष्टशतं हिङ्गुलकसमुद्गकानामष्टशतं मनःशिलासमुद्गकानामष्टशतं अंजनसमुद्गकानां, सर्वाण्यप्येतानि तैलादीनि परमसुरभिगन्धोपेतानि द्रष्टव्यानि, अष्टशतं ध्वजानाम्, अत्र सङ्ग्रहणिगाथे—

॥१॥ "वंदनकलसा भिंगारगा य आयंसगा य थाला य।
पाईओ सुपइट्ठा मणगुलिया वायकरगा य॥
॥२॥ चत्ता रयणकरंडा हयगयनरकंठगा य चंगेरी।
पडला सिंहासणछत्तचामरा समुग्गयक(जु)या य॥

अष्टशतं धूपकडुच्छुकानां संनिक्षिप्तं तिष्ठति॥ 'तस्स ण'मित्यादि, तस्य सिद्धायतनस्य उपरि अष्टावष्टौ मङ्गलकानि, ध्वजच्छत्रातिछत्रादीनि तु प्राग्वत्॥

मू. (१७८) *तस्स णं सिद्धायतनस्स णं उत्तरपुरत्थिमेणं एत्थ णं एगा महं उववायसभा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नत्ता जहा सुधम्मा तहेव जाव गोमाणावीओ उववायसभाएवि दारा मुहमंडवा सव्वं भूमिभागे तहेव जाव मणिफासो । तस्सणं बहुसमरमणिज्ञस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगा महं मणिपेढिया पन्नत्ता जोयणं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमती अच्छा, तीसे णं मणिपेढियाए उप्पिं एत्थ णं एगे महं देवसयणिज्ञे पन्नत्ते, तस्स णं देवसयणिज्ञस्स वण्णओ, उववायसभाए णं उप्पिं अट्ठट्ठमंगला झया छत्तातिछत्ता जाव उत्तिमागारा।

तीसे णं उववायसभाए उत्तरपुरच्छिमेणं एत्थ णं एगे महं हरए पन्नत्ते, से णं हरए अद्धतेरसजोयणाइं आयामेणं छक्कोसातिं जोयणाइं विक्खंभेणं दस जोयणाइं उव्वेहेणं अच्छे सण्हे वण्णओ जहेव नंदाणं पुक्खरिणीणं जाव तोरणवण्णओ, तस्स णं हरतस्स उत्तरपुत्थिमेणं एत्थ णं एगा महं अभिसेयसभा पण्णत्ता जहा सभासुधम्मा तं चेव निरवसेसं जाव गोमाणसीओ भूमिभाए उल्लोए तहेव ।

तस्स णं बहुसमरमणिज्ञस्स भूमिभागस्स बहुमज्झदेसभए एत्थ णं एगा महं मणिपेढिया पन्नत्ता जोयणं आयामविक्खंभेणं अद्धजोयणं बाहल्लेणं सव्वमणिमया अच्छा ।

तीसे णं मणिपेढियाए उप्पिं एत्थ णं महं एगे सीहासणे पन्नत्ते, सीहासमवण्णओ अपरिवारो तत्थ णं विजयस्स देवस्स सुबहु अभिसेक्क भंडे संनिक्खित्ते चिट्ठति, अभिसेयसभाए उप्पिं अट्ठट्ठमंगलए जाव उत्तिमागारा सोलसविधेहिं रयणेहिं, तीसे णं अभिसेयसभाए उत्तरपुरत्थिमेणं एत्थ णं एगा महं अलंकारियसभावत्तव्वया भाणियव्वा जाव गोमाणसीओ मणिपेढियाओ जहा अभिसेयसभाए उप्पिं सीहासणं स(अ) परिवारं ।

तत्थ णं विजयस्स देवस्स सुबहु अलंकारिए भंडे संनिक्खित्ते चिट्ठति, उत्तिमागारा अलंकारिय० उप्पिं मंगलगा झया जाव (छत्ताइछत्ता) ।। तीसे णं आलंकारियसहाए उत्तरपुरत्थिमेणं एत्थ णं एगा महं ववसातसभा पण्णत्ता, अभिसेयसभावत्तव्वया जाव सीहासणं अपरिवारं ।

त(ए)त्थणं विजयस्स देवस्स एगे महं पोत्थयरयणे संनिक्खित्ते चिट्ठति, तत्थ णं पोत्थयरयणस्स अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा–रिट्ठामतीओ कंबियाओ रतवणिज्ञमए दोरे नानामणिमए गंठी रुलियमए लिप्पासणे धम्मिए सत्थे ववसायसभाए णं उप्पिं अट्ठट्ठमंगलगा झया छत्तातिछत्ता उत्तिमागारेति । तीसे णं ववसा यसभ ए उत्तरपुरच्छिमेणं एगे महं बलिपेढे पन्नत्ते दो जोयणाइं आयामविक्खंभेणं जोयणं बाहल्लेणं सव्वरयतामए अच्छे जाव पडिरूवे । एत्थ णं तस्स णं बलिपेढस्स उत्तरपुरत्थिमेणं एगा महं नंदापुक्खरिणी पन्नत्ता जं चेव मणं हरयस्स तं चेव सव्वं ।।

वृ. 'तस्स ण' मित्यादि, तस्य सिद्धायतनस्य उत्तरपूर्वस्यामत्र महत्येका उपपातसभा प्रज्ञप्ता, तस्याश्च सुधर्म्मासभाया इव प्रमाणं त्रीणि द्वाराणि तेषां च द्वाराणां पुरतो मुखमण्डपा इत्यादि सर्वं तावद्वक्तव्यं यावद् गोमानसीवर्णनं, तदनन्तरमुल्लोकवर्णनं ततो भूमिभागवर्णनं च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र महत्येका मणिपीठिका प्रज्ञप्ता, योजनमेकमायामविष्कम्भाभ्या-मर्द्धयोजनं बाहल्येन सर्वात्मना मणिमयी अच्छा इत्यादि विशेषणजातं प्राग्वत्, तस्याश्च मणिपीठि-काया उपरि अत्र महदेकं देवशयनीयं प्रज्ञप्तं, तस्य स्वरूपवर्णनं यथा सुधर्म्मायां सभायां देवशयनीय-स्य तस्य तथा द्रष्टव्यं, तस्या अपि उपपातसभाया उपरि अष्टावष्टौ मङ्गकानित्यादि प्राग्वत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तीसे ण'मित्यादि, तस्या उपपातसभाया उत्तरपूर्वस्यां दिक्षि अत्र महानेको ह्रदः प्रज्ञप्तः, अर्द्धत्रयोदश योजनान्यायामेन षड् योजनानि शक्रोानि विष्कम्भेन दश योजनान्युद्वेधेन 'अच्छे सण्हे रययाकूले' इत्यादि नन्दापुष्करिणीवत्सर्वनिरवशेषं वाच्यं, तथा चाह–'आयामुव्वेहेणं विक्खंभेणं वन्नओ जो चेवा नंदापुक्खरिणीण'मिति।

'तीसे ण'मित्यादि, स ह्रद एकया पद्मवरवेदिकया एकेन च वनखण्डेन सर्वतः समन्तात्संपरिक्षिप्तः, पद्मवरवेदिकाया वर्णनं वनषण्डवर्णनं च तावद् यावत् 'तत्थ णं बहवे वाणमंतरा देवा य देवीओ य आसयंति जाव विहरंती'ति, तस्य ह्रदस्य 'त्रिदिशि' तिसृषु दिक्ष त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि, तेषां च त्रिसोपानप्रतिरूपकाणां तोरणानां च (वर्णनं पूर्ववत्) 'तस्स ण'मित्यादि, तस्य ह्रदस्य उत्तरपूर्वस्यां दिशि अत्र महत्येकाऽभिषेकसभा प्रज्ञप्ता, साऽपि प्रमाणस्वरूपद्वारमुखमण्डपप्रेक्षागृहमण्डपचैत्यस्तूपवर्णनादिप्रकारेण सुधर्मासभावत्तावद्वक्तव्या यावद् गोमानसीवक्तव्यता, तदनन्तरं तथैवोल्लोकवर्णनं भूमिभागवर्णनं च तावद् यावन्मणीनां स्पर्श।

'तस्स ण'मित्यादि, तस्य बहुसमरमणीयस्य भमिभागस्य बहुमध्यदेशभागे अत्र महत्येका मणिपीठिका प्रज्ञप्ता योजनमेकमायामविष्कम्भाभ्यामर्द्धयोजनं बाहल्येन सर्वात्मना मणिमयी 'अच्छा सण्हा' इत्यादि विशेषणकदम्बकं प्राग्वत् ॥ 'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपरि अत्र महदेकं सिंहासनं प्रज्ञप्तं, सिंहासनवर्णकः प्राग्वत्, नवरमत्र परिवारबूतानि भद्रासनानि न वक्तव्यानि। 'तत्थ ण' मित्यादि, तस्मिन् सिंहासने विजयस्य देवस्य योग्यं सुबहु 'अभिषेकमाण्डम्' अभिषेकोपस्करः संनिक्षिप्त तिष्ठति, तस्याश्चाभिषेकसभाया उत्तरपूर्वस्यां दिशि अत्र महत्येकाऽलङ्कारसभा प्रज्ञप्ता, सा च प्रमाणस्वरूपद्वारत्रयमुखमण्डपप्रेक्षागृहमण्डपादिवर्णनप्रकारेणाभिषेकसभावतावद्वक्तव्या यावदपरिवारं सिंहासनम्।

'तत्थ ण'मित्यादि, 'तत्र' सिंहासने विजयदेवस्य योग्यं सुबहु 'आलङ्कारिकम्' अलङ्कारयोग्यं भाण्डं संनिक्षिप्तं तिष्ठति ॥ 'तीसे ण'मित्यादि, तस्या अलङ्कारसभाया उत्तरपूर्वस्यां दिशि अत्र महत्येका व्यवसायसभा प्रज्ञप्ता, सा चाभिषेकसभावत्प्रमाणस्वरूपद्वारत्रयमुखमण्डपादिवर्णकप्रकारेण तावद्वक्तव्या यावदपरिवारं सिंहासनम्।

'एत्थ ण'मित्यादि, 'अत्र' सिंहासने महदेकं पुस्तकरत्नं संनिक्षिप्तं तिष्ठति, तस्य च पुस्तरत्नस्यायमेतद्रूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः–'रिष्ठमय्यौ' रिष्ठरत्नात्मिके कम्बिके पुष्टके इति भावः, रजतमयो (तपनीयमयो) दवरको यत्र पत्राणि प्रोतानि सन्ति, नानामणिमयो ग्रन्थिर्दवरकस्यादौ येन पत्राणि न निर्गच्छन्ति 'अङ्कमयानि' अङ्करत्नयानि पत्राणि नानामणि (वैडूर्य) मयं लिप्पासनं–मषीभाजनमित्यर्थः, तपनीयमयी श्रृङ्खला मषीभाजनसत्का रिष्ठरत्नमयमुपरितनं तस्य छादनं 'रिष्ठमयी' रिष्ठरत्नमयी मषी वज्रमयी लेखिनी रिष्ठमयान्यक्षराणि धार्म्मिकं लेख्यं, तस्याश्च उपपातसभाया उत्तरपूर्वस्यां दिशि महदेकं बलिपीठं प्रज्ञप्तं द्वे योजने आयामविष्कम्भाभ्यां योजनमेकं बाहल्येन 'अच्छे सण्हे' इत्यादि विशेषणजातं प्राग्वत्।

'तस्स ण' मित्यादि, तस्य बलिपीठस्य उत्तरपूर्वस्यां दिशि अत्र महत्येका नन्दापुष्करिणी प्रज्ञप्ता, सा च ह्रदप्रमाणा, ह्रदस्येव च तस्या अपि त्रिसोपानवर्णनं तोरणवर्णनं च प्राग्वत्।

तदेवं यत्र यादृगभूता च राजधानी विजयस्य देवस्य तदेतद् उपवर्णितं, सम्प्रति विजयो देवस्तत्रोत्पन्नस्तदा यदकरोद् यथा च तस्याभिषेकोऽभवत्तदुपदर्शयति–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–: "विजयदेवः" अधिकार :–

मू. (१७९) *तेणं कालेणंतेणं समएणं विजए देवेविजयाए रायहाणीए उववातसभाए देवसयणिज्जंसि देवदूसंतरित अंगुलस्स असखेज्ञतिभागमेत्तीए बोंदीए विजयदेवत्ताए उववण्णे*

तए णं से विजये देवे अहुणोववण्णमेत्तए चेव समाणे पंचविहाए पज्जत्तीए पज्जत्तीभावं गच्छति, तंजहा–आहारपज्जत्तीए सरीरपज्ज० इंदियप० आणापाणुप० भासामण- पज्जत्तीए।

तए णं तस्स विजयस्स देवस्स पंचविहाए पज्जत्तीए पज्जत्तीभावं गयस्स इमे एयारूवे अज्झत्थिए चिंतिए पत्थिते मनोगए संकप्पे समुप्पज्जित्था–किं मे पुव्वंसेयं किं मे पच्छा सेयं किं मे पुव्विं करणिज्जं किं मे पच्छा करणिज्जं किं मे पुव्विं वा पच्छा वा हिताए सुहाए खेमाए नीस्सेसयाते अनुगामियत्तए भविस्सतीतिकट्टु एवं संपेहेति।

तते णं तस्स विजयस्स देवस्स सामानियपरिसोववण्णगा देवा विजयस्स देवस्स इमं एतारूवं अज्झत्थितं चिंतियं पत्थियं मनोगयं संकप्पं समुप्पण्णं जाणित्ता जेणामेव से विजए देवे तेणामेव उवागच्छंति तेणामेव उवाग्छित्ता विजयं देवं करतलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति जएणं विजएणं वद्धावेत्ता एवं वयासी–

एवं खलु देवाणुप्पियाणं विजयाए रायहाणीए सिद्धायतणंसि अट्ठसतं जिनपडिमाणं जिनुस्सेहपममाणमेत्ताणं संनिक्खित्तं चिट्ठति सभाए य सुधम्माए माणवए चेतियखंभे वइरामएसु गोलवट्टसमुग्गतेसु बहूओ जिणसकहाओ सन्निक्खित्ताओ चिट्ठंति जाओ णं देवाणुप्पियाणं अन्नेसिं च बहूणं विजयरायहाणिवत्थव्वाणं देवाणं देवीण य अच्चणिज्जाओ वंदणिज्जाओ पूयणिज्जाओ सक्करणिज्जाओ सम्माणणिज्जाओ कल्लाणं मंगलं देवयं चेतियं पज्जुवासणिज्जाओ एतण्णं देवाणुप्पियाणं पुव्विंपि सेयं एतण्णं देवाणुप्पियाणं पच्छावि सेयं एतण्णं देवा० पुव्विं करणिज्जं पच्छा करणिज्जं एतण्णं० देवा० पुव्विं वा पच्छा वा जाव आणुगामियत्ताते भविस्सतीतिकट्टु महता महता जय(जय)-सद्दं पउंजंति। तए णं से विजए देवे तेसिं सामानियपरिसोववण्णगाणं देवाणं अंतिए एयमट्ठं सोच्चा निसम्म हट्ठ तुट्ठ जाव हियते देवसयणिज्जाओ अब्भुट्ठेइ २ त्ता दिव्वं देवदूसजुयलं परिहेइ २ त्ता देवसयणिज्जाओ पच्चोरुहइ २ हित्ता उपपातसभाओ पुरत्थिमेणं बारेण निग्गच्छइ २ त्ता जेणेव हरते तेणेव उवागच्छति उवागच्छित्ता हरयं अणुपदाहिणं करेमाणे करेमाणे पुरत्थिमेणं तोरणेणं अणुप्पविसति २ त्ता पुरत्थिमिल्लेणं तिसोवाणपडिरूवएणं पच्चोरुहति २ हरयं ओगाहति २ त्ता जलावगाहणं करेति २ त्ता जलमज्जणं करेति २ त्ता जलकिड्डं करेति २ त्ता आयंते चोक्खे परमसूतिभूते हरतातो पच्चुत्तरति २ त्ता जेणामेव अभिसेयसभा तेणामेव उवागच्छति २ त्ता अभिसेयसभं पदाहिणं करेमाणे पुरत्थिमिल्लेणं बारेणं अणुपविसति २ त्ता जेणेव सए सीहासणे तेणेव उवागच्छति २ त्ता सीहासणवरगते पुरच्छाभिमुहे सन्निसन्ने।

तते णं तस्स विजयस्स देवस्स सामानियपरिसोववण्णगा देवा आभिओगिते देवे सद्दावेंति २ त्ता एवं वयासी–खिप्पामेव भो देवाणुप्पिया! विजयस्स देसस् महत्थं महग्घं महरिहं विपुलं इंदाभिसेयं उवट्ठवेह। तते णं ते आभिओगिता देवा सामानियपरिसोववण्णेहिं एव वुत्ता समाणा हट्ठतुट्ठ जाव हितया करतलपरिग्गहियं सिरसावत्तं मत्थए अंजलिं कट्टु एवं देवा तहत्ति आणाए विनएणं वयणं पडिसुणंति २ त्ता उत्तरपुरत्थिमं दिसीभागं अवक्कमंति २ त्ता वेउव्वियसमुग्घाएणं

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

समोहणंति २ त्ता संखेज्जाइं जोयणाइं दंडं निसरंति तं०–

–रयणाणं जाव रिट्ठाणं, अहाबायरे पोग्गले परिसाडंति २ त्ता अहासुहुमे पोग्गले परियायंति २ तत्ता दोच्चंपि वेउव्वियसमुग्घाएणं समोहणंति २ त्ता अट्ठसहस्सं सोवण्णियाणं कलसाणं अट्ठसहस्सं रुप्पामयाणं कलसाणं अट्ठसहस्सं मणिमयाणं अट्ठसहस्सं सुवण्णरुप्पामयाणं अट्ठसहस्सं सुवण्ण-मणिमयाणं अट्ठसहस्सं रुप्पामणियाणं अट्ठसहस्सं सुवण्णरुप्पामताणं अट्ठसहस्सं भोमेज्जाणं अट्ठसहस्सं भिंगारगाणं एवं आयंसगाणं थालाणं पातीणं सुपतिट्ठकाणं चित्ताणं रयणकरंडगाणं पुप्फचंगेरीणं जाव लोमहत्थचंगेरीणं पुप्फपडलगाणं जाव लोमहत्थगपडलगाणं अट्ठसतं सीहासणाणं छत्ताणं चामराणं अवपडगाणं बट्टकाणं तवसिप्पाणं खोरकाणं पीणकाणं तेल्लसमुग्गकाणं।

–अट्ठसतं धूवकडुच्छुयाणं विउव्वंति ते साभाविए विउव्विए य कलसे य जाव धूवकडुच्छुए य गेण्हंति गेण्हित्ता विजयातो रायहाणीतो पडिनिक्खमंति २ त्ता ताए उक्किट्ठाए जाव उद्धुत्ताए दिव्वाए देवगतीए तिरियमसंखेज्जाणं दीवसमुद्दाणं मज्झं मज्झेणं वीयीवयमाणा २ जेणेव खीरोदे समुद्दे तेणेव उवागच्छंति तेणेव उवागच्छित्ता खीरोदगं गिण्हित्ता जातिं तत्थ उप्पलाइं जाल सतसहस्सपत्तातिं तातिं गिण्हंति २ त्ता जेणेव पुक्खरोदे समुद्दे तेणेव उवागच्छंति २ त्ता पुक्खरोदगं गेण्हंति पुक्खरोदगं गिण्हित्ता जातिं तत्थ उप्पलाइं जाव सतसहस्सपत्ताइं ताइं गिण्हंति २ त्ता।

–जेणेव समयखेत्ते जेणेव भरहेरवयातिं वासाइं जेणेव मागधवरदामपभासाइं तित्थाइं तेणेव उवागच्छंति तेणेव उवागच्छित्ता तित्थोदगं गिण्हंति २ त्ता तित्थमट्टियं गेण्हंति २ त्ता जेणेव गंगासिंधुरत्तारत्तवतीसलिला तेणेव उवागच्छंति २ त्ता सरितादगं गेण्हंति २ त्ता उभओ तडमट्टियं गेण्हंति गेण्हित्ता जेणेव चुल्लहिमवंतसिहरिवासधरपव्वता तेणेव उवागच्छंति, तेणेव उवागच्छित्ता सव्वतूवरे य सव्वपुप्फे य सव्वगंधे य सव्वमल्ले य सव्वोसहिसिद्धत्थए गिण्हंति सव्वोसहिसिद्धत्थए गिण्हित्ता।

–जेणेव पउमद्दहपुंडरीयद्दहा तेणेव उवागच्छंति तेणेव २ दहोदगं गेण्हंति जातिं तत्थ उप्पलाइं जाव सतसहस्सपत्ताइं ताइं गेण्हंति ताइं गिण्हित्ता जेणेव हेमवयहेरण्णवयाइं वासाइं जेणेव रोहियरोहितंससुवण्णकूलरुप्पकूलाओ तेणेव उवागच्छंति २ त्ता सलिलोदगं गेण्हंति २ त्ता उभओ तडमट्टियं गिण्हंति गेण्हित्ता जेणेव सद्दावातिमालवंतपरियागा वट्टवेतड्ढपव्वता तेणेव उवागच्छंति तेणेव उवागच्छित्ता सव्वतुवरे य जाव सव्वोसहिसिद्धत्थए य गेण्हंति।

सिद्धत्थए य गेण्हित्ता जेणेव महाहिमवंतरुप्पिवासधरपव्वता तेणेव उवागच्छंति तेणेव उवागच्छंति तेणेव उवागच्छित्ता सव्वपुप्फे तं चेव जेणेव महापउमद्दहमहापुंडरीयद्दहा तेणेव उवागच्छंति तेणेव उवागच्छित्ता जाइं तत्थ उप्पलाइं तं चेव जेणेव हरिवासे रम्मावासेति जेणेव हरकान्तहरिकंतनरकंतनारिकंताओ सलिलाओ तेणेव उवागच्छंति तेणेव उवागच्छित्ता सलिलोदगं गेण्हंति सलिलोदगं गेण्हित्ता। जेणेव वियडावइगंधावतिवट्टवेयड्ढपव्वया तेणेव उवागच्छंति सव्वपुप्फे य तं चेव जेणेव निसहनीलवंतवासहरपव्वता तेणेव उवागच्छंति तेणेव उवागच्छित्त सव्वतूवरे य तहेव जेणेव तिगिच्छिदहकेसरिदहा तेणेव उवागच्छंति २ त्ता जाइं तत्थ उप्पलाइं तं चेव जेणेव पुव्वविदेहाव- रविदेहवासाइं जेणेव सीयासीओयाओ महानईओ जहा नईओ जेणेव सव्वचक्कवट्टिविजया जेणेव सव्वमागहवरदामपभासाइं तित्थाइं तहेव जहेव जेणेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्ववक्खारपव्वता सव्वतुवरे य जेणेव सव्वंतरणदीओ सलिलोदगं गेण्हंति २ तं चेव।

जेणेव मंदरे पव्वते जेमेव भद्दसालवने तेणेव उवागच्छंति सव्वतुवरे य जाव सव्वोसहिसिद्धत्थए गिण्हंति २ त्ता जेणेव नंदनवने तेणेव उवागच्छइ २ त्ता सव्वतुवरे जाव सव्वोसहिसिद्धत्थे य सरसं च गोसीसचंदणं गिण्हंति २ त्ता जेणेव सोमनसवणे तेणेव उवागच्छंति तेणेव उवागच्छित्ता सव्वतुवरे य जाव सव्वोसहिसिद्धत्थए य सरसगोसीसचंदणं दिव्वं च सुमनदामं गेण्हंति गेण्हित्ता। जेणेव पंडगवने तेणामेव समुवागच्छंति तेणेव समुवा० २ त्ता सव्वतूवरे जाव सव्वोसहिसिद्धत्थए सरसं च गोसीसचंदणं दिव्वं च सुमणोदामं दद्दरयमलयसुगंधिए य गंधे गेण्हंति २ त्ता एगतो मिलंति २ त्ता जंबूद्दीवस्स पुरत्थिमिल्लेणं दारेणं निग्गच्छंति पुरत्थिमिल्लेणं निग्गच्छित्ता ताए उक्किट्ठाए जाव दिव्वाए देवगतीए तिरियमसंखेज्जाण दीवसमुद्दाणं मज्झंमज्झेणं वीयीवयमाणा २ जेणेव विजया रायहाणी तेणेव उवागच्छंति २ त्ता विजयं रायहाणिं अणुप्पयाहिणं करेमाणा २ जेणेव अभिसेयसभा जेणेव विजए देवे तेणेव उवागच्छंति २ त्ता करतलपरिग्गहितं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धावेंति विजयस्स देवस्स तं महत्थं महग्घं महरिहं विपुलं अभिसेयं उवट्ठवेंति।

तते णं तं विजयदेवं चत्तारि य सामानियसाहस्सीओ चत्तारि अग्गमहिसीओ सपरिवाराओ तिन्नि परिसाओ सत्त अनिया सत्त अनियाहिवई सोलस आयरक्खदेवसाहस्सीओ अन्ने य बहवे विजयरायधाणिवत्थव्वगा वाणमंतरा देवा य देवीओ य तेहिं सामावितेहि उत्तरवेउव्वितेहिं य वरकमलपतिट्ठाणेहिं सुरभिवरवारिपडिपुण्णेहिं अट्ठसहस्साणं सोवण्णियाणं कलसाणं रूप्पमयाणं ताव अट्ठसहस्साणं भोमेयाणं कलसाणं। सव्वोदएहिं सव्वमट्टियाहिं सव्वतुवरेहिं सव्वपुप्फेहिं जाव सव्वोसहिसिद्धत्थएहिं सव्विड्ढीए सव्वजुत्तीए सव्वबलेणं सव्वसमुदएणं सव्वायरेणं सव्वविभूतिए सव्वविभूसाए सव्वसंभमेणं सव्वोरोहेणं सव्वणाडएहिं सव्वपुप्फगंधमल्लालंकारविभूसाए सव्वदिव्वतुडियणिणाएणं महया इड्ढीए महया जुत्तीए महया बलेणं महता समुदएणं महता तुरियजमगसमगपडुप्पवादितरवेणं संखपणवपडहभेरिझल्लरिखरमुहिमरवमुयंगदुंदुहिहुडुक्कनिग्घोससंनिनादितरवेणं महता महता इंदाभिसेगेणं अभिसिंचंति॥

तए णं तस्स विजयस्स देवस्स महता महता इंदाभिसेगंसि वट्टमाणंसि अप्पेगतिया देवा नच्चोदंग नातिमट्टियं पविरलफुसियं दिव्वं सुरभिं रयरेणुविणासणं गंवोदगवासं वासंति, अप्पेगतिया देवा निहतरयं नट्टरयं भट्टरयं पसंतरयं उवसंतरयं करेंति, अप्पेगतिया देवा विजयं रायहाणिं सब्भिंतरबाहिरियं आसितसम्मज्जितोवलित्तं सित्तसुइसम्मट्ठरत्थंतरावणवीहियं करेंति।

अप्पेगतिया देवा विजयं रायहाणिं मंचातिमंचकलितं करेंति, अप्पेगतिया देवा विजयं रायहाणिं नानाविहरागरंजियऊसियजयविजयवेजयन्तीपडागातिपडागमंडितं करेंति, अप्पेगतिया देवा विजयं रायहाणं लाउल्लोइयमहियं करेंति, अप्पेगतिया देवा विजयं गोसीससरसरत्तचंदणदद्दरदिण्णपंचंगुलितलंकरेंति, अप्पेगतिया देवा विजयं उवचियचंदणकलसं चंदणघडसुकयतोरणपडिदुवारदेसभागं करेंति। अप्पेगतिया देवा विजयं आसत्तोसत्तविपुलवट्टवग्घारितमल्लदामकलावं करेंति, अप्पेगइया देवा विजयं रायहाणिं पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलितं करेंति, अप्पेगइया देवा विजयं कालागुरुपवरकुंदुरुक्कतुरुक्कधूवडज्झंतमघमघेंतगंधुद्धुयाभिरामं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुगंधवरगंधियं गंधवट्टिभूयं करेंति

अप्पेगइया देवा हिरण्णवासं वासंति, अप्पेगइया देवा सुवण्णवासं वासंति, अप्पेगइया देवा एवं रयणवासं वइरावासं पुप्फवासं मल्लवासं गंधवासं चुण्णवासं वत्थवासं आहरणवासं, अप्पेगइया देवा हिरण्णविधिं भाइंति, एवं सुवण्णविधिं रयणविधिं वतिरविधिं पुप्फविधिं मल्लविधिं चुण्णविधिं गंधविधिं वत्थविधं भाइंति आभरणविधिं अप्पेगतिया देवा दुयं नट्टविधिं उवदंसेंति अप्पे० विलंबितं नट्टविहिं उवदंसेंति अप्पेग० देवा दुतविलंबितं नाम नट्टविधिं उवदंसेंति अप्पेग० देवा अंचियं नट्टविधिं उवदंसेंति अप्पेग० देवा रिभितं नट्टविधिं उवदंसेंति अ० अंचितरिभितं नाम दिव्वं नट्टविधिं उवदंसेंति अप्पेग० देवा आरभड नट्टविधिं उवदंसेंति अप्पेग० देवा भसोलं नट्टविधिं उवदंसेंति अप्पेग० देवा आरभडभसोलं नाम दिव्वं नट्टविधिं उवदंसेंति अप्पेगतिया देवा उप्पायणि वायपवुत्तं संकुचियपसारियं रियारियं भंतसंभंतं नाम दिव्वं णट्टविधिं उवदंसेंति अप्पेगतिया देवा चउव्विधं वातियं वादेंति, तंजहा–

ततं विततं घणं झुसिरं, अप्पेगतिया देव चउव्विधं गेयं गातंति, तंजहा–उक्खित्तयं पवत्तयं मंदायं रोइदावसाणं, अप्पेगतिया देवा चउव्विधं अभिनयं अभिनयंति, तंजहा–दिट्ठंतियं पाडंतियं सामन्तोवमिवातियं लोगमज्झावसाणियं, अप्पेगतिया देवा पीणंति अप्पेगतिया देवा वुक्कारेंति अप्पेग० देवा तंडवेंति अप्पे० लासेंति अप्पेगतिया देवा पीणंति वुक्कारेंति तंडवेंति लासंति अप्पेगतिया देवा वुक्कारेंति अप्पेगतिया देवा अप्फोडंति अप्पेगतिया देवा वग्गंति ।

–अप्पेगतिया देवा तिवतिं छिंदंति अप्पेगतिया देवा अप्फोडेंति वग्गंति तिवतिं छिंदेंति अप्पेगतिया देवा हतहेसियं करेंति अप्पेगतिया देवा हत्थिगुलगुलाइयं करेंति अप्पेगतिया देवा रहघणघणातियं करेंति अप्पेगतिया देवा हयहेसियं करेंति हत्थिगुलगुलाइयं करेंति रहघणघणाइयं करेंति अप्पेग० देवा उच्छोलेंति अप्पेग० देवा पच्छोलेंति [अप्पेगतिया देवा उक्किट्ठिं करेंति]

अप्पेगतिया देवा उक्किट्ठीओ करेंति अप्पेगतिया देवा उच्छोलेंति पच्छोलिंति उक्किट्ठिओ करेंति अप्पेगतिया देवा सीहनादं करेंति अप्पेगतिया देवा पाददद्दरयं करेंत अप्पेगतिया देवा भूमिचवेडं दलयंति अप्पेगतिया देवा सीहनादं पाददद्दरयं भूमिचवेडं दलयंति, अप्पेगतिया देवा हक्कारेंति अप्पेगतिया देवा वुक्करेंति अप्पेगतिया देवा थक्कारेंति अप्पे० पुक्कारेंति अप्पेगतिया देवा नामाइं सावेंति अप्पेगतिया देवा हक्कारेंति वुक्कारेंति थक्कारेंति पुक्कारेंति नामाइं सावेंति ।

–अप्पेगतिया देवा उप्पतंति अप्पेगतिया देवा निवयंति अप्पेगतिया देवा परिवयंति अप्पेगतिया देवा उप्पयंति निवयंति परिवयंति अप्पेगतिया देवा जलेंति अप्पेगतिया देवा तवंति अप्पेगतिया देवा पतवंति अप्पेगतिया देवा जलंति तवंति पतवंति अप्पेगइया देवा गज्जेंति अप्पेगइया देवा विज्जुयायंति अप्पेगइया देवा वासंति अप्पेगइया देवा गज्जंति विज्जुयायंति वासंति अप्पेगतिया देवा देव सन्निवायं करेंति अप्पेग० देवा देवुक्कलियं करेंति अप्पेग० देवा देवकहकहं करेंति–

–अप्पेगतिया देवा दुहदुहं करेंति अप्पेगतिया देवा देवसन्निवायं देवउक्कलियं देवकहकहं देवदुहदुहं करेंति अप्पेगतिया देवा देवुज्जोयं करेंति अप्पेगतिया देवा विज्जुयारं करेंति अप्पेगतिया देवा चेलुक्खेवं करेंति अप्पेगतिया देवा देवुज्जोयं विज्जुतारं चेलुक्खेवं करेंति अप्पेगतिया देवा उप्पलहत्थगता जाव सहस्सपत्त० घंटाहत्थगता कलसहत्थगता जाव धूवकडुच्छहत्थगता हट्ठ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुट्ठा जाव हरिसवसविसप्पमाणहियया विजयाए रायहाणीए सव्वतो समंता आधावेंति परिधावेंति

तए णं तं विजयं देवं चत्तारि सामानियसाहस्सीओ चत्तारि अग्गमहिसीओ सपरिवाराओ जाव सोलसआयरक्खदेवसाहस्सीओ अन्ने य बहवे विजयरायहाणीवत्थव्वा वाणमंतरा देवा य देवीओ य तेहिं वरकमलपतिट्ठाणेहिं जाव अट्ठसतेणं सोवण्णियाणं कलसाणं तं चेव जाव अट्ठसएणं भोमेज्जाणं कलसाणं सव्वोदगेहिं सव्वमट्टियाहिं सव्वतुवरेहिं सव्वपुप्फेहिं जाव सव्वोसहिसिद्धत्थएहिं सव्विड्ढीए जाव निग्घोसनाइयरवेणं महया २ इंदाभिसेएणं अभिसिंचंति २ पत्तेयं २ सिरसावत्तं अंजलिं कट्टु एवं वयासि–

जय जय नंदा ! जय जय भद्दा ! जय नंद भद्दं ते अजियं जिनेहि जियं पालयाहि अजितं जिनेहि सत्तुपक्खं जितं पालेहि मित्तपक्खं जियमज्झे वसाहि तं देव ! निरुवसग्गं इंदो इव देवाणं चंदो इव ताराणं चमरो इव असुराणं धरणो इव नागाणं भरहो इव मणुयाणं बहूणि पलिओवमाइं बहूणि सागरोवमाणि चउण्हं सामाणियसाहस्सीणं जाव आयरक्खदेवसाहस्सीणं विजयस्स देवस्स विजयाए रायहाणीए अन्नेसिं च बहूणं विजयरायहाणिवत्थव्वाणं वाणमंतराणं देवाणं देवीण य आहेवच्चं जाव आणाईसरसेणावच्चं कारेमाणे पालेमाणे विहराहितिकट्टु महता २ सद्देणं जयजयसद्दं पउंजंति ॥

वृ. 'तेणं कालेणं तेणं समएणं' इत्यादि, तस्मिन् काले तस्मिन् समये विजयो देव उपपातसभायां देवशयनीये देवदूष्यान्तरिते प्रथमतोऽङ्गुलासङ्ख्येयभागमात्रयाऽवगाहनया समुत्पन्नः ॥ 'तए ण'मित्यादि, सुगमं नवरमिह भाषामनःपर्याप्तयोः समाप्तिकालान्तरस्य प्रायः शेषपर्याप्तिकालान्त- रापेक्षया स्तोकत्वादेकत्वेन विवक्षणमिति 'पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ' इत्युक्तम् ।

'तए ण'मित्यादि, ततस्तस्य विजयस्य देवस्य पञ्चविधया पर्याप्तया पर्याप्तभां गतस्य सतोऽयम्–एतद्रूपः संकल्पः समुदपद्यत, कथम्भूतः ? इत्याह–'मनोगतः' मनसि गतो–व्यवस्थितो नाद्यापि वचसा प्रकाशितस्वरूप इति भावः, पुनः कथम्भूतः ? इत्याह–'आध्यात्मिकः' आत्मन्यधि अध्यात्मं तत्र भव आध्यात्मिक आत्मविषय इति भावः, सङ्कल्पश्च द्विधा भवति–कश्चिदध्यात्मिकोऽपरश्च चिन्तात्मकः, तत्रायं चिन्तात्मक इति प्रतिपादनार्थमाह–'चिन्तितः' चिन्ता संजातऽस्मिन्निति चिन्तित्तश्चिन्तात्मक इति भावः, सोऽपि कश्चिदभिलाषात्मको भवति कश्चिदन्यथा, तत्रायमभिलाषात्मकस्तथा चाह–प्रार्थनं प्रार्थो णिजन्तादच प्रार्थ संजातोऽस्मिन्निति प्रार्थितोऽभिलाषात्मक इति भावः, किंस्वरूपः ? इत्याह–

'किं मे' इत्यादि, किं 'मे' मम पूर्वं करणीयं किं मे पश्चात्करणीयं, तथा किं मे पूर्वं कर्त्तु श्रेयः किं मे पश्चात्कर्त्तुं श्रेयः, तथा किं मे पूर्वमपि च पश्चादपि च हिताय भावप्रधानोऽयं निर्देशो हितत्वाय–परिणामसुन्दरतायै सुखाय–शर्म्मणे क्षेमायेति अयमपि भावप्रधानो निर्देशः संगतत्वाय, निःश्रेयसाय–निश्चितकल्याणाय अनुगामिकतायै–परम्परया शुभानुबन्धसुखाय भविष्यतीति

'तए ण'मित्यादि, 'ततः' एतच्चिन्तासमनन्तरमेव दिव्यानुभावतो विजयस्य देवस्य 'सामानियपरिसोववन्नगा देवा' इति सामानिकाः पर्षदुपपन्नकाश्च–अभ्यन्तरादिपर्षदुपगताः 'इमम्' अनन्तरोक्तम् 'एतद्रूपम्' अनन्तरोदितस्वरूपमाध्यात्मिकं चिन्तितं प्रार्थितं मनोगतं सङ्कल्पं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समभिज्ञाय 'जेणेव'ति यत्रैव विजयो देवस्तत्रैवोपागच्छन्ति, उपागम्य च 'करयलपरिग्गहिय'-मित्यादि द्वयोर्हस्तयोरन्योऽन्यान्तरिताङ्गुलिकयोः संपुटरूपतया यदेकत्र मीलनं सा अञ्जलिस्तां करतलाभ्यां परिगृहीता—निष्पादिता करतलपरिगृहीता ताम्, आवर्त्तनमावर्त्तः शिरस्यावर्त्तो यस्याः सा शिरस्यावर्त्ता, कण्ठेकालउरसिलोमेत्यादिवदलुकसमासः, तामत एव मस्तके कृत्वा जयेन विजयेन वर्द्धापयन्ति—जय त्वं देव ! विजय त्वं देव ! इत्येवं वर्द्धापयन्तीत्यर्थः, तत्र जयः—परैरनभिभूयमानता प्रतापवृद्धिश्च, विजयस्तु—परेषामसहमानानामभिमवोत्पादः, जयेन विजयेन च वर्द्धापयित्वा एवमवादिषुः— 'एवं खलु देवाणुप्पियाण' मित्यादि पाठसिद्धम्

'तए ण' मित्यादि, 'ततः' एतदवचनान्तरं विजयो देवस्तेषां सामानिकपर्षदुपपन्नकानां—सामानिकानां पर्षदुपपन्नकानां च देवानामन्तिके एनमर्थं 'श्रुत्वा' आकर्ण्य 'निशम्य' हृदये परिणमय्य 'हट्ठतुट्ठचित्तमाणंदिए' इति हृष्टतुष्टोऽतीव तुष्ट इति भावः, अथवा हृष्टो नाम विस्मयमापन्नो यथा शोभनमहो ! एतैरुपदिष्टमिति, 'तुष्टः' तोषं कृतवान् यथा भव्यमभूद् यदेतैरित्थ-मुपदिष्टमिति, तोषवशादेव चित्तमानन्दितं—स्फीतीभूतं 'टुणदु समृद्धो' इति वचनात्, यस्य स चित्तानन्दितः, भार्यादिदर्शनात्पाक्षितो निष्ठान्तस्य परनिपातः मकारः प्राकृतत्वादलाक्षणिकस्ततः पदत्रयस्य पदद्वय २ मीलनेन कर्म्मधारयः, 'पीइमणे' इति प्रीतिर्मनसि यस्यासौ प्रीतिमना जिनप्रतिमाद्यर्चनविषयबहुमानपरायणमना इति भावः ।

ततः क्रमेण बहुमानोत्कर्षवशात् 'परमसोमणस्सिए' इति सोभनं मनो यस्यासौ सुमनास्तस्य भावः सौमनस्यं परमं च तत् सौमनस्यं च परमसौमनस्यं तत्संजातमस्मिन्निति परमसौमनस्यितः, एतदेव व्यक्तीकुर्वन्नाह—'हरिसवसविसप्पमाणहियए' हर्षवशेन विसर्प्पद्—विस्तारयायि हृदयं यस्य स हर्षवशविसर्प्पद्धृदयः देवशयनीयादभ्युयत्तिष्ठति, अभ्युत्थाय च देवदूष्यं परिधत्ते, परिधाय च उपपातसभातः पूर्वद्वारेण निर्गच्छति, निर्गत्य च यत्रैव प्रदेशे हृदस्तत्रोपागच्छति, उपागत्य ह्रदमनुप्रदक्षिणीकृत्य पूर्वेण तोरणेन ह्रदमनुप्रविशति । प्रविश्य च ह्रदे प्रत्यवरोहति, मध्ये प्रविशतीति भावः, प्रत्यवरुह्य च ह्रदमवगाहते, अवगाह्य जलमज्जनं करोति, कृत्वा च क्षणमात्रं जलक्रीडां करोति, ततः 'आयंते' इत नवानामपि श्रोतसां शुद्धोदकप्रक्षालनेनाऽऽचान्तो—गृहीताचम-नश्चोक्षः—स्वल्पस्यापि शङ्कितमलस्यापनयनात्, अत एव परमशुचिभूतो ह्रदात् प्रत्यत्तरति, प्रत्युतीर्य यत्रैव प्रदेशेऽभिषेकसभा तत्रैवोपागच्छति, उपागत्याभिषेकसभामनुप्रदक्षिणीकुर्वन् पूर्वद्वारेणाप्रविशति, अनुप्रविश्य यत्रैव मणिपीठिका यत्रैव च मणिपीठिकाया उपरि सिंहासनं तत्रोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः ।

'तए ण'मित्यादि, ततस्तस्य विजयस्य देवस्य सामानिकाः पर्षदुपपन्नकाश्च देवाः 'आभि-योगिकान्' अभियोजनमभियोगः, प्रेष्यकर्म्मणि व्यापार्यमाणत्वमिति भावः, अभियोगे नियुक्ता आभियोगिकास्तान् देवान् 'शब्दायन्ते' आकारयन्ति, शब्दायित्वा च तानेवमवादिषुः—'क्षिप्रमेव' शीघ्रमेव भो देवानां प्रियाः ! विजयस्य देवस्य 'महार्थं' महान् अर्थो—मणिकनकरत्नादिक उपयुज्य-मानो यस्मिन् स महार्थस्तं महर्थं, तथा महान् अर्ध—पूजा यत्र स महार्घस्तं, महं—उत्सवमर्हतीति महार्हस्तं 'विपुलं' विस्तीर्णं शक्राभिषेकवद् इन्द्राभिषेकमुपस्थापयत ।

'तए णं ते' इत्यादि, ततस्ते आभियोगिका देवाः सामानिकपर्षदुपपन्नकैर्देवैरेवमुक्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'हट्ठतुट्ठचित्तमानंदिया पीइमणा परमसोमनस्सिया हरिसवसविसप्पमाणहियया करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु' इति पूर्ववत्, विनयेन वचनं 'प्रतिश्रृण्वन्ति' अभ्युपगच्छन्ति, कथम्भूतेन विनयेन ? इत्याह–'एवं देवा तहत्ति आणाए' इति हे देवाः ! एवं–यथैव यूयमादिशत तथैवाज्ञया–युष्मदादेशेन कुर्म इत्येवंरूपेण प्रतिश्रुत्य वचनमुत्तरपूर्वं दिग्भागमीशानकोणमित्यर्थः तस्यात्यन्तप्रशस्तत्वात् 'अपक्रमन्ति' गच्छन्ति अपक्रम्य च वैक्रियसमुद्घातेन–वैक्रियकरणाय प्रयत्नविशेषेण 'समोहणंति' समवहन्यन्ते समवहता भवन्तीत्यर्थ, समवहताश्चात्मप्रदेशान् दूरतो विक्षिपन्ति, तथा चाह–

'संखेज्जाणि जोयणाणि दंडं निसरंति' दण्ड इव दण्ड ऊर्ध्वाधआयतः शरीरबाहल्यो जीवप्रदेशसमूहस्तं शरीरस्य बहि सङ्ख्येयानि योजनानि यावत् 'निसृजन्ति' निष्काशयन्ति, निसृज्य च तथाविधान् पुद्गलानाददते, एतदेव दर्शयति–तद्यथा–'रत्नानां' कर्केतनादीनां १ वज्राणां २ वैडूर्याणां ३ लोहिताक्षाणां ४ मसारगल्लानां ५ हंसगर्भाणां ६ पुलकानां ७ सौगन्धिकानां ८ ज्योतीरसानाम् ९ अञ्जनानाम् १०– अञ्जनपुलकानां ११ रजतानां १२ जातरूपाणाम् १३ अङ्कानां १४ स्फटिकानां १५ रिष्ठानां १६, यथाबादरान्–असारान् पुद्गलान् परिशातयन्ति यथासूक्ष्मान्–सारान् पुद्गलान् पर्याददते ।

–पर्यादाय च चिकीर्षितरूपनिर्माणार्थं द्वितीयमपि वारं वैक्रियसमुद्घातेन समवहन्यन्ते समवहत्य यथोक्तानां रत्नादीनां योग्यान् यथाबादरान् पुद्गलान् परिशातयन्ति यथासूक्ष्मानाददते आदाय च 'अष्टसहस्रम्' अष्टाधिकं सहस्रं सौवर्णिकानां कलशानां विकुर्वन्ति १ अष्टसहस्रं रूप्यमयानाम् २ अष्टसहस्रं मणिमयानाम् ३ अष्टसहस्रं सुवर्णरूप्यमयानाम् ४ अष्टसहस्रं सुवर्णमणिमयानाम् ५ अष्टसहस्रं रूप्यमणिमयानाम् ६ अष्टसहस्रं सुवर्णरूप्यमणिमयानाम् ७ अष्टसहस्रं भौमेयानाम् ८ अष्टसहस्रं भृङ्गाराणाम् ९, एवमादर्शस्थालपात्रीसुप्रतिष्ठमनोगुलिकावातकरकचित्ररत्नकरण्डकपुष्पचङ्गेरीयावल्लोमहस्तचङ्गेरीपुष्पपटलकयावल्लोमहस्तपटलकसिंहासनच्छत्रचामरसमुद्गध्वजधूपकडुच्छुकानां प्रत्येकं प्रत्येमष्टसहस्र विकुर्वन्ति, विकुर्वित्वा –

–'ताए उक्किट्ठाए' इत्यादि पूर्वं व्याख्यातार्थं यत्रैव क्षीरोदसमुद्रस्तत्रागच्छन्ति, आगत्य च क्षीरोदकं गृह्णन्ति, यानि च तत्र उत्पलानि पद्मानि कुमुदानि नलिनानि सुभगानि सौगन्धिकानि पुण्डरीकाणि महापुण्डरीकाणि शतपत्राणि सहस्रपत्राणि शतसहस्रपत्राणि च तानि गृह्णन्ति, गृहीत्वा पुष्करोदे समुद्रे समागत्य तत्रोदकमुत्पलदीनि च गृह्णन्ति, तदनन्तरं यत्रैव समयक्षेत्रं यत्रैव भरतैरावतानि क्षेत्राणि यत्रैव च तेषु भरतैरावतेषु वर्षेषु मागधवरदामप्रभासाख्यानि तीर्थानि तत्रैवपागत्य तीर्थोदकं तीर्थमृत्तिकां च गृह्णन्ति, ततो गङ्गासिन्धुरक्तारक्तवतीषु महानदीषु नद्युदकमुभयतटमृत्तिकां च गृह्णन्ति, ततः क्षुल्लहिमवच्छिखरिषु समागत्य सर्वतुबरान्–कषायान् सर्वाणि जातिभेदेन पुष्पाणि सर्वान् । 'गन्धान्' गन्धवासादीन् सर्वाणि माल्यानि–प्रथितादिभेदभिन्नानि सर्वौषधीः सिद्धार्थकांश्च गृह्णन्ति, गृहीत्वा तदनन्तरं पद्महृदपुण्डरीकहृदेषूपागत्य तदुदकमुत्पलादीनि च गृह्णन्ति, ततो हैमवतैरण्यवतेषु वर्षेषु रोहितारोहितांशासुवर्णकूलारूप्यकूलासु महानदीषु नद्युदकमुभयतटमृत्तिकां तदनन्तरं शब्दापातिविकटापातिवृत्तैताढ्येषु सर्वतुबरादीन् ततो महाहिमवद्रूपिवर्षधरपर्वतेषु सर्वतुबरादीन् ततो महापद्ममहापौण्डरीकहृदेषु हृदोदकमुत्प-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लादीनि च तदनन्तरं हरिवर्षरम्यकवर्षेषु हरकान्ताहरिकान्तानरकान्तानारीकान्तासु महानदीषु सलिलोदकम् उभयतटमृत्तिकां च ततो गन्धापातिमाल्यवत्पर्यायवृत्तवैताढ्येषु सर्वतुबरादीन् ततो निषधनीलवर्षधरपर्वतेषु सर्वतुबरादीन् तदनन्तरं तद्गतेषु तिगिच्छिकेसरिमहाह्रदेषु ह्रदोदकमुत्पलादीनि च ततः पर्वविदेहापरविदेहेषु शीताशीतोदामहानदीषु नद्युदकम् उभयतटमृत्तिकां च तदनन्तरं सर्वेषु चक्रवर्त्तिविजेतव्येषु मागधवरदामप्रभासाख्यतीर्थेषु तीर्थोदकानि तीर्थमृत्तिकाश्च ततः सर्वेषु वक्षस्कारपर्वतेषु सर्वतुबरादीन् तदनन्तरं सर्वास्वन्तरनदीषु नद्युदकमुभयतटमृत्तिकाश्च ततो मन्दरपर्वते भद्रशालवने सर्वतुबरादीन् ततो नन्दनवने सर्वतुबरादीन् सरसं च गोशीर्षचन्दनं ततः सौमनसवने सर्वतुबरादीन् सरसं च गोशीर्षचन्दनं दिव्यं च सुमनोदाम गृह्णन्ति, ततः पण्डकवने सर्वतुबरपुष्पगन्धमा- ल्यसरसगोशीर्षचन्दनदिव्यसुमनोदामानि –

'दद्दरमलए सुगंधिए य गिण्हंति इति दर्दरः—चीवरावनद्धकुण्डिकादिभाजनमुखं तेन गालितं तत्र पक्वं वा यन्मलयोद्भवया प्रसिद्धत्वान्मलयं—श्रीखण्डं येषु तान् 'सुगन्धान्' परमगन्धोपेतान् गन्धान् गृह्णन्ति, गृहीत्वा एकत्र मिलन्ति, मिलित्वा तया उत्कृष्टया दिव्यया देवगत्या यत्रैव विजया राजधानी यत्रैव विजयो देवस्तत्रैवोपागच्छन्ति, उपागत्य च करतलपरिगृहीतां शिरस्या- वर्त्तिकां मस्तकेऽञ्जलिं कृत्वा विजयं देवं जयेन विजयेन वर्द्धापयन्ति, वर्द्धापयित्वा महार्थं महार्हं विपुलमिन्द्राभिषेकयोग्यं क्षीरोदकादि 'उपनयन्ति' समर्प्यन्ति ।

'तए णं'मित्यादि, ततो णमिति वाक्यालङ्कारे तं विजयं देवं चत्वारि देवसामानिकसहस्राणि चतस्रोऽग्रमहिष्यः सपरिवारास्तिस्रः पर्षदो यथाक्रममष्टदशद्वादशदेवसहस्रपरिमाणाः सप्तानीकानि सप्तानीकाधिपतयः षोडश आत्मरक्षदेवसहस्राणि, अन्ये च बहवो विजयराजधानीवास्तव्या वानमन्तरा देवा देव्यश्च तैः—तद्गतदेवजनप्रसिद्धैः स्वाभाविकैर्वैकुर्विकैश्च वरकमलप्रतिस्थानैः सुरभिवरवारिप्रतिपूर्णैश्चन्दनकृतचर्चाकैः 'आविद्धकण्ठेगुणैः' आरोपितकण्ठे रक्तसूत्रतन्तुभिः पद्मोत्पलपिधानै—सुकुमारकरतलपरिगृहीतैरनेकसहस्रसङ्ख्यैः कलशैरिति गम्यते, तानेव विभागतो दर्शयति—अष्टसहस्रेण सौवर्णिकानां कलशानाम्, अष्टसहस्रेणरूप्यमयानाम्, अष्टसहस्रेण मणिमयानाम्, अष्टसहस्रेण सुवर्णरूप्यमयानाम्, अष्टसहस्रेण सुवर्णमिणिमयानाम्, अष्टसहस्रेण रूप्यमणिमयानाम्, अष्टसहस्रेण सवर्णरूप्यमणिमयानाम्, अष्टसहस्रेण भौमेयानां, सर्वसङ्ख्ययाऽष्टभिः सहस्रैश्चतुःषष्ठयधिकैः, तथा 'सर्वोदकैः' सर्वतीर्थनद्याद्युदकैः सर्वतुबरैः सर्वपुष्पैः सर्वगन्धैः सर्वमाल्यैः सर्वौषधिसिद्धार्थकैश्च ।

'सर्वद्धर्या' परिवारादिकया 'सर्वद्युत्या' यथाशक्ति विस्फारितेन शरीरतेजसा 'सर्वबलेन' सामस्त्येन स्वस्वहस्त्यादिसैन्येन 'सर्वसमुदयेन' स्वस्वाभियोग्यादिसमस्तपरिवारेण 'सर्वादरेण' समस्तयावच्छक्तितोलनेन 'सर्वविभूत्या' स्वस्वाभ्यन्तरवैक्रियकरणादिबाह्यरत्नादिसम्पदा, तथा 'सर्वविभूषया' यावच्छक्तिस्फारोदारश्रृङ्गारकरणेन 'सव्वसंभमेणं'ति सर्वोत्कृष्टेन संभ्रमेण, सर्वोत्कृष्टसंभ्रमो नाम इह स्वनायकविषयबहुमानख्यापनार्थपरा स्वनायककार्यसम्पादयनाय यावच्छक्ति त्वरितत्वरिता प्रवृत्ति, सर्वपुष्पवस्त्रगन्धमाल्यालङ्कारेण, अत्र गन्धाः वासा माल्यानि—पुष्पदामानः अलङ्काराःआभरणानि ततः समाहारो द्वन्द्वः, ततः सर्वदिव्यत्रुटितानि तेषां शब्दाः सर्वदिव्यत्रुटितशब्दास्तैः सहसर्वशब्देन विशेषणसमासः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सव्वदिव्वतुडियसद्दनिनाएण'मिति सर्वाणि च तानि दिव्यत्रुटितानि च–दिव्यतूर्याणि च, एषामेकत्र मीलनेन यः संगतो नितरां नादो–महान् घोषः सर्वदिव्यत्रुटितशब्दसंनिनादस्तेन, इह तुल्येष्वपि सर्वशब्दो दृष्टो यथाऽनेन सर्वं पीतं घृतमिति, तत आह–

'महया इड्डीए' इत्यादि, महत्या यावच्छक्तितुलितया 'ऋद्धया' परिवारादिकया 'महया जुईए' इत्याद्यपि भावनीयं, तथा महता–स्फूर्तिमता वराणां–प्रधानानां त्रुटितानां–आतोद्यानां यमकसमकं–एककालं पटुभि पुरुषैः प्रवादितानां यो रवस्तेन, एतदेव विशेषेणाचष्टे– 'संखपणवपडहभेरिझल्लरिखरमुहिहुडुक्कमुरवमुइंगदुंदुहिनिग्घोससंनिनादितरवेणं' शङ्खः प्रतीतः पणवो–भाण्डानां पटहः–प्रतीतः भेरी–ढक्का झल्लरी–चर्मावनद्धा विस्तीर्णा वलयरूपा खरमुही– काहला हुडुक्का–महाप्रमाणो मर्दलो मुरजः–स एव लघुर्मृदङ्गो दुन्दुभिः–भेर्याकारा सङ्कटमुखी, तासां द्वन्द्वः, तासां निर्घोषो–महान् ध्वान नादितं च घण्टायामिव वादनोत्तरकालभावी सततध्वनिस्तल्लक्षणो यो रवस्तेन महता महता इन्द्राभिषेकेणाभिषिञ्चति।

'तए ण'मित्यादि, ततो णमिति पूर्ववत् तस्य विजयस्य देवस्य 'महया' इति अतिशयेन महति इन्द्राभिषेखे वर्त्तमानेऽप्येकका देवा विजयां राजधानीं, सप्तम्यर्थे द्वितीया प्राकृतत्वात्त- तोऽयमर्थ–विजयायां राजधान्यां नात्युदके प्रभूतजलसंग्रहभावतो वैरस्योपपत्तेः नातिमृत्तिके अतिमृत्तिकाया अपि कर्दमरूपतायां उत्साहवृद्धिजनकत्वाभावात् 'पविरलफुसिय'मिति प्रविरलानि–घनभावे कर्दसम्भवात् प्रकर्षेण यावता रेणवः स्थगिता भवन्ति तावन्मात्रेणोत्कर्षेण स्पृष्टानि–स्पर्शनानि यत्र वर्षे तत् प्रविरलस्पृष्टं 'रयरेणुविणासणं'ति श्लक्ष्णतरा रेणुपुद्गला रजस्त एव स्थूला रेणवः रजांसि च रेणवश्च रजोरेणवस्तेषां विनाशनं रजोरेणुविनाशनं 'दिव्यं' प्रधानं सुरभिगन्धोदकवर्षं वर्षन्ति, अप्येकका विजयां राजधानीं समस्तामपि 'निहतरजसं' नहतं रजो यस्यां निहतरजास्तां, तत्र निहतत्वं रजसः क्षणमात्रमुत्थानाभावेनापि संभवति तत आह–'नष्टरजसं' नष्टं–सर्वथाऽदृश्यीभूतं रजो यत्र सा नष्टरजास्तां।–

–तथा भ्रष्टं–वातोद्धूततया राजधान्या दूरतः पलायितं रजो यस्याः सा भ्रष्टरजास्ताम्, एतदेवैकार्थिकद्वयेन प्रकटयति–प्रशान्तरजसं उपशान्तरजसं कुर्वन्ति, अप्येकका देवा विजयां राजधानीम् 'आसियसंमज्जियोवलित्तं सित्तं सुइसम्मट्ठ [रय]रत्थंतरावणवीहियं करेंति' इति आसिक्त-मुदकच्छटेन संमार्जितं कचवरशोधनेन उपलिप्तमिव गोयमादिनोपलिप्तं, तथा सिक्तानि जलेनात एव शुचीनि–पवित्राणि संमृष्टानि–कचवरापनयनेन रथ्यान्तराणि आपणवीथय इव–हट्टमार्गा इव आपणवीथयो रथ्याविशेषाश्च यस्यां सा तथा तां कुर्वन्ति, अप्येकका देवा मञ्चातिमञ्चकलितां कुर्वन्ति, अप्येकका देवा नानाविधा विशिष्टा रागा येषु ते नानाविराग नानाविरा- गैरुच्छतैः ऊर्ध्वीकृतैर्ध्वजैः पताकातिपताकाभिश्च मण्डितां कुर्वन्ति, अप्येकका देवा लाउल्लोइय- महितां गोशीर्षसरसरक्तचन्दनदर्दरदत्तपञ्चाङ्गुलितलां कुर्वन्ति, अप्येकका देवा विजयां राजधानी- मुपचितचन्दनकलशां कुर्वन्ति अप्येकका देवा चन्दनघटसुकृततोरणप्रतिद्वारदेशभागां कुर्वन्ति

अप्येकका देवा विजयां राजधानीमासिक्तोत्सक्तविपुलवृत्तवग्घारितमाल्यदामकलापां कुर्वन्ति, अप्येकका देवा विजयां राजधानी पञ्चवर्णसुरभिमुक्तपुष्पपुञ्जोपचारकलितां कुर्वन्ति, अप्येकका देवा विजयां राजधानीं कालागुरुप्रवरकुन्दुरुष्कतुरुष्कधूपमघमघायमानां गन्धोद्धुताभि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामां सुगन्धवरगन्धगन्धिकां गन्धवर्त्तिभूतां कुर्वन्ति, एतेषां च पदानां व्याख्यानं पूर्ववत्, अप्येकका देवा हिरण्यवर्षं वर्षन्ति, अप्येकका: सुवर्णवर्षमप्येकका आभरणवर्षं (रत्नवर्षमप्येकका वज्रवर्षमप्येकका:) पुष्पवर्षमप्येकका माल्यवर्षमप्येकका श्चूर्णवर्षं वस्त्रवर्षं (आभरणवर्षं) वर्षन्ति, अप्येकका देवा हिरण्यविधिं—हिरण्यरूपं मङ्गलप्रकारं 'भाजयन्ति' विश्राणयन्ति शेषदेवेभ्यो ददतीति भाव:, एवं सुवर्णरत्नाभरणपुष्पमाल्यगन्धचूर्णवस्त्रविधिभाजनमपि भावनीयम्।

'अप्पेगइया देवा दुयं नट्टविहिं उवदंसेंति' इत्यादि, इह द्वात्रिंशन्नाटयविधय:, ते च येन क्रमेण बगवतो वर्द्धमानस्वामिन: पुरत: सूर्याभदेवेन भाविता राजप्रश्नीयोपाङ्गे दर्शितास्तेन क्रमेण विनेयजनानुग्रहार्थमुपदर्श्यन्ते। तत्र स्वस्तिकश्रीवत्सनन्दावर्त्तवर्द्धमानकभद्रासनकलशमत्स्यदर्पणरूपाष्टमङ्गलाकारभिनयात्मक: प्रथमो नाट्यविधि १, द्वितीय आवर्त्तप्रत्यावर्तेश्रेणिप्रतिश्रेणिस्वस्तिक पुष्पमाणवकवर्द्धमानकमत्स्याण्डकमकराण्डकजारमारपुष्पा- वलिपद्मपत्रसागरतरङ्गवास न्तीलतापद्मलता भक्तिचित्राभिनयात्मक: २, तृतीय ईहामृगऋषभतुरगनरमकरविहगव्यालकिन्नररुरुस भचर-कुञ्जरवनलतापद्मलताभक्तिचित्रात्मक: ३, चतुर्थ एकतो च क्रद्विघातोच क्रएकतश्चक्रवालद्विघातश्चक्रवालचक्रर्द्धचक्रवालाभिनयात्मक: ४, पञ्चमश्चन्द्रावलिप्रविभक्तिसूर्यावलिप्रविभक्तिवलयावलिप्रविभक्तिहंसावलीप्रविभक्तितारावलिप्रविभक्तिमुक्तावलिप्रविभक्तिरत्ना विप्रविभक्तिपुष्पावलिप्रविभक्तिनामा ५, षष्ठश्चन्द्रोद्गमप्रविभक्तिसूर्योद्गमप्रविभक्त्यभिनयात्मक उद्गमनोद्गमनप्रविभक्तिनामा ६, सप्तमश्चन्द्रागमनसूर्यागमनप्रविभक्त्यभिनयात्मक आगमनागमनप्रविभक्तिनामा ७, अष्टमश्चन्द्रावरणप्रविभक्तिसूर्यावरणप्रविभक्त्यभिनयात्मक आवरणावरणप्रविभक्तिनामा ८।

नवमश्चन्द्रास्तमयनप्रविभक्तिसर्यास्तमयनप्रविभक्त्यभिनयात्मकोऽस्तमयनास्तमयनप्रविभक्तिनामा ९, दशमश्चन्द्रमण्डलप्रविभक्तिसूर्यमण्डलप्रविभक्तिनागमण्डलप्रविभक्तियक्षमण्डलप्रविभक्तिभूतमण्डलप्रविभक्त्यभिनयात्मको मण्डलप्रविभक्तिनामा १०, एकादश ऋषभमण्डलप्रविभक्तिसिंहमण्डलप्रविभक्तिहयविलम्बितगजविलम्बितहयविलसितगजविलसितमत्तहयविलसितमत्तगजविल समत्तहयविलम्बितमत्तगजविलम्बिताभिनयोद्रुतविलम्बितनामा ११, द्वादश: सागरप्रविभक्तिनगप्रविभक्त्यभिनयात्मक: सागरनागप्रविभक्तिनामा १२, त्रयोदशो नन्दाप्रविभक्तिचम्पाप्रविभक्त्यभिनयात्मको नन्दाचम्पाप्रविभक्त्यात्मक:- १३, चतुर्दशो मत्स्याण्डकप्रविभक्तिमकराण्डकप्रविभक्तिजारप्रविभक्तिमारप्रविभक्त्यभिनयात्मको मत्स्याण्डकमकराण्डकजारमारप्रविभक्तिनामा १४, पञ्चदश: क इति ककारप्रविभक्ति ख इति खकारप्रविभक्तिर्ग इति गकारप्रविभक्तिर्घ इति घकारप्रविभक्तिर्ङ इति ङकारप्रविभक्तिरित्येवं क्रमभाविककारादिप्रविभक्त्यभिनयात्मक: ककारखकारगकारघकार-ङकारप्रविभक्तिनामा १५, एवं षोडशश्चकारछकारजकारझकारनकारप्रविभक्तिनामा १६।

सप्तदश: टकारठकारडकारढकारणकारप्रविभक्तिनामा १७, अष्टादशस्तकारथकारदकारधकारनकारप्रविभक्तिनामा १८, एकोनविंशतितम: पकारफकारबकारभकारमकारप्रविभक्तिनामा १९, विंशतितमोऽशोकपल्लवप्रविभक्त्याम्रपल्लवप्रविभक्तिजम्बूपल्लवप्रविभक्तिकोशाम्बपल्लवप्रविभक्त्यभिनयात्मक: पल्लव २ प्रविभक्तिनामा २०, एकविंशतितम: पद्मलता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रविभक्त्यशोकलताप्रविभक्तिचम्पकलताप्रविभक्तिचूतलताप्रविभक्तिवनलताप्रविभक्तिवासन्तीलताप्रविभक्त्यतिमुक्तल ताप्रविभक्तिश्यामलताप्रविभक्त्यभिनयात्मको लताप्रविभक्तिनामा २१, द्वाविंशतितमो द्रुतनामा २२, त्रयोविंशतितमो विलम्बितनामा २३, चतुर्विंशतितमो द्रुतविलम्बितनामा २४।

पञ्चविंशतितमः अञ्चतनामा २५, षड्विंशतितमो रिभितनामा २६, सप्तविंशतितमोऽश्चि रिभितनामा २७, अष्टाविंशतितितम् आरभटनामा २८, एकोनत्रिंशत्तमो भसोलनामा २९, त्रिंशत्तम आरभटभसोलनामा ३०, एकत्रिंश उत्पातनिपातप्रसक्तसंकुचितप्रसारितरेक्करचितभ्रान्तसंभ्रान्तनामा ३१ द्वात्रिंशत्तमस्तु चरमचरमनामानिबद्धनामा, स च सूर्याभदेवेन भगवतो वर्द्धमानस्वामिनः पुरतो भगवतश्चरमपूर्वमनुष्यभवचरमदेवलोकभवचरमच्यवनचरमगर्भसंहरणचरमभरतक्षेत्रावसर्प्पिमीतीर्थकरजन्माभिषकचरमबाल भावचरमयौवनचरमकामभोगचरमनिष्क्रमणचरमतपश्चरणचरमज्ञानोत्पादचरमतीर्थप्रवर्त्तनचरमपरिनिर्वाणाभिनयात्मकोभावितः ३२।

तत्रैतेषां द्वात्रिंशतो नाट्यविधीनां मध्ये कांश्चन नाट्यविधीनुपन्यस्यति—अप्येकका देवाः द्रुतं—द्रुतनामकं द्वाविंशतितमं नाट्यविधिमुपदर्शयन्ति, एवमप्ये० विलम्बितं नाट्यविधिमुपदर्शयन्ति, अप्ये० द्रुतविलम्बितं नाट्यविधिं, अप्ये० अञ्चितं नाट्यविधिं, अप्ये० रिभितं नाट्यविधिं, अप्ये० अञ्चितरिभितं नाट्यविधिं, अप्ये० आरभटं नाट्यविधिं, अप्ये० भसोलं नाट्यविधिं, अप्ये० आरभटभसोलं नाट्विधिमुपदर्शयन्ति, अप्येकका देवा उत्पातनिपातम् उत्पातपूर्वो निपातो यस्मिन् स उत्पातनिपातस्तं, एवं निपातोत्पातं सङ्कुचित-प्रसारितं 'रियारिय'मिति गमनागमनं भ्रान्तसम्भ्रान्तं नाम, नाट्यविधिं—सामान्यतो नर्त्तनविधिं द्वात्रिंशद्विध्युत्तीर्णमुपदर्शयन्ति

अप्ये० देवाश्चतुर्विधं वाद्यं वादयन्ति, —'ततं' मृदङ्गपटहादि 'विततं' वीणादिकं 'घनं' कंसिकादि 'शुषिरं' काहलादि, अप्ये० देवाश्चतुर्विधं गेयं गायन्ति, —'उत्क्षिप्तं' प्रथमतः समारभ्यमाणं 'प्रवृत्तम्' उत्क्षेपावस्थातो विक्रान्तं मनाग्भरेण प्रवर्त्तमानं मन्दायमिति— मध्यभागो मूर्छनादिगुणोपेततया मन्दं घोलनात्मकं 'रोचितावसान'मिति रोचितं—यथोचित-लक्षणोपेततया भावितं सत्यापितमितियावद् अवसानं यस्य तद्

—अप्येककाश्चतुर्विधमभिनयमभिनयन्ति, तद्यथा—दार्ष्टान्तिकं प्रतिश्रुतिकं सामान्यतोविनिपातिकं लोकमध्यावसानिकमिति, एतेऽभिनयविधयो नाट्यकुशलेभ्यो वेदितव्याः, अप्येकका देवाः 'पीनयन्ति' पीनमात्मानं कुर्वन्ति स्थूला भवन्तीति भावः, अप्येकका देवाः 'ताण्डवयन्ति' ताण्डवरूपं नृत्यं कुर्वन्ति, अप्येकका देवाः 'लास्ययन्ति' लास्यरूपं नृत्यं कुर्वन्ति, अप्येकका देवाः 'छुक्करेंति' छूत्कारं कुर्वन्ति, अप्येकका देवा एतानि पीनत्वादीनि चत्वार्यपि कुर्वन्ति, अप्येकका देवा लच्छलन्ति अप्येकका देवाः प्रोच्छलन्ति अप्येकका देवास्त्रपदिकां छिन्दन्ति अप्येककास्त्रण्यप्येतानि कुर्वन्ति, अप्येकका देवा हयहेषितानि कुर्वन्ति अप्येकका देवा हस्तिगडगडायितं कुर्वन्ति अप्येकका रथघणघणायितं कुर्वन्ति अप्येकका देवास्त्रण्यप्येतानि कुर्वन्ति, अप्येकका देवा आस्फोटयन्ति, भूम्यादिकमिति गम्यते, अप्येकका देवा गल्गन्ति, अप्येकका देवाः सिंहनादं नदन्ति अप्येकका देवाः पाददर्दरकं कुर्वन्ति अप्येकका देवा भूमिचपेटां ददति—भूमिं चपेटयाऽऽ-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

स्फालयन्तीति भावः।

—अप्येकका देवा महता महता शब्देन 'रवन्ते' शब्दं कुर्वन्ति अप्येकका देवाश्चत्वार्यपि सिंहनादादीनि कुर्वन्ति, अप्ये० देवा 'हक्कारेंत' हक्कारं कुर्वन्ति अप्येकका देवाः 'वुक्कारेंति' मुखेन वुक्कारशब्दं कुर्वन्ति अप्ये० देवाः 'थक्कारेंति' थक्का इत्येवं महता शब्देन कुर्वन्ति अप्ये०-स्त्रीण्यप्येतानि कुर्वन्ति, अप्येकका देवा अवपतन्ति अप्ये० देवा उत्पतन्ति अप्ये० देवाः परिपतन्ति—तिर्यग्निपतन्तीत्यर्थ अप्येकका देवास्त्रण्यप्येतानि कुर्वन्ति, अप्येककाः 'ज्वलन्ति' ज्वालामालकुला भवन्ति अप्येकका देवाः 'तपन्ति' तप्ता भवन्ति अप्येककाः प्रतपन्ति अप्येकका देवास्त्राण्यपि कुर्वन्ति, अप्येकका देवा गर्जयन्ति अप्येककाः 'विज्जुयारंति' विद्युतं कुर्वन्ति अप्येकका देवा वर्षं वर्षन्ति अप्येककास्त्रण्यप्येतानि कुर्वन्ति, अप्येकका देवा देवोत्कलिकां कुर्वन्ति—देवानां वातस्येवोत्कलिक देवोत्कलिका तां कुर्वन्ति।

—अप्येकका देवा देवकहकहं कुर्वन्ति—प्रभूतानां देवानां प्रमोदभरवशतः स्वेच्छावचनैर्बोलः कोलाहलो देवकहकहस्तं कुर्वन्ति, अप्येकका देवा देवदुहुदुहुकं कुर्वन्ति—दुहुदुहुकमित्यनुकरणवचनमेतत्, अप्येककास्त्रीण्यप्येतानि कुर्वन्ति, अप्येकका देवाश्चेलोत्क्षेपं कुर्वन्ति, अप्येकका देवा वन्दनकलशहस्तगताः—वन्दनकलशा हस्ते गता येषां ते वन्दनकलशहस्तगताः, अप्येकका देवाः भृङ्गारकलशहस्तगताः, एवमादर्शस्थाल- पात्रीसुप्रतिष्ठवातकरकचित्ररत्नकरण्डकपुष्पचङ्गेरीयावल्लोमहस्तचङ्गेरीपुष्पपटलकयावल्लोमहस्तपटलकसिं हासनचामरतैलसमुद्गकयावदञ्जनसमुद्गकधूपकडुच्छुकहस्तगताः प्रत्येकमभिलाप्याः, 'हट्ठतुट्ठे'त्यादि यावत्करणात् 'हट्ठतुट्ठचित्तमाणंदिया पीतिमणा परमसोमणस्सिया हरहिसवसविस- प्पमाणहियया' इति परिग्रहः, सर्वतः समन्ताद् आधावन्ति प्रधावन्ति। 'तए णं तं विजयं देवं चत्तारि सामाणियसाहस्सीओ' इत्याद्यभिषेकनिगमनसूत्रमाशीर्वादसूत्रं च पाठसिद्धम्॥

मू. (१८०) *तए णं से विजए देवे महया २ इंदाभिसेएणं अभिसित्ते समाणे सीहासणाओ अब्भुट्ठेइ सीहासणाओ अब्भुट्ठेत्ता अभिसेयसभातो पुरत्थिमेणं दारेणं पडिनिक्खमति २ त्ता जेणामेव अलंकारियसभा तेणेव उवागच्छति २ त्ता आलंकारियसभं अणुप्पयाहिणीकरेमाणे २ पुरत्थिमेणं दारेणं अनुपविसति परुत्थिमेणं दारेणं अणुपविसित्ता जेणेव सीहासने तेणेव उवागच्छति २ त्ता सीहासनवरगते पुरत्थाभिमुहे सन्निसन्ने। तए णं तस्स विजयस्स देवस्स सामानियपरिसोववण्णगा देवा आभिओगिए देवे सद्दावेंति २ एवं वयासी—खिप्पामेव भो देवाणुप्पिया! विजयस्स देवस्स आलंकारियं भंडं उवणेह, तेणेव ते आलंकारियं भंडं जाव उवट्ठवेंति।*

तए णं से विजए देवे तप्पढमयाए पम्हलसूमालाए दिव्वाए सुरभीए गंधकासाईए गाताइं लूहेति गाताइं लूहेत्ता सरसेणं गोसीसचंदनेनं गाताइं अणुलिंपति सरसेणं गोसीसचंदनेनं गाताइं अणुलिंपेत्ता ततोऽनंतरं च णं नासाणीसासवायवज्झं चक्खुहरं वण्णफरिसजुत्तं हतलालापेलवातिरेगं धवलं कणगखइयंतकम्मं आगासफलिहसरिसप्पभं अहतं दिव्वं देवदूसजुयलं नियंसेइ नियंसेत्ता हारं पिणिद्धेइ हारं पिणिद्धेत्ता। एवं एकावलिं पिणिंधत एकावलिं पिणिंधेत्ता एवं एतेणं अभिलावेणं मुत्तावलिं कणगावलिं रयणावलिं कडगाइं तुडियाइं अंगयाइं केयूराइं दसमुद्दिताणंतकं कडिसुत्तकं तेअत्थिसुत्तगं मुरविं कंठमुरविं पालंबंसि कुंडलाइं चूडामणिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्तरयणुक्कडं मउडं पिणिंधेइ पिणिंधित्ता गंठिमवेढिम- पूरिमसंघाइमेणं चउव्विहेणं मल्लेणं कप्परुक्खयंपिव अप्पाणं अलंकियविभूसितं करेति, कप्परुक्ख- यंपिव अप्पाणं अलंकियविभूसियं करेत्ता दद्दरमलयसुगंधगंधितेहिं गंधेहिं गाताइं सुक्किडति २ त्ता दिव्वं च सुमनदामं पिणिद्धति।

तए णं से विजए देवे केसालंकारेणं वत्थालंकारेणं मल्लालंकारेणं आभरणालंकारेणं चउव्विहेणं अलंकारेणं अलंकिते विभूसिए समाणे पडिपुण्णालंकारे सीहासणाओ अब्भुट्ठेइ २ त्ता आलंकारियसभाओ पुरच्छिमिल्लेणं दारेणं पडिनिक्खमति २ त्ता जेणेव ववसायसभा तेणेव उवागच्छति २ त्ता ववसायसभं अणुप्पदाहिणं करेमाणे २ पुरत्थिमिल्लेणं दारेणं अणुपविसति २ त्ता जेणेव सीहासणे तेणेव उवागच्छति २ त्ता सीहासमवरगते पुरत्थाभिमुहे सन्निसन्ने।

तते णं तस्स विजयस्स देवस्स आहिओगिया देवा पोत्थयरयणं उवणेंति ॥ तए णं से विजए देवे पोत्थयरयणं गेण्हति २ त्ता पोत्थयरयणं मुयति पोत्थयरणं मुएत्ता पोत्थयरयणं विहाडेति पोत्थयरयणं विहाडेत्ता पोत्थयरयणं वाएति पोत्थयरयणं वाएत्ता धम्मियं ववसायं पगेण्हति धम्मियं ववसायं पगेण्हित्ता पोत्थयरयणं पडिणिक्खिवेइ २ त्ता सीहासणाओ अब्भुट्ठेति २ त्ता ववसायसभाओ पुरत्थिमिल्लेणं दारेणं पडिणिक्खमइ २ त्ता जेणेव नंदापुक्खरिणी –

–तेणेव उवागच्छति २ त्ता नंदं पुक्खरिणिं अणुप्पयाहिणीकरेमाणे पुरत्थिमिल्लेणं दारेणं अणुपविसति २ त्ता पुरत्थिमिल्लेणं तिसोपाणपडिरूवगएणं पच्चोरुहति २ त्ता हत्थं पादं पक्खालेति २ त्ता एगं महं सेतं रयतामयं विमलसलिलपुण्णं मत्तगयमहामुहाकितिसमाणं भिंगारं पगिण्हति भिंगारं पगेण्हित्ता जाइं तत्थ उप्पलाइं पउमाइं जाव सतसहस्सपत्ताइं ताइं गिण्हति २ त्ता नंदातो पुक्खरिणीतो पच्चुत्तरेइ २ त्ता जेणेव सिद्धायतणे तेणेव पहारेत्थ गमणाए ।

तए णं तस्स विजयस्स देवस्स चत्तारि सामाणियसाहस्सीओ जाव अन्ने य बहवे वाणमंतरा देवा य देवीओ य अप्पेगइया उप्पलहत्थगया जाव हत्थगया विजयं देवं पिट्ठतो पिट्ठतो अणुगच्छंति

तए णं तस्स विजयस्स देवस्स बहवे आभिओगिया देवा देवीओ य कलसहत्थगता जाव धूवकडुच्छुयहत्थगता विजयं देवं पिट्ठतो २ अणुगच्छंति। तते णं से विजए देव चउहिं सामानियसाहस्सीहिं जाव अन्नेहि य बहूहिंवामंतरेहिं देवेहि यदेवीहि य सद्धिं संपरिवुडे सव्विड्डीए सव्वजुत्तीए जाव निग्घोसणाइयरवेणं जेणेव सिद्धाययणे तेणेव उवागच्छति २ त्ता सिद्धायतणं अणुप्पयाहिणीकरेमाणे २ पुरत्थिमिल्लेणं दारेणं अणुपविसति अणुपविसित्ता –

–जेणेव देवच्छंदए तेणेव उवागच्छति २ त्ता आलोए जिनपडिमाणं पणामं करेति २ त्ता लोमहत्थगं गेण्हति लोमहत्थगं गेण्हित्ता जिनपडिमाओ लोमहत्थएणं पमज्जति २ त्ता सुरभिणा गंधोदएणं ण्हाणेति २ त्ता दिव्वा सुरभिगंधकासाइए गाताइं लूहेति २ त्ता सरसेणं गोसीसचंदनेनं गाताणइ अणुलिंपइअणुलिंपेत्ता जिनपडिमाणं अहयाइंसेताइंदिव्वाइंदेवदूसजुयलाइं नियंसेइ नियंसेत्ताअग्गेहिं वरेहि य गंधेहि य मल्लेहि य अच्चेति २ त्ता पुप्फारुहणं गंधारुहणं मल्लारुहणं वण्णारुहणं चुण्णारुहणंआभरणारुहणं करेति करेत्ता आसत्तोसत्तविउलवट्टवग्घारितमल्लादाम० करेति २ त्ता अच्छेहिं सण्हेहिं [सेएहिं] रयामएहिं अच्छरसातंदुलेहिं।

जिनपडिमाणं पुरतो अट्ठट्ठमंगलए आलिहतिसोत्थियसिरिवच्छजाव दप्पण अट्ठट्ठंगलगे आलिहति आलिहित्ता कयग्गाहग्गहितकरतलपब्भट्ठविप्पमुक्केण दसद्धवन्नेणं कुसुमेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्कपुप्फपुंजोवयारकलितं करेति २त्ता कंदप्पभवइरवेरुलियविमलदंडं कंचणमणिरयभत्तिचित्तं कालागुरुपवरकुंदुरुक्कतुरुक्कधूवगंधुत्तमाणुविद्धं धूमवट्टिं विणिम्मुयंतं वेरुलियामयं कडुच्छुयं पग्गहित्तु पयत्तेण धूवं दाऊण जिनवराणं अट्ठसयविसुद्धगंथजुत्तेहिं महावित्तेहिं अत्थजुत्तेहिं अपुणरुत्तेहिं संथुणइ २ त्ता सत्तट्ठ पयाइं ओसरति सत्तट्ठपयाइं ओसरित्ता –

–वामं जाणुं अंचेइ २ त्ता दाहिणं जाणुं धरणितलंसि णिवाडेइ तिक्खुत्तो मुद्धाणं धरणिंयलंसि नमेइ नमित्ता ईसिं पच्चुण्णमति २ त्ता कडयतुडियथंभियाओ भुयाओ पडिसाहरति २ त्ता करयल-परिग्गहियं सिरसावत्तं मत्थए अंजलिंकट्टु एवं वयासी–

नमोऽत्थु णं अरिहंताणं भगवंताणं जाव सिद्धिगइनामधेयं ठाणं संपत्ताणं तिकट्टु वंदति नमंसति वंदित्ता नमंसित्ता जेणेव सिद्धायतनस्स बहुमज्झदेसभाए तेणेव उवागच्छति २ त्ता दिव्वाए उदगधाराए अब्भुक्खति २ त्ता सरसेणं गोसीसचंदनेणं पंचंगुलितलेणं मंडलं आलिहति २ त्ता चच्चए दलयति चच्चए दलयित्ता कयग्गाहग्गहियकरतलपब्भट्ठविमुक्केणं दसद्धवण्णेणं कुसुमेणं मुक्कपुप्फपुंजोवयारकलियंकरेति २ त्ता धूवं दलयति २ –

–जेणेव सिद्धायतणस्स दाहिणिल्ले दारे तेणेव उवागच्छति २ त्ता लोमहत्थयं गेण्हइ २ दारचेडीओ य सालिभंजियाओ य वालरूवए य लोमहत्थएणं पमज्जति २ बहुमज्झदेसभाए सरसेणं गोसीसचंदनेनं पंचंगुलितलेणं अणुलिंपति २ चच्चए दलयति २ पुप्फारुहणं जाव आहरणारुहणं करेति २ आसत्तोसत्तविपुल जाव मल्लदामकलावं करेति २ कयग्गाहग्गहित जाव पुंजोवयारकलितं करेति २ धूवं दलयति २। जेणेव मुहमंडवस्स बहुमज्झदेसभाए तेणेव उवागच्छति २ त्ता बहुमज्झदेसभा लोमहत्थेणं पमज्जति २ दिव्वाए उदगधाराए अब्भुक्खेति २ सरसेणं गोसीसचंदनेनं पंचंगुलितलेणं मंडलगं आलिहति २ चच्चए दलयति २ कयग्गाह जाव धूवं दलयति २ जेणेव मुहमंडवगस्स पच्चत्थिमिल्ले दारे तेणेव उवा० लोमहत्थगं गेण्हंते २ दारचेडीओ य सालिभंजियाओ य वालरूवए य लोमहत्थगेण पमज्जति २ दिव्वाए उदगधाराए अब्भुक्खेति २ सरसेणं जाव चच्चए दलयति २ आसत्तोसत्त० कयग्गाह० धूवं दलयति २।

जेणेव मुहमंडवगस्स उत्तरिल्ला णं खंभपंती तेणेव उवागच्छइ २ लोमहत्थगं परा० सालभंजियाओ दिव्वाए उदगधाराए सरसेणं गोसीसचंदनेनं पुप्फारुहणं जाव आसत्तोसत्त० कयग्गाह० धूवं दलयति जेणेव मुहमंडवस्स पुरत्थिमिल्ले दारे तं चेव सव्वं भाणियव्वं जाव दारस्स अच्चणिया जेणेव दाहिणिल्ले दारे तं चेव जेणेव पेच्छाघरमंडवस्स बहुमज्झदेसभाए जेणेव वइरामए अक्खाडए जेणेव मणिपेढिया। जेणेव सीहासने तेणेव उवागच्छति २ लोमहत्थगं गिण्हति लोमहत्थगं गिण्हित्ता अक्खाडगं च सीहासणं च लोमहत्थगेण पमज्जति २ त्ता दिव्वाए उदगधाराए अब्भु० पुप्फारुहणं जाव धूवं दलयति जेणेव पेच्छाघरमंडवपच्चत्थिमिल्ले दारे दारच्चणिया उत्तरिल्ला खंभपंती तहेव पुरत्थिमिल्ले दारे तहेव जेणेव दाहिणिल्ले दारे तहेव जेणेव चेतियथूभे तेणेव उवागच्छति २ त्ता लोमहत्थगं गेण्हति २ त्ता चेतियथूभं लोमहत्थएणं पमज्जति २ दिव्वाए एग० सरसेण० पुप्फारुहणं आसत्तोसत्त जाव धूवं दलयति २ जेणेव पच्चत्थिमिल्ला मणिपेढिया।

जेणेव जिनपडिमा तेणेव उवागच्छति जिनपडिमाए आलोए पणामं करेइ २ त्ता लोमहत्थगं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गेण्हति २ त्ता तं चेव सव्वं जं जिनपडिमाणं जाव सिद्धिगइनामधेज्जं ठाणं संपत्ताणं वंदति नमंसति।

–एवं उत्तरिल्लाएवि, एवं पुरत्थिमिल्लाएवि, एवं दाहिणिल्लाएवि, जेणेव चेइयरुक्खादारविही य मणिपेढिया जेणेव महिंदज्झए दारविही, जेणेव दाहिणिल्ला नंदापुक्खरणी तेमेव उवा० लोमहत्थगं गेण्हति चेतियाओ य तिसोपाणपडिरूवए य तोरणे य सालभंजियाओ य वालरूवए य लोमहत्थएण पमज्जति २ त्ता दिव्वाए उदगधाराए सिंचति सरसेणं गोसीसचंदनेनं अणुलिंपति २ पुप्फारुहणं जाव धूवं दलयति २ सिद्धायतणं अणुप्पयाहिणं करेमाणे जेणेव उत्तरिल्ला मंदापुक्खरिणी तेणेव उवागच्छति २ त्ता तहेव महिंदज्झया चेतियरुक्खो चेतियथूभे पच्चत्थिमिल्ला मणिपेढिया –

–जिनपडिमा उत्तरिल्ला पुरत्थिमिल्ला दक्खिणिल्ला पेच्छाघरमंडवस्सवि तहेव जहा दक्खिणिल्लस्स पच्चत्थिमिल्ले दारे जाव दक्खिणिल्ला णं खंभपंती मुहमंडवस्सवि तिण्हं दाराणं अच्चणिया भणिऊणं दक्खिणिल्ला णं खंभपंती उत्तरे दारे पुरच्छिमे दारे सेसं तेणेव कमेण जाव पुरत्थिमिल्ला नंदापुक्खरिणी जेणेव सभा सुधम्मा तेणेव पहारेत्थ गमणाए॥

तते णं तस्स विजयस्स चत्तारि सामानियसाहस्सीओ एयप्पभितिं जाव सव्विड्ढीए जाव नाइयरवेणं जेणेव सभा सुहम्मा तेणेव उवागच्छंति २ त्ता तं णं सभं सुधम्मं अणुप्पयाहिणीकरेमाणे २ पुरत्थिमिल्लेणं अणुपविसति २ आलोए जिनसकहाणं पणामं करेति २ जेणेव मणिपेढिया –

–जेणेव माणवचेतियक्खंभे जेणेव वइरामया गोलवट्टसमुग्गका तेणेव उवागच्छति २ लोमहत्थयं गेण्हति २ त्ता वइरामए गोलवट्टसमुग्गए लोमहत्थएण पमज्जइ २ त्ता वइरामए गोलवट्टसमुग्गए विहाडेति २ त्ता जिनसकहाओ लोमहत्थएणं पमज्जति २ त्ता सुरभिणा गंधोदएणं तिसत्तखुत्तो जिनसकहाओ पक्खालेति २ सरसेणं गोसीसचंदनेनं अणुलिंपइ २ त्ता अग्गेहिं वरेहिं गंधेहिं मल्लेहि य अच्चिणति २ त्ता धूवं दलयति २ त्ता वइरामएसु गोलवट्टसमुग्गएसु पडिनिक्खिवति २ त्ता माणवकं चेतियखंभं लोमहत्थएणं पमज्जति २ दिव्वाए उदगधाराए अब्भुक्खेइ २ त्ता सरसेणं गोसीसचंदनेनं चच्चए दलयति २ पुप्फारुहणं जाव आसत्तो सत्त० कयग्गाह० धूवं दलयति २ –जेणेव सभाए सुधम्माए बहुमज्झदेसभाए तं चेव जेणेव सीहासने तेणेव जहा दारच्चणिता जेणेव देवसयणिज्जे तं चेव जेणेव खुड्डागे महिंदज्झए तं चेव जेणेव पहरणकोसे चोप्पाले तेणेव उवागच्छति २ पत्तेयं २ पहरप्पाइं लोमहत्थएणं पमज्जति २ सरसेणं गोसीसचंदनेनं तहेव सव्वं सेसंपि दक्खिणदारं आदिकाउं तहेव नेयव्वं जाव पुरच्छिमिल्ला नंदापुक्खरिमी सव्वाणं सभाणं जहा सुधम्माए सभाए तहा अच्चणिया उववायसभाए नवरि देवसयणिज्जस्स अच्च० सेसासु सीहासणाण अच्च० हरयस्स जहा नंदाए पुक्खरिणीए अच्चणिया।

–ववसायसभाए पोत्थयरयणं लोम० दिव्वाए उदगधाराए सरसेणं गोसीसचंदनेनं अणुलिंपति अग्गेहिं वरेहिं गंधेहि य मल्लेहि य अच्चिणति २ त्ता [मल्लेहि] सीहासने लोमहत्थएणं पमज्जति जाव धूवं दलयति सेसं तं चेव नंदाए जहा हरयस्स तहा जेणेव बलिपीढं तेणेव उवागच्छति २ त्ता अभिओगे देवे सद्दावेति २ त्ता एवं वयासी–

खिप्पामेव भो देवाणुप्पिया! विजयाए रायहाणीए सिंघाडगेसु य तिएसु य चउक्केसु य चच्चरेसु य चतुमुहेसु य महापहपहेसु य पासाएसु य पागारेसु य अट्टालएसु य चरियासु य दारेसु य गोपुरेसु य तोरणेसु य वावीसु य पुक्खरिणीसु य जाव बिलपंतिगासु यआरामेसु य उज्जाणेसु य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काननेसु य वनेसु य वनसंडेसु य वनराईसु य अच्चणियं करेह करेत्ता ममेयमाणत्तियं खिप्पामेव पच्चप्पिणह । तए णं ते आभिओगिया देवा विजएणं देवेणं एवं वुत्ता समाणा जाव हट्ठतुट्ठा विनएणं पडिसुणेंति २ त्ता विजयाए रायहाणीए सिंघाडगेसु य जाव अच्चणियं करेत्ता जेणेव विजए देवे तेणेव उवागच्छन्ति २ त्ता एयमाणत्तियं पच्चप्पिणंति ।

तए णं से विजए देवे तेसिणं आभिओगियाणं देवाणं अंतिए एयमट्ठं सोच्चा निसम्म हट्ठतुट्ठचित्तमानंदिय जाव हयहियए जेणेव नंदापुक्खरिणी तेणेव उवागच्छति २ त्ता पुरत्थिमिल्लेणं तोरणेणं जाव हत्थपायं पक्खालेति २ त्ता आयंते चोक्खे परमसुइभूए नंदापुक्खरिणीओ पच्चुत्तरति २ त्ता जेणेव सभा सुधम्मा तेणेव पहारेत्थ गमणाए । तए णंसे विजए देवे चउहिं सामानियसाहस्सीहिं जाव सोलसहिं आयरक्खदेवसाहस्सीहिं सव्विड्ढीए जाव निग्घोसनाइयरवेणं जेणेव सभा सुधम्मा तेणेव उवागच्छति २ त्ता सभं सुधम्मं पुरत्थिमिल्लेणं दारेणं अणुपविसति २ त्ता जेणेव मणिपेढिया तेणेव उवागच्छति २ त्ता सीहासनवरगते पुरच्छाभिमुहे सन्निसन्ने ॥

वृ. 'तए ण'मित्यादि, ततः स विजयो देवो वानमन्तरैः 'महया २' इति अतिशयेन महता इन्द्रारभिषेकेणाभिषिक्तः सन् सिंहासनादभ्युत्तिष्ठति, अभ्युत्थायाभिषेकसभातः पूर्वद्वारेण विनिर्गत्य यत्रैवालङ्कारसभा तत्रैवोपागच्छति, उपागत्यालङ्कारिकसभामनुप्रदक्षिणीकुर्वन्, पूर्वद्वारेणानुप्रविशति, अनुप्रविश्य च यत्रैव मणिपीठिका यत्रैव च सिंहासनं तत्रोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः संनिषण्णः, ततस्तस्य विजयस्य देवस्याभियोग्या देवा सुबहु 'आलङ्कारिकम्' अलङ्कारयोग्यं भाण्डमुपनयन्ति ॥

'तए ण'मित्यादि, ततः स विजयो देवस्तत्प्रथमतया तस्यामलङ्कारसभायां प्रथमतया पक्ष्मला च सा सुकुमारा च पक्ष्मलसुकुमारा तया 'सुरभिगन्धकाषायिक्या' सुरभिगन्धकषायद्रव्यपरिकर्म्मितया लघुशाटिकयेति गम्यते गात्राणि रूक्षयति रूक्षयित्वा सरसेन गोशीर्षचन्दनेन गात्राण्यनुलिम्पति अनुलिप्य देवदूष्ययुगलं निधत्त इति योगः, कथम्भूतः ? इत्याह–

'नासानीसासवायवज्झं' नासिकानिश्वासवातवाह्यं, एतेन श्लक्ष्णतामाह, 'चक्षुर्हरं' चक्षुर्हरति–आत्मवशं नयति विशिअठरऊफआथइशयकलितत्वाच्चक्षुर्हरं 'वर्णस्पर्शयुक्तम्' अतिशायिना वर्णेनातिशायिना स्पर्शेन युक्तं 'हयलालापेलवाइरेग'मिति हयलाला–अश्वलाला तस्या अपि पेलवमतिरेकेण हयलालापेलवातिरेकं 'नाम नाम्नैकार्थ्ये समासो बहुल'मिति समासः, अतिविशिष्टमृदुत्वलघुत्वगुणोपेतमिति भावः, धवलं–श्वेतं कनकखचितानि–विच्छुरितानि अन्तकर्म्माणि–अञ्चलयोर्वानलक्षणानि यस्य तत् कनकखचितान्तकर्म्म आकाशस्फटिकं नाम–अतिस्वच्छस्फटिकविशेषस्तत्समप्रभं दिव्यं 'देवदूष्ययुगलं' देववस्त्रयुग्मं 'निवस्ते' परिधत्ते ।

–परिधाय हारादीन्याभरणानि पिनह्यति तत्र हारः–अष्टादशसरिकः अर्द्धहारो–नवसरिकः एकावली–विचित्रमणिका मुक्तावली–मुक्ताफलमयी कनकावली–कनकमणिमयी प्रालम्बः–तपनीयमयो विचित्रमणिरत्नभक्तिचित्र आत्मनः प्रमाणेन स्वप्रमाण आभरणविशेषः कटकानि–कलाचिकाभरणानि त्रुटितानि–बाहुरक्षकाः अङ्गदानि–बाह्याभरणविशेषा 'दशमुद्रिकाऽनन्तकं' हस्ताङ्गुलिसम्बन्धिमुद्रिकादशकं 'कुण्डले' कर्णाभरणे चूडामणिमिति–चूडामणिर्नाम सकलपार्थिवरत्नसर्वसारो देवेन्द्रमनुष्येन्द्रमूर्द्धकृतनिवासो निशेषापमङ्गलाशान्तिरोग- प्रमुखदोषापहारकारी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवरलक्षणोपेतः परममङ्गलभूत आभरणविशेषः 'चित्तरयणसंकडं मउड'- मिति चित्राणि- नानाप्रकाराणि यानि रत्नानि तैः सङ्कटः चित्ररत्नसङ्कटः प्रभूतरत्ननिचयोपेत इति भावः। 'तंदिव्वं सुमनदामं'ति 'दिव्यां' प्रधानां पुष्पमालाम्।

'तए णं सेविजए'इत्यादि, ग्रन्थिमं-ग्रंथनं ग्रन्थस्तेन निर्वृत्तं ग्रन्थिमं 'भावादिमः प्रत्ययः यत्सूत्रादिना ग्रथ्यते तद् ग्रन्थिममिति भावः, भरिमं-यद् ग्रन्थितं सद्वेष्ट्यते यथा पुष्पलम्बूसको गण्डूक इत्यर्थः, पूरिमं येन वंशशलाकादिमयपञ्जरी पूर्यते, सङ्घातिमं यत्परस्परतो नालसङ्घातेन सङ्घात्यते, एवंविधेन चतुर्विधेन माल्येन कल्पवृक्षमिवात्मानमलङ्कृतविभूषितं करोति कृत्वा परिपूर्णालङ्कारः सिंहासनादभ्युत्तिष्ठति, अभ्युत्थायालङ्कारसभातः पूर्वेण द्वारे निर्गत्य यत्रैव व्यवसायसभा तत्रैवोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः 'तए ण''मित्यादि, ततस्तस्य विजयस्य देवस्याभियोग्याः पुस्तकरत्नमुपनयन्ति।

'तए ण'मित्यादि, ततः स विजयो देवः पुस्तकरत्नं गृह्णाति गृहीत्वा पुस्तकरत्नमुत्सङ्गादाविति गम्यते मुञ्चति मुक्त्वा विघाटयति विघाटयानुप्रवाचयति अनु-परिपाटया प्रकर्षेण-विशिष्टार्थावगमरूपेण वाचयति वाचयित्वा 'धार्म्मिकं' धर्मानुगतं व्यवसायं व्यवस्यति, कर्त्तुमभिलषतीति भावः, व्यवसायसभायाः सुभाध्यवसायनिबन्धनत्वात्, क्षेत्रादेरपि कर्म्मक्षयोपशमादिहेतुत्वात्, -

॥१॥ "उदयक्खयखओवसमोवसमा जं च कम्मुणो भणिया।
दव्वं खेत्तं कालं भवं च भावं च संपप्प॥" इति।

धार्म्मिकं च व्यवसायं व्यवसाय पुस्तकरत्नं प्रतिनिक्षिपति प्रतिनिक्षिप्य सिंहासनादभ्युत्तिष्ठति, अभ्युत्थाय व्यवसायसभातः पूर्वद्वारेण विनिर्गच्छति विनिर्गत्य यत्रैव व्यवसायसभाया एव पूर्वा नन्दापुष्करिणी तत्रैवोपागच्छति उपागत्य नन्दां पुष्करिणीमनुप्रदक्षिणीकुर्वन् पूर्वतोरणेनानुप्रविशति प्रविश्य पूर्वेण त्रिसोपानप्रतिरूपकेण प्रत्यवरोहति, मध्ये प्रविशतीति भावः, प्रत्यवरुह्य हस्तपादौ प्रक्षालयति प्रक्षाल्यैकं महान्तं श्वेतं रजतमयं विमलसलिलपूर्णं मत्तरिमहामुखाकृतिसमानं भृङ्गारं गृह्णाति गृहीत्वा यानि तत्रोत्पलानि पद्मानि कुमुदानि नलिनानि यावत् शतसहस्रपत्राणि तानि गृह्णाति गृहीत्वा नन्दातः पुष्करिणीतः प्रत्युत्तरति प्रत्युत्तीर्य यत्रैव सिद्धायतनं तत्रैव प्रधावितवान् गमनाय - 'तए ण'मित्यादि, ततस्तस्य विजयस्य देवस्य चत्वारि सामानिकदेवसहस्राणि चतस्रः सपरिवारा अग्रमहिष्यः तिस्रः पर्षदः सप्तानीकानि सप्तानीकाधिपतयः षोडशात्मरक्षदेवसहस्राणि अन्ये च बहवो विजयराजधानीवास्तव्या वानमन्तरा देवाश्च देव्यश्च अप्येकका उत्पलहस्तगता अप्येककाः पद्महस्तगता अप्येककाः कुमुदहस्तगताः एवं नलिनसुभगसौगन्धिकपुण्डरीकमहापुण्डरीकशतपत्रसहस्रपत्रशतसहस्रपत्रहस्तगताः क्रमेण प्रत्येकं वाच्याः, विजयं देवं पृष्ठतः पृष्ठतः परिपाटयेति भावः अनुगच्छन्ति।

'तए ण'मित्यादि, ततस्तस्य विजयस्य देवस्य बहव आभियोग्या देवा देव्यश्च अप्येकका चन्दनकलशहस्तगताः अप्येकका भृङ्गारहस्तगताः अप्येकका आदर्शहस्तगताः एवं स्थालपात्रीसुप्रतिष्ठवातकरकचित्ररत्नकरण्डकपुष्पचङ्गेरीयावल्लोमहस्तचङ्गेरीपुष्पपटलकयावल्लोमहस्तपटलकसिंहासनच्छत्रचामरतैलसमुद्गकयावदञ्जनसमुद्गकधूपकडुच्छु- कहस्तगताः क्रमेण प्रत्येकमालाप्याः, विजयं देवं पृष्ठतः पृष्ठतोऽनुगच्छन्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः स विजयो देवश्चतुर्भिः सामानिकसहस्रैश्चतसृभिः सपरिवाराभिरग्रमहिषीभिस्तिसृभिः पर्षद्भिसप्तभिरनीकैः सप्तभिरकीनाधिपतिभि षोडशभिरात्मरक्षदेवसहस्रैरन्यैश्च बहुभिर्विजय-राजधानीवास्तव्यैर्वानमन्तरैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः सर्वर्द्धया 'जाव निग्घोसनादितर-वेण'मिति यावत्करणादेवं परिपूर्ण पाठो द्रष्टव्यः—'सव्वजूईए सव्वबलेणं सव्वसमुदएणं सव्वविभूईए सव्वसंभमेणं सव्वपुप्फगंधमल्लालंकारेणं सव्वतुडियसद्दनिनाएणं महया इड्ढीए महया जुईए महया बलेणं महया समुदएणं महया वरतुडियजमगसमगपडुप्पवाइयरवेणं संखपणवपडहभेरिझल्लरिखर-मुहिहुडुक्कदुंदुभिनिग्घोसनादितरवेणं' अस्य व्याख्या प्राग्वत् ।

यत्रैव सिद्धायतनं तत्रैवोपागच्छति, उपागत्य सिद्धायतनमनुप्रदक्षिणीकुर्वन् पूर्वद्वारेण प्रविशति, प्रविश्यालोक्य जिनप्रतिमानां परमाणं करोति, कृत्वा यत्रैव मणिपीठिका यत्रैव देवच्छ-न्दको यत्रैव जिनप्रतिमास्तत्रोपागच्छति, उपागत्य लोमहस्तकं परामृशति परामृश्य च जिनप्रतिमाः प्रमार्जयति प्रमार्ज्य दिव्ययोदकधारया स्नपयति स्नपयित्वा सरसेनार्द्रेण गोशीर्षचन्दनेन गात्राण्य-नुलिम्पति, अनुलिप्य 'अहतानि' अपरिमलितानि दिव्यानि देवदूष्ययुगलानि 'नियंसइ'त्ति परिधाप-यति परिधाप्य 'अग्रैः' अपरिभुक्तैः 'वरैः' प्रधानैर्गन्धैर्माल्यैश्चार्चयति ।

एतदेव सविस्तरमुपदर्शयति—पुष्पारोपणं माल्यारोपणं वर्णकारोपणं चूर्णारोपणं गन्धारोप-णम् आभरणारोपणं (च) करोति, कृत्वा तासां जिनप्रतिमानां पुरतः 'अच्छैः' स्वच्छैः 'श्लक्ष्णैः' मसृणै रजतमयैः, अच्छो रसो येषां तेऽच्छरसाः, प्रत्यासन्नवस्तुप्रतिबिम्बाधारभूता इवातिनिर्मला इति भावः, ते च ते तन्दुलाश्चाच्छरसतन्दुलाः, पूर्वपदस्य दीर्घान्तता प्राकृतत्वात्, यथा 'वइरामया नेमा' इत्यादौ, तैरष्टावष्टौस्वस्तिकादीनि मङ्गलकान्यालिखति, आलिख्य 'कयग्गाहगहिय'मित्यादि मैथुनप्रथमसंरम्भे मुखचुम्बनाद्यर्थं युवत्याः पञ्चाङ्गुलिभि केशेषु ग्रहणं कचग्राहस्तेन कचग्राहेण गृहीतं करतलाद्विमुक्तं सत् प्रभ्रष्टं करतलप्रभ्रष्टविमुक्तं, प्राकृतत्वादेव पदव्यत्ययः ।

तेन 'दशार्द्धवर्णेन' पञ्चवर्णेन 'कुसुमेन' कुसुमसमूहेन 'पुष्पपुञ्जोचारकलितं' पुष्पपुञ्ज एवोपचारः—पूजा पुष्पपुञ्जोपचारस्तेन कलितं—युक्तं करोति, कृत्वा च 'चंदप्पभवइर-वेरुलियविमलदंडं' चन्द्रप्रभवज्रवैडूर्यमयो विमलो दण्डो यस्य स तथा तं काञ्चनमणिरत्नभक्तिचित्रं कालागुरुप्रवरकुन्दुरुष्कतुरुष्कधूपेन गन्धोत्मेनानुविद्धा कालागुरुप्रवरकुन्दुरुष्कतुरुष्क-धूपगन्धोत्तमानुविद्धा, प्राकृतत्वात्पदव्यत्ययः, तां धूपवर्त्ति विनिर्मुञ्चन्तं वैडूर्यमयं धूपकडुच्छुकं प्रगृह्य प्रयतो धूपं दत्वा जिनवरेभ्यः, सूत्रे षष्ठी प्राकृतत्वात्, सप्ताष्टानि पदानि पश्चादपसृत्य दशाङ्गुलिमञ्जलिं मस्तके कृत्वा प्रयतः 'अट्ठसयविसुद्धगंठजुत्तेहिं' इति विशुद्धो—निर्मलो लक्षणदोष-रहित इति भावः यो ग्रन्थः—शब्दसंदर्भस्तेन युक्तानि विशुद्धग्रन्थयुक्तानि अष्टशतं च तानि विशुद्धग्रन्थयुक्तानि च तैः 'अर्थयुक्तैः' अर्थसारैः अपुनरुक्तैः महावृत्तैः ।

तथाविधदेवलब्धेः प्रभाव एषः, संस्तौति संस्तुत्य वामं जानुं 'अञ्चति' उत्पाटयत दक्षिणं जानुं धरणितले 'निवाडेइ' इति निपातयति लगयतीत्यर्थ 'त्रिकृत्वः' त्रीन् वारान् मूर्द्धानं धरणितले 'नमेइ'त्ति नमयति नमयित्वा चेषत्प्रत्युन्नमयति, ईषत्प्रत्युन्नम्य कटकत्रुटितस्तम्भितौ भुजौ 'संहरति' सङ्कोचयति, संह्रत्य करतलपरिगृहीतं शिरस्यावर्त्त मस्तकेऽञ्जलिं कृत्वैवमवादीत्—'नमोऽत्थु ण'मित्यादि, नमोऽस्तु णमिति वाक्यालङ्कारे देवादिभ्योऽतिशयपूजामर्हन्तीत्यर्हन्तस्तेभ्यः, सूत्रे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठी ''छट्ठिविभत्तीए भन्नइ चउत्थी''इति प्राकृतलक्षणात्, ते चार्हन्तो नामादिरूपा अपि सन्ति ततो भावार्हत्प्रतिपत्त्यर्थमाह–'भगवद्यः' भगः–समग्रैश्वर्यादिलक्षणः स एषामस्तीति भगवन्तस्तेभ्यः

आदिः–धर्म्मस्य प्रथमा प्रवृत्तिस्तत्करणंशीला आदिकरास्तेभ्यः, तीर्यते संसारसमुद्रोऽनेनेति तीर्थं तत्करमशीलास्तीर्थकरास्तेभ्यः, स्वयं–अपरोपदेशेन सम्यग्वरबोधिप्राप्तया बुद्धा मिथ्यात्वनिद्रापगमसम्बोधेन स्वयंसंबुद्धास्तेभ्यः, तथा पुरुषाणामुत्तमाः पुरुषोत्तमाः, भगवन्तो हि संसारमप्यावसन्तः सदा परार्थव्यसनिन उपसर्जनीकृतस्वार्था उचितक्रियावन्तोऽदीनभावाः कृतज्ञतापतयोऽनुपहतचित्ता देवगुरुबहुमानिन इति भवन्ति पुरुषोत्तमास्तेभ्यः, तथा पुरुषाः सिंहा इव कर्म्मगजान् परति पुरुषसिंहास्तेभ्यः, तथा पुरुषा वरपुण्डरीकाणीव संसारजलासङ्गादिना धर्म्मकलापेनेति पुरुषवरपुण्डरीकाणि तेभ्यः, तथा पुरुषा वरगन्धहस्तिन इव परचक्रदुर्भिक्षमारिप्रभृतिक्षुद्रगजनिराकरणेनेति पुरुषवरगन्धहस्तिनस्तेभ्यः।

तथा लोको–भव्यसत्वलोकस्तस्य सकलकल्याणकनिबन्धनतया भव्यत्वभावेनोत्तमा लोकोत्तमास्तेभ्यः तथा लोकस्य–भव्यलोकस्य नाथा–योगक्षेमकृतो लोकनाथास्तेभ्यः, तत्र योगो–बीजाधानोद्भेदपोषणकरणं क्षेमं–तदुपद्रवाद्यभावापादनं, तथा लोकस्य–प्राणिलोकस्य पञ्चास्तिकायात्मकस्यवा हितोपदेशेन सम्यकप्ररूपणया वा हिता लोकहितास्तेभ्यः, तथा लोकस्य–देशनायोग्यस्य विशिष्टस्य प्रदीपा–देशनांशुभिर्यथाऽवस्थितवस्तुप्रकाशका लोकप्रदीपास्तेभ्यः, तथा लोकस्य–उत्कृष्टमतेर्भव्यसत्वलोकस्य प्रद्योतनं प्रद्योतः प्रद्योतकत्वं–विशिष्टज्ञानशक्तिस्तत्करणशीला लोकप्रद्योतकराः, तथा च भवन्ति भगवत्प्रसादात् तत्क्षणमेव भगवन्तो गणभृतो विशिष्टज्ञानसम्पत्समन्विता यद्वशाद् द्वादशाङ्गमारचयन्तीति तेभ्य,ः–

–तथाऽभयं–विशिष्टमात्मनः स्वास्थ्यं निश्रेयसधर्म्मभूमिकानिबन्धनभूता परमा धृतिरिति भावः, तद् अभयं ददतीत्यभयदास्तेभ्यः, सूत्रे च कप्रत्ययः स्वार्थिकः प्राकृतलक्षणवशात्, एवमन्यत्रापि, तथा चक्षुरिव चक्षु–विशिष्ट आत्मधर्मस्तत्वावबोधनिबन्धनं श्रद्धास्वभावः, श्रद्धाविहीनस्याचक्षुष्मत इव तत्वदर्शनायोगात्, तद्ददातीति चक्षुर्दास्तेभ्यः, तता मार्गो–विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेषस्तं ददतीति मार्गदास्तेभ्यः, तथा शरणं–संसारकान्तारगतानामतिप्रबलरागादिपीडितानां समाश्वसनस्थानकल्पं तत्वचिन्तारूपमध्यवसानं तद्ददतीति शरणदास्तेभ्यः, तथा बोधि–जिनप्रणीतधर्मप्राप्तिस्तां तत्वार्थश्रद्धानलक्षणसम्यग्दर्शनरूपां ददतीति बोधिदास्तेभ्यः। तथा धर्मं–चारित्ररूपं ददतीति धर्मदास्तेभ्यः कथं धर्म्मदाः ? इत्याह–धर्मं दिशन्तीति धर्म्मदिशकास्तेभ्यः, तथा धर्म्मस्य नायकाः–स्वामिनस्तद्वशीकरणात्तत्फलपरिभोगाच्च धर्मनायकास्तेभ्यः, धर्म्मस्य सारथय इव सम्यकप्रवर्त्तनयोगेन धर्मसारथयस्तेभ्यः, तथा धर्म एव वरं–प्रधानं चतुरन्तहेतुत्वात् चतुरन्तं २ चक्रमिव चतुरन्तचक्र तेन वर्त्तितुं शीलं येषां ते धर्म्मवरचतुरन्तचक्रवर्त्तिनस्तेभ्यः, तथाऽप्रतिहते–अप्रतिस्खलिते क्षायिकत्वाद् वरे–प्रधाने ज्ञानदर्शने धरन्तीति अप्रतिहतवरज्ञानदर्शनधरास्तेभ्यः, तथा छादयति–आवरयतीति छद्म–घातिकर्म्मचतुष्टयं व्यावृत्तं–अपगतं छद्म येभ्यस्ते व्यावृत्तछद्मानस्तेभ्यः, तथा रागद्वेषकषायेन्द्रियपरीष-होपसर्गघातिकर्म्मशत्रून् जितवन्तो जिनाः अन्यान् जापयन्तीति जापकास्तेभ्यो जिनेभ्यो जापकेभ्यः, तथा भवार्णवं स्वयं तीर्णा अन्यांश्च तारयन्तीति तीर्णास्तारकास्तेभ्यः, तथा केवलवेदसा अवगततत्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धा अन्यांश्च बोधयन्तीति बोधकास्तेभ्यः –

—मुक्ताः—कृतकृत्या निष्ठितार्था इति भावः, अन्यांश्च मोचयन्तीति मोचकास्तेभ्यः, सर्वज्ञेभ्यः सर्वदर्शिभ्यः, शिवं—सर्वोपद्रवरहितत्वात् 'अचलं' स्वाभाविकप्रायोगिकचलनक्रियाव्यपोहात् 'अरुजं' शरीरमनसोरभावेनाऽऽधिव्याध्यसम्भवात् अनन्तं—केवलात्मनाऽनन्तत्वात् 'अक्षयं' विनाशकारणाभावात् 'अव्याबाधं' केनापि विबाधयितुमशक्यत्वात् न पुनरावृत्तिर्यस्मात्तदपुनरावृत्ति, सिध्यन्ति निष्ठितार्थाः भवन्त्यस्यामिति सिद्धि—लोकान्तक्षेत्रलक्षणा सैव गम्यमानत्वाद् गति सिद्धिगति २ रिति नामगेयं यस्य तत्सिद्धिगतिनामधेयं, तिष्ठत्यस्मिन्निति स्थानं—व्यवहारतः सिद्धक्षेत्रं निश्चयतो यथाऽवस्थितं स्वं स्वरूपं, स्थानस्थानिनोरभेदोपचारात्तु सिद्धिगतिनामधेयं तत्संप्राप्तेभ्यः ।

एवंप्रणिपातदण्डकं पठित्वा 'वदइ नमंसइ' इति वन्दते—ताः प्रतिमाश्चैत्यवन्दनविधिना प्रसिद्धेन, नमस्करोति—पश्चात्प्रणिधानादियोगेनेत्येके, अन्ये त्वभिदधति—विरतिमतामेव प्रसिद्धश्चैत्यवन्दनविधिरन्येषां तथाऽभ्युपगमे कायोत्सर्गासिद्धेरिति वन्दते सामान्येन, नमस्करोत्याशयवृद्धेरुत्थाननमस्कारेणेति, तत्वमत्र भगवन्तः परमर्षयः केवलिनो विदन्ति, ततो वन्दित्वा नमस्यित्वा यत्रैव सिद्धायतनस्य बहुमध्यदेशभागस्तत्रैवोपागच्छति उपागत्य बहुमध्यदेशभागं दिव्ययोदकधारया 'अभ्युक्षति' अभिमुखं सिञ्चति, अभ्युक्ष्यसरसेन गोशीर्षचन्दनेन पञ्चाङ्गुलितलं ददाति, दत्वा कचग्राहगृहीतेन करतलप्रभ्रष्टविमुक्तेन दशार्द्धवर्णेन 'कुसुमेन' कुसुमजातेन पुष्पपुञ्जोपचारकलितं करोति कृत्वा धूपं ददाति, तद्वा च यत्रैव दाक्षिणात्यं द्वारं तत्रैवोपागच्छति, उपागत्य लोमहस्तकं गृह्णाति, गृहीत्वा तेन द्वारशाखाशालभञ्जिनकाव्यालरूपकाणि च प्रमार्जयति, प्रमृज्य दिव्ययोदकधारयाऽभ्युक्षणं गोशीर्षचन्दनचर्चां पुष्पाद्यारोपणं धूपदानं करोति । ततो दक्षिणद्वारेण निर्गत्य यत्रैव दाक्षिणात्यस्य मुखमण्डपस्य बहुमध्यदेशभागस्तत्रोपागच्छति, उपागत्य लोमहस्तकं परामृशति, परामृश्य च बहुमध्यदेशभागं लोमहस्तकेन प्रमार्जयति, प्रमृज्य दिव्ययोदकधारयाऽभ्युक्षणं सरसेन गोशीर्षचन्दनेन पञ्चाङ्गुलितलं मण्डलमालिखति, कचग्राहगृहीतेन करतलप्रभ्रष्टविमुक्तेन दशार्द्धवर्णेन कुसुमेन पुष्पपुञ्जोपचारकलितं करोति, कृत्वा धूपं ददाति, दत्वा च यत्रैवं दाक्षिणात्यस्य मुखमण्डपस्य पश्चिमं द्वारं तत्रोपागच्छति, उपागत्य लोमहस्तपरामर्शनं, तेन च लोमहस्तकेन द्वारशाखाशालभञ्जिकाव्यालरूपकप्रमार्जनं, उदकधारयाऽभ्युक्षमं गोशीर्षचन्दनचर्चां पुष्पाद्यारोपणं धूपदानं करोति, कृत्वा यत्रैव दाक्षिणात्यस्य मुखमण्डपस्योत्तरद्वारं तत्रोपागच्छति, उपागत्य पूर्ववद् द्वारार्चनिकां करोति, कृत्वा च यत्रैव दाक्षिणात्यस्य मुखमण्डपस्य पूर्वद्वारं तत्रोपागच्छति ।

—उपागत्य पूर्ववत्तत्राप्यर्चनिकां करोति, कृतवा च दाक्षिणात्यस्य मुखमण्डपस्य यत्रैव दाक्षिणात्यं द्वारंतत्रोपागच्छति, उपागत्य पूर्ववत्तत्र पूजां विधायतेन द्वारेण विनिर्गत्य यत्रैव दाक्षिणात्यः प्रेक्षागृहमण्डपो यत्रैव दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्य बहुमध्यदेशभागो यत्रैव वज्रमयोऽक्षपाटको यत्रैव च मणिपीठिका यत्रैव च सिंहासनं तत्रैवोपागच्छति, उपागत्य लोमहस्तकं परामृशति, परामृश्याक्षपाटकं मणिपीठिकां सिंहासनं च प्रमार्जयति, प्रमाज्योर्दकधारयाऽभ्युक्ष्य चन्दनचर्चां पुष्पपूजां धूपदानं च करोति, कृत्वा च यत्रैव दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्योत्तरद्वारं

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तत्रैवोपागच्छति, उपागत्य पूर्ववद्द्वारार्चनिकां करोति, कृत्वा यत्रैव दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्य पूर्वद्वारं तत्रोपागच्छति, उपागत्य पूर्वद्वारार्चनिकां करोति, कृत्वा यत्रैव तस्य दाक्षिणात्यस्य प्रेक्षागृहमण्डपस्य दाक्षिणात्यं द्वारं तत्रोपागच्छति, उपागत्य तत्रार्चनिकां कृत्वा यत्रैव दाक्षिणात्यश्चैत्यस्तम्भस्तत्रोपागच्छति, उपागत्य स्तूपं मणिपीठिकां च लोमहस्तकेन प्रमृज्य दिव्ययोदकधारयाऽभ्युक्षति सरसगोशीर्षचन्दनचर्चा पुष्पाद्यारोहणधूपदानादि करोति।

—कृत्वा च यत्रैव पाश्चात्या मणिपीठिका यत्रैव च पाश्चात्या जिनप्रतिमा तत्रोपागच्छति, उपागत्य जिनप्रतिमाया आलोके प्रणामं करोतीत्यादि पूर्ववद् यावन्नमस्यित्वा यत्रैवोत्तरा जिनप्रतिमा तत्रोपागच्छति, उपागत्य तत्रापि यावन्नमस्यित्वा यत्रैव दाक्षिणात्यश्चैत्यवृक्षस्तत्रोपागच्छति, उपागत्य पूर्वदर्चनिकां करोति, कृत्वाच यत्रैव महेन्द्रध्वजस्तत्रोपागच्छति, उपागत्य पूर्वदर्चनिकां विधाय यत्रैव दाक्षिणात्या नन्दापुष्करिणी तत्रैवोपागच्छति, उपागत्य लोमहस्तकं परामृशति, परामृश्य तोरणानि त्रिसोपानप्रतिरूपकाणि शालमञ्जिकाव्यालरूपकाणि च प्रमार्जयति, प्रमार्ज्य दिव्ययोदकधारया सिञ्चति सिक्त्वा सरसगोशीर्षचन्दनपञ्चाङ्गुलितलप्रदानपुष्पाद्यारोहणधूपदानादि करोति, कृत्वा च सिद्धायतनमनुप्रदक्षिणीकृत्य यत्रैवोत्तरा नन्दापुष्करिणी स तत्रोपागच्छति, उपागत्य पूर्ववत्सर्वं करोति, कृत्वा चौत्तराहे माहेन्द्रध्वजे तदनन्तरमौत्तराहे चैत्यवृक्षे तत औत्तराहे चैत्यस्तूपे, ततः पश्चिमोत्तरपूर्वदक्षिणजिनप्रतिमासु पूर्ववत्सर्वा वक्तव्यता वक्तव्या, तदनन्तर-मौत्तराहे प्रेक्षागृहमण्डपे समागच्छति, तत्र दाक्षिणात्ये प्रेक्षागृहमण्डपे पूर्ववत्सर्वं वक्तव्यं, तत उत्तरद्वारेण विनिर्गत्यौत्तराहे मुखमण्डपे समागच्छति, तत्रापि दाक्षिणात्यमुखमण्डपवत्सर्वं कृत्वोत्तरद्वारेण विनिर्गत्य सिद्धायतनस्य पूर्वद्वारे समागच्छति, तत्रार्चनिकां पूर्ववत्कृत्वा पूर्वस्य मुखमण्डपस्य दक्षिणोत्तपूर्वद्वारेषु क्रमेणोक्तरूपां पूजां विधाय पूर्वद्वारेण विनिर्गत्य पूर्वप्रेक्षामण्डपे समागत्य पूर्ववदर्चनिकां करोति।

ततः पूर्वप्रकारेणैव क्रमेण चैत्यस्तूपजिनप्रतिमाचैत्यवृक्षमाहेन्द्रध्वजनन्दापुष्करिणीनां ततः सभायां सुधर्मायां पूर्वद्वारेण प्रविशति, प्रविश्य यत्रैव मणिपीठिका तत्रैवोपागच्छति, उपागत्यालोके जिनसक्थां प्रणामं करोति, कृत्वा च यत्र माणवकश्चैत्यस्तम्भो यत्र वज्रमया गोलवृत्ताः समुद्ग-कास्तत्रागत्य समुद्गकान् गृह्णाति, गृहीत्वा च विघाटयति, विघाटय लोमहस्तकेन प्रमार्जयति, प्रमार्ज्योर्दकधारयाऽभ्युक्षति, अभ्युक्ष्य गोशीर्षचन्दनेनालिम्पति, ततः प्रधानैर्गन्धमाल्यैरर्चयति, अर्चयित्वा धूपं दहति, तदनन्तरं भूयोऽपि वज्रमयेषु गोलवृत्तसमुद्गकेषु प्रक्षिपति, प्रक्षिप्य तान् वज्रमयान् गोलवृत्तसमुद्गकान् स्वस्थाने प्रतिनिक्षिपति, प्रतिनिक्षिप्य तेषु पुष्पगन्धमाल्य-वस्त्रभरणान्यारोपयति। ततो लोमहस्तकेन माणवकचैत्यस्तम्भं प्रमार्ज्योर्दकधारयाऽभ्युक्ष्य चन्दनचर्चा पुष्पा- द्यारोपणं धूपदानं च करोति, कृत्वा सिंहासनप्रदेशे समागत्य सिंहासनस्य लोमहस्तकेन प्रमार्जना- दिरूपां पूर्वदर्चनिकां करोति, कृत्वा यत्र मणिपीठिका यत्र च देवशयनीयं तत्रोपागत्य मणिपीठिकाया देवशयनीयस्य च प्राग्वदर्चनिकां करोति, तत उक्तप्रकारेणैव क्षुल्लकेन्द्रध्वज पूजां करोति, कृत्वा च यत्र चोप्पालको नाम प्रहरणकोशस्तत्र समागत्य लोमहस्तेन परिघरत्नप्रमुखाणि प्रहरणारत्नानि प्रमार्जयति, प्रमार्ज्योर्दकधारयाऽभ्युक्षणं चन्दनचर्चां पुष्पाद्यारोपणं धूपदानं करोति, कृत्वा सभायाः सुधर्माया बहुमध्यदेशभागेऽर्चनिकां पूर्ववत्करोति,

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

कृत्वा सभायाः सुधर्माया दक्षिणद्वारे समागत्यार्चनिकां पूर्ववत्करोति, ततो दक्षिणद्वारे विनिर्गच्छति इत ऊर्द्धध्र्वयथैव सिद्धायत नान्निष्क्रमतो दक्षिणद्वारादिका दक्षिणनन्दापुष्करिणी-पर्यवसाना पुनरपि प्रविशत उत्तरनन्दापुष्करिणीप्रभृतिका उत्तरान्ता ततो द्वितीयं वारं निष्क्रमतः पूर्वद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानार्चनिका वक्तव्या तथैव सुधर्मायाः सभाया अप्यन्यूनाति-रिक्ता द्रष्टव्या, ततः पूर्वनन्दापुष्करिण्या अर्चनिकां कृत्वोपपातसभां पूर्वद्वारेण प्रविशति, प्रविश्य च मणिपीठिकाया देवशयनीयस्य तदनन्तरं बहुमध्यदेशभागे प्राग्वदर्चनिकां विदधाति, ततो दक्षिणद्वारेण समागत्य तस्यार्चनिकां कुरुते, अत ऊर्द्धमत्रापि सिद्धायतनवद्दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या।

ततः पूर्वनन्दापुष्करिणीतोऽपक्रम्य ह्रदे समागत्य पूर्ववत्तोरणार्चनिकां करोति, कृत्वा पूर्वद्वारेणाभिषेकसभायां प्रविशति, प्रविश्य मणिपीठिकायाः सिंहासनस्याभिषेकभाण्डस्य बहुमध्यदेशभागस्य च पूर्ववदर्चनिकां क्रमेण करोति, तदनन्तरमत्रापि सिद्धायतनवद्दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतः पूर्वद्वारेण व्यवसाय-सभां प्रविशति प्रविश्य पुस्तकरत्नं लोमहस्तकेन प्रमृज्योदकधारयाऽभ्युक्ष्य चन्दनेन चर्चयित्वा वरगन्धमालैयरर्चयित्वा पुष्पाद्यारोपणं धूपदानं च करोति, तदनन्तरं मणिपीठिकायाः सिंहासनस्य बहुमध्यदेशभागस्य च क्रमेणार्चनिकां करोति, तदनन्तरमत्रापि सिद्धायतनवद्दक्षिणद्वारादिका पूर्वनन्दापुष्करिणीपर्यवसानाऽर्चनिका वक्तव्या, ततः पूर्वनन्दापुष्करिणीतो बलिपीठे समागत्य तस्य बहुमध्यदेशभागे पूर्ववदर्चनिकां करोति, कृत्वा चोत्तरपूर्वस्यां नन्दापुष्करिण्यां समागत्य तस्यास्तोरणेषु पूर्ववदर्चनिकां कृत्वाऽऽभियोगिकान् देवान् शब्दयति२ एवमवादीत्–

'खिप्पामेवे'त्यादि सुगमं यावत् 'एयमाणत्तियं पच्चप्पिणंति' नवरं श्रृङ्गाटकंत्रिकोणं स्थानं त्रिकं–यत्र रथ्यात्रयं मिलतिचतुष्कं–चतुष्पथयुक्तं चत्वरं–बहुरथ्यापातस्थानं चतुर्मुखं–यस्माच्चतसृष्वपि दिक्षु पन्थानो निस्सरन्ति महापथो–राजपथः शेषः सामान्यः पन्थाः प्राकारः–प्रतीतः अट्टालकाः–प्राकारस्योपरि भृत्याश्रयविशेषाः चरिका–अष्टहस्तप्रमाणो नगरप्राकारान्तरालमार्ग द्वाराणि– प्रासादादीनां गोपुराणि–प्राकारद्वाराणि तोरणानि–द्वारादिसम्बन्धीनि आगत्य रमन्तेऽत्र मादवीलतागृहादिषु दम्पत्य इति स आरामः पुष्पादिसदृक्षसङ्कुलमुत्सवादौ बहुजनोपभोग्यमुद्यानं सामान्यवृक्षवृन्दं नगरासन्नं काननं नगरविप्रकृष्टं वनं एकानेकजातीयोत्तमवृक्षसमूहो वनषण्डः एखजातीयोत्तमवृक्षसमूहो वनराजी।

'तए णं'मित्यादि, ततः स विजयो देवो बलिपीठे बलिविसर्जनं करोति, कृत्वा च यत्रैवोत्तर-नन्दापुष्करिणी तत्रोपागच्छति, उपागत्योत्तरपूर्वां नन्दां पुष्करिणां प्रदक्षिणीकुर्वन् पूर्वतोरणेनानु-प्रविशति, अनुप्रविश्य पूर्वत्रिसोपानप्रतिरूपकेण प्रत्यवरोहति, प्रत्यवरुह्य हस्तपादौ प्रक्षालयति, प्रक्षाल्य नन्दापुष्करिणीतः प्रत्युत्तरति, प्रत्युत्तीर्य चतुर्भि सामानिकसहस्रैश्चतसृभिरग्रमहिषीभिः सपरिवाराभिस्तिसृभिः पर्षद्भिः सप्तभिरनीकैः सप्तभिरनीकाधिपतिभि षोडशभिरात्म-रक्षदेवसहस्रैरन्यैश्च बहुभिर्विजयराजधानीवास्तव्यैर्वानमन्तरैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः सर्वद्धर्या यावद् दुन्दुभिनिर्घोषनादितरवेण विजयाया राजधान्या मध्यंमध्येन यत्रैव सभा सुधर्मा तत्रोपागच्छति, उपागत्य सभां सुधर्मां पूर्वद्वारेणानुप्रविशति, अनुप्रविश्य यत्रैव मणिपीठिका

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

यत्रैव सिंहासनं तत्रैवोपागच्छति, उपागत्य सिंहासनवरगतः पूर्वाभिमुखः सन्निषण्णः ॥

मू. (१८१) *तए णं तस्स विजयस्स देवस्स चत्तारि सामानियसाहस्सीओ अवरुत्तरेणं उत्तरेणं उत्तरपुरच्छिमेणं पत्तेयं २ पुव्वणत्थेसु भद्दासणेसु निसीयंति तए णं तस्स विजयस्स देवस्स चत्तारि अग्गमहिसीओ पुरत्थिमेणं पत्तेयं २ पुव्ववत्थेसु भद्दासणेसु निसीयंति ।*

तए णं तस्स विजयस्स देवस्स दाहिणपुरत्थिमेणं अब्भिंतरियाए परिसाए अट्ठ देवसाहस्सीओ पत्तेयं २ जाव निसीयंति । एवं दक्खिणेणं मज्झिमियाए परिसाए दस देवसाहस्सीओ जाव निसीदंति । दाहिणपच्चत्थिमेणं बाहिरियाए परिसाए बारस देवसाहस्सीओ पत्तेयं २ जाव निसीदंति

तए णं तस्स विजयस्स देवस्स पच्चत्थिमेणं सत्त अनियाहिवती पत्तेयं २ जाव निसीयंति तए णं तस्स विजयस्स देवस्स पुरत्थिमेणं दाहिणेणं पच्चत्थिमेणं उत्तरेणं सोलस आयरक्खदेवसाहस्सीओ पत्तेयं २ पुव्वणत्थेसु भद्दा सणेसु निसीदंति, तंजहा–पुरत्थिमेणं चत्तारि साहस्सीओ जाव उत्तरेणं ४ ॥ ते णं आयरक्खा सन्नद्धबद्धवम्मियकवया उप्पीलियसरासणपट्टिया पिणद्धगेवेज्जविमल-वरचिंधपट्टा गहियाउहपहरणा तिनयाइं तिसंधीणि वइरामया कोडीणि धणूइं अहिगिज्झ परियाइयकंडकलावा नीलपाणिओ पीयपाणिओ रत्तपाणिणो चावपाणिणो चारुपाणिणो चम्मपाणिणो खग्गपाणिणो दंडपाणिणो पासपाणिणो नीलपीयरत्तचावचारुचम्मखग्गदंडपासवररा आयरक्खा रक्खोवगा गुत्ता गुत्तपालिता जुत्ता जुत्तपालिता पत्तेयं २ समयतो विणयतो किंकरभूताविव चिट्ठंति ।

विजयस्स णं भंते ! देवस्स केवतियं कालं ठिती पन्नत्ता ?, गो० ! एगं पलिओवमं ठिती पन्नत्ता, विजयस्स णं भंते ! देवस्स सामाणियाणं देवाणं केवतियं कालं ठिती पण्णत्ता ?, एगं पलिओवमं ठिती पण्णत्ता, एवं महिड्ढीए एवंमहज्जुतीए एवंमहब्बले एवंमहायसे एवंमहासुक्खे एवंमहाणुभागे विजए देवे २ ॥

वृ. ततस्तस्य विजयस्य देवस्यापरोत्तरेण–अपरोत्तरस्यां दिशि एवमुत्तरस्यामुत्तरपूर्वस्यां दिशि च चत्वारि २ सामानिकदेवसहस्राणि चतुर्षु भद्रासनसहस्रेषु निषीदन्ति । ततस्तस्य विजयस्य देवस्य पूर्वस्यां दिशि चतस्रऽग्रमहिष्यश्चतुर्षु भद्रासनेषु निषीदन्ति, ततस्तस्य विजयस्य देवस्य दक्षिणपूर्वस्यामभ्यन्तरिकायाः पर्षदोऽष्टौ देवसहस्राणि अष्टासु भद्रासनसहस्रेषु निषीदन्ति । ततस्तस्य विजयस्य देवस्य दक्षिणस्यां दिशि मध्यमिकायाः पर्षदि दश देवसहस्राणि दशसु भद्रासनसहस्रेषु निषीदन्ति । ततस्तस्य विजयस्य देवस्य पश्चिमायां दिशि सप्तानीकाधिपतयः सप्तसु भद्रासनेषु निषीदन्ति ततस्तस्य विजयस्य देवस्य सर्वतः समन्तात् सर्वासु दिक्षु सामस्त्येनषोडश आत्मरक्षकदेवसहस्राणि षोडशसु भद्रासनसहस्रेषु निषीदन्ति, तद्यथा–चत्वारि सहस्राणि चतुर्षु भद्रासनसहस्रेषु पूर्वस्यां दिशि, एवं दक्षिणस्यां दिशि, एवं प्रत्येकं पश्चिमोत्तरयोरपि ।

ते चात्मरक्षाः सन्नद्धबद्धवर्मितकवचाः, कवचं–तनुत्राणं धर्म–लोहमयकुतूलिकादिरूपं संजातमस्मिन्निति वर्मितं सन्नद्धं शरीरे आरोपणात् बद्धं गाढतरबन्धनेन बन्धनात् वर्मितं कवचं यैस्ते सन्नद्धबद्धवर्मितकवचाः, 'उप्पीलियसरासणपट्टिया' इति उत्पीडिता–गाढीकृता शरा अस्यन्ते–क्षिप्यन्तेऽस्मिन्निति शरासनः–इषुधिस्तस्य पट्टिका यैरुत्पीडिथशरासनपट्टिकाः 'पिणद्धगेवेज्जविमलवरचिंधपट्टा' इति पिनद्धं ग्रैवेयं–ग्रीवाभरणं विमलवरचिह्नपट्टश्च यैस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिनद्धवरग्रैवेयविमलवरचिह्नपट्टाः 'गहियाउहपहरणा' इति आयुध्यतेऽनेनेत्यायुधं—खेटकादि प्रहरणं—असिकुन्तादि, गृहीतानि आयुधानि प्रहरणानि च यैस्ते गृहीतायुधप्रहरमाः 'त्रिनतानि' आदिमध्यावसानेषु नमनभावात् 'त्रिसन्धीनि' आदिमध्यावसानेषु सन्धिभावात्।

वज्रमयकोटीनि धनूंषि अभिगृह्य 'परियाइयकंडकलावा' इति पर्यात्तकाण्डकलापा विचित्रकाण्डकलापयोगात्, केचित् 'नीलपाणय' इति नीलः काण्डकलाप इति गम्यते पाणौ येषां ते नीलपाणयः, एवं पीतपाणयः रक्तपाणयः, चापं पाणौ येषां ते चापपाणयः, चारु—प्रहरण-विशेषः पाणौ येषां ते चारुपाणयः, चर्म—अङ्गुष्ठाङ्गुल्योराच्छादनरूपं पाणौ येषां ते चर्मपाणयः, एवं दण्डपाणयः खङ्गपाणयः पाशपाणयः, एतदेव व्याचष्टे—यथायोगं नीलपीतरक्तचापता-रुचर्मदण्डपाशधरा आत्मरक्षाः, रक्षामुपगच्छन्ति—तदेकचित्ततया तत्परायणा वर्त्तन्त इति रक्षोप्रगाः 'गुप्ताः' न स्वामिभेदकारिणः तथा गुप्ता—पराप्रवेश्या पालि—सेतुर्येषां ते गुप्तपालिकाः, तथा 'युक्ताः' सेवकगुणोपेततयोचिताः। तथा युक्ता—परस्परं बद्धा न तु बृहदन्तराला पालिर्येषां ते युक्तपालिकाः, प्रत्येकं २ समयतःआचारत आचारेणेत्यर्थः विनयतश्च किङ्करभूता इत तिष्ठन्ति, न खलु ते किङ्कराः, किन्तु तेऽपि मान्याः, तेषामपि पृथगासननिपातनात्, केवलं ते तदानीं निजाचारपरिपालनतो विनीतत्वेन च तथाभूता इव तिष्ठन्ति तदुक्तं किङ्करभूता इवेति।

'तए णं से विजए' इत्यादि सुप्रतीतं यावद्विजयदेववक्तव्यतापरिसमाप्ति ॥तदेवमुक्ता विजयद्वारवक्तव्यता, सम्प्रति वैजयन्तद्वारवक्तव्यतामभिधित्सुराह—

मू. (१८२) *कहि णं भंते! जंबुद्दीवस्स वेजयंते नामं दारे प० गो० ! जंबुद्दीवे २ मंदरस्स पव्वयस्स दक्खिणेणं पणयालीसं जोयणसहस्साइं अबाधाए जंबुद्दीवदीवदाहिणपेरंते लवण-समुद्ददाहिणद्धस्स उत्तरेणं एत्थ णं जंबुद्दी० २ वेजयंते नामं दारे प० अट्ठ जोयणाइं उड्ढं उच्चत्तेणं सच्चेव सव्वा वत्तव्वता जाव निच्चे। कहि णं भंते!० रायहाणी? दाहिणे णं जाव वेजयंते देवे २*

कहि णं भंते! जंबुद्दीवस्स २ जयंते नाम दारे पन्नत्ते?, गोयमा! जंबुद्दीवे २ मंदरस्स पव्वयस्स पच्चत्थिमेणं पणयालीसं जोयणसहस्साइं जंबुद्दीवपच्चत्थिमपेरंते जलणसमुद्दपच्चत्थिमद्धस्स पुरच्छिमेणं सीओदाए महानदीए उप्पिं एत्थ मं जंबुद्दी० जयंते नाम दारे पन्नते तं चेव से पमाणं जयंते देवे पच्चत्थिमेणं से रायहाणी जाव महिड्ढीए।

कहि णं भंते! जंबुद्दीवस्स अपराइए नामं दारे पन्नत्ते?, गोयमा! मंदरस्स उत्तरेणं पणयालीसं जोयणसहस्साइं अबाहाए जंबुद्दीवे २ उत्तरपेरंते लवमसमुद्दस्स उत्तरद्धस्स दाहिणेणं एत्थ णं जंबुद्दीवे २ अपराइए नामं दारे पन्नत्ते तं चेव पमाणं, रायहाणी उत्तरेणं जाव अपराइ देवे, चउण्हवि अन्नंमि जंबुद्दीवे॥

मू. (१८३) *जंबुद्दीवस्स णं भंते! दीवस्स दारस्स य दारस्स य एस णं केवतियं अबाधाए अंतरे पन्नत्ते?, गोयमा! अउणासीतिं जोयणसहस्साइं बावण्णं च जोयणाइं देसूणं च अद्धजोयणं दारस्स य २ अबाधाए अंतरे पन्नत्ते॥*

वृ. 'कहि णं भंते' इत्यादि सर्वं पूर्ववत्, नवरमत्र वैजयन्तस्य द्वारस्य दक्षिणतस्तिर्यगस-ङ्ख्येयान् द्वीपसमुद्रान् व्यतिक्रम्येति वक्तव्यं, शेषं प्राग्वत्॥ एवं जयन्तापराजितद्वारवक्तव्यताऽपि वाच्या, नवरं जयन्तद्वारस्य पश्चिमायां दिशि, अपराजितद्वारस्योत्तरतस्तिर्यगसङ्ख्येयान् द्वीपसमुद्रान्

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

व्यतिव्रज्येति वाच्यम् । सम्प्रति विजयादिद्वाराणां परस्परमन्तरं प्रतिपिपादयिषुरिदमाह–

'जंबुद्दीवस्स ण'मित्यादि, प्राग्वत् भदन्त ! द्वीपस्य सम्बन्धिनो द्वारस्य च द्वारस्य चैतत् कियत्प्रमाणा-बाधया–अन्तरित्वा प्रतिघातेनान्तरं प्रज्ञप्तम् ?, भगवानाह–गौतम ! एकोनाशीतिर्योजनसहस्राणि द्विपञ्चाशद्योजनानि देशोनं चार्द्धयोजनं द्वारस्य च द्वारस्य चाबाधयाऽन्तरं प्रज्ञप्तं, तथाहि–चतुर्णामपि द्वाराणां प्रत्येकमेकैकस्य कुड्यस्य द्वारशाकापरपर्यायस्य बाहल्यं गव्यूतं द्वाराणां च विस्तारः प्रत्येकं २ चत्वारि २ योजनानि, ततश्चतुर्ष्वपि द्वारेषु सर्वसङ्ख्यया कुडयद्वारप्रमाणमष्टादश योजनानि, जम्बूद्वीपस्य च परिधिस्तिस्र लक्षाः षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके क्रोशत्रयं अष्टाविंशं धनुःशतं त्रयोदशाङ्गुलानि एकमर्धाङ्गुल मिति ।

अस्माच्च जम्बूद्वीपपरिधेः सकाशात्तानि कुडयद्वारपरिमाणभूतान्यष्टादश योजनानि शोध्यन्ते, शोधितेषु च तेषु परिधिसत्को योजनराशिरेवंरूपो जातः–तिस्रो लक्षाः षोडश सहस्राणि द्वे शते नवोत्तरे शेषं तथैव, ततो योजनराशेश्चतुर्भिर्भागो ह्रियते, लब्धानि योजनानामेकोनाशीति सहस्राणि द्विपञ्चाशदधिकानि गव्यूतं चैकं क्रोशं १, यानि च परिधिसत्कानि त्रीणि गव्यूतानि तानि धनुसत्वेन क्रियन्ते लब्धानि धनुषां षट् सहस्राणि, यदपि च परिधिसत्कमष्टाविंशं धनुःशतं तदप्येतेषु धनुःषु मध्ये प्रक्षिप्यते, ततो जातो धनूराशिरेकषष्टि शतान्यष्टाविंशत्यधिकानि एषां चतुर्भिर्भागो ह्रियते, लब्धानि धनुषां पञ्चदश शतानि द्वात्रिंशदधिकानि यान्यपि च त्रयोदशाङ्गुलानि तेषामपि चतुर्भिर्भागो हियते, लब्धानि त्रीणि अङ्गुलानि, एतदपि सर्वं देशोनमेकं गव्यूतमिति लब्धं देशोनमर्द्धयोजनं, उक्तं च–

॥ १ ॥ "कुड्डुवारपमाणं अट्ठारस जोयणाइं परिहीए ।
सोहिय चउहि विभत्तं इणमो दारंतरं होइ ॥
॥ २ ॥ अउणासीइ सहस्सा बावन्ना अद्धजोयणं नूनं ।
दारस्स य दारस्स य अंतरमेयं विनिद्दिट्ठं ॥

मू. (१८४) *जंबुद्दीवस्स णं भंते ! दीवस्स पएसा लवणं समुद्दं पुट्ठा ?, हंता पुट्ठा ॥ ते णं भंते ! किं जंबुद्दीवे २ लवणसमुद्दे ?, गोयमा ! जंबुद्दीवे दीवे नो खलु ते लवणसमुद्दे ।*

लवणस्स णं भंते ! समुद्दस्स पदेसा जंबूद्दीवं दीवं पुट्ठा ?, हंता पुट्ठा । ते णं भंते ! किं लवणसमुद्दे जंबूद्दीवे दीवे ?, गोयमा ! लवणे णं ते समुद्दे नो खलु ते जंबुद्दीवे दीवे ।

जंबुद्दीवे णं भंते ! देवी जीवा उद्दाइत्ता २ लवणसमुद्दे पच्चायंति ?, गोयमा ! अत्थेगतिया पच्चायंति अत्थेगतिया नो पच्चायंति । लवणे णं भंते ! समुद्दे जीवा उद्दाइत्ता २ जंबुद्दीवे २ पच्चायंति ?, गोयमा ! अत्थेगतिया पच्चायंति अत्थेगतिया नो पच्चायंति ॥

वृ. 'जंबूद्दीवस्स णं भंते !' इत्यादि, जम्बूद्वीपस्य णमिति पूर्ववत् भदन्त ! द्वीपस्य 'प्रदेशाः' स्वसीमागतचरमरूपा लवणं समुद्रं 'स्पृष्टाः ?' कर्तरि क्तप्रत्ययः, स्पृष्टवन्तः, काक्वा पाठ इति प्रश्नार्थत्वावगति, पृच्छतश्चायमभिप्रायः–यदि स्पृष्टास्तर्हि वक्ष्यमाणं पृच्छयते नो चेत्तर्हि नेति भावः, भगवानाह–हंतेत्यादि, 'हन्त' इति प्रत्वधारणे स्पृष्टाः ।

एवमुक्ते भूयः पृच्छति–'ते ण'मित्यादि, ते भदन्त ! स्वसीमागतचरमरूपाः प्रदेशाः किं जम्बूद्वीपः ? किं वा लवणसमुद्रः ?, इह यद् येन संस्पृष्टं तत्किञ्चित्तद्व्यपदेशमश्नुवानमुपलब्धं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा सुराष्ट्रेभ्यः संक्रान्तो मगधदेशं मागध इति, किञ्चित्पुनर्न तद्व्यपदेशभाग् यथा तर्जन्या संस्पृष्टा ज्येष्ठाऽङ्गुलिर्ज्येष्ठैवेति, इहापि च जम्बूद्वीपचरमप्रदेशा लवणसमुद्रं स्पृष्टवन्तस्ततो व्यपदेशचिन्तायां संशय इति प्रश्नः, भगवानाह– गौतम ! जम्बूद्वीप एव णमिति निपातस्यावधारणार्थत्वात् ते चरमप्रदेशा द्वीपो, जम्बूद्वीप-सामवर्त्तित्वात्, न खलु ते जम्बूद्वीपचरमप्रदेशा लवणसमुद्रः, जम्बूद्वीप-सीमानमतिक्रम्य लवणसमुद्र-सीमानमुपगताः किन्तु स्वसीमागता एव लवणसमुद्रं स्पृष्टवन्तस्तेन तटस्थता संस्पर्शभावात् तर्जन्या संस्पृष्टा ज्येष्ठाङ्गुलिरिव ते स्वव्यपदेशं भजन्ते न व्यपदेशान्तरं, तथा चाह–नो खलु ते जम्बूद्वीपचरमप्रदेशा लवणसमुद्रः । एवं 'लवणस्स णं भंते ! समुद्दस्स पदेसा' इत्यादि लवणविषयमपि सूत्रं भावनीयम् ।

'जंबुद्दीवे णं भंते !' इत्यादि, जम्बूद्वीपे भदन्त ! द्वीपे ये जीवास्ते 'उद्दाइत्ता' इति 'अवद्राय २' मृत्वा २ लवणसमुद्रे 'प्रत्यायान्ति' आगच्छन्ति ?, भगवानाह–गौतम ! अस्तीति निपातोऽत्र बह्वर्थ, सन्त्येकका जीवा ये 'अवद्रायावद्राय' मृत्वा २ लवणसमुद्रे प्रत्यायान्ति, सन्त्येकका ये न प्रत्यायान्ति, जीवानां तथा तथा स्वस्वकर्म्मवशतया गतिवैचित्र्यसम्भवात् ।। एवं लवणसूत्रमपि भावनीयं । सम्प्रति जम्बूद्वीप इति नाम्नो निबन्धनं जिज्ञासिषुः प्रश्नं करोति–

–: उत्तर कुरु वर्णनं :–

मू. (१८५) *से केणट्ठेणं भंते ! एवं वुच्चति जंबूद्दीवे २ ?, गोयमा ! जंबुद्दीवे २ मंदरस्स पव्वयस्स उत्तरेणं नीलवंतस्स दाहिणेणं मालवंतस्स वक्खारपव्वयस्स पच्चत्थिमेणं गंधमायणस्स वक्खारपव्वयस्स पुरत्थिमेणं एत्थ णं उत्तरकुरा नाम कुरा पन्नत्ता, पाईणपडीणायता उदीणदाहिणविच्छिण्णा अद्धचंदसंठाणसंठिता एक्कारस जोयणसहस्साइं अट्ठ बायाले जोयणसते दोण्णि य एक्कोणवीसतिभागे जोयणस्स विक्खंभेणं ।*

तीसे जीवा पाईणपडीणायता दुहओ वक्खारपव्वयं पुट्ठा, पुरत्थिमिल्लाए कोडीए पुरत्थिमिल्लं वक्खारपव्वतं पुट्ठा पच्चत्थिमिल्लाए कोडीए पच्चत्थिमिल्लं वक्खारपव्वयं पुट्ठा, तेवण्णं जोयणसहस्साइं आयामेणं, तीसे धणुपट्ठं दाहिणेणं सट्ठिं जोयणसहस्साइं चत्तारि य अट्ठारसुत्तेर जोयणसते दुवालस य एकूणवीसतिभाए जोयणस्स परिक्खेवेणं पन्नत्ते ।

उत्तरकुराए णं भंते ! कुराए केरिसए आगारभावपडोयारे पन्नत्ते ?, गोयमा ! बहुस-मरमणिज्जे भूमिभागे पन्नत्ते, से जहा नाम ए आलिंगपुक्खरेति वा जव एवं एक्कोरूयदीववत्तव्वया जाव देवलोगपरिग्गहा णं ते मणुयगणा पन्नत्ता समणाउसो ! ।

नवरि इमं नाणत्तं– छधणुसहस्समूसिता दोछप्पन्ना पिट्ठकरंडसता अट्ठमभत्तस्स आहारट्ठे समुप्पज्जति तिन्नि पलिओवमाइं देसूणाइं पलिओवमस्सासंखिज्जइभागेण ऊणगाइं जहन्नेणं तिन्नि पलिओवमाइं उक्कोसेणं एकूणपन्नराइंदियाइं अणुपालणा, सेसं जहा एगूरुयाणं ।

उत्तरकुराए णं कुराए छव्विहा मणुस्सा अणुसज्जंति, तंजहा–पम्हगंधा १ मियगंधा २ अम्मम ३ सहा ४ तेयालीसे ५ सणिच्चारी ६ ।

वृ. 'से केणट्ठेणं भंते !' इत्यादि, अथ केन 'अर्थेन' केन कारणेन भदन्त ! एवमुच्यते जम्बूद्वीपो द्वीपः ? इति, भगवानाह–जम्बूद्वीपे णमिति वाक्यालङ्कारे द्वीपे मन्दरपर्वतस्य 'उत्तरेण' उत्तरतः नीलवतो वर्षधरपर्वतस्य 'दक्षिणेन' दक्षिणतो गन्धमादनस्य वक्षस्कारपर्वतस्य 'पुरत्थि-

मेणं' ति पूर्वस्यां दिशि माल्यवतो वक्षस्कारपर्वतस्य पश्चिमायाम् 'अत्र' एतस्मिन् प्रदेशे उत्तरकुरवो नाम कुरवः प्रज्ञप्ताः, सूत्र एकवचननिर्देशोऽकारान्ततानिर्देशश्च प्राकृतत्वात्, ताश्च कथम्भूताः ? इत्याह–

'पाईणे' त्यादि, प्राचीनापाचीनायता उदग्दक्षिणविस्तीर्णा अर्द्धचन्द्रसंस्तानसंस्थिता एकादश योजनसहस्राण्यष्टौ योजनशतानि 'द्विचत्वारिंशानि' द्विचत्वारिंशदधिकानि द्वौ चैकोनविंशतिभागौ योजनस्य 'विष्कम्भेन' दक्षिणोत्तरतया विस्तारेण, तथाहि–महाविदेहे मेरोरुत्तरत उत्तरकुरवो दक्षिणतो दक्षिणकुरवः, ततो यो महाविदेहक्षेत्रस्य विष्कम्भस्तस्मान्मन्दरविष्कम्भे शोधिते यदवशिष्यतेतस्यार्द्ध यावत्परिमाणमेतावत्प्रत्येकं दक्षिणकुरूणामुत्तरकुरूणां च विष्कम्भः,

उक्तं च– "वइदेवा विक्खंभा मंदरविक्खंभसोहियद्धं जं। कुरुविक्खंभं जाणसु" इति, स च यथोक्तप्रमाण एव, तथाहि–महाविदेहे विष्कम्भस्त्रयस्त्रिंशद् योजनसहस्राणि षट् शतानि चतुरशीत्यधिकानि योजनानां चतस्र :कलाः कला एतस्मान्मेरुविष्कम्भो दश योजन- सहस्राणि शोध्यन्ते स्थितानि पश्चात्त्रयोविंशति सहस्राणि षट् शतानि चतुरशीत्यधिकानि योजनानां चतसः कलाः कला एतेषामर्द्धे लब्धान्येकादश हस्राणि अष्टौ शतानि द्विचत्वारिंशदधिकानि योजनानां द्वे च कले कला।

'तीसे' इत्यादि, तासामुत्तरकुरूणां जीवा उत्तरतो नीलवर्षधरसमीपे प्राचीनापाचीनायता उभयतः पूर्वपश्चिमभागाभ्यां वक्षस्कारपर्वतं यथाक्रमं माल्यवन्तं गन्धमादनं च 'स्पृष्टा' स्पृष्टवती, एतदेव भावयति–'पुरत्थिमिल्लाए' इत्यादि, पूर्वया 'कोटया' अग्रभागेन पूर्वं वक्षस्कारपर्वतं माल्यवदभिधानं 'स्पृष्टा' स्पृष्टवती 'पश्चिमया' पश्चिमदिगवलम्बिन्या कोटया पश्चिमवक्षस्कारपर्वतं गन्धमादनाख्यं स्पृष्टा, सा च जीवा आयामेन त्रिपञ्चाशद् योजनसहस्राणि, कथमिति चेदुच्यते–इह मेरोः पूर्वस्यामपरस्यां च दिशि भद्रशालवनस्य यदायामेन परिमाणं यच्च मेरोर्विष्कम्भस्य तदेकत्र मीलितं गन्धमादनमाल्यवद्वक्षस्कारपर्वतमूलपृथुत्वपरिमाणरहितं यावत्प्रमाणं भवति तावदुत्तरकुरूणां जीवायाः परिमाणम्, उक्तं च–

॥१॥ "मंदरपुव्वेणायय बावीस सहस्स भद्दसालवनं।
दुगुणं मंदरसहियं दुसेलरहियं च कुरुजीवा॥

तच्च यथोक्तप्रमाणमे, तथाहि–मेरोः पूर्वस्यामपरस्यां च दिशि प्रत्येकं भद्रशालवनस्य दैर्ध्यपरिमाणं द्वाविंशतिर्योजनसहस्राणि, ततो द्वाविंशति सहस्राणि द्वाभ्यां गुण्यन्ते, जातानि चतुश्चत्वारिंशत् सहस्राणि मेरोश्च पृथुत्वपरिमाणं दश योजनसहस्राणि तानि पूर्वराशौ प्रक्षिप्यन्ते, जातानि चतुष्पञ्चाशत्सहस्राणि गन्धमादनस्य माल्यवतश्च वक्षस्कार- पर्वतस्य प्रत्येकं मूले पृथुत्वं पञ्च योजनशतानि, ततः पञ्च शतानि द्वाभ्यां गुण्यन्ते, जातं योजनसहस्रं, तत् पूर्वराशेपनीयते, जातानि त्रिपञ्चाशद् योजनसहस्राणि।

'तीसे धणुपट्ठ' मित्यादि, तासामुत्तरकुरूणां धनुःपृष्ठं 'दक्षिणेन' दक्षिणतः, तच्च षष्टिर्योजनसहस्राणि चत्वारि योजनशतानि अष्टादशोत्तराणि द्वादश एकोनविंशतिभागा योजनस्य परिक्षेपेण, द्वयोरपि हि गन्धमादनमाल्यवद्वक्षस्कारपर्वतयोरायामपरिमाणमेकत्र मीलितमुत्तकुरूणां धनुःपृष्ठपरिमाणं, "आयामो सेलाणं दोण्ह व मिलिओ कुरूम धणुपट्ठं" इति वचनात्, गन्धमादनस्य माल्यवतश्च वक्षस्कारपर्वतस्य प्रत्येकमायामपरिमाणं त्रिंशद् योजनसहस्राणि द्वे शते नवोत्तरे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षट् कलाः उभयोश्च मिलित आयामो यथोक्तपरिमाणो भवति ६०४१८ क० १२।

'उत्तरकुराए णं भंते!' इत्यादि, उत्तरकुरूणां भदन्त! कुरूणां, सूत्रे एकवचनं प्राकृतत्वात्, कीदृश आकारभावस्वूपस्य प्रत्यवतारः—सम्भवः प्रज्ञप्तः ?, भगवानाह—गौतम! बहुसमरमणीयो भूमिभाग उत्तरकुरूणां प्रज्ञप्तः, 'से जहनामाए—आलिंगपुक्खरेइ वा' इत्यादि जगत्युपरि वनषण्ड-वर्णकवत्तावद्वक्तव्यं यावत्त णानां च मणीनां च वर्णो गन्धः स्पर्श शब्दश्च सवर्णकः परिपूर्ण उक्तो भवति, पर्यन्तसूत्रं चेदम्— 'दिव्वं नट्टं सज्जं गेयं पगीयाणं भवे एयारूवे ?, हंता सिया' इति

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु तत्र तत्र देशे तस्य देशस्य तत्र तत्र प्रदेशे बहवे 'खुड्डा खुड्डियाओ वावीओ' इत्यादि तता त्रिसोपानप्रतिरूपकाणि तोरणानि पर्वतकाः पर्वतकेष्वासनानि गृहकाणि गृहेष्वासनानि मण्डपका मण्डपेषु पृथिवीशिलापट्टकाः पूर्ववद् वक्तव्याः, तदनन्तरं चेदं वक्तव्यम्—'तत्थ णं बहवे उत्तरकुरा मणुस्सा मणुस्सीओ य आसयंति सयंति जाव कल्लाणं फलवित्तिविसेसं पच्चणुभवमाणा विहरन्ति' एतद्व्याख्याऽपि प्राग्वत्।

'उत्तरकुराए णं भंते! कुराए' इत्यादि, उत्तरकुरुषु णमिति पूर्ववत् कुरुषु तत्र तत्र देशे 'तहिं तहिं' इति तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवः सरिकागुल्माः नवमालिकागुल्माः कोरण्ड० बन्धुवक० मनोवद्य० बीयक० बाण० कुब्जक० सिन्दुवार० जाति० मुद्गर० यूथिका० मल्लिका० वासन्तिक० वस्तुल०कस्तू० सेवाल० अगस्त्य० मगदन्ति० चम्पक० जाति० नवना-तिका० कुन्द० महाकुन्द० सरिकादयो लोकतः प्रत्येतव्याः, गुल्मा नाम ह्रस्वस्कन्ध- बहुकाण्डपत्र-पुष्पफलोपेताः, ततः सर्वत्र विशेषणसमासः, सरिकादीनां चेमास्तिस्र :सङ्ग्रहणिगाथाः—

॥१॥ "सेरियए नोमालियकोरंटयबन्धुजीवगमणोज्ञा।
बीययबाणयकणवीरकुज्ज तह सिंदुवारे य॥

॥२॥ जाईमोग्गर तह जूहिया य तह मल्लिया य वासंती।
वत्थुलकत्थुलसेवालगत्थिमगदंतिया चेव॥

॥३॥ चंपकजाईनवनाइया य कुंदे तहा महाकुंदे।
एवमनेगागारा हवंति गुम्मा मुणेयव्वा॥

'ते णं गुम्मा' इत्यादि, 'ते' अनन्तरोदिता णमिति वाक्यालङ्कारे गुल्माः 'दशार्द्धवर्णं' पञ्चवर्णं 'कुसुमं' जातावेकवचनं कुसुमसमूहं 'कुसुमयन्ति' उत्पादयन्तीति भावः, येन कुसुमोत्पादनेन कुरूणां बहुसमरमणीयो भूमिभागो 'वायविहुयग्गसालेहिं' ति वातेन विधुताः—कम्पिता वातविधुता-स्ताश्च ता अग्रशाकाश्च वातविधुताग्रशाखास्ताभि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, मुक्तो यः पुष्पपुञ्जः स एवोपचारः—पूजा मुक्तपुष्पपुओपचारस्तेन कलितः श्रियाऽतीव उपशोभमानस्तिष्ठति

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु तत्र तत्र देशे तस्य २ देशस्य तत्र तत्र प्रदेशे बहूनि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, हरुतालवनानि भेरुतालवनानि मेरुताल०शाल० सरलव० सप्तपर्ण० पूगीफली० खर्जूरी० नालिकेरीवनानि कुशविकुशविशुद्ध- वृक्षमूलानि, ते च वृक्षाः मूलमंतो कंदमंतो इत्यादि विशेषणजातं जगत्युपरिवनषण्डकवर्णकवत्तावत्परिभावनीयं यावद् 'अनंगसगडरहजाणजोग्गगिल्लिथिल्लिसीयसंदमाणपडिमोयणेसु रम्मा पासाईया दरिसणिज्ञा अभिरुवा पडिरुवा इति, भेरुतालादयो वृक्षजातिविशेषाः शालादयः प्रतीताः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहव उद्दालाः कोद्दाला मोद्दालाः कृतमाला नृत्तमाला वृत्तमाला वृत्तमाला दन्तमालाः श्रृङ्गमालाः शङ्खमालाः श्वेतमाला नाम 'द्रुमगणाः' द्रुमजातिविशेषसमूहाः प्रज्ञप्ताः तीर्थकरगणधरैः हे श्रमण ! हे आयुष्मन् !, ते च कथम्भूताः ? इत्याह–कुशविकुशविशुद्धवृक्षमूला इत्यादि प्राग्वद् यावत् 'पडिमोयणा सुरम्मा' इति। 'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवस्तिलका लवकाः छत्रोपगाः शिरीषाः सप्तपर्णा लुब्धाः धवाः चन्दनाः अर्जुनाः नीपाः कुटजाः कदम्बाः पनसाःशालाः तमालाः प्रियालाः प्रियङ्गवः पारापता राजवृक्षा नन्दिवृक्षाः, तिलकादयो लोकप्रतीताः, एते कथम्भूताः ? इत्याह–कुशविकुशविशुद्धवृक्षमूला इत्यादि सर्वं प्राग्वद् यावत् 'पडिमोयणा सुरम्मा' इति।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बह्वयः पद्मलता नागलता अशोकलताश्चम्पकलताश्चूतलता वनलता वासन्तिकलता-अतिमुक्तकलताः कुन्दलताः श्यामलताः, एताः सुप्रतीताः, 'निच्चं कुसुमियाओ' इत्यादि विशेषण-जातं प्राग्वत् 'जाव पडिरूवाओ' इति ॥ 'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य देशस्य तत्र तत्र प्रदेशे बह्वयो वनराजयः प्रज्ञप्ताः, इहैकानेकजातीयानां वृक्षाणां पङ्क्तयो वनराजयस्ततः पूर्वोक्तसूत्रेभ्योऽस्य भिन्नार्थतेति न पौनरुक्तयं, ताश्च वनराजयः प्रज्ञप्ताः कृष्णाः कृष्णावभासा इत्यदि विशेषणजातं प्राग्वत् तावद्वक्तव्यं यावत् 'अनेगरहजाण-जुग्गगिल्लिथिल्लिसीयसंद- माणियजाव पडिरूवाओ' इति।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो मत्ताङ्गका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् !, किंविशिष्टास्ते ? इत्याह–यथा 'से चंदप्पभमणिसलाग' इत्यादि, यता चन्द्रप्रभादयो मद्यविधयो बहुप्रकारास्तत्र चन्द्रस्येव प्रभा–आकारो यस्याः सा चन्द्रप्रभा, मणिशलाकेव मणिशलाका, वरं च तत् सीधु च वरसीधु, वरा च सा वारुणी च वरवारुणी 'सुजायपुन्नपुप्फफलचोयनिज्जासससारबहुदव्वजुत्तिसंभार-कालसंधियआसव' इति इहासवः–पत्रादिवासकद्रव्यभेदादनेकप्रकारः ।

–तथा चोक्तं प्रभापनायां लेश्यापदे रसचिन्तावसरे– 'पत्तासवेइ वा पुप्फासवेइ वा फलासवेइ वा चोयासवेइ वा' ततोऽत्र निर्याससारशब्दः पत्रादिभि सह प्रत्येकमभिसम्बन्धनीयः, पत्रनिर्या-ससारः पुष्पनिर्याससारः फलनिर्यास सारश्चोयनिर्याससारः, तत्र पत्रनिर्यासो–धातकीपत्ररसस्त-प्रधान आसवः पत्रनिर्याससारः, एवं पुष्पनिर्याससारः फलनिर्याससारश्च परिभावनीयः, चोयो–गन्धद्रव्यं तन्निर्याससारश्चोयनिर्याससारः, सुजाताः–सुपरिपाकागताः, 'बहुद्रव्ययुक्तिसंभारा' इति बहूनां द्रव्याणामुपबृंहकाणां युक्तयो–मीलनानि तासां संभारः–प्राभूत्यं येषु ते बहुद्रव्ययुक्ति-संभाराः, पुनः कथम्भूताः ? इत्याह– 'कालसंधिय' इति कालसन्धिताः सन्धानं सन्धा काले–स्वस्वोचिते सन्धा कालसन्धा सा संजातैषामिति कालसन्धिता, तारकादिदर्शनादित-प्रत्ययस्ततः पदद्वयपदद्वयमीलनेन विशेषणसमासः, सुजातपत्रपुष्पफलचोयनिर्याससारबहु-द्रव्ययुक्तिसम्भारकालसन्धितासवाः, मधुमेरकौ–मद्यविशेषौ, 'रिष्ठरत्नवर्णाभा' रिष्ठा या शास्त्रन्तरे जम्बूफलकलिकेति प्रसिद्धा, दुग्धजाति–आस्वादतः क्षीरसदृसी, प्रसन्ना सुराविशेषः, नेल्लकोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुराविशेषः, शतायुर्नाम या शतवारान् शोधिताऽपि स्वस्वरूपं न जहाति, 'खज्जूरमुद्दियासार' इति अत्रापि सारशब्दः प्रत्येकमभिसंबध्यते, खर्जूरसारो मृद्वीकासारः, तत्र ण(मू)लदलखर्जूरसारनिष्पन्न आसवविशेषः खर्जूरसारः, मृद्वीकाद्राक्षा तत्सारनिष्पन्न आसवविशेषो मृद्वीकासारः, कापिशायितं–मद्यिशेषः, सुप्कः–सुपरिपा-कागतो यः क्षोदरसःइक्षुरसस्तन्निष्पन्ना वरसुरा सुपक्व-क्षोद रसवरसुरा, कथम्भूता एते मद्यवशेषाः ? इत्याह–'वन्नगंधरसफासजुत्तबलविरियपरिणामा' वर्णेन सामर्थ्यादतिशायिना एवं गन्धेन रसेन स्पर्शेन च युक्ताः–सहिता बलवीर्यपरिणामा–बलहेतवो वीर्यपरिणामा येषां ते तथा, किमुक्तं भवति ?–

परमाशितशयसंपन्नैर्वर्णगन्धरसस्पर्शैर्बलहेतुभिर्वीर्यपरिणामैश्चोपेता इति, पुनः किंविशिष्टाः ? इत्याह–'बहुप्रकाराः' बहवः प्रकारा येषां जातिभेदेन ते बहुप्रकाराः, तथैव मत्ताङ्गका अपि द्रुमगणा मद्यविधिनोपपेता इति योगः, किंविशिष्टेन मद्यविधिना ? इत्यत आह– 'अनेगबहु-विविहवीससापरिणयाए' इति न एकः अनेकः, तत्रानेकः अनेकजातीयोऽपि व्यक्तिभेदाद्भवति तत आह–बहु–प्रभूतं विविधो–जातिभेदान्नानाप्रकारो बहुविविधः प्रभूतजातिभेदतो नानाविध इति भावः, स च केनापि निष्पादितोऽपि संभाव्यते तत आह विश्रसया स्वभावेन तथा बिधक्षेत्रादि-सामग्रीविशेषजनितेन परिणतो न पुनरीश्वरादिना निष्पादितो विश्रसापरिणतः, ततः पदत्रयस्य पदद्वयपदद्वयमीलनेन कर्म्मधारयः, सूत्रे च स्त्रित्वनिर्देशः प्राकृतत्वात्, ते च मद्यविधिनोपपेता न ताडादिवृक्षा इहाङ्कुरादिषु किन्तु फलेषु तथा चाह– 'फलेहिंपुण्णा वीसंदंति' अत्र सप्तम्यर्थे तृतीया 'व्यत्ययोऽप्यासा' मिति वचनात्, फलेषु मद्यविधिभिरिति गम्यते 'पूर्णा' संभृताः 'विष्यन्दन्ति' प्रवन्ति, सामर्थ्यार्ततानेवानन्तरोदितान् मद्यविधीन्, कचित् 'विसट्टंति' इति पाठस्तत्र विकसन्तीति व्याख्येयं, किमुक्तं भवति ?– तेषां फलानि परिपाकागतमद्यविधिभि पूर्णानि स्फुटित्वा तान् मद्यविधीन् मुञ्चन्तीति, कुशविकुशविशुद्धवृक्षमूलाः, 'मूलवन्त' इत्यादि प्राग्वद् यावत्प्रतिरूपका १।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो भृङ्गाङ्गका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! 'जहा से' इत्यादि, यथा ते करकघटककलशकर्करीपादकाञ्चनिकाउदङ्कवार्द्धानीसुप्रतिष्ठकविष्ठरपारीचषकभृङ्गार-ककरोटिकासरकपरकपात्रीस्थालम ल्लचपलितददकवारकविचित्रपट्टकशुक्तिचारुपीनका भाजनविधयः, एते प्रायः प्रतीताः, नवरं पादकाञ्चनिक–पादधावनयोग्या काञ्चनमयी पात्री उदङ्को–येनोदकमुदच्यते वार्द्धनी–गलन्तिका सरो–वंशमयच्छिक्क शिक्काकृति अप्रतीता लोकतो विशिष्टसंप्रदायाद्वाऽवसातव्याः, कथम्भूताः ? इत्याह–काञ्चनमणिरत्नभक्तिचित्राः, पुनः कथम्भूताः ? इत्याह–बहुप्रकाराः, एकैकस्मिन् विधाववान्तरानेकभेदभावात्, तथैव ते भृङ्गाङ्गका अपि द्रुमगणाः 'अनेगबहुविविधविस्ससापरिणयाए' इत्यस्य व्याख्या पूर्ववत् भाजनविधिनोपपेताः, कुशविकुशविशुद्धवृक्षमूला मूलवन्त इत्यादि प्राग्वद् यावत्प्रतिरूपाः २।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवस्तुटिताङ्गका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् !, 'जहा से' इत्यादि यथा ते आलिङ्गय(मुरव)मृदङ्गपणवपटहदर्दरककरटिडिण्डिमभम्भाहोरम्भाकणिताखरमुखीमकुन्द-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

शङ्खिकापिरलीवच्चकपरिवादिनीवंशवेणु वीणासुघोषाविपञ्चीमहतीकच्छभीरिगसिका, तत्रालिङ्ग्य वाद्यत इति आलिङ्ग्यः मुरवः–वाद्यविशेषः, एष यकारन्तशब्दः, मृदङ्गो–लघुमर्दलः, पणवो–भाण्ड पडहो लघुपटहो वा पटहः–प्रतीतः, दर्दरकोऽपि तथैव, करटी–सुप्रसिद्धा, डिण्डिमः–प्रथमप्रस्ताव-नासूचकः पणवविशेषः, भम्भा ढक्का, होरम्भा–महाढक्क, कणिता–काचिद् वीणा, खरमुखी–काहला, मकुन्दो–मरुवाद्यविशेषो योऽभिलीनं प्रायो वाद्यते, शङ्खिका–लघुशङ्खरूपा तस्याः स्वरो मनाक् तीक्ष्णो भवति नतु शङ्खस्येवातिगम्भीरः, पिप्लीवच्चकौ तृणरूपवाद्यविशेषौ, परिवादिनीसप्त-तन्त्रीवीणा वंशः–प्रतीतो वेणुः–वंशविशेषः सुघोषा–वीणाविशेषः, विपञ्ची–तन्त्री वीणा महती–शततन्त्रिका, कच्छभी रिगसिका च लोकतः प्रत्येतव्या, एताः कथम्भूताः ? इत्याह–

'तलतालकंसतालसुसंपउत्ता' तलं–हस्तपुटं तालाः–प्रतीताः कांस्यतालाः–कंसालिया एतैः 'सुसंप्रयुक्ताः' सुष्ठु–अतिशयेन सम्यग्–यथोक्तनीत्या प्रयुक्ताः संबद्धा आतोद्यविषया–आतोद्यभेदाः, पुनः कथम्भूताः ? इत्याह–'निउणगंधव्वसमयकुसलेहिं फंदिया' इति, निपुणं यता भवति एवं गन्धर्वसमये–नाट्यसमये कुशलास्तैः स्पन्दिता–व्यापारिता इति भावः, पुनः किंविशिष्टाः ? इत्याह–'त्रिस्थानकरणशुद्धाः' आदिमध्यावसानरूपेषु त्रिषु स्थानेषु करणेन–क्रयया यथोक्तवादनक्रयया शुद्धा अवदाता न पुनरवस्थानव्यापारणरूपदोषलेशेनापि कलङ्किताः, तथैव ते तुटिताङ्गका अपि द्रुमगणा अनेकबहुविविधविस्रसापरिणतेन, अस्य व्याख्यानं प्राग्वत्, 'ततवित-तघनशुषिरेण' ततं–वीणादिकं विततं–पटहादिकं घनं–कांस्यतालादि शुषिरं–वंशादि, एतद्रूपेण चतुर्विधेनातोद्यविधिनोपपेताः, कुशविकुशविशुद्धवृक्षमूलाः मूलवन्त इत्यादि प्राग्वद् यावत्प्रतिरूपकाः ३।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो दीपशिखा नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्! यता तत् 'सन्ध्याविराग-समये' सन्ध्यारूपो विरुद्धस्तिमिररूपत्वाद्रागः सन्ध्याविरागस्तत्समये–तदवसरे नवनिधिपतेः–चक्रवर्त्तिन इव दीपिकाचक्रवालवृन्दं–ह्रस्वो दीपो दिपीका तासां चक्रवालं–सर्वं परिमण्डलरूपं वृन्दं दीपिकाचक्रवालवृन्दं, कथम्भूतमित्याह–'प्रभूतवर्त्ति' प्रभूता–बहुसङ्ख्याकाः स्थूरा वा वर्त्तयो यत्र तत्तथा, तता 'पलित्तनेहं' ति पर्याप्तः–प्रतिपूर्ण स्नेहःतैलादिरूपो यस्य तत् पर्याप्तस्नेहं, 'धणिउ-ज्जालिए' इति धणियं–अत्यर्थमुज्जवालितम्, अत एव तिमिरमर्दकं–तिमिरनाशकं, पुनः किंविशिष्टमित्याह :। 'कणगनिगरणकुसुमियपारियातगवणप्पवासे' कनकस्य निगरणं कनकनिगरणं गालितं कनकमिति भावः कुसुमितं च तत्पारिजातकवनं च कुसुमितपारिजातकवनं ततो द्वन्द्वसमास-स्तद्वत्प्रकाशः–प्रभा आकारो यस्य तत्कनकनिगरणपारिजातकुसुमवनप्रकाशम्, एतावता समुदायविशेषणमुक्तम्, इदानीं समुदायसमुदायिनोः कथञ्चिद्भेद इति ख्यापनयन् समुदायविशेषणमेव विवक्षु समुदायिविशेषणान्याह–'कंचणमणिरयणे'त्यादि, दीपिकाभिः शोभमानमिति सम्बन्धः, कथम्भूताभिर्दीपिकाभि ? अत आह–काञ्चनमणिरत्नानां काञ्चनम-णिरत्नमया विमलाः–स्वाभाविकागन्तुकमलरहिता महार्हा– विचित्रा–विचित्र- वर्मपिता दण्डा यासां ताः काञ्चनमणिरत्नविमलमहार्हविचित्रदण्डास्ताभि, तथा सहसा–एककालं ज्वालिताश्च ता उत्सर्पिताश्च तर्त्युत्सर्प्पणेन सहसाप्रज्वालितोत्सर्प्पिताः ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

—स्निग्धं—मनोहरं तेजो यासां ताः स्निग्धतेजसः, तथा दीप्यमानो—रजन्यां भास्वान् विमलोऽत्र धूल्याद्यपगमेन ग्रहगणो—ग्रहसमूहस्तेन समा प्रभा यासां ता दीप्यमानविमलग्रहण-समप्रभाः, ततः पदद्वयपदद्वयमीलनेन कर्म्मधारयसमासः, सहसाप्रज्वालितोत्सर्पितस्निग्धतेजो-दीप्यमान- विमलग्रहगणसमप्रभास्ताभि, तथा वितिमिराः करा यस्यासौ वितिमिरकरः स चासौ सूरश्च वितिमिरकरसूरस्तस्येव यः प्रसरति उद्द्योतः—प्रभासमूहस्तेन 'चिल्लियाहिं'ति देशीपदमेतद् दीप्यमानाभिरित्यर्थ, ज्वाला एव यदुज्ज्वलं प्रहसितमिव प्रहसितं तेनाभिरामा—अभिरमणीया ज्वालोज्वलप्रहसिताभिरामास्ताभि, अत एव सोभमानाभि शोभमानाः, तथैव दीपशिखा अपि द्रुमगणा अनेकबहुविविधविश्रसापरिणतोद्योतविधिनोपेताः, कुशविकुशविशुद्धवृक्षमूला मूलवन्त इत्यादि प्राग्वदं यावत् प्रतिरूपा इति ४।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो ज्योतिषिका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! यथा तद् अचिरोद्गतं शरदि यमण्डलं यदिवा यथैतद् उल्कासहं यथा वा दीप्यमाना विद्युत् अथवा यथा निर्धूसज्वलितं उज्ज्वलः—उद्गता ज्वाला यस्य स तथा हुतवहः, सूत्रे च पदोपन्यासव्यत्ययः प्राकृतत्वात्, ततः सर्वेषामेषां द्वन्द्वः समासः, कथम्भूता एते ? इत्याह— 'निद्धंतधोये'त्यादि, निर्ध्मातेन—नितरामग्नि-संयोगेन यद् धौतं—शोधितं तप्तं च तपनीयं ये च किंशुकाशोकजपाकुसुमानां विमुकुलितानां—विकसितानां पुञ्जाः ये च मणिरत्नकिरणाः यश्च जात्याहिङ्गुलकनिकरस्तद्रूपेभ्यो प्यतिरेकेण-अतिशयेन यथायोगं वर्णतः प्रभया च रूपं—स्वरूपं येषां ते निर्ध्मातधौततप्ततपनीयकिंशुकाशो-कमापाकुसुमविमुकुलितपुञ्जमणिरत्न- किरणजात्यहिङ्गुलकनिकररूपातिरेकरूपाः, ततः पूर्वपदेन विशेषणसमासः, तथैव ते ज्योतिषिका अपि द्रुमगणा अनेकबहुविविधविश्रसा- परिणतेनोद्या-तविधिनोपेताः, कुशविकुशविशुद्धवृक्षमूला मूलवन्त इत्यादि प्राग्वद् ५।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवश्चित्राङ्गका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! यथा तत् प्रेक्षागृहं विचित्रं—नानाविधचित्रोपेतम्, अतएव रम्यं—रमयति मनांसि द्रष्टणामिति रम्यं, बाहुलकात् कर्त्तरि यप्रत्ययः, वराश्च ताः कुसुमदाममालाश्च—ग्रथितकुसुममाला वरकुसुमदाममालास्ताभि रुज्वलं देदीप्यमानत्वाद् वरकुसुमदाममालोज्वलं, तथा भास्वान्—विकसिततया मनोहरतया च देदीप्यमानो मुक्तो यः पुष्पपुञ्जोपचारस्तेन कलितं भास्वन्मुक्तपुष्पपुञ्जोपचारकलितं, ततः पूर्वपदे विशेषणसमासः, तथा विरल्लितानि—विरलीकृतानि विचित्राणि यानि माल्यानि ग्रथितपुष्पमालास्तेषां यः श्रीसमुदयस्तेन प्रगल्भं—अतीव परिपुष्टं विरल्लितविचित्रमाल्यश्रीसमुदयप्रगल्भं, तथा ग्रन्थिमं—यत् सूत्रेण ग्रथितं वेष्टिमं—यत्पुष्पमुकुट इवि उपर्युपरिशिखराकृत्या मालास्थापनं पूरिमं—यल्लधुच्छिद्रेषु पुष्पनिवेशेन पूर्यते सङ्घातिमं—यत्पुष्पं पुष्पेण परस्परं नालप्रवेशेन संयोज्यते।

—ग्रन्थिमं च वेष्टिमं च पूरिमं च सङ्घातिमं चेति समाहारो द्वन्द्वस्तेन माल्येन छेकशिल्पिना—परमदक्षेण शिल्पिना विभागरहितेन यद् यत्र योग्यं ग्रन्थिमं पूरिमं सङ्घातिमं च तत्र तेन सर्वतः—सर्वासु दिक्षु समनुबद्धं, तथा प्रविरलै—लम्बमानैः, तत्र विरलत्वं मनागप्यसंहतत्वमात्रेण भवति ततो विप्रकृष्टत्वप्रतिपादनार्थमाह—विप्रकृष्टैः—बृहदन्तरालैः पञ्चवर्णै कुसुमदामभि शोभमानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'वनमालाकयग्गए चेवे'ति वनमाला–चन्दनमाला कृताऽग्रे यस्य तद् वनमालाकृताग्रं तथाभूतं सद् दीप्यमानं, यथैव चित्राङ्गका अपि नाम द्रुमगणा अनेकबहुविविधविसापरिणतेन ग्रन्थिमवेष्टिम-पूरिसङ्घातिमने चतुर्विधेन माल्यविधिनोपपेताः कुशविकुशविशुद्धवृक्षमूला मूलवन्त इत्यादि यावत्प्रतिरूपकाः ६।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे चित्ररसा नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् !, यथा तत्परमान्नं–पायसं भवेदिति सम्बन्धः, किंविशिष्टमित्याह–ये सुगन्धाः–प्रवरगन्धोपेताः, समासान्तविधेरनित्य-त्वादत्रैतद्रूपस्य समासान्तस्याभावो यथा सुरभिगन्धेन वारिणा इत्यत्र, वराः–प्रधाना दोषरहित-क्षेत्रकालादिसामग्रीसंपादितात्मलाभा इति भावः, कमलशालितन्दुलाः, यच्च विशिष्टं विशिष्टग-वादिसम्बन्धि निरुपहतमिति–पाकादिभिराविनाशितं दुग्धं तै राद्धं–पक्वंपरमकलशालिभिः परमदुग्धेन च यथोचितमात्रापाकेन निष्पादितमित्यर्थ, तथा शारदं घृतं गुडः खण्डं मधु वा शर्करापरपर्यायं मेलितं यत्र तत् शारदघृतगुडखण्डमधुमेलितं, निष्ठान्तस्य परनिपातः प्राकृतत्वात् सुखादिदर्शनाद्वा, अत एवातिरसमुत्तमवर्णगन्धवत्, यथा वा राज्ञश्चक्रवर्त्तिनो भवेत् कुशलै सूपपुरुषैः–सूपकारैः पुरुषैः सज्जितो–निष्पादितः चतुष्कल्पसेकसिक्त इवादनः, चत्वारश्च कल्पाः सेकविषया रसवतीशास्त्रभिज्ञेभ्यो भावनीयाः, स चौदनः किंविशिष्टः ? इत्याह–

कलमशालिनिर्वर्त्तितः–कलमशालिमयो विपको–विशिष्टपरिपाकमागतः, 'सबाप्फमिउ-विसयसकलसित्थे' इति सबाष्पानि–बाष्पं मुञ्चवन्ति मृदूनि–कोमलानि चतुष्कल्पसेकादिना परिकर्मितत्वात् विशदानि सर्वथा तुषादिमलापगमात् सकलानि–परिपूर्णानि सित्थूनि यत्र स सवाष्पमृदुविशदसकलसित्थुः, अनेकानि यानि शालनकानि–पुष्पफलप्रभृतीनि तैः संयुक्तः–समुपेतोऽनेकशालनकसंयुक्तः, तथा चामोदक इति सम्बन्धः, किंविशिष्टः ? इत्याह –

परिपूर्णानि–समस्तानि द्रव्याणि–एलाप्रभृतीनि उपस्कृतानि–नियुक्तानि यत्र स परिपूर्णद्रव्योपस्कृतः, निष्ठान्तस्य परनिपातः सुखादिदर्शनात्, सुसंस्कृतो–यथोक्तमात्रा-ग्निपरितापादिना परमसंस्कारमुपनीतः, वर्णगन्धरसस्पर्शयुक्तबलवीर्यपरिणाम इति वर्णगन्धर-सस्पर्शै सामर्थ्यादतिशायिभिर्युक्ताः–सहिता बलवीर्यहेतवः परिणामा यस्य स तथा, अति-शायिभिर्वर्णादिभिर्बलवीर्यहेतुपरिणामैश्चोपपेता इति भावः, तत्र बलं–शारीरं वीर्यं–आन्तरोत्साहः, 'इंदियबलपुट्ठिवद्धणे' इति, इन्द्रियाणां–चक्षुरादीनां बलं–स्वस्वविषयग्रहणपाटवमिन्द्रियबलं तस्य पुष्टि–अतिशायी पोष इन्द्रियबलपुष्टिसतां वर्द्धयति, नन्द्यादित्वादनः, इन्द्रियबलपुष्टिबर्द्धनः, तथा क्षुच्च पिपासा च क्षुत्पिपासे तयोर्मथनः क्षुत्पिपासामथनः, तथा प्रधानः–कथितो यो गुडो यद्वा कथितं–प्रधानं खण्डं यदिवा कथिता प्रधाना मत्स्यण्डी–खण्डशर्करा यच्च प्रधानं धृतं तानि उपनीतानि–योजितानि यस्मिन् स प्रधानकथितगुडखण्डमत्स्यण्डीघृतोपनी तः,निष्ठान्तस्य परनिपातोऽत्रापि सुखादिदर्शनात्, स इव मोदकः श्लक्ष्णसमितिगर्भ–अतिश्लक्ष्णाकणिक्कमूलदलः प्रज्ञप्तः, तथैव चित्ररसा अपि दुमगणा अनेकबहुविविधविसापरिणतेन भोजनविधिनोपपेताः, कुशविकुशविशुद्धवृक्षमूला मूलवन्तो यावत्प्रतिरूपाः ७।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र प्रदेशे बहवो मण्यङ्गका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् !, यथा ते हारोऽर्द्धहारो वेष्टनं मुकुटः कुण्डलं वामोत्तको हेमजालं मणिजालं कनकजालं सूत्रकमुच्चीकटकं खुडकाम (इुका ए) कावलि कण्ठसूत्रं मकरिका उरस्कन्धग्रैवेयकं श्रोणीसूत्रकं चूडामणि कनकतिलकं फुल्लकं सिद्धार्थकं कर्णपाली शशी सूर्यो वृषभश्चक्रकं तलभङ्गकं तुडितं हस्तमालकं हर्षकं केयूरं वलयं प्रालम्बमङ्गुलीयकं वलक्षं दीनारमालिका काञ्ची मेखला कलापः प्रतरं प्रातिहार्यकं पादोज्वलं घण्टिका किङ्किणी रत्नोरुजालं वरनूपुरं चरणमालिका कनकनिगरमालिकेति भूषणविधयो बहुप्रकाराः, एते च लोकतः प्रत्येतव्याः, कथम्भूताः ? इत्याह–काञ्चनमणिरत्नभक्तिचित्राः, तथैव ते मण्यङ्गका अपि द्रुमगणा अनेकबहुविविधविश्सापरिणतेन भूषणविधिनोपपेताः, कुशविकुशविशुद्धवृक्षमूला यावत्प्रतिरूपा इति ८।

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो गेहाकारा नाम द्रमुगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! यथा ते प्रकारा-ट्टालकचरिकाद्वारगोपुरप्रासादाकाशतलमण्डपैकशालकद्विशाकत्रिशालकचतुःशालकगर्भगृहमोह-नगृहवलभीगृहचित्रशालमालिकभक्तिगृहवृत्तत्र्यचतुरन्द्यावर्त्तसंस्थितानि पाण्डुरतलहर्म्यं मुण्डमालहर्म्यं, अथवा धवलगृहाणि अर्द्धमागधविभ्रमाणि शैलसुस्थितानि अर्द्धशैलसुस्थितानि कूटाकाराद्यानि सुविधिकोष्ठकानि, तथाऽनेकानि गृहाणि शरणानि लयनानि 'अप्पेगे' इति भवनविकल्पा अत्र बहुविकल्पाः, एतेषां च परस्परं विशेषो वास्तुविद्यातोऽवसातव्यः, कथम्भूता एते ? इत्याह– 'विडंगे'त्यादि, विटङ्कः–कपोतपाली जालवृन्दं–गवाक्षसमूहः निर्यूहो–गृहैकदेश-विशेषः अपवरकः–प्रतीतः चन्द्रशालिका–शिरोगृहं, एवंरूपाभिर्विभक्तिभि कलिताः, तथैव गृहाकारा अपि द्रुमगणा अनेकबहुविविधविश्रसापरिणतेन भवनविधिनेति सम्बन्धः, किंवि-शिष्टेन ? इत्याह– 'सुहारुहणसुहोत्ताराए' इति सुखेनारोहणं–ऊर्ध्व गमनं सुखेनोत्तारः–अधस्तादवतरणं यस्य दर्दरसोपानपङ्क्त्यादिभि : सुखारोहसुखोत्तारस्तेन, तथा सुखेन निष्क्रमणं प्रवेशश्च यत्र स सुखनिष्क्रमणप्रवेशस्तेन, कथं सुखारोहसुखोत्तारः ? इत्याह–दर्दरसोपान-पङ्क्तिकलितेन, हेतौ तृतीया, ततोऽयमर्थः–यतो दर्दरसोपानपङ्क्तिकलितस्ततः सुखारोहसुखोत्तारः, 'पतिरिक्कसुहविहाराए' प्रतिरिक्ते–एकान्ते सुखविहारः–अवस्थानशयनादिरूपो यत्र प्रतिरिक्त-सुखविहारस्तेनोपपेता, सर्वत्र स्त्रत्वनिर्देशः प्राकृतत्वात्, कुशविकुशविशुद्धवृक्षमूला मूलवन्त इत्यादि प्राग्वद् यावत्प्रतिरूपकाः ९ ॥

'उत्तरकुराए णं कुराए' इत्यादि, उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवोऽनग्नका नाम द्रुमगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'जहा से' इत्यादि, आजिनकं नाम–चर्ममयं वस्त्र क्षोमं–कर्पासिकं कम्बलः–प्रतीतः दुकूलं–वस्त्रजातिविशेषः कौसेयं–त्रसरितन्तुनिष्पन्नं कालमृगपट्टः–कालमृगचर्म अंशुकची-नांशुकानि–दुकूलविशेषरूपाणि पट्टानि–प्रतीतानि आभरणचित्राणि आभरणैश्चि-त्राणि–विचित्राणि आभरणचित्राणि 'सण्ह' इति श्लक्ष्णानि कल्याणकानि–परमवस्त्रलक्षणोपेतानि गम्भीराणि–निपुणशिल्पिनिष्पादिततयाऽलब्धस्वरूपमध्यानि 'नेहल' त्ति स्नेहलानि–स्निग्धानि 'गया(ज्ज)लानि' उद्वेल्यमानानि परिधीयमानानि वा गर्जयन्ति, शेषं सम्प्रदायादवसातव्यं, तदन्तरेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक् पाठशुद्धरपि कर्तुमशक्तत्वात्, वस्त्रविधयो बहुप्रकारा भवेयुर्वरपट्ट- नोद्गताः–प्रसिद्धतत्तत्पत्तनविनिर्गता 'विविधवर्णरागकलिता' विविधैर्वर्णैर्विविधै रागैः–मञ्जि- छारागादिभि कलिताः, तथैवानग्नका अपि द्रुमगणा अनेकबहुविविधविसापरिणतेन वस्त्रधिनोपपेताः, कुशिकुशविशुद्धवृक्षमूला मूलवन्त इत्यादि प्राग्वद् यावत्प्रतिरूपाः १० ।

'उत्तरकुराए णं भंते ! कुराए मणुयाण'मित्यादि, उत्तरकुरुषु कुरुषु भदन्त ! 'मनुजानां' मनुष्याणां कीदृशः कीदृश आकारभावः, प्रत्यवतारस्वरूपसम्भव इति भावः, प्रज्ञप्तः ?, भगवानाह–गौतम ! 'ते ण'मिति पूर्ववत् मनुष्या 'अतीव' अतिशयेन सोमं–दृष्टिसुभगं चारु रूपं येषां तेऽतीवसो मचारुरूपाः 'भोगुत्तमगयलक्खणा' इति उत्तमशब्दस्य विशेषणस्यापि परनिपातः प्राकृतत्वात्, उत्तमाश्च ते भोगाश्च उत्तमभोगास्तद्गतानि–तत्संसूचकानि लक्षणानि येषां ते उत्तमभोगगतलक्षणाः, तथा भोगैः सश्रीकाः–सशोभाका भोगसश्रीकाः, तथा सुजातानि–यथोक्तप्रमाणोपपन्नत्वेन शोभनजन्मानि यानि सर्वाणि उरःशिरःप्रभृतीन्यङ्गानि तैः सुन्दरमङ्ग–समग्रं वपुर्येषां ते सुजातसर्वाङ्गसुन्दराङ्गाः ।

'सुपइट्ठियकुम्मचारुचरणा' इति सुष्ठु–शोभनं यथा भवति एवं प्रतिष्ठिताः कूर्म्मवदुन्नतत्वेन चारवश्चरणाः–पादा येषां ते सुप्रतिष्ठितकूर्मचारुचरणाः, 'रत्तुप्पलपत्तमउयसुकुमालकोमलतला' इति रक्तं–लोहितमुत्पलपत्रवत् मृदु–मार्दवोपेतमकर्कशमिति भावः तच्चासुकुमारमपि संभवति यथा घृष्टमृष्टपाषाणप्रतिमा तत आह–सुकुमारं–शिरीषकुसुमवदकठिनं कोमलं–मनोज्ञं चरणतलं येषां ते रक्तोत्पलपत्रमृदुसुकुमारकोमलतलाः, तथा 'नगनगरमगरसागरचक्क कहरंकलक्खणंकियचलणा' नगः–पर्वतः नगरमकरसागरचक्राणि–प्रतीतानि अङ्कधरः–चन्द्रमा अङ्कः–तस्यैव लाञ्छनं मृगः एवंरूपाणि यानि लक्षणानि तैरङ्कितौ चरणौ येषां ते नगनगरमकरसागरचक्राङ्कधराङ्कलक्षणाङ्कितचरणाः, 'अणुपुव्वसुसाहयंगुलीया' इति पूर्वस्याः पूर्वस्या अनु लघव इति गम्यते अनुपूर्वा, किमुक्तं भवति ? – पूर्वस्याः पूर्वस्या उत्तरोत्तरा नखं नखेन हीनाः "नहं नहेण हीणाओ" इति सामुद्रिकशाश्त्रवचनात् सुसंहताः–सुश्लिष्टा अङ्गुलयो येषां ते अनुपूर्वसुसंहताङ्गुलीकाः ।

'उन्नयतणुतंबनिद्धनखा' उन्नता–ऊर्द्ध नतास्तनवस्ताम्राः 'स्निग्धाः' स्निग्धच्छाया नखाः पादगा इति सामर्थ्यलभ्यं तद्वर्णनाधिकाराद् येषां ते उन्नततनुताम्रस्निग्धनखाः, 'संठियसुसिलिट्ठगूढगुप्फा' सम्यक्स्वरूपप्रमाणतया स्थितौ संस्थितौ सुश्लिष्टौ–मांसलौ गुल्फौ–गुलुकौ येषां ते संस्थितसुश्लिष्टगूढगुल्फाः, 'एणीकुरुविंदवत्तवट्टाणुपुव्वजंघा' इति एण्या इव–हरिण्या इव कुरुविन्दस्येव वर्त्तं–सूत्रवलनकं तस्येव वृत्ते–वर्त्तुले आनुपूर्व्येण–क्रमेण ऊर्ध्वं स्थूरे स्थूरतरे इति गम्यं जङ्घे येषां ते एणीकुरुविन्दवर्त्तवृत्तानुपूर्वजङ्घाः 'समुग्गनिमग्गगूढजाणू' समुद्गकस्येव–समुद्गकपक्षिण इव निमग्ने–अन्तःप्रविष्टे गूढे मांसलत्वादनुद्धते जानुनी–अष्ठीवन्तौ येषां ते समुद्गनिमग्नगूढजानवः, 'गयससणसुजायसन्निभोरू' गजो–हस्ती श्वसिति–प्राणित्यनेनेति श्वसनः–शुण्डादण्डः गजस्य श्वसनो गजश्वसनस्तस्य सुजातस्य–सुनिष्पन्नस्य सन्निभौ ऊरू येषां ते गुजातशब्दस्य विशेषणस्यापि सतः परनिपातः प्राकृतत्वात्

'वरवारणमत्ततुल्लविक्कमविलासियगई' अत्रापि मत्तशब्दस्य विशेष्यात्परनिपातः प्राकृतत्वात्, मत्तो–मदोन्मत्तो यो वरः–प्रधानो भद्रजातीयो वारणो–हस्ती तस्य तुल्यः–सदृशो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विक्रमः–पराक्रमो विलासिता–विलासः संजातोऽस्या विलासिता तारकादिदर्शनादितप्रत्ययः विलासवती गति–गमनं येषां ते वरवारणमत्ततुल्यविक्रमविलासितगतयः, 'पमुइयवरतुरगसीह-वरवट्टियकडी' प्रमुदितो–रोगशोकाद्युपद्रवाभावात्, कचित्पुनरेवं पाठः 'पमुइयवरतुरगसिंह-अइरेगवट्टियकडी' तत्र प्रमुदितयो–रोगकोशाद्युपद्रवरहितत्वेनातिपुष्टयोर्वरयोस्तुरगसिंहयोः कटयाः सकाशादतिशयेन वर्त्तिता–वृत्ति कटिर्येषां ते प्रमुदितवरतुरगसिंहातिरेकवर्त्तितकटयः।

'वरतुरयसुजायगुज्झदेसा' वरतुरगस्येव सुजातः–संगुप्तत्वेन सुनिष्पन्नो गुह्यदेशो येषां ते वरतुरगसुजातगुह्यदेशाः, पाठान्तरं 'पसत्थवरतुरगगुज्झदेसा' व्यक्तं, 'आइण्णहयव्व निरुवलेवा' आकीर्णो–गुणैर्व्यापृतः स चासौ हयश्च आकीर्णहयस्तद्वन्निरुपलेपा–लेपरहित-शरीरमलाः, यथा जात्याश्वो मूत्रपुरीषाद्यनुलिप्तगात्रो भवति तता तेऽपीति भावः, 'साहयसोणं-दमुसलदप्पणनिगरियवरकणगछरुसरिसवरवइरवलियमज्झा' संहतसौनन्दं नाम ऊर्द्ध्वीकृत-मुदूषलाकृति काष्ठं तच्च मध्ये तनु उभयोः पार्श्वयोर्बृहत्, मुसलं–प्रतीतं, दर्प्पणशब्देनेहावयवे समुदायोपचाराद्दर्प्पणगण्डो गृह्यते, तथा यन्निगरितं–सारीकृतं वरकनकं तस्य–तन्मयं त्सरु–खङ्गादिमुष्टिर्निगरितवरकनकत्सरुस्तैः सदृशः तेषामिवेत्यर्थः, तता वरव्रस्येव क्षामो वलितो–वलयः संजाता अस्य वलितः–वलियत्रयोपेतो मध्यो–मध्यभागो येषां ते संहतसोनन्दमुसलदर्प्पण-निगरितवरकनकत्सरुसदृशवरवज्रवलितमध्या– 'झसविहगसुजायपीणकुच्छी' झषो–मत्स्यः पक्षी–प्रतीतस्तयोरिव सुजातौ–सुनिष्पन्नौ जन्मदोषरहिताविति भावः पीनौ–उपचितौ कुक्षी येषां ते मत्स्यपक्षिसुजातपीनकुक्षयः, 'झषोदरा' झषस्येवोदरं येषां ते झषोदराः, 'सुइकरणा' इति शुचीनि–पवित्राणि निरुपलेपानीति भावः करणानि–चक्षुरादीनीन्द्रियाणि येषां ते शुचिकरणाः, कचिदेव 'पम्हवियडनाभा' इति पाठस्तत्र पद्मवद् विकटा–विस्तीर्णा नाभिर्येषां ते पद्मविकटनाभाः, अत एव निर्देशादनाभ्यपि समासान्तः एवमुत्तरपदेऽपि।

'गंगावत्तयपयाहिणावत्ततरंगभंगुररविकिरणतरुणबोहियअकोसायंतपउमगंभीरवियि-डनाभा' गङ्गावर्त्तक इव दक्षिणावर्त्ता तरङ्गैरिव तरङ्गैस्तिसृभिर्वलिभिर्भङ्गुरा तरङ्गभङ्गुरा रविकिरणैः–सूर्यकैरस्तरूणं–नवं तत्प्रथमं तत्कालमित्यर्थः यद्बोधितं–उन्निद्रीकृतमत एव 'आकोसायंत' इत्याको-शायमानं विकचीभवदित्यर्थ पद्मं तद्वद् गम्भीरा च विकटा च नाभिर्येषां ते गङ्गावर्त्तकप्रदक्षि-णावर्त्ततरङ्गभङ्गुररविकिरणतरुणबोधिताकोशायमानपद्मगम्भीरविकटनाभाः, 'उज्जुयसम-सहियसुजायजच्चतणुकसिणनिद्धआइज्जलडहसुकुमालमिउरमणिज्जरोमराई' ऋजुका–नवक्रा समा–न काप्युद्दन्तुरा सहिता–सन्तता न त्वपान्तरलाव्यवच्छिन्ना सुजाता–सुजन्मा न तु कालादिवैगुण्यादुर्जन्मा अतएव जात्याप्रधाना तन्वी न तु स्थूरा कृष्णा न तु मर्कटवर्णा, कृष्णमपि किञ्चिन्निर्दीप्तिकं भवति तत आह–स्निग्धा आदेया–दर्शनपथमुपगता सती उपादेया सुभगा इति भावः

एतदेव विशेषणद्वारेण समर्थयते–'लडहा' सलवणिमा अत एव आदेया, तथा सुकुमारा–अकठिना, तत्राकठिनमपि किञ्चित्कर्कशस्पर्श भवति तत आह–मृद्वी अत एव रमणीया–रम्या रोमराजि–तनूरुहपङ्क्तिर्येषां ते ऋजुकसमसहितसुजातजात्यतनुकृष्णस्नि-ग्धादेयलटहसुकुमारमृदुरमणीयरोमराजयाः, 'सन्नयपासा' सम्यग्–अधोऽधःक्रमेण नतौ पार्श्वौ येषां ते सन्नतपार्श्वाः अधोऽधःक्रमावनतपार्श्वा इत्यर्थः, तथा 'संगयपासा' इति संगतौ–देहप्रमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णोचितौ पार्श्वौ येषां ते सङ्गतपार्श्वा अत एव सुन्दरपार्श्वाः 'सुजायपासा' इति सुनिष्पन्नपार्श्वाः 'सियमाइयपीणरइयपासा' मितं–परिमितं यथा भवति देहानुसारेणेत्यर्थ :आयतौ–दीर्घौ पीनौउपचितौ मांसलाविति भावः रचितौ–स्वस्वनामकर्मोदयनिर्वर्त्तितौ रतिदौ वा–रम्यौ पार्श्वौ येषां ते तथा, 'अकरंडयकणगरुयगनिम्मलसुजायनिरुवहयदेहधारी' अविद्यमानं–मासलतयाऽनुपलक्ष्यमाणं करण्डकं–पृष्ठवंशास्थिकं यस्य देस्य सोऽकरण्डकस्तं कनकस्येव रुचको–रुचिर्यस्य स कनकरुचिस्तं निर्मलं–स्वाभावाविकागन्तुकमलरहितं सुजातं–बीजाधानादारभ्य जन्मदोषरहितं निरुपहतं–ज्वरादिदंशाद्युपद्रवरहितं देहं धारयन्तीत्येवंशीला अकरण्डककनकरुचकनिर्म्मलसुजातनिरुपहतदेहधारिणः।

'कणगसिलायलुज्जलपसत्थसमतलोवचियविच्छिन्नपिहुलवच्छा' कनकशिलातलवदुज्ज्वलं च–निर्मलं प्रशस्तं च–अतिप्रशस्यं समतलं–न विषमोन्नतं उपचितंमांसलं विस्तीर्णम्–ऊर्ध्वोधोऽपेक्षया पृथुलं दक्षिणोत्तरतो वक्षो येषां ते कनकशिलातलोज्ज्वलप्रशस्तसमतलोपचितविस्तीर्णपृथुलक्षसः 'सिरिवच्छंकियवच्छा' इति श्रीवृक्षेणाङ्कितं–लाञ्छितं वक्षो येषां ते श्रीवृक्षलाञ्छितवक्षसः 'जुगसन्निभपीणरइयपीवरपउट्ठसंठियसुसिलिट्ठविसिट्ठघणथिरसुवद्धसंधी पुरवरफलिहवट्टियभुया' युगसन्निभौ–वृत्ततया आयततया च यूपतुल्यौ पीनौ–उपचितौ रतिदौ–पश्यतां दृष्टिसुखदौ पीवरप्रकोष्ठौ–अकृशंकलाचिकौ संस्थितौ–विशिष्टसंस्थानौ सुश्लिष्टाः–संगताः विशिष्टाः–प्रधानाः घनानिबिडाः स्थिरा–नातिश्लथाः सुबद्धाः–स्नायुभि सुष्ठु नद्धाः सन्धयः–सन्धानानि ययोस्तौ तथा पुरवरपरिघवत्–महानगरार्गलावद् वर्त्तितौ च बाहू येषां ते युगसन्निभपीनरतिदपीवरप्रकोष्ठसंस्थितसुश्लिष्टविशिष्टघनस्थिरसुबद्धसन्धिपुरवरपरिघवर्त्तितभुजाः, पाठान्तरं 'जुगसन्निभपीणरइयपउट्ठसंठियोवचियघणथिरसुबद्धसुनिगूढपव्वसंधी' युगसन्निभौ वर्त्तुलत्वेन पीनौ रतिदौ प्रकोष्ठौ येषां ते तथा, तथा संस्थिताः–सम्यक्स्थिता उपचिता–मांसला घना–निबिडाः स्थिरा–अचाल्याः, कुतः ? इत्याह–सुबद्धा–दृढबन्धनबद्धा निगूढा मांसलत्वादनुपलक्ष्याः पर्वसन्धयो हस्तादिगता येषां ते तथा, ततः पूर्वपदेन विशेषणसमासः।

'भुयगीसरविपुलभोगआयाणफलिहउच्छूढदीहबाहू' भुजगेश्वरो–नागराजस्तस्य यो विपुलो–महान् भोगो–देहो भुजगेश्वरविपुलभोगः तथा आदीयते–द्वारस्थगनार्थं गृह्यत इत्यादान–स चासौ परिघश्च आदानपरिघः 'उच्छूढ'त्ति अवक्षिप्तः–अर्गलास्थानान्निष्कासितो द्वारपृष्ठभागे दत्त इत्यर्थ, ततः पूर्वपदेन विशेषणसमासः, विशेषणस्य परनिपातः प्राकृतत्वात्, भुजगेश्वरविपुलभोगश्च आदानपरिघावक्षिप्तश्च ताविव दीर्घौ बाहू येषां ते तथा।

'रत्ततलोवतियमांसलसुजायअच्छिद्दजालपाणी' रक्ततलौ–लोहिततलौ अवपतितौ–क्रमेण हीयमानोपयौ मृदुकौ–कोमलौ मांसलौ सुजातौ–जन्मदोषरहितौ अच्छिद्रजालौ–अङ्गुल्यन्तराल समूहरहितौ पाणी–हस्तौ येषां ते तथा, पाठान्तरं 'रत्ततलोवइयमंसलसुजायपसत्थलक्खण-अच्छिद्दजालपाणी' तत्र प्रशस्तलक्षणौ–शउभचिह्नाविति व्याख्येयं, शेषं तथैव, 'पीवरकोमल- वरंगुलीया' इति पीवरा–स्वशरीरानुक्रमोपचयाः कोमला–मृदवो वराः–प्रशस्तलक्षणोपेता अङ्गुलयो येषां ते पीवरकोमलवराङ्गुलिकाः, पाठान्तरं 'पीवरवट्टियसुजायकोमलवरंगुलीया' व्यक्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आयंबतलिणसुइरुइलनिद्धनखा' आताम्रारा–ईषद्रक्ताः तलिनाः–प्रतलाः शुचयः–पवित्रा रुचिरा–दीप्ताः स्निग्धाःअरूक्षा नखाः–कररुहा येषां ते तथा आतम्रतलिनशुचिरुचिरस्निग्धनखाः, 'चंदपाणिलेखा' चन्द् इव चन्द्राकारा पाणौ रेखा येषां ते चन्द्रपाणिरेखाः, एवं सूर्यपाणिरेखाः शङ्खपाणिरेखाश्चक्रपाणिरेखा दिकसौवस्तिकौ–दिकप्रोक्षको दक्षिणावर्त्तःस्वस्तिक इत्यन्ये स पाणौ रेखा येषां ते दिकसौवस्तिकपाणिरेखाः, एतदेवानन्तरोक्तं विशिषणपञ्चकं तत्प्रशस्ततताप्रकर्षप्रति- पादनाय सङ्ग्रहवचनेनाह–चन्द्रसूर्यशङ्खचक्र दिक्सौवस्तिकरेखाः, एतदनन्तरं क्वचिदेवं पाठः–रविससि संखवरचक्क सोत्थियविभिन्न सुवियइयपणिरेहा व्यक्तो नवरं विभक्ता-विभगवत्यः सुविरचिताः-सुष्ठ कृतास्वकीयकर्म्मणा'अनेगवरलक्खणुत्तम-पसत्थसुइरइयपाणिलेहा' अनेकैः–अनेकसङ्ख्यैर्वरैः–प्रधानैर्लक्षणै- रुत्तमाः प्रशस्ताः–प्रशंसास्पदीभूताः शुचयः–पवित्रा रचिताः–स्वकर्मणा निष्पादिताः पाणिरेखा येषां ते अनेकवरलक्षणोत्तम-प्रशस्तशुचिरचितपाणिरेखाः, 'वरमहिसवरा- हसिंहसद्दूलउसभनागवरपडिपुण्णविउलखंधा' वरमहिषः–प्रधानसौरभेयः वराहः–शूकरः सिंहः–केशरी शार्दूलो–व्याघ्रः ऋषभो–वृषभः नागवरः–प्रधानो गजः, एषामिव प्रतिपूर्ण–स्वप्रमाणेनाहीनो विपुलो–विस्तीर्ण स्कन्धःअंशदेशो येषां ते वरमहिषवराहसिंहशार्दूलवृषभनागवरप्रतिपूर्णविपुलस्कन्धाः ।

'चउरंगुलसुप्पमाणकंबुवरसरिसगीवा' चतुरङ्गुलं–स्वाङ्गुलापेक्षया चतुरङ्गुलप्रमितं सुष्ठु–शोभनं प्रमाणं यस्याः सा चतुरङ्गुलसुप्रमाणा कम्बुवरसदृशी–उन्नततया वलियोगेन च प्रधानशङ्खसन्निभा ग्रीवा येषां ते चतुरङ्गुलसुप्रमाणकम्बुवरसदृशग्रीवाः 'मंसलसंठियसद्दूलविपुलहणुया' मांसलं–उपचितमांसं सम्यक् स्थितं संस्थितं विशिष्टस्थानमित्यर्थ प्रशस्तं प्रशस्यलक्षणोपेतत्वात् शार्दूलस्येव–व्याघ्रस्येव विपुलं–विस्तीर्णं हनुकं येषां ते तथा, 'अवट्ठियसुविभत्तमंसू' अवस्थितानि–अवर्द्धिष्णूनि सुविभक्तानिविविक्तानि चित्राणि–अतिरम्यतयाऽद्भुतानि श्मश्रूणि–कूर्चकेशा येषां तेऽवस्थितसुविभक्तचित्रश्मश्रवः 'ओयवियसिलप्पवालबिंबफलसन्निभाधरोट्ठा' ओयवियं–परिकर्मितं यत् शिलारूपं प्रवालं विद्रुममित्यर्थ बिम्बफलं–गोल्हाफलं तयोः सन्निभो रक्ततया उन्नतमध्यतयाऽधरओष्ठः–अधस्तनो दन्तच्छदो येषां ते तथा ।

'पंडुरससिसगलविमलनिम्मलसंखगोखीरफेणकुंददगरयमुणालियाधवलदंतसेढी' पाण्डुरं–अकलङ्कं यत् शशिलकलं–चन्द्रखण्डं विमल–आगन्तुकमलरहित निर्मलः–स्वभावोत्थमलरहितो यः शङ्खः कोक्षीरफेनः प्रतीतः कुन्दं–कुन्दकुसुमं दकरज–उदककणाः मृणालिका–बिशं, एतद्वद्धवला दन्तश्रेणिर्येषां ते पाण्डुरशशिशकलविमलनिरमलगोक्षीरफेनकुन्ददकरजोमृणालिका-धवलदन्तश्रेणयः 'अकंडदंता' इति अखण्डाः–सकला दन्ता येषां ते अखण्डदन्ताः 'अप्फुडियदंता' अस्फुटिता–अजर्जरा राजिरहिता दन्ता येषां ते अस्फुटितदन्ताः, तथा सुजाता–जन्मदोषरहिता दन्ता येषां ते सुजातदन्ताः, तथाऽविरला–धना दन्ता येषां ते अविरलदन्ताः ।

'एगदंतसेढीविव अनेगदंता' एकाकारा दन्तश्रेणिर्येषां ते तथा ते इव परस्परानुपलक्ष्यमाणदन्तविभागत्वाद् अनेके दन्ता येषां ते एवं नामाविरलदन्ता यथाऽनेकदन्ता अपि सन्त एकाकारदन्तपङ्क्य इव लक्ष्यन्त इति भावः, 'हुयवहनिद्धंतधोयतत्ततवणिज्जरत्ततलतालुजीहा' हुतवहेन–अग्निना निध्मातं सद् यद् धौतं–शोधितमलं तप्तं तपनीयं–सुवर्णविशेष- स्तद्वद् रक्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तले–हस्ततले तालु–काकुदं जिह्वा च-रसना येषां ते हुतवहनिर्ध्मातधौततप्ततप-नीयरक्ततलता-लुजिह्वाः 'गरुलाययउज्जुतुंगनासा' गरुडस्येवायता-दीर्घा ऋज्वी-अवक्रा तुङ्गा-उन्नता तासा नासिका येषां ते गरुडायतऋजुतुङ्गनासाः 'कोकासियधवलपत्तलच्छा' कोकासिते–पद्मवद्विकसिते धवले क्वचिद्देशे पत्रले–पक्ष्मवती अक्षिणी–लोचने येषां ते कोकासितधवलपत्राक्षाः, एतदेव स्पष्टयति–

'विप्फालियपुंडरीयनयणा' विस्फारितं–रविकिरणैर्विकासितं यत्पुण्डरीकं–सितपद्मं तद्वन्नयने येषां ते विस्फारितपुण्डरीकनयनाः, कचित् 'अवदालियपुंडरीयनयणा' इति पाठस्तत्रापि अवदालिं–रविकिरणैर्विकासितमिति व्याख्येयं, 'आणामियचावरुइलतणुकसिणनिद्धभुया' आनामितं–ईषन्नामितमारोपितमिति भावः यच्चापंधनुस्तद्द रुचिरे–संस्थानविशेषभावतो रमणीये तनू–तनुके श्लक्ष्णपरिमितवालपङ्क्त्यात्मकत्वात् कृष्णे–परमकालिमोपेते स्निग्धे–स्निग्धच्छाये भ्रुवौ येषां ते आनामितचापवद् रुचिरे कृष्णाभ्रराजीव संस्थिते संगते–यथोक्तप्रमाणोपपन्ने आयते–दीर्घे सुजाते–सुनिष्पन्ने जन्मदोषरहितत्वाद् भ्रुवौ येषां ते तथा, क्वचत्पनुरेवं पाठः– 'आणामियचावरुइलकिण्हब्भराइतणुकसिणनिद्धभुमया' तत्रानामितचापवद् रुचिरे–मनोज्ञे कृष्णाभ्रराजीव–कालमेघरेखेव तनू–तनुके कृष्णे–काले स्निग्धे–सच्छाये भ्रुवौ येषां ते तथा।

'आलीणपमाणजुत्तसवणा' आलीनौ न तु टप्परौ प्रमाणयुक्तौ–प्रमाणोपेतौ श्रवणौ–कर्णौ येषां ते आलीनप्रमाणयुक्तश्रवणाः, अत एव 'सुसवणा' शोभनश्रवणाः 'पीणमंसलकवोलदेस-भागा' पीनौ–अकृशौ यतो मांसलौ–उपचितौ कपोलदेशौ–गण्डभागौ मुखस्य देशभागौ येषां ते पीमांसलकपोलदेशभागाः, अथवा कपोलयोर्देशभागाः कपोलदेशभागाः कपोलवयवा इत्यर्थः पीना–मांसलाः कपोलदेशभागा येषां ते पीनमांसलकपोलदेशभागाः।

'निव्वणसमलट्ठमट्ठचंदद्धसमनिडाला' निर्व्रणं–विस्फोटकादिक्षतरहितं समं–अविषमं अत एव लष्टं–मनोज्ञं मृष्टं–मसृणं चन्द्रार्द्धसमं–शशधरसमग्रविभागसदृसं ललाटं–अलकं येषां ते निर्व्रणसमलष्टचन्द्रार्द्धसमललाटाः, सूत्रे 'निडाले'ति प्राकृतलक्षणवशात्, 'उडुवइपडिपुण्ण-सोमवयणा' प्राकृतत्वात्पदव्यत्ययः, प्रतिपूर्णोडुपतिरिव–सम्पूर्णचन्द्र इव सोमं–सश्रीकं वदनं येषां ते प्रतिपूर्णोडुपतिसोमवदनाः, 'घणनिचियसुबद्धलक्खणुन्नयकूडागारनिहपिंडियसिरा' घनं–अतिशयेन निचितं घननिचितं सुष्ठु–अतिशयेन बद्धानि–अवस्थितानि लक्षणानि यत्र तत् सुबद्धलक्षणं, उन्नतं–मध्यभागे उच्चं यत्कूटं तस्याकारो–मूर्त्तिस्तन्निभमुन्नतकूटाकारसदृशमिति भावः पिण्डितं–स्वकर्म्मणा संयोजितं शिरो येषां ते घननिचितसुबद्धलक्षणोन्नतकूटाकार-निभपिण्डितशिरसः 'छत्ताकारुत्तमंगदेसा' छत्राकार उत्तमाङ्गरूपो देशो येषां ते छत्राकारोत्तमाङ्गदेशाः

'दाडिमपुप्फप्पगासतवणिज्जसरिसनिम्मलसुजायकेसंतकेसभूमी' दाडिमपुष्पप्रकाशा–दाडिमपुष्पप्रतिमास्पनीयसदृशाश्च निर्म्मला–आगन्तुकस्वाभाविकमलरहिताः केशान्ताः केशभूमिश्च केशोत्पत्तिस्थानभूता मस्तकत्वग् येषां ते दाडिमपुष्पप्रकाशतपनीयसदृशनिर्मलसुजातकेशान्त-केशभूमयः 'सामलिबोंडघणछोडियमिउविसयपसत्थसुहुमलक्खणसुगंधसुन्दरभुयमोयगभिंनील-कज्जलपहट्ठभमरगणनिकरंबनिचियकुंचिय पाहिणावत्तमुद्धसिरया' शाल्मकी–वृक्षविशेषः स च प्रतीत एव तस्य बोण्डं–फलं तद्वच्छोटिता अपि घनं–अतिशयेन निचिताः शाल्मलीबोण्डघन-निचितच्छोटिताः, स्नेहकेशपाशं न कुर्वन्ति परिज्ञानाभावात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलं छोटिता अपि तथास्वभावतया शाल्मलीबोण्डाकारवद् घननिचिता अवतिष्ठन्ते तत एतद्विशेषणोपादानं, तथा मृदवः—अकर्कशा विशदा—निर्मलाः प्रशस्ताः—प्रशंसास्पदीभूताः सूक्ष्माः—श्लक्ष्णाः लक्षणा—लक्षणवन्तः सुगन्धाःपरमगन्धकलिता अत एव सुन्दराः, तथा भुजमोचको—रत्नविशेषः भृङ्गः—प्रतीतः नीलो—मरकतमणि कज्जलं—प्रतीतं प्रहृष्टः—प्रमुदितो भ्रमरगणः प्रहृष्टभ्रमरगणः, प्रहृष्टो हि भ्रमरगणस्तारुण्यावस्थायां भवति तदानीं चातिकृष्ण इति प्रहृष्टग्रहणं, तद्वत्स्निग्धा भुजमोचकभृङ्गनीलकज्जलप्रहृष्टभ्रमरगणस्निग्धाः, तथा निकुरम्बा—निकुरम्बीभूताः सन्तो निचिता न तु विस्तृताः सन्तः परस्परसंहता निकुरम्बनिचिता ईषत्कुटिलाः प्रदक्षिणावर्त्ताश्च मूर्द्धनि शिरोजा—वाला येषां ते साल्मलीबोण्डघननिचितच्छोटितमृदुविशद-प्रशस्तसूक्ष्मलक्षणसुगन्धसुन्दरभुजमोचकभृङ्गनीलकज्जलप्रहृष्टभ्रमरगणस्निग्ध निकुरम्बिनिचित-प्रदक्षिणावर्त्तमूर्दधशिरोजाः, 'लक्खणवंजणगुणोववेया' लक्षणानि—स्वस्तिकादीनि व्यञ्जनानि—मषतिलकादीनि गुणाः—क्षान्त्यादयस्तैरुपपेता—युक्ता लक्षणव्यञ्जनगुणोपपेताः 'सुजायसविभत्त-सुरूवगा' सुजातं—सुनिष्पन्नं जन्मदोषरहितत्वात् सुविभक्तं—अङ्गप्रत्यङ्गोपाङ्गानां यतोक्तवैविक्त्य-भावात् सुरूपं—शोभनं समुदायगतं येषां ते सुजातसुविभक्तसुरूपकाः 'पासाईया' इत्यादि पदचतुष्टयं प्राग्वत्।

'उत्तरकुराए णं भंते ! कुराए' इत्यादि, उत्तरकुरुषु भदन्त ! कुरुषु मनुजीनां कीदृश आकाभावप्रत्यवतारः स्वरूपसम्भव इति भावः प्रज्ञप्तः ?, भगवानाह—गौतम ! ता मनुष्यः सुजातसर्वाङ्गसुन्दर्य—सुजातानि—यथोक्तप्रमाणोपेततया शोभनजन्यानि यानि सर्वाण्यङ्गानि—उदरप्रभृतीनि तैः सुन्दर्य—सुन्दराकाराः सुजातसर्वाङ्गसुन्दर्य—सुजातानि—यथोक्तप्रमाणोपेततया शोभनजन्यानि यानि सर्वाण्यङ्गानि—उदरप्रभृतीनि तैः सुन्दर्य—सुन्दराकाराः सुजातसर्वाङ्गसुन्दर्य 'पहाणमहेलागुणजुत्ताओ' प्रधाना—अतिशायिनो ये महेलागुणाः—प्रियंवदत्वभर्तृचित्तानु-वर्त्तकत्वप्रभृतयस्तैर्युक्ताःउपपेताः प्रधानमहेलागुणयुक्ताः 'कंतविसयमिउसुकुमाल-कुम्मसंठि-वियसिट्ठचलणा' कान्तौ—कमनीयौ विशदौ—निर्म्मलौ मृदू—अकठिनौ सुकुमारौ—अकर्कशो कूर्मसंस्थितौ—कूर्मवदुन्नतौ विशिष्टौ—विशिष्टलक्षणोपेतौ चरणौ यासां ताः कान्तविशदमृदुसुकुमार-कूर्मवदुन्नतसंस्थितविशिष्टचरणाः 'उज्जुमउयपीवरपुट्ठसाहयंगुलीओ' ऋजवःअवका मृदवः—अकठिनाः पीवरा—अकृशाः पुष्टा—मांसलाः संहताः—सुश्लिष्टा अङ्गुलयो यासां ता ऋजुमृदुकपीव-रपुष्टसंहताङ्गुलयः। 'उन्नयरतियतलिनतंबसुइनिद्धनखा' उन्नता—ऊर्द्धनता रतिदा—रमणीयास्त-लिनाः— प्रतलास्ताम्रा—ईषद्रक्ताः शुचयः—पवित्राः स्निग्धाः—स्निग्धच्छाया नखा यासां ता उन्नतरतिदतलिन- ताम्रशुचिस्निग्धनखाः 'रोमरहियवट्टलट्ठसंठियअजहन्नपसत्थलक्खण-जंघाजुयला' रोमरहितं वृत्तं—वर्त्तुलं लष्टसंस्थितं—मनोज्ञसंस्थानं क्रमेणोर्द्ध स्थूरस्थूरतरमिति भाव, अजघन्यप्रशस्तलक्षणं— जघन्यपदरहितशेषप्रशस्तलक्षणाङ्कितं जङ्घायुगलं यासां ता रोमरहितवृत्तलष्टसंस्थिता- जघन्यप्रशस्तलक्षणजङ्घायुगलाः 'सुनिम्मियगूढजाणुमंडलसुबद्धा' सुष्ठुअतिशयेन निर्मितः सुनिर्मितः एवं सुगूढं—मांसलतयाऽनुपलक्ष्यमाणं जानुमण्डलं सुबद्धं—स्नायुभिरतीव बद्धं यासां ताः सुनिर्मितसुगूढजानुमण्डलसुबद्धाः, सुबद्धशब्दस्य निष्ठान्तस्य परनिपातः सुखादिदर्शनात् प्राकृतत्वाद्वा।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

'कयलीखंभातिरेगसंठियनिव्वणसुकुमालमउयकोमलअइविमलसमसंहतसुजायवट्टपीवर-निरंतरोरू' कदलीस्तम्भाभ्यामतिरेकेण–अतिशायितया संस्थितं–संस्थानं ययोस्तौ कदली-स्तम्भातिरेकसंस्थितौ निर्व्रणौ–विस्फोटकादिकृतक्षतरहितौ सुकुमारौ–अकर्कशौ मृदू–अकठिनौ कोमलौ–दृष्टिसुभगौ अतिविमलौ–सर्वथा स्वाभाविकागन्तुकमललेशेनाप्यकलङ्कितौ समसंहतौ–समप्रमाणौ सन्तौ संहतौ समहसंहतौ सुजातौ–जन्मदोषरहितौ वृत्तौ–वर्तुलौ पीवरौ–मांसलौ निरन्तरौ–उपचितावयवतयाऽपान्तरालवर्जितौ ऊरू यासां ताः कदलीस्तम्भातिरेकसंस्थित-निर्व्रणसुकुमारमृदुकोमलातिविलसमसंहतसुजतवृत्तपीवरनिरन्तरोरवः 'पट्टसंठियपसत्थविच्छिण्ण-पिहुलसोणीओ' पट्टवत्–शिलापट्टकादिवत् संस्थिता पट्टसंस्थिता प्रशस्ता प्रशस्तलक्षणोपेतत्वाद् विस्तीर्णा ऊर्द्धर्वाधः पृथुला दक्षिणोत्तरतः शरोणि–कटेरग्रभागो यासां ताः पट्टसंस्थित-विस्तीर्णपृथुलश्रोणयः।

'वयणायामप्पमाणदुगुणियविसालमंसलसुबद्धजहणवरधारणीओ' वदनस्य–मुखस्यायामप्रमाणं–द्वादशाङ्गुलानि तस्माद् द्विगुणितं–द्विगुणप्रमाणं सद् विशालं वदनायामप्रमाण-द्विगुणितविशालं मांसलमप्युपचितं सुबद्धं–अतीव सुबद्धावयवं न तु श्लथमिति भावः जघनवरं–वरजघनं, वरशब्दस्य विशेषणस्यापि सतः परनिपातः पराकृतत्वात्, धारयन्तीत्येवंशीला वदनायामप्रमाणद्विगुणितविशालमांसलसुबद्धजघनवरधारिण्यः 'वज्जविराइयपसत्थलक्खण-निरोदरतिवलीविणीयतणुनमियमज्झयाओ' वज्रस्येव विराजितं वज्रविराजितं प्रशस्तानि लक्षणानि यत्र तत् प्रशस्तलक्षणं निरुदरं–विकृतोदररहितं त्रिवलीविनीतं–तिस्रो वलयो विनीता–विशेषतः प्रापिता यत्र तत् त्रिवलीविनीतं तनु–कृशं नतं तनुनतमीषन्नतमित्यर्थ मध्यं यासां ता वज्रविराजित-प्रशस्तलक्षणनिरुदरत्रिवलीविनीततनुनतमध्यकाः।

'उज्जुयसमसंहियजच्चतणुकसिणनिद्धआएज्जलडहसुविभत्तसुजायसोमंतरुइलरमणिज्जोराई' ऋजु,का–न वक्रासमा–न काप्युद्दन्तुरा संहिता–सन्तता न त्वपान्तरालव्यवच्छिन्ना जात्या–प्रधाना तन्वी न तु स्थूरा कृष्णा न मर्कटवर्णा स्निग्धा–स्निग्धच्छाया आदेया–दर्शनपथप्राप्ता सन्ती उपादेया सुभगेति भावः, एतदेव समर्थयति–लटहा–सलवणिमाऽत एव आदेया सुविभक्ता–सुविभागा सुजाता–जन्मदोषरहिता अत एव शोभमाना रुचिरा–दीप्रा रमणीया–द्रष्टमनोरमणशीला रोमराजिर्यासां ता ऋजुकसमसहितजात्यतनुकृष्णस्निग्धादेयलटहसुविभक्तसुजातशोभमान-रुचिररमणीयरोमराजयः 'गंगावत्तपयाहिणावत्ततरंगभंगुररविकिरणतरुणबोहियआको-सायंतपउ- गंभीरवियडनाभा' इति पूवत्।

'अणुब्भडपसत्थपीणकुच्छीओ' अनुद्भटा–अनुल्बणा प्रशस्ता–प्रशस्तलक्षणा पीना कुक्षिर्यासां ता अनुद्भटप्रशस्तपीनकुक्षयः 'सन्नयपासा संगतपासा सुंदरपासा सुजायपासा मियमाइयपीणरइयपासा ऊकरंडयकणगरुयगनिम्मलसुजायनिरुवहयगायलट्ठीओ' इति पूर्ववत्

'कंचणकसमुप्पमाणसमसंहितसुजायलट्ठचूचुयआमेगजमलुगलवट्टियअब्भुन्नयरइयसंठिय-पओहराओ' काञ्चनकलशाविव काञ्चनकलशौ सुप्रमाणौ–स्वशरीरानुसारिप्रमाणोपेतौ समौ–नेकौ हीनो नैकोऽधिकं इति भावः संहितौ–संततौ अपान्तरालरहिताविति भावः सुजातौ–जन्मदोषरहितौ लष्टौ–मनोज्ञौ चूचुक आमेलकः–आपीडकः सेखरो ययोस्तौ चूचुकापीडकौ 'जमलजुगले'ति

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

यमलयुगलं—समश्रेणीकयुगलरूपौ वर्त्तिताविव वर्त्तितौ कठिनाविति भावः अभ्युन्नतौ—पत्युरभिमुखमुन्नतौ रतिदं—रतिकारि संस्थितं—संस्थानं ययोस्तौ रतिदसंस्थितौ पयोधरौ यासां ताः काञ्चनकलशसुप्रमाणसमसंहितसुजातलष्टचूचुकापीडयमलयुगलवर्त्तिताभ्युन्नतरतिदसंस्थितपयोधराः ।

'अणुपुव्वतणुयगोपुच्छवट्टसमसहितनमियआएज्ज्ललियबाहाओ' आनुपूर्व्येण—क्रमेण तनुकौ आनुपूर्व्यतनुकौ अत एव गोपुच्छवद् वृत्तौ—वर्तुलौ समौ—समप्रमाणौ संहितौ—स्वशरीरसंश्लिष्टौ नतौ स्कन्धदेशस्य नतत्वात् आदेयौ—अतिसुभगतयोपादेयौ ललितौ—मनोज्ञचेष्टाकलितौ बाहू यासां ता आनुपूर्व्यतनुगोपुच्छवृत्तसंहितनतादेयललितबाहवः 'तंबनहा' ताम्रा—ईषद्रक्ता नखाः—कररुहा यासां तास्ताम्रनखाः 'मंसलग्गहत्था' मांसलौ अग्रहस्तौ बाह्वग्रभागवर्त्तिनौ हस्तौ यासां ता मांसलाग्रहस्ताः । 'पीवरकोमलवरंगुलीया' पीवरा—उपचिताः कोमलाः—सुकुमारा वराः—प्रमाणलक्षणोपेत-तया प्रधाना अङ्गुलयो यासां ताः पीवरकोमलवराङ्गुलिकाः 'निद्धपाणिरेहा' स्निग्धाः पाणौ रेखा यासां ताः तथा, 'रविससिसंखचक्कसोत्थियविभत्तसुविरइयपाणिलेहा' इति पूर्ववत् 'पीणुन्नयकक्खवक्खवत्थिप्पएसा' पीना—उपचितावयवा उन्नता—अभ्युन्नताः कक्षावक्षोबस्तिरूपाः प्रदेशा यासां ताः पीनोन्नतकक्षावक्षोबस्तिप्रदेशाः 'पडिपुण्णगलकवोला' प्रतिपूर्णौ गलकपोलौ च यासां तास्तथा 'चउरंगुलसुप्पमाणकंबुवरसरिसगीवा' पूर्ववत् 'मंसलसंठियपसत्थहणुया' मांसलम् —उपचितमांसं संस्थितं—विशिष्टसंस्थानं प्रशस्तं—प्रशस्तलक्षणोपेतं हनुकं यासां ता मांसलसंस्थितप्रशस्तहनुकाः ।

'दाडिमपुप्फप्पगासपीवरप्पवराहरा' दाडिमपुष्पप्रकाशः पीवरः प्रवरः—सुभगोऽधरो यासां ता दाडिमपुष्पप्रकाशपीवरप्रवराधराः 'सुंदरोत्तरोट्ठा' व्यक्तं 'दहिदगरयचंदकुंदवासंतियमउलधवलअच्छिद्दविमलदसणा' दधि—प्रतीतं दकरज—उदककणाः चन्द्रः—प्रतीतः कुन्दः—कुसुमं वासन्तिकामुकुलं—वासन्तिकाकलिका तद्वद्धवला अच्छिद्राः—छिद्ररहिता विमला—मलरहिता दशना—दन्ता यासां ता दधिदकरजश्चन्द्रकुन्दवासन्तिकामुकुलधवलाच्छिद्रविमलदशनाः 'रत्तुप्पलपत्तमउयसूमालतालुजीहा' रक्तोत्पलवद् रक्तं मृदु—अकठिनं सुकुमारं अकर्कशं तालु जिह्वा च यासां ता रक्तोत्पलमृदुसुकुमारतालुजिह्वाः ।

'कणइरमुकुलअकुडियअब्भुग्गयउज्जुतुंगनासा' कणयराअतिस्निग्धतया श्लक्ष्णश्लक्ष्णस्वेदकणाकीर्णा मुकुला—नासापुटद्वयस्यापि यथोक्तप्रमाणतया संवृत्ताकारतया च मुकुलाकारा अभ्युद्गताअभ्युन्नता ऋजुका—सरला तुङ्गा—उच्चा नासा यासां तास्तथा, 'सारयनवकमलकुमुयकुवलयविमुक्कदलनिगरसरिसलक्खणंकियकंतनयणाओ' शारदं—शरन्मासभावि यन्नवं—प्रत्यग्रं कमलं—पद्मं कुमुदं—कैरवं कुवलयं—नीलोत्पलं वैर्विमुक्तो यो दलनिकरस्तत्सदृशे, किमुक्तं भवति ? —एवं नामायददीर्घे मनोहारिणी नयने यत् शारदान्नवात् कमलाद्वा कुमुदाद्वा कुवलयाद्वा उत्पद्य पत्रद्वयमिवावस्थितमाभातीति, लक्षणाङ्किते—प्रशस्तलक्षणोपेते नयने यासां ताः शारदनवकमलकुमुदकुवलयविमुक्तदलनिकरसदृशलक्षणाङ्कितनयनाः, एतदेव किञ्चिद्विशेषार्थमाह—

'पत्तलचपलायंततंबलोयणाओ' पत्रले—पक्ष्मवती चपलायमाने ताम्रे—क्वचित्प्रदेशे ईषद्रक्ते लोचने यासां ताः पत्रलचपलायमानताम्रलोचनाः 'आणामियचावरुइलकिण्हब्भराइ-संठियसगयआगयसुजायभुमया अल्लीणपमाणजुत्तसवणा' द्वौ पूर्ववत्, 'पीणमट्ठरमणिज्जगंडलेहा'

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पीना–उपचिता मृष्टा–मसृणा रमणीया–रम्या गण्डरेखा–कपोलपाली यासां ताः पीनमृष्टरमणीयगण्डलेखाः 'चउरंसपसत्थसमनिडाला' चतुरं–चतुष्कोणं प्रशस्तं–प्रशस्तलक्षणोपेतं समं–ऊर्द्धाधस्तया दक्षिणोत्तरतया च तुल्यप्रमाणं ललाटं यासां ताश्चतुरप्रशस्तसमललाटाः 'कोमुईरयणिकरविमलपडिपुण्णसोमवयणा' कौमुदी–कार्त्तिकी पौर्णमासी तस्यां रजनिकर इव विमलं प्रतिपूर्णं सोमं च वदनं यासां ताः कौमुदीरजनिकरविमलप्रतिपूर्णसोमवदनाः, सोमशब्दस्य परनिपातः प्राकृतत्वात्, 'छत्तुन्नयउत्तमंगाओ' छत्रवन्मध्ये उन्नतमुत्तमाङ्गं यासां ताश्छत्रोन्नतोत्तमाङ्गाः।

'कुडिलसुसिणिद्धदीहसिरयाओ' कुटिलाः सुस्निग्धा दीर्घाः शिरोजा यासां ताः कुटिलसुस्निग्धदीर्धशिरोजाः, छत्रध्वजयूपस्तूपदामनीकमण्डलुकलशवापीसौवस्तिकपताकायवमत्स्यकूर्मरथवरमकरशुकस्थालाङ्कुशाष्टापदसुप्रतिष्ठकमयूर श्रीदामाभिषेकतोरणमेदिन्युदधिवरभवनगिरिवरादर्शललितगजवृषभसिंहचामररूपाणि उत्तमानि–प्रधानानि प्रशस्तानि–सामुद्रिकशास्त्रेषु प्रशंसास्पदीभूतानि द्वात्रिंशतं लक्षणानि धारयन्तीति छत्रचामरयावदुत्तमप्रशस्तद्वात्रिंशल्लक्षणधराः 'हंससरिसगतीओ' हंसस्य सदृशी गतिर्यासां ता हंससदृशगतयः, कोकिलाया इव या मधुरा गीस्तया सुस्वराः कोकिलामधुरगीःसुस्वराः, तथा कान्ताः–कमनीयाः, तथा सर्वस्य–तत्रत्यासन्नवर्त्तिनो लोकस्यानुमताः–संमता न मनागपि द्वेष्या इति भावः, व्यपगतवलिपलिताः, तथा व्यङ्गदुर्वर्णव्याधिदौर्भाग्यशोकमुक्ताः, स्वप्नेऽपि तेषामसम्भवात्, स्वभावत एव श्रृंगारः–श्रृङ्गाररूपश्चारु–प्रधानो वेषो यासां ताः स्वभावश्रृङ्गारचारुवेषाः।

तथा 'संगयगयहसियभणियचेट्ठियविलाससंलावणिउणजुत्तोवयारकुसला' सङ्गतं–सश्लिष्टं यद् गतं–गमनं हंसागमनवत् हसितं–हसनं कपोलविकासि प्रेमसंदर्शि च भणितं–भणनं गम्भीरं–मन्मथोद्दीपि च चेष्टितं–चेष्टं सकाममङ्गप्रत्यङ्गोपदर्शनादि विलासो–नेत्रविकारः संलापः–पत्या सहासकामस्वहृदयप्रत्यर्पणक्षमं परस्परसंभाषणं निपुणः–परमनैपुण्योपेतो युक्तश्च यः शेष उपचारस्तत्र कुशलाः संगतगतहसितभणितचेष्टितविलाससंलापनिपुणयुक्तोपचार कलिताः, एवंविधविशेषणाश्च स्वपतिं प्रति द्रष्टव्या न परपुरुषं प्रति, तथा क्षेत्रस्वाभाव्यतः प्रतनुकामतया परपुरुषं प्रति तासामभिलाषासम्भवात्, पूर्वोक्तमेवार्थं संपिण्डयाह–वरस्तनजघनवदनकरचरणनयनलावण्यवर्णयौवनविलासकलिता नन्दनवनचारिण्य इवाप्सरसः, 'अच्छेरपेच्छणिज्ञा' इति आश्चर्यप्रेक्षणीयाः 'पासाईयाओ' इत्यादि पदचतुष्टयं प्राग्वत्। सम्प्रति स्त्रीपुंसविशेषमन्तरेण सामान्यतस्तत्रत्यमनुष्याणां स्वरूपं प्रतिपिपादयिषुरिदमाह– 'ते णं मणुया ओहस्सरा' इत्यादि, ते उत्तरकुरुनिवासिनो मनुष्या ओघःप्रवाही स्वरो येषां ते ओघस्वराः, हंसस्येव मधुरः स्वरो येषां ते हंससवराः, क्रौञ्चस्येवाप्रयासविनिर्गतोऽपि दीर्घदेशव्यापी स्वरो येषां ते क्रौञ्चस्वराः, एवं सिंहस्वरा दुन्दुभिस्वरा नन्दिस्वराः, नन्द्या इव घोषः–अनुनादो येषां ते नन्दीघोषाः, मञ्जु–प्रियः स्वरो येषां ते मञ्जुस्वराः, एवं सिंहस्वरा दुन्दुभिस्वरा नन्दिस्वराः, नन्द्या इव घोषः–अनुनादो येषां ते नन्दीघोषाः, मञ्जु–प्रियः स्वरो येषां ते मञ्जुस्वराः, मञ्जुर्घोषो येषां ते मञ्जुघोषाः, एतदेव पदद्वयेन व्याचष्टे–सुस्वराः सुस्वरनिर्घोषाः 'पउमुप्पलगंधसरिसनीसाससुरभिवयणा' पद्मं–कमलमुत्पलं–नीलोत्पलं अथवा पद्मं–पद्मकाभिधानं गन्धद्रव्यं उत्पलम्– उत्पलकुष्ठं तयोर्गन्धेन–सौरभ्येण सदृशःसो यो निश्वासस्तेन सुरभिगन्धि वदनं–मुखं येषां ते पद्मोत्पलगन्धसदृशनिश्वाससुर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिवदनाः, तता छवी–छविमन्त उदात्तवर्णया सुकुमारया च त्वचा युक्ता इति भावः ।

'निरायंकउत्तमपसत्थअइसेसनिरुवमतणू' निरातङ्का–नीरोगा उत्तमा–उत्तमलक्षणोपेता अतिशेषा–कर्म्मभूमकमनुष्यापेक्षयाऽतिशायिनी अत एव निरुपमा–उपमारहिता तनुः–शरीरं येषां ते निरातङ्कोत्तमप्रशस्तातिशेषनिरुपमतनवः, एतदेव सविशेषमाह–'जल्लमलकलंकसेयरयदोसवज्जियसरीरनिरुवलेवा' याति च लगति चेति जल्लः–पृषोदरादित्वान्निष्पत्ति स्वल्पप्रयत्नापनेयः स चासौ मलश्च जल्लमलः स च कलङ्कं च–दुष्टतिलकादिकं चित्रादिकं वा स्वेदश्च–प्रस्वेदः रजश्च रेणुर्दोषो–मालिन्यकारिणी चेष्टा तेन वर्जितं निरुपलेपं च–मूत्रविष्ठाद्युपलेपरहितं शरीरं येषां ते जल्लमलकलङ्कस्वेदरजोदोषवर्जितनिरुपलेपशरीराः, सूत्रे च निरुपलेपशब्दस्य परनिपातः प्राकृतत्वात्, 'छायाउज्जोवियंगमंगा' छायया–शरीरप्रभया उद्द्योतितमङ्गमङ्गम्–अङ्गप्रत्यङ्गं येषां ते तथा, 'अनुलोमवाउवेगा' अनुलोमः–अनुकूलो वायुवेगः–शरीरान्तर्वर्तिवातजवो येषां ते अनुलोमवायुवेगाः, वायुगुल्मरहितोदरमध्यप्रदेशा इति भावः, आह च मूलटीकाकारः ।

"उदरमध्यप्रदेशे वायुगुल्मो येषं तेषामनुलोमो वायुवेगो न भवति, तदभावाच्च तेषामनुलोमो भवति वायुवेगो मिथुनाना"मिति, 'कङ्कग्रहणी' इति कङ्कः–पक्षिविशेषस्तस्येव ग्रहणिगुदाशयो नीरोगवर्च्चस्कतया येषां ते कङ्कग्रहणयः, 'कवोयपरिणामा' कपोतस्येव–पक्षिविशेषस्य परिणाम–आहारपाको येषां ते कपोतपरिणामाः, कपोतस्य हि जाठराग्नि पाषाणलवानपि जरयतीति श्रुति, एवं तेषामप्यत्यर्गलाहारग्रहणेऽपि न जातुचिदप्यजीर्णदोषा भवन्तीति, 'सउणिपोसपिट्ठंतरोरुपरिणया' इति शकुनेरिव–पक्षिण इव पुरीषोत्सर्गे निर्लेपतया 'पोसं'ति पोसः–अपानदेशः 'पुसउत्सर्गे' पुरीषमुत्सृजन्त्यनेनेति व्युत्पत्तेः, तथा लघुपरिणामतया पृष्ठं च प्रतीतं अन्तरे च–पृष्ठोदरयोरन्तराले पार्श्वावित्यर्थ ऊरू चेति द्वन्द्वः ते परिणता येषां ते शकुनिपोसपृष्ठान्तरोरुपरिणताः, निष्ठान्तस्य परनिपातः सुखादिदर्शनात्, 'विग्गहियउन्नयकुच्छी' विग्रहिता–मुष्टिग्राह्या उन्नता च कुक्षिर्येषां ते विग्रहितोन्नतकुक्षयः, वज्रर्षभनाराचं संहननं येषां ते वज्रर्षभनाराचसंहननाः, तथा समचतुरंस्र च तत् संस्थानं च समचतुरसंस्थानं तेन संस्थिताः समचतुरस्रसंस्थासंस्थिताः, षड्धनुःसहोच्छ्रिताः–त्रिगव्यूतप्रमाणोच्छ्रयाः, तथा तेषामुत्तरकुरुवास्तव्यानां मनुष्याणां द्वे पृष्ठकरण्डके षट्पञ्चाशे–षटपञ्चाशदधिके प्रज्ञप्ते तीर्थकरगणधरैः ।

'ते णं मणुया' इत्यादि, ते उत्तरकुरुवास्तव्या मनुजाः प्रकृत्या–स्वभावेन भद्रकाः–अपरानुपतापहेतुकावाङ्मनश्चेष्टाः, तथा प्रकृत्या–स्वभावेन न तु परोपदेशतः परेभ्यो भयतो वोपशान्ताः, तथा प्रकृत्या–स्वभावेन प्रतनवः–अतिमन्दीभूताः क्रोधमानमायालोभा येषां ते प्रकृतिप्रतनुक्रोधमानमायालोभाः, अत एव मृदु–मनोज्ञं परिणामसुखावहमिति भावः यन्मार्दवं तेन संपन्ना मृदुमार्दवसंपन्ना न कपटमार्दवोपेताः 'अल्लीणा' इति आ–समन्तात्सर्वासु क्रियासु लीना–गुप्ता आलीना नोल्वणचेष्टाकारिण इत्यर्थ, भद्रकाः–सकलतत्क्षेत्रोचितकल्याणभागिनः विनीता– बृहत्पुरुषविनयकरणशीलाः अल्पेच्छा–मणिकनकादिविषयप्रतिबन्धरहिता अत एवासन्निधि- सञ्चया–न विद्यते सन्निधिरूपः सञ्चयो येषां ते तथा, 'विडिमंतरपरिवसमा' विडिमान्तरेषुशाखान्तरेषु प्रासादाद्याकृतिषु परिवसनं–आकालमावासो येषां ते विडिमान्तरपरिवसनाः 'जहिच्छि-यकामकामिणो' यथेप्सितान् मनोवाञ्छितान् कामान्–शब्दादीन्

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

कामयन्त इत्येवंशीला यथेप्सित- कामकामिनः, ते उत्तरकुरुवास्तव्या णमिति पूर्ववत् मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'तेसि णं भंते !' इत्यादि, तेषां भदन्त ! उत्तरकुरुवास्तव्यानां मनुष्याणां 'केवइकालस्स'त्ति सप्तम्यर्थे षष्ठी कियति काले गते भूय आहारार्थ समुत्पद्यते ? –आहारलक्षणं प्रयोजनमुपतिष्ठते ?, भगवानाह–गौतम ! 'अष्टमभक्तस्य' अत्रापि सप्तम्यर्थे षष्ठी अष्टमभक्तेऽतिक्रान्ते आहारार्थः समुत्पद्यते ।। 'ते णं भंते !' इत्यादि, ते उत्तकुरुवास्तव्या भदन्त ! मनुष्याः किमाहारमाहारयन्ति ?, भगवानाह–गौतम ! पृथिवीपुष्पफलाहाराः–पृथिवीपुष्पफलानि च कल्पद्रुमाणामाहारो येषां ते तथा ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।।

'तेसि णं भंते' इत्यादि, तस्या भदन्त ! पृथिव्याः कीदृश आस्वादः प्रज्ञप्तः ?, भगवानाह–गौतम ! 'से जहा नामए' इत्यादि, तत्–लोके प्रसिद्धं यथा नाम 'ए' इति वाक्यालङ्कारेऽखण्डमिति वा, इतिशब्द उपमाभूतवस्तुनामपरिसमाप्तिद्योतकः, वाशब्दो विकल्पने, एवं सर्वत्र, गुड इति वा शर्करा इति वा, इयं शर्करा काशादिप्रभवा द्रष्टव्या, मत्स्यण्डिका इति वा, मत्स्यण्डी–खण्डशर्करा, पर्प्पटमोदक इति वा बिसकन्द इति वा पुष्पोत्तरेति वा पद्मोत्तरेति वा विजया इति वा महाविजया इति वा उपमा इति वा अनुपमा इति वा, पर्प्पटमोदकादयः खाद्यविशेषा लोकतः प्रत्येतव्याः ।

'चाउरक्के वा गोखीरे' इत्यादि वा, चातुरक्यं–चतुःस्थानपरिणामपर्यन्तं, तच्चैवं–गवां पुण्ड्रदेशोद्भवेक्षुचारिणीनामनातङ्कानां कृष्णानां यत्क्षीरं तदन्यान्याभ्यः कृष्णगोभ्य एव यथोक्तगुणाभ्यः पानं दीयते, तत्क्षीरमप्येवंभूताभ्योऽन्याभ्यस्तत्क्षीरमप्यन्याभ्य इति चतुःस्थान-परिणामपर्यन्तं, एवंभूतं यच्चातुरक्यं गोक्षीरं खण्डगुडमत्स्यण्डिकोपनीतं–खण्डगुडमत्स्यण्डिका उपनीता यत्र तत्तथा, सुखादिदर्शनान्निष्ठान्तस्य परनिपातः, खण्डादिभि सुरसतां प्रापितमिति भावः, 'मंदग्गिकढिए' मन्दमग्निना कथितं मन्दाग्नकथितम्, अत्यग्निकथितं हि विरसं विगन्धादि च भवतीति मन्दग्रहणं, वर्णाद्यतिशयप्रतिपादनार्थमेवाह वर्णेन समाध्यार्दतिशायिना अन्यथा वर्णोपादाननैरर्थक्यापत्तेः उपपेतं–युक्तं, एवं गन्धेन रसेन स्पर्शेन चातिशायिनोपपेतं, एवमुक्ते गौतम आह–भगवन् ! भवेदेतद्रूपः पृथिव्या आस्वादः ?, भगवानाह–गौतम ! नायमर्थः समर्थः, तस्याः पृथिव्या इति–गुडखण्डशर्करादेरिष्टतर एव, यावत्करणात् 'कंततराए चेव पियतराए चेव मणामतराए चेवे'ति परिग्रहः, आस्वादः प्रज्ञप्तः ।

पुष्पफलादीनामास्वादनं पृच्छन्नाह–'तेसि णं भंते ! पुप्फफलाण' मित्यादि, तेषां कल्पपादप-सत्कानां पुष्पफलानां कीदृश आस्वादः प्रज्ञप्तः ?, भगवानाह–गौतम ! 'तेसि णं भंते ! पुप्फफलाण' मित्यादि, तेषां कल्पपादपसत्कानां पुष्पफलानां कीदृश आस्वादः प्रज्ञप्तः ?, भगवानाह–गौतम 'से जहा नामए' इत्यादि तद्यथा नाम राज्ञः, स च राजा लोके कतिपयदेशाधिपतिरपि प्रायते तत आह चतुरन्तचक्रवर्त्तिनः–चतुर्षु अन्तेषु त्रिसमुद्रहिमवत्परिच्छिन्नेषु गम्यते, एवं गन्धेन रसेन स्पर्शेनोपपेतं, आस्वादनीयं आस्वादनीयं सामान्येन विस्वादनीयं विशेषतस्तद्रसप्रकर्षमधिकृत्य दीपनीयमग्निवृद्धिकरं, दीपयति हि जाठराग्निमिति दीपनीयं, बाहुलकात्कर्त्तर्यनीयप्रत्ययः, एवं दर्प्पणीयमुत्साहवृद्धिहेतुत्वात्, मदनीयं मन्थथजननात्, बृंहणीयं धातूपचयकारित्वात्, सर्वाणीन्द्रियाणि गात्रं च प्रह्लादयतीति सर्वेन्द्रियगात्रप्रह्लादनीयं, वैशद्येन तत्प्रह्लादहेतुत्वात्, एवमुक्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौतम आह–भगवन्! भवेदेतद्रूपः पुष्पफलानामास्वादः?, भगवानाह गौतम! नायमर्थ समर्थ, तेषां पुष्पफलानामितश्चक्रवर्त्तिभोजनादिष्टतरादिरेवास्वादः प्रज्ञप्तः।

'ते णं भंते!' इत्यादि, ते भदन्त! मनुजास्तं–अनन्तरोदितस्वरूपमाहारमाहार्य 'क्व वसतौ' कस्मिन्नुपाश्रये 'उपयान्ति?' उपगच्छन्ति, भगवानाह–गौतम! 'वृक्षगृहालयाः' वृक्षरूपाणि गृहाणि आलया–आश्रया येषां ते वृक्षगृहालयास्ते मनुजाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!।

'ते णं भंते' इत्यादि, ते भदन्त! वृक्षाः 'किंसंस्थिताः' किमवसंस्थिताः प्रज्ञप्ताः?, भगवानाह–गौतम! अप्येकका: कूटाकारसंस्थिताः सिखराकारसंस्थिता इत्यर्थ अप्येककाः प्रेक्षागृहसंस्थिताः अप्येककाश्छत्रसंस्थिताः अप्येकका ध्वजसंस्थिताः अप्येककाः स्तूपसंस्थिताः अप्येककास्तोरण-संस्थिताः अप्येककाः कूटाकारसंस्थिताः अप्येककास्तोरणसंस्थिताः अप्येकका गोपुरसंस्थिताः, गोभिः पूर्यत इति गोपुरं–पुरद्वारं, अप्येकका वेदिकासंस्थानसंस्थिताः, वेदिका–उपवेशनयोग्या भूमि, अप्येककाश्चोप्पालसंस्थिता इत्यर्थः, चोप्पालं नाम मत्तवारणं, अप्येकका अट्टालकसंस्थिताः अट्टालकः–प्राकारस्योपर्याश्रयविशेषः, अप्येकका वीथीसंस्थिताः वीथी–मार्ग, अप्येककाः प्रासादसंस्थिताः, राज्ञां देवतानां च भवनानि प्रासादाः उत्सेधबहुला वा प्रासादास्ते चोभयेऽपि पर्यन्तशिखराः, हर्म्य–शिखररहितं धनवतां भवनं, अप्येकका गवाक्षसंस्थिताः, गवाक्षो–वातायनं, अप्येकका वालाग्रपोतकासंस्थिताः, वालाग्रपोतिका नाम तडागादिषु जलस्योपरि पार्सादः, अप्येकका वलभीसंस्थिताः, वलभी–गृहाणामाच्छादनं, अप्येकका वरभवनविशिष्टसंस्थान-संस्थिताः, वरभवनं सामान्यतो विशिष्टं गृहं तस्येव यद् विशिष्टं संस्थानं तेन संस्थिताः, शुभा शीतला च छाया येषां ते शुभशीतलच्छायास्ते द्रुमगणाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!।

'अत्थि णं भंते!' इत्यादि, सन्ति भदन्त! उत्तरकुरुषु कुरुषु गृहाणिवाऽस्मददगृहकल्पानि गृहायतनानि–तेषु गृहेषु तेषां मनुष्याणामायतनानि–गमनानि गृहायतनानि?, भगवानाह–गौतम नायमर्थ समर्थो, वृक्षगृहालयास्ते मनुजाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!।

'अत्थि णं भंते!' इत्यादि, सन्ति भदन्त! उत्तरकुरुषु कुरुषु ग्रामा इति वा यावत्सन्निवेशा इति वा, यावत्करणान्नगरादिपरिग्रहः, तत्र ग्रसन्ति बुद्धयादीन् गुणानिति यदिवा गम्याः–शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामाः, न विद्यते करो येषु तानि नकराणि, नखादय इति निपातनान्नञोऽनादेशाभावः, निगमाः–प्रभूतवणिग्वर्गावासाः, पांशुप्राकारनिबद्धानि खेटानि, क्षुल्लप्राकारवेष्टितानि कर्बटानि, अर्द्धतृतीयगव्यूतान्तर्ग्रामरहितानि मडम्बानि, 'पट्टणाइ वे'ति पट्टनानि पत्तनानि वा, उभयत्रापि प्राकृतत्वेन निर्देशस्य समानत्वात्, तत्र यन्नौभिरेव गम्यं तत्पट्टनं, यत्पुनः शकटैर्घोटकैर्नौभिश्च गम्यं तत्पत्तनं यथा भरुकच्छं, उक्तं च–

॥१॥ "पत्तनं शकटैर्गम्यं, घोटकैर्नौभिरेव च।
नौभिरेव तु यद्गम्यं, पट्टनं तत्प्रचक्ष्यते॥"

द्रोणमुखानि–बाहुल्येन जलनिर्गमप्रवेशानि, आकरा–हिरण्याकरादयः, आश्रमाः–ताप-सावसथोपलक्षिता आश्रयाः, संबाधा–यात्रासमातप्रभूतजननिवेशाः, राजधान्यो यत्र नकरे पत्तनेऽन्यत्र वा स्वयं राजा वसति, सन्निवेशा इति–सन्निवेशो यत्र सार्थादिरावासितः, भगवानाह–

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

गौतम ! नायमर्थ– समर्थो, यद्–यस्मान्नेच्छितकामगामिनः न इच्छितं–इच्छाविषयीकृतं नेच्छितं, नायं नञ् किन्तु नशब्द इत्यत्र (ना) देशाभावो यथा 'नैके द्वेषस्य पर्याया' इत्यत्र, नेच्छितं–इच्छाया अविषयीकृतं कामंस्वेच्छया गच्छन्तीत्येवंशीला नेच्छितकामगामिनस्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् !

'अत्थि णं भंते' इत्यादि, सन्ति भदन्त ! उत्तरकुरुषु कुरुषु 'असयः' अस्युपलक्षिताः सवकाः पुरुषाः, मषीति वा मष्युपलक्षिता लेखनजीविनः, कृषिरिति कृषिकर्मोपजीविनः, 'पणी'ति पणितं पण्यमिति वा क्रयविक्रयोपजीविनः, वाणिज्यमिति वाणिज्यकलोपजीविनः ?, भगवानाह– गौतम ! नायमर्थ समर्थो, व्यपगतासिमषीकृषिपण्यवाणिज्यास्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।। 'अत्थि णं भंते' इत्यादि, अस्ति भदन्त ! उत्तरुकुरुषु कुरुषु हिरण्यमिति वा–हिरण्यं– अघटितं सुवर्णं कांस्यं–कांस्यभाजनजाति 'दूस'मिति वा दूष्यं वजाति, मणिमौक्तिक- शङ्खशिला- प्रवालसत्सारस्वापतेयानि वा, तत्र मणिमौक्तिकशङ्खशिलाप्रवालानि प्रतीतानि सद्–विद्यमानं सारं–प्रधानं स्वापतेयं–धनं सत्सारहस्वापतेयं, भगवानाह–हन्ता ! अस्ति, 'नो चेव ण'मित्यादि, न पुनस्तेषां मनुजानां तद्विषयस्तीव्रो ममत्वभावः समुत्पद्यते, मन्दरागादितया विशुद्धाशयत्वात्

'अत्थि णं भंते !' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु राजेति वा राजा–चक्रवर्त्ती बलदेववासुदेवो महामाण्डलिको वा युवराज इति वा–उत्थिताशनः ईश्वरो–भोगिकादि, अणिमाद्य- ष्टविधैश्वर्ययुक्त ईश्वर इत्येके, तलवर इति वा, तलवरो नाम परितुष्टनरपतिप्रदत्तरत्ना- लङ्कृतसौवर्णपट्टविभूषितशिराः, कौटुम्बिक इति वा, कतिपयकुटुम्बप्रभुः कौटुम्बिकः, माडम्बिक इति वा, यस्य प्रत्यासन्नं ग्रामनगरादिकमपरं नास्ति तत्सर्वतश्छिन्नं जनाश्रयविशेषरूपं मडम्बं तस्याधिपतिर्माडम्बिकः, इभ्य इति वा, इभो–हस्ती तत्प्रमाणं द्रव्यमर्हतीतीभ्यः, यत्सत्कपुञ्जीकृतहिर- ण्यरत्नादिद्रव्येणान्तरितो हस्त्यपि न दृश्यते सोऽधिकतरद्रव्यो वा इभ्य इत्यर्थः, श्रेष्ठीति वा श्रीदेवताऽध्यासितसौवर्णपट्टविभूषितोत्तमाङ्गः पुरज्येष्ठो वणिग्विशेषः श्रेष्ठी, सेनापतिरिति वा हस्त्यश्वरथपदातिसमुदायलक्षणायाः सेनायाः प्रभुः सेनापति, सार्थवाह इति वा ।

॥ १ ॥ "गणिमं रिमं मेज्जं पारिच्छं चेव दव्वजायं तु ।
धेत्तूणं लाभत्थं वच्चइ जो अन्नदेसं तु ।।
॥ २ ॥ निवबहुमओ पसिद्धो दीणाणाहाण वच्छलो पंथे ।
सो सत्थवाहनामं धणो व्व लोए समुव्वहइ ।।

एतल्लक्षणयुक्तः सार्थवाहः, भगवानाह–गौतम ! नायमर्थ समर्थो, व्यपगतर्द्धिसत्कारा– व्यपगता ऋद्धि–विभवैश्वर्यं सत्कारश्च–सेव्यतालक्षणो येभ्यस्ते तथा उत्तरकुरुवास्तव्या मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! । 'अत्थि णं भंते' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु दास इति वा, दासः–आमरणं क्रयक्रीतः, प्रेष्य इति वा,प्रेष्यः–प्रेषणयोग्य, शिष्य इति वा, शिष्यः– उपाध्यायस्योपासकः, भृतक इति वा, भृतको–नियतकालमधिकृत्य वेतनेन कर्म्मकरणाय धृतः, 'भागिल्लए'ति वा भागिक इति वा, भागिको नाम द्वितीयांशस्य चतुर्थांशस्य वा ग्राहकः, कर्मकारपुरुष इति वा, कर्म्मकारो लोहारादि कर्म्मकारः ?, भगवानाह–गौतम ! नायमर्थ समर्थो, व्यपगताभियोग्यास्ते मनुजाः प्रज्ञप्ताः, अभिमुखं कर्म्मसु युज्यते व्यापार्यत इति वाऽभियोग्यस्तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावः कर्म्म वा आभियोग्यं, 'व्यञ्जनाद् यपंचमस्य सरूपे वा' इत्येकस्य यकारस्य लोपः, व्यपगत-माभियोग्यं येभ्यस्ते तथा हे श्रमण ! हे आयुष्मन् ! । 'अत्थि णं भंते !' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु मातेति वा पितेति वा भ्रातेति वा भगिनीति वा भार्येति वा सुत इति वा दुहितेति वा स्नुषेति वा ?, तत्र माता–जननी पिता–जनकः सहोदरो–भ्राता सहोदरी–भगिनी वधूः–भार्या सुतः–पुत्रः सुता–दुहिता पुतरवधूः–स्नुषा, भगवानाह–हन्त ! अस्ति, तथाहि–या प्रसूते सा जननी, यो बीजं निषिक्तवान् स पिता विवक्षितः पुरुषः, सहजातो यो भ्राता एकमातृपितृकत्वात्, इतरा तस्य भगिनी, भोग्यत्वाद् भार्या, स्वमातापित्रोः स पुत्र इतरा दुहिता, स्वपुत्रभोग्यत्वात्स्नुषेति, 'नो चेव ण'मित्यादि, न पुनस्तेषां मनुजानां तीव्रं प्रेमरूपं बन्धनं समुत्पद्यते, तथा क्षेत्रस्वाभाव्यात् प्रतनुप्रेमबन्धनास्ते मनुजगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'अत्थि णं भंते' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु अरिरिति वा–शत्रु वैरीति वा–जातिनिबद्धवैरोपेतः, घातक इति वा, घातको योऽन्येन घातयति, वधक इति वा, वधकः–स्वयं हन्ता, प्रत्यनीक इति वा, प्रत्यनीकः–छिद्रान्वेषी, प्रत्यमित्र इति वा, प्रत्यमित्रो यः पूर्वं मित्रं भूत्वा पश्चाद मित्रो जातः ?, भगवानाह–नायमर्थ समर्थो, व्यपगतवैरानुबन्धास्ते मनुजगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।। 'अत्थि णं भंते' इत्यादि, अस्ति सभदन्त ! उत्तरकुरुषु कुरुषु मित्रमिति वा मित्रं–स्नेहविषयः, वयस्य इति वा–समानवया गाढतरस्नेहविषयः, सखा इति वा–समान-खादनपानो गाढतमस्नेहस्थानं, सुहृदिति वा, सुहृत्–मित्रमेव सकलकालमव्यभिचारि हितोपदेशदायि च, साङ्गतिक इति वा, साङ्गतिकः–सङ्गतिमात्रघटितः ?, भगवानाह–नायमर्थ समर्थो, व्यपगतस्नेहानुरागास्ते मनुजगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'अत्थि णं भंते !' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु 'आबाहा इति वा' आहूयन्ते स्वजनास्ताम्बूलदानाय यत्र स आवाहः–विवाहात्पूर्वस्ताम्बूलदानोत्सवः, वीवाहा इति वा, वीवाहः–परिणयनं, यज्ञा इति वा, यज्ञाः–प्रतिदिवसं स्वस्वेष्टदेवतापूजाः, श्राद्धानीति वा, श्राद्धं–पितृक्रिया, स्थालीपाका इति वा, स्थालीपाकः–प्रतीतः, मृतपिण्डनिवेदनानीति वा–मृतेभ्यः श्मशाने तृतीयनमादिषु दिनेषु पिण्डनिवेदनानि मृतपिण्डनिवेदनानि, चूडोपनयनानीति वा, चूडोपनयनं–शिरोमुण्डनं, सीमन्तोन्नयनानीति वा, सीमन्तोन्नयनं–गर्भस्थापनं ?, भगवानाह–नायमर्थ समर्थः, वोयपगतावाहवीवाहयज्ञश्राद्धस्थालीपाकमृतपिण्डनिवेदनास्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! । 'अत्थि णं भंते' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु नटप्रेक्षेति वा नटा–नाटकानां नाटयितारस्तेषां प्रेक्षा नटप्रेक्षा, नृत्यप्रेक्षेति वा, नृतयन्ति स्म नृत्या–नृत्यविधायिनस्तेषां प्रेक्षा नृत्यप्रेक्षा इति वा, जल्लप्रेक्षेति वा, जल्ला–वरत्राखेलकाराजस्तोत्रपाठका इत्यपरे तेषां प्रेक्षा जलप्रेक्षा, मल्लप्रेक्षेति वा, मल्लाः–प्रतीताः, मौष्टिकप्रेक्षेति वा, कथकाः प्रतीताः, प्लवकप्रेक्षेति वा, प्लवका ये उत्प्लुत्य गर्त्तादिकं झम्पाभिर्लङ्घयन्ति नद्यादिकं वा भन्ति तेषां प्रेक्षा प्लवकप्रेक्षा, लासकप्रेक्षेति वा, लासका ये रासकान् गायन्ति जयशब्दप्रयोक्तारो वा भाण्डास्तेषां प्रेक्षा लासकप्रेक्षा, आख्याय-कप्रेक्षेति वा ये शुभाशुभमाख्यान्ति ते आख्यायकास्तेषां प्रेक्षा आख्यायकप्रेक्षा, लङ्खप्रेक्षेति वा, लङ्खा ये महावंशाग्रमारुह्य नृत्यन्ति तेषां प्रेक्षा लङ्खप्रेक्षा, मङ्खप्रेक्षेति वा, ये चित्रपट्टिकादिहस्ता भिक्षां चरन्ति ते मङ्खास्तेष प्रेक्षा मङ्खप्रेक्षा, 'तूणइल्लपेच्छाइ वा' इति तूणइल्ला–तूणाभिधानवाद्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषवन्तस्तेषां प्रेक्षा तूणइल्लप्रेक्षा, तुम्बवीणाप्रेक्षेति वा, तुम्बयुक्ता वीणा येषां ते तुम्बवीणाः–तुम्बवीणावादकास्तेषां प्रेक्षा, 'कावपिच्छाइ वे'ति कावाः–कावडिवाहका तेषां प्रेक्षा, मागधप्रेक्षेति वा, मागधा–बन्दिभूतास्तेषां प्रेक्षा मागधप्रेक्षेति वा ?, भगवानाह–नायमर्थ समर्थो, व्यपगत कौतुकास्ते मनुजगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'अत्थि णं भंते' इत्यादि, अस्ति भदन्त ! उत्तरकुरुषु कुरुषु इन्द्रमह इति वा, इन्द्रः–शक्रस्तस्य महः–प्रतिनियतदिवसभावी उत्सवः, स्कन्दमह इति वा, स्कन्दः–कार्त्तिकेयः, रुद्रमह इति वा, रुद्रः प्रतीतः, शिवमह इति वा, सिवो–देवताविशेषः, वैश्रमणमह इति वा, वैश्रमणः–उत्तरदिग्लोकपालः, नागमह इति वा, नागो–भवनपतिविशेषः, यक्षमह इति वा भूतमह इति वा, यक्षभूतौ–व्यन्तरविशेषौ, मकुनदमह इति वा, मकुन्दो–बलदेवः, कूपमह इति वा तडाकमह इति वा नदीमह इति वा ह्रदमह इति वा पर्वतमह इति वा वृक्षमह इति वा चैत्यमह इति वा स्तूपमह इति वा ?, कूपादयः प्रतीताः, भगवानाह–नायमर्थ समर्थो, व्यपगतमहमहिमास्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'अत्थि णं भंते !' इत्यादि, सन्ति भदन्त ! उत्तरुकुरुषु कुरुषु शकटानीति वा, शकटानि–प्रतीतानि, रथा वा, रथा द्विविधा–यानरथाः सङ्ग्रामरथाश्च, तत्र सङ्ग्रामरथस्य प्राकारानुकारिणी फलकमयी वेदिकाऽपरस्य तु न भवतीति विशेषः, यानानीति वा यानं–गन्त्रयादि, युग्यानीति वा, युग्यं–गोल्लविषयप्रसिद्धं द्विहस्तप्रमाणं चतुरवेदिकोपशोभितं जम्पानं, गिल्लय इति वा, गिल्लिर्हस्तिन उपरि कोल्लररूपा या मानुषं गिलतीव, थिल्लय इति वा, लाटानां यद् अड्डपल्लाणं रूढं तदन्यविषये थिल्लिरित्युच्यते, शिबिका इति वा, शिबिका–कूटाकाराच्छादितो जम्पानविशेषः, सन्दमाणिया इति वा, सन्दमाणिया–पुरुषप्रमाणो जम्पानविशेषः ?, भगवानाह–नायमर्थः, समर्थः पादविहारचारिणस्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'अत्थि णं भंते' इत्यादि, सन्ति भदन्त ! अश्वा इति वा हस्तिन इति वा उष्ट्रा इति वा गाव इति वा महिषा इति वा खरा इति वा घोटका इति वा ?, इह जात्या आशुगमनशीला अश्वाः शेषा घोटकाः, खरा–गर्दभाः, अजा इति वा एडका इति वा ?, भगवानाह–हन्त ! सन्ति, पुनस्तेषां मनुजानां परिभोग्यतया 'हव्वं' शीघ्रमागच्छन्ति ॥ 'अत्थि णं भंते' इत्यादि, सन्ति भदन्त ! उत्तरकुरुषु कुरुषु गाव इति वा, गावः–गिव्यः, महिष्य इति वा उष्ट्रय इति वा अजा इति वा एडका इति वा ?, हन्त ! सन्ति भदन्त ! उत्तरकुरुषु कुरुषु गाव इति वा, गावः–गिव्यः, महिष्य इति वा उष्ट्रय इति वा अजा इति वा एडका इति वा ?, हन्त ! सन्ति, न पुनस्तेषां मनुष्याणामुपभोग्यतया हव्यं शीघ्रमागच्छन्ति । 'अत्थिणं भंते' इत्यादि, सन्ति भदन्त ! उत्तरकुरुषु कुरुषु सिंहा इति वा, सिंहः–पञ्चाननः, व्याघ्रा इति वा, व्याघ्रः–शार्दूलः, वृका इति वा, द्वीपिका इति वा द्वीपिका–चित्रकाः, ऋक्षा इति वा, परस्सरा इति वा, परस्सरो–गण्डः, श्रृंगाला इति वा, बिडाला इति वा, शुनका इति वा, कालशुनका इति वा, कोकन्तिका इति वा, कोकन्तिकालुङ्कडिकाः, शशका इति वा, चिल्लला इति वा, चिल्लल–आरण्यकः पशुविशेषः ?, भगवानाह–हन्त ! सन्ति, न पुनस्ते परस्परस्या तेषां वा मनुजानां काञ्चिदाबाधां वा छविच्छेदं वा कुर्वन्ति, प्रकृतिभद्रकास्ते श्वापदगणाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्थि णं भंते' इत्यादि, सन्ति भदन्त! अश्वा इति वा हस्तिन इति वा उष्ट्रा इति वा गाव इति वा महिषा इति वा खरा इति वा गोटका इति वा?, इह जात्या आशुगमनशीला अश्वाः शेषा घोटकाः, खरा–गर्दभाः, अजा इति वा एडका इति वा?, भगवानाहहन्त! सन्ति, न पुनस्तेषां मनुजानां परिभोग्यतया 'हव्वं' शीघ्रमागच्छन्ति ॥ 'अत्थि णं भंते' इत्यादि, सन्ति भदन्त! उत्तरकुरुषु कुरुषु गाव इति वा, गावः–स्त्रीगव्यः, महिष्य इति वा उष्ट्रय इति वा अजा इति वा एडका इति वा?, हन्त! सन्ति, न पुनस्तेषां मनुष्याणामुपभोग्यतया हव्यं शीघ्रमागच्छन्ति।

'अत्थि णं भंते' इत्यादि, सन्ति भदन्त! उतरकुरुषु कुरुषु सिंहा इति वा, सिंहः–पञ्चाननः, व्याघ्रा इति वा, व्याघ्रः–शार्दूलः, वृका इति वा, द्वीपिका इति वा द्वीपिकाः–चित्रकाः, ऋक्षा इति वा, परस्सरा इति वा, परो–गण्डः, श्र गाला इति वा, बिडाला इति वा, शुनका इति वा, कालशुनका इति वा, कोकन्तिका इति वा, कोकन्तिकालुङ्कडिकाः, शशका इति वा, चिल्लला इति वा, चिल्लल –आरण्यकः पशुविशेषः?, भगवानाह–हन्त! सन्ति, न पुनस्ते परस्परस्या तेषां वा मनुजानां काञ्चिदाबाधां वा प्रबाधां वा छविच्छेदं वा कुर्वन्ति, प्रकृतिभद्रकास्ते श्वापदगणाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!। 'अत्थि णं भंते' इत्यादि, सन्ति भदन्त! उत्तरकुरुषु कुरुषु शालय इति वा व्रीहय इति वा गोधूमा इति वा यवा इति वा तिला इति वा इक्षव इति वा?, हन्त! सन्ति न पुनस्तेषां मनुष्याणां परिभोग्यतया 'हव्वं' शीघ्रमागच्छन्ति ॥ 'अत्थि णं भंते' इत्यादि, अस्ति भदन्त! उत्तरकुरुषु कुरुषु स्थाणुरिति वा कण्टक इति वा हीरमिति वा, हीरं–लघु कुत्सितं तृणं, शर्क्करेति वा, शर्करा– कर्करकः, तृणकचवर इति वा पत्रकचवर इति वा अशुचीति वा, अशुचि–विगन्धं शरीरमलादि, पूतीति वा, पूति–कुथितं स्वस्वभावचलितं त्रिवासरवटकादिवत्, दुरभिगन्धमिति वा, दुरभिगन्धं मृतकलेवरादिवत्, अचोक्षं–अपवित्रमस्थ्यादिवत्?, भगवानाह–नायमर्थः समर्थो, व्यपगतस्थाणुकण्टकहीरशर्करातृणकचवरपत्रकचवराशुचिपूतिदुरभिगन्धाचोक्षपरिवर्जिता उत्तरकुरवः प्रज्ञप्ताः हे श्रमण! हे आयुष्मन्! ॥

'अत्थि णं भंते' इत्यादि, अस्ति भदन्त! उत्तरकुरुषु कुरुषु, गर्त्तेति वा, गर्त्ता–महती खड्डा, दरीति व, दरी–मूषिकादिकृता लघ्वी खड्डा, घसीति वा, घसी–भूराजि, भृगुरिति वा, भृगुः–प्रपातस्थानं, विषममिति वा, विषमं–दुरारोहावरोहस्थानं, धूलिरिति वा पङ्क इति वा, धूलीपप्रतीतौ, चलणीति, वा, चलनी–चरममात्रस्पर्शी कर्दमः?, भगवानाह–नायमर्थः समर्थ, उत्तरकुरुषु कुरुषु बहुसमरमणीयो भूभागः प्रज्ञप्तो हे श्रमण! हे आयुष्मन्! ॥ 'अत्थि णं भंते!' इत्यादि, सन्ति भदन्त! दंसा इति वा मसका इति वा ढङ्कुणा इति वा, कचित् पिशुगा इति वा इति पाठस्तत्र पिशुकाः–पंचटादयः, यूका इति वा लिक्षा इति वा?, भगवानाह–नायमर्थः समर्तो, व्यपगतोपद्रवाः खलु उत्तरकुरवः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!।

'अत्थि णं भंते' इत्यादि, सन्ति भदन्त! उत्तरकुरुषु कुरुषु अहय इति वा अजगरा इति वा महोरगा इति वा?, हन्त! सन्ति न पुनस्तेऽन्योऽन्यस्य तेषां वा मनुजानं काञ्चिदाबाधां व्याबाधां वा छविच्छेदं वा कुर्वन्ति, प्रकृतिभद्रकास्ते व्यालकगणाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन्!।

'अत्थि णं भंते' इत्यादि, सन्ति (भदन्त)! उत्तरकुरुषु कुरुषु ग्रहदण्डा इति वा, दण्डाकारव्यवस्थिता ग्रहा ग्रहदण्डाः ते चानर्थोपनिपातहेतुतया प्रतिषेध्या न स्वरूपतः, एवं ग्रहमुशलानीति

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

वा, ग्रहगर्जितानि—ग्रहचारहेतुकानि गर्जितानि, इमानि स्वरूपतोऽपि प्रिषेध्यानि, ग्रहयुद्धानीति वा, ग्रहयुद्धं नाम यदेको ग्रहोऽन्यस्य ग्रहस्य मध्येन याति, ग्रहसङ्घाटका इति वा, ग्रहसङ्घाटको ना ग्रहयुग्मं, ग्रहापसव्यानीति वा अभ्राणीति वा, अभ्राणि—सामान्याकारेण प्रतीतानि, अभ्रवृक्षा इति वा, अभ्रवृक्षा—वृक्षाकारपरिणतान्यभ्राणि, सन्ध्या इति वा सन्ध्याकाल नीलाधभ्रपरिणतिरूपा प्रतीतैव गन्धर्वनगराणि—सुरसदनप्रासादोपशोभितनगराकारतया तथाविधनभःपरिणत-पुद्गलराशरूपाणि, एतान्यपि तत्र स्वरूपतोऽपि न भवन्ति, गर्जितानीति वा विद्युत इति वा, गर्जितानि विद्युतश्च प्रतीताः, उल्कपाता इति वा, उल्कापाता—व्योम्नि संमूर्च्छितज्वलननिपतनरूपाः, दिग्दाह इति वा, दिग्दाहा—अन्यतरस्यां दिशि छिन्नमूलज्वलनज्वालाकरालिताम्बरप्रतिभासरूपाः, निर्घाता इति वा, निर्घातो—विद्युत्प्रपातः, पांशुवृष्टय इति वा, पांशुवृष्टयो—धूलिवर्षाणि, यूपका इति वा, यूपकाः 'संझाछेयावरणो य' इत्यादिनाऽऽवश्यकग्रन्थेन प्रतिपत्तव्याः, यक्षदीप्तकानीति वा, यक्षदीप्तकानि नाम नभसि दृश्यमानाग्निसहितः पिशाचः, धूमिकेति वा रूक्षा प्रविरला धूमाभा धूमिका, महिकेति वा, स्निग्धा घना घनत्वादेव भूमौ पतिता सार्द्रतृणादिदर्शनद्वारेणोपलक्ष्यमाणा महिका, रजउद्घाता—रजस्वला दिशः।

चन्द्रोपरागा इति वा सूर्योपरागा इति वा, चन्द्रोपरागः—चन्द्रग्रहणं सूर्योपरागः—सूर्यग्रहणं, इह गर्जितविद्युदुल्कादिग्दाहनिर्घातपांशुवृष्टियूपकयक्षदीप्तकधूमिकामहिकारजउद्घाताः स्वरूपतोऽपि प्रतिषेध्याः, चन्द्रसूर्यग्रहणे त्वनर्थोपनिपातहेतुतया, स्वरूपतस्तयोः प्रतिषेद्धुम-शक्यत्वात्, जम्बूद्वीपगतौ हि चन्द्रौ सूर्यौ वा तत्प्रकाशयतः, एकस्य चन्द्रस्य ग्रहणे सकलमनुष्य-लोकवर्त्तिनां चन्द्राणामेकस्य सूर्यस्य ग्रहणे सकलमनुष्यलोकवर्त्तिनां सूर्याणां ग्रहणमत इह क्षेत्र इव तत्रापि स्वरूपतश्चन्द्रसूर्योपरागप्रतिषेधासम्भवः, चन्द्रपरिवेषा इति वा सूर्यपरिवेषा इति वा, चन्द्रसूर्यपरिवेषाश्चन्द्रादित्ययोः परितो वलयाकारपरिणतिरूपाः प्रतीता एव, प्रतिचन्द्रा इत वा प्रतिसूर्या इति वा, प्रतिचन्द्र—उत्पातादिसूचको द्वितीयश्चन्द्रः, एवं द्वितीय— सूर्य प्रतिसूर्य, इन्द्रधनुरिति वा उदकसत्स्य इति वा, इन्द्रधनुः—प्रतीतं, तस्यैव खण्डमुदकमत्स्यः।

कपिहसितानीति वा, कपिहसितानि—अकस्मान्नभसि ज्वलद्भीमशब्दरूपाणि, अमोधा इति वा, अमोधाः—सूर्यबिम्बस्याधः कदाचिदुपलभ्यमानशकटोद्धिसंस्थिता श्यामादिरेखा, एते चन्द्रपरिवेषादयः स्वरूपतोऽपि प्रतिषेध्याः, प्राचीनवाता इति वा अपाचीनवाता इति वा यावत् शुद्धवाता इति वा, यावत्करणाद्दक्षिणवातादिपरिग्रहः, एतेऽसुखहेतवो विकृतरूपाः प्रतिषेध्याः नतु सामान्येन, पूर्वादिवातस्य तत्रापि सम्भवात्, ग्रामदाहा इति वा नरकदाहा इति यावत्संनिवेशदाहा इति, यावत्करणान्निगमदाहखेटदाहादिपरिग्रहः, दाहकृतश्च प्राणक्षय इति वा भूतक्षय इति वा कुलक्षय इति वा, एते स्वरूपतोऽपि प्रतिषेध्याः, तथा चाह भगवान्—गौतम! नायमर्थः समर्थः, केषाञ्चिदनर्थहेतुतया केषाञ्चित्स्वरूपतश्च तत्र तेषामसम्भवात्।

'अत्थि णं भंते' इत्यादि, सन्ति भदन्त! उत्तरकुरुषु कुरुषु डिम्बानीति वा, डिम्बानि—स्वेदोशोत्था विप्लवाः, डमराणीति वा, डमराणि—परराजकृता उपद्रवाः, कलहा इति वा, कलहा—वागयुद्धानि, बोला इति वा, बोल—आर्त्तानां बहूनां कलकलपूर्वको मेलापकः, क्षार इति वा, क्षारः—परस्परं मात्सर्यं, वैराणीति वा, वैरं—परस्परमसहनतया हिंस्यहिंसकभावाध्यवसायः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महायुद्धानीति वा, महायुद्धं—परस्परं मार्यमाणमारकतया युद्धं, महासङ्ग्रामा इति वा, महासन्नाहा इति वा, महासङ्ग्रामश्चेटिककोणिकवत्, महासन्नाहो—बृहत्पुरुषाणामपि बहूनां यः सन्नाहः, महापुरुषनिपतनानीति वा, प्रतीतं, महाशस्त्रनिपतनानीति वा, महाशस्त्रनिपतनं—यन्नागबाणादीनां दिव्याणां प्रक्षेपणं, नागबाणादयो हि बाणा महाशस्त्राणि, तेषामद्भुतविचित्रशक्तिकत्वात्, तताहि नागबाणा धनुष्यारोपिता बाणाकारा मुक्ताश्च सन्तो जाज्वल्यमानासह्योल्कादण्डरूपास्तः परशरीरे सङ्क्रान्ता नागमूर्त्तीभूय पाशत्वमुपगच्छन्ति, तामसबाणाश्च पर्यन्ते सकलसङ्ग्रामभूमिव्यापिमहान्धतमसरूपतया परिणमन्ते, उक्तञ्च—

॥१॥　"चित्रं श्रेणिक ! ते बाणा, भवन्ति धनुराश्रिताः ।
उल्कारूपाश्च गच्छन्तः, शरीरे नागमूर्त्तयः ॥
॥२॥　क्षणं बाणाः क्षणं दण्डाः, क्षणं पाशत्वमागताः ।
आकरा ह्यभेदास्ते, यथाचिन्तितमूर्त्तयः ॥ इत्यादि ।

भगवानाह—नायमर्थः समर्थो, व्यपगतडिम्बडमरकलहबोलक्षारवैरास्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।'अत्थि णं भंते' इत्यादि, सन्ति भन्दित ! उत्तरकुरुषु कुरुषु दुर्भूतानीति वा, दुर्भूतंअशिवं, कुलरोगा इति वा मण्डलरोगा इति वा शिरोवेदनेति वा अक्षिवेदनेति वा कर्णवेदनेति वा नखवेदनेति वा दन्तवेदनेति वा काश इति वा श्वास इति वा सोष इति वा ज्वर इति वा दाह इति वा कच्छूरिति वा खसर इति वा कुष्ठमिति वा अर्श इति वा अजीर्णमिति वा भगन्दर इति वा इन्द्रग्रह इति वा स्कन्धग्रह इति वा कुमारग्रह इति वा नागग्रह इति वा यक्षग्रह इति वा भूतग्रह इति वा धनुर्ग्रह इति वा उद्वेग इति वा एकाहिका इति वा द्वयाहिका इति वा त्र्याहिका इति वा चतुर्थका इति वा हृदयशूलानीति वा मस्तकशूलानीति वा पार्श्वशूलानीति वा कुक्षिशूलानीति वा योनिशूलानीति वा ग्रमामारिरिति वा नकरमारिरिति वा निगममारिरिति वा यावत्सन्निवेशमारिरिति वा, यावत्करणात् खेडकर्बटादिपरिग्रहः, मारिकृतप्राणिक्षय इति वा जनक्षय इति वा धनक्षय इति वा कुलक्षय इति वा व्यसनभूतमनार्यतेति वा ?, भगवानाह—नायमर्थ समर्थो, व्यपगतरोगातङ्कास्ते मनुजाः प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'तेसि ण'मित्यादि, तेषामुत्तरकुरुवास्तव्यानां भदन्त ! मनुष्याणां कियन्तं कालं स्थिति—अवस्थानं प्रज्ञप्ता ?, भगवानाह—गौतम ! जघन्येन देशोनानि त्रीणि पल्योपमानि, तत्र न ज्ञायते कियता देशेनोनानि ? तत आह—पल्योपमस्यासङ्ख्येयभागेनोनानि, उत्कर्षतः परिपूर्णानि त्रीणि पल्योपमानि ।। 'ते णं भंते' इत्यादि, ते उत्तरकुरुवास्तव्या भदन्त ! मनुजाः कालमासे 'कालं' मरणं कृत्वा क गच्छन्ति ?, एतदेव व्याचष्टे—कोत्पद्यन्ते ? इति, भगवानाह—गौतम ! ते मनुजाः षण्मासावशेषायुषः कृतपरभवायुर्बन्धाः स्वकाले युगलं प्रसूवते, प्रसूय एकोनपञ्चाशतं रात्रिन्दिवानि तद् युगलमनुपालयन्ति, अनुपाल्य काशित्वा क्षुत्वा जृम्भयित्वा 'अक्लिष्टाः' स्वशरीरी यक्लेशरहिताः 'अव्यथिताः' परेणानापादिदुःखाः 'अपरितापिताः' स्वतः परतो वाऽनुपजातकायमनःपरितापाः कालमासे कालं कृत्वा 'देवलोकेषु' भवनपत्याद्याश्रयेषूत्पद्यन्ते, 'देवलोगपरिग्गहिया ण'मिति देवलोको—भवनपत्याद्याश्रयरूपस्तथाक्षेत्रस्वाभाव्यात्तद्याव्यायुर्बन्धनेन परिगृहीतो यैस्ते देवलोकपरिगृहीताः, निष्ठान्तस्य परनिपातः सुखादिदर्शनात्, णमिति वाक्यालङ्कारे,

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ते मनुजा प्रज्ञप्ता हे श्रमण ! हे आयुष्मन् ! ।

'उत्तरकुराए णं भंते' इत्यादि, उत्तरकुरुषु कुरुषु भदन्त ! 'कतिविधाः' जातिभेदेन कति प्रकारा मनुष्याः 'अनुसजन्ति ?' सन्तानेनानुवर्त्तन्ते, भगवानाह–गौतम ! षड्विधा मनुजा अनुसजन्ति, तद्यथा–पद्मगन्धा इत्यादि, जातिवाचका इमे शब्दाः । अत्र तिनेयजनानुग्रहायोत्तर-कुरुविषयसूत्रसङ्कलनार्थं सङ्ग्रहणिगाथात्रयमाह–

॥ १ ॥ उसुजीवाधणुपट्ठं भूमी गुम्मा य हेरुउद्दाला ।
तिलगलयावणराई रुक्खा मणुया य आहारे ॥

॥ २ ॥ गेहा गामा य असी हिरण्ण राया दास माया य ।
आहोरिए य मित्ते विवाहमहनट्टसगडा य ॥

॥ ३ ॥ आसा गावो सीहा साली खाणू य गड्डदंसाही ।
गहजुद्धरोगावइ उवट्टणा य अणुसज्जया चेव ॥

अस्य व्याख्या–प्रथममुत्तरकुरुविषयमिषुजीवाधनुःपृष्ठप्रतिपादकं सूत्रं, तदनन्तरं भूमिरिति भूमिविषयं सूत्रं, ततो 'गुम्मा' इति गुल्मविषयं, तदनन्तरं हेरुतालवनविषयं, ततः 'उद्दाला' इति उद्दालादिविषयं, तदनन्तरं 'तिलग' इति तिलकपदेपलक्षितं, ततो लताविषयं, तदनन्तरं वनराजीविषयं, ततः 'रुक्खा' इति दशविधकल्पपादपविषया दश सूत्रदण्डकाः, 'मणुया य' इति त्रयो मनुष्यविषयाः सूत्रदण्डकास्तद्यथा–आद्यः पुरुषविषयो द्वितीयः स्त्रीविषयस्तृतीयः समान्यत उभयविषय इति, ततः 'आहारे' इति आहारविषयः, तदनन्तरं 'गेहा' इति गृहविषयौ द्वौ दण्डकौ, आद्यो गृहाकारवृक्षाभिधायी अपरो गेहाद्यभावविषय इति, ततः 'गामा' इति ग्रामाद्यभावः, तदनन्तरमसीति अस्याद्यभावविषयः, ततो हिरण्यादिविधवः । तदनन्तरं राजाद्यभावविषयः, ततो दासाद्यभावविषयः, ततो मात्रादिविषयः, तदनन्तर-मरिवैरिप्रभृतिप्रतिषेधविषयः, तदनन्तरं मित्राद्यभावविषयः, तदनन्तरं विवाहपदोपलक्षित- स्तत्प्रतिषेधविषयः, तदनन्तरं महप्रतिषेध-विषयः, ततो नृत्यपदोपलक्षितः प्रेक्षाप्रतिषेधविषयः, तद० शकटादिप्रतिषेधविषयः, ततोऽश्वा-दिपरिभोगप्रतिषेधविषयः, तद०स्त्रीगव्यादिप- रिभोगप्रतिषेदविषयः ।

–ततः सिंहादिश्वापदविषयः, तदनन्तरं शाल्याद्युपभोगप्रतिषेधविषयः, ततः स्थाण्वादिप्रति- षेधविषयः, तदनन्तरं गर्त्तादिप्रतिषेधविषयः, ततो दंशाद्यभावविषयः, ततोऽह्यादिविषयः, तदनन्तरं 'गह' इति ग्रहदण्डादिविषयः, ततः 'जुद्ध' इति युद्धपदोपलक्षितो डिम्बादिप्रतिषेधविषयः सूत्रदण्डकः, ततो रोग इति रोगपदोपलक्षितो दुर्भूतादिप्रतिषेधविषयः, तदनन्तरं स्थितसूत्रं, ततोऽनुषजनसूत्रमिति । सम्प्रत्युत्तरकुरुभावियमकपर्वतवक्तव्यतामाह–

–: यमक–पर्वताधिकार :–

मू. (१८६) कहि णं भंते ! उत्तरकुराए कुराए जमगा नामं दुवे पव्वता पन्नत्ता ? गोयमा नीलवंतस्स वासधरपव्वयस्स दाहिणेणं अट्ठचोत्तीसे जोयणसते चत्तारि य सत्तभागे जोयणस्स अबाधाए सीताए महानईए (पुव्वपच्छिमेणं) उभओ कूले ।

इत्थ णं उत्तर कुराए जमगा नामं दुवे पव्वता पन्नत्ता एगमेगं जोयणसहस्सं उड्ढं उच्चत्तेणं अड्ढाइज्जाइं जोयणसताणि उव्वेहेणं मूले एगमेगं जोयणसहस्सं जोयणसहस्सं आयामविक्खंभेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मज्झे अद्धट्ठमाइं जोयणसताइं आयामविक्खंभेणं उवरिं पंचजोयणसयाइं आयामविक्खंभेणं मूले तिन्नि जोयणसहस्साइं एगं च बावट्ठिं जोयणसतं किंचिविसेसाहियं परिक्खेवेणं मज्झे दो जोयणसहस्साइं तिन्नि य बावत्तरे जोयणसते किंचिविसेसाहिए परिक्खेवेणं पन्नत्ते उवरिं पन्नरसं एक्कसीते जोयणसते किंचिविसेसाहिए परिक्खेवेणं पन्नत्ते, मूले विच्छिन्ना मज्झे संखित्ता उप्पिं तणुया गोपुच्छसंठाणसंठिता सव्वकणगमया अच्छा सण्हा जाव पडिरूवा पत्तेयं २ पउमवरवेइया-परिक्खित्ता पत्तेयं २ वनसंडपरिक्खित्ता, वण्णओ दोण्हवि, तेसि णं जमगपव्वयाणं उप्पिं बहुसमरमणिज्जे भूमिभागे पन्नत्ते वण्णओ जाव आसयंति० ।

तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं २ पासायवडेंसगा पन्नत्ता, ते णं पासायवडेंसगा बावट्ठिं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं एकत्तीसं जोयणाइं कोसं च विक्खंभेणं अब्भुग्गतमूसिता वण्णओ भूमिभागा उल्लोता दो जोयणाइं मणिपेढियाओ वरसीहासणाा सपरिवारा जाव जमगा चिट्ठंति । से केणट्ठेणं भंते ! एवं वुच्चति जमगा पव्वता ? २, गो० ! जमगेसु णं पव्वतेसु तत्थ तत्थ देसे तहिं तहिं बहुइओ खुड्डाखुड्डियाओ वावीओ जाव बिलपंतिताओ, तासु णं खुड्डाखुड्डियासु जाव बिलपंतियासु बहूइं उप्पलाइं २ जाव सतसहस्सपत्ताइं जमगप्पमाइं जमगवण्णाइं, जमगा य एत्थ दो देवा महिड्ढीया जाव पलिओवमट्ठितीया परिवसंति, ते णं तत्थ पत्तेयं पत्तेयं चउण्हं सामानियसाहस्सीणं जाव जमगाण पव्वयाणं जमगाण य रायधाणीणं अन्नेसिं च बहूणं वाणमंत- राणं देवाण य देवीण य आहेवच्चं जाव पालेमाणा विहरंति । से तेणट्ठेणं० एवं० जमगपव्वया २, अदुत्तरं च णं गोयमा ! जाव निच्चा ।

कहि णं भंते ! जमगाणं देवाणं जमगाओ नाम रायहाणीओ पन्नत्ताओ ?, गोयमा ! जमगाणं पव्वयाणं उत्तरेणं तिरियमसंखेज्जे दीवसमुद्दे वीइवतित्ता अण्णंमि जंबूद्दीवे २ बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं जमगां देवाणं जमगाओ नाम रायहाणीओ पन्नत्ताओ बारसजोयणसहस्स जहा विजयस्स जाव महिड्ढिया जमगा देवा जमगा देवा ॥

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! उत्तरकुरुषु कुरुषु यमकौ नाम द्वौ पर्वतौ प्रज्ञप्तौ ?, भगवानाह—गौतम ! नीलवतो वर्षधरपर्वतस्य दाक्षिणात्यच्चरमान्तात्—चरमरूपात्पर्यन्ता-दर्वा योजन शतानि चतुस्त्रिंशदधिकानि चतुरश्च योजनस्य सप्तभागान् अबाधया कृत्वा—अपान्तराले मुक्त्वेति भावः,अत्रान्तरे शीताया महानद्याः 'पूर्वपश्चिमेन' पूर्वपश्चियोर्दिशोरुभयोः कूलयोः 'अत्र' एतस्मिन् प्रदेशे यमकौ नाम द्वौ पर्वतौ प्रज्ञप्तौ, तद्यथा—एकः पूर्वकुले एकः पश्चिमकूले, प्रत्येकं चैकं योजनसहस्रमुच्चैस्त्वेन, अर्द्धतृतीयानि योजनशान्युद्वेधेन—अवगाहेन, मेरुव्यतिरेकेण शेषशाश्वतपर्वतानां सर्वेषामविशेषेणोच्चैस्त्वापेक्षया चतुर्भागस्यावगाहनाभावात् ।

मूले एकयोजनसहस्रं विष्कम्भतः मध्येऽर्द्धाष्टमानि योजनशतानि उपरि पञ्च योजनशतानि मूले त्रीणि योजनसहस्राणि एकं च द्वाषष्टं—द्वाषष्ट्यधिकं योजनशतं किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्तौ मध्ये द्वे योजनसहस्रे त्रीणि योजनशतानि द्वासप्ततानि-द्वासप्तत्यधिकानि किञ्चिद्विशेषाधिकानि परिक्षेपेण, एवं च तौ मूले विस्तीर्णौ मध्ये सङ्क्षिप्तौ उपरि च तनुकावत एव गोपुच्छसंस्थानसंस्थितौ

'सव्वकणगमया' इति सर्वात्मना कनकमयौ 'अच्छा जाव पडिरूवा' इति प्राग्वत्, तौ च प्रत्येकं प्रत्येकं पद्मवरवेदिकया परिक्षिप्तौ प्रत्येकं २ वनखण्डपरिक्षिप्तौ, पद्मवरवेदिकावर्णको

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वनखण्डवर्णकश्च जगत्युपरिपद्मवरवेदिकावनषण्डवर्णकवद् वक्तव्यः।

'तेसि णं जमगपव्वयाण'मित्यादि, यमकपर्वतयोरुपरि प्रत्येकं बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, भूमिभागवर्णनं 'से जहानामए आलिंगपुक्खरेइ वा' इत्यादि प्राग्वत्तावद्वक्तव्यं यावद् 'वाणमंतरा देवाय देवीओ यआ सयंति सयंति जाव पच्चणुभवमाणा विहरंति' ॥ 'तेसि ण'मित्यादि, तयोर्बहुसमरमणीययोर्भूमिभागयोर्बहुमध्यदेशभागे प्रत्येकं प्रत्येकं प्रासादावतंसकः प्रज्ञप्तः, तौ च प्रासादावतंसकौ द्वाषष्टिर्योजनान्यर्द्धयोजनं चोर्द्धमुच्चैस्त्वेन, एकत्रिंशद् योजनानि क्रोशं चैकं विष्कम्भेन, 'अब्भुग्गयमूसियपहसिया इवेत्यादि यावत् पडिरूवा' इति प्रासादावतंसकवर्णन-मुल्लोचवर्णनं भूमिभागवर्णनं मणिपीठिकावर्णनं सिंहासनवर्णनं विजयदूष्यवर्णनमङ्कुशवर्णनं दामवर्णनं च निरवशेषं प्राग्वद्वक्तव्यं, नवरमत्र मणिपीठिकायाः प्रमाणमायामविष्कम्भ्याभ्यां द्वे योजने, बाहल्येनैकं योजनं, शेषं तथैव।

'तेसि णं सिंहासणाण'मित्यादि, तयोः सिंहासनयोः प्रत्येकम् 'अवरुत्तरेण' ति अपरत्तरस्यां वायव्यामित्यर्थ उत्तरस्यामुत्तरपूर्वस्यां च दिशि, अ एतासु तिसृषु दिक्षु 'यमकयोः' यमक-नाम्नोर्यमकपर्वतस्वामिनोर्देवयोः प्रत्येकं प्रत्येकं चतुर्णां सामानिकसहस्राणां योग्यानि चत्वारि भद्रासनसहस्राणि प्रज्ञप्तानि, एवमनेन क्रमेण सिंहासनपरिवारो वक्तव्यो यथा प्राग्विजयदेवस्य 'तेसि ण'मित्यादि, तयोः प्रासादावतंसकयोः प्रत्येकमुपर्यष्टावष्टौ मङ्गलकानि प्रज्ञप्तानि इत्याद्यपि प्राग्वत्तावद्वक्तव्यं यावत् 'सयसहस्सपत्तगा' इतिपदम्।

सम्प्रति नामनिबन्धनं पिपृच्छिषुरिदमाह—अथ 'केनार्थेन' केन कारणेन एवमुच्यते—यमकपर्वतौ यमकपर्वतौ ? इति, भगवानाह—गौतम ! यमकपर्वतयोः णमिति वाक्यालङ्कारे क्षुल्लकक्षुल्लिकासु वापीपुष्करिणीषु यावद्विबलहङ्क्तिषु बहूनि यावत्सहस्रपत्राणि 'यमकप्रभाणि' यमका नाम—शकुनिविशेषास्तत्प्रभानि—तदाकाराणि, एतदेव व्याचष्टे—यमकवर्णाभानि यमकवर्णसदृशवर्णानीत्यर्थः। 'यमकौ च' यमकनामानौ च तत्र—तयोर्यमकपर्वतयोः स्वामित्वेन द्वौ देवौ महर्द्धिकौ यावन्महाभागौ पल्योपमस्थितिकौ परिवसतः, तौ च तत्र प्रत्येकं चतुर्णां सामानिकसहस्राणां चतसृणामग्रमहिषीणां सपरिवाराणां तिसृणामभयन्तरमध्यमबाह्यरूपाणां यथासङ्ख्यमष्टदश- द्वादशदेवसहस्रसङ्ख्याकानां पर्षदां सप्तानामनीकानां सप्तानामनीकाधिपतीनां षोडशानामा- त्मरक्षदेवसहस्राणां 'जमगपव्वयाणं जमगाण य रायहाणीण'मिति स्वस्य स्वस्य यमकपर्वतस्य स्वस्य स्वस्य यमिकाभिधाया राजधान्या अन्येषां च बहूनां वाणमन्तराणां देवानां देवीनां च स्वस्वयमिकाभिधराजधानीवास्तव्यानामाधिपत्यं यावद्विहरतः, यावत्करणात् 'पोरेवच्चं सामित्तं भट्टित्त'मित्यादिपरिग्रहः, ततो यमकाकारयमकवर्णोत्पलादियोगाद्यमकाभिधदेवस्वामि-कत्वाच्च तौ यमकपर्वतावित्युच्येते, तथा चाह।

'से एणट्ठेण'मित्यादि ॥ सम्प्रति यमिकाभिधराजधानीस्थानं पृच्छति—'कहि णं भंते' इत्यादि, क्व भदन्त ! यमकयोर्देवयोः सम्बन्धिन्यौ यमिके नाम राजधान्यौ प्रज्ञप्ते ?, भगवानाह—गौतम ! यमकपर्वतयोरुत्तरतोऽन्यस्मिन्नसङ्ख्येयतमे जम्बूद्वीपे द्वीपे द्वादश योजनसहस्राणि अवगा-ह्यात्रान्तरे यमकयोर्देवयोः सम्बन्धिन्यौ यमिके नाम राजधान्यौ प्रज्ञप्ते, द्वे चाविशेषेण विजयराजधानीसदृशे वक्तव्ये। सम्प्रति हृदवक्तव्यतामभिधित्सुराह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-: "द्रह" अधिकार :-

मू. (१८७) *कहि णं भंते ! उत्तकुराए २ नीलवंतद्दहेणामं दहे पन्नत्ते ?, गोयमा ! जमगपव्वयाणं दाहिणेणं अट्ठचोत्तीसे सजोयणसते चत्तारि सत्तभागा जोयणस्स अबाहाए सीताए महानईए बहुमज्झदेसभाए, एत्थ णं उत्तरकुराए २ नीलवंतद्दहे नामं दहे पन्नत्ते।*

उत्तरदक्खिणायए पाईणपडीणविच्छिन्ने एगं जोयणसहस्सं आयामेणं पंच जोयणसत्ताइं विक्खंभेणं दस जोयणाइं उव्वेहेणं अच्छे सण्हे रयतामतकूले चउक्कोणे समतीरे जाव पडिरूवे उभओ पसिं दोहि य पउमवरवेइयाहिं वनसंडेहिं सव्वतो समंता संपरिक्खित्ते दोण्हवि वण्णओ

नीलवंतदहस्स णं दहस्स तत्थ २ जाव बहवे तिसोवाणपडिरूवगा पन्नत्ता, वण्णओ भाणियव्वो जाव तोरणत्ति ॥ तस्स णं नीलवंतद्दहस्स णं दहस्स बहुमज्झदेसभाए एत्थ णं एगे महं पउमे पन्नत्ते, जोयणं आयामविक्खंभेणं तं तिगुणं सविसेसं परिक्खेवेणं अद्धजोयणं बाहल्लेणं दस जोयणाइं उव्वेहेण दो कोसे ऊसिते जलंतातो सातिरेगाइं दसद्धजोयणाइं सव्वग्गेणं प०

तस्स णं पउमस्स अयमेयारूवे वण्णावासे पन्नत्ते, तंजहा–वइरामता मूला रिट्ठामते कंदे वेरुलियामए नाले वेरुलियामता बाहिरपत्ता जंबूनयमया अब्भिंतरपत्ता तवणिज्जमया केसरा कणगामई कण्णिया नानामणिमया पुक्खरत्थिभुता ॥ सा णं कण्णिया अद्धजोयणं आयाम-विक्खंभेणं, तं तिगुणं सविसेसं परिक्खेवेणं कोसं बाहल्लेणं सव्वप्पणा कणगमई अच्छा सण्हा जाव पडिरूवा ॥ तीसे णं कण्णियाए उवरिं बहुसमरमणिज्जे देसभाए पन्नत्ते जाव मणीहिं।

तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगे महं भवणे पन्नत्ते, कोसं आयामेणं अद्धकोसं विक्खंभेणं देसूणं कोसं उड्ढं उच्चत्तेमं अनेगखंभसतसंनिविट्ठं जाव वण्णओ, तस्स णं भवणस्स तिदिसिं ततो दारा पन्नत्ता पुरत्थिमेणं दाहिणेणं उत्तरेणं, ते णं दारा पंचधणुसयाइं उड्ढं उच्चत्तेणं अड्ढाइज्जाइं धनुसताइं विक्खंभेणं तावतियं चेव पवेसेणं सेया वरकणगथूभियागा जाव वनमालाउत्ति ॥ तस्स णं भवणस्स अंतो बहुसमरमणिज्जे भूमिभागे पण्णत्ते से जहा नामए–आलिंगपुक्खरेति वा जाव मणीणं वण्णओ।

तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं मणिपेढिया पन्नत्ता, पंचधनुसयाइं आयामविक्खंभेणं अड्ढाइज्जाइं धनुसताइं बाहल्लेणं सव्वमणिमई।

तीसे णं मणिपेढियाए उवरि एत्थ णं एगे महं देवसयणिज्जे पन्नत्ते, देवसयणिज्जस्स वण्णओ से णं पउमे अन्नेणं अट्ठसतेणं तदद्धुच्चत्तप्पमाणमेत्ताणं पउमाणं सव्वतो समंता संपरिक्खित्ते ॥ ते णं पउमा अद्धजोयणं आयामविक्खंबेणं तं तिगुणं सविसेसं परिक्खेवेणं कोसं बाहल्लेणं दस जोयणाइं उव्वेहेणं कोसं ऊसिया जलंताओ साइरेगाइं ते दस जोयणाइं सव्वग्गेणं पन्नत्ताइं।

तेसि णं पउमाणं उयमेयारूवे वण्णावासे पन्नत्ते, तंजहा–वइरामया मूला जाव नानामणिमया पुक्खरत्थिभुगा ॥ ताओ णं कण्णियाओ कोसं आयामविक्खंभेणं तं तिगुणं स० परि० अद्धकोसं बाहल्लेमं सव्वकणगामईओ अच्छाओ जाव पडिरूवाओ ॥ तासि णं कण्णियाणं उप्पिं बहुसमरमणिज्जा भूमिभागा जाव मणीणं वण्णो गंधो फासो। तस्स णं पउमस्स अवरुत्तरेणं उत्तरेणं उत्तरपुरच्छिमेणं नीलवंतद्दहस्स कुमारस्स चउण्हं सामानियसाहस्सीणं चत्तारि पउमसाहस्सीओ पन्नत्ताओ, एवं सव्वो परिवारो नवरि पउमाणं भाणितव्वो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से णं पउमे अन्नेहिं तिहिं पउमवरपरिक्खेवेहिं सव्वतो समंता सपरिक्खित्ते, तंजहा–अब्भिंतरेणं मज्झिमेणं बाहिरएणं, अब्भिंतरएणं पउमपरिक्खेवे बत्तीसं पउमसयसाहस्सीओ प०, मज्झिमए णं पउमपरिक्खेवे चत्तालीसं पउमसयसाहस्सीओ पं० बाहिरए णं पउमपरिक्खेवे अडयालीसं पउमसयसाहस्सीओ पण्णत्ताओ, एवामेव सपुव्वावरेणं एगा पउमकोडी वीसं च पउमसतसहस्सा भवंतीति मक्खाया। से केणट्ठेणं भंते! एवं वुच्चति–नीलवंतद्दहे दहे?, गोयमा! नीलवंतद्दहे णं तत्थ तत्थ जाइं उप्पलाइं जाव सतहस्सपत्ताइं नीलवंतप्पभातिं नीलवंतद्दहकुमारे य० सो चेव गमो जाव नीलवंतदहे २॥

वृ. 'कहि णं भंते!' इत्यादि, क्व भदन्त! उत्तरकुरुषु कुरुषुनीलवदहदो नाम ह्रदः प्रज्ञप्तः?, भगवानाह–गौतम! यमकपर्वतयोर्दक्षिणाच्चरमान्तादर्वाग् दक्षिणाभिमुखमष्टौ 'चतुस्त्रिंशानि' चतुस्त्रिंशदधिकानि योजनशतानि चतुरश्च सप्तभागान् योजनस्याबाधया कृत्वेति गम्यते अपान्तराले मुक्त्वेति भावः, अत्रान्तरे शीताया महानद्या बहुमध्यदेशभागे 'एत्थ णं'ति एतस्मिन्नवकाशे उत्तरकुरुषु कुरुषु नीलवदहदो नाम हदः प्रज्ञप्तः, स च किंविशिष्टः? इत्याह–

उत्तरदक्षिणायतः प्राचीनापाचीनविस्तीर्ण, एकं योजनसहस्रमायामेन, पञ्च योजनशतानि विष्कम्भतः, दश योजनान्युद्वेधेन–उण्डत्वेन, 'अच्छः' स्फटिकवद्बहिर्निर्मलप्रदेशः 'श्लक्ष्णः' श्लक्ष्णपुद्लनिर्मापितबहिप्रदेशः, तता रजतमयं–रूप्यमयं कूलं यस्यासौ रजतमयकूलः, इत्यादि विशेषणकदम्बकं जगत्युपरिवाप्यादिवत्तावद्वक्तव्यं यावदिदं पर्यन्तपदं 'पडिहत्थभमंतमच्छकच्छपअनेगसउणमिहुणपरियरिए' इति।

'उभओपासे' इत्यादि, स च नीलवन्नामा हदः शीताया महानद्या उभयोः पार्श्वयोर्बहिर्विनिर्गतः, स तथाभूतः सन्नुभयोः पार्श्वयोर्द्वाभ्यां पद्मवरवेदिकाभ्याम्, एकस्मिन् पार्श्वे एकया पद्मवरवेदिकया द्वितीये पार्श्वे द्वितीयया पद्मवरवेदिकयेत्यर्थः, एवं द्वाभ्यां वनषण्डाभ्यां 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तः, पद्मवरवेदिकावनषण्डवर्णकश्च प्राग्वत्।

'नीलवंतदहस्स णं दहस्स तत्थ तत्थे'त्यादि, नीलवदहदस्य णमिति वाक्यालङ्कारे तत्र तत्र देश तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहूनि त्रिसोपानप्रतिरूपकाणि–प्रतिविशिष्टरूपकाणि त्रिसोपानानि प्रज्ञप्तानि, वर्णकस्तेषां प्राग्वद्वक्तव्यः॥

'तेसि ण'मित्यादि, तेषां च त्रिसोपानप्रतिरूपकाणां पुरतः प्रत्येकं प्रत्येकं तोरणं प्रज्ञप्तं, 'ते णं तोरणा' इत्यादि तोरणवर्णनं पूर्ववत्तावद्वक्तव्यं यावत् 'बहवो सयसहस्सपत्तहत्थगा' इति पदम्।

'तस्स ण'मित्यादि, तस्य नीलवन्नाम्नो ह्रदस्य बहुमध्यदेशभागे, अत्र महदेकं पद्मं प्रज्ञप्तं योजनमायामतो विष्कम्भतश्चार्द्धयोजनं बाहल्येन दश योजनानि 'उव्वेधेन' उण्डत्वेन जलपर्यन्ताद् द्वौ क्रशौ उच्छ्रितं सर्वाग्रेण सातिरेकाणि दश योजनशतानि प्रज्ञप्तानि।

'तस्स ण'मित्यादि, तस्य पद्मस्य 'अयं' वक्ष्यमाणः 'एतद्रूपः' अनन्तरमेव वक्ष्यमाणस्वरूपः 'वर्णावासः' वर्णकनिवेशः प्रज्ञप्तः, तद्यथा–वज्रमयं मूलं रिष्ठरत्नमयः कन्दो वैडूर्यरत्नमयो नालः, वैडूर्यरत्नमयानि बाह्यपत्राणि, जाम्बूनदमयान्यभ्यन्तरपत्राणि, तपनीयमयानि केसराणि, कनकमयी पुष्करकर्णिका, नानामणिमयी पुष्करस्थिबुका॥ 'सा ण कण्णिया अद्ध'मित्यादि, सा कर्णिकाऽर्द्धयोजनमायामविष्कम्भाभ्यां क्रोशमेकं बाहल्यतः सर्वात्मना कनकमयी अच्छा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत्प्रतिरूपा, यावत्करणात् 'सण्हा लण्हा घट्ठा मट्ठा नीरया' इत्यादि परिग्रहः ।

'तीसे णं कण्णियाए' इत्यादि, तस्याः कर्णिकाया उपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, तद्वर्णनं च 'से जहानामए आलिंगपुक्खरेइ वे' त्यादिना ग्रन्थेन विजयराजधान्या उपकारिकालयनस्येव तावद्वक्तव्यं यावन्मणीनां स्पर्शवक्तव्यतापरिसपमाप्ति ।। 'तस्स ण'मित्यादि, तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र महदेकं भवनं प्रज्ञप्तं क्रोशमायामतोऽर्द्धक्रशं विष्कम्भतो देशोनं क्रोशमूर्द्धमुच्चैस्त्वेन, अनेकस्तम्भशतसन्निविष्टत्यादि तद्वर्णनं विजयराजधानीगतसुधर्म्म- सभाया इव तावद्वक्तव्यं यावदिदं सूत्रं 'दिव्वतुडिय०' इति, तदनन्तरं सूत्रमाह— सव्वरयणामए' इत्यादि सर्वात्मना रत्नमयम् अच्छं यावत्प्रतिरूपं, यावत्करणात् सण्ह लण्हे घट्ठे मट्ठे' इत्यादिपरिग्रहः । तस्स णमित्यादि तस्य भवनस्य 'त्रिदिशि' तिसृषु दिक्षु एकैकस्यां दिशि एकैकद्वारभावेन त्रीणि द्वाराणि प्रज्ञप्तानि, तद्यथा—पूर्वस्यामुत्तरस्यां दक्षिणस्याम् ।

'ते णं दारा' इत्यादि, तानि द्वाराणि पञ्चधनुःशतानि ऊर्द्धमुच्चैस्त्वेन, अर्द्धतृतीयानि धनुःशतानि विष्कम्भेन, तावदेव—अर्द्धतृतीयान्येव धनुःशतानीति भावः प्रवेशेन । 'सेयावरकणगथूभिया' इत्यादि द्वारवर्णनं विजयद्वारस्येव तावदविशेषेणावसातव्यं यावत् 'वनमालाओ' इति वनमालावक्तव्यतापरिसमाप्ति ।। 'तस्स ण'मित्यादि, तस्य भवनस्य उल्लोचोऽन्तर्बहुसमरमणीयो भूमिभागो मणीनां वर्णगन्धरसस्पर्शवर्णनं प्राग्वत् ।

'तस्स ण'मित्यादि, तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे मणिपीठका प्रज्ञप्ता, पञ्चधनुःशतान्यायामविष्कम्भाभ्यां अर्द्धतृतीयानि धनुःशतानि बाहल्येन सर्वात्मना मणिमयी अच्छा यावत्प्रतिरूपा इति प्राग्वत् ।। 'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपर्यत्र महदेकं देवशयनीयं प्रज्ञप्तं, शयनीयवर्णकः प्राग्वत् । 'तस्सण'मित्यादि, तस्य भवनस्य उपर्यष्टावष्टौ स्वस्तिकादीनि मङ्गलकानीत्यादि पूर्ववत्तावद्वक्तव्यं यावद्बहवः सहस्रपत्रहस्तका इति ।

'सेण'मित्यादि, तत्पद्ममन्येनाष्टशतेन पद्मानां तदर्द्धोच्चत्वप्रमाणमात्राणां—तस्य मूलपद्मप्रमामस्यार्द्ध तदर्द्ध तच्च तद् उच्चत्वप्रमाणं च तदर्द्धोच्चत्वप्रमाणं तत् मात्रा येषां ते तानि तथा तेषां 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तं । तदर्द्धोच्चत्वप्रमाणमेव तेषां भावयति— 'ते णं पउमा' इत्यादि, तानि पद्मानि प्रत्येकमर्द्धयोजनमायामविष्कम्भाभ्यां क्रोशमेकं बाहल्येन दश योजनशतानि उद्वेधेन क्रोशमेकं जलपर्यन्तादुच्छ्रितं सातिरेकाणि दश योजनशतानि सर्वाग्रेण ।। 'तेसि ण'मित्यादि, तेषां पद्मानामयमेतद्रूपो वर्णावासः प्रज्ञप्त, वज्रमयानि मूलानि रिष्ठरत्नमयाः कन्दा वैडूर्यरत्नमया नालाः तपनीयमयानि बाह्यपत्राणि जाम्बूनदमयानि अभ्यन्तरपत्राणि तपनीयमयानि केशराणि कनकमय्यः कर्णिकः नानामणिमयाः पुष्करस्थिभुगाः

'ताओ णं कण्णियाओ' इत्यादि, ताः कर्णिकाः क्रोशमायामविष्कम्भाभ्यामर्द्धक्रोशं बाहल्येन सर्वात्मना कनकमय्यः 'अच्छाओ जाव पडिरूवाओ' इति प्राग्वत् ।। 'तासि णं कण्णियाण'मित्यादि, तासां कर्णिकानामुपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, तस्य वर्णकः पूर्ववत्तावद्वक्तव्यो यावन्मणीनां स्पर्श ।। 'तस्स ण'मित्यादि, तस्य मूलभूतपद्मस्य 'उपरोत्तरेण' अपरोत्तरस्यां, एवमुत्तरस्यामुत्तरपूर्वस्यां, सर्वसङ्कलनया तिसृषु दिक्षु अत्र नीलवतो नागकुमारेन्द्रस्य नागकुमारराजस्य चतुर्णा सामानिकसहस्राणां योग्यानि चत्वारि पद्मसहस्राणि प्रज्ञप्तानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एतेण'मित्यादि, एतेनानन्तरोदितेनाभिलापेन यथा विजयस्य सिंहासनपरिवारोऽभिहितस्तथेहापि पद्मपरिवारो वक्तव्यः, तद्यथा—पूर्वस्यां दिशि चतसृणामग्रमहिषीणां योग्यानि चत्वारि महापद्मानि, दक्षिणपूर्वस्यामभ्यन्तरपर्षदोऽष्टनां देवसहस्राणां योग्यान्यष्टौ पद्मसहस्राणि, दक्षिणस्यां मध्यमपर्षदो दशानां देवसहस्राणां योग्यानि दश पद्मसहस्राणि, दक्षिणापरस्यां बाह्यपर्षदो द्वादशानां देवसहस्राणां द्वादश पद्मसहस्रणि, पश्चिमायां सप्तानामनीकाधिपतीनां योग्यानि सप्त महापद्मानि प्रज्ञप्तानि, तदनन्तरं तस्य द्वितीयस्य पद्मपरिवेषस्य पृष्ठतश्चतसृषु दिक्षु षोडशानामात्मरक्षकदेवसहस्राणां योग्यानि षोडश पद्मसहस्राणि प्रज्ञप्तानि, तद्यथा—चत्वारि पद्मसहस्राणि पूर्वस्यां दिशि चत्वारि पद्मसहस्रणि दक्षिणस्यां चत्वारि पद्मसहस्राणि पश्चिमायां चत्वारि पद्मसहस्राण्युत्तरस्यामिति ।

तदेवं मूलपद्मस्य त्रयः पद्मपरिवेषा अभूवन्, अन्येऽपि च त्रयो विद्यन्त इति तत्प्रतिपादनार्थमाह—'से णं पउमे' इत्यादि, तत् पद्ममन्यैरनन्तरोक्तपरिक्षेपत्रिकव्यतिरिक्तैस्त्रिभिः पद्मपरिवेषैः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तं, तद्यथा—अभ्यन्तरेण मध्यमेन बाह्येन च, तत्राभ्यन्तरे पद्मपरिक्षेपे सर्वसङ्ख्यया द्वात्रिंशत्पद्मशतसहस्राणि प्रज्ञप्तानि मध्ये पद्मपरिक्षेपे चत्वारिंशत् शतसहस्राणि बाह्ये पद्मपरिक्षपेऽष्टचत्वारिंशत्प- द्मशतसहस्राणि प्रज्ञप्तानि । 'एवमेव' अनेनैव प्रकारेण 'सपुव्वावरेणं'ति सह पूर्वं यस्य येन वा सपूर्वं सपूर्वं च तद् अपरं च सपूर्वापरं तेन, पूर्वापरसमुदायेनेत्यर्थः, एका पद्मकोटी विंशतिश्च पद्मशतसहस्राणि भवन्तीत्याख्यातं मया शेषैश्च तीर्थकृद्भिः, एतेन सर्वतीर्थकृताम- विसंवादिवचनतामाह, कोटयादिका च सङ्ख्या स्वयं मीलनीया, द्वात्रिंशदादिशतसहस्राणामेकत्र मीलने यथोक्तसङ्ख्याया अवश्यं भावात् ।

सम्प्रति नामान्वर्थं पिपृच्छिषुराह—'से केणट्ठेणं भंते !' इत्यादि, अथ केनार्थेनैवमुच्यते नीलवद्द्रहो नीलवद्द्रहः ? इति, भगवानाह—गौतम ! नीलवदहदे तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहूनि 'उत्पलानि' पद्मानि यावत्सहस्रपत्राणि नीलवद्ध्रदप्रमाणि—नीलवन्नाम हदाकाराणि 'नीलद्वर्णानि' नीलवन्नामवर्षधरप- र्वतस्तद्वर्णानि नीलानीति भावः, नीलवन्नामा च नागकुमारेन्द्रो नागकुमारराजो महर्द्धिक इत्यादि यमकदेववन्निरवशेषं वक्तव्यं यावद्विहरति, ततो यस्मात्तद्गतानि पद्मानि नीलवद्वर्णानि नीलवन्नामा च तदधिपतिर्देवस्ततस्तद्योगादसौ नीलवन्नामा हदः, तथा चाह—'से एएणट्ठेण'मित्यादि

'कहि णं भंते ! नीलवंतदहस्से'त्यादि राजधानीविषयं सूत्रं समस्तमपि प्राग्वत् ॥

मू. (१८८) कहि णं भंते नीलवंतस्स नागुकुमारिंदस्स नागकुमाररन्नो नीलवंता नाम रायहाणी नीलवंतद्दहस्सुत्तरेणं अन्नंमि जंबुद्दीवे दीवे बारस जोयण सहस्साहं जहा विजयस्स ।

मू. (१८९) नीवंतद्दहस्स णं पुरत्थिमपच्चत्थिमेणं दस जोयणाइं अबाधाए एत्थ णं दस दस कंचनगपव्वता पन्नत्ता, ते णं कंचनगपव्वता एगमेगं जोयणसतं उड्ढं उच्चत्तेणं पणवीसं २ जोयणाइं उव्वेहेणं मूले एगमेगं जोयणसतं विक्खंभेणं मज्झे पन्नत्तरिं जोयणाइं [आयाम] विक्खंभेणं उवरिं पन्नासं जोयणाइं विक्खंभे मूले तिन्नि सोले जोयणसते किंचिविसेसाहिए परिक्खेवेणं मज्झे दोन्नि सत्ततीसे जोयणसते किंचिविसेसाहिए परिक्खेवेणं उवरिं एगं अट्ठावन्नं जोयणसतं किंचिविसेसाहिए परिक्खेवेणं मूले विच्छिन्ना मज्झे संखित्ता उप्पिं तणुया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोपुच्छसंठाणसंठिता सव्वकंचणमया० अच्छा, पत्तेयं २ पउमवरवेतिया० पत्तेयं २ वनसंडपरिक्खित्ता।

तेसि णं कंचनगपव्वतामं उप्पिं बहुसमरमणिज्जे भूमिभागे जाव आसयंति० तेसि णं० पत्तेयं पत्तेयं पासायवडेंसगा सड्ढबावट्ठिं जोयणाइं उड्ढं उच्चत्तेणं एक्कतीसं जोयमाइं कोसं च विक्खंभेणं मणिपेढिया दोजोयणिया सीहासनं सपरिवारा उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसं च विक्खंभेणं मणिपेढिया दोजोयमिया सीहासणं सपरिवारा।

से केणट्ठेणं भंते! एवं वुच्चति--कंचनगपव्वता कंचनगपव्वता?, गोयमा! कंचनगेसु णं पव्वतेसु तत्थ तत्त वावीसु उप्पालाइं जाव कंचनगवण्णाभातिं कंचणगा जाव देवा महिड्ढीया जाव विहरंति, उत्तरेणं कंचनगाणं कंचणियाओ रायहाणीओ अन्नंमि जंबू० तहेव सव्वं भाणितव्वं

कहि णं भंते! उत्तराए कुराए उत्तरकुरुद्दहे पन्नत्ते?, गोयमा! नीलवंतद्दहस्स दाहिणेणं अट्ठचोत्तीसे जोयणसते, एवं सो चेव गमो नेतव्वो जो णनलवंतद्दहस्स सव्वेसिं सरिसको दहसरिनामा य देवा, सव्वेसिं पुरत्थिमपच्चत्थिमेणं कंचनगपव्वता दस २ एकप्पमाणा उत्तरेणं रायहाणीओ अन्नंमि जंबुद्दीवे। कहि णं भंते! चंदद्दहे एरावणद्दहे मालवंतद्दहे एवं एक्केक्को नेयव्वो॥

वृ. 'नीलवंतदहस्स ण'मित्यादि, नीलवतो ह्रदस्य 'पुरत्थिमपच्चत्थिमेणं' ति पूर्वस्यां पश्चिमायां च दिशि प्रत्येकं दश दश योजनान्यबाधया कृत्वेतिगम्यते, अपान्तराले मुक्त्वेति भावः, दश दश काञ्चनपर्वता दक्षिणोत्तरश्रेण्या प्रज्ञप्ताः, ते च काञ्चनकाः पर्वताः प्रत्येकमेकं योजनशतमूर्द्धमुच्चैस्त्वेन पञ्चविंशतिर्योजनान्युद्वेधेन मूले एकं योजनशतं विष्कम्भेन मध्ये पञ्चसप्ततिर्योजनानि विष्कम्भेन उपरि पञ्चाशद् योजनानि विष्कम्भेन, मूले त्रीणि षोडशोत्तराणि योजनशतानि किञ्चिद्विशेषाधिकानि परिक्षेपेण मध्ये द्वे सप्तविंशे योजनशते किञ्चिद्विशेषोने परिक्षेपेण उपर्येकमष्टापञ्चाशं योजनशतं किञ्चिद्विशेषोनं परिक्षेपेण, अत एव मूले विस्तीर्णा मध्ये सङ्क्षिप्ता उपरि तनुकाः अत एव गोपुच्छसंस्थानसंस्थिताः सर्वात्मना कनकमयाः 'अच्छा जाव पडिरूवा' इति प्राग्वत्। तथा प्रत्येकं प्रत्येकं पद्मवरवेदिकया परिक्षिप्ताः प्रत्येकं प्रत्येकं वनषण्डपरिक्षिप्ताश्च, पद्मवरवेदिकावनषण्डवर्णनं प्राग्वत्॥

'तेसि ण'मित्यादि, तेषां काञ्चनपर्वतानामुपरि बहुसमरमणीया भूमिभागाः प्रज्ञप्ताः, तेषां च वर्णनं प्राग्वत्तावद्वक्तव्यं यावत्तृणानां मणीनां च शब्दवर्णनमिति॥ 'तेसि ण'मित्यादि, तेषां बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं प्रासादावतंसकाः प्रज्ञप्ताः, प्रासादवक्तव्यता यमकपर्वतोपरि प्रासादावतंसकयोरिव निरवशेषा वक्तव्या यावत्सपरिवारसिंहासनवक्तव्यतापरिसमाप्ति॥ सम्प्रति नामान्वर्थं पिपृच्छिषुरिदमाह--'से केणट्ठेण' मित्यादि प्राग्वन्नवरं यस्मादुत्पलादीनि काञ्चनप्रभानि काञ्चननामानश्च देवास्तत्र परिवसन्ति ततः काञ्चनप्रभोत्पलादियोगात् काञ्चनकाभिददेवस्वाभिकत्वाच्च ते काञ्चनका इति, तथा चाह--'से एएणट्ठेण'मित्यादि काञ्चनिकाश्च राजधान्यो यमिकाराजधानीवद् वक्तव्याः।

'कहि णं भंते!' इत्यादि, क्व भदन्त! जम्बूद्वीपे द्वीपे उत्तरकुरुषु कुरुषु उत्तरकुरुह्रदो नाम ह्रदः प्रज्ञप्तः?, भगवानाह--गौतम! नीलवतो ह्रदस्य दाक्षिणात्याच्चरमपर्यन्तादष्टौ 'चतुस्त्रिंशानि' चतुस्त्रिंशदधिकानि योजनशतानि चतुरश्च योजनस्य सप्तभागान् अबाधया कृत्वेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गम्यते सीताया महानद्या बहुमध्यदेशभागे अत्रोत्तरकुरुनामा ह्रदः प्रज्ञप्तः, यथैव प्राग् नीलवतो ह्रदस्यायाम- विष्कम्भोद्वेधपद्मवरवेदिकावनषण्डत्रिसोपानप्रतिरूपकतोरणमूलभूमहापद्माष्ट-शतपद्मपरिवारपद्मशेष- पद्मपरिक्षेपत्रय व्तव्यतोक्ता तथैवेहाप्यन्यूनातिरिक्ता वक्तव्या ॥ नामकरमं पिपृच्छिषुरिदमाह

'से केणट्ठेणं भंते !' इत्यादि प्राग्वन्नवरमत्पलादीनि यस्माद् 'उत्तरकुरुह्रदप्रभाणि' उत्तरकुरुह्रदाकाराणि तेन तानि तदाकारयोगात् उत्तरकुरुनामा च तत्र देवः परिवसति तेन तद्योगाद् ह्रदोऽप्युत्तरकुरु, न चैवमितरेतराश्रयदोषप्रसङ्गः, उभयेषामपि नाम्नामनादिकालं तथा प्रवृत्तेः, एवमन्यत्रापि निर्दोषदा भावनीया, उत्तरकुरुनामा च तत्र देवः परिवसति, तद्वक्तव्यता च नीलवन्नागकुमारवद्वक्तव्या, ततोऽप्यसावुत्तरकुरुरिति, राजधानीवक्तव्यता काञ्चनकपर्वत-वक्तव्यता च राजधानीपर्यवसाना प्राग्वत् ॥ चन्द्रह्रदवक्तव्यतामाह–

'कहि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! उत्तरकुरुह्रदस्य दाक्षिणात्या-च्चरमान्तादर्वाग् दक्षिणस्यां दिशि अष्टौ चतुस्त्रिंशानि योजनशतानि चतुरश्च सप्तभागान् योजनस्याबा-धया कृतवेति शेषः शीताया महानद्या बहुमध्यदेशभागे 'अत्र' अस्मिन्नवकाशे उत्तरकुरुषु कुरुषु चन्द्रह्रदो नाम हदः प्रज्ञप्तः, अस्यापि नीलवद्ह्रदस्येवायामविष्कम्भोद्वेधपद्मवरवेदिकावन-षण्डत्रिसोपानप्रतिरूपकतोरणमूलभूतमहापद्माष्टशतपद्मपरिवारपद्मशेषपद्म पिक्षेपत्रयवक्तव्यता वक्तव्या, नामान्वर्थसूत्रमपि तथैव, नवरं यस्मादुत्पलादीनि 'चन्द्रह्रदप्रभाणि' चन्द्रह्रदाकाराणि चन्द्रवर्णानि चन्द्रनामा च देवस्तत्र परिवसति तस्माच्चन्द्रहदामोत्पलादियोगाच्चन्द्रदेवस्वामिकत्वाच्च चन्द्रह्रद इति, चन्द्राराजधानीवक्तव्यता काञ्चनपर्वतवक्तव्यता च राजधानीपर्यवसाना प्राग्वत् साम्प्रतमैरावतहदवक्तव्यतामाह–

'कहि णं भंते' इत्यादि प्रश्नसूत्रं पाठसिद्धं, निर्वचनमाह–गौतम ! चन्द्रह्रदस्य दाक्षिणात्या-च्चरमान्तादर्वाग् दक्षिणस्यां दिशि अष्टौ चतुस्त्रिंशानि योजनशतानि चतुरश्च सप्तभागान् योजनस्याबा-धया कृत्वेति शेषः सीताया महानद्या बहुमध्यदेशभागे 'अत्र' एतस्मिन्नवकाशे एरावतह्रदो नाम ह्रदः प्रज्ञप्तः, अस्यापि नीलवन्नाम्नो ह्रदस्येवायामविष्कम्भादिवक्तव्यता परिक्षेपपर्यवसाना वक्तव्या, अन्वर्थसूत्रमपि तथैव, नवरं यस्मादुत्पलादीनि ऐरावतह्रदप्रभाणि, ऐरावतो नाम हस्ती तद्वर्णानि च ऐरावतश्च नामा तत्र देवः परिवसति तेन ऐरावतह्रद इति, ऐरावताराजधानी विजयराज-धानीवत् काञ्चनकपर्वतवक्तव्यतापर्यवसाना तथैव ॥ अधुना माल्यवन्नामहदवक्तव्यतामाह–

'कहि णं भंते' इत्यादि, सुगमं, भगवानाह–गौतम ! ऐरावतह्रदस्य दाक्षिणात्याच्चरमान्ताद-र्वाग् दक्षिणस्यां दिशि अष्टौ चतुस्त्रिंशानि योजनशतानि चतुरश्च सप्तभागान् योजनस्य अबाधया कृत्वेति शेषः सीताया महानद्या बहुमध्यदेशभागे 'अत्र' एतस्मिन्नवकाशे उत्तरकुरुषु माल्यवन्नामा ह्रदः प्रज्ञप्तः, स च नीलवद्ह्रदवदायामविष्कम्भादिना तावद्वक्तव्यो यावत्पद्मवक्तव्यतापरिसमाप्ति, नामन्वर्थसूत्रमपि तथैव यस्मादुत्पलादीनि 'माल्यवद्ह्रदप्रभाणि' माल्यवद्ह्रदाकाराणि, माल्यवन्नामा वक्षस्कारपर्वतस्तद्वर्णानि–तद्वर्णाभानि माल्यवन्नामा च तत्र देवः परिवसति तेन माल्वद्ह्रद इति, माल्वतीराजधानी विजयारजधानीवद् वक्तव्या काञ्चनकपर्वतवक्तव्यताऽवसाना प्राग्वत् ।

सम्प्रति जम्बूवृक्षवक्तव्यतामाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१९०) *कहि णं भंते ! उत्तरकुराए २ जंबुसुदंसणाए जंबुपेढे नामं पेढे पन्नत्ते ?, गोयमा ! जंबूद्दीवे २ मंदरस्स पव्वयस्स उत्तरपुरच्छिमेणं नीलवंतस्स वासधरपव्वतस्स दाहिणेणं मालवंतस्स वक्खारपव्वयस्स पच्चत्थिमेणं गंधमादणस्स वक्खारपव्वयस्स पुरत्थिमेणं सीताए महानदीए पुरत्थिमिल्ले कूले एत्थ णं उत्तरकुरुकुराए जंबूपेढे नाम पेढे पंचजोयणसताइं आयाम-विक्खंभेणं पन्नरस एक्कसीते जोयणसते किंचिविसेसाहिए परिक्खेवेणं बहुमज्झदेसभाए बारस जोयणाइं बाहल्लेणं तदानंतरं च णं माताए २ पदेसे परिहाणीए सव्वेसु चरमंतेसु दो कोसे बाहल्लेणं पन्नत्ते सव्वजंबूनतामए अच्छे जाव पडिरूवे ।*

से णं एगाए पउमवरवेइयाए एगेण य वनसंडेणं सव्वतो समंता संपरिक्खेत्ते वण्णओ दोण्हवि । तस्स णं जंबुपेढस्स चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पन्नत्ता तं चेव जाव तोरणा जाव चत्तारि छत्ता । तस्स णं जंबूपेढस्स उप्पिं बहुसमरमणिज्जे भूमिभागे पन्नत्ते से जहाणामए आलिंग- पुक्खरेतिवा जाव मणि० ।। तस्स णं बहुसमरणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगा महं मणिपेढिया पन्नत्ता अट्ठ जोयणाइं आयामविक्खंभेणं चत्तारि जोयणाइं बाहल्लेणं मणिमती अच्छा सण्हा जाव पडिरूवा ।।

तीसे णं मणिपेढियाए उवरि एत्थ णं महं जंबूसुदंसणा पन्नत्ता अट्ठजोयणाइं उड्ढं उच्चत्तेणं अद्धजोयणं उव्वेहेणं दो जोयणातिं खंधे अट्ठ जोयणाइं विक्खंभेणं छ जोयणाइं विडिमा बहुम-ज्झदेसभाए अट्ठ जोयणाइं विक्खंभेणं सातिरेगाइं अट्ठ जोयणाइं सव्वग्गेणं पन्न्त्ता, वइरामयमूला रयतसुपतिट्ठियविडिमा, एवं चेतियरुक्खवण्णओ जाव सव्वो रिट्ठामयविउलकंदा ।

वेरुलियरुइरक्खंधा सुजायवरजायरूवपढमगविसालसाला नानामणिरयणविविहसाहप्प-साहवेरुलियपत्ततवमिज्जपत्तविंटा जंबूनयरत्तमउयसुकुमालपवालपल्लवंकुरधरा विचित्तमणिर-यणसुरहिकुसुमा फलभारनमियसाला सच्छाया सप्पिरीया सउज्जोया अहियं मनोनिव्वुइकरा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा ।।

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! जम्बूद्वीपे द्वीपे उत्तरकुरुषु जम्ब्वाः सुदर्शनायाः, जम्ब्वा हि द्वितीयं नाम सुदर्शनेति तत उक्तं सुदर्शनाया इति, जम्ब्वाः सम्बन्धि पीठं जम्बूपीठं नाम पीठं प्रज्ञप्तं ?, भगवानाह–गौतम ! मन्दरस्य पर्वतस्य 'उत्तरपूर्वेण' उत्तरपूर्वस्यां नीलवतो वर्षधरपर्वतस्य 'दक्षिणेन' दक्षिणतो गन्धमादनस्य वक्षस्कारपर्वतस्य 'पूर्वेण' पूर्वस्यां दिशि माल्यवतो वक्षस्कारपर्वतस्य पश्चिमायां शीताया महानद्याः पूर्वस्यामुत्तरकुरुपूर्वार्द्धस्य बहुमध्यदेशभागे 'अत्र' एतस्मिन्नवकाशे उत्तरकुरुषु कुरुषु जम्ब्वाः सुदर्शनापरनामिकाया जम्बूपीठं प्रज्ञप्तं, पञ्च योजनशतान्यायामविष्कम्भाभ्यामेकं योजनसहस्रं पञ्चैकाशीतानि योजनशतानि किञ्चिद्विशेषा-धिकानि परिक्षेपेण, बहुमध्यदेशभागे द्वादश योजनानि बाहल्येन, तदनन्तरं च मात्रया २ परिहीयमानं चरमपर्यन्तेषु द्वौ क्रोशौ बाह्येन सर्वात्मना जाम्बूनदमयम्, 'अच्छे' इत्यादि विशेषणकदम्बकं प्राग्वत् उक्तञ्च–

॥ १ ॥ "जंबूनयामयं जंबूपीढमुत्तरकुराए पुव्वद्धे ।
सीयाए पुव्वद्धे पंचसयायामविक्खंभं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२॥ पन्नरसेक्कासीए साहीए परिहिमज्झबाहल्लं।
जोयणदुछक्कमसो हायंतंतेसु दो कोसा॥

'से ण'मित्यादि 'तत्' जम्बूपीठमेकय पद्मवरवेदिकया एकेन वनखण्डेन 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन परिक्षिप्तं, वेदिकावनषण्डयोर्वर्णकः प्राग्वद्वक्तव्यः। तस्य च जम्बूपीठस्य चतुर्दिशि एकैकस्यां दिशि एकैकत्रिसोपानप्रतिरूपकभावेन चत्वारि त्रिसोपानप्रतिरूपकाणि–प्रतिविशिष्टरूपाणि त्रिसोपानानि प्रज्ञप्तानि, तद्यथा–एकं पूर्वस्यामेकं दक्षिणस्यामेकं पश्चिमायामेकमुत्तरस्याम्। 'तेसि ण'मित्यादि, तेषां च त्रिसोपानप्रतिरूपकाणामयमेतद्रूपो वर्णावासः प्रज्ञप्तः, तद्यथा–वज्रमया नेमा भूमेरूर्द्धमुद्गच्छन्तः प्रदेशा इत्यादि जगत्युपरिवाप्यादित्रिसोपानवत्तावद्वक्तव्यं यावन्नानामणिमयान्यवलम्बनानि अवलम्बनवाहाश्च, तोरणान्यपि प्राग्वद्वाच्यानि॥ 'तस्स णं जंबूपेढस्स ण'मित्यादि, जम्बूपीठस्योपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, स च 'से जहानामए आलिंगपुक्खरेइ वा' इत्यादि विजयाराजधान्युपकारिकालयनवत्तावद्वक्तव्यो यावन्मणीनां स्पर्शवक्तव्यतापरिसमाप्ति, यावच्च बहवो वानमन्तरा देवा देव्यश्चासते शेरते यावद् विहरन्तीति 'तस्स ण'मित्यादि, तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे, अत्र महत्येका मणिपीठिका प्रज्ञप्ता, अष्टौ योजनान्यायामविष्कम्भाभ्यां चत्वारि योजनानि बाहल्येन सर्वात्मना मणिमयी 'अच्छा जाव पडिरूवा' इति प्राग्वत्।

'तीसे ण'मित्यादि, तस्य मणिपीठिकाया उपरि बहुमध्यदेशभागे, अत्र महती जम्बूः सुदर्शना प्रज्ञप्ता, अष्टौ योजनान्यूर्ध्वमुच्चैस्त्वेन, अर्द्धयोजनमुद्वेधेन, द्वे योजने स्कन्धः षड् योजनानि विडिमा– ऊर्द्ध विनिर्गता शाखा बहुमध्यदेशभागे अष्टौ योजनान्यायामविष्कम्भाभ्यां सातिरेकान्यष्टौ योजनानि 'सर्वाग्रेण' उद्वेधोच्चैस्त्वपरिमाणमीलनेन, तस्याश्च जम्ब्वा वज्रमयानि मूलानि यस्याः सा वज्रमयमूला 'रययसुपइट्ठियविडिमा' इति रजता–रजतमयी सुप्रतिष्ठिता विडिमा–बहुमध्यदेशभागे ऊर्ध्वं विनिर्गता यस्याः सा रजतसुप्रतिष्ठितविडिमा, ततः पूर्वपदेन विशेषणसमासः, 'रिट्ठामयविउल- कंदावेरुलियरुइलखंधा' रिष्ठमयो–रिष्ठरत्नमयः (विपुलः) कन्दो यस्याः सा रिष्ठरत्नमयकन्दा, तथा वैडूर्यरत्नमयो रुचिरो–दीप्यमानः स्कन्धो यस्या सा वैडूर्यरुचिरस्कन्धा, ततः पूर्वपदेन कर्मधारयसमासः, 'सुजायवरजायरूवपढमगविसालसाला' सुजातं–मूलद्रव्यशुद्धं वरं–प्रधानं यात जातरूपं तदात्मकाः प्रथमका–मूलभूता विशालाः शालाः–शाखा यस्याः सा सुजातवरजात- रूपप्रथमकविशालशालाः।

'नानामणिरयणविविहसाहप्पसाहवेरुलियपत्ततवणिज्जपत्तविंटा' नानामणिरत्नानां–नानामणिरत्नामिका विविधा शाखाप्रशाखा यस्याः सा तथा तथा वैडूर्याणि–वैडूर्यरत्नमयानि पत्राणि यस्याः सा तथा तपनीयानि–तपनीयमयानि पत्रवृन्तानि यस्याः सा तथा, ततः पदद्वय २ मीलनेन कर्म्मधारयः नानामणिरत्नविविधशाखाप्रशाखावैडूर्यपत्रतपनीयपत्रवृन्ताः, अपरे सौवर्णिक्यो मूलशाखाः प्रशाका रजतमय्य इत्युचुः, 'जंबूणयरत्तमउयसुकुमालपवालपल्लवंकुरधरा' जाम्बूनदनामकसुवर्णविशेषमया रक्ता–रक्तवर्णा मृदवो–मनोज्ञाः सुकुमाराः–सुकुमारस्पर्शा ये प्रवाला–ईषदुन्मीलितपत्रभावाः पल्लवाः संजातपरिपूर्णप्रथमपत्रभावरूपा वराङ्कुराः प्रथममुद्भिद्यमाना अङ्कुरास्तान् धरन्तीति जाम्बूनदरक्तमृदुकसुकुमारप्रवालपल्लवाङ्कुरधराः, क्वचित्पाठः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जंबूनयरत्तमउयसुकुमालकोमलपल्लवंकुरग्गसिहरा' तत्र जाम्बूनदानि रक्तानि मृदूनि—अकठितानि सुकुमाराणि—अकर्कशस्पर्शानि कोमलानि—मनोज्ञानि प्रवालपल्लवाङ्कुरा—यथोदितस्वरूपा अग्रशिखराणि च यस्याः सा तथा, अन्ये तु जम्बूनदमया अग्रप्रवाला अङ्कुरापरपर्याया राजता इत्याहुः ।

'विचित्तमणिरयमसुरभिकसुमफलभारनमियसाला' विचित्रमणिरत्नानि—विचित्रमणिरत्नमयानि सुरभीणि कुसुमानि फलानि च तेषां भरेण नमिता—नामं ग्राहिताः शालाः—शाखा यस्याः सा तथा, उक्तञ्च—

॥१॥ "मूला वइरमया से कंदो खंधो य रट्ठवेरुलिओ ।
सोवण्णियसाहप्पसाह तह जायरूवा य ॥

॥२॥ विडिमा रययवेरुलियपत्ततवमिज्ञपत्तविंटा य ।
पल्लव अग्गपवाला जंबूणयरायया तीसे ॥

'रयणमयापुप्फफला' इति 'सच्छाया' इति सती—शोभना छाया यस्याः सा सच्छाया, तथा सती—शोभना प्रभायस्याः सा सत्प्रभा, अत एव सश्रीका सह उद्योतो यया मणिरत्नानामुद्योतभावात् सोद्योता अधिकं—अतिशयेन मनोनिर्वृत्तिकरी 'पासाईया' इत्यादि पदचतुष्टयं प्राग्वत्

मू. (१९१) *जंबूए णं सुदंसणाए चउद्दिसिं चत्तारि साला पन्नत्ता, तंजहा—पुरत्थिमेणं दक्खिणेणं पच्चत्थमेणं उत्तरेणं, तत्थणं जे से पुरत्थिमिल्ले साले एत्थ णं एगे महं भवणे पन्नत्ते एगं कोसं आयामेणं अद्धकोसं विक्खंभेणं देसूणं कोसं उड्ढं उच्चत्तेणं अनेगखंभ० वण्णओ जाव भवणस्स दारं तं चेव पमाणं पंचधनुसतातिं उड्ढं उच्चत्तेणं अड्ढाइज्जाइं विक्खंभेणं जाव वणमालाओ भूमिभागा उल्लोया मणिपेढिया पंचधणुसतिया देवसयणिज्जं भाणियव्वं ।*

तत्थ णं जे से दाहिणिल्ले साले एत्थ णं एगे महं पासायवडेंसए पन्नत्ते, कोसं च उड्ढं उच्चत्तेणं अद्धकोसं आयामविक्खंभेणं अब्भुग्गयमूसिय० अंतो बहुसम० उल्लोता । तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए सीहासणं सपरिवारं भाणियव्वं ।

तत्थ णं जे से पच्चत्थिमिल्ले साले एत्थ णं पासायवडेंसए पन्नत्ते तं चेव पमाणं सीहासनं सपरिवारं भा० तत्थ णं जे से उत्तरिल्ले साले एत्थ णं एगे महं पासायवडेंसए प० तं चेव पमाणं सीहासणं सपरिवारं । तत्थ णं जे से उवरिमविडिमे एत्थ णं एगे महं सिद्धायतणे कोसं आयामेणं अद्धकोसं विक्खंभेणं देसूणं कोसं उड्ढं उच्चत्तेणं अनेगखंभसतसन्निविट्ठे वण्णओ तिदिसिं तओ दारा पंचधनुसता अड्ढाइज्जधणुसयविक्खंभा मणिपेढिया पंचधणुसतिया देवच्छंदओ पंचधनुसतविक्खंभो सातिरेगपंचधनुसउच्चत्ते । तत्थ णं देवच्छंदए अट्ठसयं जिणपडिमाणं जिनुस्सेधप्पमाणाणं, एवं सव्वा सिद्धायतणवत्तव्वया जाव धूवकडुच्छुया उत्तिमागारा सोलसविधेहिं रयणेहिं उवेए चेव जंबू णं सुदंसणा मूले बारसहिं पउमवरवेदियाहिं सव्वतो समंता संपरिक्खित्ता, ताओ णं पउम० अद्धजोयणं उड्ढं उच्चत्तेणं पंचधनुसताइं विक्खंभेणं वण्णओ ।

जंबू सुदंसणा अन्नेणं अट्ठसतेणं जंबूणं तयद्धुच्चत्तप्पमाणमेत्तेणं सव्वतो समंता संपरिक्खित्ता ताओ णं जंबूओ चत्तारि जोयणाइं उड्ढं उच्चत्तेणं कोसं चोव्वेधेणं जोयणं खंधो कोसं विक्खंभेणं तिन्नि जोयणाइं विडिमा बहुमज्झदेसभाए चत्तारि जोयणाइं विक्खंभेणं सातिरेगाइं चत्तारि जोयणाइं सव्वग्गेणं वइरामयमूला सो चेव चेतियरुक्खवण्णओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जंबूए णं सुदंसणाए अवरुत्तरेणं उत्तरेणं उत्तरपुरत्थिमेणं एत्थ णं अनाढियस्स चउण्हं सामानियसाहस्सीणं चत्तारि जंबूसाहस्सीओ पन्नत्ताओ, जंबूए सुदंसणाए पुरत्थिमेणं एत्थ णं अनाढियस्स देवस्स चउण्हं अग्गमहिसीणं चत्तारि जंबूओ पन्नत्ताओ, एवं परिवारो सव्वो नायव्वो जंबूए जाव आयरक्खाणं । जंबू णं सुदंसणा तिहिं जोयणसतेहिं वनसंडेहिं सव्वतो समंता संपरिक्खित्ता, तंजहा–पढमेणं दोच्चेणं तच्चेणं । जंबूए सुदंसणाए पुरत्थिमेणं पढमं वनसंडं पन्नासं जोयणाइं ओगाहित्ता एत्थ णं एगे महं भवणे पन्नत्ते, पुरत्थिमिल्ले भवणसरिसे भाणियव्वे जाव सयणिज्जं, एवं दाहिणेणं पच्चत्थिमेणं उत्तरेणं ।

जंबूए णं सुदंसणाए उत्तरपुरत्थिमेणं पढमं वनसंडं पन्नासं जोयणाइं ओगाहित्ता चत्तारि नंदापुक्खरिणीओ पन्नत्ता, तंजहा–पउमा पउमप्पभा चेव कुमुदा कुमुयप्पभा । ताओ णं नंदाओ पुक्खरिणीओ कोसं आयामेणं अद्धकोसं विक्खंभेणं पंचधणुसयाइं उव्वेहेणं अच्छाओ सण्हाओ लण्हाओ घट्ठाओ मट्ठाओ निप्पंकाओ नीरयाओ जाव पडिरूवाओ वण्णओ भाणियव्वो जाव तोरणत्ति । तासि णं नंदापुक्खरिणीणं बहुमज्झदेसभाए एत्थ णं पासायवडेंसए पन्नत्ते कोसप्पमाणे अद्धकोसं विक्खंभो सो चेव सो वण्णओ जाव सीहासणं सपरिवारं । एवं दक्खिणपुरत्थिमेणवि पन्नासं जोयणा० चत्तारि नंदापुक्खरिणीओ उप्पलगुम्मा नलिना उप्पला उप्पलुज्जला तं चेव पमाणं तहेव पासायवडेंसगो तप्पमाणो । एवं दक्खिणपच्चत्थिमेणवि पन्नासं जोयणाणं परं–भिंगा भिंगणिभा चेव अंजणा कज्जलप्पभा, सेसं तं चेव ।

जंबूए णं सुदंसणाए उत्तरपुरत्थिमे पढमं वनसंडं पन्नासं जोयणाइं ओगाहित्ता एत्थ णं चत्तारि नंदाओ पुक्खरिणीओ प०–सिरिकंत सिरिमहिया सिरिचंदा चेव तह य सिरिणिलया । तं चेव पमाणं तहेव पासायवडिंसओ । जंबूए णं सुदंसणाए पुरत्थिमिल्लस्स भवणस्स उत्तरेणं उत्तरपुरत्थिमेणं पासायवडेंसगस्स दाहिणेणं एत्थ णं एगे महं कूडे पण्नत्ते अट्ठ जोयणाइं उड्ढं उच्चत्तेणं मूले बारस जोयणाइं विक्खंभेणं मज्झे अट्ठ जोयणाइं आयामविक्खंभेणं उवरिं चत्तारि जोयणाइं आयामविक्खंभेणं मूले सातिरेगाइं सत्ततीसं जोयणाइं परिक्खेवेणं मज्झे सातिरेगाइं पणुवीसं जोयणाइं परिक्खेवेणं उवरिं सातिरेगाइं बारस जोयणाइं परिक्खेवेणं मूले विच्छिन्ने मउच्चे संखित्ते उप्पिं तणुए गोपुच्छसंठाणसंठिए सव्वजंबूणयामए अच्छे जाव पडिरूवे, से णं एगाए पउमवरवेइयाए एगेणं वनसंडेणं सव्वतो समंता संपरिक्खित्ते दोण्हवि वण्णाओ ।

तस्स णं कूडस्स उवरि बहुसमरमणिज्जे भूमिभागे पन्नत्ते जाव आसयंति० ।। तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एगं सिद्धायतनं कोसप्पमाणं सव्वा सिद्धायतनवत्तव्वया जंबूए णं सुदंसणाए पुरत्थिमस्स भवणस्स दाहणेणं दाहिणपुरत्थिमिल्लस्स पासायवडेंसगस्स उत्तरेणं एत्थ णं एगे महं कूडे पन्नत्ते तं चेव पमाणं सिद्धायतणं च ।

जंबूए णं सुदंसणा दाहिणिल्लस्स भवण० पुरत्थिमेणं दाहिणपुरत्थिमस्स पासायवडेंसगस्स पच्चत्थिमेणं एत्थ णं एगे महं कूडे पन्नत्ते, दाहिणस्स भवणस्स परतो दाहिणपच्चत्थिमिल्लस्स पासायवडिंसगस्स पुरत्थिमेणं एत्थ णं एगे महं कूडे जंबूतो पच्चत्थिमिल्लस्स भवणस्स दाहिणेणं दाहिणपच्चत्थिमिल्लस्स पासायवडेंसगस्स उत्तरेणं एत्थ णं एगे महं कूडे प० तं चेव पमाणं सिद्धायतनं च, जंबूए पच्चत्थिमभवणउत्तरेणं उत्तरपच्चत्थिमस्स पासायवडेंसगस्स दाहिणेणं एत्थ णं एगे महंकूडे पन्नत्ते तं चेव पमाणं सिद्धायतनं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जंबूए उत्तरस्स भवणस्स पच्चत्थिमेणं उत्तरपच्चत्थिमस्स पासायवडेंगस्स पुरत्थिमेणं एत्थ णं एगे कूडे पन्नत्ते, तं चेव, जंबूए उत्तरभवणस्स पुरत्थिमेणं उत्तरपुरत्थिमिल्लस्स पासायवडेंसगस्स पच्चत्थिमेणं एत्थ णं एगे महं कूडे पन्नत्ते, तं चेव पमाणं तहेव सिद्धायतणं।

जंबू णं सुदंसणा अन्नेहिं बहूहं तिलएहिं लउएहिं जाव रायरुक्खेहिं हिंगुरुक्खेहिं जाव सव्वतो समंता संपरिक्खित्ता। जंबूते णं सुदंसणाए उविरिं बहवे अट्ठट्ठमंगलगा पन्नत्ता, तंजहा—सोत्थियसिरिवच्छ० कण्हा चामरज्झया जाव छत्तातिच्छत्ता ॥

जंबूए णं सुदंसणाए दुवालस नामधेज्जा पन्नत्ता, तंजहा—

वृ. 'जंबूए ण'मित्यादि, जम्ब्वाः सुदर्शनायाश्चतुर्दिशि एकैकस्यां दिशि एकैकशाखाभावतश्चतस्रः शाखाः प्रज्ञप्ताः, तद्यथा—एका पूर्वस्यामेका दक्षिणस्यामेका पश्चिमायामेकोत्तरस्यां, तत्र या सा पूर्वशाला, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, 'तस्स ण'मित्यादि, तस्या बहुमध्यदेशभागे अत्र महदेकं भवनं प्रज्ञप्तं, क्रोशमायामतोऽर्द्धक्रोशं विष्कम्भतो देशोनं क्रोमूर्द्धमुच्चैस्त्वेन, तस्य वर्णको द्वारादिवक्तव्यता च प्रागुक्तमहापद्मवत्, तथा चाह—'पमाणाइया महापउमवत्तव्वया भाणियव्वा अहीणमइरित्ता जाव उप्पलहत्थगा' इति। तत्थ ण'मित्यादि, तत्र या सा दक्षिणात्या शाखा तस्या बहुमध्यदेशभागे अत्र महानेकः प्रासादावतंसकः प्रज्ञप्तः, क्रोशमेकमूर्द्धमुच्चैस्त्वेन, अर्द्धक्रोशं विष्कम्भेन, 'अब्भुग्गयमूसियपहसिया इवे'त्यादि तद्वर्णनमुपर्युल्लोचवर्णनं भूमिभागवर्णनं मणिपीठिकावर्णनं सिंहासनवर्णनं च प्राग्वत्, नवरमत्र मणिपीठिका पञ्चधनुःशतान्यायामविष्कम्भाभ्यामर्द्धतृतीयानि धनुःशतानि बाहल्येन सिंहासनं च सपरिवारं वाच्यमिति, तस्य च प्रसादावतंसकस्योपरि बहून्यष्टावष्टौ स्वस्तिकादीनि मङ्गलकानीत्यादि तावद्वक्तव्यं यावद्बहवः सहस्रपत्रहस्तका इति, यता च दक्षिणस्यां शाखायां प्रासादावतंसक उक्तस्तथा पश्चिमायामुत्तरस्यामपि प्रत्येकं वक्तव्यः, जम्ब्वाः सुदर्शनाया उपरि विडिमाया बहुमध्यदेशभागे सिद्धायतनं, तच्च पूर्वस्यां भवनमिव तावद्वक्तव्यं यावन्मणिपीठिका- वर्णनं, तत ऊर्द्धमेवं वक्तव्यं—

'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपरि अत्र महानेको देवच्छन्दकः प्रज्ञप्तः, एवं पञ्चधनुःशतान्यायामविष्कम्भाभ्यां पञ्चधनुःशतानि सातिरेकाणि ऊर्ध्व्वमुच्चैस्त्वेन सर्वात्मना रत्नमयः, अच्छ इत्यादि पूर्ववद् यावत्प्रतिरूप इति। 'तत्थ णं अट्ठसयं जिनपडिमाणं जिनुस्सेहपमाणमेत्ताणं सन्निक्खित्ताणं चिट्ठइ' इत्यादि पूर्ववत्तावद्वक्तव्यं यावत् 'अट्ठसयं धूवकडुच्छुयाणं सन्निक्खित्ताणं चिट्ठइ' इति पदं, 'सिद्धायणस्स उप्पिं अट्ठट्ठमंगलगा' इत्यादि पूर्ववत्तावद्वक्तव्यं यावत् 'अट्ठसयं धूवकडुच्छुयाणं सन्निक्खित्ताणं चिट्ठइ' इति पदं, 'सिद्धाययनस्स उप्पिं अट्ठट्ठमंगलगा' इत्यादि पूर्ववत्तावद्वक्तव्यं यावत् 'सहस्सपत्तहत्थगा' इति, सर्वत्रापि च व्याख्याऽपि पूर्ववत्

'जंबू णं सुदंसणा' इत्यादि, जम्बूः सुदर्शना द्वादशभिः पद्मवरवेदिकाभिः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्ता। वेदकावर्णनं प्राग्वत्। 'जंबू ण'मित्यादि, जम्बूः सुदर्शना अन्येन जम्बूनामष्टशतेन तदर्द्धोच्चत्वप्रमाणमात्रेण 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्ता। तदर्द्धोच्चप्रमाणमेव भावयति—'ताओ ण'मित्यादि, 'ताः' अष्टोत्तरशतसङ्ख्या जम्ब्वाः प्रत्येकं चत्वारि योजनान्यूर्द्धमुच्चैस्त्वेन क्रोशमुद्वेधेन योजनमेकं स्कन्धः क्रोशं बाहल्येन स्कन्धः, त्रीणि योजनानि विडिमाऊर्ध्व्वं विनिर्गता शाखा बहुमध्यदेशभागे चत्वारि योजनान्याया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मविष्कम्भाभ्याम्, ऊर्ध्वाधोरूपेण सातिरेकाणि चत्वारि योजनानि सर्वाग्रेण उद्वेधपरिमाण-मीलनेनेति भावः। 'वइरामयमूलरययसुपइट्ठिया विडिमा' इत्यादिवर्णनं पूर्ववत्तावद्वक्तव्यं यावदधिकं नयन- मनोनिर्वृत्तिकार्यः, प्रासादीया यावत्प्रतिरूपाः।

'जंबूए ण'मित्यादि, 'जंबूए णं सुदंसणाए' इत्यादि, जम्ब्वाः सुदर्शनाया अवरोत्तरस्यामुत्त-रस्यामुत्तरपूर्वस्यां, अत एवासु तिसृषु दिक्ष्वनाढतस्य देवस्य जम्बूद्वीपाधिपतेश्चतुर्णां सामानिकसहस्राणां योग्यानि चत्वारि जम्बूसहस्राणि प्रज्ञप्तानि, पूर्वस्यां चतसृणामग्रमहिषीणां योग्यानि चतस्रो, महाजम्ब्वा दक्षिणपूर्वस्यामभ्यन्तरपर्षदोऽष्टानां देवसहस्राणां योग्यान्यष्टौ जम्बूसहस्राणि, दक्षिणस्यां मध्यमपर्षदो दशानां देवसहस्राणां योग्यानि दश जम्बूसहस्राणि, दक्षिणाप-रस्यां बाह्यपर्षदो द्वादश देवसहस्राणां योग्यानि द्वादश जम्बूसहस्राणि, अपरस्यां सप्तानामनी-काधिपतीनां योग्यानि सप्त महाजम्ब्वः, ततः सर्वासु दिक्षु षोडशानामारक्षदेवसहस्राणां योग्यानि षोडश जम्बूसहस्राणि प्रज्ञप्तानि।

'जंबू णं सुदंसणा' इत्यादि, सा जम्बूः सुदर्शना त्रिभिः शतकैः—योजनशतप्रमाणैर्वनषण्डैः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्ता, तद्यथा—अभ्यन्तरकेन मध्येन बाह्येन च। जम्ब्वाः सुदर्शनायाः पूर्वस्यां दिशि प्रथमं वनषण्डं पञ्चाशतं योजनान्यवगाह्यात्र महदेकं भवनं प्रज्ञप्तं, तच्च पूर्वदिग्वर्त्तिभवनवद् वक्तव्यं यावत् शयनीयम्। जम्ब्वाः सुदर्शनाया दक्षिणतः प्रथमं वनषण्डं पञ्चाशतं योजनान्यवगाह्यात्र महदेकं भवनं प्रज्ञप्तं, एतदपि तथैव यावत् शयनीयं, एवं पश्चिमायामुत्तरस्यां च प्रत्येकं च प्रत्येकं च प्रथमं वनषण्डं पञ्चाशतं योजनान्यगाह्य भवनं वक्तव्यं यावत् शयनीयम्।

'जंबूए ण'मित्यादि, जम्ब्वाः सुदर्शनाया उत्तरपूर्वस्यां—ईशानकोण इत्यर्थः प्रथमं वनषण्डं पञ्चाशतं योजनान्यवगाह्यात्र महत्यश्चतस्रो नन्दापुष्करिण्यः प्रज्ञप्तास्तद्यथा—पूर्वस्यां पद्मा-पद्माभिधाना, दक्षिणस्यां पद्मप्रभा, पश्चिमायां कुमुदा, उत्तरस्यां कुमुदप्रभा, ताश्च नन्दापुष्करिण्यः प्रत्येकं क्रोशमायामेन अर्द्धक्रोशं विष्कम्भेन पञ्चधनुःशतान्युद्वेधेन, 'अच्छाओ सण्हाओ' इत्यादि पुष्करिणीवर्णनं प्राग्वत्समस्तं यावत्प्रत्येकं प्रत्येकं पद्मवरवेदिकया परिक्षिप्ताः प्रत्येकं २ वनषण्डपरिक्षिप्ताः, पद्मवरवेदिकावनषण्डवर्णनं प्राग्वत्। 'तासि ण'मित्यादि, तासां पुष्करिणीनां प्रत्येकं चतुर्दिशि एकैकस्यां दिशि एकैकभावेन चत्वारि त्रिसोपानप्रतिरूपाणि प्रज्ञप्तानि, तेषां वर्णकः प्राग्वत्, तोरणान्यपि तथैव, तासां पुष्करिणीनां बहुमध्यदेशभागेऽत्र महानेकः प्रासादावतंसकः प्रज्ञप्तः, स च जम्बूवृक्षदक्षिणपश्चिमशाखा- भाविप्रासादवत् प्रमाणादिना वक्तव्यो यावत् 'सहस्सपत्तहत्थगा' इति पदं, सर्वत्रापि च सिंहासनम- नाढतदेवस्य सपरिवाम्। एवं दक्षिणपूर्वस्यां दक्षिणापरस्यामुत्तरापरस्यां च प्रत्येकं वक्तव्यं, नवरं नन्दापुष्करिणीनामनानात्वं, तच्चेदं—दक्षिणपूर्वस्यां पूर्वादिक्रमेण उत्पलगुल्मा नलिना उत्पला उत्पलोज्ज्वला, दक्षिणपूर्वस्यां भृङ्गा भृङ्गनिभा अञ्जना कज्जलप्रभा, अपरोत्तरस्यां श्रीकान्ता श्रीचन्द्रा श्रीनिलया श्रीमहिता, उक्तश्च—

॥१॥ "पउमा पउमप्पभा चेव, कुमुया कुमुयप्पभा।
उप्पलगुम्मा नलिणा, उप्पला उप्पलुज्जला॥"

॥२॥ भिंगा भिंगनिभा चेव, अंजणा कज्जलप्पभा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिरिकंता सिरिचंदा, सिरिनिलया चेव सिरिमहिया ।।

'जंबूए ण'मित्यादि, जम्ब्वाः सुदर्शनायाः पूर्वदिग्भाविनो भवनस्योत्तरतः उत्रपूर्वदिग्भाविनः प्रासादावतंसकस्य दक्षिणतोऽत्र महानेकः कूटः प्रज्ञप्तः, अष्टौ योजनान्यूर्द्धमुच्चैस्त्वेन, मूलेऽष्टौ योजनानि विष्कम्भेन मध्ये षड् योजनानि उपरि चत्वारि योजनानि, मूले सातिरेकाणि पञ्चविंशतिर्योजनानि परिक्षेपतः मध्ये सातिरेकाण्यष्टादश योजनानि उपरि सातिरेकाणि द्वादश योजनानि परिक्षेपतः, तथा सति मूले विस्तीर्णो सङ्क्षिप्त उपरि तनुकोऽत एव गोपुच्छसंस्थानसंस्थितः सर्वात्मना जम्बूनदमयः, 'अच्छे जाव पडिरूवे' इति प्राग्वत्, स च कूट एकया पद्मवरवेदिकया एकेन वनषण्डेन सर्वतः समन्तात् परिक्षिप्तः, पद्मवरवेदिकावनषण्डवर्णनं प्राग्वत् ।

'तस्स ण'मित्यादि, तस्य कूटस्योपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, स च 'से जहानामए आलिंगपुक्खरेइ वा' इत्यादि पूर्ववत्तावद्वक्तव्यो यावत्त णानां मणीनां च शब्दवर्णनम् ।। 'तस्स ण'मित्यादि, तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र महदेकं सिद्धायतनं प्रज्ञप्तं, तच्च जम्बूसुदर्शनोपरिविडिमासिद्धायतनसदृशं वक्तव्यं यावदष्टोत्तरं शतं धूपकडुच्छुकानामिति

एवं जम्ब्वाः सुदर्शनायाः पूर्वस्य भवनस्य दक्षिणतो दक्षिणपश्चिमस्य प्रासादावतंसकस्योत्तरतः, तथा दाक्षिणात्यस्य भवनस्य पूर्वतो दक्षिणपूर्वस्य प्रासादावतंसकस्य पश्चिमदिशि, तथा दाक्षिणात्यस्य भवनस्य परतो दक्षिणपश्चिमस्य प्रासादावतंसकस्य पूर्वतः, तथा पाश्चात्यस्य भवनस्य पूर्वतो दक्षिणपश्चिमस्य प्रासादावतंसकस्योत्तरतः, तथा पश्चिमस्य भवनस्योत्तरत उत्तरपश्चिमस्य प्रासादवतंसकस्य दक्षिणतः, तथोत्तरस्य भवनस्य पश्चिमायामुत्तरपश्चिमस्य प्रासादावतंसकस्य पूर्वतः, तथोत्तरस्य भवनस्य पूर्वत उत्तरपूर्वस्य प्रासादावतंसकस्यापरतः प्रत्येकमेकैकः कूटः पूर्वोक्तप्रमाणो वक्तव्यः, तेषां च कूटानामुपरि प्रत्येकमेकैकं सिद्धायतनं, तानि च सिद्धायतनानि पूर्ववद्वाच्यानि, उक्तञ्च–

॥१॥ "अट्ठसहकूडसरिसा सव्वे जंबूनयामया भणिया ।
तेसुवरिं जिणभवणा कोसपमाणा परमरम्मा ॥"

'जंबूए ण'मित्यादि, जम्ब्वाः सुदर्शनाया द्वादश नामधेयानि प्रज्ञप्तानि, तद्यथा–

मू. (१९२) *सुदंसणा अमोहा य, सुप्पबुद्धा जसोधरा ।*
विदेहजंबू सोमणसा, नियया निच्चमंडिया ॥

वृ. 'सुदंसणे'त्यादि, शोभनं दर्शनं दृश्यमानता तस्या नयमनोहारित्वात् सा सुदर्शना १, यथा च तस्याः शोभनदर्शनं तथाऽग्रे स्वयमेव सूत्रकृद् भावयिष्यति, 'अमोहा य' इति मोघं–निष्फलं न मोघा अमोघा अनिष्फला इत्यर्थः, तथाहि–सा स्वस्वामिभावेन प्रतिपन्ना सती जम्बूद्वीपाधिपत्यमुपजनयति, तदन्तरेण तद्विषयस्य स्वामिभावस्यैवायोगात्, ततोऽनिष्फलेति २, 'सुप्पबुद्धा' इति सुष्ठु–अतिशयेन प्रबुद्धेव प्रबुद्धा मणिकनकरत्नानां निरन्तरं सर्वतश्चाकचिक्येन सर्वकालमुन्निद्रेति भावः ३, 'जसोहरा' इति यशः सकलभुवनव्यापि धरतीति यशोधरा लिहादित्वादच्, जम्बूद्वीपो हि विदितमहिमा भुवनत्रयेऽप्यनया जम्ब्वोपलक्षितस्ततो भवति यथोक्तं यशोधारित्वमस्याः ४ ।

मू. (१९३) *सुभद्दा य विसाला य, सुजाया सुमणीतिया ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुदंसणाए जंबूए, नामधेज्जा दुवाल स ॥

वृ. 'सुभद्दा य' इति शोभनं भद्रं—कल्याणं यस्याः सा सुभद्रा, सकलकालं कल्याणभागिनी-त्यर्थः, न हि तस्याः कदाचिदप्युपद्रवाः संभवन्ति, महर्द्धिकेनाधिष्ठितत्वात् ५, 'विसाला य' इति विशाला—विस्तीर्णा आयामविष्कम्भाभ्यामुच्चैस्त्वेन चाष्टयोजनप्रमाणत्वात् ६, 'सुजाया' इति शोभनं जातं—जन्म यस्याः सा सुजाता, विशुद्धमणिकनकरत्नमूलद्रव्यतया जन्मदोषरहितेति भावः ७, 'सुमना इय' इति शोभनं मनो यस्याः सकाशाद् भवति सा सुमनाः, भवति हि तां पशयतां महर्द्धिकानां मनः शोभनमतिरमणीयत्वात् ८, 'विदेहजंबू' इति, विदेहेषु जम्बूविदिहजम्बूर्विदेहान्तर्गतोत्तरकुरुकृतनिवासत्वात् ९, 'सोमनसा' इति सौमनस्यहेतुत्वात् सौमनस्या, नहि तां पश्यतः कस्यापि मनो दुष्टं भवति, केवलं तां दृष्ट्वा प्रीतमनास्तां तदधिष्ठातारं च प्रशंसतीति १०, 'नियता' इति नियता सर्वकालमवस्थिता शाश्वतत्वात् ११, 'नित्यमंडिता' सद भषणभूथितत्वात् १२। 'सुदंसणाए' इत्यादि तान्येतानि सुदर्शनाया जम्ब्वा द्वादश नामधेयानि

मू. (१९४) *से केणट्ठेणं भंते! एवं वुच्चइ—जंबूसुदंसणा?, गोयमा! जंबूते णं सुदंसणाते जंबूदीवाहिवती अनाढिते नामं देवे महिड्डीए जाव पलिओवमट्ठितीए परिवसति, से णं तत्थ चउण्हं सामानियसाहस्सीणं जाव जंबूदीवस्स जंबूए सुदंसणाए अनाढियाते य रायधाणीए जाव विहरंति।*

कहि णं भंते! अनाढियस्स जाव समत्ता वत्तव्वया रायधाणीए महिड्डीए। अदुत्तरं च णं गोयमा! जंबुद्दीवे २ तत्थ तत्थ देसे तहिं २ बहवे जंबूरुक्खा जंबूवना जंबूवनसंडा निच्चं कुसुमिया जाव सिरीए अतीव उवसोभेमाणा २ चिट्ठंति। से तेणट्ठेणं गो०! एवं वुच्चइ—जंबुद्दीवे २, उदुत्तरं च णं गो०! जंबुद्दीवस्स सासते नामधेज्जे पन्नत्ते, जन्न कयावि नासि जाव निच्चे ॥

वृ. सम्प्रति सुदर्शनाशब्दप्रवृत्तिनिमित्तं पिपृच्छिषुरिदमाह—'से केणट्ठेणं भंते!' त्यादि प्रतीतं, निर्वचनमाह—'गोयमे'त्यादि सुगमं, नवरम् 'अणाढिए नामं देवे' इति, अनादृताः—अनादरक्रियाविषयीकृताः शेषा जम्बूद्वीपगता देवा येनात्मनोऽत्यद्भुतं महर्द्धिकत्वमीक्षमामेन सोऽनादृतः, सकलनिर्वचनभावार्थश्चायं—यस्मादेवं महर्द्धिकोऽनादृतनामा देवस्तत्र परिवसति ततस्तस्य समस्ताऽपि स्फाति तत्र कृतावासेति सा सुदर्शनाऽनादृता, राजधानीवक्तव्यताऽपि प्राग्वद्वक्तव्या, तदेवं यस्मादेवंरूपया जम्ब्वोपलक्षित एषद्वीपस्तस्माज्जम्बूद्वीप इत्युच्यते, अथवेदं जम्बूद्वीपशब्दप्रवृत्तिनिमित्तमिति दर्शयति—

'अदुत्तरं च ण'मित्यादि, अथान्यत् जम्बूद्वीपशब्दप्रवृत्तिकारणमिति गम्यते, गौतम! जम्बूद्वीपे द्वीपे उत्तरकुरुषु कुरुषु तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो जम्बूवृक्षा जम्बूवनानि जम्बूषण्डाः, इहैकजातीयवृक्षसमुदायो वनं, अनेकजातीयवृक्षसमूहो वनषण्डः, केवलं प्रधानेन व्यपदेश इति जम्बूवनं जम्बूषण्ड इति भेदेनोपात्तं, 'निच्चंकुसुमिया' इत्यादि विशेषणकदम्बकं प्राग्वत्, तत एष द्वीपो जम्बूद्वीपः, तथा चाह—'से एएणट्ठेण'मित्यादि।

सम्प्रति जम्बूद्वीपगतचन्द्रादिसङ्ख्यापरिज्ञानार्थमाह—

मू. (१९५) *जंबूद्दीवे णं भंते! दीवे कति चंदा पभासिंसु वा पभासेंति वा पभासिस्संति वा? कति सूरिया तविंसु वा तवंति वा तविस्संति वा? कति नक्खत्ता जोयं जोयंसु वा जोयंति*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा जोएस्संति वा ? कति महग्गहा चारं चरिंसु वा चरिंति वा चरिस्संति वा ? केवतिताओ तारागणकोडाकोडीओ सोहंसु वा सोहंति वा सोहेस्संतिवा ?

गोयमा ! जंबूद्दीवे णं दीवे दो चंदा पभासिंसु वा ३ दो सूरिया तविंसु वा ३ छप्पन्नं नक्खत्ता जोगं जोएंसु वा ३ छावत्तरं गहसतं चारं चरिंसु वा ३ ।

वृ. 'जंबूद्दीवे णं भंते ! दीवे' इत्यादि सुगमं, नवरं षट्पञ्चाशन्नक्षत्राणि एकैकस्य शशिनः परिवारेऽष्टाविंशतिर्नक्षत्राणां भावात्, षट्सप्ततं ग्रहशतमेकैकं शशिनं प्रत्यष्टाशीतेर्ग्रहाणां भावात्, तथैकस्य शशिनः परिवारे तारागणपरिमाणं षट्षष्टि सहस्राणि नव शतानि पञ्चसप्तत्यधिकानि कोटीकोटीनां, वक्ष्यति च–

॥ १ ॥ "छावट्ठिसहस्साइं नव चेव सयाइ पंचसयराइं ।
एगससीपरिवारो तारागणकोडिकोडीणं ॥"

मू. (१९६) *एगं च सतसहस्सं तेत्तीसं खलु भवे सहस्साइं ।*
नव य सया पन्नासा तारागणकोडकोडीणं ॥

मू. (१९७) *सोभिंसु वा सोभंति वा सोभिस्संति वा ।*

वृ. जम्बूद्वीपे च द्वौ शशिनौ तदेतद् द्वाभ्यां गुण्यते ततः सूत्रोक्तं परिमाणं भवति–एकं शतसहस्रं त्रयस्त्रिंशत्सहस्राणि नव शतानि पञ्चाशदधिकानि कोटीकोटीनामिति ॥ तदेवमुक्तो जम्बूद्वीपः, सम्प्रति लवणसमुद्रं विवक्षुरिदमाह–

मू. (१९८) *जंबूद्दीवं नाम दीवं लवणे नामं समुद्दे वट्टे वलयागारसंठाणसंठिते सव्वतो समंता संपरिक्खित्ता णं चिट्ठति ॥ लवणे णं भंते ! समुद्दे किं समचक्कवालसंठिते विसमचक्कवाल-संठिते ?, गोयमा ! समचक्कवालसंठिए नो विसमचक्कवालसंठिए ।*

लवणे णं भंते ! समुद्दे केवतियं चक्कवालविक्खंभेणं ? केवतियं परिक्खेवेणं पन्नत्ते ?, गोयमा ! लवणे णं समुद्दे दो जोयणसतसहस्साइं चक्कवालविक्खंभेणं पन्नरस जोयणसयसहस्साइं एगासीइसहस्साइं सयमेगोणचत्तालीसे किंचिविसेसाहिए लवणोदधिणो चक्कवालपरिक्खेवेणं ।

से णं एक्काए पउमवरवेदियाए एगेण य वनसंडेणं सव्वतो संता संपरिक्खित्ते चिट्ठइ, दोण्हवि वण्णओ । सा णं पउमवर० अद्धजोयणं उड्ढं० पंचधनुसयविक्खंभेणं लवणसमुद्दस-मियपरिक्खेवेणं, सेसं तहेव । से णं वनसंडे देसूणाइं दो जोयणाइं जाव विहरइ ।

लवणस्स णं भंते ! समुद्दस्स कति दारा पन्नत्ता ?, गोयमा ! चत्तारि दारा पन्नत्ता, तंजहा–विजये वेजयंते जयंते अपराजिते ॥ कहि णं भंते ! लवणसमुद्दस्स विजए नामं दारे पन्नत्ते ?, गोयमा ! लवमसमुद्दस्स पुरत्थिमपेरंते धायइखंडस्स दीवस्स पुरत्थिमद्धस्स पच्चत्थिमेणं सीओदाए महानदीए उप्पिं एत्थ णं लवणस्स समुद्दस्स विजए नामं दारे पन्नत्ते ?, गोयमा ! लवणसमुद्दस्स पुरत्थिमपेरंते धायइखंडस्स दीवस्स पुरत्थिमद्धस्स पच्चत्थिमेणं सीओदाए महानदीए उप्पिं एत्थ णं लवणस्स समुद्दस्स विजए नामं दारे पन्नत्ते अट्ठ जोयणाइं उड्ढं उच्चत्तेणं चत्तारि जोयणाइं विक्खंभेणं, एवं तं चेव सव्वं जहा जंबुद्दीवस्स विजयस्सरिसेवि (दारसरिसमेयंपि) रायहाणी पुरत्थिमेणं अन्नंमि लवणसमुद्दे ॥

कहि णं भंते ! लवणसमुद्दे वेजयंते नामं दारे पन्नत्ते ?, गोयमा ! लवणसमुद्दे दाहिणपेरंते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धायइसंडदीवस्स दाहिणद्धस्स उत्तरेणं सेसं तं चेव सव्वं । एवं जयंतेवि, नवरि सीयाए महानदीए उप्पिं भाणियव्वे ।। एवं अपराजितेवि, नवरं दिसीभागो भाणियव्वो । लवणस्स णं भंते ! समुद्दस्स दारस्स य २ एस णं केवतियं अबाधाए अंतरे पन्नत्ते ?, गोयमा !–

मू. (१९९)　*'तिन्नेव सतसहस्सा पंचानउतिं भवे सहस्साइं ।*
दो जोयणसत असिता कोसं दारंतरे लवणे ।।

वृ. भगवानाह–गौतम ! त्रीणि योजनशतसहस्राणि पञ्चनवति सहस्राणि अशीते द्वे योजनशते क्रोशश्चैको द्वारस्य द्वारस्याबाधयाऽन्तरं प्रज्ञप्तं, तथाहि–एकैकस्य द्वारस्य पृथुत्वं चत्वारि योजनानि, एकैकस्मिंश्च द्वारे एकैका द्वारशाखा क्रोशबाहल्या, द्वारे च द्वे द्वे शाखे, तत एकैकस्मिन् द्वारे पृथुत्वं सामस्त्येन चिन्त्यमानं सार्द्धयो जनचतुष्टयप्रमाणं प्राप्यते, चतुर्णामपि द्वाराणामेकत्र पृथत्वमीलने जातान्यष्टादश योजनानि, तानि लवणसमुद्रपरिरयपरिमाणात् पञ्चदश शतसहस्राणि एकाशीतिसहस्राणि एकोनचत्वारिंशं योजनशतं इत्येवंपरिमाणादपनीयन्ते, अपनीय च यच्छेषं तस्य चतुर्भिर्भागेऽपहृते यदागच्छति तत् द्वाराणां परस्परमन्तरपरिमाणं, तच्च यथोक्तमेव,

॥ १ ॥　"आसीया दोन्नि सया पणनउइसहस्स तिन्नि लक्खा य ।
कोसो य अंतरं सागरस्स दाराण विन्नेयं ।।'

मू. (२००) *जाव अबाधाए अंतरे पन्नत्ते । लवणस्स णं पएसा धायइसंडं दीवं पुट्ठा, तहेव जहा जंबूदीवे धायइसंडेवि सो च्चेव गमो । लवणे णं भंते ! समुद्दे जीवा उदाइत्ता सो चेव विही, एवं धायइसंडेवि । से केणट्ठेणं भंते ! एवं वुच्चइ–लवणसमुद्दे २ ?,*

गोयमा ! लवणे णं समुद्दे उदगे आविले रइले लोणे लिंदे खारए कडुए अप्पेज्जे बहूणं दुपयचउप्पयमियपसुपक्खिसिरीसवाणं नन्नत्थ तज्जोणियाणं सत्ताणं, सोत्थिए एत्थ लवणाहिवई देवे महिड्डीए पलिओवमट्ठिईए, से णं तत्थ सामानिय जाव लवणसमुद्दस्स सुत्थियाए रायहाणीए अन्नेसिं जाव विहरइ । से एएणट्ठेणं गो० ! एवं वुच्चइ लवणे णं समुद्दे २, अदुत्तरं च णं गो० ! लवणसमुद्दे सासए जाव निच्चे ।।

वृ. 'जंबूद्दीवं दीव'मित्यादि जम्बूद्वीपं लवणो नाम समुद्रो 'वृत्तः' वर्त्तुलः, स च चन्द्रमण्डलवन्मध्यपरिपूर्णोऽपि शङ्क्येत तत आह–'वलयाकारसंस्थानसंस्थितः' वलयाकारं–मध्यशुषिरं यत्संस्थानं तेन संस्थितो वलयाकारसंस्थानसंस्थितः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन 'परिक्षिप्य' वेष्टयित्वा तिष्ठति ।। 'लवणे णं भंते !' इत्यादि, लवणो भदन्त ! समुद्रः किं समचक्रवालसंस्थितो यद्वा विषमचक्रवालसंस्थितः ?, चक्रवालसंस्थानस्योभयथाऽपि दर्शनात्, भगवानाह–गौतम ! समचक्रवालसंस्थितः सर्वत्र द्विलक्षयोजनप्रमाणतया चक्रवालय भावात्, नो विषमचक्रवालसंस्थितः । सम्प्रति चक्रवालविष्कम्भादिपरिमाममेव पृच्छति–'लवणे णं भंते ! समुद्दे' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! द्वे योजनशतसहस्रे चक्रवालविष्कम्भेन, जम्बूद्वीपविष्कम्भादेत- द्विष्कम्भस्य द्विगुणत्वात्, पञ्चदश योजनशतसहस्राणि एकाशीति सहस्राणि शतमेकोनचत्वारिंशं च किञ्चिद्विशेषोनं परिक्षेपेण, परिक्षेपप्रमाणं चैतत् परिधिगणितभावनया स्वयं भावनीयं क्षेत्रसमास- टीकातो वा परिभावनीयम् ।

'से ण'मित्यादि, 'सः' लवणनामा समुद्र एकया पद्मवरवेदिकया, अष्टयोजनोच्छ्रित-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

जगत्युपरिभाविन्येति गम्यते, एकेन वनखण्डेन सर्वतः समन्तात् संपरिक्षिप्तः, सा च पद्मवरवेदिका-ऽर्द्धयोजनमूर्द्धमुच्चैस्त्वेन पञ्चधनुःशतानि विष्कम्भतः परिक्षेपतो लवणसमुद्रपरिक्षेपप्रमाणा, वनखण्डो देशोने द्वे योजने, अभ्यन्तरोऽपि पद्मवरवेदिकाया वनषण्ड एवंप्रमाण एव, उभयोरपि वर्णनं जम्बूद्वीपपद्मवरवेदिकावनषण्डवत् ॥ सम्प्रति द्वारवक्तव्यतामभिधित्सुरिदमाह–'लवणस्स णं भंते !' इत्यादि, लवणस्य भदन्त ! समुद्रस्य कति द्वाराणि प्रज्ञप्तानि ?, भगवानाह–गौतम ! चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा–विजयवैजयन्तजयन्तापराजिताख्यानि ।

'कहि ण'मित्यादि, क्व भदन्त ! लवणसमुद्रस्य विजयनाम द्वारं प्रज्ञप्तं ?, भगवानाह–गौतम !, लवणसमुद्रस्य पूर्वपर्यन्ते धातकीखण्डद्वीपपूर्वार्द्धस्य 'पच्चत्थिमेण'न्ति पश्चिमभागे शीतोदाया महानद्या उपर्यत्रान्तरे लवणसमुद्रस्य विजयनाम द्वारं प्रज्ञप्तं, अष्टौ योजनान्यूर्द्धमुच्चैस्त्वेन एवं जम्बूद्वीपगतविजयद्वारसद्दशमेतदपि वक्तव्यं यावद्बहून्यष्टावष्टौ मङ्गलकानि यावद्बहवः सहस्रपत्रहस्तका इति ॥ सम्प्रति विजयद्वारनामनिबन्धनं प्रतिपिपादयिषुरिदमाह–

'से केणट्ठेणं भंते' इत्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते–विजयद्वारं विजय-द्वारम् ? इति, भगवानाह–गौतम ! विजये द्वारे विजयो नाम देवो महर्द्धिको यावद् विजयाया राजधान्या अन्येषां च बहूनां विजयाराजधानीवास्तव्यानां दानमन्तराणां देवानां देवीनां चाधिपत्यं यावत्परिवसति, ततो विजयदेवस्वामिकत्वाद् विजयमिति, तथा –'से एएणठेण'मित्यादि सुगमं।

'कहि णं भंते !' इत्यादि, क्वभदन्त ! विजयस्य देवस्य विजया नाम राजधानी प्रज्ञप्ता ?, भगवानाह–गौतम ! विजयद्वारस्य पूर्वस्यां दिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रे द्वादश योजनसहस्राण्यवगाह्यात्रान्तरे विजयस्य देवस्य विजया नाम राजधानी प्रज्ञप्ता, सा च जम्बूद्वीपविजयद्वाराधिपतिविजयाराजधानीवद्वक्तव्या ।

सम्प्रति वैजयन्तद्वारप्रतिपादनार्थमाह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! लवणस्य समुद्रस्य वैजयन्तं नाम द्वारं प्रज्ञप्तं ?, भगवानाह–गौतम ! लवणसमुद्रस्य दक्षिणपर्यन्ते धातकीखण्ड-द्वीपदक्षिणार्द्धस्योत्तरतोऽत्र लवणसमुद्रस्य वैजयन्तं नाम द्वारं प्रज्ञप्तं, एतद्वक्तव्यता सर्वाऽपि विजयद्वारवदवसेया, नवरं राजधानी वैजयन्तद्वारस्य दक्षिणतो वेदितव्या ।

जयन्तद्वारप्रतिपादनार्थमाह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! लवसमुद्रस्य जयन्तं द्वारं प्रज्ञप्तं ?, भगवानाह–गौतम ! लवणसमुद्रस्य पश्चिमपर्यन्ते धातकीखण्डपश्चिमार्द्धस्य पूर्वतः सीताया महानद्या उपरि लवणस्य समुद्रस्य जयन्तं नाम द्वारं प्रज्ञप्तं, तद्वक्तव्यताऽपि विजयद्वारवद् वक्तव्या, नवरं राजधानी जयन्तद्वारस्य पश्चिमभागे वक्तव्या ।

अपराजितद्वारप्रतिपादनार्थमाह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! लवणस्य समुद्रस्यापरिजितं नाम द्वारं प्रज्ञप्तं ?, भगवानाह–गौतम ! लवणलसमुद्रस्योत्तरपर्यन्ते धातकी-खण्डद्वीपोत्तरार्द्धस्य दक्षिणतोऽत्र लवणस्य समुद्रस्यापराजितं नाम द्वारं प्रज्ञप्तं । एतद्वक्तव्यताऽपि विजयद्वारवन्निरवशेषा वक्तव्या, नवरं राजधानी अपराजितद्वार- स्योत्तरतोऽवसातव्या ।

सम्प्रति द्वारस्य द्वारस्यान्तरं प्रतिपादयितुकाम आह–'लवणस्स णं भंते !' इत्यादि, लवणस्य भदन्त ! समुद्रस्य द्वारस्य २ 'एस ण'मिति एतद् अन्तरं कियत्या 'अबाधया' अन्तरालत्वाव्याघात-रूपया प्रज्ञप्तं ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

वृ. 'लवणस्स णं भंते ! समुद्दस्स पदेसा' इत्यादि सूत्रचतुष्टयं प्राग्वद्भावनीयम् ॥ सम्प्रति लवणसमुद्रनामान्वर्थं पृच्छति-'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते-लवणः समुद्रो लवणः समुद्रः ? इति, भगवानाह-गौतम ! लवणस्य समुद्रस्य उदकः 'आविलम्' अविमलम-स्वच्छं प्रकृत्या 'रइलं' रजोवत्, जलवृद्धिहानिभ्यां पङ्कबहुलमिति भावः, लवणं सान्निपाकर-सोपेतत्वाल्लिन्द्रं गोवराक्ष (ख्य) रसविशेषकलितत्वात्, 'क्षारं' तीक्ष्णं लवणरसविशेषवत्वात्, 'कटुकं' कटुकरसोपेतत्वात्, अत एवोपद्रवव्रातादपेयं, केषामपेयम् ? -चतुष्पदमृगपक्षसरीसृपाणां, नान्यत्र 'तद्योनिकेभ्यः' लवणसमुद्रयोनिकेभ्यः सत्वेभ्यस्तेषां पेयमिति भावः ।

तद्योनिकतया तेषां तदाहारकत्वात्, तदेवं यस्मात्तस्योदकं लवणमतोऽसौ लवणः समुद्र इति, अन्यच्च 'सुट्ठिए लवणाहिवई' इत्यादि सुगमं, नवरमेष भावार्थ-यस्मात् सुस्थितनामा तदधिपति-लवणाधिपतिरिति स्वकल्पपुस्तके प्रसिद्धम्, आधिपत्यं च तस्याधिकृतसमुद्रस्य विषये नान्यस्य ततोऽप्यसौ लवणसमुद्र इति, तथा चाह-'सेएएणट्ठेण'मित्यादि ।

सम्प्रति लवणसमुद्रगतचन्द्रादिसङ्ख्यापरिमाणप्रतिपादनार्थमाह-

मू. (२०१) *लवणे णं भंते ! समुद्दे कति चंदा पभासिंसु वा पभासिंति वा पभासिस्संति वा ?, एवं पंचण्हवि पुच्छा, गोयमा ! लवणसमुद्दे चत्तारि चंदा पभासिंसु वा ३ चत्तारि सूरिया तविंसु वा ३ बारसुत्तरं नक्खत्तसयं जोगं जोएंसु वा ३*

तिन्नि बावन्ना महग्गहसया चारं चरिंसु वा ३ दुन्नि सयसहस्सा सत्तट्ठि च सहस्सा नव य सया तारागणकोडाकोडीणं सोभं सोभिंसु वा ३ ॥

वृ. 'लवणे णं भंते ! समुद्दे' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! चत्वारश्चन्द्राः प्रभासितवन्तः प्रभासन्ते प्रभासिष्यन्ते, चत्वारः सूर्यास्तापितवन्तस्तापयन्ति तापयिष्यन्ति, ते च जम्बूद्वीपगतचन्द्रसूर्यैः सह समश्रेण्या प्रतिबद्धा वेदितव्याः, तद्यथा-द्वौ सूर्यौ एकस्य जम्बूद्वीपगतस्य सूर्यस्य श्रेण्या प्रतिबद्धौ, द्वौ सूर्यौ द्वितीयस्य जम्बूद्वीपगतस्य सूर्यस्य, तथा द्वौ चन्द्रमसावेकस्य जम्बूद्वीपगतस्य चन्द्रस्य समश्रेण्या प्रतिबद्धौ, द्वौ द्वितीयचन्द्रस्य, तौ चैवम्-यदा जम्बूद्वीपगत एकः सूर्यो मेरोर्दक्षिणतश्चारं चरति तदो लवणसमुद्रेऽपि तेन सह समश्रेण्या प्रतिबद्ध एकः शिखाया अभ्यन्तरं चारं चरति द्वितीयस्तेनैव सह श्रेण्या प्रतिबद्धः शिखायाः परतः ।

तदैव च यो जम्बूद्वीपे मेरोरुत्तरतश्चारं चरति तेन सह समश्रेण्या प्रतिबद्धो लवणसमुद्रे उत्तरत एकः शिखाया अभ्यन्तरं चारं चरति, द्वितीयस्तु तेनैव सह समश्रेण्या प्रतिबद्धः शिखायाः परतः, एवं चन्द्रमसोऽपि जम्बूद्वीपगतचन्द्राभ्यां सह समश्रेणिप्रतिबद्धा भावनीयाः, अत एव जम्बूद्वीप इव लवणसमुद्रेऽपि यदा मेरोर्दक्षिणतो दिवसः संभवति तदा मेरोरुत्तरतोऽपि लवणसमुद्रे दिवसः, यदा च मेरोरुत्तरतो लवणसमुद्रे दिवसस्तथा दक्षिणतोऽपि दिवसस्तदा च पूर्वस्यां पश्चिमायां दिशि लवणसमुद्रे रात्रि, यदा च मेरोः पूर्वस्यां दिशि लवणसमुद्रे दिवसस्तदा पश्चिमायामपि दिवसः, यदा च पश्चिमायां दिवसस्तदा पूर्वदिश्यपि, तदा च मेरोर्दक्षिणत उत्तरतश्च नियमतो रात्रि, एवं धातकीखण्डादिष्वपि भावनीयं, तद्गतानामपि चन्द्रसूर्याणां जम्बूद्वीपगतचन्द्रसूर्यैः सह समश्रेण्या व्यवस्थितत्वात्, उक्तं च सूर्यप्रज्ञप्तौ-

"जया णं लवणसमुद्दे दाहिणड्ढे दिवसे भवइ तया णं उत्तरड्ढेवि दिवसे हवइ, जया णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तरद्धे दिवसे हवइ तया णं लवणसमुद्दे परत्थिमपच्चत्थिमेणं राई भवइ, एवं जहा जंबूद्दीवे दीवे तहेव'' तथा ''जया णं धायईसंडे दीवे दाहिणद्धे दिवसे भवइ तया णं उत्तरद्धेवि, जया णं उत्तरद्धे दिवसे हवइ तया णं धायइसंडे दीवे मंदराणं पव्वयाणं पुरत्थिमपच्चत्थिमेणं राई हवइ, एवं जहा जंबूद्दीवे दीवे तहेव, कालोए जहा लवणे तहेव'' तथा ''जया णं अब्भिंतरपुक्खरद्धे दाहिणद्धे दिवसे भवइ तया णं उत्तरद्धे दिवसे हवइ, जया णं उत्तरद्धे दिवसे हवइ तया णं अब्भिंतरद्धे मंदराणं पव्वयाणं पुरत्थिमपच्चत्थिमेणं राई हवइ, सेसं जहा जंबूद्दीवे तहेव'' आह–लवणसमुद्रे षोडश योजनसहस्रप्रमाणा सिखा ततः कथं चन्द्रसूर्याणां तत्र तत्र देशे चारं चरतां न गतिव्याघातः ?, उच्यते, इह लवणसमुद्रवर्जेषु शेषेषु द्वीपसमुद्रेषु यानि ज्योतिष्कविमानानानि तानि सर्वाण्यपि सामान्यरूपस्फटिकमयानि, यानि पुनर्लवणसमुद्रे ज्योतिष्कविमानानि तानि तथाजगतस्वाभाव्यादुदकस्फाटकस्वभावस्फटिकमयानि, तथा चोक्तं सूर्यप्रज्ञप्तिनिर्युक्तो–

॥ १ ॥ ''जोइसियविमाणाइं सव्वाइं हवंति फलिहमइयाइं ।
दगफालियामया पुण लवणे जे जोइसविमाणा ॥''

ततो न तेषामुदकमध्ये चारं चरतामुदकेन व्याघातः, अन्यच्च सेषद्वीपसमुद्रेषु चन्द्रसूर्यविमानान्यधोलेश्याकानि यानि पुनर्लवणसमुद्रे तानि तथाजगत्स्वाभाव्यादूर्ध्वलेश्याकानि तेन शिखायामपि सर्वत्र लवणसमुद्रे प्रकाशो भवति, अयं चार्थ प्रायो बहूनामप्रतीत इति संवादार्थमेतदर्थप्रतिपादको जिनभद्रगणिक्षमाश्रमणवरचितो विशेषणवतीग्रन्थ उपदर्श्यते–''सोलससाहसियाए सिहाए कहं जोइसियविघातो न भवति ?, तत्थ भन्नइ–जेण सूरपन्नत्तीए भणियं–

॥ २ ॥ ''जोइसियविमाणाइं सव्वाइं हवंति फलिहमइयाइं ।
दगफालिया मया पुण लवणे जे जोइसविमाणा ॥''

जं सव्वदीवसमुद्देसु फालियामयाइं लवणसमुद्दे चेव केवलं दगफालियामयाइं तत्थ इदमेव कारणं मा उदगेण विघातो भवउ इति, जंबूसूरपन्नत्तीए चेव भणियं–

॥ १ ॥ ''लवणंमि उ जोइसिया उड्ढलेसा हवंति नायव्वा ।
तण परं जोइसिया अहलेसागा मुणेयव्वा ॥''

तंपि उदगमालावभासणत्थमेव लोगठिई एसा'' इति । तथा द्वादशं क्षत्रशतं एवं चत्वारो हि लवणसमुद्रे शशिनः, एकैकस्य च राशिनः परिवारेऽष्टाविंशतिर्नक्षत्राणि, ततोऽष्टाविंशतेश्चतुर्भिर्गुणने भवति द्वादशोत्तरं शतमिति । त्रीणि द्विपञ्चाशदधिकानि महाग्रहशतानि, एकैकस्य राशिन– परिवारेऽष्टाशीतेर्ग्रहाणां भावात्, द्वे शतसहस्रे सप्तषष्टि सहस्राणि नव शतानि तारागणकोटीकोटीनाम् २६७९००००००००००००००००, उक्तञ्च–

॥ १ ॥ ''चत्तारि चेव चंदा चत्तारि य सूरिया लवणतोए ।
बारं नक्खत्तसयं गहाण तिन्नेव बावन्ना ।.

॥ २ ॥ दो चेव सयसहस्सा सत्तट्ठी खलु बवे सहस्सा य ।
नव य सया लवणजले तारागणकोडिकोडीणं ॥

इह लवणसमुद्रे चतुर्दश्यादिषु तिथिषु नदीमुखानामापूरणतो जलमतिरेकेण प्रवर्द्धमानमुपलक्ष्यते तत्र कारणं पिपृच्छिपुरिदमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२०२) कम्हा णं भंते ! लवणसमुद्दे चाउद्दसट्ठमुद्दिट्ठपुन्निमासिणीसु अतिरेगं २ वड्ढति वा हायति वा ?, गोयमा ! जंबुद्दीवस्स णं दीवस्स चउद्दिसिं बाहिरिल्लाओ वेइयंताओ लवणसमुद्दं पंचानउतिं २ जोयणसहस्साइं ओगाहित्ता एत्थ णं चत्तारि महालिंजरसंठाणसंठिया महइमहालया महापायाला प०--वलयामुहे केतूए जूवे ईसरे, ते णं महापाताला एगमेगं जोयणसयसहस्सं उव्वेहेणं मूले दस जोयणसहस्साइं विक्खंभेणं मज्झे एगपदेसियाए सेढीए एगमेगं जोयणसतसहस्सं विक्खंभेणं उवरिं मुहमूले दस जोयणसहस्साइं विक्खंभेणं ।

तेसि णं महापायालाणं कुड्डा सव्वत्थ समा दसजयणसतबाहल्ला पन्नत्त सव्ववइरामया अच्छा जाव पडिरूवा । तत्थ णं बहवे जीवा पोग्गला य अवक्कमंति विउक्कमंति चयंति उवचयंति सासया णं ते कुड्डा दव्वट्ठयाए वण्णपज्जवेहिं० असासया ।। तत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओवमट्ठितीया परिवसंति, तंजहा--काले महाकाले वेलंबे पभंजणे ।

तेसि णंमहापायासाणं तओ तिभागा पन्नत्ता, तंजहा--हेट्ठिल्ले तिभागे मज्झिल्ले तिभागे उवरिमे तिभागे ।। ते णं तिभागा तेत्तीसं जोयणसहस्सा तिन्नि य तेत्तीसं जोयणसतं जोयणतिभागं च बाहल्लेणं । तत्थ णं जे से हेट्ठिल्ले तिभागे एत्थ णं वाउकाओ संचिट्ठति, तत्थ णं जे से मज्झिल्ले तिभागे एत्थ णं वाउकाए य आउकाए य संचिट्ठति, तत्थ णं जे से उवरिल्ले तिभागे एत्थ णं आउकाए संचिट्ठति ।

अदुत्तरं च णं गोयमा ! लवणसमुद्दे तत्थ २ देसे बहवे खुड्डालिंजरसंठाणसंठिया कुड्डपायालकलसा पण्णत्ता, ते णं खुड्डा पाताला एगमेगं जोयणसहस्सं उव्वेहेणं मूले एगमेगं जोयणसतं विक्खंभेणं मज्झे एगपदेसियाए सेढिए एगमेगं जोयणसहस्सं विक्खंभेणं उप्पिं मुहमूले एगमेगं जोयणसतं विक्खंभेणं । तेसि णं खुड्डागपायालाणं कुड्डा सव्वत्थ समा दस जोयणाइं बाहल्लेणं पन्नत्ता सव्ववइरामया अच्छा जाव पडिरूवा । तत्थ णं बहवे जीवा पोग्गला य जाव असाययावि, पत्तेयं २ अद्धपलिओव- मट्ठितीताहिं देवताहिं परिग्गहिया ।

तेसि णं खुड्डगपातालाणं ततो तिभागा प०, तंजहा--हेट्ठिल्ले तिभागे मज्झिल्ले तिभागे उवरिल्ले तिभागे, ते णं तिभागा तिन्नि तेत्तीसे जोयणसते जोयणतिभागं च बाहल्लेणं पन्नत्ते ।

तत्थ णं जे से हेट्ठिल्ले तिभागे एत्थ णं वाउकाओ मज्झिल्ले तिभागे वाउआए आउयाते य उवरिल्ले आउकाए, एवामेव सपुव्वावरेणं लवणसमुद्दे सत्त पायालसहस्सा अट्ठ य चुलसीता पातालसता भवंतीति मक्खाया ।। तेसि णं महापायालाणं खुड्डगपायालाण य हेट्ठिममज्झिमिल्लेसु तिभागेसु बहवे ओराला वाया संसेयंति संमुच्छिमंति एयंति चलंति कंपंति खुब्भंति घट्टंति फंदंति तं तं भावं पिणमंति तया णं से उदए उण्णामिज्जति ।

जया णं तेसिं महापायालाणं खुड्डागपायालाण य हेट्ठिलमज्झिल्लेसु तिभागेसु नो बहवे ओराला जाव तं तं भावं न परिणमंति तया णं से उदए नो उन्नामिज्जइ अंतरावि य णं ते वायं उदीरेंति अंतरावि य णं से उदगे उण्णामिज्जइ अंतरावि य ते वाया नो उदीरंति अंतरावि य णं से उदगे नो उण्णामिज्जइ ।

एवं खलु गो० ! लवणसमुद्दे चाउद्दसट्ठमुद्दिट्ठपुण्णमासिणीसु अइरेगं २ वड्ढति वा हायति वा।

वृ. 'कम्हा णं भंते !' इत्यादि, कस्माद्भदन्त ! लवणसमुद्रे चतुर्दश्यष्टम्युद्दिष्टपौर्णमासीषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिथिषु, अत्रोद्दिष्टाःअमावास्या पौर्णमासी प्रतीता, पूर्णो मासो यस्यां सा पौर्णमासी, 'प्रज्ञादित्वा-त्स्वार्थेऽण्' अन्ये तु व्याचक्षते–पूर्णो माः–चन्द्रमा अस्यामिति पौर्णमासी, अण् तथैव, प्राकृतत्वाच्च सूत्रे 'पुन्नमासिणी'ति पाठः, 'अइरेगं अइरेगं' अतिशयेन अतिशयेन वर्द्धते हीयंते वा ?, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे यो मन्दरपर्वतस्तस्य चतसृषु पूर्वादिषु दिक्षु लवणसमुद्रं पञ्चनवतिं योजनसहस्राण्यवगाह्यात्रान्तरे चत्वारो 'महइमहालया' अतिशयेन महान्तो महालिञ्जरं–महापिडहं तत्संस्थानसंस्थिताः, कचित् 'महारंजरसंठाणसंठिया' इति पाठस्तत्रारञ्जरः–अलिञ्जर इति, महापातालकलशाः प्रज्ञप्ताः, उक्तं च–

॥१॥ "पणनउइसहस्साइं ओगाहित्ता चउद्दिसिं लवणं ।
चउरोऽलिंजरसंठाणसंठिया होंति पायाला ॥"

तानेव नामतः कथयति, तद्यथा–मेरोः पूर्वस्यं दिशि वडवामुखः दक्षिणस्यां केयूपः अपरस्यां यूपः उत्तरस्यामीश्वरः, ते चत्वारोऽपि महापातालकलशा एकैकं योजनशतसहस्रं–लक्षं उद्वेधेन मूले दश योजनसहस्राणि विष्कम्भेन तत ऊर्ध्वं एकप्रादेशिक्या श्रेण्या विष्कम्भतः प्रवर्द्धमाना २ मध्ये एकैकं योजनशतसहस्रं विष्कम्भेन तत ऊर्ध्वं भूयोऽप्येकप्रादेशिक्या श्रेण्या विष्कम्भतो हीयमाना हीयमाना उपरि मुखमूले दश योजनसहस्रणि विष्कम्भतः, उक्तश्च–

॥१॥ "जोयणसहस्सदसगं मूले उवरिं च होंति विच्छिण्णा ।
मज्झे य सयसहस्सं तेत्तियमेत्तं च ओगाढा ॥"

'तेसि णं' मित्यादि, तेषां महापातालकलशानां कुड्याः सर्वत्र समा दश योजनशतबाहल्या योजनसहस्रबाहल्या इत्यर्थः, सर्वात्मना वज्रमयाः 'अच्छा जाव पडिरूवा' इति प्राग्वत् ॥ 'तत्थ णं' मित्यादि, तेषु वज्रमयेषु कुडयेषु बहवो जीवाः पृथिवीकायिकाः पुद्गलाश्च 'अपक्रामन्ति' गच्छन्ति 'व्युत्क्रामन्ति' उत्पद्यन्ते जीवा इति सामर्थ्यादगम्यं, जीवानामेवोत्पत्तिधर्मकतया प्रसिद्धत्वात्, 'चीयन्ते' चयमुपगच्छन्ति 'उपचीयन्ते' उपचयमायान्ति, एतच्च पदद्वयं पुद्गलापेक्षं, पुद्गलानामेव चयापचयधर्मकतया व्यवहारात्, तत एवं सकलकालं तदाकारस्य सदाऽवस्थानात् शाश्वतास्ते कुड्या द्रव्यार्थतया प्रज्ञप्ताः, वर्णपर्यायैः रसपर्यायैः गन्धपर्यायैः स्पर्शपर्यायैः पुनर-शाश्वताः, वर्णादीनां प्रतिक्षणं कियत्कालादूर्द्ध वाऽन्यथाऽन्यथा भवनात् ।

'तत्थ णं' मित्यादि, तत्र तेषु चतुर्षु पातालकलशेषु चत्वारो देवा महर्द्धिका यावत्करणा-न्महाद्युतिका इत्यादि परिग्रहः, पल्योपमस्थितिकाः परिवसन्ति, तद्यथा–'काले' इत्यादि, वडवामुखे कालः केयूपे महाकालः यूपे वेलम्बः ईश्वरे प्रभञ्जनः ॥ 'तेसि णं' मित्यादि, ते त्रयोऽपि त्रिभागास्त्रय-स्त्रिशद् योजनसहस्राणि त्रीणि योजनशतानि त्रयस्त्रिंशानि योजनत्रिभागं च बाहल्येन प्रज्ञप्ताः । तत्र चतुर्ष्वपि पातालकलशेषु अधस्तनेषु त्रिभागेषु वातकायः संतिष्ठति, मध्यमेषु त्रिभागेषु वायुकायोऽप्कायश्च, उपरितनेषु त्रिभागेष्वप्काय एव । 'अदुत्तरं च णं' मित्यादि, अथान्य गौतम ' लवणसमुद्रे 'तत्थ तत्थ देसे तहिं तहिं' इति तेषां पातालकलशानामन्तरेषु तत्र २ देशे तस्य २ देशस्य तत्र २ प्रदेशे क्षुल्लारञ्जरसंस्थानसंस्थिताः क्षुल्लाः पातालकलशाः प्रज्ञप्ताः, ते क्षुल्लाः पातालकलशा एकमेकं योजनसहस्रमुद्वेधेन मूले एकैकं योजनशतं विष्कम्भेन मध्ये एकैकं योजनसहस्रं विष्कम्भेन उपरि मुखमूले एकैकं योजनशतं विष्कम्भेन । 'तेसि णं' मित्यादि, तेषां

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

क्षुल्लकपातालकलशानां कुड्याः सर्वत्र समा दश दश योजनानि बाहल्यतः, उक्तञ्च—

॥१॥ "जोयणसयविच्छिन्ना मूले उवरि दस सयाणि मज्झंमि।
ओगाढा य सहस्सं दसजोयणिया य से कुड्डा ॥"

'सव्ववइरामया' इत्यादि प्राग्वद् यावत् 'फासपज्ज्ववेहिं असासया' इति, प्रत्येकं २ तेऽर्द्धपल्योपमस्थितिकाभिर्देवताभि परिगृहीताः ॥ 'ते ण'मित्यादि, ते त्रिभागाः प्रत्येकं त्रीनि योजनशतानि 'त्रयस्त्रिंशानि' त्रयस्त्रिंशदधिकानि योजनत्रिभागं च बाहल्येन प्रज्ञप्ताः, तत्र सर्वेषामपि क्षुल्लकपातालकशानामधस्तेषु त्रिभागेषु वायुकायः संतिष्ठति, मध्येषु त्रिभागेषु वायुकायोऽप्कायश्च, उपरितनेषु त्रिभागेष्वप्कयाः संतिष्ठति, एवमेव 'सपूर्वापरेण' पूर्वापरसमुदायसङ्ख्यया सप्त पातालकलशहसहस्राणि क्षुल्लकपातालकलशसहस्राणि, अष्टौ च पातालकलशशतानि—क्षुल्लकपातालकलशशतानि 'चतुरशीतानि' चतुरशीत्यधिकानि भवन्तीत्याख्यातं मया शेश्षैश्रश्च तीर्थकृद्भि,: उक्तञ्च—

॥१॥ "अन्नेवि य पायाला खुड्डालंजरसगठिया लवणे।
अट्ठसया चुलसीया सत्त सहस्सा य सव्वेवि ॥
॥२॥ पायालाण विभागा सव्वाणवि तिन्नि तिन्नि विन्नेया।
हेट्ठिमभागे वाऊ मज्झे वाऊ य उदगं च ॥
॥३॥ उवरिं उदगं भणियं पढमगबीएसु वाउ संखुभिओ।
उड्ढं वामइ उदगं रिवड्ढइ जलनिही खुभिओ ॥

'तेसि ण'मित्यादि, तेषां 'क्षुल्लकपातालानां' क्षुल्लकपातालकलशानां महापातालानां चाधस्तनमध्येषु त्रिभागेषु तथाजगस्थितिस्वाभाव्यात् प्रतिदिवसं द्विकृत्वस्तत्रापि चतुर्दश्यादिषु तिथिष्वतिरेकेष 'बहवः' अतिप्रभूताः 'उदाराः' ऊर्द्धगमनस्वभावाः प्रबलशक्तयश्च, उत्—प्राबल्येन आरो येषां ते उदारा इति व्यात्पत्तेः, 'वाताः' वायवः 'संस्विद्यन्ते' उत्पत्यभिमुखीभवन्ति ततः सक्षणानन्तरं 'संमूर्च्छीन्ति' संमूर्च्छजन्मना लब्धात्मलाभा भवन्ति ततः 'चलन्ति' कम्पन्ते वातानां चलनस्वभावत्वात्, ततः 'घट्टन्ते' परसपरं सङ्घट्टमाप्नुवन्ति, तदनन्तरं 'क्षउभ्यन्ते' जातमहाद्भुतशक्तिकाः सन्त ऊर्द्धमितस्ततो विप्रसरन्ति, ततः 'उदीरयन्ति' अन्यान् वातान् जलमपि चोत्—प्राबल्येन प्रेरयन्ति, तं तं देशकालोचितं मन्दं तीव्रं मध्यमं वा भावं परिणामं 'परिणमन्ति' धातूनामनेकार्थत्वात् प्रपद्यन्ते।

'जया णं तेसिं खुड्डापायालाण' मित्यादि सुगमं भावितत्वात्। 'तया ण'मित्यादि, तदा णमिति वाक्यालङ्कारे 'तद्' उदकम् 'उन्नामिज्जंते' उन्नाम्यते ऊर्द्धमुत्क्षिप्यत इति भावः।

'जया ण'मित्यादि, यदा पुनः 'ण'मिति पुनरर्थे निपातानामनेकार्थत्वात्, तेषां क्षुल्लकपातालानां महापातालानां चाधस्तनमध्यमेषु त्रिभागेषु नो बहव उदारा वाताः संस्विद्यन्ते इत्यादि प्राग्वत् 'तया ण'मित्यादि तदा तदुदकं 'नोन्नाम्यते' नोर्द्धमुत्क्षिप्यते उत्क्षेपकाभावात्, एतदेव स्पष्टतरमाह—'अंतराविय ण'मित्यादि, 'अन्तरा' अहोरात्रमध्ये द्विकृत्वः प्रतिनियते कालविभागे पक्षमध्ये चतुर्दश्यादिषु तिथिष्वतिरेकेण ते वाताः तथाजगत्स्वाभाव्यादुदीर्यन्ते धातूनामनेकार्थत्वादुत्पद्यन्ते, ततोऽन्तराअहोरात्रमध्ये द्विकृत्वः प्रतिनियते कालविभागे पक्षमध्ये चतुर्दश्यादिषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिथिषु अतिरेकेण तत उदकमुन्नाम्यते ।

'अंतराविय ण'मित्यादि, 'अन्तरा' प्रतिनियतकालविभागादन्यत्र ते वाताः 'नोदीर्यन्ते' नोत्पद्यन्ते, तदभावात् 'अन्तरा' प्रतिनियतकालविभागादन्यत्र कालविभागे उदकं नोन्नाम्यते उन्नामकाभावात्, तत एवं खलु गौतम ! लवणसमुद्रे चतुर्दश्यष्टम्युद्दिष्टपूर्णमासीषु तिथिषु 'अतिरेकमतिरेकम्' अतिशयेनातिशयेन वर्द्धते हीयते वेति ।

तदेवं चतुर्दश्यादिषु तिथिष्वतिरेकेण जलवृद्धौ कारणमुक्तमिदानीमहोरात्रमध्ये द्विकृत्वोऽतिरेकेण जलवृद्धौ कारणमधित्सुराह–

मू. (२०३) *लवणे णं भंते ! समुद्दाए तीसाए मुहुत्ताणं कतिखुत्तो अतिरेगं २ वड्डति वा हायति वा ?, गोयमा ! लवणे णं समुद्दे तीसाए मुहुत्ताणं दुक्खुत्तो अतिरेगं २ वड्डति वा हायति वा ।*

से केणट्ठेणं भंते ! एवं वुच्चइ–लवणे णं समुद्दे तीसाए मुहुत्ताणं दुक्खुत्तो अइरेगं २ वड्डइ वा हायइ वा ?, गोयमा ! उड्ढमंतेसु पायालेसु वड्डइ आपूरितेसु पायालेसु हायइ, से तेणट्ठेणं गोयमा ! लवणे णं समुद्दे तीसाए मुहुत्ताणं दुक्खुत्तो अइरेगं अइरेगं वड्डइ वा हायइ वा ॥

वृ. 'लवणे णं भंते ! समुद्दे' इत्यादि, लवणो भदन्त ! समुद्रस्त्रिशतो मुहूर्त्तानां मध्येऽहोरात्रमध्ये इति भावः 'कतिकृत्वः' कतिवारान् अतिरेकमतिरेकं वर्द्धते हीयते वा ? इति, तदेवं (प्रश्ने) भगवानाह–गौतम ! द्विकृत्वोऽतिरेकमतिरेकं वर्द्धते हीयते वा ॥ 'से केणट्ठेण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! 'उद्धमत्सु' अधस्तनमध्यमत्रिभागगतवातसङ्क्षोभवशाज्जलमूर्द्धमुत्क्षिपत्सु 'पातालेषु' पातालकलशेषु महत्सु लघुषु च वर्द्धते 'आपूर्यमाणेषु' परिसंस्थिते पवने भूयो जलेन ध्रियमाणेषु 'पातालेषु' पातालकलशेषु महत्सु लघुषु च हीयते 'से एएणट्ठे ण'मित्यादि उपसंहारवाक्यम् । अधूना लवणशिखावक्तव्यतामाह–

मू. (२०४) *लवणसिहा णं भंते ! केवतियं चक्कवालविक्खंभेणं केवतियं अइरेगं २ वड्डति वा हायति वा ?, गोयमा ! लवणसीहाए णं दस जोयणसहस्साइं चक्कवालविक्खंभेणं देसूणं अद्धजोयणं अतिरेगं वड्डति वा हायति वा ।*

लवणस्स णं भंते ! समुद्दस्स कति नागसाहस्सीओ अब्भितरियं वेलं धारति ?, कइ नाग० बाहिरियं वेलं धरंति ?, कइ नाग० अग्गोदयं धरेंति ?, गो० लवनसमुद्दस्स बायालीसं नागसाहस्सीओ अब्भितरियं वेलं धारेंति ।

बावत्तरिं नाग साहस्सिओ बाहिरियं वेलं धरेंति, सट्ठिं नागसाहस्सीओ अग्गोदयं धरेंति एवमेव सपुव्वावरेणं एगा नागसतसाहस्सी चोवत्तरिं च नागसहस्सा भवंतीति मक्खाया ।

वृ. 'लवणसिहा णं भंते !' इत्यादि, लवणशिखा भदन्त ! कियच्चक्रवालविष्कम्भेन ? कियच्च 'अतिरेकमतिरेकम्' अतिशयेन २ वर्द्धते हीयते वा ?, भगवानाह–गौतम ! लवणशिखा सर्वतश्चक्रवालविष्कम्भतया 'समा' समप्रमाणा दश योजनसहस्राणि विष्कम्भेन चक्रवालरूपतया विस्तारेण 'देशोनमर्द्धयोजनं' गव्यूतद्वयप्रमाणम् 'अतिरेकमतिरेकम्' अतिशयेनातिशयेन वर्द्धते हीयते वा, इयमत्र भावना–लवणसमुद्रे जम्बूद्वीपाद् धातकीखण्डद्वीपाच्च प्रत्येकं पञ्चनवतिप-ञ्चनवतियोजनसहस्राणि गोतीर्थं नाम तडागादिष्विव प्रवेशमार्गरूपो नीचो नीचतरो भूदेशो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोतीर्थमिव गोतीर्थमिति व्युत्पत्तेः, मध्यभागावगाहस्तु दश योजनसहस्रप्रमाणविस्तारः, गोतीर्थं च जम्बूद्वीपवेदिकान्तसमीपे घातकीखण्डवेदिकान्तसमीपे चाङ्गुलासङ्ख्येयभागः, ततः परं समतलाद् भूभागादारभ्य क्रमेण प्रदेशहान्या तावन्नीचत्वं नीचतरत्वं परिभावनीयं यावत्पञ्चनवतियोजन-सहस्राणि, पञ्चनवतियोजनसहस्रपर्यन्तेषु समतलं भूभागमपेक्ष्योण्डत्वं योजनसहस्रमेकं, तथा जम्बूद्वीपवेदिकातो धातकीखण्डद्वीपवेदिकातश्च ?

तत्र समतल भूभागे प्रथमतो जलवृद्धिरङ्गुलसङ्ख्येयभागः, ततः समतलभूभागमेवाधिकृत्य प्रदेशवृद्धया जलवृद्धि क्रमेण परिवर्द्धमाना तावत्परिभावनीया यावदुभयतोऽपि पञ्चनवतियोजन-सहस्राणि, पञ्चनवतियोजनसहस्रपर्यन्ते चोभयतोऽपि समतलभूभागमपेक्ष्य जलवृद्धिः सप्तयोज-नशतानि, किमुक्तं भवति ?—तत्र प्रदेशे समतलभूभागमपेक्ष्यावगाहो योजनसहस्र, तदुपरि जलवृद्धि सप्त योजनशतानीति, ततः परं मध्ये भागे दशयोजनसहस्रविस्तारेऽवगाहो योजनसहस्र जलवृद्धि षोडश योजनसहस्रणि, पातालकशगतवायुक्षोमे च तेषामुपर्यहोरात्रमध्ये द्वौ वारौ किञ्चिन्न्यूने द्वे गव्यूते उदकमतिरेकेण वर्द्धते पातालकलशगतवायूपशान्तौ च हीयते, उक्तञ्च—

॥ १ ॥ "पचानउयसहस्से गोतित्थं उभयतोवि लवणस्स ।
जोयणसयाणि सत्त उ उदगपरिवुड्ढीवि उभयोवि ॥
॥ २ ॥ दस जोयणसाहस्सा लवणसिहा चक्कवालतो रुंदा ।
सोलससहस्स उच्चा सहस्समेगं च ओगाढा ॥
॥ ३ ॥ देसूणमद्धजोयणलवणसिहोवरि दुगं दुवे कालो ।
अइरेगं २ परिवड्ढइ हायए वावि ॥

सम्प्रति वेलन्धरवक्तव्यतामाह—'लवणस्स णं भंते !' इत्यादि, लवणस्य भदन्त ! समुद्रस्य कियन्तो नागसहस्रा नागकुमाराणां भवनपतिनिकायान्तर्वर्त्तिनां सहस्रा आभ्यन्तरिकीं— जम्बूद्वी-पाभिमुखां वेलां—शिखोपरिजलं शिखां च—अर्वाक् पतन्तीं 'धरन्ति' धारयन्ति ? कियन्तो नागसहस्र बाह्यां—धातकीखण्डाभिमुखां वेलां धातकीखण्डद्वीपमध्ये प्रविशन्तीं वारयन्ति ?, कियन्तो वा नागसहस्र 'अग्रोदकं' देशोनयोजनार्द्धजलादुपरि वर्द्धमानं जलं 'धरन्ति' वारयन्ति ?, भगवानाह—गौतम द्विचत्वारिंशन्नागसहस्रण्याभ्यन्तरिकी वेलां घरन्त द्वासप्ततिर्नागसहस्राणि बाह्यां वेलां धरन्ति, षष्टिर्नागसहस्राण्यग्रोदकं धरन्ति, उक्तञ्च—

॥ १ ॥ "अब्भिंतरियं वेलं धरंति लवणोदहिस्स नागाणं ।
बायालीससहस्सा दुसत्तरिसहस्सा बाहिरियं ॥

सट्ठिं नागसहस्सा धरंति अग्गोदयं समुद्दस्स इति । एवमेव 'सपूर्वापरेण' पूर्वापरसमुदायेन एकं नागशतसहस्रं चतुःसप्ततिश्च नागशतसहस्राणि भवन्तीत्याख्यातानि मया शेषैश्च तीर्थकृद्भि

मू. (२०५) कति णं भंते ! वेलंधरा नागराया प० गो० ! चत्तारि वेलंधरा नागराया प० तं०—गोथूभे सिवए संखे मनोसिलए ॥ एतेसि णं भंते ! चउण्हं वेलंधरणागरायाणं कति आवासपव्वता पन्नत्ता ? गोयमा ! चत्तारि आवासपव्वता प० तं० —गोथूभे उदगभासे संखे दगसीमाए ।

कहि णं भंते ! गोथूभस्स वेलंधरणागरायस्स गोथूभे नामं आवासपव्वते प० ?, गोयमा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जंबूदीवे दीवे मंदरस्स पुरत्थिमेणं लवणं समुद्दं बायालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं गोथूभस्स वेलंधरणागरायस्स गोथूभे नामं आवासपव्वते प० सत्तरसएक्कवीसाइं जोयणसताइं उड्ढं उच्चत्तेणं चत्तारि तीसे जोयणसते कोसं च उव्वेधेणं मूले दसबावीसे जोयणसते आयामविक्खंभेणं मज्झे सत्ततेवीसे जोयमसते उवरिं चत्तारि चउवीसे जोयणसए ।–

–आयामविक्खंभेणं मूले तिन्नि जोयणसहस्साइं दोन्नि य बत्तीसुत्तरे जोयणसए किंचिविसेसूणे परिक्खेवेणं मज्झे दो जोयणसहस्साइं दोन्नि य छलसीते जोयणसते किंचिविसेसाहिए परिक्खेवेणं उवरि एगं जोयणसहस्सं तिन्नि य ईयाले जोयणसते किंचिविसेसूणे परिक्खेवेणं मूले वित्थिन्ने मज्झे संखित्ते उप्पिं तणुए गोपुच्छसंठाणसंठिए सव्वकणगामए अच्छे जाव पडिरूवे

से णं एगाए पउमवरवेदियाए एगेण य वनसंडेणं सव्वतो समंता संपरिक्खित्ते, दोण्हवि वण्णओ ।। गोथूभस्स णं आवासपव्वतस्स उवरिं बहुसमरमणिज्जे भूमिभागे प० जाव आसयंति

तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ णं एगे महं पासायवडेंसए बावट्ठं जोयणद्धं च उड्ढं उच्चत्तेणं तं चेव पमाणं अद्धं आयाम विक्खंभेणं वण्णओ जाव सीहासणं सपरिवारं । से केणट्ठेणं भंते ! एवं वुच्चइ गोथूभे आवासपव्वए २ ?, गोयमा ! गोथूभे णं आवासपव्वते तत्थ २ देसे तहिं २ बहुओ खुड्डाखुड्डियाओ जाव गोथूभवण्णाइं बहूइं उप्पलाइं तहेव जाव गोथूभे तत्थ देवे महिड्ढीए जाव पलिओवमट्ठितीए परिवसति, से णं तत्थ चउण्हं सामानियसाहस्सीणं जाव गोथूभयस्स आवासपव्वतस्स गोथूभाए रायहाणीए जाव विहरति, से तेणट्ठेणं जाव निच्चे

रायहाणि पुच्छा गोयमा ! गोथूभस्स आवासपव्वतस्स पुरत्थिमेणं तिरियमसंखेज्जे दीवसमुद्दे वीतिवइत्ता अन्नंमि लवणसमुद्दे तं चेव पमाणं तहेव सव्वं ।

कहि णं भंते ! सिवगस्स वेलंधरणागरायस्स दओभासणामे आवास पव्वते पन्नत्ते ?, गोयमा ! जंबुद्दीवे णं दीवे मंदरस्स पव्वयस्स दक्खिणेणं लवणसमुद्दं बायालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं सिवगस्स वेलंधरणागरायस्स दओभासे नामं आवासपव्वते पन्नत्ते ।

तं चेव पमाणं जं गोथुभस्स, नवरि सव्वअंकामए अच्छे जाव पडिरूवे जाव अट्ठो भाणियव्वो, गोयमा ! दओभासे णं आवासपव्वते लवणसमुद्दे अट्ठजोयणियखेत्ते दगं सव्वतो समंता ओभासेति उज्जोवेति तवति पभासेति सिवए इत्थ देवे महिड्ढीए जाव रायहाणी से दक्खिणेणं सिविगा दओभासस्स सेसं तं चेव ।

कहि णं भंते ! संखस्स वेलंधरणागरायस्स संखे नामं आवासपव्वते प० गो० जंबुद्दीवे णं दीवे मंदरस्स पव्वयस्स पच्चत्थिमेणं बायालीसं जोयणसहस्साइं एत्थ णं संखस्स० वेलंधर० संखे नामं आवासपव्वते तं चेव पमाणं नवरं सव्वरयणामए अच्छा ।

से णं एगाए पउमवरवेदिवाए एगेण य वनसंडेणं जाव अट्ठो बहूओ खुड्डाखुड्डिआओ जवा वहूइं उप्पलाइं संखाभाइं संखवण्णाइं संखवण्णाभाइं संखे एत्थ देवे महिड्ढीए जाव रायहाणीए पच्चत्थिमेणं संखस्स आवासपव्वयस्स संखा नाम रायहाणी तं चेव पमाणं ।।

कहि णं भंते ! मनोसिलकस्स वेलंधरणागरायस्स उदगसीमाए नामं आवासपव्वते प० गो० जंबुद्दीवे २ मंदरस्स उत्तरेणं लवणसमुद्दं बायालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं मनोसिलगस्स वेलंधरणागरायस्स उदगसीमाए नामं आवासपव्वे प० तं चेव पमाणं नवरि सव्वफलिहामए अच्छे जाव अट्ठो, गो० दगसीमंते णं आवासपव्वते सीतासीतोदगाणं महानदीणं

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तत्थ गतो सोए पडिहम्मति से तेणट्ठेणं जाव णिच्चे मनोसिलए एत्थ देवे महिड्डीए जाव से णं तत्थ चउण्हं सामाणिय० जाव विहरति।

कहि णं भंते ! मणोसिलगस्स वेलंधरणागरायस्स मनोसिला नाम रायहाणी ?, गो० दगसीमस्स आवासपव्वयस्स उत्तरेणं तिरि० अन्नंमि लवणे एत्थ णं मनोसिलिया नाम रायहाणी पन्नत्ता तं चेव पमाणं जाव मनोसिलाए देवे–

वृ. 'कति णं भंते!' इत्यादि, कति भदन्त ! वेलन्धरनागराजाः प्रज्ञप्ताः ? भगवानाह–चत्वारो वेलन्धरनागराजाः प्रज्ञप्तास्तद्यथागोस्तूपः शिवकः शङ्खो मनःशिलाकः ॥ 'एएसि ण'मित्यादि, एतेषां भदन्त ! चतुर्णां वेलन्धरनागराजानांकति आवासपर्वताः प्रज्ञप्ताः ?, भगवानाह–गौतम ! एकैकस्य एकैकभावेन चत्वार आवासपर्वताः प्रज्ञप्तास्तद्यथा–गोस्तूप उदकभासः शङ्खो दकसीमः ॥

'कहि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! अस्मिन् जम्बूद्वीपे यो मन्दरपर्वतस्तस्य पूर्वस्यां दिशि लवणसमुद्रं द्वाचत्वारिंशतं योजनसहस्राण्यवगाह्यात्र गोस्तूपस्य भुजगेन्द्रस्य भुजगराजस्य गोस्तूपो नाम आवासपर्वतः प्रज्ञप्तः, सप्तदश योजनशतानि एकविंशान्यूर्द्धमुच्चैस्त्वेन, चत्वारि योजनशतानि त्रिंशदधिकानि क्रोशं चैकमुद्वेधेन, उच्छ्रयापेक्षयाऽवगाहस्य चतुर्भागभावात्, मूले दश योजनशतानि द्वाविंशत्युत्तराणि विष्कम्भतः, मध्ये सप्त योजनशतानि त्रयोविंशत्युत्तराणि, उपरि चत्वारि योजनशतानि चतुर्विंशत्युत्तराणि, मूले त्रीणि योजनसहस्राणि द्वे च योजनशते द्वात्रिंशदुत्तरे किञ्चिद्विशेषोने परिक्षेपेण, मध्ये द्वे योजनसहस्रे द्वे च योजनशते चतुरशीते किञ्चिद्विशेषाधिके परिक्षेपेण, उपर्येकंयोजनसहस्रं त्रीणि योजनशतानि एकचत्वारिंशानि किञ्चिद्विशेषोनानि परिक्षेपेण, ततो मूले विस्तीर्णो मध्ये सङ्क्षिप्त उपरि तनुकः, अत एव गोपुच्छसंस्थानसंस्थितो गोपुच्छस्याप्येवमाकारत्वात्, सर्वात्मना जाम्बूनदमयः, 'अच्छे जाव पडिरूवे' इति प्राग्वत्।

'से ण'मित्यादि, 'सः' गोस्तूपनामा आवासपर्वत एकया पद्मवरवेदिकया एकेन च वनषण्डेन 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तः, द्वयोरपि चानयोर्वेदिकावनषण्डयोर्वर्णकः प्राग्वत् ॥ 'गोथूभस्स ण'मित्यादि, गोस्तूपस्य णमिति पूर्ववद् आवासपर्वतस्योपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, 'से जहा नामए आलिंगपुक्खरेइ वा' इत्यादि प्राग्वद् यावत्तत्र बहवो नागकुमारा देवा आसते शेरते यावद्विहरन्तीति।

'तस्स ण'मित्यादि, तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र महानेकः प्रासादावतंसकः प्रज्ञप्तः, स च विजयदेवस्य प्रासादावतंसकसदृशो वक्तव्यः, स चैवं–सार्द्धानि द्वाषष्टिर्योजनानि उच्चैस्त्वेन, सक्रोशान्येकत्रिंशद् योजनान्यायामविष्कम्भाभ्यां, प्रासादवर्नमुल्लोचवर्णनं च प्राग्वत्। तस्य च प्रासादावतंसकस्यान्तर्बहुमध्यदेशभागे महत्येका सर्वरत्नमयी मणिपीठिका, सा च योजनायामविष्कम्भप्रमाणा गव्यूतद्वयबाहल्या, तस्याश्च मणिपीठिकाया उपरि महदेकं सिंहासनं, तच्चैन्द्रसामानिकादिदेवयोग्यैर्भद्रासनैः परिवृतमिति।

'से केणट्ठेणं भंते !' इत्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते गोस्तूप आवासपर्वतो गोस्तूप आवासपर्वतः ? इति, भगवानाह–गौतम ! गोस्तूपे आवासपर्वते क्षुल्लासु क्षुल्लिकासु वापीषु यावद्बिलपङ्क्तिषु बहून्युत्पलानि यावत् शतसहस्रपत्राणि गोस्तूपप्रभाणि गोस्तूपाकाराणि गोस्तूपवर्णानि गोस्तूपवर्णस्येवाभा–प्रतिभासो येषां तानि गोस्तूपवर्णाभानि, ततस्तानि तदाकारत्वात्

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तद्वर्णत्वात्तद्वर्णसादृश्याच्च गोस्तूपानीति प्रसिद्धानि, तद्योगादावासपर्वतोऽपि गोस्तूपः, अनादिकालप्रवृत्तोऽयं व्यवहार इति तेन नेतरेतराश्रयदोषः, एवमुत्तरत्रापि भावनीयं, तथा गोस्तूपश्चात्र भुजगेन्द्रो भुजगराजो महर्द्धिको यावत्करणात् महाद्युतिक इत्यादि परिग्रहः, स च चतुर्णां सामानिकसहस्रणां चतसृणामग्रमहिषीणां सपरिवाराणां तिसृणां पर्षदां सप्तानामनीकानां सप्तानामनीकाधिपतीनां षोडशानामात्मरक्षदेवसहस्रणां गोस्तूपस्यावासपर्वतस्य गोस्तूपायाश्च राजधान्या अन्येषां च बहूनां गोस्तूपराजधानीवास्तव्यानां देवानां देवीनां चाधिपत्यं यावद्विहरति, ततो गोस्तूपदेवस्वाभिकत्वाच्च गोस्तूपः, 'से एएणट्ठेण' मित्याद्युपसंगारवाक्यं प्रतीतम् ।

सम्प्रति गोस्तूपां राजधानीं पृच्छति–'कहि णं भंते !' इत्यादि, क्व भदन्त ! गोस्तूपस्य भुजगेन्द्रस्य भुजगराजस्य गोस्तूपा नाम राजधानी प्रज्ञप्ता ? भगवानाह–गौतम ! गोस्तूपस्यावास-पर्वतस्य पूर्वया दिशा तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रे द्वादश योजनसहस्राण्यवगाह्यात्रान्तरे गोस्तूपस्य भुजगेन्द्रस्य भुजगराजस्य गोस्तूपा नाम राजधानी प्रज्ञप्ता, सा च विजयराजधानीसदृशी वक्तव्या । तदेवमुक्तौ गोत्तूपोऽधना दकाभासवक्तव्यतामाह–

'कहिं णं भंते ! सिवगस्से' त्यादि प्रश्नसूत्रं पाठसिद्धं, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य दक्षिणतो लवणसमुद्रं द्वाचत्वारिंशतं योजनसहस्रण्यवगाह्यात्रान्तरे शिवकस्य भुजगेन्द्रस्य भुजगराजस्य दकाभासो नामावासपर्वतः प्रज्ञप्तः, स च गोस्तूपवदविशेषेण वक्तव्यो यावत्सपरिवारं सिंहासनम् ।

अधुना नामनिमित्तं पिपृच्छिषुराह–'से केणट्ठेण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौ० ! दकाभास आवासपर्वतो लवणसमुद्रे सर्वासु दिक्षु स्वसीमातोऽष्टयोजनिके–अष्टयोजनप्रमाणे क्षेत्रे यदुदकं तत् 'समन्ततः' सामस्त्येनातिविशुद्धाङ्कनामरत्नमयत्वेन स्वप्रभयाऽ- वभासयति, एतदेव पर्यायत्रयेण व्याचष्टे–उद्योतयति चन्द्र इव तापयति सूर्य इव प्रभासयति ग्रहादिरिव ततो दकं पानीमाभासयति–समन्ततः सर्वासु दिक्षु अवभासयतीति दकाभासः, अन्यच्च शिवको नामात्र पर्वतेषु भूजगेन्द्रो भुजगराजो महर्द्धिको वक्तव्या, तस्मिंश्च परिवसति स आवासपर्वतो दकमध्येऽतीवाऽऽभासते–शोभते इति दकाभासः, 'से एएणट्ठेण' मित्याद्युप- संहारवाक्यं गतार्थं, शिवकाराजधानी दकाभासस्यावासपर्वतस्य दक्षिणतोऽन्यस्मिन् लवणसमुद्रे विजयाराजधानीव भावनीया ।

अधुना शङ्खनामकावासपर्वतवक्तव्यतामाह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! शङ्खस्य भुजगेन्द्रस्य भुजगराजस्य शङ्खो नामावासपर्वतः प्रज्ञप्तः ?, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य पश्चिमायां दिशि लवणसमुद्रं द्वाचत्वारिंशतं योजनसहस्राण्यवगाह्यात्रान्तरे शङ्खस्य भुजगेन्द्रस्य भुजगराजस्य शङ्खो नामावासपर्वतः प्रज्ञप्तः, स च गोस्तूपवदविशेषेण तावद्वक्तव्यो यावत्सपरिवारं सिंहासनम् ।

इदानीं नामनिबन्धनमभिधित्सुराह–'से केणट्ठेण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–शङ्खे आवासपर्वते क्षुल्लासु क्षुल्लिकासु वापीषु यावद्बिलपङ्क्तिषु बहून्युत्पलानि यावत् शतसहस्रपत्राणि शङ्खाभानि–शङ्खाकाराणि शङ्खवर्णानि–श्वेतानीति भावः शङ्खवर्णाभानि–प्रायः शङ्खवर्णसदृश-वर्णानि, शङ्खश्चात्र भुजगेन्द्रो भुजगराजो महर्द्धिको यावत्पल्योपमस्थितिकःपरिवसति । 'से णं

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तत्थ चउण्हं सामानियसाहस्सी ण'मित्यादि प्राग्वत्, नवरमत्र शङ्खा राजधानी वक्तव्या, तदेवं यतस्तद्गतान्युत्पलादीनि शङ्खाकाराणि शङ्खदेवस्वामिश्चायमतः शङ्ख इति, 'से एएणट्ठेण'मित्याद्युपसंहारवाक्यं गतार्थं, शङ्खा राजधानी सङ्खस्यावासपर्वतस्य पश्चिमायां दिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रे विजयाराजधानीसद्दशी वक्तव्या ॥ सम्प्रति दकसीमापर्वतवक्तव्यतामाह–

'कहि णं भंते !' इत्यादि प्रश्नसूत्रं प्रतीतं, भगवानाह–गौतम ! जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्योत्तरतो लवणसमुद्रं द्वाचत्वारिंशतं योजनसहस्राण्यवगाह्य 'अत्र' एतस्मिन्नवकाशे मनःशिलकस्य भुजगेन्द्रस्य भुजगराजस्य एकसीमो नामावासपर्वतः प्रज्ञप्तः, सोऽपि गोस्तूपपर्वतवदविशेषेण तावद्वक्तव्यो यावत्सपरिवारं सिंहासनम् ॥ इदानीं नामनिमित्तं बिभणिषुराह–'से केणट्ठेण'मित्यादि प्रतीतं, भगवानाह–गौतम ! दकसीमे आवासपर्वते शीताशीतोदयोर्महानद्योः श्रोतांसि–जलप्रवाहास्तत्र गतानि तस्माच्च तेन प्रतिहतानि प्रतिनिवर्त्तन्ते ततो दकसीमाकारित्वाद् दकसीमः, दकस्य सीमा–शीताशीतोदापानीयस्य सीमा यत्रासौ दकसीम इति व्युत्पत्तेः, अन्यच्च मनःशिलको भुजगेन्द्रो भुजगराजो महर्द्धिको यावत्पल्योपमस्थितिकः परिवसति ।

'से णं तत्थ चउण्हं समानियसाहस्सीण'मित्यादि प्राग्वत् नवरं मनःशिलाऽत्र राजधानी वक्तव्या, ततो मनःशिलस्य देवस्य दके–लवणजलमध्ये सीमा, आवासचिन्तायां मर्यादा, 'अत्रे'ति दकसीमे, मनःशिला च राजधानी दकसीमस्यावासपर्वतस्योत्तरतस्तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रे विजयाराजधानीव वक्तव्या । तदेवमुक्ताश्चत्वारोऽपि वेलन्धराणामावासपर्वताः, सर्वत्र च गोस्तूपेनातिदेशः कृतः ।

मू. (२०६) *कणगंकरययफालियमया य वेलंधराणमावासा ।*
अनुवेलंधरराईण पव्वया होंति रयणमया ॥

वृ. अत्र च मूलदले विशेषस्ततस्तमभिधित्सुराह–

॥ १ ॥ "कणगंकरययफालियमया य वेलंधराणमावासा ।
अनुवेलंधरराईण पव्वया होंति रयणमया ॥"

वेलन्धराणां–गोस्तूपादीनामावासा गोस्तूपादयश्चत्वारः पर्वता यथाक्रमं कनकाङ्करजतस्फटिकमयाः, गोस्तूपः कनकमयो दकाभासोऽङ्करत्नमयः शङ्खो रजतमयो दकसीमः स्फटिकमय इति, तथा महतां वेलन्धराणामादेशप्रतीच्छकतयाऽनुयायिनो वेलन्धराश्चानुवेलन्धराः ते च ते राजानश्च अनुवेलन्धरराजास्तेषामावासपर्वता र्नमया भवन्ति ॥

मू. (२०७) *कइ णं भंते ! अनुवेलंधररायाणो पन्नत्ता ?, गोयमा ! चत्तारि अनुवेलंधरणागरायाणो पन्नत्ता, तंजहा–कक्कडए कद्दमए केलासे अरुणप्पभे ॥ एतेसिं णं भंते ! चउण्हं अनुवेलंधरणागरायाणं कति आवासपव्वया पन्नत्ता ? गोयमा ! चत्तारि आवासपव्वया पन्नत्ता, तंजहा–कक्कोडए १ कद्दमए २ कइलासे ३ अरुणप्पभे ४ ।*

कहि णं भंते ! कक्कोडगस्स अनुवेलंधरणागरायस्स कक्कोडए नामं आवासपव्वते पन्नत्ते ?, गोयमा ! जंबुद्दीवे २ मंदरस्स पव्वयस्स उत्तरपुरच्छिमेणं लवणसमुद्दं बायालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं कक्कोडगस्स नागरायस्स कक्कोडए नामं आवासपव्वते प०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तरस एक्कवीसाइं जोयणसताइं तं चेव पमाणं जं गोथूभस्स नवरि सव्वरयणामए अच्छे जाव निरवसेसं जाव सपरिवारं अट्ठो से बहूइं उप्पलाइं कक्कोडप्पभाइं सेसं तं चेव णवरि कक्कोडगपव्वयस्स उत्तरपुरच्छिमेणं एवं तं चेव सव्वं, कद्दमस्सवि सो चेव गमओ अपरिसेसिओ, नवरि दाहिणपुरच्छिमेणं आवासो विज्जुप्पभा रायहाणी दाहिणपुरत्थिमेणं, कइलासेवि एवं चेव, नवरि दाहिणपच्चत्थिमेणं कयलासावि रायहाणी ताए चेव दिसाए, अरुणप्पभेवि उत्तरपच्चत्थिमेणं रायहाणीवि ताए चेव दिसाए, चत्तारि विगप्पमाणा सव्वरयणामया य ॥

वृ. 'कइ ण'मित्यादि, कति भदन्त ! अनुवेलन्दरराजाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! चत्वारोऽनुवेलन्धरराजाः प्रज्ञप्तास्तद्यथा ककोंटकः १ कर्दगः २ कैलासः ३ अरुणप्रभश्च । 'एएसि ण'मित्यादि, एतेषां भदन्त ! चतुर्णामनुवेलन्धरराजानां कति आवासपर्वताः प्रज्ञप्ताः ?, भगवानाह–गौतम ! एकैकस्य एकैकभावेन चत्वारोऽनुवेलन्धरराजानाभावासपर्वताः प्रज्ञप्तास्तद्यथा–कर्कोटको विद्युत्प्रभः कैलासः अरुणप्रभश्च, कर्कोटकस्य कर्कोटकः कर्द्दमस्य विद्युत्प्रभः कैलाशस्य कैलाशः अरुप्रभस्यारुणप्रभ इत्यर्थः ।

'कहि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जम्बूद्वीपे मन्दरस्य पर्वतस्योत्तरपूर्वस्यां दिशि लवणसमुद्रं द्वाचत्वारिंशतं योजनसहस्राण्यवगाह्य 'अत्र' एतस्मिन्नवकाशे कर्कोटकस्य भुजगेन्द्रस्य भुजगराजस्य कर्कोटको नामावासपर्वतकः प्रज्ञप्तः, 'सत्तरसएक्कवीसाइं जोयणसयाइं' इत्यादिका गोस्तूपस्यावासपर्वतस्य या वक्तव्यतोक्ता सैवेहापि अहीनानतिरिक्ता भणितव्या, नवरं सर्वरत्नमय इति वक्तव्यं, नामनिमित्तचिन्तायामपि यस्माच्च क्षुल्लाक्षुल्लिकासु वापीषु यावद्बिलपङ्क्तिषु बहून्युत्पलानि यावत् शतसहस्रपत्राणि कर्कोटकप्रमाणि कर्कोटकाकाराणि ततस्तानि कर्कोटकादीनि व्यवह्रियन्ते तद्योगात्पर्वतोऽपि कर्कोटकः, तथा कर्कोटकनामा देवस्तत्र पल्योपमस्थितिकः परिवसति ततः कर्कोटकस्वामित्वात्कर्कोटकः, राजधान्यपि कर्कोटकस्यावासपर्वतस्योत्तरपूर्वस्यां दिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रजयान्यस्मिन् लवणसमुद्रे द्वादश योजनसहस्राण्यवगाह्य कर्कोटकाभिधाना विजयाराजधानीव प्रतिपत्तव्या । एवं कर्दमकैलाशारुणप्रभवक्तव्यताऽपि भावनीया, नवरं जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य लवणसमुद्रे दक्षिणपूर्वस्यां कर्दमको दक्षिणापरस्यां कैलाशः अपरोत्तरस्यमामरुणप्रभः, नामनिमित्तचिन्तायामपि यस्मात्कर्दमके आवासपर्वते उत्पलादीनि कर्दमकप्रभाणि ततः कर्दमकभावना प्रागिव, अन्यच्च कर्दमके विद्युत्प्रभो नाम भावः पल्योपमस्थितिकः परिवसति, स च स्वभावाद् यक्षकर्दमप्रियः, यक्षकर्दमोनाम कुङ्कुमागुरुकर्पूरकस्तृरिकाचन्दनमेलापकः, उक्तञ्च–

॥१॥ "कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनामि च ।
महासुगन्धमित्युक्तं, नामतो यक्षकर्दमम् ॥"

ततः प्राचुर्येण यक्षकर्दमसम्भवाच्चासौ पूर्वपदलोपे सत्यभामा भामेतिवत् कर्दम इत्युच्यते, कैलाशे कैलाशप्रमाण्युत्पलादीनि कैलाशनामा च तत्र देवः पल्योपमस्थितिकः परिवसति ततः कैलाशः, एवमरुणप्रभेऽपि वक्तव्यं, कर्दमकाराजधानी कर्दमस्यावासपर्वतस्य दक्षिणपूर्वया कैलाशा कैलाशस्यावासपर्वतस्य दक्षिणापरयाऽरुणप्रभा अरुणप्रभस्यावासपर्वतस्यापरोत्तरया तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रेऽरुणप्रभाराजधानी विजयाराज-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

धानीव वाच्या ॥

मू. (२०८) *कहि णं भंते ! सुट्ठियस्स लवणाहिवइस्स गोयमदीवे नामं दीवे पन्नत्ते ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पच्चत्थिमेणं लवणसमुद्दं बारसजोयणसहस्साइं ओगाहित्ता एत्थ णं सुट्ठियस्स लवणाहिवइस्स गोयमदीवे २ पन्नत्ते, बारसजोयणसहस्साइं आयामविक्खंभेणं सत्ततीसं जोयणसहस्साइं नव य अडयाले जोयणसए किंचिविसेसोणे परिक्खेवेणं ।*

जंबूदीवंतेणं अद्धेकोणनउते जोयणाइं चत्तालीसं पंचनउतिभागे जोयणस्स ऊसिए जलंताओ लवणसमुद्दंतेणं दो कोसे ऊसिते जलंताओ । से णं एगाए य पउमवरवेइयाए एगेणं वनसंडेणं सव्वतो समंता तहेव वण्णओ दोण्हवि गोयमदीवस्स णं दीवस्स अंतो जाव बहुसमरमणज्ञे भूमिभागे पन्नत्ते, से जहानामए–आलिंग० जाव आसयंति ।

तस्स णं बहुसमरमणिज्ञस्स भूमिभागस्स बहुमज्झदेसभागे एत्थ णं सुट्ठियस्स लवणाहिवइस्स एगे महं अइक्कीलावासे नामं भोमेज्जविहारे पन्नत्ते बावट्ठिं जोयणाइं अद्धजोयणं उड्ढं उच्चत्तेणं एक्कतीसं जोयणाइं कोसं च विक्खंभेणं अनेगखंभसतसन्निविट्ठे भवणवण्णओ भाणियव्वो ।

अइक्कीलावासस्स णं भोमेज्जविहारस्स अंतो बहुसमरमणिज्जे भूमिभागे पन्नत्ते जाव मणीणं भासो । तस्स णं बहुसमरमणिज्ञस्स भूमिभागस्स बहुमज्झदेसभाए एत्थ एगा मणिपेढिया प० । सा णं मणिपेढिया दो जोयणाइं आयामविक्खंभेणं जोयणबाहल्लेणं सव्वमणिमयी अच्छा जाव पडिरूवा तीसे णं मणिपेढियाए उवरि एत्थ णं देवसयमिज्ञे पन्नत्ते वण्णओ ।

से केणट्ठेणं भंते ! एवं वुच्चति–गोयमदीवे मं दीवे ?, तत्थ २ तहिं २ बहूइं उप्पलाइं जाव गोयमप्पभाइं से एएणट्ठेणं गोयमा ! जाव निच्चे । कहि णं भंते ! सुट्ठियस्स लवणाहिवइस्स सुट्ठिया नामं रायहाणी पन्नत्ता ?, गोयमदीवस्स पच्चत्थिमेणं तिरियमसंखेज्ञे जाव अन्नंमि लवणसमुद्दे बारस जोयणसहस्साइं ओगाहित्ता, एवं तहेव सव्वं नेयव्वं जाव सुत्थिए देवे ॥

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! सुस्थितस्य लवणाधिपस्य गौतमद्वीपो नाम द्वीपः प्रज्ञप्तः ?, भगवानाह–गौतम ! जम्बूद्वीपस्य पश्चिमायां दिशि लवणसमुद्रं द्वादश योजनसहस्राण्य- वगाह्यात्रान्तरे सुस्थितस्य लवणाधिपस्य गौतमद्वीपो नाम द्वीपः प्रज्ञप्तः, द्वादश योजनसहस्राण्याया- मविष्कम्भाभ्यां, सप्तत्रिंशद् योजनसहस्राणि नव चाष्टाचत्वारिंशानि किञ्चिद्विशेषोनानि परिक्षेपेण, 'जंबूदीवंतेण'मिति जम्बूद्वीपदिशि 'अर्द्धैकोननवतीनि' अर्द्धमेकोननवतेर्येषां तानि अर्द्धैकोननवतीनि सार्द्धाष्टाशीतिसङ्ख्यानीति भावः, योजनानि चत्वारिंशत च पञ्चनवतिभागान् योजनस्य 'जलान्तात्' जलपर्यन्तादूर्द्धमुच्छ्रितः, एतावान् जलस्योपरि प्रकट इत्यर्थः, 'लवणसमुद्रान्ते' लवणसमुद्रदिशि द्वौ क्रोशौ जलान्तादुच्छ्रितौ, द्वावेव क्रोशौ जलस्योपरि प्रकट इत्यर्थः ।

'से ण'मित्यादि, स एकया पद्मवरवेदिकया एकेन वनषण्डेन सर्वतः समन्तात्संपरिक्षिप्तः, द्वयोरपि वर्णनं प्राग्वत् । तस्य च गौतमद्वीपस्योपरि बहुसमरमणीयभूमिभआगवर्णनं प्राग्वद् यावत्त णानां मणीनां च शब्दवर्णनं वाप्यादिवर्णनं यावद्बहवो वानमन्तरा देवा आसते शेरते यावद्विहरन्तीति । तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागेऽत्र सुस्थितस्य लवणाधिपस्य योग्यो महानेकः 'अतिक्रीलावासः' अत्यर्थं क्रीडावासो नाम भौमेयविहारः प्रज्ञप्तः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सार्द्धानि द्वाषष्टियोजनान्यूर्द्धमुच्चैस्त्वेन एखत्रिंशतं च योजनानि क्रोशमेकं च विष्कम्भेन 'अनेगखंभसयसन्निविट्ठे' इत्यादि भवनवर्णनमुल्लोचवर्णनं भूमिभागवर्णनं च प्राग्वत्। तस्य च बहुसमरमणीयस्य भूमिभागस्य बुमध्देशभागे, अत्र महत्येका मणिपीठिका प्रज्ञप्ता, सा योजनमायाम-विष्कम्भाभ्यां अर्द्धयोजनं बाहल्येन सर्वात्मना मणिमयी अच्छा यावत्प्रतिरूपा।

'तीसे ण'मित्यादि, तस्या मणिपीठिकाया उपरि देवशयनयं, तस्य वर्णक उपर्यष्टाष्टम-ङ्गलकादिकं च प्राग्वत्॥ नामनिमित्तं पिपृच्छिषुराह–'से केणट्ठेण'मित्यादि, अथ 'केनार्थेन' केन कारणेन एवमुच्यते–गौतमद्वीपो नाम द्वीपः ?, भगवानाह–गौतमद्वीपस्य शाश्वतमिदं नामधेयं न कदाचिन्नासीदित्यादि प्राग्वत्। पुस्तकान्तरेषु पुनरेवं पाठः–

'गोयमदीवे णं दीवे तत्थ तत्थ तहिं तहिं बहूइं उप्पलाइं जाव सहस्सपत्ताइं गोयमप्पभाइं गोयमवन्नाइं गोयमवण्णाभाइं' इति, एवं प्राग्वद् भावनीयः। सुस्थितश्चात्र लवणाधिपो महर्द्धिको यावत्पल्योपमस्थितिकः परिवसति, स च तत्र चतुर्णां सामानिकसहस्राणां यावत्षोडशानामात्मरक्षक-देवसहस्राणां गौतमद्वीपस्य सुस्थितायाश्च राजधान्या अन्येषां च बहूनां वानमन्तराणां देवानां देवीनां चाधित्यं यावद्विहरति, तत एवमेव शाश्वतनामत्वात्, पाठान्तरे तद्गतानि उत्पलादीनि गौतमप्रभाणीति गौतमानीति प्रसिद्धानि ततस्तद्योगात्तथा, तदधिपतिगौतमाधिपतिरिति प्रसिद्धं इति सामर्थ्यादेष गौतमद्वीप इति। उपसंहारमाह–'से तेणट्ठेण'मित्यादि गतार्थम्॥ सम्प्रति जम्बूद्वीपगतचन्द्रसत्कद्वीप- प्रतिपादनार्थमाह–

मू. (२०९) *कहि णं भंते ! जंबुद्दीवगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता ?, गोयमा ! जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमेणं लवणसमुद्दं बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं जंबूदीवगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता, जंबुद्दीवंतेणं अद्धेकोणनउइ जोयणाइं चत्तालीसं पंचानउतिं भागे जोयणस्स ऊसिया जलंताती लवणसमुद्दंतेणं दो कोसे ऊसिता जलंताओ, बारस जोयणसहस्साइं आयामविक्खंभेणं।*

सेसं तं चेव जहा गोतमदीवस्स परिक्खेवो पउमवरवेइया पत्तेयं २ वनसंडपरि० दोण्हवि वण्णओ बहुससरमणिज्ञा भूमिभागा जाव जोइसिया देवा आसयंति।

तेसि णं बहुसमरमणिज्ञे भूमिभागे पासायवडेंसगा बावट्ठिं जोयणाइं बहुमज्झ० मणिपेढियाओ दो जोयणाइं जाव सीहासना सपरिवारा भाणियव्वा तहेव अट्ठो, गोयमा ! बहुसु खुड्डासु खुड्डियासु बहूइं उप्पलाइं चंदवण्णाभाइं चंदा एत्थ देवा महिड्ढीया जाव पलिओवमट्ठितीया परिवसंति, ते णं तत्थ पत्तेयं पत्तेयं चउण्हं सामानियसाहस्सीणं जाव चंददीवाणं चंदाण य रायहाणीणं अन्नेसिं च बहूणं जोतिसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति, से तेणट्ठेणं गोयमा ! चंदद्दीवा जाव निच्चा। कहि णं भंते ! जंबुद्दीवगाणं चंदाणं चंदाओ नामं रायहाणीओ पन्नत्ताओ ?, गोयमा ! चंददीवाणं पुरत्थिमेणं तिरियं जाव अन्नंमि जंबूद्दीवे २ बारस जोयणसहस्साइं ओगाहित्ता तं चेव पमाणं जाव एमहिड्ढीया चंदा देवा २॥

कहि णं भंते ! जंबुद्दीवगाणं सूराणं सूरदीवा नामं दीवा पन्नत्ता ?, गोयमा ! जंबूद्दीवे २ मंदरस्स पव्वयस्स पच्चत्थिमेणं लवणसमुद्दं बारस जोयणसहस्साइं ओगाहित्ता तं चेव उच्चत्तं आयामविक्खंभेणं परिक्खेवो वेदिया वनसंडा भूमिभागा जाव आसयंति पासायवडेंसगाणं तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेव पमाणं मणिपेढिया सीहासना सपरिवारा अट्ठो उप्पलाइं सूरप्पभाइं सूरा एत्थ देवा जाव रायहाणीओ सकाणं दीवाणं पच्चत्थिमेमं अन्नंमि जंबूद्दीवे दीवे सेसं तं चेव जाव सूरा देवा ॥

वृ. 'कहि णं भंते !' इत्यादि ॥ क भदन्त ! जम्बूद्वीपगतजम्बूद्वीपसत्कयोश्चन्द्रयोश्चन्द्रद्वीपौ नाम द्वीपौ प्रज्ञप्तौ ?, भगवानाह–'गोयमे' त्यादि सर्वं गौतमद्वीपवत्परिभावनीयं, नवरमत्र जम्बूद्वीपस्य पूर्वस्यां दिशीति ववतव्यं, तथा प्रासादावतंसको वक्तव्यः, तस्य चायामदिप्रमाणं तथैव, नामनिमित्तचिन्तायामपि यस्मात्क्षुल्लिकावाप्यादिषु बहूनि उत्पलादीनि यावत्सहस्रपत्राणि चन्द्रप्रभाणि–चन्द्रवर्णानि, चन्द्रौ च ज्योतिषेन्द्रौ ज्योतिषराजौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, तौ चन्द्रौ प्रत्येकं चतुर्णां सामानिकसहस्रणां चतसृणामग्रहिषीणां सपरिवाराणां तिसृणां पर्षदा सप्तानामनीकानां सप्तानामनीकाधिपतीनां षोडशानामात्मरक्षदेवसहस्राणां स्वस्य स्वस्य चन्द्रद्वीपस्य स्याश्चन्द्राभिधानाय राजधान्या अन्येषां च बहूनां ज्योतिषाणां देवानां देवीनां चाधिपत्यं यावद्विहरतः । ततस्तद्गतोत्पलादीनां चन्द्राकारत्वाच्चन्द्रवर्णत्वाच्चन्द्रदेवस्वामिकत्वाच्च तौ चन्द्रद्वीपौ इति, चन्द्राभिधे च राजधान्यौ तयोश्चन्द्रद्वीपयोः पूर्वस्यां दिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् जम्बूद्वीपे द्वीपे द्वादश योजनसहस्राण्यवगाह्य विजयाराजधानीसदृश्यौ वक्तव्ये । एवं जम्बूद्वपगतसूरसत्कसूर्यद्वीपावपि वक्तव्यौ, नवरं जम्बूद्वीपस्य पश्चिमायां दिशि एनमेव लवणसमुद्रमवगाह्य वक्तव्यं, राजधान्यावपि स्वकद्वीपयोः पश्चिमायां दिशि अन्यस्मिन् जम्बूद्वीपे वक्तव्ये, शेषं सर्वं चन्द्रद्वीपवद्भावनीयं नवरं चन्द्रस्थाने सूर्यग्रहणमिति ।

मू. (२१०) *कहि णं भंते ! अब्भिंतरलावणगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता ?, गोयमा ! जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरत्थिमेणं लवणसमुद्दं बारस जोयण सहस्साइं ओगाहित्ता एत्थ णं अब्भिंतरलावणगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता, जहा जंबुद्दीवगा चंदा तहा भाणियव्वा णवरि रायहाणीओ अन्नमि लवणे सेसं तं चेव । एवं अब्भिंतरलावमगाणं सूराणवि लवणसमुद्दं बारस जोयणसहस्साइं तहेव सव्वं जाव रायहाणीओ ।*

कहि णं भंते ! बाहिरलावणगाणं चंदाणं चंददीवा पन्नत्ता ?, गोयमा ! लवणस्स समुद्दस्स पुरत्थिमिल्लाओ वेदियंताओ लवणसमुद्दं पच्चत्थिमेणं बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं बाहिरलावणगाणं चंददीवा नामं दीवा पन्नत्ता धायतिसंडदीवंतेणं अद्धेकोणनवतिजोयणाइं चत्तालीसं च पंचन उतिभागे जोयणस्स ऊसिता जलंतातो लवणसमुद्दंतेणं दो कोसे ऊसिता बारस जोयणसहस्साइं आयामविक्खंभेणं फउमवरवेइया वनसंडा बहुसमरमणिज्ञा भूमिभागा मणिपेढिया सीहासणा सपरिवारा सो चेव अट्ठे रायहाणीओ साण दीवाणं पुरत्थिमेणं तिरियमसं० अन्नंमि लवणसमुद्दे तहेव सव्वं । कहि णं भंते ! बाहिरलावणगाणं सूराणं सूरदीवा नामं दीवा पन्नत्ता ? गोयमा ! लवणसमुद्दपच्चत्थिमिल्लातो वेदियंताओ लवणसमुद्दं पुरत्थिमेणं बारस जोयणसहस्साइं धायतिसंडदीवंतेणं अद्धेकूणणउतिं जोयणाइं चत्तालीसं च पंचनउतिभागे जोयणस्स दो कोसे ऊसिया सेसं तहेव जाव रायहाणीओ सगाणं दीवाणं पच्चत्थिमेणं तिरियमसंखेज्ञे लवणे चेव बारस तहेव सव्वं भाणियव्वं ॥

वृ. सम्प्रति लवणसमुद्रगतचन्द्रादित्यद्वीपवक्तव्यतामाह–'कहि णं भंते !' इत्यादि, लवणे भवौ लावणिकौ अभ्यन्तरौ च तौ लावणिकौ च अभ्यन्तरलावणिकौ शिखाया अर्वाकचारिणावित्यर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयोः, सूत्रे द्वित्वेऽपि बहुवचं प्राकृतत्वात्, शेषं सुगमं, भगवानाह–गौतम ! जम्बूद्वीपस्य पूर्वस्यां दिशि एनमेव लवणसमुद्रं द्वादश योजनसहस्राण्यवगाह्य 'अत्र' एतस्मिन्नवकाशे अभ्यन्तर-लावणिकयोश्चन्द्रयोश्चन्द्रद्वीपौ नाम द्वीपौ वक्तव्यौ, इत्यादि जम्बूद्वीपगतचन्द्रसत्कान्द्रद्वीपवन्नि-रवशेषं वक्तव्यं, नवरमत्र राजधान्यौ स्वकीययोर्द्वीपयोः पूर्वस्यां दिशि अन्यस्मिन् लवणसमुद्रे द्वादश योजनसहस्राण्यवगाह्य वेदितव्ये ।

एवमभ्यन्तरलावणिकसूर्यसत्कसूर्यद्वीपावपि वक्तव्यौ, नवरं तौ जम्बूद्वीपस्य पश्चिमायां दिशि एनमेव लवणसमुद्रं द्वादश योजनसहस्राण्यवगाह्य वक्तव्यौ, राजधान्यावपि स्वकीययोः द्वीपयोः पश्चिमायां दिशि अन्यस्मिन् लवणसमुद्रे द्वादशः योजसहस्राण्यवगाह्येति ।

'कहि णं भंते !' इत्यादि, क्व भदन्त ! बाह्यलावणिकयोश्चन्द्रयोश्चन्द्रद्वीपौ नाम द्वीपौ प्रज्ञप्तौ ?, बाह्यलावणिकौ नाम लवणसमुद्रे शखाया बहिश्चारिणौ चन्द्रौ, भगवानाह–गौतम ! लवणसमुद्रस्य पूर्वस्माद्वेदिकान्तादर्वाग् लवणसमुद्रं पश्चिमदिशि द्वादश योजनसहस्राण्यवगाह्यात्र बाह्यलावणिकयोश्चन्द्रयोश्चन्द्रद्वीपौ नाम द्वीपौ प्रज्ञप्तौ, तौ च धातकीषण्डद्वीपान्तेन–धातकीष-ण्डद्वीपदिशि अर्द्धैकोननवतियोजनानि चत्वारिंशतं च पञ्चनवतिभागान् योजनस्योदकादूर्द्धमुच्छ्रितौ लवणसमुद्रदिशि द्वौ क्रोशौ, शेषवक्तव्यताऽभ्यन्तरलावणिकचन्द्रद्वीपवद्वक्तव्या, अत्रापि च राजधान्यौ स्वकीययोर्द्वीपयोः पूर्वस्यां तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् लवणसमुद्रे वक्तव्ये, एवं बाह्यलवणिकसूर्यसत्कसूर्यद्वीपावपि वक्तव्यौ, नवरमत्र लवणसमुद्रस्य पश्चिमाद् वेदिकान्ताल्लवणसमुद्रं पूर्वस्यां दिशि द्वादश योजनसहस्रण्यवगाह्येति वक्तव्यं, राजधान्यावपि स्वकीययोर्द्वीपयोः पश्चिमायां दिशि अन्यस्मिन् लवणसमुद्रे इति ।

मू. (२११) *कहि णं भंते ! धायतिसंडदीवगाणं चंदाणं चंददीवा पन्नत्ता ?, गोयमा ! धायतिसंडस्स दीवस्स पुरत्थिमिल्लाओ वेदियंताओ कालोयं णं समुद्दं बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं धायतिसंडदीवाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता ।*

सव्वतो समंता दोकोसा ऊसिता जलंताओ बारस जोयणसहस्साइं तहेव विक्खंभपरिक्खेवो भूमिभागो पासायवडिंसया मणिपेढिया सीहासणा सपरिवारा अट्ठो तहेव रायहाणीओ, सकामं दीवाणं पुरत्थिमेणं अन्नंभि धायतिसंडे दीवे सेसं तं चेव, एवं सूरदिवावि ।

नवरं धायइसंडस्स दीवस्स पच्चत्थिमिल्लातो वेदियंताओ कालोयं णं समुद्दं बारस जोयण० तहेव सव्वं जाव रायहाणीओसूराणं दीवाणं पच्चत्थिमेणं अण्णंमि धायइसंडे दीवे सव्वं तहेव ॥

वृ. सम्प्रति धातकीषण्डगतचन्द्रादित्यद्वीपवक्तव्यतामभिधित्सुराह–'कहि णं भंते !' इत्यादि, क्व भदन्त ! धातकीषण्डद्वीपगतानां चन्द्राणां, तत्र द्वादश चन्दा इति बहुवचनं, चन्द्रद्वीपा नाम द्वीपाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! धातकीषण्डस्य द्वीपस्य पूर्वस्यां दशि कालोदं समुद्रं द्वादश योजनसहस्राण्यवगाह्यात्र धातकीषण्डगतानां चन्द्राणां चन्द्रद्वीपा नाम द्वीपाः प्रज्ञप्ताः, ते च जम्बूद्वीपगतचन्द्रसत्कचन्द्रद्वीपवद्वक्तव्याः, नवरं ते सर्वासु दिक्षु जलादूर्द्ध द्वौ क्रोशौ उच्छ्रितौ इति तत्र पानीयस्य स्वत्रापि समत्वाद्, राजधान्योऽपि तेषां स्वकीयाना द्वीपानां पूर्वतस्ति-र्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् धातकीषण्डे द्वीपे द्वादश योजनसहस्राण्यव-गाह्यविजयाराजधानीवद्वक्तव्याः, एवं धातकीषण्डगतसूर्यस्कसूर्यद्वीपा अपि वक्तव्याः, नवरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धातकीषण्डस्य पश्चिमान्ताद्वेदिकान्तात्कालोदसमुद्रं द्वादश योजनसहस्राण्यवगाह्य वक्तव्याः, राजधान्योऽपि स्वकीयानां सूरद्वीपानां पश्चिमदिशि अन्यस्मिन् धातकीषण्डे शेषं तथैव।

मू. (२१२) कहि णं भंते ! कालोयगाणं चंदाणं चंददीवा प० गो० कालेय समुद्दस्स पुरच्छिमिल्लाओ वेदियंताओ कालोयण्णं समुद्दं पच्चत्थिमेण बारस जोयणसहस्साइं ओगाहित्ता एत्थ णं कालोयगचंदाणं चंददीवा सव्वतो समंता दो कोसा ऊसिता जलंतातो सेसं तहेव जाव रायहाणीओ सगाणं दीव० पुरच्छिमेणं अन्नंमि कालोयगसमुद्दे बारस जोयमा तं चेव सव्वं जाव चंदा देवा २।

एवं सूराणवि, नवरं कालोयगपच्चत्थिमिल्लातो वेदियंतातो कालोयसमुद्दपुरच्छिमेणं बारस जोयणसहस्साइं ओगाहित्ता तहेव रायहाणीओ सगाणं दीवाणं पच्चत्थिमेणं अन्नंमि कालोयगसमुद्दे तहेव सव्वं। एवं पुक्खरवरगाणं चंदाणं पुक्खर० दीवस्स पुरत्थिमिल्लाओ वेदियंताओ पुक्खरसमुद्दं बारस जोयणसहस्साइं ओगाहित्ता चंददीवा अन्नंमि पुक्खर० रायहाणीओ तहेव।

एवं सूराणवि दीवा पुक्खरवरदीवस्स पच्चत्थिमिल्लाओ वेदियंताओ पुक्खरोदं समुद्दं बारस जोयणसहस्साइं ओगाहित्ता तहेव सव्वं जाव रायहाणीओ दीविल्लगाणं दीवे समुद्दगाण समुद्दे चेव एगाण अब्भिंतरपासे एगाणं बाहिरपासे रायहाणीओ दीविल्लगाणं दीवेसु समुद्दगाणं समुद्देसु सरिमामतेसु।

वृ. सम्प्रति कालोदसमुद्रगतचन्द्रादित्यसत्कद्वीपवक्तव्यतां प्रतिपिपादयिषुराह–'कहि णं भंते!' इत्यादि, 'कालोयगाण'मित्यादि, क्व भदन्त! 'कालोदगानां' कालोदसमुद्रसत्कानां चन्द्राणां चन्द्रद्वीपा नाम द्वीपाः प्रज्ञप्ताः ?, भगवानाह–गौतम! कालोदसमुद्रस्य पूर्वस्माद् वेदिकान्तात्कालोद- समुद्रं पश्चिमदिशि द्वादश योजनसहस्राण्यवगाह्यात्र कालोदसमुद्रगतचन्द्राणां चन्द्रद्वीपाः प्रज्ञप्ताः, ते च सर्वासु दिक्षु जलादूर्ध्वं द्वौ द्वौ क्रोशावुच्छ्रितौ, शेषं तथैव। राजधान्योऽपि स्वकीयानां द्वीपानां पूर्वस्यां दिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् कालोदसमुद्रे द्वादश योजनसहस्राण्य- वगाह्य विजयाराजधानीवद्वक्तव्याः।

एवं कालोदगतसूर्यसत्कसूर्यद्वीपा अपि वक्तव्याः, नवरं कालोदसमुद्रस्य पश्चिमान्ताद्वेदि- कान्तात्कालोदसमुद्रं पूर्वदिशि द्वादश योजनसहस्राण्यवगाह्येति वक्तव्यं, राजधान्योऽपि स्वकीयानां द्वीपानां पश्चिमदिशि अन्यस्मिन् कालोदसमुद्रे, शेषं तथैव।

एवंपुष्करवरद्वीपगतानां चन्द्राणां पुष्करवरद्वीपस्य पूर्वस्माद्वेदिकान्तात्पुष्करोदसमुद्रं द्वादश योजनसहस्राण्यवगाह्य द्वीपा वक्तव्याः, राजधान्यः स्वकीयानां द्वीपानां पश्चिमदिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् पुष्करवरद्वीपे द्वादश योजनसहस्राण्यवगाह्य, पुष्करवरद्वीपगतसर्याणां द्वीपाः पुष्करवरद्वीपस्य पश्चिमान्ताद्वेदिकान्तात्पुष्करवरसमुद्रं द्वादश योजनसहस्राण्यवगाह्य प्रतिपत्तव्याः, राजधान्यः पुनः स्वकीयानां द्वीपानां पश्चिमदिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् पुष्करवरद्वीपे द्वादश योजनसहस्राण्यवगाह्य, पुष्करवरसमुद्रगतचन्द्रसत्कचन्द्रद्वीपाः पुषकरवरसमुद्रस्य पूर्वस्माद्वेदिकान्तात्पश्चिमदिशि द्वादश योजनसहस्राण्यवगाह्य प्रतिपत्तव्याः, राजधान्यः स्वकीयानां द्वीपानां पूर्वदिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् पुष्करवरसमुद्रे द्वादश योजनसहस्रेभ्यः परतः, पुष्करवरसमुद्रगत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूर्यसत्कसूर्यद्वीपाः पुष्करवरसमुद्रस्य पश्चिमान्ताद्वेदिकान्तात्पूर्वतो द्वादश योजनसहस्राण्यवगाह्य, राजधान्यः पुनः स्वकीयानां द्वीपानां पश्चिमदिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रान् व्यतिव्रज्यान्यस्मिन् पुष्करोदसमुद्रे द्वादश योजनसहस्राण्यवगाह्य प्रतिपत्तव्याः ।

एवं शेषद्वीपगतानामपि चन्द्राणां चन्द्रद्वीपगतात्पूर्वस्माद्वेदिकान्तादनन्तरे समुद्रे द्वादश योजनसहस्राण्यवगाह्य वक्तव्याः, सूर्याणां सूर्यद्वीपाः स्वस्वद्वीपगतात्पश्चिमान्ताद्वेदिकान्तादनन्तरे समुद्रे, राजधान्यश्चन्द्राणात्मीयचन्द्रद्वीपेभ्यः पूर्वदिशि अन्यस्मिन् सदृशनामके २ द्वीपे, सूर्याणामप्यात्मीयसूर्यद्वीपेभ्यः पश्चिमदिशि तस्मिन्नेव सदृशनामकेऽन्यस्मिन् द्वीपे द्वादश योजनसहस्रेभ्यः परतः, शेषसमुद्रगतानां तु चन्द्राणां चन्द्रद्वीपाः स्वस्वसमुद्रस्य पूर्वस्माद्वेदिकान्तात्पश्चिमदिशि द्वादश योजनसहस्राण्यवगाह्य, सूर्याणां तु स्वस्वसमुद्रस्य पश्चिमान्ताद्वेदिकान्तात्पूर्वदिशि द्वादश योजनसहस्राण्यवगाह्य, चन्द्राणां राजधान्यः स्वस्वद्वीपानां पूर्वदिशि अन्यस्मिन् सदृशनामके समुद्रे, सूर्याणां राजधान्यः स्वस्वद्वीपानां पश्चिमदिशि, केवलमग्रेतनशेषद्वीपसमुद्रगतानां चन्द्रसूर्याणां राजधान्योऽन्यस्मिन् सदृशनामके द्वीपे समुद्रे वाऽग्रेतने वा पश्चात्तने वा प्रतिपत्तव्या नाग्रेतन एवान्यथाऽनवस्थाप्रसक्तेः । एतच्च देवद्वीपादर्वाक् सूर्यवराभासं यावद्, देवद्वीपादिषु तु राजधानीः प्रति विशेषसत- मभिधित्सुराह--

मू. (२१३)　　*इमे नामा अणुगंतव्वा ।*

मू. (२१४)　　*जंबुद्दीवे लवणे धायइ कालोदपुक्खरे वरुणे ।*

खीर घय इक्खु[वरो य] नंदी अरुणवरे कुंडले रुयगे ।

मू. (२१५)　　*आभरणवत्थगंधे उप्पलितले य पुढवि निहिरयणे ।*

वासहरदहनईओ विजया वक्खारकप्पिंदा ।

मू. (२१६) *पुरमंदरमावासा कूडा णक्खत्तचंदसूरा य । एवं भाणियव्वं ।।*

मू. (२१७) *कहि णं भंते ! देवद्दीवगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता ? गोयमा देवदीवस्स देवोदं समुद्दं बारस जोयणसहस्साइं ओगाहित्ता तेणेव कमेण पुरत्थिमिल्लाओ वेइयंताओ जाव रायहाणीओ सगाणं दीवाणं पुरत्थिमेणं देवद्दीवं समुद्दं असंखेज्जाइं जोयणसहस्साइं ओगाहित्ता एत्थ णं देवदीवयाणं चंदाणं चंदाओ नामं रायहामीओ प० सेसं तं चेव, देवदीवचंदा दीवा, एवं सूराणवि, नवरं पच्चत्थिमिल्लाओ वेदियंताओ पच्चत्थिमेणं च भा०, तंमि चेव समुद्दे ।।*

कहि णं भंते ! देवसमुद्दगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता ?, गोयमा ! देवोदगस्स समुद्दगस्स पुरत्थिमिल्लाओ वेदियंताओ देवोदगं समुद्दं पच्चत्थिमेणं बारस जोयणसहस्साइं तेणेव कमेणं जाव रायहाणीओ सगाणं दीवाणं पच्चत्थिमेणं देवोदगं समुद्दं असंखेज्जाइं जोयणसहस्साइं ओगाहित्ता एत्थ णं दोवेदगाणं चंदाणं चंदाओ नामं रायहाणीओ पन्नत्ताओ, तं चेव सव्वं, एवं सूरणवि, नवरि देवोदगस्स पच्चत्थिमिल्लातो वेतियंतातो देवोदगसमुद्दं पुरत्थिमेणं बारस जोयणसहस्साइं ओगाहित्ता रायहाणीओ सगाणं २ दीवाणं पुरत्थिमेणं देवोदगं समुद्दं असंखेज्जाइं जोयणसहस्साइं । एवं नागे जक्खे भूतेवि चउण्हं दीवसमुद्दाणं ।

कहि णं भंते ! सयंभूरमणदीवगाणं चंदाणं चंददीवा नामं दीवा पन्नत्ता ?, सयंभूरमणस्स दीवस्स पुरत्थिमिल्लातो वेतियंतातो सयंभुरमणोदगं समुद्दं बारस जोयणसहस्साइं तहेव रायहाणीओ

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

सगाणं २ दीवाणं पुरत्थिमेणं सयंभुरमणोदगं समुद्दं पुरत्थिमेणं असंखेज्जाइं जोयण० तं चेव, एवं सूराणवि, सयंभूरमणस्स पच्चत्थिमिल्लातो वेदियंताओ रायहाणीओ सकाणं २ दीवाणं पच्चत्थिमिल्लाणं सयंभुरमणोदं समुद्दं असंखेज्जा० सेसं तं चेव।

कहि णं भंते ! सयंभूरमणसमुद्दकाणं चंदाणं०, सयंभुरमणस्स समुद्दस्स पुरत्थिमिल्लाओ वेतियंतातो सयंभुरमणं समुद्दं पच्चत्थिमेणं बारस जोयणसहस्साइं ओगाहित्ता, सेसं तं चेव। एवं सूराणवि। सयंभुरमणस्स पच्चत्थिमिल्लाओ सयंभुरमणोदं समुद्दं पुरत्थिमेणं बास जोयणसहस्साइं ओगाहित्ता रायहाणीओ सगाणं दीवाणं पुरत्थिमेणं सयंभुरमणं समुद्दं असंखेज्जाइं जोयणसहस्साइं ओगाहित्ता, एत्थ णं सयंभुरमण जाव सूरादेवा।

वृ. 'कहि णं भंते !' इत्यादि, क्व भदन्त ! देवद्वीपगानां चन्द्राणां चन्द्रद्वीपा नाम द्वीपाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! देवद्वीपस्य पूर्वस्माद्वेदिकान्ताद् देवोदं समुद्रं द्वादश योजनसहस्राण्य-वगाह्य अत्रान्तरे देवद्वीपगानां चन्द्राणां चन्द्रद्वीपाः प्रज्ञप्ता इत्यादि प्राग्वत्, राजधान्यः स्वकीयानां चन्द्रद्वीपानां पश्चिमदिशि तमेव देवद्वीपमसङ्घयेयानि योजनसहस्राण्यवगाह्यात्रान्तरे देवद्वीपगानां चन्द्राणां चन्द्रा नाम राजधान्यः प्रज्ञप्ताः, ता अपि विजयाराजधानीवद्वक्तव्याः ।

'कहि णं भंते !' इत्यादि, क्व भदन्त ! देवद्वीपगानां सूर्याणां सूर्यद्वीपा नाम द्वीपाः प्रज्ञप्ताः ? भगवानाह–गौतम ! देव द्वीपस्य देवद्वीपमसङ्घयेयानि योजनसहस्राण्यवगाह्येत्यादि ।

'कहि णं भंते !' इत्यादि, क्व भदन्त ! देवसमुद्राणां चन्द्राणां चन्द्रद्वीपा नाम द्वीपाः प्रज्ञप्ताः ? गौतम देवोदस्य समुद्रस्य पूर्वस्माद्वेदिकान्ताद्देवोदकं समुद्रं पश्चिमदिशि द्वादश योजनसहस्राण्य-वगाह्यात्रान्तरे देवोदसमुद्रगानां चन्द्राणां चन्द्रद्वीपाः प्रज्ञप्तास्ते च प्राग्वत् राजधान्यः स्वकीयानां चन्द्रद्वीपानां पश्चिमदिशि देवोदकं समुद्रमसङ्घयेयानि योजनसहस्राण्यवगाह्यात्रान्तरे वक्तव्याः, देवोदकसमुद्रगानां सूर्याणां सूर्यद्वीपा देवोदकस्य समुद्रस्य पश्चिमान्ताद्वेदिकान्ताद् देवोदकं समुद्रं पूर्वदिशि द्वादश योजनसहस्राण्यवगाह्यात्रान्तरे वक्तव्याः, राजधान्योऽपि स्वकीयानां सूर्यद्वीपानां पूर्वदिशि देवोदकं समुद्रमसङ्घयेयानि योजनसहस्राण्यवगाह्य, एवं नागयक्षभूतस्वयम्भूरमण-द्वीपसमुद्रचन्द्रादित्यानामपि वक्तव्यं, द्वीपगतानां चन्द्रादित्यानां चन्द्रादित्यद्वीपा अनन्तरसमुद्रे, समुद्रगतानां तु स्वस्वसमुद्र एव, राजधान्यो द्वीपगतानां चन्द्रादित्यानां स्वस्वद्वीपे, समुद्रगतानां स्वस्वसमुद्रे, आह च मूलटीकाकारोऽपि–

"एवं शेषद्वीपगतचन्द्रादित्यानामपि द्वीपा अनन्तरसमुद्रेष्ववगन्तव्याः, राजधान्यश्च तेषां पूर्वपरतोऽसङ्घयेयान् द्वीपसमुद्रान् गत्वा ततोऽन्यस्मिन् सदृशनाम्नि द्वीपे भवन्ति, अन्त्यानिमान् पञ्च द्वीपान् मुक्त्वा देवनागयक्षभूतस्वयम्भूरमणाख्यान्, न तेषु चन्द्रादित्यानां राजधान्योऽन्यस्मिन् द्वीपे, अपि तु स्वस्मिन्नेव पूर्वापरतो वेदिकान्तादसङ्घयेयानि योजनसहस्राण्यवगाह्य भवन्तीति," इह बहुधा सूत्रेषु पाठभेदाः परमेतावानेव सर्वत्राप्यर्थोऽनर्थभेदान्तरमित्येतद्व्याख्यानुसारेण सर्वेऽप्यनुगतन्तव्या न मोग्धव्यमिति ।

मू. (२१८) *अत्थि णं भंते ! लवणसमुद्दे वेलंधराति वा नागराया खन्नाति वा अग्घाति वा सिंहाति वा विजाती वा हासवट्टीति ?, हंता अत्थि ।*

जहा णं भंते ! लवमसमुद्दे अत्थि वेलंधराति वा नागराया अग्घा सिंहा विजाती वा हासवट्टीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा तहा णं बाहिरतेसुवि समुद्देसु अत्थि वेलंधराइ वा नागरायाति वा हासवट्टीति वा ?, नो तिणट्ठे समट्ठे ।

वृ. 'अत्थि णं भंते !' इत्यादि, सन्ति भदन्त ! लवणसमुद्रे वेलन्धरा इति वा नागराजाः, अग्घा इति वा खन्ना इति वा सीहा इति वा जाइ इति वा ?, अग्घादयो मत्स्यकच्छपविशेषाः, आह च चूर्णिकृत्–

''अग्घा खन्ना सीहा विजाइं इति मच्छकच्छमा'' ह्रस्ववृद्धी जलस्येति गम्यते भगवानाह गौ० सन्ति । 'जहा णं भंते ! लवणसमुद्दे वेलंधरा इति वा' इत्यादि पाठसिद्धम् ।

मू. (२१९) *लवणे णं भंते ! समुद्दे किं ऊसितोदगे किं पत्थडोदगे किं खुभियजले किं असुभियजले ?, गोयमा ! लवणे समुद्दे ओसितोदगे नो पत्थडोदगे खुभियजले नो अक्खुभियजले तहा णं बाहिरगा समुद्दा किं ऊसिओदगा पत्थडोदगा खुभियजला अक्खुभियजला ?*

गोयमा ! बाहिरगा समुद्दा नो उस्सितोदगा पत्थडोदगा नो खुभियजला अक्खुभियजला पुण्णा पुण्णप्पमाणा वोलट्टमाणा वोसट्टमाणा समभरघडत्ताए चिट्ठंति । अत्थि णं भंते ! लवणसमुद्दे बहवो ओराला बलाहका संसेयंति संमुच्छंति वा वासं वासंति वा ?, हंता अत्थि ।

जहा णं भंते ! लवणसमुद्दे बहवे ओराला बलाहका संसेयंति संमुच्छंति वासं वासंति वा हा णं बाहिरएसुवि समुद्देसु बहवे ओराला बलाहका संसेयंति संमुच्छंति वासं वासंति ?, नो तिणट्ठे समट्ठे । से केणट्ठे णं भंते ! एवं वुच्चति बाहिरगा णं समुद्दा पुण्णा पुण्णप्पमाणा वोलट्टमाणा वोसट्टमाणा समभरघडियाए चिट्ठंति ?

गोयमा ! बाहिरएसु णं समुद्देसु बहवे उदगजोणिया जीवा य पोग्गला य उदगत्ताए वक्कमंति विउक्कमंति चयंति उवचयंति, से तेणट्ठेणं एवं वुच्चति–बाहिरगा समुद्दा पुण्णा पुण्ण० जाव समभरघडत्ताए चिट्ठंति ॥

वृ. 'लवणे णं भंते !' इत्यादि, लवणो भदन्त ! समुद्रः किमुच्छ्रितोदकः प्रस्तटोदकः– प्रस्तटाकारतया स्थितमुदकं यस्य स तथा, सर्वतः समोदक इति भावः, क्षुभितं जलं यस्य स क्षुभितजलस्तत्प्रतिषेधादक्षुभितजलः ?, भगवानाह–गौतम ! उच्छ्रितोदको न प्रस्तटोदकः क्षुभित-जलो नाक्षुभितजलः । 'जहा णं भंते !' इत्यादि, यथा भदन्त ! लवणसमुद्र उच्छ्रितोदक इत्यादि तथा बाह्या अपि समुद्राः किमुच्छ्रितोदकाःप्रस्तटोदकाः क्षुभितजला अक्षुभितजलाः ?, भगवानाह– गौतम ! बाह्याः समुद्रा न उच्छ्रितोदकाः किन्तुप्रस्तटोदकाः सर्वत्र समोदकत्वात्, तथा न क्षुभितजलाः किन्त्वक्षुभित-जलाः क्षोभहेतुपातालकलशाद्यभावात्, किन्तु ते पूर्णा, तत्र किञ्चिद्धीनमपि व्यवहारतः पूर्णं भवति तत आह– पूर्णप्रमाणाः स्वप्रमाणं यावज्जलेन पूर्णा इति भावः, 'वोसट्टमाणा' परिपूर्णभृततया उल्लुठन्त इवेति भावः, 'वोलट्टमाणा' इति विशेषेण उल्लुठन्त इवेत्यर्थ : 'समभरघडत्ताए चिट्ठंति' इति समं–परिपूर्णो भरो–भरणं यस्य स समभरः परिपूर्णभृत इत्यर्थः स चासौ घटश्च समभरधटस्त- द्भावस्तत्ता तथा समभृतघट इव तिष्ठन्तीति भावः ।

'अत्थि णं भंते !' इत्यादि, अस्त्येतद् भदन्त ! लवणसमुद्रे 'ओरालाबलाहका' उदारा मेघाः 'संस्विद्यन्ते' संमूर्च्छनाभिमुखीभवन्ति, तदनन्तरं संमूर्च्छन्ति, ततो 'वर्षं' पानीयं वर्षन्ति ?, भगवानाह–हन्त ! अस्ति ॥ 'जहा णं भंते ! लवणसमुद्दे' इत्याद प्रतीतम् ।

Jain Education International　　　For Private & Personal Use Only　　　www.jainelibrary.org

'से केणट्ठेण' मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते बाह्याः समुद्राः पूर्णा पूर्णप्रमाणाः ? इत्यादि प्राग्वत्, भगवानाह–गौतम ! बाह्येषु समुद्रेषु बहव उदकयोनिका जीवाः पुद्गलाश्चोदकतया 'अपक्रामन्ति' गच्छन्ति 'व्युत्क्रामन्ति' उत्पद्यन्ते, एके गच्छन्त्यन्ये उत्पद्यन्त इति भावः, तथा 'चीयन्ते' चयमुपगच्छन्ति 'उपचीयन्ते' उपचयमायान्ति, एतच्च पुद्गलान् प्रति द्रष्टव्यं, पुद्गलानामेव चयोपचयार्थप्रसिद्धेः, 'से एएणट्ठेण' मित्याद्युपसंहारवाक्यं प्रतीतं ।

सम्प्रत्युद्वेधपरिवृद्धिं चिचिन्तयिषुरिदमाह–

मू. (२२०) *लवणे णं भंते ! समुद्दे केवतियं उव्वेहपरिवुड्ढीते पन्नत्ते ?, गोयमा ! लवणस्स णं समुद्दस्स उभओपासिं पंचानउतिं २ पदेसे गंता पदेसं उव्वेहपरिवुड्ढीए पन्नत्ते, पंचानउतिं २ वालग्गाइं गंता वालग्गं उव्वेहपरिवुड्ढीए पन्नत्ते, प० लिक्खाओ गंता लिक्खा उव्वेहपरि० पंचानउइ जवाओ जवमज्झे अंगुलविहत्थिरयणीकुच्छी धणु [उव्वेहपरिवुड्ढीए] गाउयजोयण-जोयणसतजोयणसहस्साइं गंता जोयणसहस्सं उव्वेहपरिवुड्ढीए ।*

लवणे णं भंते ! समुद्दे केवतियं उस्सेहपरिवुड्ढीए प० गो० लवणस्स णं समुद्दस्स उभओपासिं पंचानउतिं पदेसे गंता सोलसपएसे उस्सेहपरिवुड्ढीए प० गो० लवणस्स णं समुद्दस्स एएणेव कमेणं जाव पंचानउतिं २ जोयणसहस्साइं गंता सोलस जोयणसहस्साइं उस्सेधपरिवुड्ढिए प० ॥

वृ. 'लवणे णं भंते ! समुद्दे' इत्यादि, लवणो भदन्त ! समुद्रः 'कियत्' कियन्ति योजनानि यावद् उद्वेधपरिवृद्धया प्रज्ञप्तः ?, किमुक्तं भवति ?–जम्बूद्वीपवेदिकान्ताल्लवणसमुद्रवेदिकान्ता-च्चारभ्योभयतोऽपि लवणसमुद्रस्य कियन्ति योजनानि यावत् मात्रया मात्रया उद्वेधपरिवृद्धिरिति, भगवानाह–गौतम ! लवणसमुद्रे उभयोः पार्श्वयोर्जम्बूद्वीपवेदिकान्ताल्लवणसमुद्रवेदिकान्ताच्चार-भ्येत्यर्थः पञ्चनवतिप्रदेशान् गत्वा प्रदेश उद्वेधपरिवृद्धया प्रज्ञप्तः, इह प्रदेशस्त्रसरेण्वादिरूपो द्रष्टव्यः, पञ्चनवतिं वालाग्राणि गत्वैकं वालाग्रमुद्वेधपरिवृद्धया प्रज्ञप्तं, एवं लिक्षायवमध्याङ्गुलवित-स्तिरत्निकुक्षिधनुर्गव्यूतयोजनयोजनशतसूत्राण्यपि भावनीयानि, पञ्चनवतिं योजनसहस्राणि गत्वा योजनसहस्रमुद्वेधपरिवृद्धया प्रज्ञप्तं, त्रैराशिकभावना चैवं योजनादिषु द्रष्टव्या ।

इहोभयतोऽपि पञ्चनवतियोजनसहस्रपर्यन्ते योजनसहस्रमवगाहेन दृष्टं ततस्त्रैराशिक-कर्म्मावतारः, यदि पञ्चनवतिसहस्रपर्यन्ते योजनसहस्रमवगाहस्ततः पञ्चनवतियोजनपर्यन्ते कोऽवगाहः ?, राशित्रयस्थापना–९५०००।१०००।९५। अत्रादिमध्ययो राश्योः शून्यत्रयस्याप-वर्त्तना ९५।१।९५, ततो मध्यस्य राशेरेकरूपस्य अन्त्येन पञ्चनवतिलक्षणेन राशिना गुणनात् जाता पञ्चनवति, तत्राद्येन राशिनां पञ्चनवतिलक्षमेन विभज्यते लब्धमेकं योजनं, उक्तञ्च–

॥ १ ॥ "पंचानउइसहस्से गंतूणं जोयणाणि उभओवि ।
जोयणसहस्समेगं लवणे ओगाहओ होइ ॥

॥ १ ॥ पंचाणउईण दगे (लवणे) गंतूणं जोयणाणि उभओवि ।
जोयणमेगं लवणे ओगाहेणं मुणेयव्वा ॥

पञ्चनवतियोजनपर्यन्ते च यद्येकं योजनमवगाहस्ततोऽर्थात्पञ्चनवतिगव्यूतपर्यन्ते एकं गव्यूतं पञ्चनवतिधनुःपर्यन्ते एकं धनुरित्यादि लब्धम् ।

सम्प्रत्युत्सेधमधिकृत्याह– 'लवणे णं भंते ! समुद्दे' इत्यादि, लवणो भदन्त ! समुद्रः 'कियत्' कियन्ति योजनानि उत्सेधपरिवृद्धया प्रज्ञप्तः ?, एतदुक्तं भवति–जम्बूद्वीपवेदिकान्ताल्लवण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुद्रवेदिकान्ताच्चारभ्योभयतोऽपि लवणसमुद्रस्य कियत्या कियत्या मात्रया कियन्ति योजनानि यावदुत्सेधपरिवृद्धि ?, भगवानाह–गौतम ! 'लवणस्स णं समुद्दस्से'त्यादि, इह निश्चयतो लवण-समुद्रस्य जम्बूद्वीपवेदिकातो लवणसमुद्रवेदिकातश्च समतले भूभागे प्रथमतो जलवृद्धिरङ्गुलसङ्ख्येय-भागः, समतलमेव भूभागमधिकृत्य प्रदेशवृद्धया जलवृद्धि क्रमेण परिवर्द्धमाना तावदवसेया यावदुभयतोऽपि पञ्चनवतियोजनसहस्रपर्यन्ते सप्त शतानि, ततः परं मध्यदेशभागे दशयोजन-सहस्रविस्तारे षोडश योजनसहस्राणि ।

इह तु षोडशयोजनसहस्रप्रमाणायाः शिखायाः शिरसि उभयोश्च वेदिकान्तयोर्मूले दवरिकायां दत्तायां यदपान्तराले किमपि जलरहितमाकाशं तदपि करणगत्या तदाभाव्यमिति स जलं विवक्षित्वाऽधिकृतमुच्यते–लवणस्य समुद्रस्योभयतो जम्बूद्वीपवेदिकान्ताल्लवणसमुद्रवेदिकान्ताच्च पञ्चनवतिं प्रदेशान् गत्वा षोडश प्रदेशा उत्सेधपरिवृद्धि प्रज्ञप्ता, पञ्चनवतिं वालाग्राणि गत्वा षोडश वालाग्राणि, एवं यावत् पञ्चनवतिं योजनसहस्राणि गत्वा षोडश योजनसहस्राणि, अत्रेयं त्रैराशिकभावना–पञ्चनवतियोजनसहस्रातिक्रमे षोडश योजनसहस्राणि जलोत्सेधस्ततः पञ्चनवतियोजनातिक्रमेक उत्सेधः ?, राशित्रयस्थापना–१५०००।१६०००।९५। अत्रादिमध्ययो राश्योः शून्यत्रिकस्यापवर्त्तना ९५।१६।९५, ततो मध्यमराशेः षोडशलक्षणस्यान्त्येन पञ्चनवति-लक्षणेन गुणने जातानि पञ्चदश शतानि विंशत्यधिकानि १५२०, एषामादिराशिना पञ्चनवतिलक्षणेन भागे हृते लब्धानि षोडश योजनानि, उक्तञ्च–

॥१॥　　"पंचाणउइसहस्से गंतूणं जोयणाणि उभओवि ।
　　　　उस्सेहेणं लवणो सोलससाहस्सिओ भणिओ ॥
॥२॥　　पंचाणऊई लवणे गंतूणं जोयणाणि उभओवि ।
　　　　उस्सेहेणं लवणो सोलस किल जोयणे होइ ॥

तत्र यदि पञ्चनवतियोजनपर्यन्ते षोडशयोजनावगाहस्ततोऽर्थाल्लभ्यते पञ्चनवतिगव्यूत-पर्यन्ते षोडश गव्यूतानि पञ्चनवतिधनुःपर्यन्ते षोडश धनूंषीत्यादि ।

सम्प्रति गोतीर्थप्रतिपादनार्थमाह–

मू. (२२१) *लवणस्स णं भंते ! समुद्दस्स केमहालए गोतित्थ प०गो० उभओपासिं पंचानउति २ जोयणसहस्साइं गोतित्थं प० ॥ लवणस्स णं भंते ! समुद्दस्स केमहालए गोतित्थविरहिते खेत्ते प०गो० दस जोयणसहस्साइं गोतित्थविरहिते खेत्ते पन्नत्ते ॥ लवणस्स णं भंते ! समुद्दस्स उदगमाले प०गो० दस जोयणसहस्साइं उदगमाले पन्नत्ते ॥*

वृ. 'लवणस्स णं भंते !' इत्यादि, लवणस्स भदन्त ! समुद्रस्य 'किंमहत्' किंप्रमाणमहत्वं गोतीर्थं प्रज्ञप्तं ?, गोतीर्थमिव गोतीर्थक्रमेण नीचो नीचतरः प्रवेशमार्गः, भगवानाह–गौतम ! लवणस्स समुद्रस्योभयोः पार्श्वयोर्जम्बूद्वीपवेदिकान्ताल्लवणसमुद्रवेदिकान्ताच्चारभ्येत्यर्थ पञ्चनवतिं योजनसहस्राणि यावद् गोतीर्थं प्रज्ञप्तम्, उक्तञ्च–"पंचाणउइसहस्से गोतित्थं उभयतोवि लवणस्सा" इति

'लवणस्स णं भंते !' इत्यादि, लवणस्स भदन्त ! समुद्रस्य 'किंमहत्' किंप्रमाणमहत्वं गोतीर्थविरहितं क्षेत्रं प्रज्ञप्तं ?, भगवानाह–गौतम ! लवणस्य समुद्रस्य दश योजनसहस्राणि

9 | 23

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

गोतीर्थविरहितं क्षेत्रं प्रज्ञप्तम् ॥ 'लवणस्स णं भंते !' इत्यादि, लवणस्य भदन्त ! समुद्रस्य 'किंमहती' विस्तारमधिकृत्य किंप्रमाणमहत्वा उदकमाला—समपानीयोपरिभूता षोडशयोजनसहस्रोच्छ्रया प्रज्ञप्ता ?, भगवानाह—गौतम ! दश योजनसहस्राणि उदकमाला प्रज्ञप्ता ॥

मू. (२२२) *लवणे णं भते ! समुद्दे किंसंठिए पन्नत्ते ?, गो० ! गोतित्थसंठिते नावासंठाणसंठिते सिप्पिसंपुडसंठिए आसखंधसंठिते वलभिसंठिते वट्टे वलयागारसंठाणसंठिते पन्नत्ते ।। लवणे णं भंते ! समुद्दे केवतियं चक्कवालविक्खंभेणं ? केवतियं परिक्खेवेणं ? केवतियं उव्वेहेणं ? केवतियं उस्सेहेणं ? केवतियं सव्वग्गेणं पन्नत्ते ?*

गोयमा ! लवणे णं समुद्दे दो जोयणसयसहस्साइं चक्कवालविक्खंभेणं पन्नरस जोयणसतसहस्साइं एकासीतिं च सहस्साइं सतं च इगुयालं किंचिविसेसूणे परिक्खेवेणं, एगं जोयणसहस्सं उव्वेधेणं सोलस जोयणसहस्साइं उस्सेहेणं सत्तरस जोयणस० सव्वग्गेणं प० ।

वृ. 'लवणे णं भंते !' इत्यादि, लवणो भदन्त ! समुद्रः किंसंस्थितः प्रज्ञप्तः ?, भगवानाह—गौतम ! गोतीर्थसंस्थानसंस्थितः क्रमेण नीचैर्नीचैस्तरामुद्वेधस्य भावात्, नावासंस्थितः बुघ्नादूर्द्धं नाव इव उभयोरपि पार्श्वयोः समतलं भूभागमपेक्ष्य क्रमेण जलवृद्धिसम्भवेन उन्नताकारत्वात्, 'सिप्पसंपुडसंठिते' इति शुक्तिकासंपुटसंस्थानसंस्थितः, उद्वेधजस्य जलवृद्धिजलस्य चैकत्रमीलनचिन्तायां शुक्तिकासंपुटाकारसाधर्म्यसम्भवात्, 'अश्वस्कन्धसंस्थितः' उभयोरपि पार्श्वयोः पञ्चनवतियोजनसहस्रपर्यन्तेऽश्वस्कन्धस्येवोन्नततया षोडशयोजनसहस्रप्रमाणोच्चैस्त्वयौः शिखाया भावात्, 'वलभीसंस्थितः' वलभीगृहसंस्थानसंस्थितः दशयोजनसहस्रप्रमाणविस्तारायाः शिखाया वलभीगृहाकाररूपतया प्रतिभासनात्, तथा वृत्तो लवणसमुद्रो वलयाकारसंस्थितः, चक्रवालतया तस्यावस्थानात् । सम्प्रति विष्कम्भादिपरिमाणमेककालं पिपृच्छिषुराह—

'लवणे णं भंते ! समुद्दे' इत्यादि, लवणो भदन्त ! समुद्रः कियच्चक्रवालविष्कम्भेन कियत्परिक्षेपेण कियदुद्वेधेन—उण्डत्वेन किय- दुत्सेधेन कियत्सर्वाग्रेण—उत्सेधोद्वेधपरिमाणसामस्त्येन प्रज्ञप्तः ?, भगवानाह—गौतम ! लवणसमुद्रो द्वे योजनशतसहस्रे चक्रवालविष्कम्भेन प्रज्ञप्तः, पञ्चदश योजनशतसहस्राणि एकाशीति सहस्राणि शतं चैकोनचत्वारिंशं किंचिद्विशेषोनं परिक्षेपेण प्रज्ञप्तः, एकं योजनसहस्रमुद्वेधेन, षोडश योजनसहस्राण्युत्सेधेन, सप्तदश योजनसहस्राणि सर्वाग्रेण—उत्सेधोद्वेधमीलनचिन्तायां ।

इह लवणसमुद्रस्य पूर्वाचार्यैर्धनप्रतरगणितभावनाऽपि कृता सा विनेयजनानुग्रहा दर्श्यते, तत्र प्रतरभावना क्रियते, प्रतरानयनार्थं चेदं करणं—लवणसमुद्रसत्कविस्तारपरिमाणाद् द्विलक्षयोजनरूपाद् दश योजनसहस्राणि शोध्यन्ते, तेषु च शोधितेषु यच्छेषं तस्यार्द्धं क्रियते, जातानि पञ्चनवति सहस्राणि, यानि च प्राक् शोधितानि दश सहस्राणि तानि च तत्र प्रक्षिप्यन्ते, जातं पञ्चोत्तरं लक्षं एतच्च कोटीति व्यवहियते, अनया च कोटया लवणसमुद्रस्य मध्यभा- गवर्त्ती परिरयो नव लक्षा अष्टचत्वारिंशत्सहस्राणि षट् शतानि त्र्यशीत्यधिकानि इत्येवंपरिमाणो गुण्यते, ततः प्रतरपरिमाणं भवति, तच्चेदं—नवनवति कोटिशतानि एकषष्टि कोट्यः सप्तदश लक्षाः पञ्चदश सहस्राणि उक्तञ्च—

॥ १ ॥ "वित्थाराओ सोहिय सदसहस्साइं सेसअद्धंमि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं चेव पक्खिवित्ता लवणसमुद्दस्स सा कोडी ॥

॥ २ ॥ लक्खं पंचसहस्सा कोडीए तीए संगुणेऊणं ।

लवणस्स मज्झपरिही ताहे पयरं इमं होइ ॥

॥ ३ ॥ नवनउई कोडिसया एगट्ठी कोडि लक्ख सत्तरसा ।

पन्नरस सहस्साणि य पयरं लवणस्स निद्दिट्ठं ॥

घनगणितभावना त्वेवं—इह लवणसमुद्रस्य शिखा षोडश सहस्राणि योजनसहस्रमुद्वेधः सर्वसङ्ख्यया सप्तदश सहस्राणि, तैः प्राक्तनं प्रतरपरिमाणं गुण्यते, ततो घनगुणितं भवति, तच्चेदं—षोडश कोटीकोटयस्त्रनवति कोटिशतसहस्राणि एकोनचत्वारिंशत् कोटिसहस्राणि नव कोटिशतानि पञ्चदशकोटयधिकानि पञ्चाशल्लक्षाणि योजनानामिति उक्तञ्च—

॥ १ ॥ "जोयणसहस्ससोलस लवणसिहा अहोगया सहस्सेगं ।

पयरं सत्तरसहस्ससंगुणं लवणघणगणियं ।

॥ २ ॥ सोलस कोडाकोडी तेणऊई कोडिसयसहस्साओ ।

उणयालीससहस्सा नवकोडिसया य पन्नरसा ॥

॥ ३ ॥ पन्नास सयसहस्सा जोयणाणं भवे अणूणाइं ।

लवणसमुद्दस्सेयं जोयणसंखाए घनगणियं ॥

आह—कथमेतावत्प्रमाणं लवणसमुद्रस्य घनगणितं भवति ?, न हि सर्वत्र तस्य सप्तदशयोजनसहस्रप्रमाण उच्छ्रयः, किन्तु मध्यभाग एव दशसहस्रप्रमाणविस्तारस्ततः कथं यथोक्तं घनगणितमुपपद्यते ? इति, सत्यमेतत्, केवलं लवणसिखाया— सिरसि उभयोश्च वेदिकान्तयोरुपरि दवरिकायामेकान्तऋजुरूपायां दीयमानायां २ यदपान्तराले जलशून्यं क्षेत्रं तदपि करणगत्या तदाभाव्यमिति सजलं विवक्ष्यते ।

अत्रार्थे च दृष्टान्तो मन्दरपर्वतः, तथाहि—मन्दरपर्वतस्य सर्वत्रैकादशभागपरिहाणिरूप-वर्ण्यते, अथ च न सर्वत्रैकादशभागपरिहाणि, किन्तु कापि कियती, केवलं मूलादारभ्य शिखरं यावद्दवरिकायां दत्तायां यदपान्तराले कापि कियदाकाशं तत्सर्वं करणगत्या मेरोराभाव्यमिति मेरुतया परिकल्प्य गणितज्ञाः सर्वत्रैकादशपरिभागहानिं परिवर्णयन्ति, तद्वदिदमपि यथोक्तं घनपरिमाणमिति, न चैतत्स्वमनीषिकाविजृम्भितं, यत आह जिनभद्रगणिक्षमाश्रमणो विशेषणवत्यामेतद्विचारप्रक्रमे— "एवं उभयवेइयंताओ सोलसहस्सुस्सेहस्स कन्नगईए जं लवणसमुद्दाभव्वं जलसुन्नंपि खेत्तं तस्स गणियं, जहा मंदरपव्वयस्स एक्कारसभागपरिहाणी कन्नगईए आगासस्सवि तदाभव्वंति- काउं भणिया तहा लवणसमुद्दस्सवि ॥" इति ।

मू. (२२३) *जइ णं भंते ! लवणसमुद्दे दो जोयणसतसहस्साइं चक्कवालविक्खंभेणं पन्नरस जोयणसतसहस्साइं एकासीतं च सहस्साइं सतं इगुयालं किंचि विसेसूणा परिक्खेवेणं एगं जोयणसहस्सं उव्वेहेणं सोलस जोयणसहस्साइं उस्सेधेणं सत्तरस जोयणस०सव्वग्गेणं प० ।*

कम्हा णं भंते ! लवणसमुद्दे जंबुद्दीवं २ नो उवीलेति नो उप्पीलेति नो चेव णं एक्कोदगं करेंति ?, गोयमा ! जंबुद्दीवे णं दीवे भरहेरवएसु वासेसु अरहंतचक्कवट्टिबलदेवा वासुदेवा चारणा विज्ञाधरा समणा समणीओ सावया सावियाओ मणुया एगधम्मापगतिभद्दया पगतिविनीया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पगतिउवसंता पगतिपयणुकोहमाणमायालोभा मिउमद्दवसंपन्ना अल्लीणा भद्दगा विनीता।

तेसि णं पणिहाते लवणे समुद्दे जंबुद्दीवं दीवं नो उवीलेति नो उप्पीलेति नो चेव णं एगोदगं करेंति, गंगासिंधुरत्तारत्तवईसु सलिलासु देवया महिड्डियाओ जाव पलिओवमड्डितीया परिवसंति, तेसिणं पणिहाए लवणसमुद्दे जाव नो चेव णं एगोदगं करेति, चुल्लहिमवंतसिहरेसु वासहरपव्वतेसु देवा महिड्डिया तेसि णं पणिहाए०, हेमवतेरण्णवतेसु वासेसु मणुया पगतिभद्दगा०, रोहितंससुवण्णकूलरूप्पकूलासु सलिलासु जाव पलिओवमड्डितीया परिव०, महाहिमवंतरुप्पिसु वासहरपव्वतेसु देवा महिड्डिया जाव पलिओवमड्डितीया, हरिवासरम्मयवासेसु मणुया पगतिभद्दगा गंधावतिमालवंतपरिताएसु वट्टवेयड्डपव्वतेसु देवा महिड्डीया, निसढनीलवंतेसु वासधरपव्वतेसु देव महिड्डीया०।

सव्वा दहदेवयाओ भाणियव्वा, पउमद्दहतिगिच्छिकेसरिदहावसाणेसु देवा महिड्डीयाओ तासिं पणिहाए०, पुव्वविदेहावरविदेहेसु वासेसु अरहंतचक्कवट्टिबलदेववासुदेवा चारणा विज्ञाहरा समणा समणीओ सावगा सावियाओ मणुया पगति० तेसिं पणिहाए लवण०, सीयासीतोदगासु सलिलासु देवता महिड्डीया०, देवकुरुउत्तरकुरुसु मणु पगतिभद्दगा०, मंदरे पव्वते देवता महिड्डीया०

जंबूए य सुदंसणाए जंबूदीवाहिवती अनाढिए नामं देवे महिड्डीए जाव पलिओवमठितीए परिवसति तस्स पणिहाए लवणसमुद्दे नो उवीलेति नो उप्पीलेति नो चेव णं एकोदगं करेति।

अदुत्तरं च णं गोयमा! लोगड्डिती लोगानुभावे जण्णं लवणसमुद्दे जंबुद्दीवं दीवं नो उवीलेति नो उप्पीलेति नो चेव णमेगोदगं करेति॥

वृ. 'जइ णं भंते!' इत्यादि, यदि भदन्त! लवणसमुद्रो द्वे योजनशतसहस्रे चक्रवालविष्कम्भेन पञ्चदश योजनशतसहस्राणि एकाशीति सहस्राणि शतं चैकोनचत्वारिंशं किञ्चिद्विशेषोनं परिक्षेपेण प्रज्ञप्तः, एकं योजनसहस्रमुद्वेधेन षोडश योजनसहस्राण्युत्सेधेन सप्तदश योजनसहस्राणि सर्वाग्रेण प्रज्ञप्तः। तर्हि 'कम्हा णं भंते!' इत्यादि, कस्माद् भदन्त! लवणसमुद्रो जम्बूद्वीपं द्वीपं न 'अवपीडयति' जलेन प्लावयति, न 'उत्पीडयति' प्राबल्येन बाधते, नापि णमिति वाक्यालङ्कृतौ 'एकोदकं' सर्वात्मनोदकप्लावितं करोति?, भगवानाह– गौतम! जम्बूद्वीपे भरतैरावतयो– क्षेत्रयोरर्हन्तश्चक्रवर्त्तिनो बलदेवा वासुदेवाः 'चोरणाः' जङ्घाचारणमुनयो विद्याधराः 'श्रमणाः' साधवः 'श्रमण्यः' संयत्यः श्रावकाः श्राविकाः, एतत् सुषमदुष्षमादिकमरकत्रयमपेक्ष्योक्तं वेदितव्यं, तत्रैवार्हदादीनां यथायोगं सम्भवात्।

सुषमसुषमादिकमधिकृत्याह–मनुष्याः प्रकृतिभद्रकाः प्रकृतिप्रतनुक्रोधमानमायालोभाः मृदुमार्दवसंपन्ना आलीना भद्रका विनीताः, एतेषां व्याख्यानं प्राग्वत्, तेषां 'प्रणिधया' प्रणिधानं प्रणिधा, 'उपसर्गादात' इत्यङ्प्रत्ययः, तान् 'प्रणिधाय' अपेक्ष्य तेषां प्रभावत् इत्यर्थ, लवणसमुद्रो जम्बूद्वीपं द्वीपं नावपीडयतीत्यादि, दुष्षमदुष्षमादावपि नावपीडयति, भरतवैताढ्याद्यधिपतिदेवताप्रभावात्, तथा क्षुल्लहिमवच्छिखरिणोर्वर्षधरपर्वतयोर्देवता महर्द्धिका यावत्करणान्महाद्युतिका इत्यादिपरिग्रहः परिवसन्ति तेषां 'प्रणिधया' प्रभावेन लवणसमुद्रो जम्बूद्वीपं नावपीडयतीत्यादि। तथा हैमवतहैरण्यवतोर्वर्षयोर्मनुजाः प्रकृतिभद्रका यावद् विनीतास्तेषां प्रणिधयेत्यादि पूर्ववत्, तथा तयोरेव वर्षयोर्यो यथाक्रमं शब्दापातिविकटापाती वृत्तवैताढयौ पर्वतौ तयोर्देवौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतस्तेषां प्रणिधयेत्यादि पूर्ववत्।

तथा महाहिमवद्रुक्मिवर्षधरपर्वतयोर्देवता महर्द्धिका इत्यादि तथैव। तथा हरिवर्षरम्यकवर्षयोर्मनुजाः प्रकृतिभद्रका इत्यादि सर्वं हैमवतवत्, तथा तयोः क्षेत्रयोर्यथाक्रमं गन्धापातिमाल्यवत्पर्यायौ यौ वृत्तवैताढ्यपर्वतौ तयोर्देवौ महर्द्धिकावित्यादि पूर्ववत्। तथा पूर्वविदेहापरविदेहवर्षयोरर्हन्तश्चक्रवर्त्तिनो यावन्मनुजाः प्रकृतिभद्रका यावद् विनीतास्तेषां प्रणिधयेत्यादि पूर्ववत्। तथा देवकुरुत्तरकुरुषु मनुजाः प्रकृतिभद्रका यावद्विनीतास्तेषां प्रणिधयेत्वादि पूर्ववत् तथा उत्तरकुरुषु कुरुषु तदेवाह–लोकस्थितिरेषा–लोकानुभाव एष यल्लवणसमुद्रो जम्बूद्वीपं द्वीपं जलेन नावपीडयतीत्यादि। तृतीयप्रतिपत्तावेष मन्दरोद्देशकः समाप्तः ॥ तदेवमुक्ता लवणसमुद्रवक्तव्यता, सम्प्रति धातकीषण्डवक्तव्यतामाह–

मू. (२२४) *लवणसमुद्दं धायइसंडे नाम दीवे वट्टे वलयागारसंठाणसंठीते सव्वतो समंता संपरिक्खिवित्ता णं चिट्ठंति, धायतिसंडे णं भंते! दीवे किं समचक्कवालसंठिते विसमचक्कवालसंठिते?, गोयमा! समचक्कवालसंठिते नो विसमचक्कवालसंठिते।*

धायइसंडे णं भंते! दीवे केवतियं चक्कवालविक्खंभेणं केवइयं परिक्खेवेणं पन्नत्ते?, गोयमा! चत्तारि जोयणसतसहस्साइं चक्कवालविक्खंभेणं एगयालीसं जोयणसतसहस्साइं दसजोयणसहस्साइं नवएगट्ठे जोयणसते किंचिविसेसूणे परिक्खेवेणं पन्नत्ते।

से णं एगाए पउमवरवेदियाए एगेणं वनसंडेणं सव्वतो समंता संपरिक्खित्ते दोण्हवि वण्णओ दीवसमिया परिक्खेवेणं।

धायइसंडस्स णं भंते! दीवस्स कति दारा प० गो० चत्तारि दारा प०, विजए वेजयंति जयंते अपराजिए। कहि णं भंते! धायइसंडस्स दीवस्स विजए नामं दारे प० गो० धायइसंडपुरत्थिमपेरंते कालोयसमुद्दपुरत्थिमद्धस्स पच्चत्थिमेणं सीयाए महानदीए उप्पिं एत्थ णं धायइ० विजए नामं दारे प० तं चेव पमाणं, रायहाणीओ अन्नंमि धायइसंडे दीवे, दीवस्स वत्तव्वया भा० एवं चत्तारिवि दारा भा०। धायइसंडस्स णं भंते! दीवस्स दारस्स य २ एस णं केवइयं अबाहाए अंतरे प० गो० दस जोयणसयसहस्साइं सत्तावीसं च जोयणसहस्साइं सत्तपणतीसे जोयणसए तिन्नि य कोसे दारस्स य २ अबाहाए अंतरे प०।

धायइसंडस्स णं भंते! दीवस्स पदेसा कालोयगं समुद्दं पुट्ठा?, हंता पुट्ठा॥ ते णं भंते! किं धायइसंडे दीवे कालोए समुद्दे?, ते धायइसंडे नो खलु ते कालोयसमुद्दे। एवं कालोयस्सवि। धायइसंडद्दीवे जीवा उद्दाइत्ता २ कालोए समुद्दे पच्चायंति?, गोयमा! अत्थेगतिया पच्चायंति अत्थेगतिया नो पच्चायंति। एवं कालोएवि अत्थे० प० अत्थेगतिया नो पच्चायंति।

से केणट्ठेणं भंते! एवं वुच्चति–धायइसंडे दीवे २?, गोयमा! धायइसंडे णं दीवे तत्थ तत्थ देसे तहिं २ पएसे धायइरुक्खा धायइवण्णा धायइसंडा निच्चं कुसुमिया जाव उवसोभेमाणा २ चिट्ठंति, धायइमहाधायइरुक्खेसु सुदंसणपियदंसणा दुवे देवा महिड्ढिया जाव पलिओवमट्ठितीया परिवसंति से एएणट्ठेणं०, अदुत्तरं च णं गोयमा! जाव निच्चे।

धायइसंडे णं भंते! दीवे कति चंदा पभासिंसु वा ३? कति सूरिया तविंसु वा ३? कइ महग्गहा चारं चरिंसु वा ३? कइ नक्खत्ता जोगं जोइंसु ३? कइ तारागणकोडाकोडीओ सोभेंसु

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वा ३ ?, गोयमा ! बारस चंदा पभासिंसु वा ३, एवं–

वृ. 'लवणसमुद्द'मित्यादि, लवणसमुद्रं धातकीष्डो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्य तिष्ठति ॥ 'धायइसंडे णं दीवे किं समचक्कवालसंठिए' इति सूत्रं लवणसमुद्रवद्भावनीयम् ।

'धायइसंडे ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! चत्वारि योजनशतसहस्राणि चक्रवालविष्कम्भेन, एकचत्वारिंशत् योजनशतसहस्राणि दश सहस्राणि नव च एकषष्टानि योजनशतानि किञ्चिद्विशेषोनानि परिक्षेपेण, उक्तञ्च–

॥ ३ ॥ "एयालीसं लक्खा दस य सहस्साणि जोयणाणं तु ।
नव य सया एगट्ठा किंचूणा परिरओ तस्स ॥"

'से ण'मित्यादि, स धातकीखण्डो द्वीप एकया पद्मवरवेदिकया अष्टयोजनोच्छ्रयजगत्युपरिभाविन्येति सामर्थ्यादगम्यते, एकेन वनषण्डेन पद्मवरवेदिकाबहिर्भूतेन सर्वतः समन्तात्संपरिक्षिप्तः । द्वयोरपि वर्णकः प्राग्वत् ॥ 'धायइसंडस्स ण'मित्यादि, धातकीषण्डस्य भदन्त ! द्वीपस्य कति द्वाराणि प्रज्ञप्तानि ?, भगवानाह–गौतम ! चत्वारि द्वारामि प्रज्ञप्तानि, तद्यथा–विजयं वैजयन्तं जयन्तमपराजितं च ।

'कहि णं भंते !' इत्यादि, क्व भदन्त ! धातकीषण्डस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तं ?, भगवानाह–गौतम ! धातकीषण्डस्य द्वीपस्य पूर्वपर्यन्ते कालोदसमुद्रपूर्वार्द्धस्य पश्चिमदिशि शीताया महानद्या उपरि 'अत्र' एतस्मिन्नन्तरे धातकीषण्डस्य द्वीपस्य विजयनाम द्वारं प्रज्ञप्तं, तच्च जम्बूद्वीपविजयद्वारवदविशेषेण वेदितव्यं, नवरमत्र राजधानी अन्यस्मिन् धातकीषण्डे द्वीपे वक्तव्या । 'कहि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! धातकीषण्डद्वीपदक्षिणपर्यन्ते कालोदसमुद्रदक्षिणार्द्धस्योत्तरोऽत्र धातकीषण्डस्य द्वीपस्य वैजयन्तं नाम द्वारं प्रज्ञप्तं, तदपि जम्बूद्वीपवैजयन्तद्वारवदविशेषेण वक्तव्यं, नवरमत्रापि राजधानी अन्यस्मिन् धातकीषण्डद्वीपे ।

'कहि णं भंते !' इत्यादि प्रश्नसूत्रं गतार्थं, भ०-! धातकीषण्डद्वीपपश्चिमपर्यन्ते कालोदसमुद्रपश्चिमार्द्धस्य पूर्वतः शीतोदाया महानद्या उपर्यत्र धातकीषण्डस्य द्वीपस्य जयन्तं नाम द्वारं प्रज्ञप्तं, तदपि जम्बूद्वीपजयन्तद्वारवद्वक्तव्यं, नवरं राजधानी अन्यस्मिन् धातकीषण्डे द्वीपे ।

'कहि णं भंते !' इत्यादि, प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! धातकीषण्डद्वीपत्तरार्द्धपर्यन्ते कालोदसमुद्रदक्षिणार्द्धस्य दक्षिणतोऽत्र धातकीषण्डस्य द्वीपस्यापराजितं नाम द्वारं प्रज्ञप्तं, तदपि जम्बूद्वीपगतापराजितद्वारवद्वक्तव्यं, नवरं राजधानी अन्यस्मिन् धातकीषण्डे द्वीपे ॥ 'धायइसंडस्स णं भंते !' इत्यादि, धातकीषण्डस्य भदन्त ! द्वीपस्य द्वारस्य २ च परस्परमेतदन्तरं 'कियत्' किंप्रमाणम् 'अबाधया' अन्तरित्वा व्याघातेन प्रज्ञप्तम् ?, भगवानाह–गौतम ! दश योजनशतसहस्राणि सप्तविंशतिर्योजनसहस्राणिं सप्त शतानि पञ्चत्रिंशानि द्वारस्य २ परस्परमबाधयाऽन्तरं प्रज्ञप्तं, तथाहि–एकैकस्य द्वारस्य सद्वारशाखस्य जम्बूद्वीपद्वारस्येव पृथुत्वं सार्द्धानि चत्वारि योजनानि, ततश्चतुर्णां द्वाराणामेकत्र पृथुत्वपरिमाणमीलने जातान्यष्टादश योजनानि, तान्यनन्तरोक्तात्परिरयमानात् ४११०९६१ शोध्यन्ते, शोधितेषु च तेषु जातं शेषमिदम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकचत्वारिंशल्लक्षा दश सहस्राणि नव शतानि त्रिचत्वारिंशदधिकानि ४११०९४३, एतेषां चतुर्भिर्भागे हृते लब्धं यथोक्तं द्वाराणां परस्परमन्तरम्, उक्तञ्च–

॥ १ ॥ "पणतीसा सत्त सया सत्तावीसा सहस्स दस लक्खा।
धायइसंडे दारंतरं तु अवरं च कोसतियं ॥"

'धायइसंडस्स णं भंते ! दीवस्स पएसा' इत्यादीनि चत्वारि सूत्राणि प्राग्वद्भावनीयानि 'से केणट्ठेणं भंते!' इत्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते–धातकीषण्डो द्वीपो धातकीखण्डो द्वीपः ? इति, भगवानाह–धातकीषण्डे द्वीपे तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवो धातकीवृक्षा बहवो धातकीवनषण्डा बहूनि धातकीवनानि, वनषण्डयोः प्रतिविशेषः प्रागेवोक्तः, 'निच्चंकुसुमिया' इत्यादि प्राग्वत्, 'धायइमहाधायइरुक्खेसु एत्थ' मित्यादि पूर्वार्द्धे उत्तरकुरुषु नीलवद्गिरिसमीपे धातकीनामवृक्षोऽवतिष्ठते, पश्चिमार्द्धे उत्तरकुरुषु नीलवद्गिरिसमीपे महाधातकीनामवृक्षोऽवतिष्ठते, तौ च प्रमाणादिना जम्बूवृक्षवद्वेदितव्यौ, तयोरत्र धातकीषण्डे द्वीपे यथाक्रमं सुदर्शनप्रियदर्शनौ द्वौ देवौ यावत्पल्योपमस्थितिकौ परिवसतः, ततो धातकीषण्डोपलक्षितो द्वीपो धातकीषण्डद्वीपः, तथा चाह–'से एएणट्ठेण' मित्यादि गतार्थं

सम्प्रति चन्द्रादिवक्तव्यतामाह–'धायइसंडे णं भंते ! दीवे कति चंदा पभासिंसु' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–

मू. (२२५) *चउवीसं ससिरविणो नक्खत्त सता य तिन्नि छत्तीसा।*
एगं च गहसहस्सं छप्पन्नं धायईसंडे ॥

मू. (२२६) *अट्ठेव सयसहस्सा तिन्नि सहस्साइं सत्त य सयाइं।*
धायइसंडे दीवे तारागण कोडिकोडीणं ॥

मू. (२२७) *सोभेंसु वा ३ ॥*

वृ. गौतम ! धातकीषण्डे द्वादश चन्द्राः प्रभासितवन्तः प्रभासन्ते प्रभासिष्यन्ते, द्वादश सूर्यास्तापितवन्तस्तापयन्ति तापयिष्यन्ति, त्रीणि नक्षत्रशतानि षट्त्रिंशानि योगं चन्द्रमसा सूर्येण च सार्द्ध युक्तवन्तो युञ्जन्ति योक्ष्यन्ति, तत्र त्रीणि षट्त्रिंशानि नक्षत्राणां शतानि, एकैकस्य शशिनः परिवारेऽष्टाविंशतेर्नक्षत्राणां भावात्, तथा एकं षडपञ्चाशदधिकं महाग्रहसहस्रं चारं चरितवन्तश्चरन्ति चरिष्यन्ति।

एकैकस्य शशिनः परिवारेऽष्टाशीतेर्महाग्रहाणां भावात् अष्टौ शतसहस्राणि त्रीणि सहस्राणि सप्त शतानि तारागणकोटीकोटीनां शोभितवन्तः शोभन्ते शोभयिष्यन्ते।

एतदपि एकशशिनः तारापरिमाणं द्वादशभिर्गुणयित्वा भावनीयं, उक्तं च–

॥ १ ॥ "बारस चंदा सूरा नक्खत्तसया य तिन्नि छत्तीसा।
एगं च गहसहस्सं छप्पन्नं छप्पन्नं धायईसंडे ॥

॥ २ ॥ अट्ठेव सयसहस्सा तिन्नि सहस्सा य सत्त य सया उ।
धायइसंडे दीवे तारागणकोडिकोडीओ ॥

सम्प्रति कालोदसमुद्रवक्तव्यतामाह–

मू. (२२८) *धायइसंडं णं दीवं कालोदे नामं समुद्दे वट्टे वलयागारसंठाणसंठिते सव्वतो*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समंता संपरिक्खित्ताणं चिट्ठइ, कालोदे णं समुद्दे किं समचक्कवालसंठाणसंठिते विसम० ?, गोयमा ! समचक्कवाल० नो विसमचक्कवालसंठिते ।

कालोदे णं भंते ! समुद्दे केवतियं चक्कवालविक्खंभेणं केवतियं परिक्खेवेणं पन्नत्ते ?, गोयमा ! अट्ठ जोयणसयसहस्साइं चक्कवालविक्खंभेणं एकान उति जोयणसयसहस्साइं सत्तरि सहस्साइं छच्चं पंचुत्तरे जोयणसते किंचिविसेसाहिए परिक्खेवेणं पन्नत्ते ।

से णं एगाए पउमवरवेदियाए एगेणं वनसंडेणं दोण्हवि वण्णओ ।। कालोयस्स णं भंते ! समुद्दस्स कति दारा प० गो० चत्तारि दारा प० तं०–विजए वेजयंते जयंते अपराजिए ।।

कहि णं भंते ! कालोदस्स समुद्दस्स विजए नामं दारे पन्नत्ते ?, गोयमा ! कालोदे समुद्दे पुरत्थिमपेरंते पुक्खरवरदीवपुरत्थिमद्धस्स पच्चत्थिमेणं सीतोदाए महानदीए उप्पिं एत्थ णं कालोदस्स समुद्दस्स विजये नामं दारे प० अट्ठेव जोयणाइं तं चेव पमाणं जाव रायहाणीओ । कहि णं भंते ! कालोयस्स समुद्दस्स वेजयंते नामं दारे प० गो० कालोयसमुद्दस्स दक्खिणपेरंते पुक्खरवरदीवस्स दक्खिणद्धस्स उत्तरेणं एत्थ णं कालोयसमुद्दस्स वेजयंते नामं दारे पन्नत्ते ।

कहि णं भंते ! कालोयसमुद्दस्स जयंते नामं दारे पन्नत्ते ?, गोयमा ! कालोयसमुद्दस्स पच्चत्थिमपेरंते पुक्खरवरदीवस्स पच्चत्थिमद्धस्स पुरत्थिमेणं सीताए महानदीए उप्पिं जयंते नामं दारे प० । कहि णं भंते ! अपराजिए नामं दारे प० गो० कालोयसमुद्दस्स उत्तरद्धपेरंते पुक्खरवरदीवोत्तरद्धस्स दाहिणओ एत्थ णं कालोयसमुद्दस्स अपराजिए नामं दारे०, सेसं तं चेव

कालोयस्स णं भंते ! समुद्दस्स दारस्स य २ एस णं केवतियं २ अबाहाए अंतरे प० गो०

वृ. 'धायइसंडे णं दीव' मित्यादि, धातकीषण्डं णमिति पूर्ववत् द्वीपं कालोदसमुद्रो वृत्तो वलयाकारसंस्थितः सर्वतः समन्तात् 'संपरिक्षिप्य' वेष्टयित्वा तिष्ठति ।। 'कालोए णं समुद्दे किं समचक्कवालसंठिए' इत्यादि प्राग्वत् ।

'कालोए णं भंते' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! अष्टौ योजनशतसहस्राणि चक्रवालविष्कम्भेन एकनवति योजनशतसहस्राणि सप्तति सहस्राणि षट् शतानि पञ्चोत्तराणि किञ्चिद्विशेषाधिकानि परिक्षेपेण, एकं च योजनसहस्रमुद्वेधेनेति गम्यते, उक्तञ्च–

॥ १ ॥ "अट्ठेव सयसहस्सा कालोओ चक्कवालओ रुंदो ।
जोयणसहस्समेगं ओगाहेणं मुणेयव्वो ।।

॥ २ ॥ इगनउइ सयसहस्सा हवंति तह सत्तरी सहस्सा य ।
छच्च सया पंचहिया कालोयहिपरिरओ एसो ।।

'से णं एगाए' इत्यादि, स कालोदसमुद्र एकया पद्मवरवेदिकयाऽष्टयोजनोच्छ्रयया जगत्युपरिभाविन्येति गम्यते, एकेन वनषण्डेन सर्वतः समन्तात्संपरिक्षिप्तः, द्वयोरपि वर्णकः प्राग्वत् ।

'कालोयस्स णं भंते !' इत्यादि, कालोदस्य समुद्रस्य भदन्त ! कति द्वाराणि प्रज्ञप्तानि ?, भगवानाह–गौतम ! चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा–विजयं वैजयन्तं जयन्तमपराजितं च ।। व भदन्त ! कालोदसमुद्रस्य विजयं नाम द्वारं प्रज्ञप्तं ?, गौतम ! कालोदसमुद्रस्य पूर्वपर्यन्ते पुष्करवरद्वीपस्य पूर्वार्द्धस्य पश्चिमदिशि शीतोदाया महानद्या उपर्यत्र कालोदस्य समुद्रस्य विजयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाम द्वारं प्रज्ञप्तं, एवं विजयद्वारवक्तव्यता पूर्वानुसारेण वक्तव्या, नवरं राजधानी अन्यस्मिन् कालोदे समुद्रे ! वैजयनन्तद्वारप्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! कालोदसमुद्रदक्षिणपर्यन्ते पुष्करवरद्वीपदक्षिणार्द्धस्योत्तरतोऽत्र कालोदसमुद्रस्य वैजयन्तं नाम द्वारं प्रज्ञप्तं, एवं जम्बूद्वीपगतवैजयन्तद्वारवद्वक्तव्यं, नवरं राजधानी अन्यस्मिन् कालोदे समुद्रे।

जयन्तद्वारप्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! कालोदसमुद्रपश्चिमपर्यन्ते पुष्करवरद्वीपपश्चिमार्द्धस्य पूर्वतः शीताया महानद्या उपर्यत्र कालोदसमुद्रस्य जयन्तं नाम द्वारं प्रज्ञप्तं, एतदपि जम्बूद्वीपगतजयन्तद्वारवत्, नवं राजधानी अन्यस्मिन् कालोदे समुद्रे। अपराजितद्वारप्रश्नसूत्रमपि सुगमं, भगवानाह–गौतम ! कालोदसमुद्रोत्तरार्द्धपर्यन्ते पुष्करवरद्वीपोत्तरार्द्धस्य दक्षिणतोऽत्र कालोदसमुद्रस्यापरिजातं नाम द्वारं प्रज्ञप्तं, तदपि जम्बूद्वीपगतापराजितद्वारवत् नवरं राजधानी अन्यस्मिन् कालोदसमुद्रे ।। सम्प्रति द्वाराणां परस्परमन्तरं प्रतिपिपादयिषुराह–

'कालोयस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–

मू. (२२९) *बावीस सयसहस्सा बानउति खलु भवे सहस्साइं।*
छच्च सया बायाला दारंतर तिन्नि कोसा य ।।

वृ. गौतम ! द्वाविंशतिर्योजनशतसहस्राणि द्विनवति सहस्राणि षड् योजनशतानि षट्चत्वारिंशदधिकानि त्रयश्च क्रोश द्वारस्य द्वारस्य परस्परमबाधयाऽन्तरं प्रज्ञप्तं, तथाहि–चतुर्णामपि द्वाराणामेकत्र पृथुत्वमीलनेऽष्टादश योजनानि कालोदसमुद्रपरिरयपरिमाणाद् ९१७०६०५ इत्येवंरूपपात् शोध्यन्ते, शोधितेषु च तेषु जातमिदम्–एकनवतिर्लक्षाः सप्तति सहस्राणि पञ्च शतानि सप्ताशीत्यधिकानि ९१७०५८७ च, तेषां चतुर्भिर्भागे हते लब्धं यथोक्तं द्वाराणां परस्परमन्तरपरिमाणं २२९२६४६ क्रोशः ३, उक्तञ्च–

॥१॥ "छायाला छच्च सया बानउय सहस्स लक्ख बावीसं।
कोसा य तिन्नि दारंतरं तु कालोयहिस्स भवे ॥

मू. (२३०) *दारस्स य २ अबाहाए अंतरे पन्नत्ते। कालोदस्स णं भंते ! समुद्दस्स पएसा पुक्खरवरदीव० तहेव, एवं पुक्खरवरदीवस्सवि जीवा उद्दाइत्ता २ तहेव भाणियव्वं ।। से केणट्ठेणं भंते ! एवं वुच्चति कालोए समुद्दे २ ?, गोयमा ! कालोयस्स णं समुद्दस्स उदके आसले मासले पेसले कालए मासरासिवण्णाभे पगतीए उदगरसेणं पन्नत्ते, कालमहाकाला एत्थ दुवे देवा महिड्डिया जाव पलिओवमट्ठितीया परिवसंति, से तेणट्ठेणं गोयमा ! जाव निच्चे ।*

कालोए णं भंते ! समुद्दे कति चंदा पभासिंसु वा ३ ? पुच्छा, गोयमा ! कालोए णं समुद्दे बायालीसं चंदा पभासेंसु वा ३–

वृ. 'कालोयस्स णं भंते ! समुद्दस्स पएसा' इत्यादि सूत्रचतुष्टयं पूर्ववद्भावनीयम् ॥ नामान्वर्थमभिधित्सुराह–'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते कालोदः समुद्रः कालोदः समुद्रः ? इति, भगावनाह–गौतम ! कालोदस्य समुद्रस्योदकं 'आसलम्' आस्वाद्यम् उदकरसत्वात् मांसलं गुरुधर्मकत्वात् पेशलं आस्वादमनोज्ञत्वात् 'कालं' कृष्णम्, एतदेवोपमया प्रतिपादयति–माषराशिवर्णाभं, उक्तञ्च–"पगईए उदगरसं कालोए उदग मासरासिनिभं इति, ततः कालमुदकं यस्यासौ कालोदः, तथा कालमहाकालौ च तत्र द्वौ देवौ पूर्वार्द्धपश्चिमार्द्धाधिपती

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, तत्र कालयोरुदकं यस्मिन् स कालोदः, तथा चाह—'से एएणट्ठेण'मित्यादि सूत्रं पाठसिद्धं । —एवंरूपं च चन्द्रादीनां परिमाणमन्यत्राप्युक्तम्—

॥ १ ॥ "बायालीसं चंदा बायालीसं च दिनयरा दित्ता ।
कालोयहिम्मि एए चरंति संबद्धलेसागा ॥

॥ २ ॥ नक्खत्ताण सहस्सा सयं च बावत्तरं मुणेयव्वं ।
छच्च सया छन्नउया गहाण तिन्नेव य सहस्सा ॥

॥ ३ ॥ अट्ठावीसं कालोयहिम्मि बारस य सहसहस्साइं ।
नव य सया पन्नासा तारागणकोडीकोडीणं ॥

—सम्प्रति पुष्करवरद्वीपवक्तव्यतामाह—

मू. (२३१) बायालीसं चंदा बायालीसं च दिनयरा दित्ता ।
कालोददिम्मि एते चरंति संबद्धलेसागा ॥

मू. (२३२) नक्खत्ताण सहस्सं एगं बावत्तरं च सतमन्नं ।
छच्च सता छन्नउया महागहा तिन्नि य सहस्सा ॥

मू. (२३३) अट्ठावीसं कालोदहिम्मि बारस य सयसहस्साइं ।
नव य सया पन्नासा तारागणकोडिकोडीणं ॥

मू. (२३४) सोभेंसु वा ३ ॥

मू. (२३५) कालोयं णं समुद्दं पुक्खरवरे नामं दीवे वट्टे वलयागारसंठाणसंठिते सव्वतो समंता संपरि० तहेव जाव समचक्कवालसंठाणसंठिते नो विसमचक्कवालसंठाणसंठिए । पुक्खरवरे णं भंते ! दीवे केवतियं चक्कवालविक्कभेणं केवइयं परिक्खेवेणं पन्नत्ते ?, गोयमा ! सोलस जोयणसतसहस्साइं चक्कवालविक्खंभेणं—

वृ. 'कालोयं णं समुद्द' मित्यादि, कालोदं णमिति वाक्यालङ्कारे समुद्रं पुष्करवरो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति । 'पुक्खरवरे णं दीवे किं समचक्कवालसंठिए' इत्यादि प्राग्वत् ॥ विष्कम्भादिप्रतिपादनार्थमाह—'पुक्खरवरे णं भंते ! दीवे' इत्यादि प्रश्नसूत्रं सुगमं ।

मू. (२३६) 'एगा जोयणकोडी बानउतिं खलु भवे सयसहस्सा ।
अउणानउतिं अट्ठ सया चउनउया य [परिरओ] ' पुक्खरवरस्स ॥

वृ. भगवानाह—गौतम ! षोडश योजनशतसहस्राणि चक्रवालविष्कम्भेन एका योजनकोटी द्विनवति शतसहस्राणि एकोननवति सहस्राणि अष्टौ शतानि चतुर्नवतानि योजनानि परिक्षेपेण प्रज्ञप्तः

मू. (२३७) से णं एगाए पउमवरवेदियाए एगेण य वनसंडेण संपरि० दोण्हवि वण्णओ पुक्खरवरस्स णं भंते ! कति दारा प० गो० चत्तारि दारा पन्० तं० विजए वेजयंते जयंते अपराजिते

कहि णं भंते ! पुक्खरवस्स दीवस्स विजए नामं दारे प० गो० पुक्खरवर-दीवपुरच्छिमपेरंते पुक्खरोदसमुद्दपुरच्छिमद्धस्स पच्चत्थिमेणं एत्थ णं पुक्खरवरदीवस्स विजए नामं दारे पन्नत्ते तं चेव सव्वं, एवं चत्तारिवि दारा, सीयासीओदा नत्थि भाणितव्वाओ ।

पुक्खरवरस्स णं भंते ! दीवस्स दारस्स य २ एस णकेवतियं अबाधाए अंतरे प० गो० !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'से ण'मित्यादि, स पुष्करवरद्वीप एकया पद्मवरवेदिकयाऽष्टजनोच्छ्रयया जगत्युपरिभाविन्येति गम्यते, एकेन वनषण्डेन सर्वतः समन्तात् संपरिक्षिप्तः, द्वयोरपि वर्णकः पूर्ववत् ।। अधुना द्वारवक्तव्यतामाह--'पुक्खरवरस्स ण'मित्यादि, पुष्करवरद्वीपस्य कति द्वाराणि प्रज्ञप्तानि ?, भगवानाह–गो० चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा–विजयं वैजयन्तं जयन्तमपराजितं च । 'कहि णं भंते !' इत्यादि, क भदन्त ! पुष्करवरद्वीपस्य विजयं नाम द्वारं प्रज्ञप्तं ?, भगवानाह--गो० पुष्कवरद्वीपपूर्वार्द्धपर्यन्ते पुष्करोदस्य समुद्रस्य पश्चिमदिशि अत्र पुष्करवरद्वीपस्य विजयं नाम द्वारं प्रज्ञप्तं, तत्र जम्बूद्वीपविजयद्वारवदविशेषण वक्तव्यं, नवरं राजधानी अन्यस्मिन् पुष्करवर-द्वीपे वक्तव्या । एवं वैजयन्तादिसूत्राण्यपि भा० सर्वत्र राजधानी अन्यस्मिन् पुष्करवरद्वीपे

मू. (२३८) *अडाल सयसहस्सा बावीसं खलु भवे सहस्साइं ।*
अगुणुत्तरा य चउरो दारंतर पुक्खरवरस्स ।।

वृ. सम्प्रति द्वाराणां परस्परमन्तरमाह–'पुक्खरवरदीवस्स ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! अष्टचत्वारिंशद् योजनशतसहस्राणि द्वाविंशतिर्योजनसहस्राणि चत्वारि योजनशतानि एकोनसप्ततानि द्वारस्य द्वारस्य च परस्परमबाधयाऽन्तरपरिमाणं, चतुर्णामपि द्वाराणामेकत्र पृथुत्वमीलनेऽष्टादश योजनानि, तानि पुष्करवरद्वीपपरिमाणाद् १९२८९८९४ इत्येवंरूपात् शोध्यन्ते, शोधितेषु च तेषु जातमिदम्–एका योजनकोटी द्विनवति शतसहस्राणि एकोननवति सहस्राणि अष्टौ शतानि षट्सप्तत्यधिकानि १९२८९८७६, तेषां चतुर्भिर्भागे हृते लब्धं यथोक्तं द्वाराणां परस्परमन्तरपरिमामं ४८२२४६९ ।

मू. (२३९) *पदेसा दोण्हवि पुट्ठा, जीवा दोसु भाणियव्वा ।। से केणट्ठेणं भंते ! एवं वुच्चति पुक्खरवरदीवे २ ? गो० ! पुक्खरवरे णं दीवे तत्थ २ देसे तहिं २ बहवे पउमरुक्खा पउमवनसंडा निच्चं कुसुमिता जाव चिट्ठंति, पउममहापउमरुक्खे एत्थ णं पउमपुंडरीया नामं दुवे देवा महिड्ढिया जाव पलिओवमट्ठितीया परिवसंति, से तेणट्ठेणं गोयमा ! एवं वुच्चति पुक्खरवरदीवे २ जाव निच्चे ।*

पुक्खरवरे णं भंते ! दीवे केवइया चंदा पभासिंसु वा ३ ?, एवं पुच्छा–

वृ. 'पुक्खरवरदीवस्स णं भंते ! दीवस्स पएसु पुक्खरवरसमुद्दं पुट्ठा ?' इत्यादि सूत्रचतुष्टयं प्राग्वत् ।। सम्प्रति नामनिमित्तप्रतिपादनार्थमाह–'से केणट्ठेण'मत्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते पुष्करवरद्वीपः २ ? इति, भगवानाह–गौतम ! पुष्करवरद्वीपे तत्र तत्र देशे तस्य देशस्य तत्र २ प्रदेशे बहवः पद्मवृक्षाः, पद्मानि अतिविशालतया वृक्षा इव पद्मवृक्षाः, पद्मखण्डाः–पद्मवनानि, खण्डवनयोर्विशेषः प्राग्वत्, 'निच्चं कुसुमिया' इत्यादि विशेषणजातं प्राग्वत् । तथा पूर्वार्द्धे उत्तरकुरुषु यः पद्मवृक्षः पश्चिमार्द्धे उत्तरकुरुषु यो महापद्मवृक्षस्तयोरत्र पुष्करवरद्वीपे यथाक्रमं पद्मपुण्डरीकौ द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ यथाक्रमं पूर्वार्द्धापरार्द्धाधिपती परिवसतः, तथा चोक्तम्–

॥ १ ॥ "पउमे य महापउमे रुक्खा उत्तरकुरूसु जंबुसमा ।
एएसु वसंति सुरा पउमे तह पुंडरीए य ।।"

पद्मं च पुष्करमिति पुष्करवरोपलक्षितो द्वीपः पुष्करवरो द्वीपः 'से एएणट्ठेण'मित्याद्युपसंहारवाक्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२४०) *चोयालं चंदसयं चउयालं चेव सूरियाण सयं।*
पुक्खरवरदीवंमि चरंति एते पभासेंता ॥

मू. (२४१) *चत्तारि सहस्साइं बत्तीसं चेव होंति नक्खत्ता।*
छच्च सया बावत्तर महग्गहा बारह सहस्सा ॥

मू. (२४२) *छन्नउइ सयसहस्सा चत्तालीसं भवे सहस्साइं।*
चत्तारि सया पुक्खर [वर] तारागणकोडकोडीणं ॥

वृ. सम्प्रति चन्द्रादित्यादिपरिमाणमाह–'पुक्खरवरे'त्यादि पाठसिद्धं, नवरं नक्षत्रादिपरिमाणमष्टाविंशत्यादिसङ्ख्यानि नक्षत्रादीनि चतुश्चत्वारिंशेन शतेन गुणयित्वा स्वयं परिभावनीयं, उक्तं चैवंरूपं परिमाणमन्यत्रापि–

॥१॥ "चोयालं चंदसयं चोयालं चेव सूरियाण सयं।
पुक्खरवरंमि दीवे चरंति एए पगासिंता ॥

॥२॥ चत्तारि सहस्साइं बत्तीसं चेव होंति नक्खत्ता।
छच्च सया बावत्तर महागहा बारससहस्सा ॥

॥३॥ छन्नउइ सयसहस्सा चोयालीसं भवे सहस्साइं।
चत्तारिं च सयाइं तारागणकोडिकोडीणं ॥ इति।

मू. (२४३) सोभेंसु वा ३ ॥ पुक्खरवरदीवस्स णं बहुमज्झदेसभाए एत्थ णं माणुसुत्तरे नामं पव्वते पन्नत्ते वट्टे वलयागारसंठाणसंठते जे णं पुक्खरवरं दीवं दुहा विभयमाणे २ चिट्ठंति, तंजहा–अब्भिंतरपुक्खरद्धं च बाहिरपुक्खरद्धं च।

अब्भिंतरपुक्खरद्धे णं भंते ! केवतियं चक्कवालेणं परिक्खेवेणं प० गो० अट्ठ जोयणसयसहस्साइं चक्कवालविक्खंभेणं–

वृ. सम्प्रति मनुष्यक्षेत्रसीमाकारिमानुषोत्तरपर्वतवक्तव्यतामाह–'पुक्खरवरदीवस्स ण'मित्यादि, पुष्करवरस्य णमिति वाक्यालङ्कृतौ द्वीपस्य बहुमध्यदेशबागे मानुषोत्तरो नाम पर्वतः प्रज्ञप्तः, स च वृत्तः, वृत्तं च मध्यपूर्णमपि भवति यथा कौमुदीशशाङ्कमण्डलं ततस्तद्रूपताव्यवच्छेदार्थमाह–वलयाकारसंस्थानसंस्थितो, यः पुष्करवरं द्वीपं द्विधा सर्वासु दिक्षु विदिक्षु च विभजमानो विभजमानस्तिष्ठति, केनोल्लेखेन द्विधा विभजमानस्तिष्ठति ? इत्यत आह–तद्यथा–अभ्यन्तरपुष्करार्द्धं च बाह्यपुष्करार्द्धं च, चशब्दौ समुच्चये, किमुक्तं भवति ? –मानुषोत्तरात्पर्वतादर्वाग् यत्पुष्करार्द्ध तदभ्यन्तरपुष्करार्द्धं, यत्पुनस्तस्मान्मानुषोत्तरपर्वतात्परतः पुष्करार्द्धं तद् बाह्यपुष्करार्द्धमिति। 'अब्भिंतरपुक्खरद्धे ण'मित्यादि प्रश्नसूत्रं सुगमं।

मू. (२४४) *कोडी बायालीसा तीसं दोन्नि य सया अगुणवण्णा।*
पुक्खरअद्धपरिरओ एवं च मणुस्सखेत्तस्स ॥

वृ. भगवानाह–गौतम ! अष्टौ योजशतसहस्राणि चक्रवालविष्कम्भेन एका योजनकोटी द्वाचत्वारिंशच्छतसहस्राणि त्रिंसत्सहस्राणि द्वे च योजनशते एकोनपञ्चाश किञ्चिद्विशेषाधिके परिक्षेपेण प्रज्ञप्तः।

मू. (२४५) से केणट्ठेणं भंते ! एवं वुच्चति अब्भिंतरपुक्खरद्धे य २ ?, गोयमा !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्भिंतरपुक्खरद्धेणं माणुसुत्तरेणं पव्वतेणं सव्वतो समंता संपरिक्खित्ते, से एएणट्ठेणं गोयमा! अब्भिंतरपुक्खरद्धे य २, अदुत्तरं च णं जाव निच्चे। अब्भिंतरपुक्खरद्धे णं भंते! केवतिया चंदा पभासिंसु वा ३ साचेव पुच्छा जाव तारागणकोडकोडीओ?, गो०।

वृ. 'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त! एवमुच्यते—अभ्यन्तरपुष्करार्द्धमभ्यन्तरपुष्करार्द्धम्? इति, भगवानाह—गौतम! अभ्यन्तरपुष्करार्द्ध मानुषोत्तरोत्तरेण पर्वतेन सर्वतः समन्तात् संपरिक्षिप्तं, ततो मानुषोत्तरपर्वताभ्यन्तरे वर्त्तमानत्वादभ्यन्तरपुष्करार्द्धं, तथा चाह—'से एएणट्ठेण'मित्यादि गतार्थं ॥ 'अब्भितरपुक्खरद्धे णं भंते! कइ चंदा पभासिंसु?' इत्यादि चन्द्रादिपरिमाणसूत्रं पाठसिद्धं, नवरं नक्षत्रादिपरिमाणमष्टाविंशत्यादीनि नक्षत्राणि द्वासप्तत्या गुणयित्वा परिभावनीयं।

मू. (२४६) *बावत्तरिं च चंदा बावत्तरिमेव दिनकरा दित्ता।*
पुक्खरवरदीवड्ढे चरंति एते पभासेंता॥

मू. (२४७) *तिन्नि सया छत्तीसा छच्च सहस्सा महग्गहाणं तु।*
नक्खत्ताणं तु भवे सोलाइ दुवे सहस्साइं॥

मू. (२४८) *अडयाल सयसहस्सा बावीसं खलु भवे सहस्साइं।*
दोन्नि सया पुक्खरद्धे तारागणकोडिकोडीणं॥

मू. (२४९) *सोभेंसु वा ३॥*

वृ. उक्तं चैवंरूपं परिमाणमन्यत्रापि—

॥१॥ "बावत्तरि च चंदा बावत्तरिमेव दिनयरा दित्ता।
पुक्खरवरदीवड्ढे चरंति एए पगासिंता॥

॥२॥ तिन्नि सया छत्तीसा छच्च सहस्सा महग्गहाणं तु।
नक्खत्ताणं तु भवे सोलाणि दुवे सहस्साणि॥

॥३॥ अडयाल सयसहस्सा बावीसं चेव तह सहस्साइं।
दो य सय पुक्खरद्धे तारागणकोडिकोडीणं॥

इह सर्वत्र तारापरिमामचिन्तायां कोटीकोटयः कोट्य एव द्रष्टव्या—, तथा पूर्वसूरिव्याख्यानाद्, अपरे उच्छ्रयाङ्गुलप्रमाणमनुसृत्य कोटीकोटीरेव समर्थयन्ति, उक्तञ्च—

॥१॥ "कोडाकोडी सन्नंतरं तु मन्नंति केइ थोवतया।
अन्ने उस्सेहंगुलमाणं काऊण ताराणं॥

मू. (२५०) *समयखेत्ते णं भंते! केवतियं आयामविक्खंभेणं केवतियं परिक्खेवेणं पन्नत्ते?, गोयमा! पणयालीसं जोयणसयसहस्साइं आयामविक्खंभेणं एगा जोयणकोडी जावब्भितरपुक्खरद्धपरिरओ से भाणियव्वो जाव अउणपन्ने॥ से केणट्ठेणं भंते! एवं वुच्चति—माणुसखेत्ते २?, गोयमा! माणुसखेत्ते णं तिविधा मणुस्सा परिवसंति, तंजहा—कम्मभूमगा अकम्मभूमगा अंतरदीवगा, से तेणट्ठेणं गोयमा! एवं वुच्चति—माणुसखेत्ते माणुसखेत्ते॥ माणुसखेत्ते णं भंते! कति चंदा पभासेंसु वा ३?, कइ सूरा तवइंसु वा ३?, गोयमा!—*

वृ. 'माणुसखेत्ते ण'मित्यादि, मनुष्यक्षेत्रं भदन्त! कियदायामविष्कम्भेन कियत्परिक्षेपेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञप्तं ?, भगवानाह–गौतम ! पञ्चचत्वारिंशद् योजनशहसहस्राण्यायामविष्कम्भेन, एका योजनकोटी द्वाचत्वारिंशत् शतसहस्राणि त्रिंशत्सहस्राणि द्वे योजनशते एकोनपञ्चाशे किञ्चिद्विशेषाधिके परिक्षेपेण प्रज्ञप्तं ॥ सम्प्रति नामनिमित्तमभिधित्सुराह–

'से केणट्ठेण' मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते–मनुष्यक्षेत्रं मनुष्यक्षेत्रं ? इति, भगवानाह–गौतम ! मनुष्यक्षेत्रे त्रिविधा मनुष्याः परिवसन्ति तद्यथा–कर्म्मभूमका अकर्म्मभूमका अन्तरद्वीपकाश्च, अन्यच्च मनुष्याणां जन्म मरणं चात्रैव क्षेत्रे न तद्बहिः, तथाहि–मनुष्या मनुष्यक्षेत्रस्य बहिर्जन्मतो न भूता न भवन्ति न भविष्यन्ति च, तथा यदि नाम केनचिद्देवेन दानवेन विद्याधरेण वा पूर्वानुबद्धवैरनिर्यातनार्थमेवंरूपा बुद्धि क्रियते यथाऽयं मनुष्योऽस्मात् स्थानाद् उत्पाट्य मनुष्यक्षेत्रस्य बहिः प्रक्षिप्यतां येनोर्द्धशोषं शुष्यति म्रियते वेति तथाऽपि लोकानुभावादेव सा काचनाऽपि बुद्धिर्भूयः परावर्त्तते यथा संहरणमेव न भवति संहृत्य वा भूयः समानयति तेन संहरणतोऽपि मनुष्यक्षेत्राद्बहिर्मनुष्या मरणमधिकृत्य न भूता न भवन्तन न भविष्यन्ति च, येऽपि जङ्घाचारिणो विद्याचारिणो वा नन्दीश्वरादीनपि यावद्गच्छन्ति तेऽपि तत्र गता न मरणमश्नुवते किन्तु मनुष्यक्षेत्रसमागता एव, तेन मानुषोत्रपर्वतसीमाकं मनुष्याणां सम्बन्धि क्षेत्रं मनुष्यक्षेत्रमिति, तथा चाह–'से एएणट्ठेण' मित्यादि गतार्थम् । सम्प्रति मनुष्यक्षेत्रगतसमस्तचन्द्रादिसङ्ख्यापरिमाणमाह–'ममुस्सखेत्ते णं भंते ! कइ चंदा पभासिंसु' इत्यादि पाठसिद्धं ।

मू. (२५१) *बत्तीसं चंदसयं बत्तीसं चेव सूरियाण सयं ।*
सयलं मणुस्सलोयं चरेंति एते पभासेंता ॥

मू. (२५२) *एक्कारस य सहस्सा छप्पि य सोला महग्गहाणं तु ।*
छच्च सया छन्नउया नक्खत्ता तिन्नि य सहस्सा ॥

मू. (२५३) *अडसीइ सयसहस्सा चत्तालीस सहस्स मणुयलोगंमि ।*
सत्त य सता अणूणा तारागणकोडकोडीणं ।

मू. (२५४) *सोभं सोभेंसु वा ३ ॥*

वृ. उक्तं चैवंरूपं परिमाणमन्यत्रापि–

॥ १ ॥ "बततीसं चंदसयं बत्तीसं चेव सूरियाण सयं ।
सयलं मणुस्सलोयं चरंति एए पगासिंता ॥

॥ २ ॥ एकारस य सहससा छप्पि य सोला महागहाणं तु ।
छच्च सया छन्नउया नक्खत्ता तिन्नि य सहस्सा ॥

॥ ३ ॥ अट्ठासीयं लक्खा चत्तालीसं च तह सहस्साइं ।
सत्त सया य अणूणा तारागणकोडकोडीणं ॥

तत्र द्वात्रिंशं चन्द्रशतमेवं–द्वौ चन्द्रौ जम्बूद्वीपे चत्वारो लवणोदे द्वादश धातकीषण्डे द्वाचत्वारिंशत्कालोदे द्वासप्ततिरभ्यन्तरपुष्करार्द्धे सर्वसङ्ख्यया द्वात्रिंशं शतं, एवं सूर्याणामपि द्वात्रिंशं शतं परिभावनीयं, नक्षत्रादिपरिमाणमष्टविंशत्यादिनक्षत्रादीनि द्वात्रिंशेन शतन गुणयित्वा परिभावनीयं ।

मू. (२५५) *एसो तारापिंडो सव्वसमासेण मणुयलोगंमि ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहिया पुण ताराओ जिनेहिं भणिया असंखेज्ञा ॥

वृ. सम्प्रति सकलमनुष्यलोकगतातारागणस्योपसंहारमाह–'एषः' अनन्तरोक्तसङ्ख्याकस्तारापिण्डः सर्वसङ्ख्यया मनुष्यलोके आख्यात इति गम्यते, बहि पुनर्मनुष्यलोकाद् यास्तारास्ताः 'जिनैः' सर्वज्ञैस्तीर्थकृद्भिर्भणिता असङ्ख्याता द्वीपसमुद्राणामसङ्खयातत्वात्, प्रतिद्वीपं प्रतिसमुद्रं च यथायोगं सङ्ख्यातानामसङ्ख्यातानां च ताराणां सद्भावात् ।

मू. (२५६) *एवइयं तारग्गं जं भणियं माणुसंभि लोगंमि ।*
चारं कलंबुयापुप्फसंठियं जोइसं चरइ ॥

वृ. 'एतावत्' एतावत्सङ्ख्याकं 'ताराग्रं' तारापरिमाणं यत् अनन्तरं भणितं मानुषे लोके तत् 'ज्योतिषं' ज्योतिषदेवविमानरूपं 'कदम्बपुष्पसंस्थितं' कदम्बपुष्पवद् अधःसङ्कुचितमुपरि विस्तीर्णं उत्तानीकृतार्द्धकपित्थसंस्थानसंस्थितमिति भावः 'चारं चरति' चारं प्रतिपद्यते, तथा जगत्स्वाभाव्यात्, ताराग्रहणं चोपलक्षणं, ततः सूर्यादयोऽपि यथोक्तसङ्ख्याका मनुष्यलोके तथाजगत्स्वाभाव्याच्चारं प्रतिपद्यन्त इति द्रष्टव्यं ।

मू. (२५७) *रविससिगहनक्खत्ता एवइया आहिया मणुयलोए ।*
जेसिं नामागोयं न पागया पन्नवेहिंति ॥

वृ. सम्प्रत्येतद्गतमेवोपसंहारमह–रविशशिग्रहनक्षत्राण, उपलक्षणमेतत् तारकाणि च, 'एतावनति' एतावत्सङ्ख्याकानि सपूर्वार्द्धे मनुष्यलोके, येषां किम् ? इत्याह–येषां सूर्यादीनां यथोक्तसङ्ख्याकानां सकलमनुष्यलोकभाविनां प्रत्येकं नामगोत्राणि, इहान्वर्थयुक्तं नाम सिद्धान्तसपरिभाषया नाम गोत्रमित्युच्यते, ततोऽयमर्थ–नामगोत्राणि–अन्वर्थयुक्तानि नामानि, यदिवा नामानि च गोत्राणि च नामगोत्राणि 'प्राकृताः' अनतिशायिनः पुरुषाः कदाचनापि न प्रज्ञापतिष्यन्ति, केवलं यदा त्वाह सर्वज्ञ एवं, तत इदं सूर्यादिसंङ्ख्यानं प्राकृतपुरुषाप्रमेयं सर्वज्ञोपदिष्टमिति सम्यक् श्रद्धेयं ।

मू. (२५८) *छावट्ठी पिडगाइं चंदाइच्चा मणुयलोगंमि ।*
दो चंदा दो सूरा य होंति एक्केक्कए पिडए ॥

वृ. इह द्वौ चन्द्रौ द्वौ सूर्याविकं पिटकमुच्यते, इत्थम्भूतानि च चन्द्रादित्यानां पिटकानि सर्वसङ्ख्यया मनुष्यलोके षट्षष्टिसङ्ख्यानि । अथ किंप्रमाणं पिटकमिति पिटकप्रमाणमाह–एकैकस्मिन् पिटके द्वौ चन्द्रौ द्वौ सूर्यौ भवत इति, किमुक्तं भवति ? –द्वौ चन्द्रौ द्वौ सूर्यावित्येतावत्प्रमाणमेकैकचन्द्रादित्यानां पिटकमिति, एवंप्रमाणं च पिटकं जम्बूद्वीपे एकं, द्वयोरेव चन्द्रमसोर्द्वयोरेव सूर्ययोस्तत्र भावतः, द्वे पिटके लवणसमुद्रे चतुर्णां चन्द्रमसां चतुर्णां सूर्याणां च तत्र भावात्, एवं षट् पिटकानि धातकीषण्डे एकविंशति कालोदे षटत्रिंशदभ्यन्तरपुष्करार्द्धे इति भवन्ति सर्वमीलने चन्द्रादित्यानां षटषष्टि पिटकानि ॥

मू. (२५९) *छावट्ठीपिडगाइं नक्खत्ताणं तु मणुयलोगंमि ।*
छप्पन्नं नक्खत्ता य होंति एक्केक्कए पिडए ॥

वृ. सर्वस्मन्नपि मनुष्यलोके सर्वसङ्ख्यया नक्षत्राणां पिटकानि भवन्ति षट्षष्टि, नक्षत्रपिटकपरिमाणं च शशिद्वयसम्बन्धिनक्षत्रसङ्ख्यापरिमाणं, तथा चाह–एकैकस्मिन् पिटके

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

नक्षत्राणि भवन्ति षट्पञ्चाशत्, किमुक्तं भवति ?—षटपञ्चाशन्नक्षत्रसङ्ख्यकमेकैकं नक्षत्रपिटकमिति, अत्रापि षड्षष्टिसङ्ख्याभावनैवम्—एकं नक्षत्रपिटकं जम्बूद्वीपे द्वे लवणसमुद्रे षड् धातकीषण्डे एकविंशति कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्द्ध इति ।

मू. (२६०) *छावट्ठी पिडगाइं महागहाणं तु मणुयलोगंमि ।*
छावत्तरं गहसय च होइ एक्केक्कए पिडए ॥

वृ. महाग्रहाणामप्यङ्गारकप्रभृतीनां सर्वस्मिन् मनुष्यलोके सर्वसङ्ख्यया पिटकानि भवन्ति षट्षष्टि, ग्रहपिटकपरिमाणं च शशिद्वयसम्बन्धिग्रहसङ्ख्यापरिमाणं, तथा चाह—एकैकस्मिन् पिटके भवति षट्सप्ततं—षट्सप्तत्यधिकं ग्रहशतं, षट्सप्तत्यधिकग्रहशतपरिमाणमेकैकं ग्रहपिटकपरिमाणमिति भावः, षट्षष्टिसङ्ख्याभावना प्राग्वत् ।

मू. (२६१) *चत्तारि य पंतीओ चंदाइच्चाण मणुयलोगंमि ।*
छावट्ठिय छावट्ठिय होइ य एक्केक्कया पंती ॥

वृ. इह मनुष्यलोके चन्द्रादित्यानां चतस्रः पङ्क्त्यो भवन्ति, तद्यथा—द्वे पङ्क्ती चन्द्राणां द्वे सूर्याणां, एकैका च पङ्क्तिर्भवति षट्षष्टि षट्षष्टिः—षट्षष्टिषटषष्टिसूर्यादिसङ्ख्या, तद्भावना चैवम्—एकः किल सूर्यो जम्बूद्वीपे मेरोर्दक्षिणभागे चारं चरन् वर्त्तते एक उत्तरभागे, एकश्चन्द्रमा मेरोः पूर्वभागे एकोऽपरभागे, तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं चरन् वर्त्तते ततः समश्रेणिव्यवस्थितौ द्वौ दक्षिणभागे एव सूर्यौ लवणसमुद्रे षड् घातकीषण्डे एकविंशति कालोदे षटत्रिंशदभ्यन्तरपुष्करार्द्धे, इत्यस्यामपि सूर्यपङ्क्तौ सर्वसङ्ख्यया षट्षष्ठि सूर्याः ।

तथा योऽपि च मेरोरुत्तरभागे सूर्यश्चारं चरन् वर्त्तते तस्यापि समश्रेण्या व्यवस्थितौ द्वौ उत्तरभागे सूर्यौ लवणसमुद्रे षड् धातकीषण्डे एकविंशति कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यामपि सूर्यपङ्क्तौ सर्वसङ्ख्यया षट्षष्टि सूर्या, तथा यो मेरोः किल पूर्वभागे चारं चरन् वर्त्तते चन्द्रमास्तत्समश्रेणिव्यवस्थितौ द्वौ पूर्वभागे एक चन्द्रमसौ लवणसमुद्रे षड् धातकीषण्डे एकविंशतिः कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यां चन्द्रपङ्क्तौ सर्वसङ्ख्यया षट्षष्टिश्चन्द्रमसः, एवं यो मेरोरपरभागे चन्द्रमास्तन्मूलायामपि पङ्क्तौ षड्षष्टिश्चन्द्रमसो वेदितव्याः ॥

मू. (२६२) *छप्पन्नं पंतीओ नक्खत्ताणं तु मणुयलोगंमि ।*
छावट्ठी छावट्ठी हवइ य एक्केक्कया पंती ॥

वृ. नक्षत्राणां मनुष्यलोके सर्वसङ्ख्यया पङ्क्त्यो यो भवन्ति षट्पंचाशत्, एकैका च पङ्क्तिर्भवति षट्षष्टि षट्षष्टिस्तद्भवपरिमाणा इत्यर्थः, तथाहि—किलास्मिन् जम्बूद्वीपे दक्षिणतोऽर्द्धभागे एकस्य शशिनः परिवारभूतान्यभिजिदादीन्यष्टविंशतिसङ्ख्यानि नक्षत्रा क्रमेण व्यवस्थितानि चारं चरन्ति, उत्तरतोऽर्द्धभागे द्वितीयस्य शशिनः परिवारभूतान्यष्टाविंशतिसङ्ख्याकान्यभिजिदादीन्येव नक्षत्राणि क्रमेण २ व्यवस्थितानि, तत्र दक्षिणतोऽर्द्धभागे यत्राभिजिन्नक्षत्रं तत्समश्रेणिव्यवस्थिते द्वे अभिजिन्नक्षत्रे वणसमुद्रे षड् धातकीषण्डे एकविंशति कालोदे षटत्रिंशदभ्यन्तरपुष्करार्द्धे इति ।

सर्वसङ्ख्यया षटषष्टिरभिजिन्नक्षत्राणि पङ्क्त्या व्यवस्थितानि, एवं श्रवणादीन्यपि दक्षिणतोऽर्द्धभागे पङ्क्त्या व्यवस्थितानि षट्षष्टिसङ्ख्याकानि भावनीयानि, उत्तरतोऽप्यर्द्धभागे दभिजिन्न-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षत्रं तत्समश्रेणिव्यवस्थितेऽपि उत्तरभाग एव द्वे अभिजिन्नक्षत्रे लवणसमुद्रे षड्धातकीषण्डे एकविंशति कालोदे षट्त्रिंशत्पुष्करार्द्धे, एवं श्रवणादिपङ्क्त्योऽपि प्रत्येकं षट्षष्टिसङ्ख्याका २ वेदितव्या इति भवंति सर्वसङ्ख्यया षट्पञ्चाशत्सङ्ख्या नक्षत्राणां पङ्क्त्यः, एकैका च पङ्क्ति षट्षष्टिसङ्ख्येति।

मू. (२६३) *छावत्तरं गहाणं पंतिसयं होइ मणुयलोगंमि।*
छावट्ठी छावट्ठी य होंति एक्केक्कया पंती ॥

वृ. 'ग्रहाणां' अङ्गारकप्रभृतीनां सर्वसङ्ख्यया मनुष्यलोके षट्सप्तत्यधिकं पङ्क्तिशतं भवति, एकैका च पङ्क्तिर्भवति षट्षष्टिः; अत्रापीयं भावना—जम्बूद्वीपे दक्षिणतोऽर्द्धभागे एकस्य शशिनः परिवारभूता अङ्गारकप्रभृतयोऽष्टाशीतिर्ग्रहा उत्तरतोऽर्द्धभागे द्वितीयस्य शशिनः परिवारभूता अङ्गारकप्रभृतय एवान्येऽष्टाशीतिग्रहाः, तत्र दक्षिणतोऽर्द्धभागे योऽङ्गारकनामा ग्रहस्तत्समश्रेणिव्यवस्थितौ दक्षिणभाग एव द्वावङ्गारकौ लवणसमुद्रे षड् धातकीषण्डे एकविंशति कालोदे षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इति, एवं शेषा अपि सप्ताशीतिर्ग्रहाः पङ्क्त्या व्यवस्थिताः प्रत्येकं षट्षष्टि २ वेदितव्याः, एवमुत्तरतोऽप्यर्द्धभागेऽङ्गारकप्रभृतीनामष्टाशीतेर्ग्रहाणां पङ्क्त्यः प्रत्येकं षट्षष्टिसङ्ख्याका २ भावनीया इति भवति सर्वसङ्ख्यया ग्रहाणां षट्सप्ततं पङ्क्तिशतं, एकैका च पङ्क्ति षट्षष्टिसङ्ख्याकेति।

मू. (२६४) *ते मेरु परियडंता पयाहिणावत्तमंडला सव्वे।*
अणवट्ठियजोगेहिं चंदा सूरा गहगणा य ॥

वृ. 'ते' मनुष्यलोकवर्त्तिनः सर्वे चंद्राः सर्वे सूर्या सर्वे ग्रहगणा अनवस्थितैर्यथायोगमन्यैरन्यैर्नक्षत्रैः सह योगमुपलक्षिताः 'पयाहिणावत्तमंडला' इति प्रकर्षेण सर्वासु दिक्षु विदिक्षु च परिभ्रमतां चन्द्रादीनां दक्षिण एव मेरुर्भवति यस्मिन्नावर्त्ते—मण्डलपरिभ्रमणरूपे स प्रदक्षिणः २ आवर्त्तो येषां मण्डलानां तानि प्रदक्षिणावर्त्तानि तानि मण्डलानि मेरुं (प्रति) येषां ते प्रदक्षिणावर्तमण्डला मेरुमनुलक्षीकृत्य चरन्ति, एतेनैतदुक्तं भवति—सूर्यादयः समस्ता अपि मनुष्यलोकवर्त्तिनः प्रदक्षिणावर्त्तमण्डलगत्या परिभ्रमन्तीति, इह चन्द्रादित्यग्रहाणां मण्डलान्यनवस्थितानि, यथायोगमन्यस्मिन्नन्यस्मिन्मण्डले तेषां संचरिष्णुत्वात्।

मू. (२६५) *नक्खत्ततारगाणं अवट्ठिया मंडला मुणेयव्वा।*
तेऽविय पयाहिणावत्तमेव मेरुं अनुचरंति ॥

वृ. नक्षत्रतारकाणां तु मण्डलान्यनवस्थितान्येव, तथा चाह—नक्षत्राणां तारकाणां च मण्डलान्यवस्थितानि ज्ञातव्यानि, किमुक्तं भवति?—आकालं प्रतिनियतमेकैकं नक्षत्राणां तारकाणां च मण्डलमिति, न चैवं २ व्यवस्थितमण्डलत्वोक्तावेवमाशङ्कनीयं यथा तेषां गतिरेव न भवतीति, यत आह—'तेऽवि य' इत्यादि, तान्यपि नक्षत्राणि तारकाणि च, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, प्रदक्षिणावर्त्तमेव, इदं क्रियाविशेषणं, मेरुमनुलक्ष्यीकृत्य चरन्ति, एतच्च मेरुं लक्ष्यीकृत्य तेषां प्रदक्षिणावर्त्तचरणं प्रत्यक्षत एवोपलक्ष्यत इति संवादि।

मू. (२६६) *रयणियरदिनयराणं उड्ढे व अहे व संकमो नत्थि।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मंडलसंकमणं पुण अब्भिंतरबाहिरं तिरिए ॥

वृ. 'रजनिकरदिनकराणां' चन्द्रादित्यानामूर्द्धं वाऽधो वा सङ्क्रमो न भवति तथा जगत्स्वाभाव्यात्, तिर्यक् पुनर्मण्डलेषु सङ्क्रमणं भवति, किंविशिष्टमित्याह–'साभ्यन्तरबाह्यम्' अभ्यन्तरं च बाह्यं च अभ्यन्तरबाह्यं सह अभ्यन्तरबाह्यं यस्य येन वा तत् साभ्यन्तरबाह्यं, एतदुक्तं भवति ? –सर्वाभ्यन्तरान्मण्डलात्परतस्तावन्मण्डलेषु सङ्क्रमणं यावत्सर्वबाह्यमण्डलं, सर्वबाह्याच्च मण्डलादर्वाग् मण्डलेषु तावत्सङ्क्रमणं यावत्सर्वाभ्यन्तरमिति ।

मू. (२६७) *रयणियरदिनयराणं नक्खत्ताणं महग्गहाणं च ।*
चारविसेसेण भवे सुहदुक्खविही मणुस्साणं ॥

वृ. 'रजनिकरदिनकराणां' चन्द्रादित्यानां नक्षत्राणां महाग्रहाणां च 'चारविशेषेण' तेन तेन चारेण सुखदुःखविधयो मनुष्याणां संभवन्ति, तथाहि–द्विविधानि सन्ति सदा मनुष्याणां कर्माणि, तद्यथा–शुभवेद्यानि अशुभवेद्यानि च, कर्मणां च सामान्यतो विपाकहेतवः पञ्च, तद्यथा–द्रव्यं क्षेत्रं कालो भावो भवश्च, उक्तञ्च–

॥१॥ "उदयक्खयखओवसमोवसमा जं च कम्मुणो भणिया ।
दव्वं खेक्तं कालं भावं भवं च संपप्प ॥"

शुभवेद्यानां च कर्मणां प्रायः शुभद्रव्यक्षेत्रादिसामग्री विपाकहेतुः, अशुभवेद्यानामशुभद्रव्यक्षेत्रादि सामग्री, ततो यदा येषां जन्मनक्षत्राद्यनुकूलश्चन्द्रादीनां चारस्तदा तेषां प्रायो यानि शुभवेद्यानि कर्म्माणि तानि तथाविधां विपाकसामग्रीमधिगम्य विपाकं प्रपद्यन्ते, प्रपन्नविपाकानि शरीरनीरोगतासंपादनतो धनवृद्धिकरणेन च वैरोपशमनतः प्रियसंप्रयोगसंपादनतो वा यदिवा प्रारब्धाभीष्टप्रयोजननिष्पत्तिकरणतः सुखमुपजनयन्ति, अत एव महीयांसः परविवेकिनः स्वल्पमपि प्रयोजनं शुभतिथिनक्षत्रावारभंते न तु यथा कथञ्चन । अत एव जिनानामपि भगवतामाज्ञा प्रव्राजनादिकमधिकृत्यैवमर्त्तिष्ट–यथा शुभक्षेत्रे शुभदिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्त्तादौ प्रव्राजनव्रतारोपणादि कर्त्तव्यं नान्यथा, तथा चोक्तं पञ्चवस्तुके–

॥१॥ "एसा जिणाण आणा खेत्ताईया य कम्मुणो भणिया ।
उदयाइकारणं जं तम्हा सव्वत्थ जइयव्वं ॥"

अस्या अक्षरगमनिका–एषा जिनानामाज्ञा यथा शुभक्षेत्रे सुभां दिशमभिमुखीकृत्य शुभे तिथिनक्षत्रमुहूर्त्तादौ प्रव्राजनव्रतारोपणादि कर्त्तव्यं नान्यथा, अपिच–क्षेत्रादयोऽपि कर्म्मणामुदयादिकारणं भगवद्भिरुक्तास्ततोऽशुभद्रव्यक्षेत्रादिसामग्रीमवाप्य कदाचिदशुभवेद्यानि कर्म्माणि विपाकं गत्वोदयमासादयेयुः, तदुदये च गृहीतव्रतभङ्गादिदोषप्रसङ्गः, शुभक्षेत्रादिसामग्रीं तु प्राप्य जनानां शुभकर्म्मविपाकसम्भव इति संभवति निर्विघ्नं सामायिकपरिपालनादि, तस्मादवश्यं छद्मस्थेन सर्वत्र शुभक्षेत्रादौ यतितव्यं, ये तु भगवन्तोऽतिशयमन्तस्ते अतिशयबलादेव निर्विघ्नं सविघ्नं वा सम्यगवगच्छन्ति ततो न शुभतिथिमुहूर्त्तादिकमपेक्षन्त इति तन्मार्गानुसरणं छद्मस्थानां न न्याय्यं, तेन ये च परममुनिपर्युपासितप्रवचनविडम्बका अपरिमलितजिनशासनोपनिषद्भूतशास्त्रगुरुपरम्परायातनिरवद्यविशदकालोचितसामाचारीप्रतिपन्थिनः स्वमतिकल्पितसामाचारीका अभिदधति–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा न प्रव्राजनादिषु शुभतिथिनक्षत्रादिनिरीक्षणे यतितव्यं, न खलु भगवान् जगत्स्वामी प्रव्राजनायोपस्थितेषु शुभतिथ्यादिनिरीक्षणं कृतवानिति तेऽपास्ता द्रष्टव्या इति।

मू. (२६८) *तेसिं पविसंताणं तावक्खेत्तं तु वड्डए नियमा।*
तेणेव कमेण पुणो परिहायइ निक्खमंताणं ॥

वृ. तेषां–सूर्याचन्द्रमसां सर्वबाह्यान्मण्डलादभ्यन्तरं प्रविशतां तापक्षेत्रं प्रतिदिवसं क्रमेण नियमादायामतो वर्द्धते, येनैव च क्रमेण परिवर्द्धते तेनैव क्रमेण सर्वाभ्यन्तरान्मण्डलाद्बहिर्निष्क्रमतां परिहीयते, तथाहि–सर्वबाह्यमण्डले चारं चरतां सूर्याणां चन्द्रमसां च प्रत्येकं जम्बूद्वीपचक्रवालस्य दशधा प्रविभक्तस्य द्वौ द्वौ भागौ तापक्षेत्रं, ततः सूर्यस्याभ्यन्तरं प्रविशतः प्रतिमण्डलं षष्ट्यधिकषटत्रिंशच्छ- तप्रविभक्तस्य द्वौ द्वौ भागौ तापक्षेत्रस्य वर्द्धेते।

चन्द्रमसस्तु मण्डलेषु प्रत्येकं पौर्णमासीसम्भवे क्रमेण प्रतिमण्डलं षडविंशतिर्भागा सप्तविंशतितमस्य च भागस्यैकः सप्तभागः, एवं च प्रतिमण्डलमभिवृद्धौ यदा सर्वाभ्यन्तरमण्डले चारं चरतस्तदा प्रत्येकं जम्बूद्वीपचक्रवालस्य त्रयः परिपूर्णा दशभागास्तापक्षेत्रं, ततः पुनरपि सर्वाभ्यन्तरमण्डलाद्बहिर्निष्क्रमेण सूर्यस्य प्रतिमण्डलं षष्ट्यधिकषट्त्रिंशच्छतप्रविभक्तस्य जम्बूद्वीपचक्रवालस्य द्वौ द्वौ भागौ परिहीयेते, चन्द्रमसस्तु मण्डलेषु प्रत्येकं पौर्णसामीसम्भवे क्रमेण प्रतिमण्डलं षड्विंशतिर्भागाः सप्तविंशतितमस्य च भागस्य चैकः सप्तभाग इति।

मू. (२६९) *तेसिं कलंबुयापुप्फसंठिया होइ तावखेत्तपहा।*
अंतो य संकुया बाहि वित्थडा चंदसूरगमा ॥

वृ. 'तेषां' चन्द्रसूर्याणां तापक्षेत्रपन्थाः कलम्बुयापुष्पं–नालिकापुष्पं तद्वत्संस्थिताः कलम्बुयापुष्पसंस्थिताः, एतदेव व्याचष्टे–अन्तः–मेरुदिशि सङ्कुचिता बहिः–लवणदिशि विस्तृताः, एतच्चन्द्रप्रज्ञप्तौ सूर्यप्रज्ञप्तौ चतुर्थे प्राभृते सविस्तरं भावितमिति ततोऽवधार्यम्।

मू. (२७०) *केणं वड्डति चंदो परिहाणी केण होइ चंदस्स।*
कालो वा जोण्हो वा केणऽनुभावेण चंदस्स ॥

वृ. सम्प्रति चन्द्रमसमधिकृत्य गौतमः प्रश्नयति–केन कारणेन शुक्लपक्षे वर्द्धते ? केन वा कारणेन चन्द्रस्य कृष्णपक्षे परिहानिर्भवति ? केन वा 'अनुभावेन' प्रभावेण चन्द्रस्यैकः पक्षः कृष्णो भवति एकः 'ज्योत्स्नः' शुक्लः ? इति, एकमुक्ते भगवानाह–इह द्विविधो राहुस्तद्यथा– पर्वराहुर्नित्यराहुश्च, तत्र पर्वराहुः स उच्यते यः कदाचिदकस्मात्समागत्य निजविमाने चन्द्रविमानं सूर्यविमानं वाऽन्तरितं करोति, अन्तरिते च कृते लोके ग्रहणमिति प्रसिद्धि, स इह न गृह्यते।

मू. (२७१) *किण्हं राहुविमाणं निच्चं चंदेण होइ अविरहियं।*
चउरंगुलमप्पत्तं हिट्ठा चंदस्स तं चरइ ॥

वृ. यस्तु नित्यराहुस्तस्य विमानं कृष्णं तथाजगत्स्वाभाव्याच्चन्द्रेण सह 'नित्यं' सर्वकालमविरहितं तथा 'चउरंगुलेन' चतुरङ्गुलैरप्राप्तं सत् 'चन्द्रस्य' चन्द्रविमानस्याधस्ताच्चरति, तच्चैवं चरत् शुक्लपक्षे शनैः शनैः प्रकटीकरोति चन्द्रमसं कृष्णपक्षे च शनैः शनैरावृणोति।

मू. (२७२) *बावट्ठिं बावट्ठिं दिवसे दिवसे उ सुक्कपक्खस्स।*
जं परिवड्डइ चंदो खवेइ त चेव कालेणं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. तथा चाह–इह द्वाषष्टिभागीकृतस्य चन्द्रविमानस्य द्वौ भागावुपरितनौ सदाऽनावार्यस्वभावत्वाद् अपाकृत्य शेषस्य पञ्चदशभिर्भागे हते ये चत्वारो भागा लभ्यन्ते ते द्वाषष्टिशब्देनोच्यन्ते, अवयवे समुदायोपचारात्।

एतच्च व्याख्यानमेतस्यैव चूर्णिमुपजीव्य कृतं न स्वमनीषिकया।

मू. (२७३) *पन्नरसइभागेण य चंदं पन्नरसमेव तं वरइ।*
पन्नरसइभागेण य पुणोवि तं चेव तिक्कमइ॥

वृ. तथा च तद्ग्रन्थः–"चन्द्रविमानं द्वाषष्टिभागीक्रियते, ततः पञ्चदशभिर्भागोऽपह्नियते, तत्र चत्वारो भागा द्वाषष्टिभागानां पञ्चदशभागेन लभ्यन्ते शेषौ द्वौ, एतावद् दिने दिने शुक्लपक्षस्य राहुणा मुच्यत" इति। एवं च सति यत्समवायाङ्गसूत्रम्–"सुक्कपक्खस्स दिवसे दिवसे बावट्ठिं बावट्ठिं भागे परिवड्ढइ" इति, तदप्येवमेव व्याख्येयं, संपदायवशाद्धि सूत्रं व्याख्येयं, न स्वमनीषि-कया, अन्यथा महदाशातनाप्रसक्तेः, संप्रदायश्च यथोक्तस्वरूप इति, तत्र शुक्लपक्षस्य दिवसे यद्–यस्मात्कारणा-च्चन्द्रो द्वाषष्टिद्वाषष्टिभागान्–द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् यावत्परि-वर्द्धे, कालेन–कृष्णपक्षेण पुनर्दिवसे २ तानेव द्वाषष्टिभागसत्कान् चतुरश्चतुरो भागान् 'प्रक्षपयति'

एतदेव व्याचष्टे–कृष्णपक्षे प्रतिदिवसं राहुविमानं स्वकीयेन पञ्चदशेन भागेन तं 'चन्द्रं' चन्द्रविमानं पञ्चदशमेव बागं 'वणोति' आच्छादयति, शुक्लपक्षे पुनस्तमेव प्रतिदिवसं पञ्चदशभागमात्मीयेन पञ्चदशेन भागेन 'व्यतिक्रामति' मुञ्चति, किमुक्तं भवति?–कृष्णपक्षे प्रतिपद आरभ्यात्मीयेन पञ्चदशेन पञ्चदशेन भागेन प्रतिदिवसमेकैकं पञ्चदशभागमुपरितनभागा-दारभ्यावृणोति, शुक्लपक्षे तु प्रतिपद आरभ्यात्मीयेन पञ्चदशेन पञ्चदशेन भागेन प्रतिदिवसमेकैकं पञ्चदशभागमुपरितनभागादारभ्यावृणोति, शुक्लपक्षे तु प्रतिपद आरभ्य तेनैव क्रमेण प्रतिदिवसमेकैकं पञ्चदशभागं प्रकटीकरोति, तेन जगति चन्द्रमण्डलस्य वृद्धिहानी प्रतिभासेते, स्वरूपतः पुनश्चन्द्रमण्डलमवस्थितमेव।

मू. (२७४) *एवं वड्ढइ चंदो परिहाणी एव होइ चंदस्स।*
कालो वा जोण्हा वा तेननुभावेण चंदस्स॥

वृ. तथा चाह–एवं राहुविमाने प्रतिदिवसं क्रमेणानावरणकरणतो 'वर्द्धते' वर्द्धमानः प्रतिभासते चन्द्रः, एवं राहुविमाने प्रतिदिवसं क्रमेणावरणकरणतः परिहानिप्रतिभासो भवति चन्द्रस्य विषये, एतेनैव 'अनुभावेन' कारणेनैकः पक्षः 'कालः' कृष्णो भवित यत्र चन्द्रस्य परिहानि प्रतिभासते, एकस्तु 'ज्योत्स्नः' शुक्लो यत्र चन्द्रविषयो वृद्धिप्रतिमासः।

मू. (२७५) *अंतो मणुस्सखेत्ते हवंति चारोवगा य उववन्ना।*
पञ्चविहा जोइसिया चंदा सूरा गहगणा य॥

वृ. 'अन्तः' मध्ये 'मनुष्यक्षेत्रे' मनुष्यक्षेत्रस्य पञ्चविधा ज्योतिष्कास्तद्यथा–चन्द्राः सूर्या ग्रहगणाः चशब्दान्नक्षत्राणि तारकाश्च भवन्ति 'चारोपगाः' चारयुक्ताः।

मू. (२७६) *तेण परं जे सेसा चंदाइच्चगहतारनक्खत्ता।*
नत्थि गई नवि चारो अवट्ठिया ते मुणेयव्वा॥

वृ. 'तेने'ति प्राकृतत्वात्पञ्चम्यर्थे तृतीया ततो मनुष्यक्षेत्रात्परं यानि शेषाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'चन्द्रादित्यग्रहतारानक्षत्राणि' चन्द्रदातियग्रहतारानक्षत्रविमानानि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, तेषां नास्ति गति--न स्वस्मात्स्थानाच्चलनं नापि 'चारः' मण्डलगत्या परिभ्रमणं किन्त्ववस्थितान्येव तानि ज्ञातव्यानि ।

मू. (२७७) *दो चंदा इह दीवे चत्तारि य सागरे लवणतोए ।*
धायइसंडे दीवे बारस चंदा य सूरा य ॥

वृ. सम्प्रति प्रतिद्वीपं प्रतिसमुद्रं चन्द्रादिसङ्कलनामाह--

॥१॥ "एगे जंबुद्दीवे दुगुणा लवणे चउग्गुणा होंति ।
लावणगा य तिगुणिया ससिसूरा धायइसंडे ॥"

द्वौ चन्द्रौ उपलक्षणमेतत् द्वौ सूर्यौ च 'इह' अस्मिन् जम्बूद्वीपे, चत्वारः 'सागरे' समुद्रे 'लवणतोये' लवणजले, धातकीषण्डे द्वीपे द्वादश चन्द्राश्च द्वादश सूर्याश्च ।

मू. (२७८) *दो दो जंबूद्दीवे ससिसूरा दुगुणिया भवे लवणे ।*
लावणिया य तिगुणिया ससिसूरा धायईसंडे ॥

वृ. एतदेव भङ्ग्यन्तरेण प्रतिपादयति--शशिनौ सूर्यौ जम्बूद्वीपे द्वौ द्वौ, तावेव द्विगुणितौ 'लवणे' लवणसमुद्रे भवतः, चत्वारो लणसमुद्रे शशिनश्चत्वारश्च सूर्या भवन्तीत्यर्थ, द्वयोर्द्वाभ्यां गुणने चतुर्भावात् । पाठान्तरम्--"एवं जंबूद्दीवे दुगुणा लवणे चउग्गुणा होंति" त्ति, 'एवम्' उक्तेन प्रकारेण एकैकौ चन्द्रसूर्यौ जम्बूद्वीपे द्विगुणौ भवतः, किमुक्तं भवति ?--द्वौ चन्द्रमसौ द्वौ सूर्यौ जम्बूद्वीप इति, 'लवणे' लवमसमुद्रे तावेवैकैकौ सूर्याचन्द्रमसौ चतुर्गुणौ भवतः, चत्वारश्चन्द्राश्चत्वारः सूर्या लवणसमुद्रे भवन्तीति भावः, 'लावणिकाः' लवणसमुद्रभवाः शशिसर्यास्त्रिगुणिता धातकीषण्डे भवन्ति, द्वादश चन्द्रा द्वादश सूर्या धातकीषण्डे द्वीपे भवन्तीत्यर्थः ।

मू. (२७९) *धायइसंडप्पभिई उद्दिट्ठतिगुणिया भवे चंदा ।*
आइल्लचंदसहिया अनंतरानंतरे खेत्ते ॥

वृ. सम्प्रति शेषद्वीपसमुद्रगतचन्द्रादित्यसङ्ख्यापरिज्ञानायकरणमाह--धातकीषण्डः प्रभृति--आदिर्येषां ते धातकीषण्डप्रभृतयस्तेषु धतकीषण्डप्रभृतिषु द्वीपेषु समुद्रेषु च ये उद्दिष्टाश्चन्द्रा द्वादशादयः उपलक्षणमेतत् सूर्या वा ते 'त्रिगुणिताः' त्रिगुणीकृताः सन्तः 'आइल्लचंदसहिय' त्ति उद्दिष्टचन्द्रयुक्ताद्वीपात्समुद्राद्वा प्राग् जम्बूद्वीपमादिं कृत्वा ये प्राक्तनाश्चन्द्रास्तैरादिमचन्द्रैः, उपलक्षणमेतत् आदिमसूर्यैश्च सहिता यावन्तो भवन्ति एतावत्प्रमाणा अनन्तरेऽनन्तरे कालोदादौ भवन्ति । तत्र धातकीषण्डे द्वीपे उद्दिष्टाश्चन्द्रा द्वादश ते त्रिगुणाः क्रियन्ते जाताः षट्त्रिंशत्, आदिम- चन्द्राः षट्, तद्यथा--द्वौ चन्द्रौ जम्बूद्वीपे चत्वारो लवणसमुद्रे, एतैरादिमचन्द्रैः सहिता द्वाचत्वारिंशद्भवन्ति, एतावन्तः कालोदसमुद्रे चन्द्राः, एष एव विधि सूर्याणामपि, तेन सूर्या अपि तत्रैतावन्तो वेदितव्याः, तथा कालोदे समुद्र द्वाचत्वारिंशच्चन्द्रमस उद्दिष्टास्ते त्रिगुणाः क्रियन्ते जाताः षड्विंशं शतं, आदिमचन्द्रा अष्टादश, तद्यथा--द्वौ जम्बूद्वीपे चत्वारो लवणसमुद्रे द्वादश धातकीषण्डे, एतैरादिमचन्द्रैः सहितं षड्विंशं शतं चतुश्चत्वारिंशं शतं जातं, एतावन्तः पुष्करव० चन्द्रा एतावन्त एवच सूर्या, एवं सर्वेष्वपि द्वीपसमुद्रेष्वेतत्करणवशाच्चन्द्रसङ्ख्या प्रतिपत्तव्या, सूर्यसङ्ख्याऽपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२८०) *रिक्खग्गहतारग्गं दीवसमुद्दे जहिच्छसे नाउं।*
तस्स ससीहिं गुणियं रिक्खग्गहतारगाणं तु॥

वृ. सम्प्रति प्रतिद्वीपं प्रतिसमुद्रं च ग्रहनक्षत्रतारापरिमाणज्ञानोपायमाह—अत्राग्रशब्दः परिमाणवाची, यत्र द्वीपे समुद्रे वा नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणं वा ज्ञातुमिच्छसि तस्य द्वीपस्य समुद्रस्य वा सम्बन्धिभि शशिभिरेकस्य शशिनः परिवारभूतं नक्षत्रपिरमाणं ग्रहपरिमाणं तारापरिमाणं च गुणितं सद् यावद् भवति तावत्प्रमाणं तत्र द्वीपे समुद्रे वा नक्षत्रपरिमाणं ग्रहपरिमाणं तारापरिमाणमिति, यथा लवणसमुद्रे किल नक्षत्रादिपरिमाणं ज्ञातुमिष्टं, लवणसमुद्रे च शशिनश्चत्वारस्तत एकस्य शशिनः परिवारभूतानि यान्यष्टाविंशतिर्नक्षत्राणि तानि चतुर्भिगुण्यन्ते जातं द्वादशोत्तरं शतं।

एतावन्ति लवणसमुद्रे नक्षत्राणि, तथाऽष्टातिर्ग्रहा एकस्य शशिनः परिवारभूतास्ते चतुर्भिर्गुण्यन्ते जातानि त्रीणि शतानि द्विपञ्चाशदधिकानि एतावन्तो लवणसमुद्रे ग्रहाः, तथैकस्य शशिनः पिरवारभूतानि तारागणकोटीकोटीनां षटषष्टि सहस्राणी नव शतानि पञ्चसप्तत्यधिकानि, तानि चतुर्भिर्गुण्यन्ते, जातानि कोटीकोटीनां द्वे लक्षे सप्तषष्टि सहस्राणि नव शतानि एतावत्यो लवणसमुद्रे तारागणकोटीकोटयः। एवंरूपा च नक्षत्रादीनां लवणसमुद्रे सङ्ख्या प्रागेवोक्ता, एवं सर्वेष्वपि द्वीपसमुद्रेषु नक्षत्रादिसङ्ख्यापरिमाणं भावनीयम्।

मू. (२८१) *चंदातो सूरस्स य सूरा चंदस्स अंतरं होइ।*
पन्नास सहस्साइं तु जोयणाइं अणूणाइं॥

वृ. सम्प्रति मनुष्यक्षेत्राद्बहिर्वर्त्तिनां चन्द्रसूर्याणां परस्परमन्तरपरिमाणप्रतिपादनार्थमाह— 'मनुष्यनगस्य' मानुषोत्तरपर्वस्य बहिश्चन्द्रात्सूर्यस्य सूर्याच्चन्द्रस्यान्तरं भवति 'अन्यूनानि' परिपूर्णानि योजनानां पञ्चाशत् सहस्राणि, एतावता चन्द्रस्य सूर्यस्य च परस्परमन्तरमुक्तम्।

मू. (२८२) *सूरस्स य सूरस्स य ससिणो ससिणो य अंतरं होइ।*
बहियाओ मणुस्सनगस्स जोयणाणं सयसहस्सं।

वृ. इदानीं चन्द्रस्य चन्द्रस्य सूर्सय् सूर्यस्य च परस्परमन्तरमाह—'सूरस्स य सूरस्स य' इत्यादि, सूर्यस्य सूर्यस्य परस्पर चन्द्रस्य चन्द्रस्य परस्परमन्तरं भवति योजनानां शतसहस्रं—लक्षं

तथाहि—चन्द्रान्तरिताः सूर्या सूर्यान्तरिताश्चन्द्रा बहिर्व्यवस्थिताः, चन्द्रसूर्याणां च परस्परमन्तरं पञ्चाशद्योजनसहस्राणि ततश्चन्द्रस्य चन्द्रस्य सूर्यस्य सूर्यस्य च परस्परमन्तरं भवति योजनानां लक्षं, एतच्चैवमन्तरपरिमाणं सूचीश्रेण्या प्रतिपत्तव्यं न वलयाकारश्रेण्येति।

मू. (२८३) *सूरंतरिया चंदा चंदंतरिया य दिनयरा दित्ता।*
चित्तंतरलेसागा सुहलेसा मंदलेसा य॥

वृ. सम्प्रति बहिश्चन्द्रसूर्याणां पङ्क्त्याऽवस्थानमाह—नृलोकाद्बहिः पङ्क्त्याऽवस्थिताः सूर्यान्तरिताश्चन्द्राश्चन्द्रान्तरिता दिनकराः 'दीप्ताः' दीप्यन्ते स्म भास्करा इत्यर्थ, कथम्भूतास्ते चन्द्रसूर्या? इत्याह—

'चित्रान्तरलेश्याकाः' चित्रमन्तरं लेश्या च प्रकाशरूपा येषां ते तथा, तत्र चित्रमन्तरं चन्द्राणां सूर्यान्तरितत्वात् सूर्याणां चन्द्रान्तरितत्वात्, चित्रा लेश्या चन्द्रमसां शीतरश्मित्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूर्याणामुष्णरश्मित्त्वात्, लेश्याविशेषप्रदर्शनार्थमाह–'सुहलेसा मंदलेसा य' सुखलेश्याश्चन्द्रमसो, न शीतकाले मनुष्यलोक इवात्यन्तशीतरश्मय इत्यर्थः, मन्दलेश्याः सूर्या न तु मनुष्यलोके निदाधसमय इव एकान्तोष्णरश्मय इत्यर्थः–, आह च तत्वार्थटीकाकारो हरिभद्रसूरि–

''नात्यन्तं शीताश्चन्द्रमसः नात्यन्तोष्णाः सूर्या किन्तु साधारणा द्वयोरपी''ति, इहेदमुक्तं भवति–यत्र द्वीपे समु[द्रे] वा नक्षत्रादिपरिमाणं ज्ञातुमिष्यते तत्रैकशशिपरिवारभूतं नक्षत्रादिपरिमाणं तावद्भिः शशिभिर्गुणयितव्यमिति।

मू. (२८४) *अट्ठासीइं च गहा अट्ठावीसं च होंति नक्खत्ता।*
एगससीपरिवारो एत्तो ताराण वोच्छामि॥

मू. (२८५) *छावट्ठिसहस्साइं नव चेव सयाइं पंचसयराइं।*
एगससीपरिवारो तारागणकोडिकोडीणं॥

वृ. तत्रैकशशिपरिवारभूतानां ग्रहादीनां परिमाणमाह–'अट्ठासीई'त्यादि गाथाद्वयमपि पाठसिद्धम्।

मू. (२८६) *बहियाओ माणुसनगस्स चंदसूराणऽवट्ठिया जोगा।*
चंदा अभीइजुत्ता सूरा पुण होंति पुस्सेहिं॥

वृ. बहिः 'मनुष्यनगस्य' मनुष्यपर्वतस्य चन्द्रसूर्याणां योगा अवस्थिता न मनुष्यलोक इवान्यान्यनक्षत्रसञ्चारिणश्चाराभावात्, कचित् 'अवट्ठिया तेया' इति पाठस्तत्रावस्थितानि तेजांसीति व्याख्येयं, किमुक्तं भवति?–सूर्या सदैवानत्युष्णतेजसो न तु जातुचिदपि मनुष्लोके ग्रीष्मकाल इवात्युष्णतेजसः, चन्द्रमसोऽपि सदैवानतिशीतलेश्याका न पुनः कदाचनाप्यन्तर्मनुष्यक्षेत्रस्य शिशिरकाल इवातिशीततेजस इति, तत्र प्रथमपाठपक्षे तानेवावस्थितान् योगानाह–'चंदा अभिई' इत्यादि, द्वितीयपाठपक्षे तथेति पठयितव्यं, चन्द्राः सर्वेऽपि मनुष्यक्षेत्राद्बहिरभिजिता नक्षत्रेण युक्ताः, सूर्या पुनर्भवन्ति पुष्यैर्युक्ता इति। सम्प्रति मानुषोत्तरपर्वतोच्चैस्त्वादिप्रतिपादनार्थमाह–

मू. (२८७) *माणुसुत्तरे णं भंते! पव्वते केवतियं उड्डं उच्चत्तेणं? केवतियं उव्वेहेणं? केवतियं मूले विक्खम्भेणं? केवतियं मज्झे विक्खंभेणं? केवतियं सिहरे विक्खंभेणं? केवतियं अंतो गिरिपरिरएणं? केवतियं बाहिं गिरिपररएणं? केवतियं मज्झे गिरिपरिरएणं? केवतियं उवरि गिरिपरिरएणं? गोयमा! माणुसुत्तरे ण पव्वते सत्तरस एक्कवीसाइं जोयणसयाइं उड्डंउच्चत्तेणं चत्तारि तीसे जोयणसए कोसं च उव्वेहेणं मूले दसबावीसे जोयणसते विक्खंभेणं मज्झे सत्ततेवीसे जोयणसते विक्खंभेणं सउवरि चत्तारिचउवीसे जोयणसते विक्खंभेणं अंतो गिरिपरिरएणं–एगा जोयणकोडी बायालीसं च सयसहस्साइं।*

तीसं च सहस्साइं दोन्नि य अउणापन्ने जोयणसते किंचिविससाहिए परिक्खेवेणं, बाहिरगिरिपरिरएणं एगा जोयणकोडी बायालीसं च सतसहस्साइं छत्तीसं च सहस्साइं सत्तचोद्दसोत्तरे जोयणसते परिक्खेवेणं, मज्झे गिरिपरिरएणं एगा जोयणकोडी बायालीसं च सतसहस्साइं चोत्तीसं च सहस्सा अट्ठतेवीसे जोयणसते परिक्खेवेणं। उवरि गिरिपरिरएणं एगा जोयणकोडी बायालीसं च सयसहस्साइं बत्तीसं च सहस्साइं नव य बत्तीसे जोयणसते परिक्खेवेणं, मूले विच्छिन्ने मज्झे संखित्ते उप्पिं तणुए अंतो सण्हे मज्झे उदग्गे बाहिं दरिसणिज्जे ईसिं सण्णिसण्णे सीहनिसाई

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

अवद्धजरवरासिसंठाणसंठिते सव्वजंबूणयामए अच्छे सण्हे जाव पडिरूवे, उभओपासिं दोहं पउमवरवेदियाहिं दोहि य वनसंडेहिं सव्वतो समंता संपरिक्खित्ते वण्णओ दोण्हवि।

से केणट्ठेणं भंते! एवं वुच्चति–माणुसुत्तरे पव्वते २ ?, गोयमा! माणुसुत्तरस्स णं पव्वतस्स अंतो मणुया उप्पिं सुवण्णा बाहिं देवा अदुत्तरं च णं गोयमा! माणुसुत्तरपव्वतं मणुया न कयाइ वितिवइंसु वा वीतिवयंति वा वीतिवइस्संति वा नन्नत्थ चारणेहिं वा विज्ञाहरेहिं वा देवकम्मुणा वावि, से तेणट्ठेणं गोयमा!० अदुत्तरं च णं जाव निच्चेत्ति। जावं च णं माणुसुत्तरे पव्वते तावं च णं अस्सिंलोए त्ति पवुच्चति, जावं च मं वासातिं वा वासधरातिं वा तावं च णं अस्सिं लोएत्ति पवुच्चित, जावं च णं गेहाइ वा गेहावयणाति वा तावं च णं अस्सिं लोएत्ति पवुच्चति, जावं च णं गामाणि वा जाव रायहाणीति वा तावं च णं अस्सिंलोएत्ति पवुच्चति।

जावं च णं अरहंता चक्कवट्टि बलदेवा वासुदेवा पडिवासुदेवा चारणा विज्ञाहरा समणा समणीओ सावया सावियाओ मणुया पगतिभद्दगा विणीता तावं च णं अस्सिं लोएत्ति पवुच्चति।

जावं च णं समयाति वा आवलियाति वा आणापाणूइति वा थोवाइ वा लवाइ वा मुहुत्ताइ वा दिवसाति वा अहोरत्ताति वा पक्खाति वा मासाति वा उदूति वा अयणाति वा संवच्छराति वा जुगाति वा वाससताति वा वाससहस्साति वा वाससयसहस्साइ वा पुव्वंगाति वा पुव्वाति वा तुडियंगाति वा। एवं पुव्वे तुडिए अडडे अव्वे हूहुकए उप्पले पउमे नलिने अच्छिनिउरे अउते नउते मउते चूलिया सीसपहेलिया जाव य सीसपहेलियंगेति वा सीसपहेलियाति वा पलिओवमेति वा सागरो० वा उवसप्पिणीति वा ओस० तावं च णं अस्सिं लोगे वुच्चति।

जावं च णं बादरे विज्जुकारे बायरे थणियसद्दे तावं च णं अस्सिं० जावं च णं बहवे ओराला बलाहका संसेयंति संमुच्छंति वासं वासंति तावं च णं अस्सिं लोए, जावं च णं बायरे तेउकाए तावं च णं अस्सिं लोए, जावं च णं आगराति वा नदीउइ वा निहीति वा तावं च णं अस्सिंलोगित्ति पवुच्चति। जावं च णं अगडाति वा नदीति वा तावं च णं अस्सिं लोए जावं च णं चंदोवरागाति वा सूरोवरागाति वा चंदपरिएसाति वा सूरपरिएसाति वा पडिचंदाति वा पडिसूराति वा इंदधनूइ वा उदगमच्छेइ वा कपिहसिताणि वा तावं च णं अस्सिंलोगेति प०।

जावं च णं चंदिमसूरियगहणक्खत्ततारारूवाणं अभिगमणनिग्गमणवुड्ढिणिवुड्ढिअणवट्टियसंठाणसंठिती आघविज्ञति तावं च णं अस्सिं लोएत्ति पवुच्चति।

वृ. 'माणुसुत्तरे ण'मित्यादि, मानुषोत्तरो णमिति वाक्यालङ्कारे पर्वतः 'कियत्' किंप्रमाणमूर्द्धमुच्चैस्त्वेन? कियदुद्वेधेन ? कियन्मूलविष्कम्भेन? कियदुपरिविष्कम्भेन? कियद् 'अन्तर्गिरिपरिरयेण' गिरेरन्तः परिक्षेपेण ? कियद् 'बहिर्गिरिपरिरयेण' गिरेर्बहिपरिच्छेदेन ? कियत् 'मूलगिरिपरिरयेण ?' गिरेर्मूले परिरयेण, एवं कियन्मध्यगिरिपरिरयेण ?, एवं कियदुपरिगिरिपरिरयेण प्रज्ञप्तः ?, भगवानाह–

गौतम! सप्तदश योजनशतानि एकविंशानि ऊर्द्धमुच्चैस्त्वेन चत्वारि त्रिंशानि योजनशतानि क्रोशमेकं च 'उद्वेधेन' उण्डत्वेन मूले दश द्वाविंशत्युत्तराणि योजनशतानि विष्कम्भेन मध्ये सप्त त्रयोविंशत्युत्तराणि योजनशतानि विष्कम्भतःउपरि चत्वारि चतुर्विंशत्युत्तराणि योजनशतानि विष्कम्भेन एका योजनकोटी द्वाचत्वारिंशच्छतसहस्राणि त्रिंशत्सहस्राणि द्वे एकोनपञ्चाशदधिके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योजनशते किञ्चिद्विशेषाधिके अन्तर्गिरिपरिरयेण एका योजनकोटी द्वाचत्वारिंशत् शहसहस्राणि षट्त्रिशत्सहस्राणि सप्त चतुर्दशोत्तराणि योजनशतानि बहिर्गिरिपरिरयेण एका योजनकोटी द्वाचत्वारिंशत् शतसहस्राणि षट्त्रिंशत्सहस्राणि सप्त चतुर्दशोत्तरामि योजनशतानि बहिर्गिरिपरिरयेण एका योजनकोटी द्वाचत्वारिंशत् शतस-हस्राणि चतुस्त्रिंशत्सहस्राणि अष्टौत्रयोविंशत्युत्तराणि योजनशतानि मध्यगिरिपरिरयेण एका योजनकोटी द्वाचत्वारिंशच्छतसहस्राणि द्वात्रिंशत्सहस्राणि नव च द्वात्रिंशदुत्तराणि योजनशतानि उपरिगिरिपरिरयेण इदं च मध्ये उपरि च गिरिपरिरयपरिमाणं बहिर्भागापेक्षमव-सातव्यं, अभ्यन्तरं छिन्नङ्कतया मूले मध्ये उपरि च सर्वत्र तुल्यपरिरयपरिमाणत्वात्

मूले विस्तीर्णोऽतिपृथुत्वात्, मध्ये संक्षिप्ते मध्यविस्तारतवात्, उपरि तनुकः स्तोकबाहल्य-भावात्, अन्तः श्लक्ष्णो मृष्ट इत्यर्थ मध्ये 'उदग्रः' प्रधानः बहि 'दर्शनीयः' नयनमनोहारी 'ईषत्' मनाक् सन्निषण्णः सिंहनिषीदनेन निषीदनात्, तथा चाह–

'सिंहनिषादी' सिंहवन्निषीदतीत्येवंशीलः सिंहनिषादी, यथा सिंहोऽग्रेतनं पादयुगलमुत्तम्य पश्चात्तनं तु पादयुग्मं सङ्कोच्य पुताभ्या मनागलग्नो निषीदति तथा निष्ण्णश्च शिरःप्रदेशे उन्नतः पश्चाद्भागे तु निम्नो निम्नतरः एवं मानुषोत्तरोऽपि जम्बूद्वीपवदिशि छिन्नटङ्कः स चोन्नतः पाश्चात्यभागे तूपरितनभागादारभ्य पृथुत्वप्रदेशवृद्ध्या निम्नोनिम्नतर इति, एतदेवातिव्यक्तमाह–'अवद्धजव-रासिसंठाणसंठिए' इति अपगतमर्द्ध यस्य सोऽपार्द्धः स चासौ यवश्च राशिश्च अपार्द्धयवराशी तयोरिव यत्संस्थानं यस्य तेन संस्थितः, यथा यवो राशिश्च धान्यानमपान्तराले ऊध्र्वाधोभागेन छिन्नो मध्यभागे छिन्नटङ्क इव भवति बहिर्भागे तु शनैः शनैः पृथुत्ववृद्धया निम्नो निम्नतरस्तद्वदेषोऽपि, यवग्रहणं पृथग्व्याख्यातमन्यत्र केवलापार्द्धयवसंस्थानतयाऽपि प्रतिपादनात्, उक्तश्च–

॥ १ ॥ "जंबुणयामओ सो रम्मो अद्धजवसंठिओ भणिओ।
सिंहनिसादीएणं दुहाकओ पुक्खरद्दीवो ॥"

'सव्वजंबूणयामए' इति सर्वात्मना जाम्बूनदमयः 'अच्छे जाव पडिरूवे' इति प्राग्वत्। 'उभओ पासि' मित्यादि उभयोः पार्श्वयोरन्तर्भागे मध्यभागे चेत्यर्थ प्रत्येकमेकैकभावेन द्वाभ्यां पद्मवरवेदिकाभ्यां वनखण्डाभ्यां च 'सर्वतः' सर्वासु दिक्षु 'समन्ततः' सामस्त्येन संपरिक्षिप्तः, द्वयोरपि पद्मवरवेदिकावनखण्डयोः प्रमाणं वर्णकश्च प्राग्वत्।

साम्प्रतं नामनिमित्तमभिधित्सुराह– 'से केणट्ठेण' मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते–मानुषोत्तरः पर्वतः मानुषोत्तरः पर्व्वतः ? इति, भगवानाह–गौतम ! मानुषोत्तरपर्वतस्य 'अन्तः' मध्ये मनुष्याः उपरि 'सुवर्णा' सुवर्णकुमारा देवाः बहि सामान्यतो देवाः, ततो मनुष्या-णामुत्तरः–पर इति मानुषोत्तरः। अथान्यद् गौतम ! मानुषोत्तरं पर्वतं मनुष्या न कदाचिदपि व्यतिव्रजितवन्तः व्यतिव्रजन्ति व्यतिव्रजिष्यन्ति वा, किं सर्वथा न ? इत्याह– नान्यत्र, चारमेन पञ्चम्यर्थे तृतीया प्राकृतत्वात् 'चारणात्' जङ्घाचारणलब्धिसंपन्नात् विद्याधराद् देवकर्मण एव क्रियया देवोत्पादनादित्यर्थः, चारणादयो व्यतिव्रजयन्त्यपि मानुषोत्तरं पर्वतमिति तद्वर्जनं ततो मानुषाणामुत्तरः–उच्चैस्तरोऽलङ्घनीयत्वान्मानुषोत्तरः, तथा चाह–'से एएणट्ठेण' मित्याद्युप-संहारवाक्यं गतार्थं।

सम्प्रत्येतावानेव मनुष्यलोकोऽत्रैव च वर्षवर्षधरादय इत्येततसूत्रं प्रतिपादयितुकाम

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

आह– 'जावं च ण' मित्यादि, यावदयं मानुषोत्तरपर्वतस्तावत् 'अस्सिंलोए' इति अयं मानुषलोक् इति प्रोच्यते न परतः, तथा यावद्वर्षाणि–भरतादीनि क्षेत्राणीति वा वर्षधरपर्वता–हिमवदादय इति वा तावदयं मनुष्यलोक इति प्रोच्यते न परतः, एतावता किमुक्तं भवति ? वर्षाणि वर्षधर-पर्वताश्च मनुष्यलोक एव नान्यत्रेति, एवमुत्तरत्रापि भावनीयं, तथा यावदध्गृहाणीति वा गृहापतनानीति वा तत्र गृहाणि प्रतीतानि गृहापतनानीति–गृहेष्वागमनानि तावदयं मनुष्यलोकः प्रोच्यते, गृहाणि गृहापतनानि वाऽस्मिन्नेव मनुष्यलोके नान्यत्रेति भावः, तथा ग्रामा इति वा नकराणीति वा यावत्सन्निवेशा इति वा, यावत्करणात् खेटकर्बटादिपरिग्रहस्तावदयं मनुष्यलोक इति प्रोच्यते, अत्रापि भावार्थ प्राग्वत्, तथा यावदर्हन्तश्चक्रवर्त्तिनो बलदेवा वासुदेवाश्चारणा–जङ्घाचारण-विद्याधराः 'श्रमणाः' साधवः 'श्रमण्यः' संयत्यः श्रावकाः श्राविकाश्च, तथा मनुष्याः प्रकृतिभद्रका इत्यादि यावद्विनीतास्तावदयं मनुष्यलोक इति प्रोच्यते, अर्हदादीनामत्रैव भावो नान्यत्रेति भावार्थ

तथा यावदुदारा बलाहका–मेघाः संस्विद्यन्ते संमूर्च्छन्ति–वर्षा वर्षन्ति, अस्य व्याख्यानं प्राग्वत् तावदयं मनुष्यलोक इति प्रोच्यते, मेघानामपि वर्षुकाणामत्रैव भावो नान्यत्रेति भावार्थ, तथा यावत् 'बादरः' गुरुतरः 'स्तनितशब्दः' गर्जितशब्द इति, 'बादरो विद्युत्कार इति वा' बादरा–अतिबहलतरा विद्युत् तावदयं मनुष्यलोके इति प्रोच्यते, तथा यावदयं बादरोऽग्निगायिक-स्तावदयं मनुष्यलोक इति प्रोच्यते, बादरग्निकायिकस्यापि मनुष्यलोकात्परतोऽसम्भवात्, तथा यावदाकरा इति वा, आकरा–हिरण्याकरादयः, नद्य इति वा निधय इति वा तावदयं मनुष्यलोक इति प्रोच्यते, तेषामपि मनुष्यक्षेत्रादन्यवासम्भवात्, तथा यावत्समया इति वा, समयः–परमनिरुद्धः कालविशेषो यस्याधो विभागः कर्त्तुं न शक्यते, स च सूचिकदारकस्तरुणो बलवानित्यादिपूर्वोक्त-विशेषणविशिष्टो यावन्निपुणशिल्पोपगत एकां महतीपटशाटिकां पट्टशाटिकां वा गृहीत्वा शीघ्रं हस्तमात्रमपसारयन् यावता कालेनोपरितनतन्तुगतमुपरितनं पक्ष्म छिनत्ति ततोऽपि मनाक् सूक्ष्मतरो, जघन्ययुक्तासङ्ख्यातकसमयानां समुदायः एकावलिका, सङ्ख्येया आवलिका एक उच्छ्वासः सङ्ख्येयाऽऽवलिका निश्वासः उच्छ्वासनिश्वासौ समुदितावेक आनप्राणकालः, किमुक्तं भवति ? – हृष्टस्य नीरोगस्य श्रमबुभुक्षादिना निरुपकृषटस्य यावता कालेनैतावुच्छ्वासनिश्वासौ भवतः तावान् काल आनप्राणः, उक्तश्च–

॥ १ ॥ "हट्ठस्स अणवकल्लस्स, निरुवकिट्ठस्स जंतुणो।
एगे ऊसासनीसासे, एस पाणुत्ति वुच्चए ॥"

सप्त प्राणा एकः स्तोकः सप्त स्तोका एको लवः सप्तसप्ततिसङ्ख्या लवा एको मुहूर्त्तः उक्तश्च–

॥ १ ॥ "सत्त पाणूणि से थोवे, सत्त थोवाणि से लवे ।
लवाण सत्तहत्तरिए, एस मुहुत्ते वियाहिए ॥"

अस्मिंश्च मुहूर्त्ते यद्यावलिकाश्छिन्त्यन्ते तदा तासामेका कोटी सप्तषष्टिर्लक्षाः सप्तसप्तति सहस्राणि द्वे शते षोडशाधिके, उक्तश्च–

॥ १ ॥ "एगा कोडी सत्तट्ठि लक्खा सत्तत्तरी सहस्सा य ।
दो य सया सोलहिया सोलहिया आवलियाणं मुहुत्तंमि ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—उच्छ्वासाश्च मुहूर्ते त्रीणि सहस्राणि सप्त शतानि त्रिसप्तत्यधिकानि, उक्तश्च—

॥ १ ॥ "तिन्नि सहस्सा सत्त य सयाइं तेवत्तरिं च ऊसासा ।
एस मुहुत्तो भणिओ सव्वेहिं अनंतनाणीहिं ॥"

त्रिंशन्मुहूर्त्तप्रमाणोऽहोरात्रः, पञ्चदशाहोरात्रः पक्षः, द्वौ पक्षौ मासः, द्वौ मासौ ऋतुः, ते च षट्, तद्यथा—प्रावृड् वर्षारात्रः शरद् हेमन्तः वसन्तः ग्रीष्मश्च, तत्र—'आषाढाद्या ऋतव' इति वचनाद् आषाढश्रावणौ प्रावृट् भाद्रपदास्वयुजौ वर्षारात्र कार्त्तिकमार्गशीर्षौ शरद् पौषमाघौ हेमन्तः फाल्गुनचैत्रौ वसन्तः वैशाखज्येष्ठौ ग्रीष्मः, ये त्वभिदधतिवसन्ताद्या ऋतवः (इति वसन्तः) ग्रीष्मः प्रावृटशरदौ हेमन्तः शिशिर इति षडिति तदप्रमाणसमवसातव्यं, जैनमतोत्तीर्णत्वात्, त्रय ऋतवोऽयनं, द्वे अयने संवत्सरः, पञ्चसंवत्सरं युगं, विंशतिर्युगानि वर्षशतं, इहाहोरात्रे मासे वर्षे वर्षशते चोच्छ्वासपरिमाणमेवं पूर्वसूरिभि संकलितम्—

॥ १ ॥ "एगं च सयसहस्सं ऊसासाणं तु तेरस सहस्सा ।
नउयसएणं अहिया दिवसनिसिं होंति विन्नेया ॥

॥ २ ॥ मासेऽवि य ऊसासा लक्खा तित्तीस सहस पणनउई ।
सत्त सयाइं जाणसु कहियाइं पुव्वसूरीहिं ॥

॥ ३ ॥ चत्तारि य कोडीओ लक्खा सत्तेव होंति नायव्वा ।
अडयालीससहस्सा चारसया होंति वरिसेणं ॥

दश वर्षशतानि वर्षसहस्रं शतं वर्षसहस्राणां वर्षशतसहस्रं चतुरशीति वर्षशतसहस्राणि एकं पूर्वाङ्गं, चतुरशीति पूर्वाङ्गशतसहस्राणि एकं पूर्वं, चतुरशीति पूर्ववर्षशतसहस्राणि एकं त्रुटिताङ्गं, चतुरशीति त्रुटिताङ्गशतसहस्राणि एकं त्रुटितं, चतुरशीतिस्त्रुटितशतसहस्राणि एकमडडाङ्गं, चतुरशीतिरडडाङ्गशतसहस्राणि एकमडडं, चतुरशीतिरडडशतसहस्राणि एवमववाङ्गं, चतुरशीतिरववाङ्गशतसहस्राणि एकमववं, चतुरशीतिरववशतसहस्राणि एकं हूहुकाङ्गं, चतुरशीतिर्हूहुकाङ्गशतसहस्रणि एकं हूहुकं, चतुरशीतिर्हूहुकशतसहस्राणि एकमुत्पलाङ्गं, चतुरशीतिरुत्पलाङ्गशतसहस्राणि एकमुत्पलं, चतुरशीतिरुत्पलशतसहस्राणि एकं पद्माङ्गं, चतुरशीति पद्माङ्गशतसहस्राणि एकं पद्म, चतुरशीति पद्मशतसहस्राणि एकं नलिनाङ्गं ।

चतुरशीतिर्नलिनाङ्गशतसहस्रणि एकं नलिनं, चतुरशीतिर्नलिनशतसहस्राणि एकमर्थनिकुराङ्गं, चतुरशीतिरर्थनिकुराङ्गशतसहस्राणि एकमर्थिकुरं, चतुरशीतिरर्थनिकुरशत-सहस्राणि एकमयुताङ्गं, चतुरशीतिरयुताङ्गशतसहस्रणि एकमयुतं, चतुरशीतिरयुतशतहसहस्रणि एकं प्रयुताङ्गं, चतुरशीति प्रयुताङ्गशतसहस्राणि एकं प्रयुतं, चतुरशीति प्रयुतशतसहस्राणि एकं नयुताङ्गं, चतुरशीतिर्नयुताङ्गशतसहस्राणि एकं नयुतं, चतुरशीतिर्नयुतशतसहस्राणि एकं चूलिकाङ्गं, चतुरशीतिश्चूलिकाङअघशतसहस्राणि एका चूलिका, चतुरशीतिश्चूलिकाशतसहस्राणि एकं शीर्षप्रहेलिकाङ्गं, चतुरशीति शीर्षप्रहेलिकाङ्गशतसहस्राणि एका शीर्षप्रहेलिका एतावानेव गणितस्य विषयोऽतः परमौपमिकं कालपरिमाणं ।

एतदेवाह—पल्योपममिति वा, पल्योपमस्वरूपं सङ्ग्रहणिटीकातोऽवसातव्यं, तत्र सविस्तर- मभिहितत्वात्, पल्योपमानां दश कोटीकोट्य एकं सागरोपमं, दश कोटीकोटयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागरोपमाणां सुषमसुषमाद्यरकक्रमेण एकाऽवसर्पिणी, सागरोपमाणां दश कोटीकोटय एव दुष्षमदुष्षमाद्यरकक्रमेणैकोत्सर्प्पिणी, तावदयं मनुष्यलोक इति प्रोच्यते, अन्यत्रैवंरूपकाल-परिमाणासम्भवात्, कालद्रव्यस्य मनुष्यक्षेत्र एव भावात् ।

'जावं च ण'मित्यादि, यावच्चन्द्रोपरागा इति वा सूर्योपरागा इत वा चन्द्रपरिवेषा इति वा सूर्यपरिवेषा इति वा प्रतिचन्द्रा इति वा प्रतिसूर्या इति वा इन्द्रधनुरिति वा उदकमत्स्या इति वा कपिहसितमिति वा, एतेषामर्थ प्राग्वत्तावदयं मनुष्यलोक इति प्रोच्यते, अन्यत्रैषामभाव इति भावः ।

'जावं च ण'मित्यादि, यावच्चन्द्रसूर्यग्रहणगणनक्षत्रताराररूपाणि, सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्, णमिति वाक्यलङ्कारे अभिगमनं—सर्वबाह्यान्मण्डलादभ्यन्तरप्रवेशनं निर्गमनं—सर्वाभ्यन्तरान्मण्डलाद्बहिर्गमनं वृद्धिः—शुक्लपक्षे चन्द्रमसो वृद्धिप्रतिभासः निर्वृद्धि—वृद्धेरभाः, कृष्णपक्षे चन्द्रमस एव हानिप्रतिभास इति भावः, अनवस्थितं—सन्ततं चारप्रवृत्या यत्संस्थानं—सम्यगवस्थानमनवस्थितसंस्थानं, एतेषां द्वन्द्वस्तैः संस्थितानि—यथायोगं व्यवस्थितानि अभिगमननिर्गमनवृद्धिनिर्वृद्ध्यनवस्थितसंस्थानसंस्थितानीति व्याख्यायन्ते तावदयं मनुष्यलोक इति प्रोच्यते, अन्यत्र चन्द्रादीनामभिगमनाद्यसम्भवात् ॥

मू. (२८८) *अंतो णं भंते ! मणुस्सखेत्तस्स जे चंदिमसूरियगहगणनक्खत्ततारारूवा ते णं भदन्त ! देवा किं उड्डोववन्नगा कप्पोववन्नगा विमाणोववन्नगा चारोववन्नगा चारट्ठितीया गतिरतिया गतिसमावन्नगा ?*

गोयमा ! ते णं देवा नो उड्डोववन्नगा नो कप्पोववन्नगा विमाणोववन्नगा चारोववन्नगा नो चारट्ठितीया गतिरतिया गतिसमावन्नगा उड्ढमुहकंबुयपुप्फसंठाणसंठि तेहिं जोयणसाहस्सितेहिं तावखेत्तेहिं साहस्सियाहिं बाहिरियाहिं वेउव्वियाहिं परिसाहिं महयाहयनट्टगीतवादिततंतीत-लतालतुडियघणमुइंगपडुप्पवादितरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा महया उक्किट्ठिसीहनाय-बोलकलकलसद्देण विपुलाइं भोगभोगाइं भुंजमाणा अच्छयपव्वयरायं पदाहिणावत्तमंडलयारं मेरुं अनुपरियडंति ।

तेसि णं भंते ! देवाणं इंदे चवति से कहमिदानिं पकरेंति ?, गोयमा ! ताहे चत्तारि पंच सामानिया तं ठाणं उवसंपज्जित्ताणं विहरंति जाव तत्थ अन्ने इंदे उववन्ने भवति । इंदट्ठाणे णं भंते! केवतियं कालं विरहिते उववातेणं ?, गो० जहन्नेणं एक्कं समयं उक्कोसेणं छम्मासा ।

बहिया णं भंते ! मणुस्सखेत्तस्स जे चंदिमसूरियगहनक्खत्ततारारूवा ते णं भंते ! देवा किं उड्डोववन्नगा कप्पोववन्नगा विमाणोववन्नगा चारोववन्नगा चारट्ठितीया गतिरतिया गतिसमावन्नगा ?

गोयमा ! ते णं देवा गो उड्डोववन्नगा नो कप्पोववन्नगा विमाणोववन्नगा नो चारोववन्नगा चारट्ठितीया नो गतिरतिया नो गतिसमाणवन्नगा पक्किट्टगसंठाणसंठितेहिं जोयनसतसाहस्सिएहिं तावक्खेत्तेहिं साहस्सियाहि य बाहिराहिं वेउव्वियाहिं परिसाहिं महताहतनट्टगीयवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा सुहलेस्सा सीयलेस्सा मंदलेस्सा मंदायवलेस्सा चित्तंतरलेसागा कूडा इव ठाणिट्ठिता अन्नोन्नासमोगाढाहिं लेसाहिं ते पदेसे सव्वतो समंता ओभासेंति उज्जोवेंति तवंति पभासेंति ।। जया णं भंते ! तेसिं देवाणं इंदे चयति से कहमिदाणिं पकरेंति ?, गो० जाव

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

चत्तारि पंच सामाणिया तं ठाणं उवसंपज्जित्ताणं विहरंति जाव तत्थ अन्ने उववन्ने भवति । इंदट्ठाणे णं भंते! केवतियं कालं विरहओ उववातेणं?, गो० जहन्नेणं एक्कं समयं उक्कोसेणं छम्मासा ॥

वृ. 'अंतो ण'मित्यादि, 'अन्तः' मध्ये णमिति वाक्यालङ्कारे भदन्त ! मानुषोत्तरस्य पर्वतस्य ये चन्द्रसूर्यग्रहनक्षत्रतारारूपास्ते भदन्त ! देवाः किमूर्द्धोपपन्नाः ?–सौधर्मादिभ्यो द्वादशेभ्यः कल्पेभ्य ऊर्द्धमुपपन्ना ऊर्द्धोपपन्नाः कल्पेषु–सौधर्मादिषु उपपन्नाः कल्पोपन्नाः विमानेषु–सामान्यरूपेषु उपपन्ना विमानोपपन्नाः चारो–मण्डलगत्या परिभ्रमणं तमुपपन्ना–आश्रितवन्तश्चारोपपन्नाः चारस्ययतोक्तरूपस्य स्थिति–अभावो येषां ते चारस्थितिका अपगतचारा इत्यर्थः गतौ रति–आसक्ति प्रीतिर्येषां ते गतिरतिकाः, एतेन गतौ रतिमात्रमुक्तं, सम्प्रति साक्षाद्गतिं प्रश्नयति– 'गतिसमापन्नाः ?' गतिसमापन्नाः गतियुक्ताः, एवं गौतमेन प्रश्ने कृते भगवानाह–

गौतम ! ते देवा नोर्द्धोपपन्नास्तथा चारोपन्नाश्चारसहिता नो चारस्थितिकाः, तथा स्वभावतोऽपि गतिरतिकाः साक्षाद्गतियुक्ताश्च, नालिकापुष्पसंस्थानसंस्थितैः 'योजनसाहस्रकैः' अनेकयोजनसहस्रप्रमाणैस्तापक्षेत्रैः 'साहस्रकाभिः' अनेकसहस्रसङ्ख्याभिर्बाह्याभि पर्षद्भिः, अत्र बहुवचनं व्यक्तपेक्षया, 'वैकुर्विकाभि' विकुर्वितनानारूपधारणीभि 'महयाहयन- ट्टगीयवाइय-तंतीतलतालतुडियघणमुइंगपडुप्पवाइयरवेण'मिति पूर्ववत् 'दिव्यान्' प्रधानात् भोगार्हा–भोगाः–शब्दादयो भोगभोगास्तान् भुञ्जानास्तथा स्वभावतो गतिरतिकैर्बाह्यपर्षदन्तर्गतैर्देवैर्वेगेन गच्छत्सु विमानेषु 'उत्कृष्टतः' उत्कर्षवशेन ये मुच्यन्ते सिंहनादादयश्च क्रियन्ते बोलाः, बोलो नाम मुखे हस्तं दत्वा महता शब्देन पूत्करणं, यच्च कलकलो–व्याकुलशब्दसूहस्तद्रवेण महता समुद्रवर- भूतमिव कुर्वाणा मेरुमिति योगः, किंविशिष्टम् ?

इत्याह–'अच्छम्' अतीवनिर्मलजाम्बूनदमयत्वात् रत्नबहुलत्वाच्च 'पर्वतराजं' पर्वतेन्द्रं प्रदक्षिणावर्त्तमण्डलं चारं यथा भवति तथा मेरुमनुलक्षीकृत्य 'परिअडंति' पर्यटन्ति । पुनः प्रश्नयति–'तेसि णं भंते !' इत्यादि, तेषां भदन्त ! ज्योतिष्कदेवानां यदा इन्द्रश्च्यवते तदा ते देवा 'इदानीम्' इन्द्रविरहकाले कथं प्रकुर्वन्ति ?, भगवानाह–गौतम ! यावच्चत्वारः पञ्च वा सामानिका देवाः समुदितीभूय 'तत्स्थानम्' इन्द्रविरहकाले कथं प्रकुर्वन्ति ?, भगवानाह–गौतम ! यावच्चत्वारः पञ्च वा सामानिका देवाः समुदितीभूय 'तत्स्थानम्' इन्द्रस्थानमुपसंपद्य 'विहरन्ति' तदिन्द्रस्थान परिपालयन्ति, संजातौ शुल्कस्थानदिकपञ्चकुलवत्, कियन्तं कालं यावत्तदिन्द्रस्थानं परिपालयन्ति इति चेदत आह–यावदन्यस्तत्रेन्द्र उपपन्नो भवति ॥ 'इंदट्ठाणे ण'मित्यादि, इन्द्रस्थानं भदन्त ! कियन्तं कालमुपपातेन विरहितं प्रज्ञप्तम् ?, भगवानाह–गौतम ! जघन्येनैकं समयं यावदुत्कर्षतः षण्मासान् ॥ 'बहिया ण'मित्यादि, बहिर्भदन्त ! मानुषोत्तरस्य पर्वतस्य ये चन्द्रसूर्यग्रहगणनक्षत्र-तारारूपास्ते भदन्त ! देवाः किमूर्द्धोपपन्नाः ? इत्यादि प्राग्वत्, भगवानाह–गौतम ! नोर्द्धोपपन्नका नापि कल्पोपपन्नाः किन्तु विमानोपपन्नास्तथा नो चारोपपन्नाः किन्तु चारस्थितिकाः अत एव नो गतिरतयो नापि गतिसमापन्नकाः 'पक्किट्टगसंठाणसंठिएहिं'ति पक्वेष्टकसंश्थानसंस्थितैर्योजन-शतसाहस्रिकैरातपक्षेत्रैः, यथा इष्टका आयामतो दीर्घा भवति विस्तरतस् स्तोका चतुरस्र च तेषामपि मनुष्यक्षेत्राद्बहिर्व्यवस्थितानां चन्द्रसूर्याणामातपक्षेत्राण्यायामतोऽनेकयोजन-शतसहस्रप्रमाणानि विस्तरत एकयोजनशतसहस्राणि चतुरस्राणि चेति, तैरित्थम्भूतैरातपक्षेत्रैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहस्रकाभिः—अनेकसह- स्रसङ्ख्याभिर्बाह्याभिः पर्षद्भिः, अत्रापि बहुवचनं व्यक्तपेक्षया, 'महयाहये'त्यादि यावत्समुद्ररव- भूतमिव कुर्वन्त इति प्राग्वत्, कथम्भूताः ?

इत्याह—शुभलेश्याः, एतच्च विशेषणं चन्द्रमसः प्रति, तेन नातिशीततेजसः किन्तु सुखोत्पाद-हेतुपरमलेश्याका इत्यर्थः, मन्दलेश्या, एतच्च विशेषणं सूर्यान् प्रति, तथा च एतदेव व्याचष्टे—'मन्दातपलेश्याः' मन्दा नात्युष्णस्वभावा आतपरूपा लेश्या—रश्मिसङ्घातो येषां ते तथा, पुनः कथम्भूताश्चन्द्रादित्याः ? इत्याह—'चित्रान्तरलेश्याः' चित्रमन्तरं लेश्या च येषां ते तथा, भावार्थश्चास्य पदस्य प्रागेवोपदर्शितः, त इत्थम्भूताश्चन्द्रादित्याः परस्परमवगाढाभिर्लेश्याभि, तथाहि—चन्द्रमसां सूर्याणां च प्रत्येकं लेश्या योजनशतसहस्रप्रमाणविस्तारा, चन्द्रसूर्याणां च सूचीपङ्क्त्या व्यवस्थितानां परस्परमन्तरं पञ्चाशद् योजनसहस्राणि, ततश्चन्द्रप्रभासम्मिश्राः सूर्यप्रभाः सूर्यप्रभासम्मिश्राश्च चन्द्रप्रभाः इतीत्थं परस्परमवगाढाभिर्लेश्याभि कूटानीव—पर्वतोपरिव्यवस्थितशिखराणीव 'स्थानस्थिताः' सदैवैकत्र स्थाने स्थितास्तान् तान् प्रदेशान् स्वस्वप्रत्यासन्नान् उद्द्योतयन्ति अवभासयन्ति तापयन्ति प्रकाशयन्ति। 'तेसि णं भंते ! देवाणं जाहे इंदे चयई'त्यादि प्राग्वत् ॥

मू. (२८९) *पुक्खरवरण्णं दीवं पुक्खरोदे नामं समुद्दे वट्टे वलयागारसंठाणसंठिते जाव संपरिक्खिवित्ताणं चिट्ठति ॥ पुक्खरोदे णं भंते ! समुद्दे केवतियं चक्कवालविक्खंभेणं केवतियं परिक्खेवेणं पन्नत्ते ?, गोयमा ! संखेज्जाइं जोयणसयसहस्साइं चक्कवालविक्कभेणं संखेज्जाइं जोयणसयसहस्साइं परिक्खेवेणं पन्नत्ते।*

पुक्खरोदस्स णं समुद्दस्स कति दारा पन्नत्ता ?, गोयमा ! चत्तारि दारा पन्नत्ता तहेव सव्वं पुक्खरोदसमुद्दपुरत्थिमपेरंते वरुणवरदीवपुरत्थिमद्धस्स पच्चत्थिमेणं एत्थ णं पुक्खरोदस्स विजए नामं दारे पन्नत्ते, एवं सेसाणवि। दारंतरंमि संखेज्जाइं जोयणसयसहस्साइं अबाहाए अंतरे प०। पदेसा जीवा य तहेव।

से केणट्ठेणं भंते ! एवं वुच्चति ?—पुक्खरोदे समुद्दे २ ?, गोयमा ! पुक्खरोदस्स णं समुद्दस्स उदगे अच्छे पत्थे जच्चे तणुए फलिहवण्णाभे पगतीए उदगरसेणं सिरिधरसिरिप्पभा य दो देवा जाव महिड्ढीया जाव पलिओवमट्ठितीया परिवसंति, से एतेणट्ठेणं जाव निच्चे।

पुक्खरोदे णं भंते ! समुद्दे केवतिया चंदा पभासिंसु वा ३ ? संखेज्जा चंदा पभासेंसु वा ३ जाव तारागण कोडीकोडीउ सोभेंसु वा ३।

वृ. 'पुक्खरवरण्ण'मित्यादि, पुष्करवरं णमिति वाक्यालङ्कारे द्वीपं पुष्करोदो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः समन्तात्संपरिक्षिप्य तिष्ठति ॥ 'पुक्खरोदे णं भंते ! समुद्दे समचक्कवालसंठिए' इत्यादि प्राग्वत् ॥ सम्प्रति विष्कम्भादिप्रतिपादनार्थमाह—'पुक्खरोदे ण'मित्यादि, पुष्करोदो भदन्त ! समुद्रः कियच्चक्रवालविष्कम्भेन कियत्परिक्षेपेण प्रज्ञप्तः ?, भगवानाह—गौतम ! सङ्ख्येयानि योजनशतसहस्राणि चक्रवालविष्कम्भेन सङ्ख्येयानि योजनशत-सहस्राणि परिक्षेपेण प्रज्ञप्त। 'से ण'मित्यादि, स पुष्करोदः समुद्र एकया पद्मवरवेदिकया सामथ्यार्दध्योजनोच्छ्रयजगत्युपरिभाविन्या एकेन वनखण्डेन सर्वतः समन्तात्संपरिक्षिप्तः।

'पुक्खरोदस्स णं भंते !' इत्यादि, पुष्करोदस्य भदन्त ! समुद्रस्य कति द्वाराणि प्रज्ञप्तानि भगवानाह—गौतम ! चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा—विजयं वैजयन्तं जयन्तमपराजितं, क्व

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भदन्त ! पुष्करोदसमुद्रस्य विजयं नाम द्वारं प्रज्ञप्तम् ?, भगवानाह–गौतम ! पुष्करोदसमुद्रस्य पूर्वार्द्धपर्यन्तेऽरुणवरद्वीपपूर्वार्द्धस्य पश्चिमदिशि, अत्र पुष्करोदसमुद्रस्य विजयं नाम द्वारं प्रज्ञप्तं, तच्च जम्बूद्वीपविजयद्वारवद्वक्तव्यं, नवरं राजधानी अन्यस्मिन् पुष्करोदे समुद्रे।

'कहि ण'मित्यादि, क्व भदन्त ! पुष्करोदसमुद्रस्य वैजयन्तं नाम द्वारं प्रज्ञप्तम् ?, भगवानाह–गौतम ! पुष्करदसमुद्रस्य दक्षिणपर्यन्तेऽरुणवरद्वीपदक्षिणार्द्धस्योत्तरतोऽत्र पुष्करोदसमुद्रस्य वैजयन्तं नाम द्वारं प्रज्ञप्तम् ॥ क्व भदन्त ! पुष्करोदसमुद्रस्य जयन्तं नाम द्वारं प्रज्ञप्तम् ?, भगवानाह–गौतम ! पुष्करोदसमुद्रस्य पश्चिमपर्यन्तेऽरुणवरद्वीपपश्चिमार्द्धस्य पूर्वतोऽत्र पुष्करोदसमुद्रस्य जयन्तं नाम द्वारं प्रज्ञप्तं, तदपि जम्बूद्वीपगतजयन्द्वारवत्, नवरं राजधानी अन्यस्मिन् पुष्करोदसमुद्रे 'कहि ण'मित्यादि, क्व भदन्त ! पुष्करोदसमुद्रस्यापराजितं नाम द्वारं प्रज्ञप्तम् ?, भगवानाह–गौतम पुष्करोदसमुद्रस्योत्तरपर्यन्तेऽरुणवरद्वीपस्य दक्षिणतोऽत्र पुष्करोदसमुद्रस्यापराजितं नाम द्वारं प्रज्ञप्तम्, एतदपि जम्बूद्वीपगतापराजितद्वारवद्वक्तव्यं, नवरं राजधानी अन्यस्मिन् पुष्करोदसमुद्रे

'पुक्खरोदस्स ण'मित्यादि, पुष्करोदस्य भदन्त ! समुद्रस्य द्वारस्य च परस्परमन्तरमेतत् कियत् 'अबाधया' अन्तरित्वा व्याघातरूपया प्रज्ञप्तम् ?, भगवानाह–गौतम ! सङ्ख्येयानि योजनशतसहस्राणि द्वारस्य द्वारस्य च परस्परमबाधयाऽन्तरं प्रज्ञप्तम् ॥ 'पएसे'त्यादि प्रदेशजीवोपपातसूत्रचतुष्टयं तथैव पूर्ववत्, तच्चैवम्–"पुक्खरोयस्स णं भंते ! समुद्दस्स पएसा अरुणवरं दीवं पुट्ठा ?, हंता ! पुट्ठा, ते णं भंते ! पुक्खरोदे समुद्दे अरुणवरे दीवे ?, गोयमा ! पुक्खरोए णं समुद्दे नो अरुणवरे दीवे।

अरुणवरस्स णं भंते ! दीवस्स पएसा पुक्खरोदण्णं समुद्दं पुट्ठा ?, हंता पुट्ठा, ते णं भंते ! किं अरुणवरे दीवे पुक्खरोदे समुद्दे ? गोयमा ! अरुणवरे णं दीवे नो खलु ते पुक्खरोए समुद्दे। पुक्खरोए णं भंते ! समुद्दे जीवा उद्दाइत्ता अरुणवरे दीवे पच्चायंति ?, गोयमा ! अत्थेगइया पच्चायंति अत्थेगइया नो पच्चायंति। अरुणवरे णं भंते ! दीवे जीवा उद्दाइत्ता पुक्खरोदे समुद्दे० ?" इति, (पुष्करोदान्वर्थे) भगवानाह–गौतम ! पुष्करोदसय णमिति पूर्ववत् समुद्रस्योदकम् 'अच्छम्' अनाविलं 'पथ्यं' न रोगहेतुः 'जात्यं' न विजातिमत् 'तनु' लघुपरिणामं 'स्फटिकवर्णाभं' स्फटिकरत्नच्छायं प्रकृत्योदकरसं प्रज्ञप्तं, श्रीधरश्रीप्रभौ चात्र–पुष्करोदे समुद्रे द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, ततस्ताभ्यां सपरिवाराभ्यां गगनमिव चन्द्रादित्याभ्यां ग्रहनक्षत्रादिपरिवारोपेताभ्यां तदुदकमवभासत इति, पुष्करमिवोदकं यस्यासौ पुष्करोदः, तथ चाह–'से एएणट्ठेण'मित्याद्युपसंहावाक्यम्। 'पुक्खरोए णं भंते ! समुद्दे कइ चंदा पभासिंसु ?' इत्यादि पाठसिद्धं, सर्वत्र सङ्ख्येयमय निर्वचनभावात्।

मू. (२९०) *पुक्खरोदे णं समुद्दे वरुणवरेणं दीवेणं संपरि० वट्टे वलयागारे जाव चिट्ठति, तहेव समचक्कवालसंठिते केवतियं चक्कवालविक्खंभेणं ? केवइयं परिक्खेवेणं ? पन्नत्ता, गो० संखिज्जाइं जोयणसयसहस्साइं चक्कवालविक्खंभेणं संखेज्जाइं जोयणसतसहस्साइं परिक्खेवेणं पन्नत्ते, पउमवरवेदियावनसंडवण्णओ दारंतरं पदेसा जीवा तहेव सव्वं।*

से केणट्ठेणं भंते ! एवं वुच्चइ वरुणवरे दीवे २ ?, गोयमा ! वरुणवरे णं दीवे तत्थ २ देसे २ तहिं २ बहुओ खुड्डा खुड्डियाओ जाव बिलपंतियाओ अच्छाओ पत्तेयं २ पउमवरवेइयापरि०

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वण० वारुणिवरोदगपडिहत्थाओ पासातीताओ ४, आसु मं खुड्डाखुड्डियासु जाव बिलपंतियासु बहवे उप्पायपव्वता जाव खडहडगा सव्वफलिहामया अच्छा तहेव वरुणवरुणप्पभा य एत्थ दो देवा महिड्डीया परिवसंति, से तेणट्ठेणं जाव निच्चे।

जोतिसं सव्वं संखेज्जगेणं जाव तारागणकोडिकोडीओ।

वृ. 'पुक्खरोदण्णं समुद्द'मित्यादि, पुष्करोदं णमिति पूर्ववत् समुद्रं वरुणवरो नाम द्वीपो वृत्तो वलयाकारसंस्थनसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति। अत्रापि पुष्करोदसमुद्रवचक्रवालविष्कम्भपरिक्षेपवेदिकावनखण्डद्वारतदन्तरप्रदेशजीवोपपातवक्तव्यता वक्तव्या।

मू. (२९१) *वरुणवरण्णं दीवं वरुणोदे नामं समुद्दे वट्टे वलया० जाव चिट्ठति, समचक्क० विसमचक्कवि० तहेव सव्वं भाणियव्वं, विक्खंभपरिक्खेवो संखिज्जाइं जोयणसहस्साइं दारंतरं च पउमवर० वनसंडे पएसा जीवा अट्ठो गोयमा! वारुणोदस्स णं समुद्दस्स उदए से जहा नामए चंदप्पभाइ वा मणिसिलागाइ वा वरसीधुवरवारुणीइ वा पत्तासवेइ वा पुप्फासवेइ वा चोयासवेइ वा फलासवेइ वा महुमेरएइ वा जातिप्पसन्नाइ वा खज्जूर सारेइ वा मुद्दियासारेइ वा कापिसायणाइ वा सुपक्कखोयरसेइ वा पभूतसंभारसंचिता पोसमाससतभिसयजोगवत्तिता निरुवहतविसिट्ठदिन्नकालोवयारा सुधोता उक्कोसग (मयपत्ता) अट्ठपिट्ठपुट्ठा (पिट्ठ निट्ठिजा)।*

[मुखइंतवरकिमदिण्णकद्दमा कोपसन्ना अच्छा वरवारुणी अतिरसा जंबूफलपुट्ठवन्ना सुजाता ईसिउट्ठावलंबिणी अहियमधुरपेज्जा ईसासिरत्तणेत्ता कोमलकवोलकरणी जाव आसादिता विसदिता अनिहुयसंलावकरणहरिसपीतिजणणी संतोसततबिवोक्कहावविब्भमविलासवेल्लहलगमणकरणी विरणमधियसत्तजणणी य होति संगामदेसकालेकयरणसमरपसरकरणी कढियाणविज्जुपयतिहिय- याण मउयकरणी य होति उववेसिता समाणा गतिं खलावेति य सयलंमिवि सुभासपुव्वालिया समरभग्गवणोसहयारसुरभिरसदीविया सुगंधा आसायणिज्जा विस्सायणिज्जा पीणणिज्जा दप्पणिज्जा मयणिज्जा सव्विंदियगातपल्हायणिज्जा]।

आसला मांसला पेसला (ईसी ओट्ठावलंबिणी ईसी तंबच्छिकरणी ईसी वोच्छेया कडुआ) वण्णेणं उववेया गंधेणं उववेया रसेणं उववेया फासेणं उववेया, भवे एयारूवे सिया?, गो०! नो इणट्ठे समट्ठे, वारुणस्स णं समुद्दस्स उदए एत्तो इट्ठतरे जाव उदए। से एएणट्ठेणं एवं वुच्चति०

तत्थ णं वारुमिवारुणकंता देवा महिड्डीया० जाव परिवसंति, से एएणट्ठेणं जाव णिच्चे, सव्वं जोइससंखिज्जे केण नायव्वं वारुणवरे णं दीवे कइ चंदा पभासिंसुवा ३॥

वृ. सम्प्रति नामान्वर्थमभिधित्सुराह—'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त! एवमुच्यते वरुणवरो द्वीपो वरुणवरो द्वीपः? इति, भगवानाह—गौतम! वरुणवरस्य द्वीपस्य तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे बहवः 'खुड्डा खुड्डियाओ जाव बिलपंतियाओ यावत्करणात् पुक्खरणीओ गुंजालियाओ दीहियाओ सराओ सरपंतियाओ सरसरपंतियाओ बिलपंतीओ अच्छाओ जाव महुररसणिचतातो' इति यावत्करणात् 'सण्हाओ रयणमयकूलाओ समतीराओ वइरामयपासाणाओ तवमिज्जतलाओ सुवण्णसुज्झरययवालुयाओ वेरुलियमणिफालियपडलपच्चोयडाओ सुहोयाराओ सुहुत्ताराओ नानामणितित्थसुबद्धाओ चाउक्कोणाओ अणुपुव्वसुजायवप्पगंभीरसीयलजलाओ संछन्नपत्तभिसमुणालाओ बहुलुप्पकलुमुयनलिणसुभगसोंधियाओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुंडरीयसयपत्तसहस्सपत्तकेसरफुल्लोवचियाओ छप्पयपरिभुज्जमाणकमलाओ अच्छविमलसलिलपडिपुण्णाओ पडिहत्थगभमन्तमच्छकच्छभअणेगसउणगणमिहुणविचरियसद्दुण्णइयमहुरसरनाइयाओ'' अस्य व्याख्यानं प्राग्वत् ।

'वारुणीवरोदगपडिहत्थाओ' इत्यादि, वारुणिवरे च वरवारुणीव यद् उदकं तेन 'पडिहत्थाओ' प्रतिपूर्णा 'पत्तेयं पत्तेयं पउमवरवेइयापरिक्खित्ताओ पासाईयाओ दरिसणिज्जाओ अभिरूवाओ पडिरूवाओ' इति पाठसिद्धम् । 'तिसोवानतोरणा' इति तासां त्रिसोपानानि तोरणानि च प्रत्येकं वक्तव्यानि, तानि चैवम्--''तासि णं खुड्डखुड्डियाणं वावीणं पुक्खरिणीणं दीहियाणं गुंजालियाणं सरसियाणं सरपंतियाणं सरसरपंतियाणं बिलपंतियाणं पत्तेयं २ चउद्दिसिं चत्तारि तिसोवाणपडिरूवगा पन्नत्ता, तेसि णं तिसोपाणपडिरूवगाणं इमे एयारूवे वण्णावासे पन्नत्ते, तंजहा-- वइरामया नेमा रिट्ठामया पइट्ठाणा वेरुलियामया खंभा सुवण्णरुप्पमया फलगा वइरामया संधी लोहियक्खमइओ सूईओ नानामणिमया अवलंबणा अवलंबणबाहाओ पासाईया दरसणिज्जा अभिरूवा पडिरूवा, तेसि णं तिसोवाणपडिरूवगाणं पुरतो पत्तेयं २ तोरणा पन्नत्ता, ते णं तोरणा नानामणिमया नानामणिमएसु खंभेसु उवनिविट्ठा विविहमुत्तंतरोवचिया विविहता- रारूवोववेया ईहामिगउसभतुरगनरमगरविहगवालगकिन्नररुरुसरभचमरकुंजरवणलयपउम- लयभत्तिचित्ता खंभुग्गयवरवेइयापरिगयाभिरामा विज्जाहरजमलजुयलजंतजुत्ताविव अच्चीसह- स्समालिणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुल्लोयणलेसा सुहफासा सस्सिरीया पासाईया दरिसणिज्जा अभिरूवा पडिरूवा, तेसि णं तोरणाणं उवरिं अट्ठट्ठ मंगलगा पन्नत्ता, तंजहा-- सोत्थियसिरिवच्छनंदियावत्तवद्धमाणगभद्दासणकलसमच्छदप्पणा सव्वरयणामया अच्छा जाव पडिरूवा

तेसि णं तोरणाणं उवरिं बहवे किण्हचामरज्झया नीलचामरज्झया लोहियचामरज्झया हालिद्दचामरज्झया सुक्किलचामरज्झया अच्छा सण्हा रुप्पपट्टा वइरामयदंडा जलयामलगंधिया सुरम्मा पासाईया दरसणिज्जा अभिरूवा पडिरूवा । तेसि णं तोरणाणं उवरिं बहवे छत्ताइच्छत्ता पडागाइपडागा घंटाजुयला उप्पलहत्थया कुमुयहत्थया नलिनहत्थगा सुभगहत्थगा सोगंधियहत्थगा पोंडरियहत्थगा महापोंडरीयहत्थगा सतपत्तहत्थगा सहस्सपत्तहत्थगा सयसहस्सपत्तहत्थगा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरीया सउज्जोया पासाईया दरिसणिज्जा अभिरूवा पडिरूवा ।'' अस्य व्याख्या पूर्ववत् ।

'तासि णं खुड्डाखुड्डियाणं वावीणं पुक्खरिणीणं जाव बिलपंतियामं तत्थ तत्थ देसे तहिं तहिं बहवे उप्पायपव्वगा निययपव्वयगा जगतीपव्वयगा दारुपव्वयगा मंडवगा दगमंडवगा दकमालगा दगपासाया उसडगा खडखडगा अंदोलगा पक्खंदोलगा सव्वरयणामया अच्छा जाव पडिरूवा ।' इति प्राग्वत् । 'तेसु णं पव्वयगेसु जाव पक्खंदोलगेसु बहवे हंसासणाइं उन्नयासणाइं पणयासणाइं दीहासणाइं भद्दासणाइ पक्खासणाइं मगरासणाइं पउमासणाइं सीहासणाइं दिसासोवत्थियासणाइं सव्वफालियामयाइं अच्छाइं जाव पडिरूवाइं ।

वरुणवरस्स णं दीवस्स तत्थ तत्थ देसे तहिं तहिं बहवे आलीघरगा मालीघरगा केयइ० अच्छण० पेच्छण० मज्जण० गत० मोहन० चित्त० मकल० जाल० कुसुमघरगा सव्वफालियामया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अच्छा जाव पडिरूवा । तेसु णं आलीघरएसु जाव कुसुमघरएसु बहवे हंसासणाइं जाव दिसासोवत्थियासणाइं सव्वफालियामयाइं अच्छाइं जाव पडिरूवाइं । वरुणवरे णं दीवे णं तत्थ २ देसे तहिं २ बहवे जातिमंडवगा जूहियामंडवगा मल्लियामंडवगा नवमालियामंडवगा वासंतियमंडवगा दहिवासइमंडवगा सूरुल्लियामंडवगा तंबोलमंडवगा अप्फायामंडवगा अइमुत्तमंडवगा मुद्दियामंडवगा मालुयामंडवगा सामलयामंडवगा सव्वफालियामया अच्छा जाव पडिरूवा,

तेसिणं जाइमंडवेसु जाव सामलयामंडवेसु बहवे पुढविसिलपट्टगा प०अप्पेगइया हंसासण संठिया अप्पे० कोंचासण संठिया जाव अप्पे० दिसासोवत्थियासण संठिया अप्पे० वरसयणविसिट्ठ संढाण संठिया सव्वफालियामया अच्छा जावपडिरुवा तत्थ णं बहवे वाणमंतरा देवा देवीओ य आसयंति सयंति चिट्ठंति निसीयंति तुयट्टंति रमंति ललंति कीडंति पुरापोराणाणं सुचिण्णाणं सुप्परक्कताणं सुभाणं कडाणं कम्माणं कल्लाणाणं फलवित्तिविसेसे पच्चणुब्भवमाणा विहरंति' एतत्सर्वं प्राग्वद् व्याख्येयं, नवरं पुस्तकेष्वन्यथाऽन्यथा पाठ इति यथाऽवस्थितपाठप्रतिपत्त्यर्थं सूत्रमपि लिखितमस्ति, तदेवं यस्माद्वरवारुणीवात्र वाप्यादिषूदकं तस्मादेष द्वीपो वरुणवरः, अन्यच्च वरुण वरुणप्रभौ चात्र वरुणवरे द्वीपे द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतस्तस्माद्वरुणवरो– वरुदेवप्रधानः, तथा चाह–

'से एएणट्ठेण'मित्यादि । चन्द्रादिसङ्ख्याप्रतिपादनार्थमाह–'वरुणवरे णं दीवे कइ चंदा पभासिंसु' इत्यादि पाठसिद्धं सर्वत्र सङ्ख्येयतयाऽभिधानात् ।। 'वरुणवेरण्णं दीव'मित्यादि, वरुणवरमिति पूर्ववत्, वरुणोदः समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति, यथैव पुष्करोदसमुद्रस् वक्तव्यता तथैवास्यापि यावज्जीवोपपातसूत्रद्वयम् ।। सम्प्रति नामनिबन्धमभिधित्सुराह–

'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते वरुणोदः समुद्रो वरुणोदः समुद्रः ? इति, भगवानाह–गौतम ! वरुणोदस्य समुद्रस्योदकं, सा लोकप्रसिद्धा यथा नाम–'चन्द्रप्रभेति वा' चन्द्रस्येव प्रभा–आकारो यस्याः सा चन्द्रप्रभा–सुराविशेषः, इतिशब्द उपमाभूतवस्तुपरिसमाप्तिद्योतकः, वाशब्दः समुच्चये, एवमन्यत्रापि, मणिशलाकेव मणिशलाका वरं च तत्सीधु च २ वरा चासौ वारुणी च वरवारुणी, धातकीपत्ररससार आसवः पत्रासवः, एवं पुष्पासवः फलासवश्च परिभावनीयः, चोयो–गन्धद्रव्यं तत्सारः आसवश्चोयासवः, मधुमेरकौ लोकादवसातव्यौ (मद्य) विशेषौ, जातिपुष्पवासिता प्रसन्ना जातिप्रसन्ना, मूलदलस्वर्जूरसार आसवः खर्जूरसारः, मृद्वीका–द्राक्षा तत्सारनिष्पन्न आसवो मृद्वीकासारः 'कापिशयनं' मद्यविशेषः सुपक्व–सुपरिपाकागतो यः क्षोदरस–इक्षुरसस्तन्निष्पन्न आसवः सुपक्वेक्षुरसः ।

अष्टवारपिष्टप्रदाननिष्पन्ना अष्टपिष्टनिष्ठिता जम्बूफलकालिवरप्रसन्ना सुराविशेषः, उत्कर्षेण मदं प्राप्ता उत्कर्षमदप्राप्ता 'आसला' आस्वादनीया 'मांसला' बहला 'पेसला' मनोज्ञा ईषद् ओष्ठमवलम्बते–ततः परमतिप्रकृष्टास्वादगुणरसोपेतत्वात् झटिति पतः प्रयाति ईषदोष्ठावलम्बिनी, तथा ईषत्ताम्राक्षिकरणी, तथा ईषत्–मनाग् व्यवच्छेदे–पानोत्तरकालं कटुका तीक्ष्णेति भावः एलाद्युपबृंहकद्रवयसमायोगात्, तथा वर्णेनातिशायिना एवं गन्धेन स्पर्शेनोपपेता 'आस्वादनीया' महतामप्यास्वादयितुं योग्या 'विस्वादनीया' विशेषत आस्वादयितुं योग्या अतिपरमास्वादनी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यरसोपेतत्वात्, दीपयति जाठराग्निमिति दीपनीया 'कृद्बहुल'मिति वचनात्कर्त्तर्यनीयप्रत्ययः, एवं मदयतीति मदनीया–मन्मथजननी बृंहतीति बृंहणीया धातूपचयकारित्वात् सर्वेन्द्रियाणि गात्रं च प्रह्लादयतीति सर्वेन्द्रियगात्रप्रह्लादनीया ।

एवमुक्ते गौतम आह–भगवन् ! भवेदेतद्रूपं वरुणोदकसमुद्रस्योदकम् ?, भगवानाह–नायमर्थः समर्थः, वरुणोदस्य णमिति यस्मादर्थे निपातानामनेकार्थत्वात् समुद्रस्वोदकम् 'इतः' पूर्वस्मात्सुरादिविशेषसमूहादिष्टतरमेव कान्ततरमेव प्रियतरमेव मनोज्ञतरमेव मनआपतरमेवावादेन प्रज्ञप्तं, ततो वारुणीवोदकं यस्यासौ वारुणोदः, तथा वारुणिवारुणकान्तौ चात्र वारुणोदे समुद्रे यथाक्रमं पूर्वापरार्द्धाधिपती महर्द्धिकौ देवौ यावत्पल्योपमस्थितिकौ परिवसतः, ततो वारुणेर्वारुणकान्तस्य च सम्बन्धि उदकं यस्यासौ वारुणोदः, पृषोदरादित्वादिष्टरूपनिष्पि ।

तथा चाह–'से एएणट्ठेण'मित्याद्युपसंहारवाक्यं', चन्द्रादिसूत्र प्राग्वत् ।।

मू. (२१२) *वारुणवरण्णं समुद्दं खीरवरे नामं दीवे वट्टे जाव चिट्ठति सव्वं संखेज्जगं विक्खंभे य परिक्खेवो य जाव अट्ठो, बहूओ खुड्डा० वावीओ जाव सरसरपंतियाओ खीरोदगपडि-हत्थाओ पासातीयाओ ४, तासु णं खुड्डियासु जाव बिलपंतियासु बहवे उप्पायपव्वयगा० सव्वरयणा-मया जाव पडिरूवा, पुंडरीगपुक्खरदंता एत्थ दो देवा महिड्डी जाव परिवसंति, से एतेणट्ठेणं जाव निच्चे जोतिसं सव्वं संखेज्जं । खीरवरण्ण दीवं खीरोए नामं समुद्दे वट्टे वलयागारसंठाणसंठिते जाव परिक्खिवित्ता णं चिट्ठति, समचक्कवालसंठिते नो विसमचक्कवालसंठिते, संखेज्जाइं जोयणस० विक्खंभपरिक्खेवो तहेव सव्वं जाव अट्ठो, गो० ! खीरोयस्स णं समुद्दस्स उदगं ।*

से जहानामए–सुउसुहीमारुपण्णअज्जुणतरुणसरसपत्तकोमलअत्थिग्गत्तणग्गपोंडग-वरुच्छुचारिणीणं लवंगपत्तपुप्फपल्लवककोलगसफलरुक्खबहगुच्छगुम्मकलितमलट्ठिमधु-पयुरपिप्पली फलितवल्लिवरविवरचारिणीणं अप्पोदगपीतसइरससमभूमिभागणिभयसुहोसियाणं-सुप्पेसितसुहातरोगपरिवज्जिताण निरुवहतसरीरिणं कालप्पसविणीणं बितियततियसामप्पसूताणं

–अंजनवरगवलवलयजलधरजच्चंजणरिट्ठभमरपभूयसमप्पभाणं कुंदोहणाणं वद्धत्थी-पत्थुताण रूढाणं मधुमासकाले संगहनेहो अज्जचातुरक्केव होज्ज तासिं खीरे मधुररसविवगच्छ-बहुदव्वसंपउत्ते पत्तेयं मंदग्गिसुकढिते आउत्ते खंडगुडमच्छंडितोववेते रण्णो चाउरंतचक्कवट्टिस्स उवट्ठविते आसायणिज्जे विस्सायणिज्जे पीणमिज्जे जाव सव्विंदियगातपल्हातणिज्जे जाव वण्णेणं उवचिते जाव फासेणं, भवे एयारूवे सिया ?, नो इणट्ठे समट्ठे, खीरोदस्स णं से उदए एत्तो इट्ठयराए चेव जाव आसाएणं पन्नत्ते, विमलविमलप्पभा एत्थ दो देवा महिड्डीया जाव परिवसंति

से तेणट्ठेणं संखेज्ज चंदा जाव तारा ।।

वृ. 'वरुणोदण्ण'मित्यादि, वरुणोदं णमिति पूर्ववत् समुद्रं क्षीरवरो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति, एवं यैव वरुणवरद्वीपस्य वक्तव्यता सैवेहापि द्रष्टव्या यावज्जीवोपपातसूत्रम् । सम्प्रति नामान्वर्थमभिधित्सुराह–

'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त एवमुच्यते क्षीरवरो द्वीपः क्षीरवरो द्वीपः ?, प्रभूतजनोक्तिसङ्ग्रहार्थं वीप्सायां द्विर्वचनं, भगवानाह–गौतम ! क्षीरवरे द्वीपे तत्र तत्र देशे तस्य तस्य देशस्य तत्र प्रदेशे बहवो खुड्डाखुड्डियाओ वावीओ इत्यादि वरुणवरद्वीपवत्सर्वं वक्तव्यं

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

यावत् 'वाणमंतरा देवा देवीओ य आसयंति सयंति जाव विहरंति' नवरमत्र वाप्यादयः क्षीरोदपरिपूर्णा वक्तव्याः, पर्वताः पर्वतेष्वासनानि गृहकाणि गृहकेष्वासनानि मण्डपका मण्डपकेषु पृथिवीशिलापट्टकाः सर्वरत्नमया वाच्याः शेषं तथैव, पुण्डरीकपुष्पदन्तौ चात्र क्षीरवरे द्वीपे यथाक्रमं पूर्वार्द्धपरार्द्धाधिपती द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतस्ततौ यस्मात्तत्र वाप्यादिषूदकं क्षीरतल्यं क्षीक्षीरप्रभौ च तदधिपती देवावित स द्वीपः क्षीरवरः, तथा चाह-'से एएणट्ठेण'मित्याद्युपसंहार-वाक्यं, चन्द्रादिसूत्रं प्राग्वत्। 'खीरवरण्ण'मित्यादि, क्षीरवरं णमिति पूर्ववत् द्वीपं क्षीरोदो नाम समद्रो वृत्तो वलयाकारसंस्थनसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति, शेषा वक्तव्यता क्षीरवरद्वीपस्येव वक्तव्या यावज्जीवोपपातसूत्रम्।

सम्प्रति नामनिमित्तमभिधित्सुराह-'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते क्षीरोदः समुद्रः क्षीरोदः समुद्रः ? इति, भगवानाह-गौतम ! क्षीरोदस्य समुद्रस्योदकं यथा राज्ञश्चक्रवर्त्तिनश्चातुरक्यं-चतुःस्थानपरिणामपर्यन्तं गोक्षीरं, चतुःस्थानपरिणामपर्यन्तता च प्रागेव व्याख्याता, 'खण्डगुडमत्स्यण्डिकोपनीतं' खण्डगुडमत्स्यण्डिकाभिरतिशयेन प्रापितरसं प्रयत्नेन मन्दाग्निना कथितम्, अत्यग्निपरिपाते वैरस्यापत्तेः, अत एवाह-वर्णेनोपपेतं गन्धेनोपपेतं रसेनोपपेतं स्पर्शेनोपपेतम्, आस्वादनीयं विस्वादनीयं दीपनीयं दर्प्पणीयं मदनीयं बृंहणीयं सर्वेन्द्रियगात्रप्रह्लाद-नीयमिति पूर्ववत्, एवमुक्ते गौतम आह-'भवे एयारूवे' भवेत्क्षीरसमुद्रस्योदकमेतद्रूपम् ? भगवानाह-गौतम ! नायमर्थ समर्थ, क्षीरोदस् यस्मात्समुद्रस्योदकम् 'इतः' यथोक्तरूपात्क्षी-रादिष्टतरमेव यावन्मनआपतरमेवास्वादेन प्रज्ञप्तं, विमलविमलप्रभौ च यथाक्रमं पूर्वार्धपरा-र्द्धाधिपती द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, ततः क्षीरमि वोदकं यस्य क्षीरवन्निर्मलस्वभावयोः सुरयोः सम्बन्धि उदकं यत्रेति वा क्षीरोदः, तथा चाह-'से एएणट्ठेण'मित्यादि गतार्थम्। सम्प्रति चन्द्रादित्यसङ्ख्याप्रतिपादनार्थमाह-'खीरोए णं भंते ! 'समुद्दे' इत्यादि सुगमम्

मू. (२९३) *खीरोदण्णं समुद्दं घयवरे णामं दीवे वट्टे वलयागारसंठाणसंठिते जाव परिचिट्ठति समचक्कवाल० नो विसम० संखेज्जविक्खंभपरि० पदेसा जाव अट्ठो, गोयमा ! घयवरे णं दीवे तत्थ २ बहवे खुड्डाखुड्डीओ वावीओ जाव घयोदगपडिहत्थाओ उप्पायपव्वगा जाव खडहड० सव्वकंचणमया अच्छा जाव पडिरूवा, कणयकणयप्पभा एत्थ दो देवा महिड्ढीया चंदा संखेज्जा।*

घयवरण्णं दवं च घतोदे नाम समुद्दे वट्टे वलयागारसंठाणसंठिते जाव चिट्ठति, समचक्क० तहेव दारपदेसा जीवा य अट्ठो, गोयमा ! घयोदस्स णं समुद्दस्स उदए से जहा० पप्फुल्लसल्लइ विमुक्कलकण्णियारसरसवसुविबुद्धकोरेंटदामपिंडिततरस्स निद्धगुणतेयदीवियनिरुवह-यविसिट्ठसुंदरतरस्स सुजायदहिमहियतद्दिवसगहियनवणीयपड्डुवणावियमुक्कड्ढियउद्दाव-सज्जवीसंदियस्स अहियं पीवरसुरहिगंधमणहरमहुरपरिणामदरिसमिज्जस्स पत्थनिम्मलसुहोवभोगस्स सरयकालंमि होज्ज गोघतवरस्स मंडए, भवे एतारूवे सिया ?

नो तिणट्ठे समट्ठे, गोयमा ! घतोदस्स णं समुद्दस्स एत्तो इट्ठतर जाव अस्साएणं प० कंतसुकंता एत्थ दो देवा महिड्ढीया जाव परिवसंति सेसं तं चेव जाव तारागणकोडीकोडीओ।

घतोदण्णं समुद्दं खोदवरे नामं दीवे वट्टे वलयागारे जाव चिट्ठति तहेव जाव अट्ठो, खोतवरे णं दीवे तत्थ २ देसे २ तहिं २ खुड्डावावीओ जाव खोदोदगपडिहत्थाओ उप्पातपव्वयता सव्ववेरुलि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यामया जाव पडिरूवा, सुप्पभमहप्पभा य दो देवा महिड्ढीया जाव परिवसंति, से एतेणं० सव्वं जोतिसं तं चेव जाव तारा० ।

खोयवरण्णं दीवं खोदोदे नाम समुद्दे वट्टे वलया० जाव संखेज्जाइं जोयणसतपरिक्खेवेणं जाव अट्ठे, गोयमा ! खोदोदस्स णं समुद्दस्स उदए जहा से० आसलमांसलपसत्थवीसंतनिद्ध-सुकुमालभूमिभागे सुच्छिन्ने सुकट्ठलट्ठविसिट्ठनिरुवहयाजीयवावीतसुकासजपयत्तनिउणपरिकम्म-अणुपालियसुवुड्ढिवुड्ढाणं सुजाताणं लवणतणदोसवज्जियाणं नयायपरिवड्ढियाणं निम्मातसुंदराणं रसेणं परिणयमउपीणपोरभंगुरसुजायमधुररसपुप्फविरिइयाणं उवद्दवविवज्जियाणं सीयपरि-फासियाणं अभिणवतवग्गाणं अपालिताणं तिभायणिच्छोडियवाडिगाणं अवनितमूलाणं गंठिपरिसोहिताणं कुसुलणरकप्पियाणं उव्वणं जाव पोंडियाणं बलवगणरजत्तजंतपरि-गालितमेत्ताणं खोयरसे होज्जा वत्थपरिपूए चाउज्जातगसुवासिते अहियपत्थलहुके वण्णोववेते तहेव, भवे एयारूवे सिया ? नो तिणट्ठे समट्ठे, खोयरसस्स णं समुद्दस्स उदए एत्तो इट्ठतरए चेव जाव आसाएणं प० पुण्णभद्दमाणिभद्दा य (पुण्णपुण्णभद्दा) इत्थ दुवे देवा जाव परिवसंति, सेसं तहेव, जोइसं संखेज्जं चंदा० ॥

वृ. 'खीरोदण्णं समुद्द'मित्यादि, क्षीरोदं णमिति पूर्ववत् समुद्रं घृतवरो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति, अत्रापि चक्रवालविष्कम्भपरिक्षेप-पद्मवरवेदिकावनषण्डद्वारान्तरप्रदेशजीवोपपातवक्तव्यता पूर्ववत् ॥ सम्प्रति नामनिमित्तम-भिधित्सुराह– 'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते–घृतवरो द्वीपो घृतवरो द्वीपः भगवानाह–गौतम ! घृतवरे द्वीपे 'तत्थ तत्त देसे तहिं' इत्यादि, अरुणवरद्वीपवत्सर्वं तावद्वक्तव्यं यावत् 'वानमंतरा देवाय देवीओ य आसयंति सयंति यावद् विहरंति' इति, नवरं वाप्यादयो घृतोदकपरिपूर्णा इति वक्तव्याः, तथा पर्वताः पर्वतेष्वासनानि गृहकाणि गृहकेष्वासनानि मण्डपका मण्डपकेषु पृथ्वीशिलापट्टकाः सर्वात्मना कनकमया इति वक्तव्यं, कनककनकप्रभौ चात्र देवौ यथाक्रमं पूर्वार्द्धापरार्द्धाधिपती महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः ततो घृतोदक- वाप्यादियोगाद् घृतवर्णदेवस्वामिकत्वाच्च घृतवरो दीप इति, तथा चाह– 'से एएणट्ठेण'मित्यादि चन्द्रादित्यादिसङ्ख्यासूत्र प्राग्वत् ।

'घयवरण्णं दीव'मित्यादि, घृतवरं द्वीपं घृतोदो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति, शेषं तथा घृतवरस्य द्वीपस्य यावज्जीवोपपातसूत्रम् ।

इदानीं नाननिमित्तमभिधित्सुराह–'से केणट्ठेण'मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते–घृतोदः समुद्रो घृतोदः समुद्रः ? इति, भगवानाह–गौतम ! घृतोदस्य समुद्रस्योदकं स यथा नाम सकललोकप्रसिद्धः 'शारदिकः' शरत्कालभावी घोघृतवरस्य मण्डः–घृतसङ्घातस्य यदुपरिभागस्थितं घृतं स मण्ड इत्यभिधीयते सार इत्यर्थः, तथा चाह मूलटीकाकारः–''घृतमण्डो घृतसार'' इति, सुकथितो–यथाऽग्निपरितापतापितः, तदानामद्धारकः (उद्दावः)–स्थानान्तरेष्वद्याप्यसङ्क्रमितः सद्योविस्यन्दितः–तत्कालनिष्पादितो विश्रान्तः–उपशान्तकचवरः सल्लकीकर्णिकारपुष्पवर्णाभो वर्णेनोपपेतो गन्देन रसेन स्पर्शेनोपपेत आस्वादनीयो विस्वादनीयो दीपनीयो मदनीयो बृहणीयः सर्वेन्द्रियगात्रप्रह्लादनीयः, एकमुक्ते गौतम आह–'भवे एयारूवे' भवेद् घृतोदस्य समुद्रस्योदकमेत

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

द्रूपं ? भगवानाह–नायमर्थः समर्थः, घृतोदस्य यस्मात्समुद्रस्योदकम् 'इतः' यथोक्तस्वरूपाद् घृतादिष्टतरमेव यावन्मनआपतरमेवास्वादेन प्रज्ञप्तं, कान्तसुकान्तौ च यथाक्रमं पूर्वार्द्धपश्चिमार्द्धाधिपती अत्र घृतोदे समुद्रे महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, ततो घृतमिवोदकं यस्यासौ घृतोदः, तथा चाह– 'से एएणट्ठेण' इत्यादि सुगमं, चन्द्रादिसङ्ख्यासूत्रमपि सुगमम्।

'घतोदण्ण' मित्यादि, घृतोदं णमिति वाक्यालङ्कारे समुद्रं क्षोदवरो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति, चक्रवालविष्कम्भपरिक्षेपद्वारादिवक्तव्यता तथैव यावज्जीवोपपातसूत्रम्। सम्प्रति नामान्वर्थमभिधित्सुराह–

'से केणट्ठेण' मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते क्षोदवरो द्वीपः २ ? इति, भगवानाह–गौतम ! क्षोदवरे द्वीपे तत्र तत्र देशे तस्य तस्य देशस्य तत्र तत्र प्रदेशे 'बहवे खुड्डाखुड्डियाओ वावीओ' इत्यादि पूर्ववत्तावद्वक्तव्यं यावद् 'वानमंतरा देवा देवीओ य आसयंति सयंति जाव विहरंति' नवरं वाप्यादयः क्षोदोदकपरिपूर्णा इति वक्तव्यं, तथा पर्वतकाः पर्वतेष्वासनानि गृहकाणि गृहकेष्वासनानि मण्डपका मण्डपकेषु पृथिवीशिलापट्टकाः सर्वात्मना वैडूर्यमयाः प्रज्ञप्ताः, सुप्रभमहाप्रभौ च यथाक्रमं पूर्वार्धापरार्द्धाधिपती द्वौ देवावत्र क्षोदवर द्वीपे महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, ततः क्षोदोदकवाप्यादियोगात्क्षोदवरः स द्वीपः, एतदेवाह– 'से एएणट्ठेण' मित्यादि, चन्द्रादिसूत्रं प्राग्वत्। 'खोयवरण्णं दीव' मित्यादि, क्षोदवरं णमिति पूर्ववद् द्वीपं क्षोदोदो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति। चक्रवालविष्कम्भादिवक्तवयता पूर्ववद् यावज्जीवोपपातसूत्रम्।

सम्प्रति नामनिमित्तमभिधित्सुराह– 'से केणट्ठेण' मित्यादि, अथ केनार्थेन भदन्त ! एवमुच्यते क्षोदोदः समुद्रः २ ? इति, भगवानाह–क्षोदोदस्य समुद्रस्योदकं यथा नाम इक्षूणां जात्यानां जात्यत्वमेवाह– 'वरपुंडगाणं' विशिष्टानां पुण्ड्रदेशोद्भवानां हरितानां शाड्वलानां 'भेरण्डेक्षूणां वा' भेरण्डदेशोद्भवानां वा इक्षूणां 'कालपोराणं' ति कृष्णपर्वमाम् उपरितनपत्रसमूहापेक्षया हरितालवर्त्यिञ्राणाम् 'अपनीतमूलानाम्' अपनीतमूलत्रिभागानां त्रिभागनिर्वाटितवाटानां ऊध्ध्वंभागादपि त्रिभागहीनानामिति भावः मध्यत्रिभागावशेषाणामिति समुदायार्थ 'गंठिपरिसोहियाणं' ति ग्रन्थि–पर्वग्रन्थि शोधितः–अपनीतो येभ्यस्ते तथा, तेषां मूलत्रिभागे उपरितनत्रिभागे पर्वग्रन्थौ च नातिसमीचीनो रस इति तद्वर्जनं क्षोदरसो भवेद् 'वस्त्रपरिपूतः' श्लक्ष्णवस्त्रपरिपूतः चतुर्जातकेन सुष्ठु–अतिशयेन वासितश्चतुर्जातकवासितः, चतुर्जातकं त्वगेलाकसराख्यगन्धद्रव्यमरिचात्मकं, उक्तञ्च–

॥ १ ॥ "त्वगेलागैकरैस्तुल्यं, त्रिसुगन्धं त्रिजातकम्।
मरिचेन समायुक्तं, चतुर्जातकमुच्यते ॥"

अधिकं–अतिशयेन पथ्यं न रोगहेतुः लघुः–परिणामलघुः वर्णेन–सामर्थ्यादतिशायिना उपपेतः एवं गन्धेन रसेन स्पर्शेनोपपेत आस्वादनीयो दर्प्पणीयो मदनीयो बृंहणीयः सर्वेन्द्रियगात्रप्रह्लादनीयः, एवमुक्ते गौतम आह– 'भवे एयारूवे' भवेद् भगवन् ! क्षोदोदसमुद्रस्योदकमेतद्रूपं ?, भगवानाह–गो० नायमर्थः समर्थः, क्षोदोदस्य यस्मात्समुद्रस्योदकम् 'अस्मात्' यथोक्तरूपात्क्षोदरसादिष्टतरमेव यावन्मनआपतरमेवास्वादेन प्रज्ञप्तम्, इह प्रविरलपुस्तकेऽन्यथाऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाठो दृश्यते सोऽप्येतदनुसारेण व्याख्येयो, बहुषु तु पुस्तकेषु न दृष्ट इति न लिखितः, पूर्णपूर्णप्रभौ च यथाक्रमं पूर्वार्द्धापरार्द्धाधिपती 'अत्र' क्षोदोदे समुद्रे द्वौ देवौ महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, ततः क्षोद इव—क्षोदरस इवोदकं यस्य स क्षोदोदः ।

तथा चाह—'से एएणट्ठेण' मित्यादि । चन्द्रादिसङ्ख्यासूत्रं प्राग्वत् ।।

मू. (२९४) *खोदोदण्णं समुद्दं नंदीसरवरे नामं दीवे वट्टे वलयागारसंठिते तहेव जावपरिक्खेवो पउमवर० वनसंडपरि० दारा दारंतरप्पदेसे जीवा तहेव ।। से केणट्ठेणं भंते !, गोयमा ! देसे २ बहुओ खुड्डा० वावीओ जाव बिलपंतियाओ खोदोदगपडिहत्थाओ उप्पायपव्वगा सव्ववइरामया अच्छा जाव पडिरूवा ।*

अदुत्तरं च णं गोयमा ! नंदिसरदीवचक्कवालविक्खंभबहुमज्झदेसभागे एत्थ मं चउद्दिसिं चत्तारि अंजणपव्वत पन्नत्ता, ते णं अंजनपव्वयगा चतुरसीतिजोयणसहस्साइं उड्ढं उच्चत्तेणं एगमेगं जोयणसहस्सं उव्वेहेणं मूले साइरेगाइं दस जोयणसहस्साइं धरणियले दस जोयणसहस्साइं आयामविक्खंभेणं ततोऽनंतरं च णं माताए २ पदेसपरिहाणीए परिहायमाणा २ उवरिं एगमेगं जोयणसहस्सं आयामविक्खंभेणं मूले एक्कतीसं जोयणसहस्साइं छच्च तेवीसे जोयणसते किंचिविसेसाहिया परिक्खेवेणं धरणियले एक्कतीसं जोयणसहस्साइं छच्च तेवीसे जोयणसते देसूणे परिक्खेवेणं सिहरतले तिन्नि जोयणसहस्साइं एकं च बावट्ठं जोयणसतं किंचिविसेसाहियं परिक्खेवेणं प० मूले विच्छिण्णा मज्झे संखित्ता उप्पिं तणुया गोपुच्छसंठाणसंठिता सव्वंजणामया अच्छा जाव पत्तेयं २ पउमवरवेदियापरि० पत्तेयं २ वनसंडपरिखित्ता वण्णओ ।

तेसि णं अंजणपव्वयामं उवरि पत्तेयं २ बहुसमरमणिज्जो भूमिभागो पन्नत्तो, से जहानामए—आलिंगपुक्खरेति वा जाव सयंति ।। तेसि णं बहुसमरमणिज्जाणं भूमिभागाणं बहुमज्झदेसभाए पत्तेयं २ सिद्धायतणा एकमेकं जोयणसतं आयामेणं पन्नासं जोयणाइं विक्खंभेणं बावत्तरिं जोयणाइं उड्ढं उच्चत्तेणं अनेगखंभसतसंनिविट्ठा वण्णओ ।

तेसि णं सिद्धायतणाणं पत्तेयं २ चउद्दिसिं चत्तारि दारा पन्नत्ता—देवद्दारे असुरद्दारे नागद्दारे सुवण्णद्दारे, तत्थ णं चत्तारि देवा महिड्ढीया जाव पलिओपमट्ठितीया परिवसंति, तंजहा—देवे असुरे नागे सुवण्णे, ते णं दारा सोलस जोयणाइं उड्ढं उच्चत्तेणं अट्ठ जोयणाइं विक्खंभेणं तावतियं चेव पवेसेणं सेता वरकणग० वन्नओ जाव वणमाला । तेसि णं दाराणं चउद्दिसिं चत्तारि मुहमंडवा पन्नत्ता, ते णं मुहमंडवा एगमेगं जोयणसतं आयामेणं पंचास जोयणाइं विक्खंभेणं साइरेगाणं सोलस जोयणाइं उड्ढं उच्चत्तेणं वण्णओ ।

तेसि णं मुहमंडवाणं चउद्दि(तिदि)सिं चत्तारि (तिन्नि) दारा पन्नत्ता, ते णं दारा सोलस जोयणाइं उड्ढं उच्चत्तेणं अट्ठ जोयणाइं विक्खंभेणं तावतियं चेव पवेसेणं सेसं तं चेव जाव वणमालाओ । एवं पेच्छाधरमंडवावि, तं चेव पमाणं जं मुहमंडवाणं, दारावि तहेव, नवरि बहुमज्झदेसे पेच्छाघरमंडवाणं अक्खाडगा मणिपेढियाओ अद्धजोयणप्पमाणाओ सीहासणा अपरिवारा जाव दामा थूभाइं चउद्दिसिं तहेव णवरि सोलसजोयणप्पमाणा सातिरेगाइं सोलस जोयणाइं उच्चा सेसं तहेव जाव जिनपडिमा । चेइयरुक्खा तहेव चउद्दिसिं तं चेव पमाणं जहा विजयाए रायहाणीए नवरि मणिपेढियाए सोलसजोयणप्पमाणाओ, तेस णं चेइयरुक्खाणं चउद्दिसिं चत्तारि मणिपेढियाओ अट्ठजोयण- विक्खंभाओ चउजोयणबाहल्लाओ महिंदज्झया चउसट्ठिजोयणुच्चा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोयणोव्वेधा जोयणविक्खंभा सेसं तं चेव ।

एवं चउद्दिसिं चत्तारि नंदापुक्खरिणीओ, नवरि खोयरसपडिपुण्णाओ जोयणसतं आयामेणं पन्नासं जोयणाइं विक्खंभेणं पन्नासं जोयणाइं उव्वेधेणं सेसं तं चेव, मणुगुलियाणं गोमाणसीण य अडयालीसं २ सहस्साइं पुरच्छिमेणवि सोलस पच्चत्थिमेणवि सोलस दाहिणेणवि अट्ठ उत्तरेणवि अट्ठ साहस्सीओ तहेव सेसं उल्लोया भूमिभागा जाव बहुमज्झदेसभागे, मणिपेढिया सोलस जोयणा आयामविक्खंभेणं अट्ठ जोयणाइं बाहल्लेणं तारिसं मणिपीढियाणं उप्पिं देवच्छंदगा सोलस जोयणाइं आयामविक्खंभेणं सातिरेगाइं सोलस जोयणाइं उड्ढं उच्चत्तेणं सव्वरयण० अट्ठसयं जिनपडिमाणं सव्वो सो चेव गमो जहेव वेमाणियसिद्धायतनस्स ।

तत्थ णं जे से पुरच्छिमिल्ले अंजणपव्वते तस्स णं चउद्दिसिं चत्तारि नंदाओ पुक्खरिणीओ पन्नत्ताओ, तंजहा–नंदुत्तरा य नंदा आनंदा नंदिवद्धणा । (नंदिसेणा अमोघाय गोथूभा य सुदंसणा) ताओ णंदापुक्खरिणीओ एगमेगं जोयणसतसहस्सं आयामविक्खंभेणं दस जोयणाइं उव्वेहेणं अच्छाओ सण्हाओ पत्तेयं पत्तेयं पउमवरवेदिया० पत्तेयं पत्तेयं वनसंडपरिक्खित्ता तत्थ तत्थ जाव सोवाणपडिरूवगा तोरणा ।

तासि णं पुक्खरिणीणं बहुमज्झदेसभाए पत्तेयं पत्तेयं दहिमुहपव्वया चउसट्ठि जोयणसहस्साइं उड्ढं उच्चत्तेणं एगं जोयणसहस्सं उव्वेहेणं सव्वत्थसमा पल्लगसंठाणसंठिता दस जोयणसहस्साइं विक्खंभेणं एक्कतीसं जोयणसहस्साइं छच्च तेवीसे जोयणसए परिक्खेवेणं पन्नत्ता सव्वरयणामया अच्छा जाव पडिरूवा, तहा पत्तेयं पत्तेयं पउमवरवेइया० वनसंडवण्णओ बहुसम० जाव आसयंति सयंति । सिद्धायतनं तं चेव पमाणं अंजनपव्वएसु सच्चेव वत्तव्वया निरवसेसं भाणियव्वं जाव उप्पिं अट्ठट्ठमंगलगा ।

तत्थ णं जे से दक्खिणिल्ले अंजनपव्वते तस्स णं चउद्दिसिं चत्तारि नंदाओ पुक्खरिणीओ पन्नत्ताओ, तंजहा–भद्दा य विसाला य कुमुया पुंडरिगिणी, (नंदुत्तरा य नंदा आनंदा नंदिवट्ठणा) तं चेव पमामं तं चेव दहिमुहा पव्वया तं चेव पमाणं जाव सिद्धायतना ।

तत्थ णं जे से पच्चत्थिमिल्ले अंजनगपव्वए तस्स णं चउदिसिं चत्तारि नंदा पुक्खरिणीओ पन्नत्ताओ, तंजहा–नंदिसेणा अमोहा य, गोत्थूभा य सुदंसणा, (भद्दा विसाला कुमुदा पुंडरिकिणी) तं चेव सव्वं भाणियव्वं जाव सिद्धायतना ।

तत्थ णं जे से उत्तरिल्ले अंजनपव्वते तस्स णं चउद्दिसिं चत्तारि नंदापुक्खरिणीओ, तंजहा–विजया वेजयंती जयंती अपराजिया, सेसं तहेव जाव सिद्धायतणा सव्वा ते चिय वण्णणा नातव्वा ।

तत्थ णं बहवे भवणवइवाणमंतरोतिसियवेमाणिया देवा चाउमासियापडिवएसु संवच्छरिएसु वा अन्नेसु बहूसु जिणजम्मणणिक्खमणणाणुप्पत्तिपरिणिव्वाणमादिएसु य देवकज्जेसु य देवसमुदएसु य देवसमितीसु य देवसमवाएसु य देवपओयणेसु य एगंतओ सहिता समुवागता समाणा पमुदितपक्कलिया अट्ठाहितारूवाओ महामहिमाओ करेमाणा पालेमाणा सुहंसुहेणं विहरंति

कइलासहरिवाहणा य तत्थ दुवे देवा महिड्ढीया जाव पलिओवमट्ठितीया परिवसंति, से एतेणट्ठेणं गोयमा ! जाव निच्चा जोतिसं संखेज्जं ॥

वृ. 'खोदोदण्णं समुद्द'मित्यादि, क्षोदोदं णमिति पूर्ववत् समुद्रं नन्दीश्वरवरो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य तिष्ठति । चक्रवालविष्कम्भ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिक्षेपादिवक्तव्यता प्राग्वद् यावज्जीवोपपातसूत्रम् ।। सम्प्रति नामनिमित्तमभिधित्सुराह–'से केणट्टेण'मित्यादि, अथ केनार्थेन–केन कारणेन भदन्त ! एवमुच्यते–नन्दीश्वरवरो द्वीपो नन्दीश्वरवरो द्वीपः ? इति, भगवानाह–गौतम ! नन्दीश्वरवरे द्वीपे बहवः 'खुड्डाखुड्डियाओ वावीओ' इत्यादि प्रागुक्तं सर्वं तावद्वक्तव्यं यावत् 'वाणमन्तरा देवा देवीओ य आसयंति सयंति जाव विहरंति' नवरमत्र वाप्यादयः क्षोदोदकप्रतिपूर्णा वक्तव्याः, पर्वतकाः पर्वतकेष्वासनानि गृहाणिगृहकेष्वासनानि मंडपका मंडपकेषु शिलापट्टकाः सर्वात्मना वज्रमयाः, शेषं तथैव ।

'अदुत्तरं च णं गोयमा !' इत्यादि, अथान्यद् गौतम ! नन्दीश्वरवरे चत्वारो दिशः समाहृताश्चतुर्दिक् तस्मिन् चक्रवालविष्कम्भेन मध्यदेशभागे एकैकस्यां दिशि एकैकभावेन चत्वारोऽञ्जनपर्वताः प्रज्ञप्ताः, तद्यथा–र्वेण–पूर्वस्यां दिशि, एवं पश्चिमायां दक्षिणस्यामुत्तरस्याम् ।

'ते ण'मित्यादि, ते अञ्जनपर्वताश्चतुरशीतिर्योजनसहस्राण्यूर्द्धमुच्चैस्त्वेन एकं योजनसहस्रमुद्वेधेन मूले सातिरेकाणि दश योजनसहस्राणि विष्कम्भेन धरणितले दश योजनसहस्राण्यायामविष्कम्भेन तदनन्तरं च मात्रया परिहीयमानाः परिहीयमाना उपर्येकैकं योजनसहस्रमायामविष्कम्भेन मूले एकत्रिंशद् योजनसहस्राणि षट्त्रयोविंशानि योजनशतानि किञ्चिद्विशेषाधिकानि परिक्षेपेण धरणितले एकत्रिंशद् योजनसहस्रणि षट्त्रयोविंशानि योजनशतानि देशोनानि परिक्षेपेण उपरि त्रीणि योजनसहस्राणि एकं च द्वाषष्टं योजनशतं किञ्चिद्विशेषाधिकं परिक्षेपेण, तोत मूले विस्तीर्णा मध्ये संक्षिप्ता उपरि तनुकाः अत एव गोपुच्छसंस्थानसंस्थिताः सर्वात्मना 'अञ्जनमयाः' अञ्जनरत्नात्मकाः 'अच्छा जाव पडिरूवा' इति प्राग्वत् प्रत्येकं २ पद्मवरवेदिकया परिक्षिप्ताः प्रत्येकं २ वनषण्डपरिक्षिप्ताः पद्मवरवेदिकावनषण्डवर्णनं प्राग्वत् ।

'तेसि ण'मित्यादि, तेषामञ्जनपर्वतानां प्रत्येकं प्रत्येकमुपरि बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, तस्य 'से जहानामए आलिंगपुक्खरेइ वा' इत्यादिवर्णनं जम्बूद्वीपजगत्या उपरितनभागस्येव तावद्वक्तव्यं यावत् 'तत्थ णं बहवे वानमंतरा देवा देवीओ य आसयंति सयंति जाव विहरंति' ।

'तेसि ण'मित्यादि, तेषां बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं सिद्धायतनं प्रज्ञप्तं, तानि च सिद्धायतनानि प्रत्येकं प्रत्येकमेकं योजनशतमायामेन पञ्चाशद्योजनानि विष्कम्भेन द्विसप्ततिर्योजनानि ऊर्द्धमुच्चैस्त्वेन, अनेकस्तम्भशतसन्निविष्टानीत्यादि तद्वर्णनं विजयदेवसुधर्मसभावद्वक्तव्यम् ।।

'तेसि ण'मित्यादि, तेषां सिद्धायतनानां प्रत्येकं 'चतुर्दिशि' चतसृषु दिक्षु, एकैकस्यां दिशि एकैकभावेन, चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा–पूर्वेण–पूर्वस्याम्, एवं दक्षिणस्यां पश्चिमायामुत्तरस्यां, तत्र पूर्वस्यां दिशि द्वारं देवद्वारं, देवनामकस्य तदधिपतेस्तत्र भावात्, एवं दक्षिणस्यामसुरद्वारं पश्चिमायां नागद्वारमुत्तरस्यां सुवर्णद्वारम् ।

'तत्थे'त्यादि, तत्र तेषु चतुर्षु द्वारेषु यथाक्रमं चत्वारो देवा महर्द्धिका यावत्पल्योपमस्थितयः परिवसन्ति, तद्यथा–देव इत्यादि पूर्ववत्, पूर्वद्वारे देवनामा दक्षिणद्वारेऽसुरनामा पश्चिमद्वारे नागनामा उत्तरद्वारे सुवर्णनामा ।। 'ते णं दारा' इत्यादि, तानि द्वाराणि षोडश योजनानि प्रत्येकमूर्द्धमुच्चैस्त्वेनाष्टौ योजनानि विष्कम्भतः, 'तावइयं चेव'त्ति तावदेव–अष्टावेव योजनानीति भावः प्रवेशेन 'सेया वरकणगथूभियागा ईहामियउसभतुरगणरमगरविहगवालगकिन्नररुरुसरभचमर-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

कुंजरवणलयपउलयभत्तिचित्ता खंभुग्गयवरवेइयापरिगयाभिरामा विज्जाहरजमलजुलगजन्तजुत्ता इव अच्चीसहस्समालिणीया रूवगसहस्सकलिया भिसमाणा भिब्भिसमाणा चक्खुलोयणलेसा सुहफासा सस्सिरीयरूवा, वन्नओ तेसिं दाराणं इमो होइ, तंजहा–

वइरामया नेमा रिट्ठामया पइट्ठाणा वेरुलियरुइलखंभा जायरूवोवचियपवरपंचवन्नमणिरयणकुट्टिमतला हंसगब्भमया एलुगा गोमेज्जमया इंदकीला जोईरसमया उत्तरंगा लोहियक्खमईओ दारचेडाओ (पिंडीओ) वेरुलियामया कवाडा लोहियक्खमईओ सुईओ वइरामया संधी नानामणिमया समुग्गया वइरामईओ अग्गलाओ अग्गलापासाय रययामईओ आवत्तणपेढियाओ अंकोत्तरपासा निरंतरघणकवाडा भित्तीसु चेव भित्तिगुलिया छप्पन्ना तिन्नि होंति गोमाणसीओवि तत्तिया नानामणिरयणजालपिंजरमणिवंसगलोहियक्खपडिवंसगरययभोम्मा अंकामया पक्खा पक्खबाहाओ जोईरसमया वंसकवेल्लुगा य रययामईओ पट्टियाओ जायरूवमईओ ओहाडणीओ वइरामईओ उवरि पुंछणीओ सव्वसेयरययामए अच्छायमे अंकमयकणगकूडतवणिज्जतूभियागा सेया संखदलविमलनिम्मलदहिघणगोखीरफेणरययनिगरप्पगासद्धचंदचित्ता नानामणिमयदामालंकिया अंतो बहिं च सण्हतवणिज्जरुइलवालुयापत्थडा सुहफासा सस्सिरीयरूवा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा' एतच्च यद्यपि विजयद्वारवर्णनायामपि व्याख्यातं तथाऽपि स्थानाशून्यार्थं किञ्चिद्व्याख्यायते–

श्वेतानि अङ्करत्नबाहुल्याद्वरकनकस्तूपिकानि ईहामृगऋषभतुरगनरमकरविहगव्यालककिन्नररुरुसरभचमरकुंजरवनलतापद्मलताभक्तिचित्राणि प्रतीतं, तथा स्तम्भोद्गताभि–स्तम्भोपरिवर्त्तिनीभिर्वज्ररत्नमयीभिर्वेदिकाभि परिगतानि सन्ति यानि अभिरमणीयानि तानि स्तम्भोद्गतवरज्रवेदिकाभि परिगताभिरामाणि, विद्याधरयोर्यद् यमलं–समश्रेणीकं युगलं तेषां यन्त्राणि–प्रपञ्चास्तैर्युक्तानीव, अर्चिषां सहस्रैर्मालनीयानि अर्चिसहस्रैमालनीयानि–परिवाणीयानि, किमुक्तं भवति ?– एवं नाम प्रभासमुदयोपेतानि येनैवं संभावनोपजायते यथा नूनमेतानि न स्वाभाविकप्रभा- समुदयोपेतानि किन्तु विशिष्टविद्याशक्तिमत्पुरुषविशेषप्रपञ्चयुक्तानीति रूपकसहस्रकलितानि 'भिसमाणा' इति दीप्यमानानि 'भिब्भिसमाणा' इति अतिशयेन दीप्यमानानि 'चक्खुलोयणलेसा' इति चक्षु कर्तृ लोकने–अवलोकने लिशतीव–दर्शनीयत्वातिशयतः श्लिष्यतीव यत्र तानि चक्षुर्लोक- नलेशानि शुभस्पर्शानि सश्रीकाणि रूपकाणि यत्र तानि सश्रीकरूपाणि वर्णो–वरणकनिवेशस्तेषां द्वाराणामयं भवति, तद्यथा–वज्रमया नेमा–भूमिभागादूर्द्ध निषक्रमन्तः प्रदेशा रिष्ठमयानि प्रतिष्ठानानि–मूलपादाः 'वैडूर्यरुचिरस्तम्भानि' जातरूपोपचितप्रवरपञ्चवर्णमणिरत्नकुट्टिमतलानि हंसगर्भणयआः 'एलुकाः' देहल्यः गोमेयकरत्नमया इन्द्रकीला ज्योतीरसमयानि उत्तराङ्गानि लोहिताक्षमयाः 'द्वारपिण्डयः' द्वारशाखा वैडूर्यमयौ कपाटौ लोहिताक्षमय्यः सूचयः–फलकद्वय- सन्धिविघटनाभावहेतुपादुकास्तानीया वज्रमयाः 'सन्धयः' सन्धिमेलाः फलकानां नानामणिमयाः 'समुद्गकाः' चूति (सूची) गृहाणि वज्रमया अर्गलाः (अर्गलाप्रासादाः–) प्रासादे यत्रार्गलाः प्रविशन्ति रजतमय्य आवर्त्तनपीठिकाः, आवर्त्तनपीठिका यत्रेन्द्रकीलको निवेशितः, 'अंकोत्तरपासा' इति अङ्का–अङ्करत्नमया उत्तरपार्श्वा येषां तानि तथा, निरन्तरकौ–लघुच्छिद्रैरपि रहितौ घनौ कपाटौ येषां तानि निरन्तरघनकपाटानि, 'भित्तीसु चेवे' त्यादि, तेषां द्वाराणामुभयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पार्श्वयो- र्भित्तिषु—भित्तिसमीपे भित्तिगता—भित्तिसंबद्धा गुलिकाः—पीठिका भित्तिगुलिकास्तिस्र पटपञ्चा- शद्भवन्ति षट्पञ्चाशत्रिकप्रमाणा भवन्ति ।

'गोमाणसिया तत्तिया' इति 'तावत्य एव' षट्पञ्चाशस्त्रकप्रमाणा एव 'गोमानस्यः' शय्याः, तथा 'नानामणिरत्नानि' नानामणिरत्नमयानि व्यालकरूपाणि लीलास्थितशालभञ्जिकाश्च येषां तानि तथा, रजतमयाः कूटाः, कूटो—माडभागः, वज्रमयाः 'उत्सेधाः' शिखराणि तपनीयमयाः 'उल्लोकाः' उपरितनभागाः, मणयो—मणिमया वंशा येषां तानि मणिवंशकानि, लोहिताक्षाः—लोहिताक्षमयाः प्रतिवंशा येषां तानि लोहिताक्षप्रतिवंशकानि, रजता—रजतमयी भूमिर्येषां तानि रजतभूमानि, प्राकृतत्वात्समासान्तो मकारस्य च द्वित्वं, मणिवंशकानि लोहिताक्षप्रतिवंशकानि रजतभूमानि नानामणिरत्नमयानि जालपञ्जराणि गवाक्षापरपर्यायाणि येषुं द्वारेषु तानि तथा, पदानामन्यथोपनिपातः प्राकृतत्वात्, अङ्कमयाः पक्षाः पक्षबाहवश्च, पक्षाः (प्रतीताः) पक्षबाहवोऽपि तदेकदेशभूताः, ज्योतीरसामया वंशा महान्तः पूज्यवंशाः ।

'वंसकेल्लुया य' महतां पृष्ठवंशानामुभयतस्तिर्यकस्थाप्यमाना वंशाः वंशकवेल्लुकानि प्रतीतानि रजतमयपट्टिकाः कवेल्लुकानामुपरिकम्बास्थानीयाः जातरूपमय्योऽवधाटिन्यः आच्छादनहेतुकम्बोपरिस्थाप्यमानमहाप्रमाणकिलिञ्चस्थानीया वज्रमय्योऽवघाटिनीना- मुपरिपुञ्छन्यो—निबिडतराच्छादनहेतुश्लक्ष्णतरतृणविशेषस्थानीयाः सर्वश्वेतं रजतमयं पुञ्छनी- नामपरि कवेल्लुकानामध आच्छादनम्, 'अंकामयकणगकूडतवणिज्रथूभियागा' इति अङ्कमयानि— बाहुल्येनाङ्करत्नमयानि पक्षपक्षबाह्वादीनामङ्करत्नात्मकत्वात् कनकं—कनकमयं कूटं—शिखरं येषां तानि कनककूटानि, तपनीयाः—तपनीयमय्यः स्तूपिका—लघुशिखररूपा येषां तानि तथा, ततः पदत्रयस्य पदद्वय २ मीलनेन कर्मधारयः, एतेन यत् प्राक् सामान्यत उत्क्षिप्तं 'सेया वरकण- गथूभियागा' इति तदेव प्रपञ्चतो भावितं, सम्प्रति तदेव श्वेतत्वं भूय उपसंहारव्याजेन दर्शयति—'सेया' श्वेतत्वमेवोपमया द्रढयति— 'सङ्खदलविमलनिम्मलदहिघणगोखीरफेणरय- यनिगरप्पसद्धचंदचित्ता' विमलं यत् शङ्खदलं—शङ्खशकलं कचित् शङ्खतलेति पाठस्तत्र शङ्खवतलं— शङ्खस्योपरितनो भागो तश्च निर्मलो दधिघनो—घनीभूतं दधि यश्च गोक्षीरकेनो यश्च रजतनिकर- स्तद्वत्प्रकाशः—प्रतिमता येषां तानि तथाऽर्द्धचन्द्रैश्चित्राणि—नानारूपाणि आश्चर्यभूतानि वा अर्द्धचन्द्रचित्राणि, ततः पूर्वपदेन विशेषणसमासः, नानामणिमयीभिर्दामभिरलङ्कृतानि नानामणि- मयदामालङ्कृतानि अन्तर्बहिश्च श्लक्ष्णतपनीयरुचिरवालुकानां प्रस्तटः—प्रस्तारो येषु तानि तथा, शुभस्पर्शानि सश्रीकरूपाणि प्रासादीयांनि यावत् प्रतिरूपाणि व्यक्तम्

'तेसि णं दाराण'मित्यादि, तेषां द्वाराणामुभयोः पार्श्वयोरेकैकनैषेधिकीभावेन 'दुहतो' इति द्विघातो—द्विप्रारायां नैषेधिक्यां नैषेधिकी—निषीदनस्थानं द्वारकुड्यसमीपे नितम्ब इत्यर्थः षोडश षोडश वन्दनकलशाः प्रज्ञप्ताः, वर्णकस्तेषां वाच्यः, स चैवम्— 'ते णं वंदनकलसा वरकमल- पइट्ठाणा सुरभिवरवारिपडिपुण्णा चंदनकयचच्चागा आविद्धकंठेगुणा पउमुप्पलपिहाणा सव्वरयणा- मया अच्छा जाव पडिरूवा महया महया इंदकुंभसमाणा पन्नत्ता समणाउसो !" व्यक्तं नवरं "महया महया" इति अतिशयेन महान्तः 'इन्द्रकुम्भसमानाः' महाकुम्भप्रमाणकुम्भसदृशाः ।

'एवं नेयव्वं जाव सोलस वनमालाओ पन्नत्ताओ' 'एवम्' अनेन प्रकारेण तावन्नेतव्यं

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

यावत्षोडश वनमालाः प्रज्ञप्ताः, तच्चैवम्–'तेसि णं दाराणं उभओ पासिं दुहतो निसीहियाए सोलस सोलस नागदंतया पन्नत्ता, ते णं नागदंतगा मुत्ताजालंतरूसिया हेमजालगवक्खजाल-खिंखिणीजालपरिक्खित्ता अब्भुग्गया निसढा तिरियं सुसंपग्गहिया अहे पन्नगद्धरूवा पन्नगसंठाण-संठिया सव्ववइरामया अच्छा जाव पडिरूवा महया महया गयदंतसमाणा पन्नत्ता समणाउसो !, तेसु णं नागदंतकेसु बहवे किण्हसुत्तवट्टवग्घारियमल्लदामकलावा नीलसुत्तवट्टवग्घारिय-मल्लदामकलावा०, ते णं दामा तवणिज्जलंबूसगा सुवण्णपयरगमंडिया अन्नमन्नमसंपत्ता पुव्वावरदाहिणुत्तरागएहिं वाएहिं मंदायं २ एइज्जमाणा २ पलंबमाणा २ पझंझमाणा २ ओरालेणं मणुन्नेणं मनहरेणं कण्णमणनिव्वुइकरेणं सद्देणं ते पएसे सव्वतो समंता आपूरेमाणा सिरीए अईव उवसेभोमाणा चिट्ठंति । तेसि णं नागदंताणं उवरिं अन्ने सोलस सोलस नागदंतया मुत्ताजालंतरोसिया हेमजाल जाव महया महया गयदंतसमाणा पन्नत्ता समणाउसो !, तेसु णं नागदंतएसु बहवे रययामया सिक्कगा पन्नत्ता, तेसु णं रययामएसु सिक्कगेसु बहवे वेरुलियमयाओ धूवघडियाओ पन्नत्ताओ, ताओ णं धूवघडियाओ कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघम-घंतगंधुद्धुयाभिरामातो सुगंधवरगंधियाओ गंधवट्टिभूयाओ ओरालेणं मणुन्नेणं घाणमणनिव्वुइकरेणं गंधेणं ते पएसे आपुरेमाणीओ आपूरेमाणीओ चिट्ठंति ।

तेसि णं दाराणं उभओ पासि दुहतो निसीहियाए सोलस २ सालभंजियाओ प० ताओ णं सालभंजियाओ लीलट्ठियाओ सुयलंकियाओ नानाविहरागवसणाओ रत्तावंगाओ असियकेसिओ भिउविसयसत्थलक्खणं संवेल्लियग्गासिरयाओ नानामल्लपिणद्धाओ मुट्ठिगेज्झसुमज्झाओ आमेलजमलजुगलवट्टिय-अब्भुन्नयपीणरइयसंठियपओहराओ ईसिं असोगवरपायवसमुट्ठियाओ वामहत्थगहियग्गसालाओ ईसिं अद्धच्छिकडक्खचिट्ठिएहिं लूसेमाणईओ विव चक्खुलोयणलेसाओ अन्नमन्नं खिज्जमाणीओ इव पुढविपरिमाणाओ सासयभावमुवगयाओ चंदाणणातो चंदविलासिणीतो चंदद्धसमनिडालाओ चंदाहियसोमदंसणाओ उक्काइव उज्जोवेमाणीओ विज्जुघणमरीइसूरदिप्पंततेयअहिगतरसन्निकासाओ सिंगारागारचारुवेसाओ पासाईयाओ-४

तेसि णं दाराणं उभओ पासि दुहओ निसीहिआए सोलस २ जालकडगा पन्नत्ता सव्वरयणा-मया अच्छा जाव पडिरूवा, तेसि णं दाराणं उभओ पासि दुहतो निसीहियाए सोलस सोलस घंटाओ प० । तासि णं घंटाणं इमे एयारूवे वण्णावासे प०–जंबूणयामईओ घंटाओ वइरामईओ लालाओ नानामणिमया घंटापासाओ तवणिज्जमयाओ संकलाओ रययामया रज्जूओ

ताओ णं घंटाओ ओहस्सराओ मेहस्सराओ हंसस्सराओ कोंचस्सराओ सीहस्सराओ दुंदुभिस्सराओ नंदिसराओ नंदिघोसाओ मंजुस्सराओ मंजुघोसाओ सुस्सराओ सुस्सरनिग्घोसाओ ओरालेणं मणुन्नेणं कण्णमणनिव्वुइकरेणं सरेणं ते पएसे सव्वतो समंता आपूरेमाणीओ सिरीए अतीव उवसोहेमाणीओ उवसोभेमाणीतो चिट्ठंति ।

तेसि णं दाराणं उभओ पासि दुहतो निसीहियाए सोलस सोलस वनमालाओ पन्नत्ताओ, ताओ णं वनमालाओ नानादुमलयकिसलयपल्लवसमाउलाओ छप्पयपरिभुज्जमाणसोमंत-सस्सिरीयातो सव्वरयणामईओ पासाईयाओ जाव पडिरूवाओ' इति, पाठसिद्धमेतत् नवरं नागदन्तसूत्र नागदन्ता–अङ्कुटकाः, 'मुत्ताजालंतरूसिए' इत्यादि, मुक्ताजालानामन्तरेषु यानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्छ्रितानि—लम्बमानानि हेमजालानि—हेममयदामसमूहा यानि गवाक्षजालानि—गवाक्षाकृति-रत्नविशेषदामसमूहाः यानि च किङ्किणीघण्टाजालान—क्षुद्रघण्टासमूहास्तैः परिक्षिप्ताः—सर्वतो व्याप्ताः, 'अब्भुग्गया' इति अभिमुखमुद्गता अभ्युद्गताः अग्रिमभागे मनाग् उन्नता इति भावः 'अभिनिसिट्ठा' इति अभिमुखं—बहिर्भागाभिमुखं निसृष्टा अभिनिसृष्टाः 'तिरियं सुसंपरिग्गहिया' इति तिर्यग् भित्तिप्रदेशैः शउष्ठु—अतिशयेन सम्यग्—मनागप्यचलनन परिगृहीताः।

'अहेपन्नगद्धरूवा' अधः—अधस्तनं यत् पन्नगस्यार्द्धंतस्येव रूपं—आकारो येषां ते तथा, अधःपन्नगार्द्धवदतिसरला दीर्घाश्चेति भावः, एतदेव वाव्याचष्टे—पन्नगार्द्धसंस्थानसंस्थिताः, 'किण्ह-सुत्तवट्टवग्घारियमल्लदामकलावा' इति, कृष्णसूत्रबद्धा वग्घारिया—अवलंबिता माल्यदाम-कलापाः—पुष्पमालासमूहाः, एवं नीललोहितहारिद्रशुक्लसूत्रबद्धा अपि वाच्याः, 'तवणिज्जलंबूसगा' इति दाम्नामग्रिमभागे गोलकाकृतिमण्डनविशेषो लम्बूसगः 'सुवण्णपयरगमंडिया' इति सुवर्णप्रतरेण—सुवर्णपत्रकेण मण्डितानि सुवर्णप्रतरकमण्डितानि, सालभञ्जिकासूत्रे 'आमेलग-जमलजुगलवट्टियअब्भुन्नयपीणरइयसंठियपओहराओ' इति पीनं—पीवरं रचितं तथाजगत्स्थिति-स्वाभाव्याद् रतिदं वा संस्थितं—संस्थानं यकाभ्यां तौ पीनरचितसंस्थितौ पीनरतिदसंस्थितौ वा आमेलक—आपीडः शेखरक इत्यर्थः तस्य यमलं—समश्रेणीकं यद् युगलं—द्वन्द्वं तद्वद् वर्त्तितौ—बद्धस्वभावावुपचितकठिनभावाविति भावः अभ्युन्नतौ पीनरचितसंस्थितौ च पयोधरौ यासां ताः तथा। 'लूसेमाणीओ इवे'ति मुष्यन्त्य इव सुरजनानां मनांसीति गम्यते, शेषं प्रायः प्रतीतं,प्रागेवानेकशो भावितत्वात्।

'तेसि णं दाराणमुप्पिं'मित्यादि येषां द्वाराणामुपरि प्रत्येकं प्रत्येकमष्टावष्टौ मङ्गलकानि स्वस्तिकादीनि प्रज्ञप्तानि सर्वरत्नमयानि अच्छानि यावत्प्रतिरूपकाणि॥ 'तेसि णं दाराण'मित्यादि, तेषां द्वाराणां पुरतः प्रत्येकं प्रत्येकं मुखमण्डपाः प्रज्ञप्ताः, 'ते ण'मित्यादि, ते मुखमण्डपा एकं योजनशतमायामेन पञ्चाशद् योजनानि विष्कम्भेन सातिरेकाणि षोडश योजनानि ऊर्द्धमुच्चैस्त्वेन अनेकस्तम्भशतसन्निविष्टा इत्यादि विजयदेवसुधर्मासभाया इव वर्णनं तावद्वक्तव्यं यावत्प्रतिरूपा 'तेसि ण'मित्यादि, तेषां मुखमण्डपानां प्रत्येकं प्रत्येकं 'चतुर्दित्रिदिशि' चत [ति] सृषु दिक्षु एकैकस्यां दिशि एकैकभावेन चत्वारि [त्रीणि] द्वाराणि प्रज्ञप्तानि।

'ते णं दारा' इत्यादि, तानि द्वाराणि षोडश योजनानि ऊर्ध्वमुच्चैस्त्वेन अष्टौ योजनानि विष्कम्भेन 'तावइयं चेव' अष्टावेव योजनानि प्रवेशेन 'सेया वरकणगथूभियागा' इति द्वारवर्णनं प्राग्वत्तावद्वक्तव्यं यावदुपर्यष्टावष्टौ मङ्गलकानि—स्वस्तिकादीनि, तेषामुल्लोचवर्णनं प्राग्वत्, तेषां च मुखमण्पानामुपरि प्रत्येकं प्रत्येकमष्टावष्टौ स्वस्तिकादीनि मङ्गलकानि सर्वरत्नमयानि अच्छानि यावत्प्रतिरूपकाणि, बहवः कृष्णचामरध्वजा इत्यादि प्राग्वद् यावद् बहवः सहस्रपत्रहस्तका इति। 'तेसि ण'मित्यादि, तेषां मुखमण्डपानां पुरतः प्रत्येकं प्रत्येकं प्रेक्षागृहमण्डपाः प्रज्ञप्ताः तेऽपि मुखमण्डपवत्प्रमाणतो वक्तव्याः, तेषामप्युल्लोचवर्णनं भूमिभागवर्णनं च प्राग्वत्।

तेषां बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकमक्षाटकाः प्रज्ञप्ताः 'ते ण'मित्यादि, ते अक्षपाटका वज्रमयाः 'अच्छा जाव पडिरूवा' इति प्राग्वत्।

'तेसि ण'मित्यादि, तेषामक्षपाटकानां बहुमध्यदेशभागे प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः,

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ताश्च मणिपीठिका अष्टौ योजनान्यायामविष्कम्भाभ्यां चत्वारि योजनानि बाहल्येन सर्वात्मना मणिमय्योऽच्छा इत्यादि प्राग्वत् ॥ 'तासि णं'मित्यादि, तासां मणिपीठिकानामुपरि प्रत्येकं २ सिंहासनं प्रज्ञप्तं, तेषां च सिंहासनानां वर्णनं विजयदूष्यवर्णनमङ्कुशवर्णनं दामवर्णनं च प्राग्वत् तेषां च प्रेक्षागृहमण्डपानामुपरि प्रत्येकं प्रत्येकमष्टावष्टौ स्वस्तिकादीनि मङ्गलकानि यावद् बहवः सहस्रपत्रहस्तका इति । 'तेसि णं'मित्यादि, तेषां प्रेक्षागृहमण्डपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ता, ताश्च मणिपीठिकाः प्रत्येकं प्रत्येकं षोडश योजनान्यायामविष्कम्भाभ्यां अष्टौ योजनानि बाहल्येन सर्वात्मना मणिमय्योऽच्छा इत्यादि प्राग्वद यावत्प्रतिरूपाः ॥ 'तासि णं'मित्यादि, तासां मणिपीठिकानामुपरि प्रत्येकं २ चैत्यस्तूपाः प्रज्ञप्ताः ।

'ते णं चेइयथूभा' इत्यादि, ते चैत्यस्तूपाः षोडश योजनान्यायामविष्कम्भाभ्यां सातिरेकाणि षोडश योजनान्यूर्ध्वमुच्चैस्त्वेन, ते च शङ्खाङ्ककुन्ददकरजोऽमृतमथितफेनपुञ्जसंनिकाशा 'अच्छा' इत्यादि प्राग्वत् यावत्प्रतिरूपाः । 'तेसि णं'मित्यादि, तेषां चैत्यस्तूपानामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा इत्यादि प्राग्वद् यावद् बहवः सहस्रपत्रहस्तकाः ॥ 'तेसि णं'मित्यादि, तेषां चैत्यस्तूपानां प्रत्येकं प्रत्येकं 'चतुर्दिशि' चतसृषु दिक्षु एकैकस्यां दिशि एकैकमणिपीठिकाभावेन चतस्रः मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका अष्टौ योजनान्यायामविष्कम्भाभ्यां चत्वारिं योजनानि बाहल्येन सर्वात्मना मणिमय्यो यावत्प्रतिरूपाः ॥ 'तासि णं'मित्यादि, तासां मणिपीठिकानामुपरि एकैकस्या मणिपीठिकाया उपरि एकैकप्रतिमाभावेन चतस्र जिनप्रतिमा जिनोत्सेधप्रमाणमात्राः पञ्चधनुःशतप्रमाणा इत्यर्थः सर्वात्मना रत्नमय्यः संपर्य्यङ्कासननिषण्णाः स्तूपाभिमुख्यस्तिष्ठन्ति, तद्यथा—पूर्वस्यां दिशि ऋषभा दक्षिणस्यां वर्द्धमानाः अपरस्यां चन्द्राननाः उत्तरस्यां वारिषेणाः । 'तेसि णं'मित्यादि, तेषां चैत्यस्तूपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिकाः षोडश योजनान्यायामविष्कम्भाभ्यामष्टौ योजनानि बाहल्येन सर्वात्मना मणिमय्योऽच्छा यावत्प्रतिरूपाः ॥ 'तासि णं'मित्यादि, तासां मणिपीठीकानामुपरि प्रत्येकं प्रत्येकं चैत्यवृक्षः प्रज्ञप्तः, ते च चैत्यवृक्षा अष्टौ योजनान्यूर्ध्वमुच्चैस्त्वेन अर्द्धयोजनमुद्वेधेन द्वे योजने उच्चैस्त्वेन स्कन्धः स एवार्द्धयोजनं विष्कम्भेन यावद्बहुमध्यदेशभागे ऊर्द्धविनिर्गता साखा—विडिमा सा षड् योजना-न्यूर्द्धमुच्चैस्त्वेन, साऽपि चार्द्धयोजनं विष्कम्भेन, सर्वाग्रेण सातिरेकाण्यष्टौ योजनानि प्रज्ञप्ता । 'तेसि णंमयमेयारूवे वण्णावासे पन्नत्ते' इत्यादि चैत्यवृक्षवर्णनं विजयराजधानीगतचैत्यवृक्षवद्भावनीयं यावल्लतावर्णनमिति ॥

'तेसि णं'मित्यादि, तेषां चैत्यवृक्षाणामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा इत्यादि तावद् यावत्सहस्रपत्रहस्तकाः सर्वरत्नमया अच्छा यावत्प्रतिरूपाः ॥ 'तेसि णं'मित्यादि, तेषां चैत्यवृक्षाणां पुरतः प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिका अष्टौ योजनान्यायामविष्कम्भाभ्यां चत्वारि योजनानि बाहल्येन सर्वात्मना मणिमय्योऽच्छा यावत्प्रतिरूपा ॥ 'तासि णं'मित्यादि, तासां मणिपिठीकानामुपरि प्रत्येकं २ महेन्द्रध्वजः प्रज्ञप्तः, ते च महेन्द्रध्वजाः षष्टियोजनान्यूर्द्धमुच्चैस्त्वेन योजनमुद्वेधेन योजनं विष्कम्भेन वज्रमया इत्यादि वर्णनं विजयदेवराजधानीगतमहेन्द्रध्वजवद्वेदितव्यं यावत्तेषां महेन्द्रध्वजानामुपरि अष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा यावद् बहवः सहस्रपत्रहस्तकाः सर्वरत्नमया अच्छा यावत्प्रतिरूपाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तेसि ण'मित्यादि, तेषां महेन्द्रध्वजानां पुरतः प्रत्येकं प्रत्येकं नन्दाभिधाना पुष्करिणी प्रज्ञप्ता, 'ताओ नंदाओ पुक्खरिणीओ' इत्यादि, ताश्च नन्दापुष्करिण्य एकैकं योजनशतमायामविष्कम्भाभ्यां पञ्चाशद् योजनानि विष्कम्भेन दश योजनान्युद्वेधेन 'अच्छाओ सण्हाओ रययमयकूलाओ' इत्यादि पुष्करिणीवर्णनं जगत्युपरिपुष्करिणीवद्वक्तव्यं नवरं 'खोदरसपडिपुण्णाओ' इति वक्तव्यं, ताश्च नन्दापुष्करिण्यः प्रत्येकं प्रत्येकं पद्मवरवेदिकया प्रत्येकं प्रत्येकं वनखण्डेन च परिक्षिप्ताः, तासां च नन्दापुष्करिणीनां त्रिदिशि त्रिसोपानप्रतिरूपकाणि प्रज्ञप्तानि तेषां वर्णनं तोरणवर्णनं च प्राग्वत् । इदमन्यदधिकं पुस्तकान्तरे दृश्यते–'तासि णं पुक्खरिणीणं चउद्दिसिं चत्तारि वनसंडा पन्नत्ता, तंजहा–पुरच्छिमेणं दाहिणेणं पच्चत्थिमेणं उत्तरेणं–

॥ १ ॥ "पुव्वेण असोगवमं दाहिणतो होइ चंपगवणं तु (सत्तपन्नवणं) ।
अवरेण पंचगवणं चूयवणं उत्तरे पासे ॥"

'तेसु ण'मित्यादि, तेषु सिद्धायतनेषु प्रत्येकं प्रत्येकमष्टचत्वारिंशत् गुलिकासहस्राणि, गुलिकाः–पीठिका अभिधीयन्ते, ताश्च मनोगुलिकापेक्षया प्रमाणतः क्षुल्लास्तासां सहस्राणि गुलिकासहस्राणि प्रज्ञप्तानि, तद्यथा–पूर्वस्यां दिशि षोडश सहस्राणि पश्चिमायां षोडश सहस्राणि दक्षिणस्यामष्टौ सहस्राणि उत्तरस्यामष्टौ सहस्राणि । 'तासु णं गुलियासु बहवे सुवण्णरूप्पामया फलगा प०' इत्यादि विजयदेवराजधानीगतसुधर्म्मासभायामिव वक्तव्यं यावद्दामवर्णनं ।

'तेसु ण'मित्यादि, तेषु सिद्धायतनेषु प्रत्येकं प्रत्येकमष्टचत्वारिंशत् मनोगुलिकासहस्राणि प्रज्ञप्तानि, गुलिकापेक्षया प्रमाणतो महतीतराः, तद्यथा–पूर्वस्यां दिशि षोडश सहस्राणि पश्चिमायां षोडश सहस्राणि दक्षिणस्यामष्टौ सहस्राणि उत्तरस्यामष्टौ सहस्राणि, एतास्वपि फलकनागदन्तकमाल्यदामवर्णनं प्राग्वत् ॥ 'तेसु णं सिद्धायतनेसु' इत्यादि, तेषु सिद्धायतनेषु प्रत्येकं प्रत्येकमष्टचत्वारिंश-द्गमानुष्यः–शय्यारूपाः स्थानविशेषास्तासां सहस्राणि प्रज्ञप्तानि, तद्यथा–पूर्वस्यां दिशि षोडश सहस्राणि पश्चिमायां षोडश सहस्राणि दक्षिणस्यामष्टौ उत्तरस्यामष्टौ सहस्राणि, तास्वपि फलकवर्णनं नागन्तवगनं सिक्ककवर्णनं धूपघटिकावर्णनं प्राग्वत् ।

'तेसि णं सिद्धायतणाण'मित्यादि उल्लोकवर्णनमन्तर्बहुसमरमणीयभूमिभागवर्णनं शब्दवर्जं प्राग्वत् ॥ 'तेसि णं बहुसमरमणिज्जाणं भूमिभागाण'मित्यादि, तेषां बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं २ मणिपीठिकाः प्रज्ञप्ताः, ताश्च मणिपीठिकाः षोडश योजनान्यायामविष्कम्भाभ्यामष्टौ योजनानि बाहल्येन सर्वात्मना मणिमय्यो यावत्प्रतिरूपकाः ॥ 'तासि ण'मित्यादि, तासां च मणिपीठीकानामुपरि प्रत्येकं २ देवच्छन्दकः प्रज्ञप्तः, ते च देवच्छन्दकः षोडश योजनान्यायामविष्कम्भाभ्यां सातिरेकाणि षोडश योजनान्यूर्द्धमुच्चैस्त्वेन सर्वात्मना रत्नमया अच्छा यावत्तिरूपाः 'तेसु ण'मित्यादि, तेषु देवच्छन्दकेषु प्रत्येक २ मष्टशतं जिनप्रतिमानां जिनोत्सेधप्रमाणमात्राणां पञ्चधनुःशतप्रमाणानामित्यर्थ सन्निक्षिप्तं तिष्ठति, प्रतिमावर्णनादि विजयदेवराजधानीगतसिद्धायतनवत्तावद्वक्तव्यं यावदष्टशतं धूपकडुच्छुकानाम् ॥ 'तेसि ण'मित्यादि, तेषां सिद्धायतनानामुपरि प्रत्येकं प्रत्येकमष्टावष्टौ मङ्गलकानि बहवः कृष्णचामरध्वजा यावद्बहवः सहस्रपत्रहस्तकाः सर्वरत्नमया अच्छा यावत्प्रतिरूपाः ।

'तत्थ ण'मित्यादि, तत्र तेषु चतुर्ष्वञ्जनपर्वतेषु मध्ये योऽसौ पूर्वदिगभावी अञ्जनकपर्वत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तस्य 'चतुर्दिशि' चतसृषु दिक्षु एकैकस्यां दिशि एकैकनन्दापुष्करिणीभावेन चतस्रः नन्दापुष्करिण्यः प्रज्ञप्तास्तद्यथा—पूर्वस्यां दिशि नन्दिषेणा दक्षिणस्याममोघा अपरस्यां गोस्तूपा उत्तरस्यां सुदर्शना, ताश्च पुष्करिण्य एकं योजनशतसहस्रमायामविष्कम्भाभ्यां त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके त्रीणि गव्यूतानि अष्टाविंशं धनुःशतं त्रयोदशाङ्गुलानि अर्द्धाङ्गुलं च किञ्चिद्विशेषाधिकं परिक्षेपेण प्रज्ञप्ताः, दश योजनान्युद्वेधेन, 'अच्छाओ सण्हाओ रययामय-कूलाओ' इत्यादि जगत्युपरिपुष्करिणीवन्निरवशेषं वक्तव्यं नवरं 'वट्टाओ समतीराओ खोदोदग-पडिपुण्णाओ' इति विशेषः, ताश्च प्रत्येकं प्रत्येकं पद्मवरवेदिकया वनखण्डेन च परिक्षिप्ताः, अत्रापीदमन्यदधिकं पुस्तकान्तरे दृश्यते—'तासि णं पुक्खरिणीणं पत्तेयं पत्तेयं चउद्दिसिं चत्तारि वनसंडा पन्नत्ता तंजहा—पुरच्छिमेमं दाहिणेणं अवरेणं उत्तरेणं, पुव्वेण असोगवणं जाव चूयवणं उत्तरे पासे' एवं शेषाञ्जनपर्वतसम्बन्धिनीनामपि नन्दापुष्करिणीनां वाच्यम् ।

'तासि ण'मित्यादि, तासां पुष्करिणीनां बहुमध्यदेशभागे प्रत्येकं २ दधिमुखनामा पर्वतः प्रज्ञप्तः, 'ते ण'मित्यादि, ते दधिमुखपर्वताश्चतुःषष्टिर्योजनसहस्राणि ऊर्द्धमुच्चैस्त्वेन एकं योजन-सहस्रमुद्वेधेन सर्वत्र समाः पल्यङ्कसंस्थानसंस्थिता दश योजनसहस्राणि विष्कम्भेनएकत्रिंशद् योजनसहस्राणि षट् 'त्रयोविंशानि' त्रयोविंशत्यधिकानि योजनशतानि परिक्षेपेण प्रज्ञप्ताः सर्वात्मना स्फटिकमया अच्छा यावत्प्रतिरूपाः प्रत्येकं प्रत्येकं पद्मवरवेदिकया परिक्षिप्ताः प्रत्येकं २ वनखण्डेन परिक्षिप्ताः । 'तेसि ण'मित्यादि, तेषां दधिमुखपर्वतानामुपरि प्रत्येकं २ बहुसमरमणीयो भूमिभागः प्रज्ञप्तः, तस्य शब्दवर्णनं तावद्वक्तव्यं यावद्बहवो 'वानमन्तरा देवा देवीओ य आसयंति सयंति जाव विहरंति' ॥ 'तेसि ण'मित्यादि, तेषां बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं २ सिद्धायतनं प्रज्ञप्तं, सिद्धायतनवक्तव्यता प्रमाणादिका अञ्जनपर्वतोपरिसिद्धायत-नवद्वक्तव्या यावदष्टशतं प्रत्येकं प्रत्येकं धूपकडुच्छुकानामिति ।

'तत्थ णं जे से दाहिणे अंजनगपव्वए' इत्यादि, दक्षिणाञ्जनकपर्वतस्यापि पूर्वदिग्भाव्य-ञ्जनकपर्वतस्येव निरवशेषं वक्तव्यं, नवरं नन्दापुष्करिणीनां नामनानात्वं तद्यथा—पूरवस्यां नन्दोत्तरा दक्षिणस्यां नन्दा अपरस्यामानन्दा उत्तरस्यां नन्दिवर्द्धना, शेषं तथैव ॥ 'तत्थ णं जे से पच्चत्थिमिल्ले अंजनगपव्वते तस्स णं चउद्दिसिं चत्तारि' इत्यादि, पूर्वदिग्भाव्यञ्जनपर्वतस्येव पश्चिमदिग्भाव्यञ्जन-पर्वतस्यापि वक्तव्यं यावत्प्रत्येकं प्रत्येकमष्टशतं धूपकडुच्छुकानां, नवरं नन्दापुष्करिणीनां नामनानात्वं, तद्यथा—पूर्वस्यां दिशि भद्रा दक्षिणस्यां विशाला अपरस्यां कुमुदा उत्तरस्यां पुण्डरीकिणी, शेषं तथैव ॥ एवमुत्तरदिग्भाव्यञ्जनकपर्वते वक्तव्यं, नवरमत्रापि नन्दापुष्करिणीनां नामनानात्वं, तद्यथा—पूर्वस्यां दिशि विजया दक्षिणस्यां वैजयन्ता अपरस्यां जयन्ता उत्तरस्यामपराजिता, शेषं तथैव यावत्प्रत्येकं प्रत्येकमष्टशतं धूपकडुच्छुकानामिति । षोडशानामपि चामीषां वापीनामपान्तराले प्रत्येकं प्रत्येकं रतिकरपर्वतौ जिनभवमण्डितशिखरौ शास्त्रन्तरेऽभिहिताविति सर्वसङ्ख्यया नन्दीश्वरद्वीपे द्वापञ्चाशत् सिद्धायतनानि ।

'तत्थ ण'मित्यादि, 'तत्र' तेषु सिद्धायतनेषु णमिति पूर्ववत् बहवो भवनपतिवान-मन्तरज्योतिष्कवैमानिका देवाश्चातुर्मासिकेषु पर्युषणायामन्येषु च बहुषु जिनजन्मनिष्क्रम-णज्ञानोत्पादपरिनिर्वाणादिषु देवकार्येषु देवसमितिषु एतदेव पर्यायद्वयेन व्याचष्टे—देवसमवायेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवसमुदायेषु आगताः प्रभुदितप्रक्रीडिता अष्टाहिकारूपा महामहिमाः कुर्वन्तः सुखंसुखेन 'विहरन्ति' आसते। अदुत्तरं च णं गोयमा!' इत्यादि, अथान्यद् गौतम! नन्दीश्वरवरे द्वीपे चक्रवालविष्कम्भेन बहुमध्यदेशभागे चतसृषु विदिक्षु एकैकस्यां विदिशि एकैकभावेन चत्वारो रतिकरपर्वताः प्रज्ञप्तास्तद्यथा–एक उत्तरपूर्वस्यां द्वितीयो दक्षिणपूर्वस्यां तृतीयो दक्षिणपरस्यां चतुर्थ उत्तरापरस्याम्

'तेण' मित्यादि, ते रतिकरपर्वता दश योजनसहस्राण्युर्ध्वमुच्चैस्त्वेन एकं योजनसहस्रमुद्वेधेन सर्वत्रसमा झल्लरीसंस्थानसंस्थिता दश योजनसहस्राणि विष्कम्भेन एकत्रिंशद् योजनसहस्राणि षट्त्रयोविंशानि योजनशतानि परिक्षेपेण सर्वात्मना रत्नमया अच्छा यावत्प्रतिरूपाः, तत्र योऽसावुत्तरपूर्वो रतिकरपर्वतस्यस्य 'चतुर्दिशि' चतुर्दिक्षु एकैकस्यां दिशि एकैकराजधानीभावेन ईशानस्य देवेन्द्रस्य देवेन्द्रस्य देवरास्य चतसृणामग्रमहिषीणां जम्बूद्वीपप्रमाणाश्चतस्र राजधान्यः प्रज्ञप्तास्तद्यथा–पूर्वस्यां दिशि नन्दोत्तरा दक्षिणस्यां नन्दा पश्चिमायामुत्तरकुरा उत्तरस्यां देवकुरा, तत्र कृष्णायाः–कृष्णनामिकाया अग्रमहिष्या नन्दोत्तरा कृष्णराज्या नन्दा रामाया उत्तरकुरा रामरक्षित्या देवकुरा, तत्र योऽसौ दक्षिणपूर्वो रतिकरपर्वतस्तस्य चतुर्दिशि शक्रस्य देवेन्द्रस्य देवराजस्य चतसृणामग्रमहिषीणां जम्बूद्वीपप्रमामाश्चतस्र राजधान्यः प्रज्ञप्तास्तद्यथा–पूर्वस्यां दिशि सुमनाः दक्षिणस्यां सौमनसा अपरस्यामर्चिर्माली उत्तरस्यां मनोरमा।

तत्र 'पद्माया' पद्मनामिकाया अग्रमहिष्या सुमनाः शिव्याः सौमनस् शच्याश्चार्चिर्माली अञ्जुकाया मनोरमा, तत्र योऽसौ दक्षिणपश्चिमो रतिकरपर्वतस्यस्य चतुर्दिशि शक्रस्य देवेन्द्रस्य देवराजस्य चतसृणामग्रमहिषीणां जम्बूद्वीपप्रभाणाश्चतस्र राजधान्यः प्रज्ञप्तास्तद्यथा–पूर्वस्यां दिशि भूता दक्षिमस्यां भूतावतंसा अपरस्यां गोस्तूपा उत्तरस्यां सुदर्शना, तत्र 'अमलायाः' अमलनामिकाया अग्रमहिष्या भूता राजधानी अप्सरसो भूतावतंसिका नवमिकाया गोस्तूपा रोहिण्याः सुदर्शना, तत्र योऽसावुत्तरपश्चिमो रतिकरपर्वतस्तस्य चतुर्दिशि ईशानस्य देवेन्द्रस्य देवराजस्य चतसृणामग्रमहिषीणां जम्बूद्वीपप्रमाणाश्चतस्रो राजधान्यः प्रज्ञप्तास्तद्यधा–पूर्वस्यां दिशि रत्ना दक्षिणस्यां रत्नोच्चया अपरस्यां सर्वरत्ना उत्तरस्यां रत्नश्चया, तत्र वसुनामिकाया अग्रमहिष्या रत्ना वसुप्राप्ताया रत्नोच्चया वसुमित्रायाः सर्वरत्ना वसुंधराया रत्नसञ्चया।

रतिकरपर्वतचतुष्टयवक्तव्यता केषुचित्पुस्तकेषु सर्वथा न दृश्यते। कैलासहरिवाहननामानौ च द्वौ देवौ तत्र यताक्रमं पूर्वार्द्धापरार्द्धाधिपती महर्द्धिकौ यावत्पल्योपमस्थितिकौ परिवसतः, तत एवं नन्द्या–समृद्धया 'टुनदु समृद्धौ' इति वचनात् ईश्वरः–स्फातिमान् न तु नाम्नेति नन्दीश्वरः तथा चाह– 'से एएणट्ठेण' मित्याद्युपसंहारवाक्यं प्रतीतं, चन्द्रादिसङ्ख्यासूत्रं प्राग्वत्॥

मू. (२९५) *नंदिस्सरवरण्णं दीवं णनदीसरोदे नामं समुद्दे वट्टे वलयागारसंठाणसंठिते जाव सव्वं तहेव अट्ठो जो खोदोदगस्स जाव सुमनसोमनसभद्दा एत्थ दो देवा महिड्ढीया जाव परिवसंति सेसं तहेव जाव तारग्गं॥*

वृ. 'नंदीसरण्ण' मित्यादि, नन्दीश्वरं णमिति पूर्ववत् नन्दीश्वरोदो नाम सुमुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तान् संपरिक्षिप्य तिष्ठति यथैव क्षोदोदकसमुद्रस्य वक्तव्यता तथैवास्याप्यर्थसहिता वक्तव्या, नवरमत्र सुमनसुमनसौ च द्वौ देवौ वक्तव्यौ, तावतिशयेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फीताविति ननन्दीश्वरयोरुदकं यत्रासौ नन्दीश्वरोदः, अथवा नन्दीश्वरवरं द्वीपं परिवेष्टय स्थिति इति नन्दीश्वरं प्रति लग्नमुदकं यस्यासौ न्दीश्वरोदः, एवं सर्वत्रापि समुद्रेषु द्वीपेषु च व्युत्पत्तिर्यथायोगं भावनीया।

एवमेते जम्बूद्वीपादयो नन्दीश्वरसमुद्रपर्यवसाना एकप्रत्यवतारा उक्ताः, अत ऊर्ध्वं-मरुणादीन् द्वीपान् समुद्रांश्च प्रत्येकं त्रिप्रत्यवतारान् विवक्षुराह–

वृ. 'नंदीसरवरोदण्णं समुद्द' मित्यादि।

मू. (२९६) *णंदीसरोदं समुद्दं अरुणे नाम्रं दीवे वट्टे वलयागार जाव संपरिक्खित्ता णं चिट्ठति। अरुणे णं भंते! दीवे किं समचक्कवालसंठिते विसमचक्कवालसंठिए?, गोयमा! समचक्कवालसंठिते नो विसमचक्कवालसंठिते, केवतियं चक्कवालवि० संठिते?*

संखेज्जाइं जोयणसयसहस्साइं चक्कवालविक्खंभेणं संखेज्जाइं जोयणसयसहस्साइं परिक्खेवेणं पन्नत्ते, पउमवरवमसंडदारा दारंतरा य तहेव संखेज्जाइं जोयणसतसहस्साइं दारंतरं जाव अट्ठो, वावीओ खोतोदगपडिहत्थाओ उप्पातपव्वयका सव्ववइरामया अच्छा, असोग वीतसोगा य एत्थ ध्दुवे देवा हिड्डीया जाव परिबसंति, से तेण० जाव संखेज्जं सव्वं।

वृ. नन्दीश्वरोदं समुद्रमरुणो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितो यावत्परिक्षिप्य तिष्ठति। यैव क्षोदवरद्वीपवक्तव्यता सैवात्राप्यर्थसहिता वक्तव्या, नवरमत्र वाप्यादयः क्षीरो(क्षोदो)दकपरिपूर्णाः, पर्वतादयस्तु सर्वात्मना वज्रमया वक्तव्याः, अशोकवीतशोकौ च द्वौ देवौ, स च देवप्रभया पर्वतादिगतवज्ररत्नप्रभया चारुण इति अरुणनामा।

मू. (२९७) *अरुणण्णं दीवं अरुणोदे नामं समुद्दे तस्सवि तहेव परिक्खेवो अट्ठो खोतोदगे नवरिं सुभद्द सुमनभद्दा एत्थ दो देवा महिड्डीया सेसं तहेव॥ अरुणोदगं समुद्दं अरुणवरे नामं दीवे वट्टे वलयागारसंठाण० तहेव संखेज्जगं सव्वं जाव अट्ठो खोयोदगपडिहत्थाओ उप्पायपव्वतया सव्ववइरामया अच्छा, अरुणवरभद्दअरुणवरमहाभद्दा एत्थ दो देवा महिड्डीया। एवं अरुनवरोदेवि समुद्दे जाव देवा अरुणवरअरुणमहावरा य एत्थ दो देवा सेसं तहेव।*

अरुणवरोदण्णं समुद्दं अरुणवरावभासे णामं दीवे वट्टे जाव देवा अरुणवरावभास-भद्दारुणवरावभासमहाभद्दा एत्थ दो देवा महिड्डीया। एवं अरुणवरावभासे समुद्दे नवरि देवा अरुणवरावभासवरारुणवरावभासमहावरा एत्थ दो देवा महिड्डीया।

वृ. 'अरुणण्ण' मित्यादि, अरुणं णमिति पूर्ववत् द्वीपमरुणोदो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समन्तात्संपरिक्षिप्य यदिवा सुभद्रसुमनोभद्रदेवाभरणद्युत्याऽरुणं–आरक्तमुदकं यस्यासावरुणोदयः। 'अरुणोदण्ण' मित्यादि, अरुणोदं समुद्रमरुणवरो नाम द्वीपो वृत्तो वलयाकारसंस्थितो यावत्परिक्षिप्य तिष्ठति। अत्रापि वक्तव्यता सैव नवरमत्रारुण-वरभद्रारुणवरमहाभद्रौ देवौ वाच्यौ, नामव्युत्पत्तिभावनाऽपि स्वधिया भावनीया। अरुणवरद्वीपमरुणवरोदो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितो यावत्परिक्षिप्य तिष्ठति। अत्रापि वक्तव्यता सैव नवरमरुणवरा- रुणमहावरावत्र देवौ।

अरुणवरोदं समुद्रमरुणवरावभासो नाम द्वीपो वृत्तो यावत्परिक्षिप्य तिष्ठति, वक्तव्यता अत्रापि क्षोदवरद्वीपवत् नवरमत्रारुणवरावभासभद्रारुणवरावभासमहाभद्रौ देवौ। अरुणावभासं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीपमरुणावभासो नाम समुद्रो वृत्तो यावत्परिक्षिप्य तिष्ठति, वक्तव्यताऽत्रापि क्षोदोदसमुद्रवत् नवरमत्रारुणवरावभासवरारुणवरावभासमहावरौ देवौ। तदेवमरुणो द्वीपः समुद्रश्च त्रिप्रत्यवतार उक्तस्तद्यथा–अरुणो द्वीपोऽरुणः समुद्रः अरुणवरो द्वीपः अरुणवरः समुद्रः अरुणवरावभासो द्वीपोऽरुणवरावभासः समुद्रः।

मू. (२९८) *कुंडले दीवे कुंडलभद्दकुंडलमहाभद्दा दो देवा महिड्डीया, कुंडलोदे समुद्दे चक्खुसुभचक्खुकंता एत्थ दो देवा म०। कुंडलवरे दीवे कुंडलवरभद्दकुंडलवरमहाभद्दा एत्थ दो देवा महिड्डीया, कुंडलवरोदे समुद्दे कुंडलवर [वर] कुंडलवरमहावरा एत्थ दो देवा म०।*

कुंडलवरावभासे दीवे कुंडलवरावभासभद्दकुंडलवरावभासमहाभद्दा एत्थ दो देवा०॥ कुंडलवरोभासोदे समुद्दे कुंडलवरोभासवरकुंडलववरोभासमहावरा एत्थ दो देवा म० जावपलिओवमड्डितीया परिवसंति।

वृ. एवं कुण्डलो द्वीपः कुण्डलः समुद्रश्च त्रिप्रत्यवतारो वक्तव्यस्तद्यथा–अरुणवरावभाससमुद्रपरिक्षेपी कुण्डलो द्वीपः तत्परिक्षेपी कुण्डलः समुद्रः तत्परिक्षेपी कुण्डलवरो द्वीपः तत्परिक्षेपी कुण्डलवरः समुद्रः तत्परिक्षेपी कुण्डलवरावभासो द्वीपः तत्परिक्षेपी कुण्डलवरावभासः समुद्रः, वक्तव्यता सर्वत्रापि क्षोदवरद्वीपक्षोदोदसमुद्रवद्द्रष्टव्या, नवरं देवतानामिदं नामनानात्वं–कुण्डले द्वीपे कुण्डलभद्रकुण्डलमहाभद्रौ द्वौ देवौ, कुण्डलसमुद्रे चक्षुशुभचक्षुकान्तौ, कुण्डलवरे द्वीपे कुण्डलवरभद्रकुण्डलवरमहाभद्रौ, कुण्डलवरे समुद्रे कुण्डलवरकुण्डलवरमहावरौ कुण्डलवरावभासे द्वीपे कुण्डलवरावभासभद्रकुण्डलवरावभासमहाभद्रौ, कुण्डलवरावभासे समुद्रे कुण्डलवरावभासवरकुण्डलवरावभासमहावरौ।

मू. (२९९) *कुंडलवरोभासं णं समुद्दं रुचगे नामं दीवे वट्टे वलया० जाव चिट्ठति, किं समचक्क० विसमचक्कवाल० ?, गोयमा! समचक्कवाल० नो विसमचक्कवालसंठिते, केवतियं चक्कवाल० पन्नत्ते?, सव्वट्ठ मनोरमा एत्त दो देवा सेसं तहेव।*

रुयगोदे नामं समुद्दे जहा कोदोदे समुद्दे संखेज्जाइं जोयणसतसहस्साइं चक्कवालवि० संखेज्जाइं जोयणसतसहस्साइं परिक्खेवेणं दारा दारंतरंपि संखेज्जाइं जोतिसंपि सव्वं संखेज्जं भाणियव्वं, अट्ठोवि जहेव खोदोदस्स नवरि सुमनसोमनसा एत्थ दो देवा महिड्डीया तहेव रुयगाओ आढत्तं असंखेज्जं विक्खंबा परिक्खेवो दारा दारंतरं च जोइसं स सव्वं असंखेज्जं भाणियव्वं।

रुयगोदण्णं समुद्दं रुयगवरं णं दीवे वट्टे रुयगवरभद्दरुयगवरमहाभद्दा एत्थ दो देवा रुयगवरोदे रुयगवररुयगवरमहावरा एत्थ दो देवा महिड्डीया।

रुयगवरावभासे दीवे रुयगवरावभासभद्दरुयगवरावभासमहाभद्दा एत्थ दो देवा महिड्डीया रुयगवरावभासे समुद्दे रुयगवरावभासवररुयगवरावभासमहावरा एत्थ०।

वृ. कुण्डलवरावभाससमुद्रपरिक्षेपी रुचको द्वीपो रुचकद्वीपपरिक्षेपी रुचकः समुद्रः तत्परिक्षेपी रुचकवरो द्वीपस्तत्परिक्षेपी रुचकवरः समुद्रः तत्परिक्षेपी रुचकवरावभासो द्वीपः तत्परिक्षेपी रुचकवरावभासः समुद्रः, वक्तव्यता सर्वत्रापि प्राग्वत् नवरं देवनामनानात्वं, रुचके द्वीपे सर्वार्थमनोरमौ देवौ, रुचकसमुद्रे सुमनःसौमनसौ।

रुचकवरे द्वीपे रुचकवरभद्ररुचकवरमहाभद्रौ, रुचकवरे समुद्रे रुचकवररुचकवरमहावरौ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुचकवरावभासे द्वीपे रुचकवरावभासभद्ररुचकवरावभासमहाभद्रौ, रुचकवरावभासे समुद्रे रुचकवरावभासवररुचकवरावभासमहावरौ, एतावता ग्रन्थेन यदन्यत्र पठ्यते–

॥१॥ "जंबूद्दीवे लवणे घायइ कालोय पुक्खरे वरुणे।
खीरघयखोयनंदी अरुणवरे कुंडले रुयगे॥" इति।

तद्भावितम्। अत ऊर्ध्वं तु यानि लोके शङ्खध्वजकलशश्रीवत्सादीनि शुभानि नामानि तन्नामानो द्वीपसमुद्राः प्रत्येतव्याः, सर्वेऽपि च त्रिप्रत्यवताराः, अपान्तराले च भुजगवरः कुशवरः कौञ्चवर इति। तथा यानि कानिचिदाभरणनामानि हारार्द्धहारप्रभृतीनि यानि वस्तुनामानि आजिनादीनि यानि गन्धनामानि कोष्ठादीनि यान्युत्पलनामानि जलरुहचन्द्रोदद्योतप्रमुखाणि यानि च तिलकप्रभृतीनि वृक्षनामानि यानि च पृथिव्याः "पुढवीसक्करावालुया उ उवले सिला य लोणूसे" इत्यादि षट्त्रिंशद्भेद-भिन्नाया निधीनां नवानां रत्नानां चतुर्दशानां चक्रवर्त्तिसम्बन्धिनां वर्षधरपर्वतानां–क्षुल्लहिमवदादीनां हदानां–पद्ममहापद्मानां नदीनां–गङ्गासिन्धुप्रभृतीनां महानदीनां अन्तरनदीनां च विजयानां– कच्छादीनां द्वात्रिंशतो वक्षस्कारपर्वतानां–माल्यवदादीनां कल्पानां–सौधर्मादीनां द्वादशानाम् इन्द्राणां शक्रादीनां दशानां कुरूणां–देवकुरूत्तरकुरूणां मन्दरस्य–मेरोः आवासानां– शक्रादिसम्बन्धिनां मेरुप्रत्यासन्नादीनां भवनपत्यादिसम्बन्धिनां च कूटानां–क्षुल्लहिमवदादिसम्बन्धिनां नक्षत्राणां–कृत्तिकादीनामष्टाविंशतेः चन्द्राणां सूर्याणां च नामानि तानि सर्वाण्यपि द्वीपसमुद्रेषु त्रिप्रत्यवताराणि वक्तव्यानीति दिदर्शयिषुराह–

मू. (३००) *हारद्दीवे हारभद्दहारमहाभद्दा एत्थ०। हारसमुद्दे हारवरहारवरमहावरा एत्थ दो देवा महिड्ढीया। हारवरोदे हारवरभद्दहारवरमहाभद्दा एत्थ दो देवा महिड्ढीया। हारवरोए समुद्दे हारवरहारवरमहावरा एत्थ०। हारवरावभासे दीवे हारवरावभासभद्दहारवरावभासमहाभद्दा एत्थ०।*

हारवरावभासोए समुद्दे हारवरावभासवरहारवरावभासमहावरा एत्थ०। एवं सव्वेवि तिपडोयारा नेतव्वा जाव सूरवरोभासोए समुद्दे, दीवेसु भद्दनामा वरनामा होंति उदहीसु, जाव पच्छिमभावं च खोतवरादीसु सयंभूरमणपज्जंतेसु वावीओ खोओदगपडिहत्थाओ पव्वयका य सव्ववइरामया। देवदीवे दीवे २ दो देवा महिड्ढीया देवभद्ददेवमहाभद्दा एत्थ० देवोदे समुद्दे देववरदेवमहावरा एत्थ० जाव सयंभूरमणे दीवे सयंभूरमणभद्दसयंभूरमणमहाभद्दा एत्थ दो देवा महिड्ढीया।

सयंभुरमणण्णं दीवं सयंभुरमणोदे नामं समुद्दे वट्टे वलया० जाव असंखेज्जाइं जोयणसतसहस्साइं परिक्खेवेणं जावन अट्ठो, गोयमा! सयंभुरमणोदए उदए अच्छे पत्थे जच्चे तणुए फलिहवण्णाभे पगतीए उदगरसेणं पन्नत्ते। सयंभुरमणवरसयंभुरमणमहावरा इत्थ दो देवा महि ड्ढीया, सेसं तहेव जाव असंखेज्जाओ तारागणकोडिकोडीओ सोभेंसु वा ३॥

वृ. 'एवं हारद्दीवे' इत्यादि, एवं च हारो द्वीपो हारोदः समुद्रः, हारवरो द्वीपो हारवरः समुद्रः, हारवरावभासो द्वीपो हारवरावभासः समुद्रः, द्वीपसमुद्रवक्तव्यता पूर्ववत्, नवरं हारे द्वीपे हारभद्रहारमहाभद्रौ देवौ हारे समुद्रे हारवरहारमहावरौ, हारवरे द्वीपे हारवरभद्रहारवरमहाभद्रौ, हारवरे समुद्रे हारवरहारवरमहावरौ, हारवरावभासे द्वीपे हारवरावभसभद्रहारवरावभासमहाभद्रौ, हारवरावभासे समुद्रे हारवरावभासवरहारवरावभासमहावरौ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं शेषाणामप्याभरणनाम्नां त्रिप्रत्यवतारो वक्तव्यः–अर्द्धहारो द्वीपः–अर्द्धहारः समुद्रः, अर्द्धहारवरो द्वीपः अर्द्धहारवरः समुद्रः, अर्द्धहारवरावभासो द्वीपः अर्द्धहारवरावभासः समुद्रः, कनकावलिद्वीपः कनकावलिसमुद्रः, कनकावलिवरो द्वीपः कन० व० समुद्रः, कनकावलिवरावभासो द्वीपः कनकावलिवरावभासः समुद्रः, रत्नावलिर्द्वीपः रत्नावलि समुद्रः, रत्नावलिवरो द्वीपः रत्नावलिवरः समुद्रः, रत्नावलिवरावभासो द्वीपः रत्नावलीवरावभासः समुद्रः मुक्तावली द्वीपः मुक्तावली समुद्रः मुक्तावलीवरो द्वीपः मुक्तावलीवरः समुद्रः मुक्तावलिवरावभासो द्वीपो मुक्तावलिवरावभासः समुद्रः ।

वस्तुनामचिन्तायामपि आजिनो द्वीपः आजिनः समुद्रः, आजिनवरो द्वीपः आजिनवरः समुद्रः, आजिनवरावभासो द्वीपः आजिनवरावभासः समुद्र इत्यादि ।

देवचिन्तायामपि अर्द्धहारे द्वीपेऽर्द्धहारभद्रार्द्धहारमहाभद्रौ देवौ, अर्द्धहारे समुद्रेऽर्द्धहारवरार्द्धहारमहावरौ, अर्द्धहारवरे द्वीपेऽर्द्धहारवरभद्रार्द्धहारवरमहाभद्रौ, अर्द्धहारवरे समुद्रेऽर्द्धहारवरार्द्धहारवरमहावरौ, अर्द्धहारावभासे द्वीपेऽर्द्धहारवरावभासभद्राद्धहारवरावभासमहाभद्रौ, अर्द्धहारवरावभासे समुद्रेऽर्द्धहारवरावभासवरार्द्धहारवरावभासमहावरौ, कनकावलिद्वीपे कनकावलिभद्रकनकावलिमहाभद्रौ, कनकावलौ समुद्रे कनकावलिवरकनकावलिमहावरौ, कनकावलिवरे द्वीपे कनकावलिवरभद्रकनकावलिवरमहाभद्रौ, कनकावलिवरे समुद्रे कनकावलिवरकनकावलिवरमहावरौ, कनकावलिवरावभासे द्वीपे कनकावलिवरावभासभद्रकनकावलिवरावभासमहाभद्रौ, रत्नावलौ समुद्रे रत्नावलिवररत्नावलिमहावरौ, रत्नावलिवरे द्वीपे रत्नावलिवरभद्ररत्नावलिवरमहाभद्रौ, रत्नावलिवरे समुद्रे रत्नावलिवररत्नावलीवरमहावरौ, रत्नावलिवरावभासे द्वीपे रत्नावलिवरावभासभद्ररत्नावलिवरावभासमहाभद्रौ, रत्नावलिवरावभासे समुद्रे रत्नावलिवरावभासवररत्नावलिवरावभासमहावरौ ।

मुक्तावलौ द्वीपे मुक्तावलिभद्रमुक्तावलिमहाभद्रौ, मुक्तावलौ समुद्रे मुक्तावलिवरमुक्तावलिमहावरौ, मुक्तावलिवरे द्वीपे मुक्तावलिवरभद्रमुक्तावलिवरमहाभद्रौ, मुक्तावलिवरे समुद्रे मुक्तावलिवरमुक्तावलिमहावरौ, मुक्तावलिवरावभासे द्वीपे मुक्तालिवरावभासभद्रमुक्तावलिवरावभासमहाभद्रौ, मुक्तावलिवरावभासे समुद्रे मुक्तावलिवरावभासवरमुक्तावलिवरावभासमहावरौ, आजिने द्वीपे आजिनभद्राजिनमहाभद्रौ, आजिने समुद्रे आजिनवराजिनवरमहावरौ, आजिनवरे द्वीपे आजिनवरभद्राजिनवरमहाभद्रौ, आजिनवरे समुद्रे आजिनवराजिनवरमहावरौ, आजिनवरावभासे द्वीपे आजिनवरावभासभद्राजिनवरावभासमहाभद्रौ, आजिनवरावभासे समुद्रे आजिनवरावभासवराजिनवरावभासमहावरौ ।

एवं सर्वत्रापि त्रिः प्रत्यवतारो देवानां नामानि च भावनीयानि यावत् सूर्यो द्वीपः सूर्य समुद्रः, सूर्यवरो द्वीपः सूर्यवरः समुद्रः, सूर्यवरावभासो द्वीपः सूर्यवरावभासः समुद्रः, आह च मूलचूर्णिकृत–'अरुणाई द्वीसमुद्रा तिपडोयारा यावत् सूर्यावभासः समुद्रः'' तत्र सूर्ये द्वीपे सूर्यभद्रसूर्यमहाभद्रौ देवौ, सूर्ये समुद्रे सूर्यवरसूर्यमहावरौ, सूर्यवरे द्वीपे सूर्यवरभद्रसूर्यवरमहाभद्रौ, सूर्यवरे समुद्रे सूर्यवरसूर्यमहावरौ, सूर्यवरावभासे द्वीपे सूर्यवरावभासभद्रसूर्यवरावभासमहाभद्रौ, सूर्यवरावभासे समुद्रे सूर्यवरावभासवरसूर्यवरावभासमहावरौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूर्यवरावभाससमुद्रात्परं यदस्ति तदाह–'सूरवरावभासण्णं समुद्दं देवे नामं दीवे वट्टे' इत्यादि, सूर्यवरावभासं णमिति पूर्ववत् समुद्रं देवो नाम द्वीपो वृत्तो वलयाकारसंस्थानसंस्थितः समन्तात्संपरिक्षिप्य तिष्ठति। 'देवे णं भंते! दीवे किं समचक्कवालसंठिते विसमचक्कवालसंठिए गोयमा! समचक्कवालसंठिए नो विसमचक्कवालसंठिए, देवे णं भंते! दीवे केवइयं चक्कवाल-विक्खंभेणं केवइयं परिक्खेवेणं पन्नत्ते?, गोयमा! असंखेज्जाइं जोयणसहस्साइं चक्कवालविक्खंभेणं, असंखेज्जाइं जोयणसयसहस्साइं परिक्खेवेणं पन्नत्ते, से णं एगाए पउमवरवेइयाए एगेणं वनसंडेणं परिक्खित्ते' सुगमं, नवरम् एकया पद्मवरवेदिकयाऽष्टयोजनोच्छ्रयजगत्युपरिभाविन्येति द्रष्टव्यं, एवमेकेन वनषण्डेन च, इदं तु सूत्रं बहुषु पुस्तकेषु न दृश्यते केषुचित् 'तहेवे' त्यतिदेश इति लिखितं।

'कइ णं भंते!' इत्यादि, कति भदन्त! देवस्य द्वीपस्य द्वाराणि प्रज्ञप्तानि?, भगवानाह–गौतम! चत्वारि द्वाराणि प्रज्ञप्तानि, तद्यथा–विजयं वैजयन्तं जयन्तमपराजितं॥ 'कहि णं भंते! देवस्स दीवस्से'त्यादि, क भदन्त! देवस्य द्वीपस्य विजयं नाम द्वारं प्रज्ञप्तम्?, भगवानाह–गौतम! देवद्वीपपूर्वार्द्धपर्यन्ते देवसमुद्रस्य पूर्वा (पश्चा) र्द्धस्य पश्चिमदिशि 'अत्र' एतस्मिन्नवकाशे विजयं नाम द्वारं प्रज्ञप्तं, प्रमाणं वर्णकश्च जम्बूद्वीपविजयद्वारवत्, नामान्वर्थसूत्रमपि तथैव॥ 'कहि णं भंते' इत्यादि, क्व भदन्त! विजयस्य देवस्य विजया नाम राजधानी प्रज्ञप्ता?, भगवानाह–गो० विजयस्य द्वारस्य पश्चिमदिशि तिर्यगसङ्ख्येयानि योजनशतसहस्राण्यवगाह्यात्रान्तरे विजयस्य देवस्य विजया नाम राजधानी प्रज्ञप्ता, सा च जम्बूद्वीपविजयद्वाराधिपतिविजयदेवस्येव वक्तव्या

एवं वैजयन्तजयन्तापरिजिताद्वारवक्तव्यताऽपि भावनीया, ज्योतिषवक्तव्यता सर्वाऽप्यसङ्ख्येयतया वक्तव्या, नामान्वर्थचिन्तायामपि देवभद्रदेवमहाभद्रौ वक्तव्यौ, शेषं सर्वमरुणद्वीपवत्॥ 'देवण्णं दीव'मित्यादि, देवं णमिति पूर्ववत् द्वीपं देवः समुद्रो वृत्तो वलयाकार-संस्थानसंस्थितो यावत्परिक्षिप्य तिष्ठति, अत्रापि समचक्रवालादिसूत्राणि तथैव नवरं देवोदकस्य समुद्रस्य विजयद्वारं देवोदसमुद्रपूर्वार्द्धपर्यन्ते नागद्वीपपूर्वा (पश्चा) र्द्धपश्चिमदिशि अत्रेति वक्तव्यं, राजधानी विजयद्वारस्य पश्चिमदिशि अत्रेति वक्तव्यं, राजधानी विजयद्वारस्य पश्चिमदिशि देवसमुद्रं तिर्यगसङ्ख्येयानि योजनशतसहस्राण्यवगाह्य वक्तव्या।

एवं वैजयन्तजयन्तापराजितद्वारवक्तव्यताऽपि भावनीया, नामान्वर्थचिन्तायामपि देववरदेवमहावरौ देवौ, शेषं तथैव यथा देवो द्वीपो, नवरं नागे द्वीप नागभद्रनागमहाभद्रौ, यथा देवः समुद्रः तथा नागः समुद्रः, नवरं नागसमुद्रे नागवरनागमहावरौ, एवं यक्षादयोऽपि द्वीपसमुद्रा वक्तव्याः, नवरं यक्षे द्वीपे यक्षभद्रयक्षमहाभद्रौ देवौ, यक्षे समुद्रे यक्षवरयक्षमहावरौ, भूते द्वीपे भूतभद्रभूतमहाभद्रौ, भूते समुद्रे भूतवरभूतमहावरौ, स्वयम्भूरमणे द्वीपे स्वयम्भूरमणभद्रस्वयम्भूरम-णमहाभद्रौ, स्वयम्भूरमणे समुद्रे स्वयम्भूवरस्वयम्भूमहावरौ, इह देवादिषु पञ्चसु पञ्चसु द्वीपेषु पञ्चसु २ समुद्रेषु त्रिप्रत्यवतारता नास्ति, तत एकैकतयैते वक्तव्याः तथा चाह–"देवे नागे जक्खे भूए य सयम्भूरमणे अ एक्केके भाणियव्वो।" मूलटीकाकारोऽप्याह–

"देवादयोऽन्त्या एकाकारा" इति, चूर्णिकारोऽप्याह–"देवे नागे जक्खे भूए य सयंभूरमणे एतेऽन्तिमाः पञ्च एकैकाः प्रतिपत्तव्याः" नन्दीश्वरादिद्वीपानां स्वयम्भूरमणद्वीपपर्यवसाना-नामन्वर्थचिन्तायां वाप्यः पुष्करिण्यः च शब्दाद् दीर्घिकादयश्च क्षीरो (क्षोदो) दकपरिपूर्णा वक्तव्याः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्वतादयश्च सर्वात्मा वज्रमयाः, नन्दीश्वरसमुद्रादीनां भूतसमुद्रपर्यवसानानामन्वर्थचिन्तायामुदक-मिक्षुरससदृशं वक्तव्यं, स्वयम्भूरमणसमुद्रस्य पुष्करोदसदृशं, 'रुयगाईण'मित्यादि प्रथमोऽसङ्ख्येय-प्रमाणतया रुचकनामा यो द्वीपस्तदादीनां द्वीपसमुद्राणां विष्कम्भपरिक्षेपद्वारान्तराणि ज्योतिष्कं चाविशेषेणासङ्ख्येया वेदितव्यं ।

साम्प्रतमेकैकेन जम्बूद्वीपादिनाम्ना कियन्तो द्वीपाः समुद्राश्च ? इति निर्णेतुकाम आह–

मू. (३०१) *केवइया णं भंते ! जंबुद्दीवा दीवा नामधेज्जेहिं पन्नत्ता ?, गोयमा ! असंखेज्जा जंबुद्दीवा २ नामधेज्जेहिं पन्नत्ता, केवतिया णं भंते ! लवणसमुद्दा २ पन्नत्ता ?, गोयमा ! असंखेज्जा लवणसमुद्दा नामधेज्जेहिं पन्नत्ता, एवं धायतिसंडावि, एवं जाव असंखेज्जा सूरदीवा नामधेज्जेहि य । एगे देवे दीवे पन्नत्ते एगे देवोदे समुद्दे पन्नत्ते, एवं णागे जक्खे भूते जाव एगे सयंभूरमणे दीवे एगे सयंभूरमणसमुद्दे नामधेज्जेणं पन्नत्ते ।*

वृ. 'केवइया ण'मित्यादि, कियन्तो भदन्त ! जम्बूद्वीपा द्वीपाः प्रज्ञप्ताः ?, जम्बूद्वीपादिनाम्ना कियन्त द्वीपाः प्रज्ञप्ता इत्यर्थः, एवमुक्ते भगवानाह–गौतम ! असङ्ख्येय जम्बूद्वीपा द्वीपाः प्रज्ञप्ताः, जम्बूद्वीपा इति नाम्नाऽसङ्ख्येया द्वीपा इति भावः, एवं लवण इति नाम्नाऽसङ्ख्येयाः समुद्राः, घातकीषण्ड इति नाम्नाऽसङ्ख्येया द्वीपाः, कालोद इति नाम्नाऽसङ्ख्येयाः समुद्राः, एवं यावत्सूर्यवरावभास इति नाम्नाऽसङ्ख्येयाः समुद्राः, तथा चाह–'एवं जाव' इत्यादि ।

'एवं' उक्तेन प्रकारेण तावद्वाच्यं यावदसङ्ख्येयाः सूर्या सूर्य इति नाम्ना त्रिप्रत्यवतार-पतितेनेति गम्यते, अरुणादारभ्य देवद्वीपादर्वाक् सर्वेषामेव त्रिप्रत्यवतारतयाऽनन्तरमेवाभिधानात् समुद्राः प्रज्ञप्ताः ।। सम्प्रति देवादीनधकृत्य प्रश्ननिर्वचनसूत्राण्याह–'कइ णं भंते' इत्यादि, कति भदन्त ! देवद्वीपाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! एको देवद्वीपः प्रज्ञप्तः, एवं दशाप्येते एकाकारा वक्तव्याः, तथा चाह–'एव जाव एगे सयंभूरमणे समुद्दे पन्नत्ते' इति ।

मू. (३०२) *लवणस्स णं भंते ! समुद्दस्स उदए केरिसए अस्साएणं पन्नत्ते ?, गोयमा ! लवणस्स उदए आइले रइले लिंदे लवणे कडुए अपेज्जे बहूणं दुपयचउप्पयमिगपसुपक्खिसरिसवाणं णन्नत्त तज्जोणियाणं सत्ताणं ।। कालोयस्स णं भंते ! समुद्दस्स उदए केरिसए अस्साएणं पन्नत्ते ? गोयमा ! आसले पेसले मांसले कालए मासरासिवण्णाभे पगतीए उदगरसेणं पन्नत्ते*

पुक्खरोदगस्स णं भंते ! समुद्दस्स उदए केरिसए पन्नत्ते ?, गोयमा ! अच्छे जच्चे तणुए फालियवण्णाभे पगतीए उदगरसेणं पन्नत्ते ।।

वरुणोदस्स णं भंते० !, गोयमा ! से जहा नामए–पत्तासवेति वा चोयासवेति वा खज्जूरसारेति वा सुपिक्कखोतरसेति वा मेरएति वा काविसायणेति वा चंदप्पभाति वा मनसिलाति वा वरसीधूति वा पवरवारुणी वा अट्ठपिट्ठपरिणिट्ठिताति वा जंबुफलकालिया वरप्पसण्णा उक्कोसमदप्पत्ता ईसिउट्ठावलंबिणी ईसितंबच्छिकरणी ईसिवोच्छेयकरणी आसला मांसला पेसला वण्णेणं उववेता जाव नो तिणट्ठे समट्ठे, वारुणोदए इत्तो इट्ठतरए चेव जाव अस्साएणं प० ।

खीरोदस्स णं भंते ! उदए केरिसए अस्साएणं पन्नत्ते ?, गोयमा ! से जहा नामए–रन्नो चाउरंतचक्कवट्टिस्स चाउरक्के गोखीरे पज्जत्तिमंदग्गिसुकढ्ढिते आउत्तरखंडमच्छंडितोववेते वण्णेणं उववेते जाव फासेण उववेए, भवे एयारूवे सिया ?, नो तिणट्ठे समट्ठे, गोयमा ! खीरोयस्स०

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

एत्तो इट्ठ जाव अस्साएणं पन्नत्ते । घतोदस्स णं से जहा नामए सारतिकस्स गोघयवरस्स मंड सल्लइकण्णियारपुप्फवण्णाभे सुकड्ढितउदारसज्झवीदिते वण्णेणं उववेते जाव फासेण य उववेए, भवे एयारूवे सिया ?, नो तिणट्ठे समट्ठे, इत्तो इट्ठयरो० खोदोदस्स से जहा नामए उच्छूण जच्चपुंडकाण हरियालपिंडराणं भेरूंडछणाण वा कालपोराणं तिभागनिव्वाडियवाडगाणं बलवगणरजंतपरि-गालियमित्ताणं जे य रसे होज्जा वत्थपरिभूए चाउज्जातगसुवासिते इहियपत्थे लहुए वण्णेणं उववेए जाव भवेयारूवे सिया ?, नो तिणट्ठे समट्ठे, एत्तो इट्ठयरा० ।

एवं सेसगाणवि समुद्दाणं भेदो जाव सयंभुरमणस्स, नवरि अच्छे जच्चे पत्थे जहा पुक्खरोदस्स कति णं भंते ! समुद्दा पत्तेगरसा पण्णत्ता ?, गोयमा ! चत्तारि समुद्दा पत्तेगरसा पण्णत्ता, तंजहा—लवणे वरुणोदे खीरोदे घयोदे । कति णं भंते ! समुद्दा पगतीए उदगरसे णं पन्नत्ता ?, गोयमा ! तओ समुद्दा पगतीए उदगरसेणं पन्नत्ता, तंजहा—कालोए पुक्खरोए सयंभुरमणे, अवसेसा समुद्दा उस्सण्णं खोतरसा पं० समणाउसो ! ॥

वृ. 'लवणे णं समुद्दे केरिसए आसाएणं पन्नत्ते ?' इत्यादीनि तु लवणकालोदपुष्करोद-वरुणोदक्षीरोदघृतोदक्षोदोदविषयाणि सप्त सूत्राणि स्वयं भावनीयानि, भावार्थस्य प्रागेवाभिहितत्वात्, शेषाः समुद्रा यथा क्षोदोदः समुद्रस्तथा प्रतिपत्तव्याः, नवरं स्वयम्भूरमणसमुद्रो यथा पुष्करोदः ।

सम्प्रति ये प्रत्येकरसा ये च प्रकृत्युदकरसास्तान् वैविक्त्येनाह—'कइ णं भंते !' इत्यादि, कति भदन्त ! समुद्राः 'प्रत्येकरसाः' समुद्रान्तरैः सहासाधारणरसः प्रज्ञप्ताः ?, भगवानाह—गौतम ! चत्वारः प्रत्येकरसाः प्रज्ञप्तास्तद्यथा—लवणोदः वरुणोदः क्षीरोदः घृतोदः, न हि लवणो वरुणोदः क्षीरोदो घृतोदो वाऽन्यः समुद्रो यथोक्तरसः समस्ति तत एते चत्वारोऽपि प्रत्येकरसाः

'कइ ण'मित्यादि, कति भदन्त ! समुद्राः प्रकृत्या उदकरसाः प्रज्ञप्ताः ?, भगवानाह—गौतम ! त्रयः समुद्राः प्रकृत्या उदकरसेन प्रज्ञप्ताः, तद्यथा—कालोदः पुष्करोदः स्वयम्भूरमणः, अवशेषाः समुद्राः 'उस्सन्नं' बाहुल्येन क्षोदरसाः प्रज्ञप्ताः ॥

मू. (३०३) *कति णं भंते ! समुद्दा बहुमच्छकच्छभाइण्णा पन्नत्ता ?, गोयमा ! तओ समुद्दा बहुमच्छकच्छभाइण्णा पन्नत्ता, तंजहा—लवणे कालोए सयंभुरमणे, अवसेसा समुद्दा अप्पमच्छकच्छभाइण्णा पन्नत्ता समणाउसो ! ।*

लवणे णं भंते ! समुद्दे कति मच्छजातिकुलकोडिजोणीपमुहसयसहस्सा पन्नत्ता ?, गोयमा ! सत्त मच्छजातिकुलकोडीजोणीसमुहसतसहस्सा पन्नत्ता ॥ कालोए णं भंते ! समुद्दे कति मच्छजाति० पन्नत्ता ?, गोयमा ! नव मच्छजातिकुलकोडीजोणी० ॥

सयंभुरमणे णं भंते ! समुद्दे०, अद्धतेरस मच्छजातिकुलकोडीजोणीपमुहसतसहस्सा पन्नत्ता ॥ लवणे णं भंते समुद्दे मच्छाणं केमहालिया सरीरोगाहणा पन्नत्ता गो० ?, जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं पंचजोयणसयाइं ॥ एवं कालोए उ० सत्त जोयणसताइं ।

सयंभूरमणे जहन्नेणं अंगुलस्स असंखेज्जति० उक्कोसेणं दस जोयणसताइं ॥

वृ. 'कइ णं भंते !' इत्यादि, कति भदन्त ! समुद्रा बहुमत्स्यकच्छपाकीर्णाः प्रज्ञप्ताः ?, भगवानाह—गौतम ! त्रयः समुद्राः बहुमत्स्यकच्छपाकीर्णा प्रज्ञप्ता, तद्यथा—लवणः कालोदः स्वयम्भूरमणः, अवशेषाः समुद्रा अल्पमत्स्यकच्छपाकीर्णा प्रज्ञप्ताः न पुनर्निर्मत्स्यकच्छपाः प्रज्ञप्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे श्रमण ! हे आयुष्मन् ! ।

सम्प्रति लवणादिषु मत्स्यकुलकोडिपरिज्ञानार्थमाह–'लवणे णं भंते !' इत्यादि, लवणे भदन्त ! समुद्रे 'कति' किंप्रमाणानि जातिप्रधानानि कुलानि २ जातिकुलानां कोट्यो जातिकुल-कोट्यः मत्स्यानां जातिकुलकोटयो मत्स्यजातिकुलकोटयस्तासां योनिप्रमुखाणि–योनिप्रवाहाणि शतसहस्राणि प्रज्ञप्तानि ?, इहैकस्यामपि योनौ अनेकानि जातिकुलानि भवन्ति, यथा एकस्यामेव छगणयोनौ कृमिकोटिकुलमिलिकाकुलं वृश्चिककुलमित्यादि तत्त उक्तं योनिप्रमुखसतसहस्राणीति, भगवानाह–गो० ! सप्त जलमत्स्यजातिकुलकोटीनां योनिप्रमुखाणि शतसहस्राणि, एवं कालोदसूत्रं स्वयम्भूरमणसूत्रमपि भावनीयं, नवरं कालोदे नव मत्स्यजातिकुलकोटियोनिप्रमुखशतसहस्राणि, स्वयम्भूरमणसमुद्रेऽर्द्धत्रयोदश । अधुना लवणादिषु मत्स्यप्रमाणमभिधित्सुराह– 'लवणे णं भंते !' इत्यादि, लवणे भदन्त समुद्रे मत्स्यानां केमहालिका' किंमहती शरीरावगाहना प्रज्ञप्ता ?, भगवानाह–गो० जघन्येनाङ्गुलासङ्खयेयभाग उत्कर्षेण पञ्च योजनशतानि ।

एवं कालोदस्वयम्भूरमणसमुद्रविषये अपि सूत्रे भावनीये, नवरं कालोदे उत्कर्षतः सप्त योजनशतानि स्वयम्भूरमणे योजनसहस्रम् ॥

मू. (३०४) *केवतिया णं भंते ! दीवसमुद्दा नामधेज्जेहिं पन्नत्ता ?, गोयमा ! जावतिया लोगे सुभा नामा सुभा वण्णा जाव सुभा फासा एवतिया दीवसमुद्दा नामधेज्जेहिं पन्नत्ता ।*

केवतिया णं भंते ! दीवसमुद्दा उद्धारसमएणं पन्नत्ता ?, गोयमा ! जावतिया अड्डाइज्जाणं सागरोवमाणं उद्धारसमया एवतिया दीवसमुद्दा उद्धारसमएणं पन्नत्ता ॥

वृ. 'केवइया णं भंते !' इत्यादि, कियनतो भदन्त ! द्वीपसमुद्रा नामधेयैः प्रज्ञप्ताः ?, यदि नाम सङ्ख्यातुमिष्यन्ते तदा कियन्तस्ते प्रज्ञप्ता इत्यर्थः, इयमत्र भावना–इहैकैकेन नाम्नाऽसङ्ख्येया द्वीपा असङ्ख्येयाः समुद्राः प्रोच्यन्ते अन्तिमान् देवादीन् पञ्च द्वीपान् पञ्च समुद्रान् मुक्त्वा, ततः सर्वसङ्ख्यया कियन्ति द्वीपसमुद्राणां नामानि ? इति, भगवानाह–गौतम ! यावन्ति लोके सामान्यतः 'सुभानि नामानि' शङ्खचक्रस्वस्तिककलशश्रीवत्सादीनि 'शुभा वर्णाः शुभा गन्धाः शुभा रसाः शुभाः स्पर्शा' शुभवर्णवामानि शुभगन्धनामानि शुभरसनामानि शुभस्पर्शनामानि, एतावन्तो द्वीपसमुद्रा नामधेयैः प्रज्ञप्ताः, एतावन्ति द्वीपसमुद्राणां नामधेयानीति भावः ॥ सम्प्रत्युद्धारसाग-रोपमप्रमाणतो द्वीपसमुद्रपरिमाणमाह–

'केवइया णं भंते !' इत्यादि, कियन्तो भदन्त ! द्वीपसमुद्राः 'उद्धारेण' उद्धारपल्योपम-सागरोपमप्रमामेन प्रज्ञप्ताः ?, भगवानाह–हे गौतम ! यावन्तोऽर्द्धतृतीयानामुद्धारसागरोपमाणां उद्धारसमयाः–एकैकेन सूक्ष्मवालाग्रापहारसमया एतावन्तो द्वीपसमुद्रा उद्धारेण प्रज्ञप्ताः, उक्तञ्च–

॥१॥ "उद्धारसागराणं अड्डाइज्जाण जत्तिया समया ।
दुगुणादुगुणपवित्थर दीवोदहि रज्जु एवइया ॥"

मू. (३०५) *दीवसमुद्दा णं भंते ! किं पुढविपरिणामा आउपरिणामा जीवपरिणामा पुग्गलपरिणामा ?, गोयमा ! पुढविपरिणामावि आउपरिणामावि जीवपरिणामावि पुग्गल-परिणामावि । दीवसमुद्देसु णं भंते ! सव्वपाणा सव्वभूया सव्वजीवा सव्वसत्ता पुढविकाइयत्ताए जाव तसकाइयत्ताए उववण्णपुव्वा ?, हंता ! गोयमा ! असति अदुवा अनंतखुत्तो ॥*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वृ. 'दीवसमुद्दा णं भंते!' इत्यादि, । द्वीपसमुद्रा णमिति पूर्ववत् भदन्त! किं पृथिवीपरिणामा अप्परिणामा जीवपरिणामाः पुद्गलपरिणामाः?, भगवानाह–गौतम! पृथिवीपरिणामा अपि अप्परिणामा अपि जीवपरिणामा अपि पुद्गल परिणामा अपि, पृथ्व्यब्जीवपुद्गलपरिणामात्म-कत्वात्सर्वद्वीपसमुद्राणाम्।

'दीवसमुद्देसु णं भंते! सव्वपाणा सव्वभूया' इत्यादि, द्वीपसमुद्रेषु णमिति पूर्ववत् सर्वेष्वपि गम्यते भदन्त! सर्वे 'प्राणाः' द्वीन्द्रियादयः सर्वे 'भूताः' तरवः सर्वे 'जीवाः' पञ्चेन्द्रियाः सर्वे 'सत्त्वाः' पृथिव्यादयः उत्पन्नपूर्वा?, भगवानाह–गौतम! असकृदुत्पन्नपूर्वा अथवाऽनन्तकृत्वः, सर्वेषामपि सांव्यवहारिकराश्यन्तर्गतानां जीवानां सर्वेषु स्थानेषु प्रायोऽनन्तश उत्पादात्।

तदेवं द्वीपसमुद्रवक्तव्यता गता ॥ सम्प्रति द्वीपसमुद्राणां पुद्गलपरिणामत्वात् तेषां च पुद्गलानां विशिष्टपरिणामपरिणतानामिन्द्रियग्राह्यत्वादिन्द्रियविषयपुद्गलपरिणाममाह–

तृतीयः प्रतिपतौ "द्वीप समुद्राधिकारः समाप्तः

–ः प्रतिपत्तिः–३ इन्द्रिय विषयाधिकार ः–

मू. (३०६) *कतिविहे णं भंते इंदियविसए पोग्गलपरिणामे पन्नत्ते?, गोयमा! पंचविहे इंदियविसए पोग्गलपरिणामे पन्नत्ते, तंजहा–सोतिंदियविसए जाव फासिंदियविसए। सोतेंदियविसए णं भंते! पोग्गलरिणामे कतिविहे पन्नत्ते?*

गोयमा! दुविहे पन्नत्ते, तंजहा–सुब्भिसद्दपरिणामे य दुब्भिसद्दपरिणामे य, एवं चक्खि-दियविसयादिएहिवि सुरूवपरिणामे य दुरूवपरिणामे य। एवं सुरभिगंधपरिणामे य दुरभिगंध-परिणामे य, एवं सुरसपरिणामे य दूरसपरिणामे य, एवं सुफासपरिणामे य दुफासपरिणामे य।

से नूनं भंते! उच्चावएसु सद्दपरिणामेसु उच्चावएसु रूवपरिणामेसु एवं गंधपरिणामेसु रसपरिणामेसु फासपरिणामेसु परिणममाणा पोग्गला परिणमंतीति वत्तव्वं सिया? हंता गोयमा उच्चावएसु सद्दपरिणामेसु परिणममाणा पोग्गला परिणमंतित्ति वत्तव्वं सिया।

से नूनं भंते! सुब्भिसद्दा पोग्गला दुब्भिसद्दत्ताए परिणमंति दुब्भिसद्दा पोग्गला सुब्भिसद्दत्ताए परिणमंति?, हंता गोया! सुब्भिसद्दा दुब्भिसद्दत्ताए परिणमंति दुब्भिसद्दा सुब्भिसद्दत्ताए परिणमंति, से णूणं भंते! सुरुवा पुग्गला दूरूवत्ताए परिणमंति दुरूवा पुग्गला सुरूवत्ताए०? हंता गो० एवं सुब्भिगंधा पोग्गला दुब्भिगंधत्ताए परिणमंति दुब्भिगंधा पोग्गला सुब्भिगंधत्ताए परिणमंति?, हंता गो० वं सुफासा दुफासत्ताए?, सुरसा दूरसत्ताए०?, हंता गो०

वृ. 'कइविहे णं भंते!' इत्यादि, कतिविधो भदन्त! इन्द्रियविषयः पुद्गलपरिणामः प्रज्ञप्तः?, भगवानाह–गौतम! पञ्चविध इन्द्रियविषयः पुद्गलपरिणामः प्रज्ञप्तः, तद्यथा–श्रोत्रेन्द्रियविषय इत्यादि सुगमं, 'सुब्भिसद्दपरिणामे' इति शुभः शब्दपरिणामः 'दुब्भिसद्दपरिणामे' इति अशुभः शब्दपरिणामः॥ 'से नूनं भंते!' इत्यादि, अथ 'नूनं' निश्चितमेतद् भदन्त! 'उच्चावचैः' उत्तमाधमैः शब्दपरिणामैर्यावत्स्पर्शपरिणामैः परिणमन्तः पुद्गलाः परिणमन्तीति वक्तव्यं स्यात्?, परिणमन्तीति ते वक्तव्या भवेयुरित्यर्थ, भगवानाह–

'हन्ता गोतमा!' इत्यादि, हन्तेति प्रत्यवधारणे स्यादेव वक्तव्यमिति भावः, परिणामस्य यथावस्थितस्य भावात्, तथा तथा द्रव्यक्षेत्रादिसमाग्रीवशतस्तत्तद्रूपास्कन्दनं हि परिणामः, स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च तत्रास्तीति न कश्चित्तथाऽभिधाने दोषः ।

'से नूनं भंते !' इत्यादि, अथ 'नूनं' निश्चितमेतद् भदन्त ! 'शुभशब्दाः' शुभशब्दरूपाः पुद्गला अशुभशब्दतया परिणमन्ति अशुभशब्दा वा पुद्गलाः शुभशब्दतया ?, भगवानाह–हन्त गो० इत्यादि सुप्रतीतं, एतेन सान्वयं परिणाममाह, अन्यथा तथा गादसतः सत्ताऽनुपपत्ते रतिप्रसङ्गात् एवं रूपरसगन्धस्पर्शेष्वप्यास्मीयात्मीयाभिलापेन द्वौ द्वावालापकौ वक्तव्यौ ॥

तृतीय प्रतिपतौ इन्द्रियविषयाधिकारः समाप्तः

–: प्रतिपतिः ३ – देवाधिकार :–

मू. (२०७) *देवे णं भंते ! महिड्ढीए जाव महानुभागे पुव्वामेव पोग्गलं खवित्ता पभू तमेव अनुपरिवट्टित्ताणं गिण्हित्तए ?, हंता पभू, से केणट्ठेणं भंते ! एवं वुच्चति–देवे णं महिड्ढीए जाव गिण्हित्तए ?, गो० पोग्गले खित्ते समाणे पुव्वामेव सिग्घगती भवित्ता तओ पच्छा मंदगती भवति, देवे णं महिड्ढीए जाव महानुभागे पुव्वंपि पच्छावि सीहे सीहगती (तुरिए तुरियगती) चेव से तेणट्ठेणं गो० एवं वुच्चति जाव एवं अणुपरियट्टित्ताणं गेण्हित्तए ।*

देवे णं भंते ! महिड्ढीए बाहिरए पोग्गले अपरियाइत्ता पुव्वामेव बालं अच्छित्ता अभेत्ता पभुं गंठित्तए ?, नो इणट्ठे समट्ठे १, देवे णं भंते ! महिड्ढिए बाहिरए पुग्गले अपरियाइत्ता पुव्वामेव बालं छित्ता भित्ता पभू गंठित्तए ?, नो इणट्ठे समट्ठे २ ।

देवे णं भंते ! महिड्ढीए बाहिरए पुग्गले परियाइत्ता पुव्वामेव बालं अच्छित्ता अभित्ता पभू गंठित्तए ?, नो इणट्ठे समट्ठे ३, देवे णं भंते ! महिड्ढीए जाव महानुभागे बाहिरे पोग्गले परियाइत्ता पुव्वामेव बालं छेत्ता भेत्ता पभू गंठित्तए ?, हंता पभू ४, तं चेव णं गंठिं छउमत्थे न जाणति न पासति एवंसुहुमं च णं गढिया ३ । देवे णं भंते ! महिड्ढीए पुव्वामेव बालं अच्छेत्ता अभेत्ता पभू दीहिकरित्तए वा हस्सीकरित्तए वा ?, नो तिणट्ठे समट्ठे ४, एवं चत्तारिवि गमा, पढमबिइयभंगेसु अपरियाइत्ता एगंतरियगा अच्छेत्ता अभेत्ता, सेसं तहेव, तं चेव सिद्धिं छउमत्थे न जाणति न पासति एसुहुमं च णं दीहिकरेज्ज वा हस्सीकरेज्ज वा ॥

वृ. 'देवे णं भंते !' इत्यादि, देवो भदन्त ! महर्द्धिकः यावत्करणात महाद्युतिको महाबलो महायशा महानुभाग इति परिग्रहः एषां व्याख्यानं पूर्ववत्, पूर्वमेव 'पुद्गलं' लेष्टादिकं प्रयत्नेनेति गम्यते क्षिप्तवा 'प्रभुः' समर्थस्तमेव पुद्गलं क्षिप्तं भूमावपतितं सन्तम् 'अनुपरिवर्त्य' प्रादक्षिण्येन परिभ्रम्य ग्रहीतुम् ?, भगवनाह–हन्त ! प्रभुः, देवस्य प्रभूतशक्तिकत्वत् ॥ एतदेव जिज्ञासिषुः पृच्छति– 'से केणट्ठेणं भंते !' इत्यादि, भगवानाह–गो० पुद्गलः क्षिप्तः सन् पूर्वमेव शीघ्रगतिर्भवति प्रयत्नजनितसंस्कारस्यातितीव्रत्वात्, पश्चान्मन्दगति संस्कारस्य मन्दमन्दतया भवनात्, देवः पुनः पूर्वमपि पश्चादपि च शीघ्र उत्साहविशेषेण शीघ्रगति साक्षाच्छीघ्रग- मनेन, एतदेव व्याचष्टे–त्वरितस्त्वरितगतिर्भवतीति, 'से एएणट्ठेण'मित्याद्युपसंहारवाक्यं गतार्थम्

'देवे णं भंते !' इत्यादि, देवो भदन्त ! महर्द्धिको यावन्महानुभागो बाह्यान् पुद्गलान् 'अपर्यादाय' अगृहीत्वा बालं अच्छित्वा अभित्वा तदवस्थमेव सन्तमिति भावः तच्छरीरस्य मनागपि विक्रियमनापाद्येति तात्पर्यार्थ प्रभुः 'ग्रन्थयितुं' दृढबन्धनबद्धीकर्तुम् ?, भगवानाह–नायमर्थः समर्थः, बाह्यपुद्गलानादानेन तच्छरीरस्य मनागपि विक्रयानापादने बन्धनस्य कर्तुशक्यत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते देवोऽप्यनिबन्धनां क्रियां न करोति, विशिष्टसामर्थ्यस्यापि निबन्धनविषयत्वादित्यावेदितं

द्वितीयसूत्रं बालं छित्वा भित्वेति विशेषः, शेषं तथैव, अत्रापि प्रथयितुमशक्ति उभयकारण-जन्यस्य कार्यस्यैकतरस्यापि कारणस्याभावेऽभावात् । तृतीयासूत्रे बाह्यान् पुद्गलान् पर्यादाय बालमच्छित्वाऽभित्वेति विशेषः ।

चतुर्थे बाह्यान् पुद्गलानादाय बालं छित्वा मित्वेति विशेषः, अत्र ग्रथयितुं प्रभुरिति वक्तव्यं, कारणसामग्रस्य सम्भवात्, तं च ग्रन्थिं छद्मस्थो मनुष्यो न जानाति न पश्यति, किमुक्तं भवति ? –स बालोऽन्यो वा तटस्थः पुरुषोऽनतिशयी न जानाति ज्ञानेन न पश्यति चक्षुषा 'एवं खलु सुहुमं च णं गढेज्ञा' एवं खलु सूक्ष्मं देवो ग्रथयेत् । एवं बालदीर्घह्रस्वीकरणविषयाण्यपि चत्वारि सूत्राणि भावनीयानि नवरं 'तं च णं सिद्धि'मिति, तां–ह्रस्वीकरणसिद्धिं दीर्घीकरणसिद्धिं वा, शेषं प्रतीतम् ॥ देवसामर्थ्यप्रत्यासत्यैव ज्योतिष्कावधिकृत्याह–

–: देवाधिकारे ज्योतिष्क उद्देशकः :–

मू. (३०८) *अत्थि णं भंते ! चंदिमसूरियाणं हिट्ठिंपि तारारूवा अणुंपि तुल्लावि समंपि तारारूवा अणुंपि तुल्लावि उप्पिंपि तारारूवा अणुंपि तुल्लावि ?, हंता अत्थि, से केणट्ठेणं भंते ! एवं वुच्चति–अत्थि णं चंदिमसूरियाणं जाव उप्पिंपि तारारूवा अणुंपि तुल्लावि ?*

गोयमा ! जहा जहा णं तेसिं देवाणं तवनियमबंभचेरवासाई [उक्कडाइं] उस्सियाइं भवंति तहा तहा णं तेसिं देवाणं एयं पन्नायति अणुत्ते वा तुल्लत्ते वा, से एएणट्ठेणं गोयमा ! अत्थि णं चंदिमसूरियाणं उप्पिंपि तारारूवा अणुंपि तुल्लावि० ।

वृ. 'अत्थि णं भंते ! चंदिमसूरियाण'मित्यादि, अस्ति भदन्त ! चन्द्रसूर्याणां सामान्यतो बहुवचनं, हिट्ठिंपि–क्षेत्रापेक्षयाऽघस्तना अपि 'तारारूपाः' तारारूपविमानाधिष्ठातारो देवा द्युतिविभवलेश्यादिकमपेक्ष्य केचिदणवोऽपि हीना अपीत्यर्थः, केचित्तुल्या अपि, तथा सममपि चन्द्रविमानैः सूर्यविमानैश्च क्षेत्रापेक्षया समश्रेण्यपि व्यवस्थितास्तारारूपाः देवाः ताश्चन्द्रसूर्याणां देवानां द्युतिविभवादिकमप्रेक्ष्य केचिदणवोऽपि केचित्तुल्या अपि तथा चन्द्रविमानानां सूर्यविमानानां चोपर्यपि ये व्यवस्थितास्तारारूपा देवास्तेऽपि चन्द्सूर्याणां देवानां द्युतिविभवादिकमपेक्ष्य केचिदणवोऽपि केचित्तुल्या अपि ?, भ०–'हन्ता अत्ति' यदेतत्वया पृष्टं तत्सर्वं तथैवास्ति

एवमुक्ते पुनः प्रश्नयति–'से केणट्ठेणं भंते ! एवं वुच्चति अत्थि णं चंदिमसूरियाण'मित्यादि, भगवानाह–गौतम ! 'जहा जहा ण'मित्यादि, यता यथा णमिति वाक्यालङ्कारे तेषां देवानां–तारारूपविमानाधिष्ठातृणां प्राग्भवे तपोनियमब्रह्मचर्याणि 'उत्सृतानि' उत्कृष्टानि भवन्ति, तत्र तपो–नमस्कारसहितादि नियस्तु–अहिंसादि ब्रह्मचर्यं–बस्तिनिरोधादि उत्सृतानीत्युपलक्षणं तेन यथा यथाऽनुत्सृतान्यपि द्रष्टव्यं, अन्यथाऽणुत्वायोगात्, तता तथा तेषां देवानां तस्मिन् तातारूप-विमानाधिष्ठातृभवे एवं प्रज्ञायते, तद्यथा–अणुत्वं तुल्यत्वं चेति ।

'से एएणट्ठेण'मित्यादि, किमुक्तं भवति ? –यैः प्राग्भवे तपोनियमब्रह्मचर्याणि मन्दानि कृतानि ते तारारूपविमानाधिष्ठातृदेवभवमनुप्राप्ताश्चन्द्रसूर्येभ्यो देवेभ्यो द्युतिविभवादिकमपेक्ष्य हीना भवन्ति, यैस्तु भवान्तरे तपोनियमब्रह्मचर्याणि अत्युत्कटान्यासेवितानि ते तारारूप-विमानाधिष्ठातृरूपं देवभवमनुप्राता द्युतिविभवादिकमपेक्ष्य अपि राज्ञा सह तुल्यविभवा इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३०९) *एगमेगस्स णं चंदिमसूरियस्स–*

वृ. 'एगमेगस्स णं भंते ! चंदिमसूरियस्से'त्यादि, एकैकस्य भदन्त ! चन्द्रसूर्यस्य, अनेन च पदेन यथा नक्षत्रादीनां चन्द्रः स्वामी तथा सूर्योऽपि, तस्यापीन्द्रत्वाद् (ते) द्युतिं ख्यापयन्ति, कियन्ति नक्षत्राणि परिवारः प्रज्ञप्तः ?, कियन्तो महाग्रहा–अङ्गारकादयः परिवारः प्रज्ञप्तः ?, कियत्यस्तारागणकोटीकोटयः परिवारः प्रज्ञप्तः ?, इह भूयान् पुस्तकेषु वाचनाभेदो गलितानि च सूत्राणि बहुषु पुस्तकेषु ततो यथाऽवस्थितवाचनाभेदप्रतिपत्यर्थं गलितसूत्रोद्धरणार्थं चैवं सुगमान्यपि विव्रियन्ते ।

मू. (३१०) *अट्ठासीतिं च गहा अट्ठावीसं च होइ नक्खत्ता ।*
एगससीपरिवारो एत्तो ताराण वोच्छामि ॥

वृ. भगवानाह–गौतम ! एकैकस्य चन्द्रसूर्यस्याष्टविंशतिर्नक्षत्राणि परिवारः प्रज्ञप्तः, अष्टाशीति- महाग्रहाः परिवारः प्रज्ञप्तः !

मू. (३११) *छावट्ठिसहस्साइंणव चेव सयाइं पंचसयराइं ।*
एगससीपरिवारो तारागणकोडिकोडीणं ॥

वृ. 'छावट्ठिसहस्साइं' इति गाथा, षट्षष्टि सहस्राणि नव चैव शतानि पञ्चसप्ततानि एकशशि-परिवारस्तारागणकाटीकोटीनां, कोटीकोटीति कोट्या एव संज्ञा, ततस्तारागणकोटीनामिति द्रष्टव्यम् ॥

मू. (३१२) *जंबूदीवे णं भंते ! दीवे मंदरस्स पव्वयस्स पुरच्छिमिल्लाओ चरिमंताओ केवतियं अबाधाए जोतिसं चार चरति ?, गोयमा ! एक्कारसहिं एक्कवीसेहिं जोयणसएहिं, अबाधाए जोतिसं चारं चरति, एवं दक्खिणिल्लाओ पच्चत्थिमिल्लाओ उत्तरिल्लाओ एक्कारसहिं एक्कवीसेहिं जोयण० जाव चारं चरति । लोगंताओ भंते ! केवतियं अबाधाए जोतिसे पन्नत्ते ?, गोयमा ! एक्कारसहिं एक्कारेहिं जोयणसतेहिं अबाधाए जोतिसे पन्नत्ते ।*

इमीसे णं भंते ! रयणप्पभाए पुढवीए बहुसमरमणि० सत्तहिं नउएहिं जोयणसतेहिं अबाहाए जोतिसं (सव्व) हेट्ठिल्ले तारारूवे चारं चरति, अट्ठहिं जोयणसतेहिं आबाधाए सूरविमाणे चारं चरति, अट्ठहिं असीएहिं जोयणसतेहिं अबाधाए चंदविमामे चारं चरति, नवहिं जोयणसएहिं अबाहाए सव्वउवरिल्ले तारारूवे चारं चरति ।

सव्वहेट्ठिमिल्लाओ णं भंते ! तारारूवाओ केवतियं अबाहाए सूरविमाणे चारं चरइ ? केवइयं अबाहाए चंदविमाने चारं चरइ ? केवतियं आबाहाए सव्वउवरिल्ले तारारूवे चारं चरइ ?, गोयमा ! सव्वेहिट्ठिल्लाओ णं दसहिं जोयणेहिं सूरविमाणे चारं चरति नउतीए जोयणेहिं अबाधाए चंदविमाणे चारं चरति दसुत्तरे जोयणसते अबाधाए सव्वोपरिल्ले तारारूवे चारं चरइ

सूरविमाणाओ णं भंते ! केवतियं अबाधाए चंदविमाने चारं चरति ? केवतियं सव्वउवरिल्ले तारारूवे चारं चरति ?, गोयमा ! सूरविमाणाओ णं असीए जोयणेहिं चंदविमाणे चारं चरति, जोयणसय अबाधाए सव्वोवरिल्ले तारारूवे चारं चरति ।

चंदविमाणाओ णं भंते ! केवतियं आबाधाए सव्वउवरिल्ले तारारूवे चारं चरति ?, गोयमा चंदविमाणाओ णं वीसाए जोयणेहिं अबाधाए सव्वउवरिल्ले तारारूवे चारं चरइ, एवामेव सपुव्वावरेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दसुत्तरसतजोयणबाहल्ले तिरियमसंखेज्जे जोतिसविसए पन्नत्ते ॥

वृ. 'जंबूदीवे ण'मित्यादि जम्बूद्वीपे द्वीपे मन्दरस्य पर्वतस्य सकलतिर्यग्लोकमध्यवर्त्तिनं कियत्क्षेत्रमबाधया सर्वतः कृत्वा 'ज्योतिषं' ज्योतिश्चक्रं 'चारं चरति' मण्डलगत्या परिभ्रमति भगवानाह–गौतम! एकादश योजनशतानि 'एकविंशानि' एकविंशत्यधिकानि अबाधया ज्योतिषं चारं चरति, किमुक्तं भवति ?–मेरोः सर्वत एकादश योजनशतान्येकविंशत्यधिकानि मुक्त्वा तदनन्तरं चक्रवालतया ज्योतिश्चक्रं चारं चरति ॥ 'लोगंताओ णं भंते!' इत्यादि लोकान्तादर्वाग् णमिति वाक्यालङ्कारे भदन्त! कियत्क्षेत्रमबाधया अपान्तराले कृत्वा ज्योतिषं प्रज्ञप्तम्?, भगवानाह–गौ० एकादश योजनशतानि 'एकादशानि' एकादशोत्तराण्यबाधया कृत्वा ज्योतिषं प्रज्ञप्तम्

'इमीसे णं भंते!' इत्यादि, 'अस्यां' यत्र वयं व्यवस्थिता रत्नप्रभायां पृथिव्यां बहुसमरमणीयात् भूमिभागात् आरभ्य कियदबाधया कृत्वाऽधस्तनं तारारूपं ज्योतिषं चारं चरति?, कियदबाधया कृत्वा सूर्यविमानं चारं चरति?, कियदबाधया कृत्वा चन्द्रविमानं, कियदबाधया कृत्वोपरितनं तारारूपं ज्योतिषं चारं चरति?, भगवानाह–गौतम! सप्त योजनशतानि नवत्यधिकान्यबाधया कृत्वाऽधस्तनं तारारूपं चारं चरति, अष्ट योजनशतान्यबाधया कृत्वा सूर्यविमानं, अष्टौ योजनशतान्यशीतान्यबाधया कृत्वा चन्द्रविमानं, जव योजनशतानि पूर्णान्यबाधया कृत्वोपरितनं तारारूपं ज्योतिषं चारं चरति। हेट्ठिल्लाओ णं भंते!' इत्यादि, अधस्तनाद् भदन्त! तारारूपात् कियदबाधया कृत्वा सूर्यविमानं चारं चरति ? कियदबाधया कृत्वा चन्द्रविमानं चारं चरति ? कियदबाधयोपरितनं तारारूपम्?, भगवानाह–गौ० दश योजनान्यबाधया कृत्वा सूर्यविमानं चारं चरति, तत एवाधस्तनात्तारारूवान्नवतिं जनान्यबाधया कृत्वा चन्द्रविमानं तत एवाधस्तनात्तारारूपाद्दशोत्तरं योजनशतमबाधया कृत्वोपरितनं तारारूपं ज्योतिषं चारं चरति।

'सूरविमाणाओ णं भंते!' इत्यादि, सूर्यविमानाद् भदन्त! कियदबाधया कृत्वा चन्द्रविमानं चारं चरति?, कियदबाधयोपरितनं तारारूपम्?, भग०–गौ० अशीतिं योजनान्यबाधया कृत्वा चन्द्रविमानं चारं चरति, तत एव सूर्याविमानाद्योजनशतमबाधया कृत्वोपरितनं तारारूपम्

'चंदविमाणाओ णं भंते!' इत्यादि, चन्द्रविमानादुभदन्त! कियदबाधया कृत्वोपरितन तारारूपं चारं चरति? भगवानाह–गौतम! अशीतिं योजनान्यबाधया कृत्वा चन्द्रविमानं चारं चरति, तत एव सूर्यविमानाद्योजनशतमबाधया कृत्वोपरितनं तारारूपम्।

'चंदविमाणाओ णं भंते!' इत्यादि, चन्द्रविमानादुभदन्त! कियदबाधया कृत्वोपरितनं तारारूपं चारं चरति?, भगवानाह–गौतम! विंशतिर्योजनान्यबाधया कृत्वोपरितनं तारारूपं चारं चरति।

मू. (३१३) *जंबूदीवे णं भंते! कयरे नक्खत्ते सव्वब्भिंतरिल्लं चारं चरंति? कयरे नक्खत्ते सव्वबाहिरिल्लं चारं चरइ? कयरे नक्खत्ते सव्वउवरिल्लं चारं चरति? कयरे नक्खत्ते सव्वहिट्ठिल्लं चारं चरति? गो० जंबूदीवे णं दीवे अभी इनक्खत्ते सव्वब्भिंतरिल्लं चारं चरति मूले नक्खत्ते सव्बाहिरिल्लं चारं चरइ साती नक्खत्ते सव्वोवरिल्लं चारं चरति भरणीनक्खत्ते सव्वहेट्ठिल्लं चारं चरति।*

वृ. 'जंबूदीवे णं भंते!' इत्यादि, जम्बूद्वीपे भदन्त! द्वीपे कतरत्, 'बहूनां प्रश्ने डतमश्चे'ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहूनामपि निर्द्धार्ये डतरः, नक्षत्रं सर्वाभ्यन्तरं—सर्वेषामन्येषां नक्षत्राणामभ्यन्तरं 'चारं' मण्डलगत्या परिभ्रमणं चरति ? कतरत् नक्षत्रं 'सर्वबाह्यं' सर्वेषां नक्षत्रामां बहिर्वर्त्तिनं चारं 'चरति' प्रतिपद्यते कतरत् नक्षत्रं 'सर्वोपरितनं' सर्वेषां नक्षत्राणामुपरितनं चारं चरति ?, कतरत् नक्षत्रं सर्वाधस्तनं चारं चरति ?, भग० गौ० अभिजिन्नक्षत्रं सर्वाभ्यन्तरं चारं चरति, मूलः पुनर्नक्षत्रं सर्वबाह्यं चारं चरति, स्वातिर्नक्षतरं सर्वोपरितन चारं चरति, भरणीनक्षत्रं सर्वाधस्तनं चारं चरति, उक्तञ्च—

॥१॥ "सव्वब्भिंतरऽभीई मूलो पुण सव्वबाहिरो होइ ।
सव्वोवरिं तु साई भरणी पुण सव्वहेट्ठिलिया ॥"

मू. (३१४) *चंदविमाणे णं भंते ! किंसंठिते पन्नत्ते ?, गोयमा ! अद्धकविट्ठगसंठाणसंठिते सव्वफालितामए अब्भुगतमूसितपहसिते वण्णओ, एवं सूरविमाणेवि नक्खत्तविमाणेवि ताराविमाणेवि अद्धकविट्ठसंठाणसंठिते ।*

चंदविमाणे णं भंते ! केवतियं आयामविक्खंभेणं ? केवतियं परिक्खेवेणं ? केवतियं बाहल्लेणं पन्नत्ते ?, गोयमा ! छप्पन्ने एगसट्ठिभागे जोयणसस्स आयामविक्खंभेणं तं तिगुणं सविसेसं परिक्खेवेणं अट्ठावीसं एगसट्ठिभागे जोयणस्स बाहल्लेणं पन्नत्ते ।

सूरविमाणस्सवि सच्चेव पुच्छा, गोयमा ! अडयालीसं एगसट्ठिभागे जोयणस्स आयामविक्खंभेणं तं तिगुणं सविसेसं परिक्खेणं चउवीस एगसट्ठिभागे जोयणस्स बाहल्लेणं पन्नत्ते ।

एवं गहविमाणेवि अद्धजोयणं आयामविक्खंभेणं सविसेसं परि० कोसं बाहल्लेणं प० ताराावि० अद्धकोसं आयामविक्खंभेणं तं तिगुणं सविसेसं परि० पंचधणुसयाइं बाहल्लेणं प०

वृ. 'चंदविमाणे णं भंते !' इत्यादि, चन्द्रविमानं भदन्त ! 'किंसंस्थितं' किमिव संस्थितं २ प्रज्ञप्तम् ?, भगवानाह—गौतम ! 'अर्द्धकपित्थसंस्थानसंस्थितम्' उत्तानीकृतमर्द्धकपित्थं तस्येव यत् संस्थानं तेन संस्थितमर्द्धकपित्थसंस्थानसंस्थितं, आह—यदि चन्द्रविमानमुत्तानीकृतार्द्धकपित्थसंस्थानसंस्थितं तत उदयकालेऽस्तमयकाले वा यदिवा तिर्यक् परिभ्रमत् पौर्णमास्यां कस्मात्तदर्द्धकपित्थफलाकारं नोपलभ्यते ?, कामं शिरस उपरि वर्त्तमानं वर्त्तुलमुपलभ्यते, अर्द्धकपित्थस्य शिरस उपरि दूरमवस्थापितस्य परभागादर्शनतो वर्त्तुलतया दृश्यमानत्वात्, उच्यते, इहार्द्धकपित्थफलाकारं चन्द्रविमानं न सामस्त्येन प्रतिपत्तव्यं, किन्तु यस्य विमानस्य पीठं, तस्य च पीठस्योपरि चन्द्रदेवस्य—ज्योतिश्चक्रराजस्य प्रासादः, स च परासादस्तथा कथञ्चनापि व्यवस्थितो यथा पीठेन सह भूयान् वर्त्तुल आकारो भवति, स च दूरभावादेकान्ततः समवृत्ततया जनानां प्रतिभासते ततो न कश्चिद्दोषः, न चैतत् स्वमनीषिकाया विजृम्भितं, यत एतदेव जिनभद्रगणिक्षमाश्रमणेन विशेषणवत्यामाक्षेपपुरस्सरमुक्तम्—

॥१॥ "अद्धकविट्ठागारा उदयत्थमणंमि कह न दीसंति ।
ससिसूराण विमाणा तिरियक्खेत्ते ठियाणं च ॥

॥२॥ उत्ताणद्धकविट्ठागारं पीढं तदुवरिं च पासाओ ।
वट्टालेखेण ततो समवट्टं दूरभावातो ॥

तथा सर्व—निरवशेषं स्फटिकविशेषमणिमयं सर्वस्फटिकमयं तथाऽभ्युद्गता—आभिमुख्येन सर्वतो विनिर्गता उत्सृताः—प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा तया सितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभ्युद्गतोत्सृतप्रभासितं, यावत्करणात् 'विविहमणिरयणभत्तिचित्ते वाउद्धुयविजयवेजयन्ती पडागछत्तातिछत्तकलिए तुंगे गगनतलमणुलिहंतसिहरे जालंतररयणपंजलोम्मीलियमणिकण-गथूभियागे वियसियसयवत्तपुंडरीयतिलगरयणद्धचंदचित्ते अंतो बहिं च सण्हे तवणिज्जवालुयापत्थडे सुहफासे सस्सिरीयरूवे पासाईए दरिसणिज्जे अभिरूवे पडिरूवे' इति, तत्र विविधा—अनेकप्रकारा मणयः—चन्द्रकान्तादयो रत्नानि च—कर्केतनादीनि तेषां भक्तयो—विच्छित्तिविशेषास्ताभिश्चित्रं—अनेकरूपवद् आश्चर्यवद्वा विविधमणिरत्नभक्तिचित्रं, तथा वातोद्धूता—वायुकम्पिता विजयः—अभ्युदयस्तत्संसूचिका वैजयन्त्यभिधानाः पताका विजयवैजयन्त्यः, अथवा विजया इति वैजयन्तीनां पार्श्वकर्णिका उच्यन्ते तत्प्रधाना वैजयन्त्यो विजयवैजयन्त्यः—पताकास्ता एव विजयवर्जिता वैजयन्त्यः।

छत्रातिच्छत्राणि—उपर्युपरिस्थितातपत्राणि तैः कलितं वातोद्धूतविजयवेजयन्ती-पताकाकलितं तुङ्गं—उच्चम् अत एव 'गगनतलमणुलिहंतसिहरं' गगनतलमनुलिखद्—अभिलङ्घयद् गगनतलानुलिखच्छिखरं, तथा जालानि—जालकानि तानि च भनभित्तिषु लोके प्रतीतानि तदन्तरेषु विशिष्टशोभनिमित्तं रत्नानि यत्र तज्जालान्तररत्नं, सूत्रे चात्र प्रथमैकवचनलोपो द्रष्टव्यः, तथा पञ्जराद् उन्मीलितमिव—बहिष्कृतमिव पञ्जरोन्मीलितमिव, यथा हि किल किमपि वस्तु पञ्जराद्—वंशादिमयप्रच्छादनविशेषाद् बहिष्कृतमत्यन्तमविनष्टच्छायत्वात् शोभते तथा तदपि विमानमिति भावः, तथा मणिकनकानां सम्बन्धिनी स्तूपिका—शिखरं यस्य तत् मणिकनकस्तूपिकाकं, तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादौ प्रतिकृतित्वेन स्थितानि तिलकाश्च—मित्यादिषु पुण्ड्राणि रत्नमयाश्चार्द्धचन्द्रा द्वारादिषु तैश्चित्रं विकसितशतपत्रपुण्डरी-कतिलकरत्नार्द्धचन्द्रचित्रम्, 'अंतो बहिं च सण्हे' इत्यादि अञ्जनपर्वतोपरिसिद्धायतनद्वारवत्।

'एवं सूरविमाणेवी'त्यादि, एवं—चन्द्रविमानमिव सूर्यविमानमपि वक्तव्यं ग्रहविमानमपि नक्षत्रविमानमपि ताराविमामपि, ज्योतिर्विमानानां प्राय एकरूपत्वात्।

'चंदविमाणे णं भंते!' इत्यादि, चन्द्रविमानं भदन्त! कियदायामविष्कम्भेन कियत्परिक्षेपेण कियद्वाहल्येन प्रज्ञप्तम्?, भगवानाह—गौतम! षट्पञ्चाशतमेकष्टिभागान् योजनास्यायाविष्कम्भेन, तहेवायामविष्कम्भमानं त्रिगुणं सविशेषं परिक्षेपेणं, अष्टाविंशतिमेकषष्टिभागान् योजनस्य बाहल्येन प्रज्ञप्तम्॥ 'सूरविमाणे णं भंते!' इत्यादि प्रश्नसूत्रं प्राग्वत्, भगवानाह—गौतम! अष्टचत्वारिंशत-मेकषष्टिभागान् योजनस्यायामविष्कम्भेन, तदेवायामविष्कम्भमानं त्रिगुणं सविशेषं परिक्षेपेण, चतुर्विंशतिमेकषष्टिभागान् योजनस्य बाहल्येन।

'गहविमाणे णं भंते!' इत्यादि प्रश्नसूत्रं तथैव, भगवानाह—गौ० अर्द्धयोजनमायाम-विष्कम्भेन तदेवार्द्धयोजनं त्रिगुणं सविशेषं परिक्षेपेण क्रोशं बाहल्येन।

'नक्खत्तविमाणे णं भंते!' इत्यादि प्रश्नसूत्रं तथैव, भगवानाह—गौ० क्रोशमेकमायाम-विष्कम्भेन तदेवायामविष्कम्भपरिमाणं त्रिगुणं सविशेषं परिक्षेपेण अर्द्धक्रोशं च बाहल्येन प्र०

'ताराविमाणे णं भंते!' इत्यादि प्रश्नसूत्रं तथैव, भगवानाह—गौतम! अर्द्धक्रोशमायाम-विष्कम्भेन तदेवायामविष्कम्भायामपरिमाणं त्रिगुणं सविशेषं परिक्षेपेण, पञ्चधनुःशतानि बाहल्येन प्रज्ञप्तम्, एवंपरिमाणं च ताराविमानमुत्कृष्टस्थितिकस्य तारदेवस्य सम्बन्धि द्रष्टव्यं, जघन्यस्थिकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु पञ्चधनुःशतान्यायामविष्कम्भे अर्द्धतृतीयानि धनुःशतानि बाहल्येन, उक्तञ्च तत्वार्थभाष्ये–

''अष्टचत्वारिंशद्योजनैकषष्टिभागाः सूर्यमण्डलविष्कम्भः, चन्द्रमसः षट्पञ्चाशत्, ग्रहाणामर्द्धयोजनं, गव्यूतं नक्षत्राणां, सर्वोत्कृष्टायास्ताराया अर्द्धक्रोशः, जघन्यायाः पञ्चधनुःशतानि, विष्कम्भार्द्धबाहल्याश्च भवन्ति सर्वे सूर्योदयो नृलोके'' इति ॥

मू. (३१५) *चंदविमाणे णं भंते! कति देवसाहस्सीओ परिवहंति?, गोयमा! चंदविमाणस्स णं पुरच्छिमेणं सेयाणं सुभगाणं सुप्पभाणं संखतलविमलनिम्मलदधिघणगोखीरफेणरययणिगरप्पगासाणं (महुगुलियपिंगलक्खाणं) थिरलट्ठ [पउट्ठ] वट्टपीवरसुसिलिट्ठसुविसिट्ठतिक्खदाढाविडंबितमुहाणं रत्तुप्पलपत्तमउयसुकुमालतालुजीहाणं [पसत्थसत्थवेरुलियभिसंतकक्कडनहाणं] विसालपीवरोरुपडिपुण्णविउलखंधाणं मिउविसयपसत्थसुहुमलक्खणविच्छिण्णकेसरसडोवसोभिताणं। चंकमितललियपुलितधवलगव्वितगतीणं उस्सियसुणिम्मियसुजायअप्फोडियणंगूलाणं वइरामयनक्खाणं वइरामयदन्ताणं वयरामयादाणं तवणिज्जजीहामं तवणिज्जतालुयाणं तवणिज्जजो- त्तगसुजोतिताणं कामगमाणं पीतिगमाणं मनोगमाणं मनोरमाणं मनोहराणं अमियगतीणं अमिबलवीरियपुरिसकारपरक्कमाणं महता अप्फोडियसीहनातीयबोलकलयलरवेमं महुरेण मनरहेणं य पूरिंता अंबरं दिसाओ य सोभयंता चत्तारि देवसाहस्सीओ सीहरूवधारिणं देवाणं पुरच्छिमिल्लं बाहं परिवहंति*

चंदविमाणस्स णं दक्खिणेणं सेयाणं सुभगाणं सुप्पभाणं संखतलविमलनिम्मलदधिघनगोखीरफेणरययणियरप्पगासाणं वइरामयकुंभजुयलसुट्ठितपीवरवरवइरसोंडघट्टियदित्तसुरत्तपउमप्पकासाणं अब्भुण्णयगुणा णं तवणिज्जविसालचंचलचलंतचवलकण्ण- विमलुज्जलाणं मधुवण्णभिसंतणिद्धपिंगलपत्तलतिवण्णमणिरयणलोयणाणं अब्भुग्गतमउल- मल्लियाणं धवलसरिससंठितणिव्वणदकसिणफालियामयसुजायदंतमुस- लोवसोभिताणं।

—कंचणकोसीपविट्ठदंतग्गविमलमणिरयणरुइरपेरंतचित्तरूवगविरायिताणं तवणिज्जविसालतिलगपमुहपरिमंडिताणं नानामणिरयणमुद्धगेवेज्जबद्धगलयवरभूसणाणं वेरुलियविचित्त दंडणिम्मलवइरामयतिक्खलट्ठअंकुसकुंभजुयलंतरोदियाणं तवणिज्जसुबद्धकच्छदप्पियबलुद्धराणं जंबूणयविमलघणमंडलवइरामयलालाललियतालणाणामणिरयणघण्टपासगरयतामयरज्जूबद्धलंबितघंटाजुयलमहुरसरमणहराणं अल्लीणपमाण- जुत्तवट्टियसुजातलपक्खणपसत्थवणिज्जवालगत्तपरिपुच्छमाणं।

—उयवियपडिपुन्नकुम्मचलणलहुविक्कमाणं अंकामयणक्खाणं तवणिज्जातालुयाणं तवणिज्जजीहाणं तवणिज्जजोत्तगसुजोतियाणं कामकमाणं पीतिकमाणं मनोगमाणं मनोरमाणं मनोहराणं अमियगतीणं अमियबलवीरियपुरिसकारपरक्कमाणं महया गंभीरगुलगुलाइयरवेणं महुरेणं मनहरेणं पूरेंता अंबरं दिसाओ य सोभयंता चत्तारि देवसाहस्सीओ गयरूवधारीणं देवाणं दक्खिणिल्लं बाहं परिवहंति। चंदविमाणस्स णं पच्चत्थिमेणं सेताणं सुभगाणं सुप्पमाणं चंकमियललियपुलितचलच- वलककुदसालीणं सण्णयपासाणं संगयपासाणं सुजायपासाणं मियमाइतपीणरइतपासाणं झसविहगसुजात कुच्छीणं पसत्थमिद्धमधुगुलितभिसंतपिंगलक्खाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसालपीवरोरुपडिपुण्णविपुलखंधाणं वट्टपडिपुण्णविपुलकवोलकलिताणं घणणिचितसुबद्ध-लक्खणुण्णतईसिआणयवसभोट्ठाणं ।

—चंकमितललितपुलियचक्कवालचवलगव्वितगतीणं पीवरोरुवट्टियसुसंठितकडीणं ओलंबपलंबलक्खमपमाणजुत्तपसत्थरमणिज्जवालगंडाणं समखुरवालधाणीणं समतिहि-ततिक्खग्गसिंगाणं तणुसुहुमसुजातणिद्धलोमच्छविधराणं उवचितमंसलविसालपडि-पुण्णखुद्दमुहपुंडराणं (खंधपएससुंदराणं) वेरुलियभिसंतकडक्खुसुणिरिक्खाणाणं जुत्तप्पमा-णप्पधाणलक्खणपसत्थरमणिज्जगग्गरगलसोमिताणं घग्घरगसुबद्धकण्ठपरिमंडियाणं ।

—नानामणिकणगरयणघण्टवेयच्छगसुकयरतियमालियाणं वरघंटागलगलियसोभंत-सस्सिरीयाणं पउमुप्पलभसलसुरभिमालाविभूसिताणं वइरखुराणं विविधविखुराणं फालियामय-दंताणं तवणिज्जजीहाणं तवणिज्जतालुयाणं तवणिज्जजोत्तगसुजोत्तियाणं कामकमाणं पीतिकमाणं मनोगमाणं मनोरमाणं मनोहराणं अमितगतीणं अमियबलवीरियपुरिसयारपरक्कमाणं महया गंभीरगज्जियरवेणं मधुरेण मणहरेण य पूरेंता अंबरं दिसाओ य सोभयंता चत्तारि देवसाहस्सीओ वसभरूवधारिणं देवाणं पच्चत्थिमिल्लं बाहं परिवहंति ।

चंदविमाणस्स णं उत्तरेणं सेयाणं सुभगाणं सुप्पभाणं जच्चाणंतरमल्लिहायणाणं हरिमेलामदुलमल्लिपच्छाणं घणणिचितसुबद्धलक्खणुण्णताचंकमि (चंचुच्चि) यललियपुलिय-चलचवलचंचलगतीणं लंघणवग्गणधावणधारणतिवइजईणसिक्खिवगईणं सण्णतपासाणं ललंतलामगलायवरभूसणाणं संणयपासाणं संगतपासाणं सुजायपासाणं मितसायितपी वरइयपासाणं झसविहगसुजातकुच्छीणं पीणपीवरवट्टिसुसंटितकडीणं ओलंबपलंबलक्खम-पमाणजुत्तपसत्थरमणिज्जवालगंडाणं तणुसुहुमसुजायणिद्धलोमच्छदिवराणं मिउविसय-पसत्थसुहुमलक्खणविकिण्णकेसरवालिधराणं ।

ललिपसविलासगति (ललंतथासगल) लाडवरभूसणाणं मुहमडगोचूलचमरथासग-परिमंडियकडीणं तवणिज्जखुराणं तवणिज्जजीहाणं सवणिज्जतालुयाणं तवणिज्जजोत्तगसुजोति-याणं कामगमाणं पीतिगमाणं मनोगमाणं मनोरमाणं मनोहराणं अमितगतीणं अमियबल-वीरियपुरिसयारपरक्कमाणं महया हयहेसियकिलकिलाइयरवेण महुरेणं मणहरेण य पूरेंता अंबरं दिसाओ य सोभयंति चत्तारि देवसाहस्सीओ हयरूवधारीणं उत्तरिल्लं बाहं परिवहंति ।

एवं सूरविमाणस्सवि पुच्छा, गोयमा ! सोलस देवसाहस्सीओ परिवहंति पुव्वकमेणं ।

एवं गहविमाणस्सवि पुच्छा, गोयमा ! अट्ठ देवसाहस्सीओ परिवहंति पुव्वकमेण, दो देवाणं साहस्सीओ पुरत्थिमिल्लं बाहं परिवहंति दो देवाणं साहस्सीओ दक्खिणिल्लं दो देवाणं साहस्सीओ पच्चत्थिमं दो देवसाहस्सी हयरूवधारीणं उत्तरिल्लं बाहं परिवहंति ।

एवं णक्खत्तविसाणस्सवि पुच्छा, गोयमा ! चत्तारि देवसाहस्सीओ परिवहंति, सीहरूवधारीणं देवाणं पंचदेवसता पुरत्थिमिल्लं बाहं परिवहंति एवं चउद्दिसिंपि ॥

वृ. 'चंदविमाणे णं भंते !' इत्यादि, चन्द्रविमानं णमिति वाक्यालङ्कारे भदन्त ! कति देवसहस्राणि परिवहन्ति ?, भगवानाह—गौतम ! षोडश देवसहस्राणि परिवहन्ति, तद्यथा—पूर्वेण—पूर्वतः, दक्षिणेन पश्चिमेन उत्तरेण, तत्र पूरवेण सिंहरूपधारिणां देवानां चत्वारि सहस्राणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिवहन्ति, दक्षिणेन गजरूपधारिणां देवानां चत्वारि सहस्राणि, पश्चिमेन वृषभरूपधारिणां देवानां चत्वारि सहस्राणि, उत्तरेणाश्वरूपधारिणां देवानां चत्वारि देवसहस्राणि, इयमत्र भावना–

चन्द्रादिविमानानि तथाजगत्स्वाभाव्यान्निरालम्बनान्येव वहन्त्यवतिष्ठन्ते, केवलमभियोगिका देवास्ते तथाविधनामकर्मोदयशात्समानजातीयानां हीनजातीयानां वा निजस्फातिविशेष-प्रदर्शनार्थमात्मानं बहु मन्यमानाः प्रमोदभृतः सततवहनशीलेषु विमानेष्वधः स्थित्वा केचित्सिंह-रूपाणि केचिद्गजरूपाणि केचिद्वृषभरूपाणि केचिदश्वरूपाणि कृत्वा तानि विमानानि वहन्ति, न चैतदनुपपन्नं यथा हि कोऽपि तथाविधाभियोग्यनाम- कर्मोपभोगभागी दासोऽन्येषां समानजातीयानां हीनजातीयानां वा पूर्वपरिचितानामेवमहं नायकस्यास्य सुप्रसिद्धस्य संमत इति निजस्फातिविशेषप्रदर्शनार्थं सर्वमपि स्वोचितं कर्म्म नामकसमक्षं प्रमुदितः करोति, तथाऽऽभियोगिका देवास्तथाविधाभियोग्यनामकर्मोपभोगभाजः समानजातीयानां हीनजातीयानां वा देवानामन्येषामेवं वयं समृद्धा यत्सकललोकप्रसिद्धानां चन्द्रादीनां विमानानि वहाम इति निजस्फातिविशेषप्रदर्शनार्थमात्मानं बहु मन्यनमाना उक्तप्रकारेण चन्द्रादिविमानानि वहन्ति। एवं सूर्यादिविमानविषयाण्यपि सूत्राणि भावनीयानि, अत्र जम्बूद्वीपप्रज्ञप्तिसत्के सङ्-ग्रहणिगाथे–

॥१॥ "सोलस देवसहस्सा वहंति चंदेसु चेव सूरेसु।
अट्ठेव सहस्सारं एक्कक्कंमि गहविमाणे ॥

॥२॥ चत्तारि सहस्साइं नक्खत्तंमि य हवंति एक्केक्के।
दो चेव सहस्साइं तारारूवेक्कमेक्कंमि ॥

क्वचित्सिंहादीनां वर्णनं दृश्यते तद्बहुषु पुस्तकेषु न दृष्टमित्युपेक्षितं, अवश्यं चेत्तद्व्याख्यानेन प्रयोजनं तर्हि जम्बूद्वीपप्रज्ञप्तिटीकां जम्बूद्वीपप्रज्ञप्तिटीका परिभावनीया, तत्र सविस्तरं तद्व्याख्यानस्य कृतत्वात् ॥

मू. (३१६) *एतेसि णं भंते चंदिमसूरियगहगणनक्खत्ततारारूवाणं कयरे कयरेहिंतो सिग्घगती वा मंदगती वा?, गोयमा! चंदेहिंतो सूरा सिग्घगती सूरेहिंतो गहा सिग्घगति गहेहिंतो नक्खत्ता सिग्घगती नक्खत्तेहिंतो तारा सिग्घगती, सव्वप्पगती चंदा सव्वसिग्घगतीओ तारारूवे*

वृ. 'एएसि ण'मित्यादि, एतेषां चन्द्रसूर्यग्रहनक्षत्रतारारूपाणां मध्ये कतरे कतरेभ्योऽ-ल्पगतयः? कतरे कतरेभ्यः शीघ्रगतयः?, भगवानाह–गौतम! चन्द्रेभ्यः सूर्या शीघ्रगतयः सूर्येभ्यो ग्रहाः शीघ्रगतयः ग्रहेभ्यो नक्षत्रामि शीघ्रगतीनि नक्षत्रेभ्यस्ताराररूपाः शीघ्रगतयः, चन्द्रेणा-होरात्राक्रमणीयस्य क्षेत्रस्य सूर्यादिभिर्हीनहीनतरेणाहोरात्रेणाक्रम्यमाणत्वात्, एतच्च सविस्तरं चन्द्रप्रज्ञप्तौ सूर्यप्रज्ञप्तौ भावितमिति ततोऽवधार्यं, एवं च सर्वमन्दगतयश्चन्द्राः सर्वशीघ्रगतयस्ताराः

मू. (३१७) *एएसि णं भंते! चंदिमजावतारारूवाणं कयरे २ हिंतो अप्पिड्डिया वा महिड्डिया वा?, गोयमा! तारारूवेहिंतो णक्खत्ता महिड्डीया नक्खत्तेहिंतो गहा महिड्डीया गहेहिंतो सूरा महिड्डीया सूरेहिंतो चंदा महिड्डीया, सव्वप्पड्डिया तारारूवा सव्वमहिड्डीया चंदा ॥*

वृ. 'एएसि ण'मित्यादि, एतेषां भदन्त! चन्द्रसूर्यग्रहनक्षत्रतारारूपाणां मध्ये कतरे कतरेभ्योऽल्पर्द्धिकाः कतरे कतरेभ्यो महर्दधिकाः। भगवानाह–गौतम! तारकेभ्यो नक्षत्राणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महर्द्धिकानि बृहत्स्तिथिकत्वात्, एवं नक्षत्रेभ्यो ग्रहा महर्द्धिकाः, ग्रहेभ्यः सूर्या महार्द्धिकाः, सूर्येभ्यश्चन्द्रा महर्द्धिकाः, एवं सर्वाल्पर्द्धयस्ताराः सर्वमहर्द्धयश्चन्द्राः ।

सम्प्रति जम्बूद्वीपे ताराणां परस्परमन्तरप्रतिपादनार्थमाह—

मू. (३१८) *जंबूदीवे णं भंते ! दीवे तारारूवस्स २ एस णं केवतियं अबाधाए अंतरे पण्णत्ते ?, गोयमा ! दुविहे अंतरे पण्णत्ते, तंजहा—वाघातिमे य निव्वाघाइमे य । तत्थ णं जे से वाघातिमे से जहन्नेणं दोन्नि य छावट्ठे जोयणसए उक्कोसेणं बारस जोयणसहस्सइं दोण्णिय य बायाले जोयणसए तारारूवस्स २ य आबाहाए अंतरे पन्नत्ते । तत्थ णं जे से निव्वाघातिमे से जहन्नेणं पंचधणुसयाइं उक्कोसेणं दो गाउयाइं तारारूव जाव अंतरे प० ॥*

वृ. 'जंबूदीवे णं भंते ! दीवे'इत्यादि, जम्बूद्वीपे भदन्त ! द्वीपे तारायास्ताराया एतदन्तरं कियदबाधया प्रज्ञप्म् ?, भगवानाह—गौतम ! द्विविधमन्तरं प्रज्ञप्तं, तद्यथा—व्याघातिमं निर्व्याघातिमं च, व्याहननं व्याघातः—पर्वतादिस्खलनं तेन निर्वृत्तं व्याघातिमं 'मावादिम्' इति इमप्रत्ययः, निर्व्वाघातिम—व्याघातिमान्निर्गतं स्वाभाविकमित्यर्थ, तत्र यन्निर्व्याघातिमं तज्जघन्येन पञ्च धनुःशतानि उत्कर्षतो द्वे गव्यू, तत्र यद् व्याघातिमं तज्जघन्येन द्वो योजनशते 'षट्षष्टे' षट्षष्ट्यधिके, एतच्च निषधकूटादिकमपेक्ष्य वेदितव्यं, तथाहि—

निषधपर्वतः स्वभावादप्युच्चैश्चत्पारि योजनशतानि तस्योपरि पञ्च योजनशतोच्चानि कूटानि, तानि च मूले पञ्च योजनशतान्यायामविष्कम्भाभ्यां मध्ये त्रीणि योजनशतानि पञ्चसत्पत्यधिकानि उपर्यर्द्धतृतीयानि, तेषां चोपरितनभागसमश्रेणिप्रदेशे तथाजगत्स्वाभाव्यादष्टावष्टौ योजनान्युभयतोऽबाधया कृत्वा ताराविमानानि परिभ्रमन्ति, ततो जघन्यतो व्याघातिममन्तरं द्वे योजनशते षट्षष्ट्यधिके भवति, उत्कर्षतो द्वादश योजनसहस्राणि द्वे जोयनशते द्वाचत्वारिंशदधिके, एतच्च मेरुमपेक्ष्य द्रष्टव्यं, तथाहि—मेरुर्दशय योजनसहस्राणि मेरश्चोभयतोऽबाधया एकादश योजनशतान्येकविंशत्यधिकानि, ततः सर्वसङ्ख्यामीलने द्वादश योजनसहस्राणि द्वे च योजनशते द्वाचत्वारिंशदधिके, कचित्सर्वत्र 'वाघाइए निव्वाघाइए' इति पाठस्तत्र व्याघातो—यथोक्तरूपोऽस्यास्तीति व्याघातिकम्, 'अत्रोऽनेकस्वरा'दिति मत्वर्थीय इकप्रत्ययः, व्याघातिकान्निर्गतं निर्व्याघातिकमिति

मू. (३१९) *चंदस्स णं भंते ! जोतिसिंदस्स जोतिसरन्नो कति अग्गमहिसीओ पन्नत्ताओ ?, गोयमा ! चत्तारि अग्गमहिसीओ पन्नत्ताओ, तंजहा—चंदप्पभा दोसिणाभा अच्चिमाली पभंकरा, एत्थ णं एगमेगाए देवीए चत्तारि चत्तारि देवसाहस्सीओ परिवारे य, पभू णं ततो एगमेगा देवी एगमेगा देवी अन्नाइं चत्तारि २ देविसहस्साइं परिवारं विउव्वित्तए, एतमेव सपुव्वावरेणं सोलस देवसाहस्सीओ पन्नताओ, से तुं तुडिए ॥*

वृ. 'चंदस्स णं भंते !' इत्यादि, चन्द्रस्य भदन्त ! ज्योतिषेन्द्रस्य ज्योतिषराजस्य 'कति' कियत्सङ्ख्याका अग्रमहिष्यः प्रज्ञप्ताः ?, भगवानाह—गौतम ! चतस्रोऽग्रमहिष्यः प्रज्ञप्ताः, तद्यथा—चन्द्रप्रभा १ 'दोसिणाभा' इति ज्योत्स्नाभा २ अर्चिर्माली ३ प्रभङ्करा ४ ।

'तत्थ ण'मित्यादि, 'तत्र' तासु चतसृषु अग्रमहिषीषु मध्ये एकैकस्या देव्याश्चत्वारि २ देवीसहस्राणि परिवारः प्रज्ञप्तः, किमुक्तं भवति ?—एकैकाऽग्रमहिषी चतुर्णां २ देवीसहस्राणां पट्टराज्ञी, एकैव सा इत्थम्भूताऽग्रमहिषी परिवारावसरे तथाविधां ज्योतिष्कराजचन्द्रदेवेच्छामुपलभ्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभुरन्यानि आत्मसमानरूपाणि चत्वारि देवीसहस्राणि विकुर्वितुं, स्वाभाविकानि पुनः 'एवमेव' उक्तप्रकारेणैव 'सपूर्वापरेण' पूर्वापरमीलनेन षोडश देवीसहस्राणि चन्द्रदेवस्य भवन्ति, 'सेत्तं तुडिए' तदेतावत् 'तुटिकम्' अन्तःपुरम्, आह चूर्णिकृत्–'तुटिकमन्तःपुरमुपदिश्यते' ।

मू. (३२०) पभू णं भंते! चंदे जोतिसिंदे जोतिसराया चंदवडिंसए विमाने सभाए सुधम्माए चंदंसि सीहासणंसि तुडिएण सद्धिं दिव्वाइं भोगभोगाइं भुंजमणे विहरित्तए ?, नो तिणट्ठे समट्ठे

से केणट्ठेणं भंते! एवं वुच्चति नो पभू वंदो जोतिसराया चंदवडेंसए विमाणे सभाए सुधम्माए चंदंसि सीहासणंसि तुडिएणं सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए ।

गोयमा! चंदस्स जोतिसिंदस्स जोतिसरण्णो चंदवडेंसए विमाणे सभाए सुधम्माए माणागवंसि चेतियखंभंसि वइरामएसु गोलवट्टसमुग्गएसु बहुयाओ जिनसकहाओ सन्निखित्ताओ चिट्ठंति, जाओ णं चंदस्स जोतिसिंदस्स जोतिसरन्नो अन्नेसिं च बहूणं जोतिसियाणं देवाण य देवीण य पच्चणिज्ञाओ जाव पज्जुवासणिज्ञाओ, तासिं पणिहाए नो पभू चंदे जोतिसराया चंदवडेंसए विमाणे सभाए सुधम्माए चंदंसि सीहासमंपि तुडिएण सद्धिं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए, अदुत्तरं च णं गोयमा । पभू चंदे जोतिसिंदे जोतिसराया चंदवडिंसए विमाणे सभाए सुधम्माए चंदंसि सीहासणंसि चउहिं सामानियसाहस्सीहिं जाव सोलसहिं आयरक्खदेवाणं साहस्सीहिं अन्नेहिं बहूहिं जोतिसिएहिं देवेहिं देवीहि य सद्धिं संपुरिवडे महयाहयनट्टगीइवाइयतंतील-तालतुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे विहरित्तए ।

केवलं परियारतुडिएण सद्धिं भोगभोगाइं बुद्धीए नो चेव णं मेहुणत्तियं ।

वृ. 'पभू णं भंते !' इत्यादि, प्रभुर्भदन्त ! चन्द्रो ज्योतिषेन्द्रो ज्योतिषराजश्चन्द्रावतंसके विमाने सभायां सुधर्मायां चन्द्रे सिंहासने 'तुटिकेन' अन्तःपुरेण सार्द्धं दिव्यान् भोगभोगान् भुञ्जमानः 'विहर्तुम्' आसितुम् ?, भगवानाह–गौतम ! नायमर्थ समर्थ ॥ अत्रैव कारणं पृच्छति–'से केणट्ठेण' मित्यादि तदेव, भगवानाह–गौतम ! चन्द्रस्य ज्योतिषेन्द्रस्य ज्योतिषराजस्य चन्द्रावतंसके विमाने सभायां सुधर्मायां माणवकचैत्यस्तम्भे वज्रमयेषु गोलवृत्तसमुद्गकेषु तेषु च यथा तिष्ठन्ति तथा विजयराजधानीगतसुधर्मासभायामिव द्रष्टव्यं, बहूनि जिनसक्थीनि संनिक्षिप्तानि तिष्ठन्ति यानि, सूत्रे स्त्रत्वनिर्देशः प्राकृतत्वात्, चन्द्रस्य ज्योतिषेन्द्रस्य ज्योतिषराजस्य अर्च्चनीयानि पुष्पादिभिर्वन्दनीयानि विशिष्टैः स्तोत्रैः स्तोतव्यानि पूजनीयानि वस्त्रदिभि सत्कारणीयानि आदरप्रतिपत्या सन्माननीयानि जिनोचितप्रतिपत्या कल्याणं मङ्गलं दैवतं चैत्यमिति पर्युपासनीयानि, 'तासिं पणिहाए' इति तेषां प्रमिधया तान्याश्रित्य नो प्रभुश्चन्द्रो ज्योतिषराजश्चन्द्रावतंसके विमाने यावद्विहर्त्तुमिति । 'पभू णं गोयमा' इत्यादि, प्रभुर्गौतम ! चन्द्रो ज्योतिषेन्द्रो ज्योतिषराजश्चन्द्रावसंतके विमाने सभायां सुधर्म्मायां चन्द्रसिंहासने चतुर्भि सामानिकसहस्रैश्चतसृभिरग्रमहिषीभिः सपरिवाराभिस्तिसृभिः पर्षद्भिः सप्तभिःरनीकैः सप्तभिःरनीकाधिपतिभिः षोडशभिरात्मरक्षकदेव-सहस्रैरन्यैश्च बहुभिर्ज्योति-षैर्देवैर्देवीभिश्च सार्द्धं संपरिवृतः 'महयाहये' त्यादि पूर्ववत् यावद्दिव्यान् भोगभोगान् भुञ्जानो भुञ्जानो विहर्त्तुमिति, न पुः 'मैथुनप्रत्ययं' मैथुननिमित्तं दिव्यान स्पर्शादीन् भुञ्जानो विहर्त्तु प्रभुरिति

मू. (३२१) सूरस्स णं भंते ! जोतिसरन्नो कइ अग्गमहिसीओ प० गो० चत्तारि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अग्गमहिसीओ प० –

सूरप्पभा आयावाभा अच्चिमाली पभंकरा, एवं अवसेसं जह चंदस्स णवरिं सूरवडिंसए विमाणे सूरंसि विमाणे सूरंसि सीहासणंसि, तहेव सव्वेसिंपि गहाईणं चत्तारि अव्वगमहिसीओ० तंजहा–

विजया वेजयंती जयंती अपराजिया, तेसिंपि तहेव ।

वृ. 'सूरस्स णं भंते !' इत्यादि, सूरस्य भदन्त ! ज्योतिषेन्द्रस्य ज्योतिषराजस्य कति अग्रमहिष्यः प्रज्ञप्ताः ?, भगवानाह–गौतम ! चतस्रोऽग्रमहिष्यः प्रज्ञप्ताः, तद्यथा–सूर्यप्रभा आतपाभा अर्चिर्माली प्रभङ्करा । 'तत्थ णं एगमेगाए देवीए' इत्यादि चन्द्रवत्तावद्वक्तव् यावत् 'नो चेव णं मेहुणवत्तियं' नवरं सूर्यावतंसके विमाने सूर्ये सिंहासने इति वक्तव्यं, शेषं तथैव ॥

मू. (३२२) *चंदविमाणे णं भंते ! देवाणं केवतियं कालं ठिती पन्नत्ता ?, एवं जहा ठितीपए तहा भणियव्वा जाव ताराणं ॥*

वृ. 'चंदविमाणे णं भंते !' इत्यादि, चन्द्रविमाने भदन्त ! देवानां कियन्तं कालं स्थिति ?, भगवानाह–गौतम ! जघन्येन चतुर्भागपल्योपमं–चतुर्भागः पल्योपमस्य चतुर्भागपल्योपममर्द्धपिप्पलीवत्, अत्रापि चिरन्तनव्याकरणेऽयं समासः, यदिवा चतुर्भागमात्रं पल्योपमं चतुर्भागपल्योपममिति विशेषणसमासः पल्योपमस्य चतुर्भाग इत्यर्थ, उत्कर्षतः पल्योपमं वर्षशतसहस्राभ्यधिकं, चन्द्रविमाने हि चन्द्रदेव उत्पद्यते अन्ये च तत्सामानिकात्मरक्षादयः, तत्रात्मरक्षादीनां यथोक्ता जघन्या स्थिति उत्कृष्टा चन्द्रमसां तत्सामानिकानां वा ।

'चंदविमाणे णं भंते !' इत्यादि, चन्द्रविमाने भदन्त ! देवीनां कियन्तं कालं स्थिति प्रज्ञप्ता ?, भगवानाह–गो० जघन्येन चतुर्भागपल्योपममुत्कर्षतः पल्योपमार्द्धं पञ्चाशता वर्षसहस्रैरभ्यधिकं

एवं सूर्यादिविमानविषयाण्यपि स्थितिसूत्राणि वाच्यानि, नवरं सूर्यविमाने देवानां जघन्यतश्चतुर्भागपल्योपममुत्कर्षतः पल्योपमं वर्षसहस्राभ्यधिकं, देवीनां जघन्यतश्चतुर्भागपल्योपममुत्कर्षतोऽर्द्धपल्योपमं पञ्चभिर्वर्षशतैरभ्यधिकं, ग्रहविमानदेवानां जघन्यतश्चतुर्भागपल्योपममुत्कर्षतः परिपूर्णं पल्योपमं, देवीनां उत्कृष्टमर्धपल्योपमं जघन्येन चतुर्भागपल्योपमं, नक्षत्रविमाने देवानां जघन्यतश्चतुर्भागपल्योपममुत्कर्षतोऽर्द्धपल्योपमं, देवीनां उत्कृष्टतोऽधिकचतुर्भागपल्योपमं जघन्येन चतुर्भागपल्योपमं, ताराविमाने जघन्येनाष्टभागपल्योपममुत्कर्षतश्चतुर्भागपल्योपमं, देवीनां जघन्यतोऽष्टभागपल्योपममुत्कर्षतः सातिरेकमष्टभागपल्योपममिति ॥

मू. (३२३) *एतेसि णं भंते ! चंदिमसूरियगहनक्खत्ततारारूवाणं कयरे२हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! चंदिमसूरिया एते णं दोण्णिवि तुल्ला सव्वत्थोवा संखेज्जगुणा नक्खत्ता संखेज्जगुणा गहा संखेज्जगुणाओ तारगाओ ॥*

वृ. 'एतेसि णं भंते !' इत्यादि, एतेषां भदन्त ! चन्द्रसूर्यग्रहनक्षत्रतारारूपाणां कतरे कतरेभ्योऽल्पाः कतरे कतरेभ्यो बहुका वा ? कतरे कतरैस्तुल्याः ?, अत्र विभक्तिपरिणामेन तृतीया व्याख्येया, कतरे कतरेभ्यो विशेषाधिकाः ?, भगवानाह–

गौतम ! चन्द्रसूर्या एते द्वयेऽपि परस्परं तुल्याः, प्रतिद्वीपं प्रतिसमुद्रं चन्द्रसूर्याणां समसङ्ख्याकत्वात्, शेषेभ्यो ग्रहादिभ्यः सर्वेऽपि ताराः सङ्ख्येयगुणाः प्रभूतकोटीकोटीगुणत्वात् ॥

तृतीयप्रतिपत्तौ– देवाधिकारे ज्योतिष्क उद्देशकः समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३) देवाधिकारे—वैमानिक उद्देशकः—१

वृ. उक्ता ज्योतिषवक्तव्यता, सम्प्रति वैमानिकवक्तव्यतामाह—

***मू. (३२४)** कहि णं भंते! वेमाणियाणं देवाणं विमाणा पन्नत्ता ?, कहि णं भंते! वेमाणिया देवा परिवसंति ?, जहा ठाणपदे तहा सव्वं भाणियव्वं नवरं परिसाओ भाणितव्वाओ जाव सुक्के, अन्नेसिं च बहूणं सोधम्मकप्पवासीणं देवाण य देवीण य जाव विहरंति ॥*

वृ. 'कहि णं भंते ! वेमाणियाण'मित्यादि, क्व भदन्त ! वेमानिकानां देवानां विमानानि प्रज्ञप्तानि ?, तथा क्व भदन्त ! वेमानिका देवाः परिवसन्ति ?, भगवानाह—गौतम ! अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद् भूमिभागाद् रूचकोपलक्षितादिति भावः ऊर्द्धं चन्द्रसूर्यग्रहनक्षत्रतारारूपाणामप्युपरि बहूनि योजनानि बहूनि योजनशतानि बहूनि योजनसहस्राणि बहूनि योजनशतसहस्राणि बह्वीर्योजनकोटीकोटीः ऊर्द्ध दूरमुत्प्लुत्य—बुद्धया गत्वा, एतच्च सार्द्धरज्जूपलक्षणं, तथा चोक्तम्—

॥१॥ ''सोहम्मंमि दिवड्ढा अड्डाइज्जा य रज्जु माहिंदे ।
बंभंमि अद्धपंचम छ अच्चुए सत्त लोगंते ॥

'एत्थ ण'मित्यादि, 'अत्र' एतस्मिन् सार्द्धरज्जूपलक्षिते क्षेत्रे ईषत्प्राग्भारादर्वाक् सौधर्मेशानसनत्कुमारमाहेन्द्रब्रह्मलोकलान्तकशुक्रसहस्रारानतप्राणतारणाच्युतग्रैवेयकानुत्तरेषु स्थानेषु 'अत्र' एतस्मिन् वैमानिकानां चतुरशीतिर्विमानावासशतसहस्राणि सप्तनवति सहस्राणि त्रयोविंशतिर्विमानानि भवन्तीत्याख्यातानि, इयं च सङ्ख्या— ''बत्तीसअट्ठवीसा बारसअट्ठ चउरो सयसहस्सा'' इत्यादिसङ्ख्यापरिमीलनेन भावनीया 'ते णं विमाणा' इत्यादि, तानि विमानानि सर्वरत्नमयानि 'अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा समिरीया सउज्जोया पासाईया दरिसणिज्जा अभिरूवा पडिरूवा ।''

'एत्थ ण'मित्यादि, एतेषु विमानेषु बहवो वैमानिका देवाः परिवसन्ति तद्यथा—सौधर्मा ईशाना यावद् ग्रैवेयका अनुत्तराः, एते च व्यपदेशास्तात्स्थ्यादवगन्तव्याः, यथा पञ्चालदेशनिवासिनः पञ्चालाः, कते च कथम्भूताः ? इत्याह— 'ते ण'मित्यादि, ते सौधर्मादयोऽच्युतपर्यवसाना यथाक्रमं मृगमहिषवराहसिंहच्छगलदर्दुरहयगजपतिभूवगखड्गवृषभाङ्कविडिमप्रकटितचिह्नमुकुटाः, मृगादिरूपाणि प्रकटितानि चिह्नानि मुकुटे येषां ते तथेति भावः, तद्यथा—सौधर्मदेवा मृगरूपप्रकटितचिह्नमुकुटाः ईशानदेवा महिषरूपप्रकटितचिह्नमुकुटाः सनत्कुमारदेवा वराहरूपप्रकटितचिह्नमुकुटाः माहेन्द्रदेवाः सिंहरूपप्ररूटितमुकुटचिह्नाः ब्रह्मलोकदेवाश्छगलरूपप्रकटितमुकुटचिह्नाः लान्तकदेवा दर्दुररूपप्रकटितमुकुटचिह्नाः शुक्रकल्पदेवा हयमुकुटचिह्नाः सहस्रारकल्पदेवा गजपतिमुकुटचिह्नाः आनतकल्पदेवा भुजगमुकुटचिह्नाः, प्राणतकल्पदेवाः खड्गमुकुटचिह्नाः, खड्गः चतुष्पदविशेष आटव्यः, आरणकल्पदेवा वृषभमुकुटचिह्नाः अच्युतकल्पदेवा विडिममुकुटचिह्नाः तथा प्रशिथिलवरमुकुटकिरीटधारिणः ।

'वरकुंडलुज्जोवियाणणा' इति वराभ्यां कुण्डलाभ्यामुद्योतितं—भास्वरीकृतमाननं येषां त वरकुण्डलोदद्योतिताननाः, 'मउडदित्तसिरया' मुकुटेन दीप्तं शिरो येषां ते मुकुटदीप्तशिरसः रक्ताभा—रक्तवर्णा, एतदेव सविशेषमाह—'पउमपम्हगोरा' पद्मपक्ष्मवत्—पद्मपत्रवद् गौराः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पद्मपक्ष्मगौराः श्रेयांसः–परमप्रशस्याः शुभवर्णगन्धस्पर्शा 'उत्तमविकुर्विणः' उत्तमं विकुर्वन्तीत्ये-वंशीला उत्तमविकुर्विणः, 'विविहवत्थमल्लधारी' विविधानि शुभात् शुभतराणि वस्त्राणि माल्यानि च धारयन्तीत्येवंशीला विविधवस्त्रमाल्यधारिणः महर्द्धिका महाद्युतयो महायशसो महाबला महानुभागा महासौख्याः तथा 'हारविराइयवच्छा कडगतुडियथंभियभुया संगयकुंडलमट्ठगंडयल-कण्णपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली कल्लाणगपवरमल्लाणुलेवणा भासुरबोंदी पलंबवणमालधरा दिव्वेणं वण्णेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संजयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा' इति प्रागुक्तासुरकुमारवन्नेतव्यम्

'ते णं तत्थ साणं साण'मित्यादि, ते वैमानिका देवाः शक्रादयोऽच्युतपर्यवसानास्तत्र स्वस्वकल्पे स्वेषां स्वेषां विमानावासशतसहस्राणां स्वेषां स्वेषां सामानिकसहस्राणां स्वेषां स्वेषां त्रायस्त्रिंशकानां स्वेषां स्वेषां लोकपालानां स्वासां स्वासामग्रमहिषीणां सपरिवाराणां स्वासां २ पर्षदां स्वेषां स्वेषामनीकानां स्वेषां स्वेषामनीकाधिपतीनां स्वेषां स्वेषामात्मरक्षदेवसहस्राणां, अन्येषां च बहूनां देवानां देवीनां च 'आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महयरगत्तं आणाईसरसेनावच्चं कारेमाणा पालेमाणा महयाहयनट्टगीयवाइयतंतीलतालतुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंती'ति।

'कहि णं भंते !' इत्यादि, क्व भदन्त ! सौधर्मकदेवानां विमानानि प्रज्ञप्तानि ?, तथा क्व भदन्त ! सौधर्मकल्पदेवाः परिवसन्ति ?, भगवानाह–गौतम ! 'जम्बुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरिमगहनक्ख-त्ततारारूवाणं बहूणि जोयणाइं बहूणि जोयणसयाइं बहूणि जोयणसहस्साइं बहूणि जोयणसयसहस्साइं उड्ढं दूर उप्पइत्ता' इति प्राग्वत्।

'एत्थ णं' 'अत्र' एतस्मिन् सार्द्धपञ्चूपलक्षिते क्षेत्रे सौधर्मो नाम कल्पः प्रज्ञप्त–, स च प्राचीनापाचीनायत् उदग्दक्षिणविस्तीर्ण अर्द्धचन्द्रसंस्थानसंस्थितः मेरोर्दक्षिणतस्तस्य भावात्, 'अर्चिर्माली' अर्चीषि–किरणास्तेषां माला अर्चिर्माला सा अस्यास्तीत अर्चिर्माली सर्वतः किरणमाला-परिवृत इत्यर्थः, एतदेवोपमया द्रढयति–इङ्गालराशिवर्णाभि : प्रभाभिः पद्मरागादिसम्बन्धिनी-भिर्जाज्वल्यमानतया देदीप्यमानाङ्गारराशिवर्णाभप्रभाणां अत्यन्तोत्कटतया साक्षादङ्गारराशिरिव ज्वलन्नदभासत इति भावः, असङ्ख्येया योजनकोटाकोटयः परिक्षेपेण सर्वात्मना रत्नमयोऽच्छः, यावत्करणात् 'सण्हे लण्हे घट्ठे मट्ठे' इत्यादिपरिग्रहः।

'तत्थ ण'मित्यादि, 'तत्थ ण'मिति पूर्ववत्, सौधर्मकल्पे द्वात्रिंशद् विमानावासशतसहस्राणि भवन्तीत्याख्यातं मयां शेषैश्च तीर्थकृद्भिः ॥ 'ते णं विमाणा' इत्यादि, तानि विमानानि सर्वात्मना रत्नमयानि अच्छानि यावत्प्रतिरूपाणि, अत्रापि यावत्करणात् 'सण्हा लण्हा घट्ठा मट्ठा' इत्यादिपरि-ग्रहः ॥ 'तेसि ण'मित्यादि, तेषां विमानानां बहुमध्ये पञ्चावतंसका–विमानावतंसकाः प्रज्ञप्ताः, तद्यथा–'असोगवडिंसए' इति, पूर्वस्यां दिशि अखोसावतंसकः दक्षिणस्यां सप्तपर्णावतंसकः अपरस्यां चम्पकावतंसकः उत्तरस्यां चूतावतंसकः मध्ये तेषां सौधर्मावतंसकः।

'ते णं वडेंसया' इत्यादि, ते पञ्चाप्यवतंसकाः सर्वात्मना रत्नमया अच्छा यावत्प्रतिरूपाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रापि यावत्करणात् 'सण्हा लण्हा घट्ठा मट्ठा' इत्यादिपरिग्रहः । 'एत्थ ण'मित्यादि, 'अत्र' एतेषु द्वात्रिंशतशतसहस्रसङ्ख्येषु विमानेषु बहवः सौधर्म्मकाः–सौधर्मा एव सौधर्म्मका देवः परिवसन्ति 'महिड्डिया जाव दस दिसाओ उज्ञोवेमाणा' अत्र यावत्करणात् 'महायसा महाबला महानुभागा महासोक्खा हारविराइयवच्छा' इत्यादिप्रागुक्तपरिग्रहः, 'ते णं तत्थ साणं साणं विमाणाणं साण२ सामाणियाणं साणं २ अग्गमहिसीणं साणं २ परिसाणं साणं २ अणियाणं साणं २ अनियाहिवईणं साणं २ आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं जाव विहरंति' सुगमं ।

'सक्के य एत्थ' इत्यादि, अत्र–एतस्मिन् सौधर्मे कल्पे शक्र–शकनात् शक्र देवेन्द्रो देवराजः परिवसति, स च कथम्भूतः ? इत्याह–'वज्रपाणि' वज्रं पाणावस्य वज्रपाणि, असुरपुरदारणात् पुरन्दरः, 'सयक्कऊ' इति शतं क्रतूनां–प्रतिमानां–अभिग्रहविशेषाणां श्रमणोपासकपञ्चम-प्रतिमारूपाणां कार्त्तिकश्रेष्ठिभवापेक्षया यस्य स शतक्रतुः, 'सहस्सक्खे' इति सहस्रमक्ष्णां यस्यासौ सहस्राक्षः, इन्द्रस्य हि किल मन्त्रिणां पञ्च शतान्यात्मना सह परिपूर्णानि सन्ति तदीयनामक्ष्णामिन्द्र-प्रयोजनव्यापृतत्वाद् इन्द्रसम्बन्धीनि विवक्षितानीति सहस्राक्षत्वं, 'मघवं' इति मघा–महामेघास्ते यस्य वशे सन्ति स मघवान्, पाको नाम बलवान् रिपुः स शिष्यते–निराक्रयते येन स पाकशासनः, दक्षिणार्द्धलोकाधिपति मेरोर्दक्षिणतः सर्वस्यापि तदाभाव्यत्वात्, द्वात्रिंशद्विमानावासशतसह-स्राधिपति, सौधर्मे कल्पे एतावतां विमानावासशतसहस्राणां भावात्, एरावणवाहनः, एरावणनाम्नो गजपतेस्तद्वाहनस्य भावात्, सुरेन्द्रः सौधर्मवाहिनां सुराणां सर्वेषामपि तदाज्ञावर्त्तित्वात् ।

'अरयंबरवत्थधरे' इति अरजांसि–रजोरहितानि स्वच्छतया अम्बरवद् अम्बराणि वस्त्राणि धारयतीति अरजोऽम्बरवस्त्रधरः, 'आलइयमालमउडे' इति माला च मुकुटश्च मालामुकुटं आलिङ्गितं–आविद्धं मालामुकुटं येन स आलिङ्गितमालामुकुटः, कृतकण्ठेमाल आविद्धशिरसिमुकुट इति भावः, 'नवहेमचारुचित्तचंचलकुण्डलविलिहिज्जमाणगंडे' नवमिव–प्रत्यग्रमिव हेम यत्र ते नवहेमनी नवहेमभ्यां चारुचित्राभ्यां चञ्चलाभ्यां कुण्डलाभ्यां विलिख्यमानौ गण्डौ यस्य स तथा, 'महिड्डिए जाव दसदिसाओ उज्ञोवेमाणे पभासेमाणे' अत्र यावत्करणात् 'महज्जुईए महाबले महायसे' इत्यादि पूर्वोक्तपरिग्रहः, सौधर्मे कल्पे सौधर्मावतंसके विमाने सभायां सुधर्मायां शक्र सिंहासने 'से णं तत्थ बत्तीसाए' इत्यादि स तत्र द्वात्रिंशतो विमानावासशतसहस्राणां चतुरशीतेः सामानिकसहस्राणां त्रयस्त्रिंशतस्त्रायस्त्रिंशकानां चतुर्णां लोकपालानामष्टनामग्रमहिषीणां सपरि-वाराणां तिसृणां पर्षदां सप्तानामनीकानां सप्तानामनीकाधिपतीनां चतसृणां चतुरशीतीनामा-त्मरक्षदेवसहस्राणां अन्येषां च बहूनां सौधर्मकल्पवासिनां वैमानिकानां देवानां देवीनां च 'आहेवच्चं जाव भुंजमाणे विहरइ' अत्र यावत्करणात् 'पोरेवच्चं सामित्तं भट्टित्त'मित्यादि परिग्रहः ॥

मू. (३२५) *सक्कस्स णं भंते ! देविंदस्स देवरन्नो कति परिसाओ प० गा० तओ परिसाओ प० तंजहा–समिता चंडा जाता, अब्भिंतरिया समिया मज्झिमिया चंडा बाहिरिया जाता । सक्कस्स णं भंते ! देविंदस्स देवरन्नोअब्भिंतरियाए परिसाए कति देवसाहस्सीओ प० ?, मज्झिमिया परि० तहेव बाहिरियाए पुच्छा, गो० सक्कस्स देविंदस्स देवरन्नो अब्भिंतरियाए परिसाए बारस देवसाहस्सीओ प० मज्झिमियाए परिसाए चउदस देवसाहस्सीओ प० बाहिरियाए परिसाए सोलस देवसाहस्सीओ पण्णत्ताओ, तहा अब्भिंतरियाए परिसाए सत्त देवीसयाणि मज्झिमियाए छच्च देवीसयाणि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाहिरियाए पंच देवीसयाणि पन्नत्ताइं। सक्कस्स णं भंते! देविंदस्स देवरन्नो अब्भितरियाए परिसाए देवाणं केवइयं कालं ठिई पन्नत्ता? एवं मज्झिमियाए बाहिरियाएवि, गोयमा! सक्कस्स देविंदस्स देवरन्नो अब्भितरियाए परिसाए पंच पलिओवमाइं ठिती पन्नत्ता मज्झिमियाए परिसाए चत्तारि पलिओवमाइं ठिती, पन्नत्ता बाहिरियाए परिसाए देवाणं तिन्नि पलिओवमाइं ठिती पन्नत्ता,

देवीणं ठिती, अब्भितरियाए परिसाए देवीणं तिन्नि पलिओवमाइं ठिती पन्नत्ता मज्झमियाए दुन्नि पलिओवमाइं ठिती पन्नत्ता बाहिरियाए परिसाए एगं पलिओवमं ठिती पन्नत्ता, अट्ठो सो चेव जहा भवणवासीणं।

कहि णं भंते! ईसाणकाणं देवाणं विमाणा पन्नत्ता? तहेव सव्वं जाव ईसाणे एत्थ देविंदे देव० जाव विहरति। ईसाणस्स णं भंते! देविंदस्स देवरन्नो कति परिसाओ पन्नत्ताओ?, गोयमा! तओ परिसाओ पन्नत्ताओ, तंजहा—समिता चंडा जाता, तहेव सव्वं नवरं अब्भितरियाए परिसाए दस देवसाहस्सीओ पन्नत्ताओ, मज्झिमियाए परिसाए बारस देवसाहस्सीओ, बाहिरियाए चउद्दस देवाहस्सीओ, देवीणं पुच्छा, अब्भितरियाए णव देवीसता पन्नत्ता मज्झिमियाए परिसाए अट्ठ देवीसता पन्नत्ता बाहिरियाए परिसाए सत्त देविसता पन्नत्ता, देवाणं० ठिती पं० ?, अब्भितरियाए परिसाए देवाणं सत्त पलिओवमाइं ठिती पन्नत्ता मज्झिमियाए छ पलिओवमाइं बाहिरियाए पंच पलिओवमाइं ठिती पन्नत्ता।

देवीणं पुच्छा, अब्भितरियाए साइरेगाइं पंच पलिओवमाइं मज्झिमियाए परिसाए चत्तारि पलिओवमाइं ठिती पन्नत्ता बाहिरियाए परिसाए तिण्मि पलिओवमाइं ठिती पन्नत्ता, अट्ठो तहेव भाणियव्वो। सणंकुमाराणं पुच्छा तहेव ठाणपदगमेणं जाव सणंकुमारस्स तओ परिसाओ समिताई तहेव, नवरिं अब्भितरियाए परिसाए अट्ठ देवसाहस्सीओ पन्नत्ताओ, मज्झिमियाए परिसाए दस देवसाहस्सीओ पन्नत्ताओ, बाहिरियाए परिसाए बारस देवसाहस्सीओ पन्नत्ताओ, अब्भितरियाए परिसाए देवीणं ठिती अद्धपंचमाइं सागरोवमाइं पंच पलिओवमाइं ठिती पन्नत्ता मज्झिमियाए परिसाए अद्धपंचमाइं सागरोवमाइं चत्तारि पलिओवमाइं ठिती पन्नत्ता, बाहिरियाए परिसाए अद्धपंचमाइं सागरोवमाइं तिन्नि पलिओवमाइं ठिती पन्नत्ता, अट्ठो सो चेव।

एवं माहिंदस्सवि तहेव तओ परिसाओ नवरिं अब्भितरियाए परिसाए छद्देवसाहस्सीओ पन्नत्ताओ, मज्झिमियाए परिसाए अट्ठ देवसाहस्सीओ पन्नत्ताओ, बाहिरियाए दस देवसाहस्सीओ पन्नत्ताओ, ठिती देवाणं अब्भितरियाए परिसाए अद्धपंचमाइं सागरोवमाइं सत्त य पलिओ० ठिती पन्नत्ता, मज्झिमियाए परिसाए पंच सागरोवमाइं छच्च पलिओवमाइं, बाहिरियाए परिसाए अद्धपंचमाइं सागरोवमाइं पंच य पलिओवमाइं ठिती पं० तहेव सव्वेसिं इंदाण ठाणपयगमेणं विमाणाणि वुच्चा ततो पच्छा परिसाओ पत्तेयं २ वुच्चति।

बंभस्सवि तओ परिसाओ पन्नत्ताओ अब्भितरियाए चत्तारि देवसाहस्सीओ मज्झिमियाए छ देवसाहस्सीओ बाहिरियाए अट्ठ देवसाहस्सीओ, देवाणं ठिती अब्भितरियाए परिसाए अद्धनवमाइं सागरोवमाइं पंच य पलिओवमाइं मज्झिमियाए परिसाए अद्धनवमाइं चत्तारि पलिओवमाइं बाहिरियाए अद्धनवमाइं सागरोवमाइं तिन्नि य पलिओवमाइं अट्ठो सो चेव।

लंतगस्सवि जाव तओ परिसाओ जाव अब्भितरियाए परिसाए दो चेव साहस्सीओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मज्झिमियाए चत्तारि देवसाहस्सीओ पन्नत्ताओ बाहिरियाए छद्देवसाहस्सीओ पन्नत्ताओ, ठिती भाणियव्वा-अब्भिंतरियाए परिसाए बारस सागरोवमाइं सत्त पलिओवमाइं ठिती पन्नत्ता, मज्झिमियाए परिसाए बारस सागरोवमाइं छच्च पलिओवमाइं ठिती पन्नत्ता बाहिरियाए परिसाए बारस सागरोवमाइं पंच पलिओवमाइं ठिती पन्नत्ता ॥

महासुक्कस्सवि जाव तओ परिसाओ जाव अब्भिंतरियाए एगं देवसहस्सं मज्झिमियाए दो देवसाहस्सीओ पन्नत्ताओ बाहिरियाए चत्तारि देवसाहस्सीओ, अब्भिंतरियाए परिसाए अद्धसोलस सागरोवमाइं पंच पलिओवमाइं मज्झिमियाए अद्धसोलस सागरोवमाइं चत्तारि पलिओवमाइं बाहिरियाए अद्धसोलस सागरोवमाइं तिन्नि पलिओवमाइं अट्ठो सो चेव ।

सहस्सारे पुच्छा जाव अब्भिंतरियाए परिसाए पंच देवसया मज्झिमियाए परि० एगा देवसाहस्सी बाहिरियाए दो देवसाहस्सीओ पन्नत्ता ठिती अब्भिंतरियाए अद्धट्ठारस सागरोवमाइं सत्त पलिओवमाइं ठिती पन्नत्ता एवं मज्झिमियाए अद्धट्ठारस छप्पलिओवमाइं बाहिरियाए अद्धट्ठारस सागरोवमाइं पंच पलिओवमाइं अट्ठो सो चेव ।

आणयपाणयस्सवि पुच्छा जाव तओ परिसाओ नवरि अब्भिंतरियाए अड्ढाइज्जा देवसया मज्झिमियाए पंच देवसया बाहिरियाए एगा देवसाहस्सी ठिती अब्भिंतरियाए एगूणवीस सागरोवमाइं पंच य पलिओवमाइं एवं मज्झि० एगूणवीस सागरोवमाइं चत्तारि य पलिओवमाइं बाहिरियाए परिसाए एगूणवीसं सागरोवमाइं तिन्नि य पलिओवमाइं ठिती अट्ठो सो चेव ।

कहि णं भंते ! आरणअच्चुयाणं देवाणं तहेव अच्चुए सपरिवारे जाव विहरति, अच्चुयस्स णं देविंदस्स तओ परिसाओ पन्नत्ताओ अब्भिंतरपरि० देवाणं पणवीसं सयं मज्झिम० अड्ढाइज्जा सया बाहिरय० पंचसया अब्भिंतरियाए एक्कवीसं देवाणं पणवीसं सयं मज्झिम० अड्ढाइज्जा सया बाहिरय० पंचसया अब्भिंतरियाए एक्कवीसं सागरोवमा सत्त य पलियओवमाइं मज्झि० एक्कवीससागर० छप्पलि० बाहिर० एकवीसं सागरो० पंच य पलिओवमाइं ठिती पन्नत्ता ।

कहि णं भंते ! हेट्ठिमगेवेज्जगाणं देवाणं विमाणा पन्नत्ता ? कहि णं भंते ! हेट्ठिमगेवेज्जगा देवा परिवसंति ? जहेव ठाणपए तहेव, एवं मज्झिमगेवेज्जा उवरिमगेविज्जगा अनुत्तरा य जाव अहमिंदा नामं ते देवा पन्नत्ता समणाउसो ! ॥

वृ. 'सक्कस्स णं भंते !' इत्यादि, शक्रस्य भदन्त ! देवेन्द्रस्य देवराजस्य कति पर्षदः प्रज्ञप्ताः ?, भगवानाह-गौतम ! तिस्रः पर्षदः प्रज्ञप्ताः, तद्यथा-शमिका चण्डा जाता, अभ्यन्तरिका शमिका मध्यमिका चण्डा बाह्या जाता ॥ 'सक्कस्स णं भंते ! देविंदस्स देवरण्णो अब्भिंतरियाए' इत्यादि प्रश्नषट्कं सुप्रतीतं, भगवानाह-गौतम ! शक्रस्य देवेन्द्रस्य देवराजस्याभ्यन्तरिकायां पर्षदि द्वादश देवसहस्राणि प्रज्ञप्तानि मध्यमिकायां चतुर्दश देवसहस्राणि बाह्यायां षोडश देवसहस्रणि, तथाऽभयन्तरिकायां पर्षदि सप्त देवीशतानि मध्यमिकायां षड् देवीशतानि बाह्यायां पञ्च देवीशतानि

'सक्कस्स णं भंते ! देविंदस्स देवरन्नो अब्भितरियाए परिसाए देवाणं केवइ कालं' मित्यादि प्रश्नषट्कं सुप्रतीतं, भगवानाह-गौतम ! शक्रस्य देवेन्द्रस्य देवराजस्याभ्यन्तरिकायां पर्षदि पञ्च पल्योपमानि स्थिति प्रज्ञप्ता, मध्यमिकायां चत्वारि पल्पोमानि, बाह्यायां पर्षदि त्रीणि पल्योपमानि, तथाऽभ्यन्तरिकायां पर्षदि देवीनां त्रीणि पल्योपमानि स्थिति प्रज्ञप्ता, मध्यमिकायां द्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पल्योपमे, बाह्यायामेकं पल्योपमं ॥ 'से केणट्ठेणं भंते ! एवं वुच्चति सक्कस्स णं देवेंदस्स देवरन्नो तओ परिसाओ' इत्यादि सकलमपि सूत्रं चमरवक्तव्यतायमिव भावनीयम् ।

'कहि णं भंते ! ईसाणगदेवाणं विमाणा पन्नत्ता कहि णं भंते ! ईसाणगदेवा परिवसंति' इत्यादि सर्वं सौधर्मवद्वक्तव्यं नवरं 'मंदरस्स पव्वयस्स उत्तरेण' तथा 'अट्ठावीसं विमाणावाससय-सहस्सा भवंतीति मक्खायं' तथा पञ्चावतंसकाः—पूर्वस्यामङ्कावतंसको दक्षिणस्यां स्फटिकावतंसकः अपरस्यां रजतावतंसकः उत्तरस्यां जातरूपावतंसकः मध्ये ईशानावतंसकः, तथा शूलपाणि-वृषभवाहनः, तथाऽशीतेः सामानिकसहस्राणां चतसृणामसीतीनामात्मरक्षदेवसहस्राणां, तथाऽभ्यन्तरिकायां पर्षदि दश देवसहस्राणि मध्यमिकायां द्वादश बाह्यायां चतुर्दश, तथाऽभ्य-न्तरिकायां पर्षदि नव देवीशतानि मध्यमिकायामष्टौ देवीशतानि बाह्यायां सप्त देवीशतानि, तताऽभ्यन्तरिकायां पर्षदि देवानां सप्त पल्योपमानि मध्यमिकायां षट् बाह्यायां पञ्च, तथाऽभ्य-न्तरिकायां पर्षदि देवीनां पञ्च पल्योपमानि मध्यमिकायां चत्वारि बाह्यायां त्रीणि, शेषं सर्वं शक्रवत् ।

'कहि णं भंते ! सणंकुमाराणं देवाणं विमाणा पन्नत्ता ?, कहि णं भंते ! सणंकुमारा देवा परिवसंति ?' इति पाठसिद्धं, भगवानाह—गौतम ! 'सोहम्मस्स कप्पस्स उप्पिं सपक्ख सपडिदिसिं बहूइं जोयणाइं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं बहूईओ जोयणकोडीओ बहूईओ जोयणकोडाकोडिओ उड्ढं दूरं वीइवइत्ता एत्थ णं सणंकुमारे नामं कप्पे पन्नत्ते' इति पाठसिद्धं, नवरं 'सपक्खं सपडिदिसिं' समानाः पक्षाः—पूर्वापरिदक्षिणोत्तररूपाः पार्श्वा यस्मिन् दूरमुत्पतने तत् सपक्षं 'समानस्य धर्मादिषु चे'ति समानस्य सभावः, तथा समानाः प्रतिदिशो—विदिशो यत्र तत् सप्रतिदिक् ।

'पाईणपडीणायते उईणदाहिणविच्छिण्णे' इत्यादि सौधर्मकल्पवन्निरवशेषं वक्तव्यं, नवरं 'बारस विमाणावाससयसहस्सा भवंतीति मक्खाय'मिति वक्तव्यं, तथा पञ्चानामवतंसकानां मध्ये चत्वारस्त एवाशोकवतंसकादयो मध्ये सनत्कुमारावतंसकः, अग्रमहिष्यो न वक्तव्यास्तत्र परिगृहीतदेवीनामसम्भवात्, तथा 'सणंकुमारे कप्पे सणंकुमारवडेंसए विमाणे सभाए सुहम्माए सणंकुमारंसि सीहासणंसि से णं तत्थ बारसण्हं विमाणावाससयसहस्साणं बावत्तरीए सामानिय-साहस्सीणं' तथा 'चउण्हं बावत्तराणं आयरक्खदेवसाहस्सीणं' तथाऽभ्यन्तरिकायां पर्षद्यष्टौ देवसहस्राणि मध्यमिकायां दश बाह्यायां द्वादश, देवीपर्षदो न वक्तव्याः, तथाऽभ्यन्तरिकाया पर्षदि देवानामर्द्धपञ्चमानि सागरोपमाणि पञ्च पल्योपमानि स्थिति मध्यमिकायामर्द्धपञ्चमानि सागरोपमाणि चत्वारि पल्योपमानि बाह्यायामर्द्धपञ्चमानि सागरोपमाणि त्रीणि पल्योपमानि, शेषं शक्रवत् । "कहि णं भंते ! माहिंदगदेवाणं विमाणा प० ?, कहि णं भंते ! माहिंदगदेवा परिवसंति ?, गो० ! ईसाणस्स कप्पस्स उप्पिं सपक्खं सपडिदिसिं बहूइं जोयणाइं जाव उप्पएत्ता एत्थ णं माहिंदे कप्पे पन्नत्ते' इति पूर्ववत्, 'पाईणपडीणायए उईणदाहिणविच्छिन्ने' इत्यादि सर्वं शेषं सनत्कुमारवन्निरवशेषं वक्तव्यं, नवरमत्राष्टौ विमानावासशतसहस्राणि, अवतंसकाश्चत्वार ईशानवत्, तद्यथा—अङ्कावतंसकः स्फटिकावतंसको रजतावतंसको जातरूपावतंसको मध्ये माहेन्द्रावतंसकः तथाऽऽधिपत्यचिन्तायाम् 'अट्ठण्हं विमामावाससयसहस्साणं सत्तरीए सामानियसाहस्सीणं चउण्हं सत्तरीणं आयरक्खदेवसाहस्सीणं' इति, तथाऽभ्यन्तरिकायां पर्षदि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षड् देवसहस्राणि मध्यमिकायामष्टौ देवसहस्राणि बाह्यायां दश अभ्यन्तरिकायां पर्षदि देवानामर्द्धपञ्चमानि सागरोपमाणि पञ्च पल्योपमानि, शेषं सर्वं यथा सनत्कुमारस्य ।

'कहिणं भंते! बंभलोगदेवाणंविमाणा पन्नत्ता ? कहि णं भंते! बंभलोगदेवा परिवसंति ? गोयमा! सणंकुमारमाहिंदाणं कप्पा उप्पिं सपक्खं सपडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं बंभलोगे नामं कप्पे पन्नत्ते पाईणपडिणायए उदीणदाहिणविच्छिन्ने पडिपुन्नचंदसंठाणसंठिए अच्चिमाली इंगालरासिवण्णाभे' इति पूर्वद्भावनीयं शेषं यथा सनत्कुमारस्य तथा वक्तव्यं, नवरमत्र चत्वारि विमानासशतसहस्राणि, अवतंसका अपि चत्वारस्तथैव, तद्यथा—अशोकावतंसकः सप्तपर्णावतंसकः चम्पकावतंसकः चूतावतंसकः मध्ये ब्रह्मलोकावतंसकः, आधिपत्यचिन्तायामपि 'चउण्हं विमाणावाससयसहस्साणं सट्ठीए सामाणियसाहस्सीणं चउण्ह य सट्ठीणमायरक्खदेवसाहस्सीण' मिति, तथाऽभ्यन्तरिकायां पर्षदि चत्वारि देवसहस्राणि मध्यमिकायां षड् देवसहस्राणि बाह्यायामष्टौ देवसहस्राणि, तताऽभ्यन्तरिकायां पर्षदि देवानामर्द्धनवमानि सागरोपमाणि पञ्च पल्योपमानि स्थिति मध्यमिकायां पर्षदि अर्द्धनवमानि सागरोपमाणि चत्वारि पल्योपमानि बाह्यायामर्द्धनवमानि सागरोपमाणि त्रीणि च पल्योपमानि, शेषं यथा सनत्कुमारस्य ।

'कहि णं भंते ! लंतगलोगदेवाणं विमाण पन्नता ? कहि णं भंते ! लंतगदेवा परिवसंति ? गो० ! बंभलोयस्स कप्पस्स उप्पिं सपक्खं सपडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं लंतए नामं कप्पे पन्नत्ते पाईणपडिणायते उदीणदाहिणविच्छिण्णे पडिपुन्नचंदसंठाणसंठिए अच्चिमाली' इत्यादि ब्रह्मलोकवत् नवरमत्र पञ्चाशद्विमानावाससहस्राणि वक्तव्यानि, अवतंसकाश्चत्वार ईशानवत्, तद्यथा—अङ्कावतंसकः स्फटिकावतंसकः रजतावतंसकः जातरूपावतंसकः मध्ये लन्तकावतंसकः, आधिपत्यचिन्तायां 'पन्नासाए विमाणावाससयसहस्साणं पन्नासाए सामानियसाहस्सीणं चउण्ह य पन्नासाणमायरक्खदेवसाहस्सीणं' तथाऽभ्यन्तरिकायां पर्षदि द्वे देवसहस्रे मध्यमिकायां चत्वारि बाह्यायां षट्, तथाऽभ्यन्तरिकायां पर्षदि देवानां द्वादश सागरोपमाणि सप्त च पल्योपमानि स्थिति मध्यमिकायां द्वादश सागरोपमाणि षट् च पल्योपमानि बाह्यायां द्वादश सागरोपमाणि पञ्च पल्योपमानि ।

'कहि णं भंते ! महासुक्कगदेवाणं विमाणा पन्नत्ता ? कहि णं भंते ! महासुक्कगदेवा परिवसन्ति ?, गोयमा ! लंतगकप्पस्स उवरिं सपक्खं सपडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं महासुक्कनामे कप्पे पन्नत्ते पाईणपडिणायते उदीणदाहिणविच्छिण्णे पडिपुन्नचंदसंठाणसंठिते' इत्यादि सर्वं ब्रह्मलोकवत्, नवरमत्र चत्वारिंशद् विमानावाससहस्राणि वक्तव्यानि, अवतंसकाश्चत्वारस्तथैव, तद्यथा—अशोकावतंसकः सप्तपर्णावितंसः चम्पकावतंसकः चूतावसंतसकः मध्ये शुक्रावतंसकः, आधिपत्यचिन्तायां 'चत्तालीसाए विमाणावाससहस्साणं चत्तालीसाए सामानियसाहस्सीणं चउण्हं चत्ताली चउण्हं चत्तालीसाणमायरक्खदेवसाहस्सीण' मिति, यथाऽभ्यन्तरिकां पर्षदि एकं देवसहस्रं मध्यमिकायां द्वे देवसहस्र बाह्यायां चत्वारि देवसहस्राणि, तथाऽभ्यन्तरिकायां पर्षदि अर्द्धषोडश सागरोपमाणे पञ्च पल्योपमानि स्थिति मध्यमिकायां षोडश सागरोपमाणि चत्वारि पल्योपमानि बाह्यायामर्द्धषोडश सागरोपमाणि त्रीणि पल्योपमानि शेषं पूर्ववत् ।

'कहि णं भंते ! सहस्सारदेवाणं विमाणा पन्नत्ता ? कहि णं भंते ! सहस्सारदेवा परिवसंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा ! महासुक्कस्स कप्पस्स उप्पिं सपक्खं सपडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं सहस्सारे नामं कप्पे पन्नत्ते पाईणपडीणायए उदीणदाहिणविच्छिन्ने पडिपुन्नचंदसंठाणसंठिए' इत्यादि ब्रह्मलोकवत् नवरमत्र षड् विमानावाससहस्राणि वक्तव्यानि, अवतंसका एवम्—अङ्कावतंसकः स्फटिकावतंसकः रजतावतंसकः जातरूपावतंसकः मध्ये सहस्रारावतंसकः, आधिपत्यचिन्तायां 'छण्हं विमाणावासहस्साणं तीसाए सामानियसाहस्सीणं चउण्हं तीसाणं आयरक्खदेवसाहस्सीणं' तथाऽभ्यन्तरिकायां पर्षदि पञ्च देवशतानि मध्यमिकायामेकं देवसहस्रं बाह्यायां द्वे देवसहस्रे, तथाऽभ्यन्तरिकायां पर्षदि देवानां सार्द्धाष्टादशसागरोपमाणि सप्त च पल्योपमानि मध्यमिकायां पर्षदि अष्टादश सागरोपमाणि षट् च पल्योपमानि बाह्यायामर्द्धाष्टादशसागरोपमाणि पञ्च पल्योपमानि शेषं पूर्ववत् ।

'कहि णं भंते ! आणयपाणयनामे दुवे कप्पा पन्नत्ता ? कहि णं भंते ! आणयपाणयगा देवा परिवसंति गोयमा ! सहस्सारकप्पस्स उप्पिं सपक्खं सपडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं आणयपाणयनाम दुवे कप्पा पन्नत्ता पाईणपडीणायया उदीणदाहिणविच्छिण्णा अद्धचंदसंठाणसंठिया अच्चिमाली इंगालरासिप्पभा' इत्यादि सनत्कुमारवत्, नवरं 'तत्थ णं आणयपाणयदेवाणं चत्तारि विमाणावाससया भवंतीति मक्खाय'मिति वक्तव्यं, अवतंसकाः अशोकावतंसकः सप्तपर्णावतंसकः चम्पकावतंसकः चूतावतंसकः मध्ये प्राणतावतंसकः, आधिपत्यचिन्तायां 'चउण्हं विमाणावाससयाणं वीसाए सामानियसाहस्सीणं असीए आयरक्खदेवसाहस्सीणं' तथाऽयन्तरिकायां पर्षदि अर्द्धतृतीयानि देवशतानि मध्यमिकायां पञ्च देवशतानि बाह्यायामेकं देवसहस्रं, तथाऽभ्यन्तरिकायां पर्षदि देवानामर्द्धैकोनविंशति सागरोपमाणि पञ्च पल्योपमानि स्थिति मध्यमिकायामर्द्धैकोनविंशति सागरोपमाणि चत्वारि च पल्योपमानि बाह्यामर्द्धैकोनविंशति सागरोपमाणि त्रीणि च पल्योपमानि शेषं पूर्ववत् ।

'कहि णं भंते ! आरणअच्चुयानामं दुवे कप्पा प० ? कहि णं भंते ! आरणअच्चुयगा देवा परिवसंति ?, गो० ! आयपाणयाणं कप्पाणं उवरिं सपक्खं स,पडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं आरणअच्चुयानामं दुवे कप्पा प० पाईणपडिणायया उदीणदाहिणवि- च्छिण्णा अद्धचंदसंठाणसंठिया अच्चिमाली इंगालरासिवण्णाभा' इत्यादि पूर्ववत्, नवरमर्द्धचन्द्रसंस्थानसंस्थितत्वं प्रत्येकापेक्षयो मेरोर्दक्षिणोत्तरप्रविभागेनावस्थानात्, समुदितौ तु परिपूर्णचन्द्रसंस्थानौ द्रष्टव्यौ, तथा त्रीणि विमानावासशतानि वक्तव्यानि, अवतंसका इमे—अशोकावतसकः स्फिटिकावतंसकः रजतावतंसकः जातरूपावतंसकः मध्येऽच्युतावतंसकः, आधिपत्यचिन्तायां 'तिण्हं विमाणावाससयाणं दसण्हं सामाणियसाहस्सीणं चत्तालीसाए आयरक्खदेवसाहस्सीणं' तथा चात्र विमानावाससङ्ग्रणिगाथे—

॥१॥ "बत्तीस १ ट्ठावीसा २ बारस ३ अट्ठ ४ चउरो सयसहस्सा ५ ।
पन्ना ६ चत्तालीसा ७ छच्च सहस्सा सहस्सारे ८ ॥

॥२॥ आणयपाणयकप्पे चत्तारि सयाऽऽरणच्चुए तिन्नि ।
सत्त विमाणसयाइं चउसुवि एएसु कप्पेसु ॥

—सामानिकसङ्ग्रहणिगाथा—

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

॥ १ ॥ "चउरासीई असीई बावत्तरि सत्तरी य सट्ठी य ।
पन्ना चत्तालीसा तीसा तीसा दस सहस्सा ॥

तथाऽभ्यन्तरिकायां पर्षदि पञ्चविंशं देवशतं मध्यमिकायामर्द्धतृतीयानि देवशतानि बाह्यायां पञ्च देवशतानि, तथाऽभ्यन्तरिकायां पर्षदि देवानामेकविंशति सागरोपमाणि सप्त च पल्योपमानि मध्यमिकायं पर्षदि एकविंशति सागरोपमाणि षट् च पल्योपमानि बाह्यायामेकविंशति सागरोपमाणि पञ्च पल्योपमानि, शेषं पूर्ववत् ।

'कहि णं भंते ! हेट्ठिमगेवेज्जगाणं देवाणं विमाणा पन्नत्ता ? कहि णं भंते ! हेट्ठिमगेवेज्जगा देवा परिवसंति ?, गोयमा ! आरणअच्चुयाणं कप्पाणं उवरिं सपक्खं सपडिदिसिं बहूइं जोणाइं जाव उड्ढं दूरं उप्पइत्ता एत्थ णं हेट्ठिमगेवेज्जगाणं देवाणं तओ हेट्ठिमगेवेज्जविमाणा पन्नत्ता पाईणपडीणायसा उदीणदाहिणविच्छिण्णा पडिपुन्नचंदसंठाणसंठिता अच्चिमाली भासरासिवण्णाभा असंखेज्जाओ जोयणकोडोकोडीओ आयामविक्खंभेणं असंखेज्जाओ जोयणकोडाकोडीओ परिक्खेवेण सव्वत्थरयणामया अच्छा जाव पडिरूवा, तत्थ णं हेट्ठिमगेवेज्जगाणं देवाणं एक्कारसुत्तरे गेविज्जविमाणावाससए पन्नत्ते, ते णं विमाणा अच्छा जाव पडिरूवा, तत्थ मं हेट्ठिमगेवेज्जगा देवा परिवसंति' पाठसिद्धं, 'सव्वे समड्ढिया' इत्यादि सर्वे--निरवशेषाः समा ऋद्धिर्येषां ते समर्द्धिकाः, एवं सर्वे समद्युतिकाः सर्वे समबलाः सर्वे समयशसः सर्वे समानुभागाः सर्वे समसौख्याः, अनिन्द्रा—न विद्यते इन्द्रःअधिपतिर्येषां ते अनिन्द्राः, अप्रेषा--न विद्यते प्रेषा--प्रेष्यत्वं येषां ते अप्रेषाः, न विद्यते पुरोहितः--शान्तिकर्मकारी येषामशान्तेरभावात्ते अपुरोहिताः, किंरूपाः पुनस्ते ? इत्याह--अहमिन्द्रा नाम ते देवगणाः प्रज्ञप्ताः हे श्रमण ! हे आयुष्मन् ! । एवंमध्यमग्रैवेयकसूत्रमुपरितनग्रैवेयक सूत्रमपि भावनीयं, नवरमियं विमानसङ्ख्यासङ्ग्रहणि--

॥ १ ॥ "एक्कासुत्तरं हिट्ठिमेसु सत्तुत्तरं च मज्झिमए ।
सयमेगं उवरिमए पंचेव अनुत्तरविमाणा ॥"

'कहि णं भंते ! अनुत्तरोववाइयाणं देवाणं विमाणा पन्नत्ता ! कहि णं भंते ! अनुत्तरोववाइया देवा परिवसंति ?, गोयमा ! इमीसे णं रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरगहगणनक्खत्ततारारूवाणं बहूणि जोयणाइं बहूणि जोयणसयाणि जाव बहूईओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता सोहम्मीसाणसणंकुमारमाहिंदबंभलोगलंतगसुक्कसहस्सार-आणयपाणयआरणअच्चुयकप्पे तिन्नि य अट्ठारसुत्तरे गेवेज्जगविमाणावाससए वीइवइत्ता तेण परं दूरं गया नीरया निम्मला वितिमिरा विसुद्धा पंचदिसि पंच अणुत्तरा महइमहालया विमाणा पन्नत्ता, तंजहा-- विजये वैजयंते जयंते अपराजिते सव्वट्ठसिद्धे' इदं पाठसिद्धं, नवरं 'तिन्नि अट्ठारसुत्तरे' इति त्रीणि अष्टादशोत्तराणि विमानावासशतानि, तत्रैकादशोत्तरं शतमधस्तनग्रैवेयकप्रस्तटेषु सप्तोत्तरं शतं मध्यमग्रैवेयकेषु परिपूर्णं शतमुपरितनग्रैवेयकप्रस्तटेषु सर्वसङ्ख्यया भवन्ति त्रीणि अष्टादशोत्तराणि, 'नीरजांसि' आगन्तुकरजोविरहात् 'निर्मलानि' स्वाभाविकमलाभावात् 'वितिमिराणि' रत्नप्रभावितानप्रभावेन सर्वासु दिक्षु विदिक्षु चापहततमस्काण्डत्वात् 'विशुद्धानि' क्वचिदपि कलङ्कलेशस्याप्यसम्भवात्, 'पंचदिसि' इति पञ्च पूर्वदक्षिणापरोत्तरमध्यमरूपा दिशः समाहृताः पञ्चदिक तस्मिन्, तत्र पूर्वस्यां दिशि विजयं दक्षिणस्यां वैजयन्तं पश्चिमायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयन्तं उत्तरस्यामपराजितं मध्ये सर्वार्थसिद्धम्, 'ते णं विमाणा' इत्यादि पूर्ववत् यावत् 'अहमिंदा नामं ते देवगणा पन्नत्ता समणाउसो !'

तृतीयप्रतिपत्तौ—देवाधिकारे वैमानिकः उद्देशकः—१ समाप्तः

(३) देवा० वैमानिकः उद्देशकः—२

वृ. सम्प्रति द्वितीयो वक्तव्यस्तत्रेदं सूत्रम्—

मू. (३२६) *सोहम्मीसाणेसु कप्पेसु विमाणपुढवी किंपइट्ठिया पन्नत्ता ?, गोयमा ! घणोदहिपइट्ठिया । सणंकुमारमाहिंदेसु कप्पेसु विमाणपुढवी किंपइट्ठिया पन्नत्ता ?, गोयमा ! घणवायपइट्ठिया पन्नत्ता ।*

बंभलोए णं भंते ! कप्पे विमाणपुढवीणं पुच्छा, घनवायपइट्ठिया पण्णत्ता । लंतए णं भंते ! पुच्छा, गोयमा ! तदुभयपइट्ठिया । महासुक्कसहस्सारेसुवि तदुभयपइट्ठिया ।

आणय जाव अच्चुएसु णं भंते ! कप्पेसु पुच्छा, ओवासंतरपइट्ठिया । गेविज्ञविमाणपुढवीणं पुच्छा, गोयमा ! ओवासंतरपइट्ठिया । अनुत्तरोववाइयपुच्छा ओवासंतरपइट्ठिया ॥

वृ. 'सोहम्मीसाणेसु णं भंते' इत्यादि, सौधर्मेशानयोः, सूत्रे द्विवचनेऽपि बहुवचनं प्राकृतत्वात्,

॥१॥ "बहुवयणेण दुवयणं छट्ठिविभत्तीए भन्नइ चउत्थी ।
जह हत्था तह पाया नमोऽत्थु देवाहिदेवाणं ॥"

भदन्त ! कल्पयोर्विमानपृथिवी 'किंप्रतिष्ठिता' कस्मिन् प्रतिष्ठिता' किमाश्रया किमाधारेत्यर्थः प्रज्ञप्ता ?, भगवानाह—गौतम ! घनोदधिप्रतिष्ठिता प्रज्ञप्ता, एवं सनत्कुमारमाहेन्द्रेषु घनवातप्रतिष्ठिता, ब्रह्मलोकेऽपि घनवातप्रतिष्ठिता, लान्तके 'तदुभयप्रतिष्ठिता' घनोदधिघनवातप्रतिष्ठिता, महाशुक्रसहस्रारयोरपि तदुभयप्रतिष्ठिता । आनतप्राणतारणाच्युतेष्ववकाशान्तरप्रतिष्ठिता—आकाशप्रतिष्ठिता, एवं ग्रैवेयक- विमानपृथिवी अनुत्तरविमानपृथिवी च,

॥१॥ "घनोदहिंपइट्ठाणा सुरभवणा दोसु होंति कप्पेसु ।
तिसु तायपइट्ठाणा तदुभयपइट्ठिया तीसु ॥
॥२॥ तेण परं उवरिमगा आगासंतरपइट्ठिया सव्वे ।
एस पइट्ठाणविही उड्ढं लोए विमाणाणं ॥

—अधुना पृथिवीबाहल्यप्रतिपादनार्थमाह—

मू. (३२७) *सोहम्मीसाणकप्पेसु विमाणपुढवी केवइयं बाहल्लेणं प० गो० सत्तावीसं जोयणसयाइं बाहल्लेणं प० एवं पुच्छा, सणंकुमारमाहिंदेसु छव्वीसं जोयणसयाइं । बंभलंतए पंचवीसं । महासुक्कसहस्सारेसु चउवीसं । आणयपाणयारणाच्चुएसु तेवीसं सयाइं । गेविज्ञविमाणपुढवी बावीसं । अनुत्तरविमाणपुढवी एक्कवीसं जोयणसयाइं बाहल्लेणं ॥*

वृ. 'सोहम्मीसाणेसु ण'मित्यादि, सौधर्मेशानयोर्भदन्त ! कल्योर्विमानपृथ्वी 'कियत्' किंप्रमाणा बाहल्येन प्रज्ञप्ता ?, गौतम ! सप्तविंशतिर्योजनशतानि बाहल्येन प्रज्ञप्ता, एवं शेषसूत्राण्यपि भावनीयानि, नवरं सनत्कुमारमाहेन्द्रयोः षट्विंशतिर्योजनशतानि वक्तव्यानि, ब्रह्मलोकलान्तकयोः पञ्चविंशति, महाशुक्रसहस्सारयोश्चतुर्विंशति, आनतप्राणतारणाच्युतकल्पेषु त्रयोविंसति, ग्रैवेयकेषु द्वाविंशति, आनुतरविमानेष्वैकविंशतिर्योजनशतानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३२८) सोहम्मीसाणेसु णं भंते ! कप्पेसु विमाणा केवइयं उड्ढं उच्चत्तेणं ?, गोयमा ! पंच जोयणसयाइं उड्ढं उच्चत्तेणं । सणंकुमारमाहिंदेसु छजोयणसयाइं, बंभलंतएसु सत्त ।

महासुक्कसहस्सारेसु अट्ठ, आणयपाणएसु ४ नव गेवेज्जविमाणाणं भंते ! केवइयं उड्ढं उ०, दस जोयणसयाइं, अनुत्तरविमाणं एक्कारस जोयणसयाइं उड्ढं उच्चत्तेणं ।

वृ. सम्प्रति विमानानुच्चैस्त्वपरिमाणं प्रतिपिपादयिपुराह—'सोहम्मीसाणेसु णं भंते !' इत्यादि, इह विमानं महानगरकल्पं तस्य चोपरि वनखण्डप्राकाराः प्रासादादयः, तत्र पूर्वेण सूत्रकदम्बकेन विमानपृथिवीबाहल्यमुक्तं, अनेन प्रासादापेक्षया उच्चत्वमुच्यत इति गर्भः, सौधर्मेशानयोर्भदन्त कल्पयोर्विमानानि कियद् ऊर्ध्वमुच्चैस्त्वेन प्रज्ञप्तानि ?, भगवानाह—गौतम ! पञ्च योजनशतानि ऊर्द्धमुच्चैस्त्वेन प्रज्ञप्तानि, मूलप्रासादादीनां तत्र पञ्चयोजनशतोच्छ्रयप्रमाणत्वात् ।

एवं शेषसूत्राण्यपि भावनीयानि, नवरं सनत्कुमारमाहेन्द्रयोः षड् योजनशतानि वक्तव्यानि, ब्रह्मलोकलान्तकयोः सप्त योजनशतानि, महाशुक्रसहस्रारयोरष्टौ योजनशतानि, आनतप्राणतारणा-च्युतेषु कल्पेषु नव योजनशतानि, ग्रैवेयकेषु दश योजनशतानि, अनुत्तरेष्वेकादश योजनशतानि, सर्वत्रापि विमानानि बाहल्योच्चत्वमीलनेन द्वात्रिंशद्योजनशतनि, उपर्युपरि बाह्यमु(ल्यहानिवदु)-च्चैस्त्वस्य वृद्धिभावात्, उक्तञ्च—

॥१॥ "सत्तावीससयाइं आदिमकप्पेसु पुढविबाहल्लं ।
एक्केक्कहाणि सेसे दुदुगे य दुगे चउक्के य ॥
॥२॥ पंचसउच्चत्तेणं आदिमकप्पेसु होंति य विमाणा ।
एक्केक्कवुड्ढि सेसे दु दुगे य दुगे चउक्के य ॥
॥३॥ गेवेज्जनुत्तरेसु एसेव कमो उ हाणिवुड्ढीए ।
एक्केक्कंमि विमाणा दोन्निवि मिलिया उ बत्तीसं ॥

मू. (३२९) सोहम्मीसाणेसु णं भंते ! कप्पेसु विमाणा किंसंठिया प० ?, गो० ! दुविहा प० तं०—आवलियापविट्ठा बाहिरा य । तत्थ णं जे ते आवलियापविट्ठा ते तिविहा प० तं०—वट्टा तंसा चउरंसा, एत्थ णं जे ते आवलियबाहिरा ते णं नानासंठिया पण्णत्ता, एवं जाव गेविज्जविमाणा, अणुत्तरोववाइय- विमाणा दुविहा प० तंजहा—वट्टे य तंसा य ।

वृ. सम्प्रति संस्थाननिरूपणार्थमाह—'सोहम्मीसाणेसु णं भंते' इत्यादि सौधर्मेशानयोर्भदन्त कल्पयोर्विमानानि किंसंस्थितानि प्रज्ञप्तानि ?, भगवानाह—गौतम ! द्विविधानि प्रज्ञप्तानि, तद्यथा—आवलिकाप्रविष्टानि आवलिकाबाह्यानि च, तत्रावलिकाप्रविष्टानि नाम यानि पूर्वादिषु चतसृषु दिक्षु श्रेण्या व्यवस्थितानि, यानि पुनरावलिकाप्रविष्टानां प्राङ्गणप्रदेशे कुसुमप्रकर इव यतस्ततो विप्रकीर्णानि तान्यावलिकाबाह्यानि, तानि पुष्पावकीर्णानीत्युच्यन्ते, पुष्पाणीव इतस्ततोऽवकीर्णानि—विप्रकीर्णानि पुष्पावकीर्णानि इति व्युत्पत्ति, तानि च मध्यवर्त्तिनो विमानेन्द्रस्य दक्षिणतोऽपरत उत्तरतश्च विद्यन्ते न तु पूर्वस्यां दिशि, उक्तञ्च—

॥१॥ "पुप्फावकिण्णगा पुण दाहिणतो पच्छिमेण उत्तरतो ।
पुव्वेण विमाणेंदस्स नत्थि पुप्फावकिण्णा उ ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तत्थ ण'मित्यादि, तत्रावलिकाप्रविष्टाऽऽवलिकाबाह्येषु मध्ये यानि तानि आवलिकाप्रविष्टानि तानि त्रिविधानि प्रज्ञप्तानि, तद्यथा–वृत्तानि त्र्यस्राणि चतुरस्राणि, इहावलिकाप्रविष्टानि प्रतिप्रस्तटं विमानेन्द्रकस्य पूर्वदक्षिणापरोत्तररूपासु चतसृषु दिक्षु श्रेण्या व्यवस्थितानि, विमानेन्द्रकश्च सर्वोऽपि वृत्तः, ततः पार्श्ववृत्तीनि चतसृष्वपि दिक्षु त्र्यस्राणि, तेषां पृष्ठतश्चतसृ ष्वपि दिक्षु चतुरस्राणि, तेषां पृष्ठतो वृत्तानि, ततोऽपि भूयोऽपि त्र्यस्राणि ततोऽपि चतुरस्राणित्येवमावलिकापर्यन्तः, तत्र त्रिविधान्येवावलिकाप्रविष्टानि। 'तत्थ ण'मित्यादि, तत्र यानि आवलिकाबाह्यानि तानि नानासंस्थानसंस्थितानि प्रज्ञप्तानि, तथाहि–कानिचिन्नन्द्यावर्ताकाराणि कानिचित्स्वस्तिकाकाराणि कानिचित् खड्गाकाराणीत्यादि, उक्तञ्च–

॥१॥ "आवलियासु विमाणा वट्टा तंसा तहेव चउरंसा।
पुप्फावकिण्णगा पुण अणेगविहरूवसंठाणा॥"

एवं तावद्वाच्यं यावद् ग्रैवेयकविमानानि, तान्येव यावदावलिकाप्रविष्टानामविलाकाबाह्यानां च भावात्, परत आवलिकाप्रविष्टान्येव, तथा चाह–

'अनुत्तरविमाणा णं भंते! विमामा किंसंठिया पन्नत्ता?' इत्यादि प्रश्नसूत्रं, भगवानाह–गौतम! द्विविधानि प्रज्ञप्तानि, तद्यथा–'वट्टे य तंसा य,' मध्यवर्त्तिसर्वार्थसिद्धाख्यं विमानं वृत्तं, शेषाणि विजयादीनि चत्वार्यपि त्र्यस्राणि, उक्तञ्च–"एगं वट्टं तंसा चउरो य अनुत्तरविमाणा।"

मू. (३३०) सोहम्मीसाणेसु णं भंते! कप्पेसु दुविहा पन्नत्ता, तंजहा–संखेज्ञवित्थडा य असंखेज्ञवित्थडा य, जहा नरगा तहा जाव अणुत्तरोववातिया संखेज्ञवित्थडा य असंखेज्ञवित्थडा य, तत्थ णं जे से संखेज्ञवित्थडे से जंबुद्दीवप्पमाणे असंखेअवित्थडा असंखेज्ञाइं जोयणसयाइं जाव परिक्खेवेणं पन्नत्ता। सोहम्मीसाणेसु णं भंते! विमाणा कतिवण्णा प० गो०! पंचवण्णा प० तं०–किण्हा नीला लोहिया हालिद्दा सुक्किल्ला, सणंकुमारमाहिंदेसु चउवण्णा नीला जाव सुक्कल्ला, बंभलोगलंतएसुवि तिवण्णा लोहिया जाव सुक्किल्ला, महासुक्किसहस्सारेसु दुवण्णा–हालिद्दा य सुक्किल्ला य, आणयपाणतारणच्चुएसु सुक्किल्ला, गेविज्ञविमाणा सुक्किल्ला, अनुत्तरोववातियविमाणा परमसुक्किल्ला वण्णेणं पन्नत्ता। सोहम्मीसाणेसु णं भंते! कप्पेसु विमाणा केरिसया पभाए प०?, गोयमा! निञ्चालोआ निञ्चुज्ञोया सयं पभाए पन्नत्ता जाव अनुत्तरोववातियविमाणा निञ्चालोआ निञ्चुज्ञोता सयं पभाए प०।

सोहम्मीसाणेसु णं भंते! कप्पेसु विमाणा केरिसया गंधेणं प० गो० से जहा नामए–कोट्ठपुडाण वा जाव गंधेमं प०, एवं जाव एत्तो इट्ठयरागा चेव जाव अनुत्तरविमाणा।

सोहम्मीसाणेसु विमाणा केरिसया फासेणं पन्नत्ता?, से जहानामए–आइणेति वा रूतेति वा सव्वो फासो भाणियव्वो जाव अनुत्तरोववातियविमाणा॥ सोहम्मीसाणेसु णं भंते! (कप्पेसु) विमाणा केमहालिया पन्नत्ता?, गोयमा! अयण्णं जंबुद्दीवे २ सव्वदीवसमुद्दाणं सो चेव गमो जाव छम्मासे वीइवएज्ञा जाव अत्थेगतिया विमाणावासा नो वीइवएज्ञा जाव अनुत्तरोववातियविमाणा अत्थेगतियं विमाणं वीतिवएज्ञा अत्थेगतिए नो वीइवएज्ञा।

सोहम्मीसाणेसु णं भंते! विमाणा किंमया पन्नत्ता?, गोयमा! सव्वरयणामया पन्नत्ता, तत्थ णं बहवे जीवा य पोग्गला य वक्कमंति विउक्कमंति चयंति उवचयंति, सासया णं ते विमाणा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दव्वट्ठयाए जाव फासपज्जवेहिं असासता जाव अनत्तरोववातिया विमाणा ।

सोहम्मीसाणेसु णं देवा कओहिंतो उववज्जंति ?, उववातो नेयव्वो जहा वक्कंतीए तिरियमणुएसु पंचेंदिएसु संमुच्छिमवज्जिएसु, उववाओ वकंतीगमेणं जाव अनुत्तरो० ।

सोहम्मीसाणेसु देवा एगसमएणं केवतिया उववज्जंति ?, गोयमा ! जहन्नेणं एक्क वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा उववज्जंति, एवं जाव सहस्सारे, आणतादी गेवेज्जा अनुत्तरा य एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा उववज्जंति ।

सोहम्मीसाणेसु णं भंते ! देवा समए २ अवहीरमाणा २ केवतिएणं कालेणं अवहिया सिया ?, गोयमा ! तेणं असंखेज्जा समए २ अवहीरमाणा २ असंखेज्जाहिं उस्सप्पिणीहिं अवहीरंति नो चेव णं अवहिया सिया जाव सहस्सारो, आणतादिगेसु चउसुवि, गेवेज्जेसु अनुत्तरेसु य समए समए जाव केवतिकालेणं अवहिया सिया ?, गोयमा ! ते णं असंखेज्जा समए २ अवहीरमाणा पलिओवमस्स असंखेज्जतिभागमेत्तेणं अवहीरंति, नो चेव णं अवहिया सिया ।

सोहम्मीसाणेसु णं भंते ! कप्पेसु देवाणं केमहालया सरीरोगाहणा पन्नत्ता ?, गोयमा ! दुविहा सरीरा पन्नत्ता, तंजहा—भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जे से भवधारणिज्जे से जहन्नेणं अंगुलस्स असंखेज्जतिभागो उक्कोसेणं सत्त रयणीओ, तत्थ णं जे से उत्तरवेउव्विए से जहन्नेणं अंगुलस्स संखेज्जतिभागो उक्कोसेणं जोयणसतसहस्सं, एवं एक्केक्कं ओसारेत्ताणं जाव अनुत्तराणं एक्का रयणी, गेविज्जणुत्तराणं एगे भवधारणिज्जे सरीरे उत्तरवेउव्विया नत्थि ॥

वृ. अधुनाऽऽयामविष्कम्भादिपरिमाणप्रतिपादनार्थमाह—'सोहम्मीसाणेसु णं भंते !' इत्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्विमानानि कियद् आयामविष्कम्भेन कियत्परिक्षेपेण प्रज्ञप्तानि ?, भगवानाह—गौतम ! द्विविधानि विमानानि प्रज्ञप्तानि, तद्यथा—सङ्ख्येयविस्तृतान्यसङ्ख्येयविस्तृतानि च, तत्र यानि तानि सङ्ख्येयविस्तृतानि सङ्ख्येयानि योजनसहस्राण्यायामविष्कम्भेन असङ्ख्येयानि योजनसहस्राणि परिक्षेपेण, तत्र यानि तान्यसङ्ख्येयविस्तृतानि असङ्ख्येयानि योजन- सहस्राण्यायामविष्कम्भेन असङ्ख्येयानि योजनसहस्राणि परिक्षेपेण, एवं तावद्वाच्यं यावद् ग्रैवेयकविमानानि, तानि यावत् सङ्ख्येयविस्तृतानामसङ्ख्येयविस्तृतानां च बाहल्येन भावात् न तु परतः, तथा चाह—

'अनुत्तरविमाणे णं भंते ! केवइयं आयामविक्खंभेण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—द्विविधानि प्रज्ञप्तानि, तद्यथा—सङ्ख्येयविस्तृतानि असङ्ख्येयविस्तृतानि च, सर्वार्थसिद्धं सङ्ख्येयविस्तृतं शेषाण्यसङ्ख्येयविस्तृतानीति भावः, तत्र यत्तत्सङ्ख्येयविस्तृतं तद् एकं योजनशतसहस्राणायामविष्कम्भेन त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके योजनानां क्रोशत्रिकमष्टाविंशं धनुःशतं त्रयोदशाङ्गुलानि एकमर्द्धाङ्गुलमिति परिक्षेपेण, तत्र यानि तान्यसङ्ख्येयविस्तृतानि तान्यसङ्ख्येयानि योजनसहस्राण्यायामविष्कंभेन असंख्येयानि योजनसहस्राणि परिक्षेपेण प्रज्ञप्तानि । सम्प्रति वर्णप्रतिपादनार्थमाह—'सोहम्मीसाणेसु णं भंते !' इत्यादि, सौधर्मेशानयोर्भदन्त कल्पयोर्विमानानि कतिवर्णानि प्रज्ञप्तानि ?, भगवानाह गौ० पञ्च वर्णानि, तद्यथा—कृष्णानि शुक्लानि, एवं शेषसूत्राण्यपि भावनीयानि, नवरं सनत्कुमारमाहेन्द्र- योश्चतुर्वर्णानि कृष्णवर्णाभावात्, ब्रह्मलोककान्तकयोस्त्रिवर्णानि कृष्णनीलवर्णाभावात्, महाशुक्रसहस्रारयोर्द्विवर्णानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृष्णनीलहारिद्रवर्णाभावात्, आनतप्राणतारणाच्युतकल्पेषु एकवर्णानि, सुक्लवर्णस्यैकस्य भावात्, ग्रैवेयकविमानानि अनुत्तरविमानानि च परमशुक्लानि, उक्तञ्च–

॥ १ ॥ "सोहम्मि पंचवण्णा एक्कगहीणा उ जा सहस्सारे।
दो दो तुल्ला कप्पा तेण परं पुंडरीयाइं ॥"

सम्प्रति प्रभाप्रतिपादनार्थमाह–'सोहम्मीसाणेसु ण'मित्यादि, सौधर्मेशानयोर्भदन्त! कल्पयोर्विमानानि कीदृशानि प्रभया प्रज्ञप्तानि?, कीदृशी तेषां प्रभा प्रज्ञप्तेति भावः, भगवानाह–गौतम! प्रभया प्रज्ञप्तानि 'नित्यालोकानि' नित्यलोको–दर्शन दृश्यमानता येषां तानि नित्यालोकानि न तु जातुचिदपि तमसाऽऽश्रीयन्त इति भावः, कथं नित्यालोकानि? इति हेतुद्वारेण विशेषणमाह–नित्योदद्योतानि, 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मिति हेतोः प्रथमा, ततोऽयमर्थः–यस्मान्नित्यं–सततमप्रतिधमुद्योतो–दीप्यमानता येषां तानि (तथा) ततो नित्यालोकानि, सततमुद्योतमानता च परसापेक्षाऽपि संभाव्येत यथा मेरोः स्फटिककाण्डस्य सूर्यरश्मिसम्पर्कतः, तत आह–स्वयंप्रभाणि स्वयं सूर्यादिप्रभावत् देदीप्यमानता येषां तानि तथा, एवं निरन्तरं तावद्वक्तव्यं यावदनुत्तरविमानानि।

सम्प्रति गन्धप्रतिपादनार्थमाह–'सोहम्मीसाणेसु णं भंते! इत्यादि सौधर्मेशानयोर्भदन्त! कल्पयोर्विमानानि कीदृशानि गन्धेन प्रज्ञप्तानि?, भगवानाह–गौतम! 'से जहानामए कोट्ठपुडाण वा चंपकपुडाण वा दमणगपुडाण वा कुंकुमपुडाण वा चंदनपुडाण वा उसीरपुडाण वा मरुयापुडाण वा आईपुडाण वा जूहियापुडाण वा मल्लियापुडाण वा ण्हाणमज्ञियापुडाण वा केयइपुडाण वा पाडलिपुडाण वा नोमालियापुडाण वा वासपुडाण वा कप्पूरपुडाण वा अणुवायंसि उब्भिज्जमाणाण वा कुट्टिज्जमाणाण वा रुविज्जमाणाण वा उक्कीरिज्जमाणाण वा विक्खरिज्जमाणाण वा परिभुज्जमाणाण वा परिभाइज्जमामाण वा भंडाओ वा भंडं साहरिज्जमाणाण वा ओराला मणुण्णा मनहरा घाणमणनिव्वुइकरा सव्वतो समंता गंधा अभिनिस्सरंति, भवे एयारूवे सिया?, नो इणट्ठे समट्ठे, ते णं विमाणा एत्तो इट्ठतरा चेव कंततरा चेव मणुन्नतरा चेव मणामतरा चेव गंधेणं पन्नत्ता' अस्य व्याख्या पूर्ववत्, एवं निरन्तरं तावद्वक्तव्यं यावदनुत्तरविमानानि।

सम्प्रति स्पर्शप्रतिपादनार्थमाह–'सोहम्मीसाणेसु ण'मित्यादि, सौधर्मेशानयोर्भदन्त! कल्पयोर्विमानानि कीदृशानि स्पर्शेन प्रज्ञप्तानि?, भगवानाह–गौतम! 'से जहानामए अइणेइ वा रूतेइ वा बूरेइ वा नवथीएइ वा हंसगब्भतूलीइ वा सिरीसकुसुमनिचए वा पवालकुसुमपत्तरासीइ वा, भवे एयारूवे?, नो इणट्ठे समट्ठे, ते णं विमाणा इत्तो इट्ठतरा चेव कंततर, चेव मणुन्नतरा चेव मणामतरा चेव फासेणं पन्नत्ता' इति पूर्ववत्, एवं निरन्तरं तावद्वक्तव्यं यावदनुत्तरविमानानि

सम्प्रति महत्वप्रतिपादनार्थमाह–'सोहम्मीसाणेसु णं भंते! कप्पेसु' इत्यादि, सौधर्म्मेशानयोर्भदन्त! कल्पयोर्विमानानि 'किंमहान्ति' किंप्रमाणमहत्वानि प्रज्ञप्तानि?, भगवानाह–गौतम! 'अयण्णं जंबुद्दीवे दीवे' इत्यादि जम्बूद्वीपवाक्यं परिपूर्णमेवं द्रष्टव्यं 'सव्वद्दीवसमुद्दाणं सव्वब्भंतराए सव्वखुड्डाए वट्टे तेल्लापूपसंठाणसंठिते वट्टे पुक्खरकण्णियासंठाणसंठिए वट्टे पडिपुन्नचंदसंठाणसंठिए एक्कं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि य जोयणसयसहस्सा सोलस सहस्सा दो य सया सत्तावीसा तिन्नि य कोसे अट्ठावीसं धनुसयं तेरसय अंगुलाइं अद्धंगुलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंचिविसेसाहिए परिक्खेवेणं पन्नत्ते' इदं च पूर्ववद् भावनीयं, देवो ना महर्द्धिको यावन्महाभागः यावत्करणात् महाद्युतिक इत्यादिपरिग्रहः ।

'जाव इणामेव' 'इणामेवे'ति यावदिदानीमेव, अनेन चप्पुटिकात्रयानुकरणपुरस्सरम्यन्तं कालस्तोकत्वं इतिकृत्वा केवलल्पं–परिपूर्णं जम्बूद्वीपं द्वीपं त्रिभिरप्सरोनिपातैः–तिसृभिश्चप्पुटिकाभिरित्यर्थ त्रिसप्तकृत्वः–एकविंशतिवारान् 'अनुपरिवर्त्य' प्रादक्षिण्येन परिभ्रम्य 'हव्वं' शीघ्रमागच्छेत् 'सेणं देवे' इत्यादि, स देवस्तया सकलदेवजनप्रसिद्धया पूर्वदृष्टान्तभावितया 'उत्कृष्टया' अतिशायिन्या तुरियाए चवलाए चंडाए सिग्घाए उद्धुयाए जवणाए छेयाए अमीषां पदानां व्याख्यानं पूर्ववत्, 'दिव्यया' देवगत्या व्यतिव्रजन् यावदेकाहं वा द्वयहं वा उत्कर्षतः षण्मासान् व्यतिव्रजन् तत्रास्त्येककं विमानं यद् व्यतिव्रजेत् अस्त्येककं विमानं यन्न व्यतिव्रजेत्, 'एवंमहालिया णं' एतावंति महान्ति गौतम ! विमानानि प्रज्ञप्तानि, एवं निरन्तरं तावद्वक्तव्यं यावदनुत्तरविमानानि ।

'सोहम्मीसाणेसु ण'मित्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्विमानानि किंमयानि प्रज्ञप्तानि ?, भगवानाह–गौतम ! सर्वात्मना रत्नमयानि अच्छानि यावत्प्रतिरूपाणि । 'तत्थ ण' मित्यादि, तत्र–तेषु विमानेषु बहवो जीवाः–पृथ्वीकायरूपाः पुद्गलाश्च 'अपक्रामन्ति' गच्छन्ति 'व्युत्क्रामन्ति' उत्पद्यन्ते, तथा 'चीयन्ते' चयमुपगच्छन्ति 'उपचीयन्ते' उपचयमुपगच्छन्ति, एतत् पुद्गलापेक्षं विशेषणं, पुद्गलानामेव चयोपचयधर्मकत्वात्, शाश्वतानि भदन्त ! विमानानि द्रव्यार्थतया प्रज्ञप्तानि ?, वर्णपर्यायै रसपर्यायैर्गन्धपर्यायैः स्पर्शपर्यायैरशाश्वतानि प्रज्ञप्तानि, एवं निरन्तरं तावद्वक्तव्यं यावदनुत्तरविमानानि ।

'सोहम्मीसाणेसु णं भंते !' इत्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवाः कुतो योनेरुद्धृत्योत्पद्यन्ते ? किं नैरयिकेभ्यः ? इत्यादि यथा 'व्युत्क्रान्तौ' व्युत्क्रान्त्याख्ये षष्ठे पदे प्रज्ञपनायां तथा वक्तव्यं यावदनुत्तरोपपातिका देवाः, इह तु ग्रन्थगौरवभयान्न लिख्यते भूयान् हि स ग्रन्थः सम्प्रति कियन्त एकस्मिन् समये उत्पद्यन्ते ? इति निरूपणार्थमाह–'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवा एकस्मिन् समये, सूत्रे तृतीया सप्तम्यर्थे प्राकृतत्वात्, कियन्त उत्पद्यन्ते ?, भगवानाह–गौतम ! जघन्येन एको द्वौ वा त्रयो वा, उत्कर्षतः सङ्ख्येया वाऽसङ्ख्येया वा तिरश्चामपि गर्भजपञ्चेन्द्रियाणां तत्रोत्पादात्, एवं तावद्वक्तव्यं यावत्सहस्रारकल्पः, 'आणयदेवा णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनैको द्वौ त्रयो वा उत्कर्षतः सङ्ख्येयाः, मनुष्यणामेव तत्रोत्पादात्, तेषां कोटीकोटीप्रमाणत्वात्, एवं निरन्तरं तावद्वक्तव्यं यावदनुत्तरोपपातिका देवाः ॥

सम्प्रति कालतोऽपहारतः परिमाणमाह–'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवाः समये समये एकैकदेवापहारेणापहियमाणा अहियमाणाः कियता कालेनापहियन्ते ?, भगवानाह–गौतम ! असङ्ख्येयास्ते देवाः समये समये एकैकदेवापहारेणापहियमाणाः २ असङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहियन्ते, एतावता किमुक्तं भवति ?– असङ्ख्येयासूत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावत्प्रमाणाः सौधर्मेशानदेवा इति, एवमुत्तरत्रापि भावना भावनीया, एतच्च कल्पनामात्रं परिमाणावधारणार्थमुक्तं न पुनस्ते कदाचनापि केनाप्यपहृताः स्यु, तथा चाह–'नो चेव णं अवहिया सिया' एवं निरन्तरं यावद्वक्तव्यं यावत्सहस्रारकल्पदेवाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आणयपाणयआरणअच्चुएसु' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! आनतप्राणतारणाच्युतेषु कल्पेषु देवा असङ्ख्येयाः, ते च समये समये एकैकापहारेणापहियमाणाः पल्योपमस्य–क्षेत्रपल्योपमस्य सूक्ष्मस्यासङ्ख्येयभागमात्रेण कलेनापहियन्ते, किमुक्तं भवति ?–सूक्ष्मक्षेत्रपल्योपमासङ्ख्येयभागे यावन्तः समयास्तावत्प्रमाणास्ते भवन्तीति, एवं ग्रैवेयकदेवा अनुत्तरोपपातिनोऽपि वाच्याः ।

सम्प्रति शरीरावगाहनामानप्रतिपादनार्थमाह–'सोहम्मीसाणेसु णं भंते !' इत्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवानां 'किंमहालया' इति किं महती शरीरावगाहना प्रज्ञप्ता ?, भगवानाह–गौतम ! द्विविधा प्रज्ञप्ता, तद्यथा–भवधारणीया उत्तरवैक्रिया च, तत्र या सा भवधारणीया सा जघन्यतोऽङ्गुलासङ्ख्येयाभागमात्रा उत्कर्षतः सप्त रत्नयः, तत्र या सा उत्तरवैक्रिया सा जघन्यतोऽ- ङ्गुलस्य सङ्ख्येया भागं यावत् न त्वसङ्ख्येय तथाविधप्रयत्नाभावात्, उत्कर्षत एकं योजनशतसहस्रं, एवं तावद्वाच्यं यावदच्युतकल्पो, नवरं सनत्कुमारमाहेन्द्रयोरुत्कर्षतो भवधारणीया षड् रत्नयः, ब्रह्मलोकलान्तकेषु पञ्च, महाशुक्रसहस्रारयोश्चत्वारः, आनतप्राणतारणाच्युतेषु त्रयः, 'गेवेज्जगदेवा णं भंते !' इत्यादि, ग्रैवेयकदेवानां भदन्त ! किंमहती शरीरावगाहना प्रज्ञप्ता ?, भगवानाह– गौतम ! ग्रैवेयकदेवानामेकं भवधारणीयं शरीरं प्रज्ञप्तं न तूत्तरवैक्रयं, शक्तौ सत्यामपि प्रयोज- नाभावात्तदकरणात्, तदपि च भवधारणीयं जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रमुत्कर्षतो द्वौ रत्नी, एवमनुत्तरोपपातसूत्रमपि वक्तव्यं, नवरमुत्कर्षत एका रत्निरिति वाच्यम्

मू. (३३१) *सोहम्मीसाणेसु णं देवाणं सरीरगा किंसंघ्रयणी पन्नत्ता ?, गोयमा ! छण्हं संघयणाणं असंघयणी पन्नत्ता ?, नेवट्ठि नेव छिरा नवि ण्हारू णेव संघयणमत्थि, जे पोग्गला इट्ठा कंता जाव ते तेसिं संघातत्ताए परिणमंति जाव अनुतरोववातिया ।*

सोहम्मीसाणेसु देवाणं सरीरगा किंसंठिता पन्नत्ता ?, गोयमा ! दुविहा सरीरा– भवधारणिज्ञा य उत्तरवेउव्विया य, तत्थ णं जे ते भवधारणिज्ञा ते समचउरंससंठाणसंठिता पन्नत्ता, तत्थ णं जे ते उत्तरवेउव्विया ते नानासंठाणसंठिया पन्नत्ता जाव अच्चुओ, अवेउव्विया गेविज्ञणुत्तरा, भवधारणिज्ञा समचउरंससंठाणसंठिता उत्तरवेउव्विया नत्थि ।

वृ. सम्प्रति संहनमधिकृत्याह–'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवानां शरीराणि 'किंसंहननानि' किं संहननं येषां तानि तथा प्रज्ञप्तानि ?, भगवानाह–गौतम ! षण्णां संहननानामन्यतमेनापि संहननेनासंहनननानीति, संहननस्यास्थिरचनात्मकत्वात् तेषां चास्थ्यादीनासम्भवात्, तथा चाह–'नेवट्ठी' इत्यादि, नैवास्थि तेषां शरीरेषु नापि शिरा–ग्रीवाधमनिर्नापि स्नायूंषि–शेषं शिराजालं, किन्तु ये पुद्गला इष्टाः कान्ताः प्रिया मनोज्ञा मनआपतरा एतेषां व्याख्यानं प्राग्वत् ते तेषां सङ्घाततया परिममन्ति ततः संहननाभावः, एवं तावद्वाच्यं यावदनुत्तरोपपातिकानं देवानां । सम्प्रति संस्थानप्रतिपादनार्थमाह–'सोहम्मीसाणेसु' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह– गौतम ! तेषां शरीरकाणि द्विविधानि प्रज्ञप्तानि, तद्यथा–भवधारणीयानि उत्तरवैक्रियापि च, तत्र यद् भवधारणीयं तत्समचतुरस्रसंस्थानसंस्थितं प्रज्ञप्तं, देवानां भवप्रत्ययतः प्रायः शुभनाम- कर्मोदयभावात्, तत्र यदुत्तरवैक्रयं तत् नानासंस्थानसंस्थितं प्रज्ञप्तं, तस्येच्छया निर्वर्त्यमानत्वात्, एवं तावद्वक्तव्यं यावदच्युतः कल्पः, 'गेविज्ञगदेवाण'मित्यादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रश्नसूत्रं सुगमं, भगवानाह– गौतम ! ग्रैवेयकदेवानामेकं भवधारणीयं शरीरं तच्च समचतुरस्रसंस्थानसंस्थितं प्रज्ञप्तं, एवमनुत्तरोपपातिसूत्रमपि ।

मू. (३३२) *सोहम्मीसाणेसु देवा केरिसया वण्णेणं पन्नत्ता ?, गोयमा ! कणगत्तयरत्ताभा वण्णेणं पन्नत्ता । सणंकुमारमाहिंदेसु णं पउमपम्हगोरा वण्णेणं पन्नत्ता । बंभलोगे णं भंते ! गोयमा ! अल्लमधुगवण्णाभा वण्णेणं पन्नत्ता, एवं जाव गेवेज्ञा, अणुत्तरोववातिया परमसुक्किल्ला वण्णेणं पन्नत्ता । सोहम्मीसाणेसु णं भंते ! कप्पेसु देवाणं सरीरगा केरिसया गंधेणं प० गो० से जहा नामए–कोट्ठपुडाण वा तदेव सव्वं जाव मणामतरता चेव गंधेणं पन्नत्ता जोव अनुत्तरोववाइया ।। सोहम्मीसाणेसु देवाणं सरीरगा केरिसया फासेणं पन्नत्ता ? गोयमा ! थिरमउयणिद्धसुकुमालच्छविफासेणं पन्नत्ता, एवं जाव अनुत्तरोववातिया ।*

सोहम्मीसाणदेवाणं केरिसगा पुग्गला उस्सासत्ताए परिणमंति ?, गोयमा ! जे पोग्गला इट्ठा कंता जाव ते तेसिं उस्सासत्ताए परिणमंति जाव अनुत्तरोववातिया, एवं आहारत्ताएवि जाव अनुत्तरोववातिया । सोहम्मीसाणदेवाणं कति लेस्साओ पन्नत्ताओ ?, गोयमा ! एगा तेउलेस्सा पन्नत्ता । सणंकुमारमाहिंदेसु एगा पम्हलेस्सा, एवं बंभलोगेवि पम्हा, सेसेसु एक्का सुक्किलेस्सा, अनुत्तरोव- वातियाणं एक्का परमसुक्कलेस्सा ।

सोहम्मीसाणदेवा किं सम्मदिट्ठी मिच्छा दिट्ठी सम्मामिच्छादिट्ठी ?, तिन्निवि, जाव अंतिमगेवेज्ञा देवा सम्मदिट्ठीवि मिच्छादिट्ठीवि सम्मामिच्छादिट्ठीवि, अनुत्तरोववातिया सम्मदिट्ठी नो मिच्छादिट्ठी नो सम्मामिच्छादिट्ठी ।

सोहम्मीसाणा किं नाणी अन्नाणी ?, गोयमा ! दोवि, तिन्नि नाणा तिन्नि अन्नाणा नियमा जाव गेवेज्ञा, अनुत्तरोववातिया नाणी नो अन्नाणी तिन्नि नाणा नियमा । तिविधे जोगे दुविहे उवयोगे सव्वेसिं जाव अनुत्तरा ।।(

वृ.अधुना वर्णप्रतिपादनार्थमाह– 'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवानां शरीरकाणि कीदृशानि वर्णेन प्रज्ञप्तानि ?, भगवानाह–गौतम ! कनकत्वगयुक्तानि कनकत्वगिव रक्ता आभा–छाया येषां तानि तथा वर्णेन प्रज्ञप्तानि, उत्तप्तकनकवर्णानीति भावः, एवं शेषसूत्राण्यपि भावनीयानि, नवरं सनत्कुमारमाहेन्द्रयोर्ब्रह्मलोकेऽपि च पद्मपक्ष्मगौराणि, पद्मकेसरतुल्यावदातवर्णानीति भावः, ततः परं लान्तकादिषु यथोत्तरं शुक्लशुक्लतरशुक्लतमानि, अनुत्तरोपपातिनां परमशुक्लानि, उक्तञ्च–

॥ १ ॥ "कणगत्तयरत्ताभा सुरवसभा दोसु होंति कप्पेसु ।
तिसु होंति पम्हगोरा तेण परं सुक्किला देवा ॥"

सम्प्रति गन्धप्रतिपादनार्थमाह– 'सोहम्मी'त्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! 'से जहानामए–कोट्ठपुडाण वा' इत्यादि विमानवद्भावनीयं, एवं तावद्वक्तव्यं यावदनुतरोपपातिनाम् । सम्प्रति स्पर्शप्रतिपादनार्थमाह– 'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवानां शरीरकाणि कीदृशानि स्पर्शेन प्रज्ञप्तानि ?, भगवानाह–गौतम ! 'थिरमउयणिद्धसुकुमाला फासेणं पन्नत्ता' इति स्थिराणि नतु मनुष्याणामिव विशरारुभावं बिभ्राणानि मृदूनि–अकठिनानि स्निग्धानि–स्निग्धच्छायानि नतु रूक्षाणि सुकुमाराणि नतु कर्कशानि ततो विशेषणसमासः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्शेन प्रज्ञप्तानि, एवं तावद्वक्तव्यं यावदनुत्तरोपपातिनां देवानां शरीरकाणि।

साम्प्रतमुच्छ्वासप्रतिपादनार्थमाह–'सोहम्मी' त्यादि, सौधर्मेशानयोर्भदन्त! कल्पयोर्देवानां कीदृशाः पुद्गला उच्छ्वासतया परिणमन्ति?, भगवानाह–गौतम! ये पुद्गला इष्टाः कान्ताः प्रिया मनोज्ञा मनआपा एतेषां व्याख्यानं प्राग्वत् ते तेषामुच्छासतया परिणमन्ति, एवं तावद्वाच्यं यावदनुत्तरोपपातिका देवाः। एवमाहारसूत्राण्यपि। सम्प्रति लेश्याप्रतिपादनार्थमाह–'सोहम्मी' त्यादि, सौधर्मेशानयोर्भदन्त! कल्पयोर्देवानां कति लेश्याः प्रज्ञप्ताः?, भगवानाह–गौतम! एका तेजोलेश्या, इदं प्राचुर्यमङ्गीकृत्य प्रोच्यते, यावता पुनः कथञ्चित्तथाविधद्रव्य-सम्पर्कतोऽन्याऽपि लेश्या यथासम्भवं प्रतिपत्तव्या, सनत्कुमार- माहेन्द्रविषयं प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! एका पद्मलेश्या प्रज्ञप्ता, एवं ब्रह्मलोकेऽपि, लान्तके प्रश्नसूत्रं सुगमं, निर्वचनं–गौतम! एका शुक्ललेश्या प्रज्ञप्ता, एवं यावदनुत्तरोपपातिका देवाः, उक्तञ्च–

॥१॥ "किण्हानीलाकाउतेऊलेसा य भवणवंतरिया।
जोइससोहम्मीसाण तेउलेसा मुणेयव्वा॥

॥२॥ कप्पे सणंकुमारे माहिंदे चेव बंभलोए य।
एएसु पम्हलेसा तेण परं सुक्कलेसा उ॥

सम्प्रति दर्शनं चिचिन्तयिषुराह–'सोहम्मी' त्यादि, सौधर्मेशानयोर्भदन्त! कल्पयोर्देवा णमिति वाक्यालङ्कारे किं सम्यग्दृष्टयो मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टयः?, भगवानाह–गौतम! सम्यग्दृष्टयोऽपि मिथ्यादृष्टयोऽपि सम्यग्मिथ्यादृष्टयोऽपि, एवं यावद् ग्रैवेयकदेवाः, अनुत्तरोपपातिनः सम्यग्दृष्टय एव वक्तव्याः न मिथ्यादृष्टयो नापि स्यग्मिथ्यादृष्टयः तेषां तथास्वभावत्वात्। सम्प्रति ज्ञानाज्ञानचिन्तां चिकीर्षुराह–

'सोहम्मी' त्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ज्ञानिनोऽप्यज्ञानिनोऽपि, त्र ये ज्ञानिनस्ते नियमात्रिज्ञानिनस्तद्यथा–आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽविधिज्ञानिनः, ये अज्ञानिनस्तेनियमात् त्र्यज्ञानिनस्तद्यथा–मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च, एवं तावद्वच्यं यावद् ग्रैवेयकाः, अनुत्तरोपपातिनो ज्ञानिन एव वक्तव्याः, योगसूत्राणि पाठसिद्धानि। सम्प्रत्यवधिक्षेत्रपरिमाणप्रतिपादनार्थमाह–

मू. (३३३) *सोहम्मीसाणदेवा ओहिणा केवतियं खेत्तं जाणंति पासंति?, गोयमा! जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं अवही जाव रयणप्पभा पुढवी उड्ढं जाव साइं विमाणाइं तिरियं जाव असंखेज्जा दीवसमुद्दा एवं–*

मू. (३३४) *सक्कीसाणा पढमं दोच्चं च सणंकुमारमाहिंदा।*
तच्चं च बंभलंतग सुक्कसहस्सारग चउत्थी॥

मू. (३३५) *आणयपाणयकप्पे देवा पासंति पंचमिं पुढवीं।*
तं चेव आरणच्चुय ओहीनाणेण पासंति॥

मू. (३३६) *छट्ठीं हेट्ठिममज्झिमगेवेज्जा सत्तमिं च उवरिल्ला।*
संभिण्णलोगनालिं पासंति अनुत्तरा देवा॥

वृ. 'सोहम्मी' त्यादि, सौधर्मेशानयोर्भदन्त! कल्पयोर्देवाः कियत्क्षेत्रमवधिना जानन्ति ज्ञानेन पश्यन्ति दर्शनेन?, भगवानाह–गौतम! जघन्येनाङ्गुलस्यासङ्खयेयभागं, अत्र पर

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

आह–नन्वङ्गुलासङ्ख्येयभागमात्रक्षेत्रपरिमितोऽवधिः सर्व जघन्यतः भवति सर्व जघन्य श्चावधि स्तिर्यगमनुष्येष्व न शेषेषु यतआह भाष्यकार उत्कृष्टो मनुष्येष्वेव नान्येषु, मनुष्यतिर्यग्योनिष्वेव सर्वजघन्यो भवति, सर्वजघन्यश्वावाघ स्तिर्यग्मनुष्यष्वं व न शेषेषु यत आह भाष्यकारक उत्कृष्टो जघन्यो नान्येषु, शेषाणां मध्यम एवे''ति तत्कथमिह सर्वजघन्य उक्तः ?, उच्यते, सौधर्मादिदेवानां पारभाविकोऽप्युपपातकालेऽवधि संभवति स एव कदाचित्सर्वजघन्योऽपि उपपातनन्तरं तु तद्भवजः ततो न कश्चिद्दोषः च जिनभद्रगणिक्षमाश्रमणः–

॥१॥ ''वेमाणियाणमंगुलभागमसंखं जहन्नओ होइ (ओही)।
उववाए परमविओ तब्भवजो होइ तो पच्छा ॥''

'उक्कोसेणं एवं' यथाऽवधिपदे प्रज्ञापनायां तथा वक्तव्यं, तच्चैव्–'उक्कोसेणं अहे जाव इमीसे रयणप्पभाए पुढवीए हेट्ठिल्ले चरमंते' अधस्तनाच्चरमपर्यन्ताद् यावदित्यर्थ :'तिरियं जाव असंखेज्जे दीवसमुद्दे, उड्ढं जाव सगाइं विमाणाइं' स्वकीयानि विमानानि स्वकीयविमान-स्तूपध्वजादिकं यावदित्यर्थः 'जाणंति पासंति, एवं सणंकुमारमाहिंदावि, नवरं अहे जाव दोच्चाए सक्करप्पभाए पुढवीए हेट्ठिल्ले चरिमंते, एवं बंभलोगलंतगदेवावि, नवरं अहे जाव तच्चाए पुढवीए, महासुक्कसहस्सारगदेवा चउत्थीए पंकप्पभाए पुढवीए हेट्ठिल्ले चरिमंते, एवं बंभलोगलंतगदेवावि, नवरं अहे जाव तच्चाए पुढवीए, महासुक्कसहस्सारगदेवा चउत्थीए पंकप्पभाए पुढवीए हेट्ठिले चरिमंते, आणयपाणयआरणच्चुयदेवा अहे जाव पंचमीए पुढवीए धूमप्पभाए हेट्ठिले चरिमंते, हेट्ठिमम्ज्झिमगेवेज्जगदेवा छट्ठीए तमप्पभाए पुढवीए हेट्ठिल्ले चरिमंते, उवरिमगेवेज्जगा देवा अहे जाव सत्तमाए पुढवीए हेट्ठिल्ले चरिमंते, अनुत्तरोववाइयदेवा णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गोयमा ! संभिन्नं लोगनालिं' परिपूर्ण चतुर्दशरज्वात्मिका लोकनाडीमित्यर्थः 'ओहिणा जाणंति पासंति' इति, उक्तश्च–

॥१॥ ''सकीसाणा पढमं दोच्चं च समंकुमारमाहिंदा।
तच्चं च बंभलंतग सुक्कसहस्सारग चउत्थिं ॥

॥२॥ आणयपाणयकप्पे देवापासंति पंचभिं पुढविं।
तं चेव आरणच्चुय ओहीनाणेण पासंति ॥

॥३॥ छट्ठिं हिट्ठिममज्झिमगेविज्जा सत्तगिं च उवरिल्ला।
संभिन्नलोगनालिं पासंति अणुत्तरा देवा ॥

–सम्प्रति समुद्घातप्रतिपादनार्थमाह–

मू. (३३७) सोहम्मीसाणेसु णं भंते ! देवाणं कति समुग्घाता पन्नत्ता ?, गोयमा ! पंच समुग्घाता पन्नत्ता, तंजहा–वेदणासमुग्घाते कसाय० मारणंतिय० वेउव्विय० तेजससमुग्घाते एवं जाव अच्चुए गेवेज्जाणं आदिल्ला तिण्णि समुग्घाता पन्नत्ता।

सोहम्मीसाणदेवा केरिसय खुधपिवासं पच्चणुब्भवमाणा विहरंति ?, गोयमा ! नत्थि खुधापिवासं पच्चणुब्भवमाणा विहरंति जाव अनुत्तरोववातिया।

सोहम्मीसाणेसु णं भंते ! कप्पेसु देवा एगत्तं प्रभू विउव्वित्तए पुहुत्तं पभू विउव्वित्तए ?, हंता पभू, एगत्तं विउव्वेमाणा एगिंदियरूवं वा जाव पंचिंदियरूवं वा पुहुत्तं विउव्वेमामा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगिंदियरूवाणि वा जाव पंचिंदियरूवाणि वा, ताइं संखेज्जाइंपि संखेज्जाइंपि सरिसाइंपिअसरिसाइंपि संबद्धाइंपि असंबद्धाइंपि रूवाइं विउव्वंति विउव्वित्ता अप्पणा जहिच्छियाइं कज्जाइं करेंति जाव अच्चु, गेवेज्जणुत्तरोववातिया देवा किं एगत्तं पभू विउव्वित्तए पुहुत्तं पभू विउव्वित्तए ?, गोयमा ! एगत्तंपि पुहुत्तंपि, नो चेव णं संपत्तीए विउव्विंसु वा विउव्वंति वा विउव्विस्संति वा ।

सोहम्मीसाणदेवा केरिसयं सायासोक्खं पच्चणुब्भवमाणा विहरंति ?, गोयमा ! मणुण्णा सद्दा जाव मणुण्णा फासा जाव गेविज्जा, अनुत्तरोववाइया अनुत्तरा सद्दाजाव फासा ।।

सोहम्मीसाणेसु देवाणं केरिसगा इड्डी पन्नत्ता ?, गोयमा ! महिड्डीया महज्जुइया जाव महानुभागा इड्डीए पं० जाव अच्चुओ, गेवेज्जनुत्तरा य सव्वे महिड्डीया जाव सव्वे महानुभागा अनिंदा जाव अहमिंदा नामं ते देवगणा पन्नत्ता समणाउसो ! ।।

वृ. 'सोहम्मी'त्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! पञ्च समुद्घाताः प्रज्ञप्तास्तद्यथा—वेदनासमुद्घातः कषायसमुद्घातो मरणसमुद्घातो वैक्रियसमुद्घातस्तैजससमुद्घातः, एतेषां स्वरूपं प्रागेव द्विविधप्रतिपत्तावभिहितं, उत्तरौ द्वौ समुद्घातौ न भवतः, आहारकलब्धिकेवलित्वाभावात्, एवं तावद्वाच्यं यावदच्युतः कल्पः, 'गेवेज्जगदेदाणंभंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! पञ्च समुद्घाताः प्रज्ञप्तास्तद्यथा—वेदनासमुद्घात इत्यादि, एते च पञ्चापि तेषां शक्तितः प्रतिपत्तव्याः, कर्त्तव्यतया तु तत्र त्रय एव, तथा चाह—'नो चेव ण'मित्यादि, नैव कदाचनापि वैक्रियतैजससमुद्घाताभ्यां समवहताः समवहन्यन्ते समवहनिष्यन्ते प्रयोजनाभावतः प्रकृत्युपशान्ततया च वैक्रियसमुद्घातारम्भासम्भवात्, एवमनुत्तरोपपातिकानामपि वक्तव्यम्

'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवाः कीदृशं क्षुच्च पिपासा च क्षुत्पिपासं प्रत्यनुभवन्तो 'विहरन्ति' आसते ?, गौतम ! नास्त्येतद् यत्ते क्षुत्पिपासं प्रत्यनुभवन्तो विहरन्तीति, एवं यावदनुत्तरोपपातिकाः ।

'सोहम्मीसाणेसु ण'मित्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवाः 'एकत्वम्' एकरूपं विकुर्वितुं प्रभवः पृथक्त्वं ?—बहूनीत्यर्थः, भगवानाह—गौतम ! एकत्मपि प्रभवो विकुर्वितुं पृथक्त्वमपि प्रभवो विकुर्वितुं, एकत्वं विकुर्वन्त एकेन्द्रियरूपं वा द्वीन्द्रियरूपं वा त्रीन्द्रियरूपं वा चतुरिन्द्रियरूपं वा पञ्चेन्द्रियरूपं वा विकुर्वितुं, पृथक्त्वं विकुर्वन्त एकेन्द्रियरूपाणि यावत्पञ्चेन्द्रियरूपाणि वा, तान्यपि सङ्ख्येयानि विकुर्वन्ति असङ्ख्येयानि वा, तान्यपि 'सदृशानि' सजातीयानि वा 'असदृशानि' विजातीयानि 'सबद्धानि' आत्मनि समवेतानि 'असंबद्धानि' आत्मप्रदेशेभ्यः पृथग्भूतानि प्रासादघटपटादीनि, यथा चतुर्दशपूर्वधरा घटाद् घटसहस्रं पटात्पटसहस्रं कुर्वन्ति, विकुर्वित्वा पश्चाद् यादृच्छिकानि कार्याणि कुर्वन्ति, एवं तावद्यावदच्युतकल्पदेवाः, 'गेवेज्जगदेवाणं भंते !' इत्यादि प्रश्नसूत्रं प्रतीतं, भगवानाह—गौतम ! एकत्वमपि प्रभवो विकुर्वितुं पृथक्त्वमपि, 'नो चेव ण'मित्यादि, नैवपुनः 'सम्पत्या' साक्षाद्वैक्रियरूपसम्पादनेन विकुर्वितवन्तो विकुर्वन्ति विकुर्विष्यन्ति एवमनुत्तरोपपातिका अपि वक्तव्याः ।

'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवाः कीदृशं 'सातसौख्यं' सातं—आह्लादरूपं सौख्यं सातसौख्यं प्रत्यनुभवन्तो विहरन्ति ?, भगवानाह—गौतम ! मनोज्ञाः शब्दा मनोज्ञानि रूपाणि मनोज्ञा गन्धा मनोज्ञा रसाः मनोज्ञाः स्पर्शा एवंरूपं सातसौख्यं प्रत्यनुभवन्तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहरन्ति, एवं तावद्वाच्यं यावद्ग्रैवेयकदेवाः, 'अनुत्तरोववाइयाण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम अनुत्तराः शब्दा यावदनुत्तराः स्पर्शा इत्येवंरूपं सातसौख्यं प्रत्यनुभवन्तो विहरन्ति।

साम्प्रतमृद्धिप्रतिपादनार्थमाह–'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवाः कीदृशा ऋद्धया प्रज्ञप्ताः ?, भगवानाह–गौतम ! महर्द्धिका यावन्महानुभागाः, अमीषां पदानां व्याख्यानं पूर्ववत्, एवं तावद्वक्तव्यं यावदनुत्तरोपपातिका देवाः । सम्प्रति विभूषाप्रतिपादनार्थमाह–

मू. (३३८) *सोहम्मीसाणा देवा केरिसया विभूसाए पन्नत्ता ?, गोयमा ! दुविहा पन्नत्ता, तंजहा–वेउव्वियसरीरा य अवेउव्वियसरीरा य, तत्थ णं जे ते वेउव्वियसरीरा ते हारविराइयवच्छा जाव दस दिसाओ उज्जोवेमाणा पभासेमाणा जाव पडिरूवा, तत्थ णं जे ते अवेउव्वियसरीरा ते णं आभरणवसणरहिता पगतित्था विभूसाए पन्नत्ता ।*

सोहम्मीसाणेसु णं भंते ! कप्पेसु देवीओ केरिसियाओ विभूसाए प० गो० दुविधाओ प० तंजहा–वेउव्वियसरीराओ य अवेउव्वियसरीराओ य, तत्थ णं जाओ वेउव्वियसरीराओ ताओ सुवण्णसद्दालाओ सुवण्णसद्दालाइं वत्थाइं पवर परिहिताओ चंदाननाओ चंदविलासिणीओ चंदद्धसमणिडालाओ सिंगारागारचारुवेसाओ संगय जाव पासातीयाओ जाव पडिरूवा, तत्थ णं जाओ अवेउव्वियसरीराओ ताओ णं आभरणवसणरहियाओ पगतित्थाओ विभूसाए प० ।

सेसेसु देवा देवीओ नत्थि जाव अच्चुओ, गेवेज्जगदेवा केरिसया विभूसाए० ?, गो० आभरणवसणरहिया, एवं देवी नत्थि भाणियव्वं, पगतित्था विभूसाए प० एवं अणुत्तरावि

वृ. 'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोर्देवानां शरीरकाणि कीदृशानि विभूषया प्रज्ञप्तानि ?, भगवानाह–गौतम ! द्विविधानि प्रज्ञप्तानि, तद्यथा–भवधारणीयानि उत्तरवैक्रियाणि च, तत्र यानि तानि भवधारणीयानि तानि आभरणवसनरहितानि प्रकृतिस्थानि विभूषया प्रज्ञप्तानि, स्वाभाविक्येव तेषां विभूषा नौपाधिकीति भावः, तत्र यानि तानि उत्तरवैक्रियरूपाणि शरीराणि तानि 'हारविराइयवच्छा' इत्यादि पूर्वोक्तं तावद्वक्तव्यं यावत् 'दस दिसाओ उज्जोवेमाणा पभासेमाणा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा विभूसाए पन्नत्ता' अस्य व्याख्या पूर्ववत् ।

एवं देवीष्वपि नवरं 'ताओ णं अच्छराओ सुवण्णसद्दालाओ' इति नूपुरादिनिर्घोषयुक्ताः 'सुवण्णसद्दालाइं वत्थाइं पवरपरिहिताओ' सकिङ्किणीकानि वस्त्राणि प्रवरं–अत्युद्‌भटं यथा भवत्येवं परिहितवन्त्य इति भावः, 'चंदाननाओ चंदविलासिणीओ चंदद्धसमनिडालाओ चंदाहियसोमदंसणाओ उक्क इव उज्जोवेमाणीओ विज्जुघणमरीइसूरदिप्पंततेयअहिययरसन्निकासाओ सिंगारागारचारुवेसाओ पासाईयाओ दरिसमिज्जाओ अभिरूवाओ' इति प्राग्वत्, एवं देवानां शरीर विभूषा तावद्वाच्या यावदच्युतः कल्पः, देव्यस्तु सनत्कुमारादिषु न सन्तीति न तत्सूत्रं तत्र वाच्यं, 'गेवेज्जगदेवा णं भंते ! सरीरा केरिसगा विभूसाए पन्नत्ता ?, गोयमा ! गेवेज्जगदेवाणं एगे भवधारणिज्जे सरीरे ते णं आभरणवसणरहिया पगइत्था विभूसाए पन्नत्ता' इति पाठः, एवमनुत्तरोपपातिका अपि वाच्याः ।

मू. (३३९) *सोहम्मीसाणेसु देवा केरिसए कामभोगे पच्चणुब्भवमाणा विहरंति ?, गोयमा इट्ठा सद्दा इट्ठा रूवा जाव फासा, एवं जाव गेवेज्जा, अनुत्तरोववातियाणं अनुत्तरा सद्दा जाव अनुत्तरा फासा ॥*

वृ. सम्प्रति कामभोगप्रतिपादनार्थमाह—'सोहम्मी'त्यादि, सौधर्मेशानयोर्भदन्त ! कल्पयोः कीदृशान् कामभोगान् प्रत्यनुभवन्तः प्रत्येकं वेदयमाना विहरन्ति ?, भगवानाह—गौतम ! इष्टान् शब्दान् इष्टानि रूपाणि इष्टान् गन्धान् इष्टान् रसान् इष्टान् स्पर्शान् प्रत्यनुभवन्तो विहरन्ति, एवं यावद् ग्रैवेयकदेवाः, अनुत्तरोपपातिकसूत्रेषु अनुत्तरानिति वक्तव्यम् ।

मू. (३४०) *ठिती सव्वेसिं भाणियव्वा, देवित्ताएवि, अनंतरं चयंति चइत्ता जे जहिं गच्छंति तं भाणियव्वं ॥*

वृ. अधुना स्थितिप्रतिपादनार्थमाह—'सोहम्मगदेवाण'मित्यादि, सौधर्म्मकदेवानां भदन्त कियन्तं कालं स्थिति प्रज्ञप्ता ?, भगवानाह—गौतम ! जघन्यत एकं पल्योपममुत्कर्षतो द्वे सागरोपमे, एवमीशाने जघन्यत एकं सातिरेकं पल्योपममुत्कर्षतो द्वे सातिरेके सागरोपमे, सनत्कुमारे जघन्यतो द्वे सागरोपमे उत्कर्षतः सप्त सागरोपमाणि, माहेन्द्रे जघन्यतः सातिरेके द्वे सागरोपमे उत्कर्षतः सातिरेकाणि सप्त सागरोपमाणि, ब्रह्मलोके जघन्यतः सप्त सागरोपमाणि उत्कर्षतो दश सोगर० लान्तके जघन्यतो दशसाग० उत्कर्षतश्चतुर्दश साग० महाशुक्र जघन्यतश्चतुर्दश साग० उत्कर्षतः सप्तदश, सहस्रारे जघन्यतः सप्तदश साग० उत्कर्षतोऽष्टादश, आनतकल्पे जघन्यतोऽ-ष्टादश साग० उत्कर्षत एकोनविंशति, प्राणते जघन्यत एकोनविंशति साग० उत्कर्षतो विंशति, आरणे जघन्यतो विंशति सागरोपमाणिउत्कर्षत एकविंशति अच्युते जघन्यत एकविंशति सागरोपमाणिउत्कर्षतो द्वाविंशतिः ,

अधस्तनाधस्तनाधस्तनग्रैवेयकप्रस्तटे जघन्यतो द्वाविंशति साग० उत्कर्षतस्त्रयोविंशति

अधस्तनमध्यमग्रैवेयकप्रस्तटे जघन्यतस्त्रयोविंशति साग० उत्कर्षतश्चतुर्विंशति, अधस्तनोपरितनग्रैवेयकप्रस्तटे जघन्यतश्चतुर्विंशति साग० उत्कर्षतः पञ्चविंशति, मध्यमा-धस्तनग्रैवेयकप्रस्तटे जघन्यतः पञ्चविंशति साग० उत्कर्षतः षड्विंशति, मध्यममध्य- मग्रैवेयक-प्रस्तटे जघन्यतः षडविंशति साग० उत्कर्षतः सप्तविंशति, मध्यमोपरितन- ग्रैवेयकप्रस्तटे जघन्यतः सप्तविंशति साग० उत्कर्षतोऽष्टविंशति, उपरितनाधस्तन- ग्रैवेयकप्रस्तटे जघन्यतोऽष्टाविंशति साग०उत्कर्षत एकोनत्रिंशत्, उपरितनमध्यम- ग्रैवेयकप्रस्तटे जघन्यत एकोनत्रिंशत्साग० उत्कर्षतस्त्रिंशत्, उपरितनोपरितनग्रैवेयकप्रस्तटे जघन्यतस्त्रिंशत्साग० उत्कर्षत एकत्रिंशत् ।

विजयवैजयन्तजयन्तापराजितेषु जघन्यत एकत्रिंशत्सागरोपमाणि उत्कर्षतस्त्रयस्त्रिंशत्, सर्वार्थसिद्धे महाविमानेऽजघन्योत्कर्षतस्त्रिंयस्त्रशत्सागरोपमाणि ।

सम्प्रत्युद्वर्त्तनामाह—'सोहम्मगदेवाण'मित्यादि, सौर्मकदेवा भदन्त ! अनन्तरं अव्यवधानेन च्यवित्वा क्व गच्छन्ति ?, एतदेव व्याचष्टे—कोत्पद्यन्ते ?, किं नैरयिकेषु गच्छन्ति यावद्देवेषु गच्छन्ति ?, भगवानाह—गौतम ! 'नो नेरइएसु उववज्जंति' इत्यादि यथा प्रज्ञापनायां षष्ठे व्युक्रन्त्याख्यपदे तथा वक्तव्यं ।

एष च सङ्क्षेपार्थ—बादरपर्याप्तेषु पृथिव्यबवनस्पतिषु स्यार्पतगर्भव्युत्क्रान्तिकति-र्यकपञ्चेन्द्रियमनुष्येषु च सङ्ख्यातवर्षायुष्केषु, एवमीशानदेवा अपि, सनत्कुमारदायः सहस्रारपर्यन्ताः पर्याप्तगर्भव्युत्क्रान्तिकतिर्यकपञ्चेन्द्रियमनुष्येष्वेव सङ्ख्यातवर्षायुष्केषु नैकेन्द्रियेष्वपि, आनतादयो यावदनुत्तरोपपातिका न तिर्यक्पञ्चेन्द्रियेष्वपि किन्तु यथोक्तरूपेषु मनुष्येषु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३४१) सोहम्मीसाणेसु णं भंते! कप्पेसु सव्वपाणा सव्वभूया जाव सत्ता पुढविकाइयत्ताए जाव वणस्सतिकाइयत्ताए देवत्ताए देवित्ताए आसणसयण जाव भंडोवगरणत्ताए उववन्नपुव्वा

हंता गोयमा! असइ अदुवा अनंतखुत्तो, सेसेसु कप्पेसु एवं चेव, नवरि नो चेव णं देवित्ताए जाव गेवेज्जगा, अनुत्तरोववातिएसुवि एवं, नो चेव णं देवत्ताए देवित्ताए। सेत्तं देवा॥

वृ. 'सोहम्मेण' मित्यादि, सौधर्मे भदन्त! कल्पे द्वात्रिंशद् विमानावासशतसहस्रेषु एकैकस्मिन् विमाने सर्वे प्राणाः सर्वे भूताः सर्वे जीवाः सर्वे सत्वाः, अमीषां व्याख्यानमिदम्–

॥१॥ "प्राणा द्वित्रिचतुः प्रोक्ता, भूताश्च तरवः स्मृताः।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्वा उदीरिताः॥"

पृथ्वीकायतया देवतया देवीतया, इह च बहुषु पुस्तकेष्वेतावदेव सूत्र दृश्यते, क्वचित्पुनरेतदपि–'आउकाइयत्ताए तेउकाइयत्ताए' इत्यादि तत्र सम्यगवगच्छामस्तेजस्कायस्य तत्रासम्भवात्, 'आसणे' त्यादि, आसनं–सिंहासनादि शयनं–पल्यङ्कः स्तम्भाः–प्रासादाद्यवष्टम्भ-हेतवः भाण्डमात्रोपकरणं–हारार्द्धहारकुण्डलादि तत्तयोत्पन्नपूर्वा?, भगवानाह–गौतम! 'असकृत्' अनेकवारमुत्पन्नपूर्वा इति सम्बन्धः, अथवा 'अनन्तकृत्वः' अनन्तान् वारान्, सांव्यवहारिकराश्य-न्तर्गतैर्जीवैः सर्वस्थानानां प्रायोऽनन्तशः प्राप्तत्वात्, एवमीशानेऽपि वक्तव्यं, सनत्कुमारेऽप्येवमेव, नवरं 'नो चेव णं देवित्ताए' इति विशेषः तत्र देवीनामुत्पादाभावात्, एवं यावद् ग्रैवेयकाणि।

'पंचसु णं भंते! अनुत्तरे' इत्यादि पाठसिद्धं नवरं 'नो चेव णं देवित्ताए' इति, अनन्तकृत्वो देवत्वस्य प्रतिषेधो विजयादिषु चतुर्षूत्कर्षतोऽपि वारद्वयं सर्वार्थसिद्धे महाविमाने एकवारं गमनसम्भवात्, तत ऊर्द्धमवश्यं मनुष्यभवासादनेन मुक्तिप्राप्तेः, देवीत्वस्य च प्रतिषेधस्त-त्रोत्पादासम्भवात्।

सम्प्रति चतुर्विधानामपि जीवानां सामान्यतो भवस्थितिं कायस्थितिं च प्रतिपिपादयिषुराह–

मू. (३४२) नेरइयाणं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं, एवं सव्वेसिं पुच्छा, तिरिक्खजोणियाणं जहन्नेणं अंतोमु० उक्कोसेणं तिन्नि पलिओवमाइं, एवं मणुस्साणवि, देवाणं जहा नेरतियाणं।

देवनेरइयाणं जा चेव ठिती सच्चेव संचिट्ठणा, तिरिक्खजोणियस्स जहन्नेणं अंतोमुहुत्तो उक्कोसेणं वणस्सतिकालो, मणुस्से णं भंते! मणुस्सेति कालतो केवच्चिरं होति?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कसेणं तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं।

नेइरयमणुस्सदेवाणं अंतरं जहन्नेणं अंतोमु० उक्कोसेणं वणस्सतिकालो। तिरिक्खजोणियस्स अंतरं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोपमसयपुहुत्तसाइरेगं।

वृ. 'नेरइयाणं भंते! केवइयं काल' मित्यादि, नैरयिकाणां जघन्यतः स्थितिर्दश वर्षसहस्राणि, एतद् रत्नप्रभाप्रथमप्रस्तटमपेक्ष्योक्तं, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, एतत्सप्तमरकपृथिव्य-पेक्षया, तिर्यग्योनिकानां जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रीणि पल्योपमानि, एतद्देवकुर्वादिकमपेक्ष्य द्रष्टव्यं, एवं मनुष्याणामपि, देवानां जघन्यतो दश वर्षसहस्राणि, एतद्भवनपतिव्यन्तरानधिकृत्या-वबोद्धव्यं, उत्कर्षतस्त्रयस्त्रिशत् सागरोपमाणि, तानि विजयाद्यपेक्ष्य।

'नेरइयाणं भंते!' इत्यादि, नैरयिको भदन्त! नेरयिकत्वेन कालतः कियच्चिरं भवति?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवानाह–गौतम ! 'जा चेव भवट्ठिई सा चेव संचिट्ठणावि' यैव भवस्थिति सैव 'संचिट्ठणावि' कायस्थितिरपि, नैरयिकस्याव्यवधाने भूयो नैरयिकेषूत्पादाभावात्, 'नो नेरइए नेरइएसु उववज्जइ' इति वचनात्, 'तिरिक्खजोणिए णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, गौतम ! जघन्यतोऽन्तर्मुहूर्तं, तदनन्तरं मृत्वा मनुष्यादावुत्पादात्, उत्कर्षतोऽनन्तं कालं, वनस्पतिकायिकेष्वनन्तकालमवस्थानात्, तमेवानन्तकालं निरूपयति–वनस्पतिकालः, यावान् शास्त्रान्तरे वनस्पतिकाल उक्तस्तावन्तं कालमित्यर्थः, स चैवम्–'अनंताओ उस्सप्पिणीओसप्पिणीओ कालतो खेत्ततो अनंता लोगा असंखेज्ञा पुग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइभागो' सुगमम्, मनुष्यविषयं प्रश्नसूत्रं पाठसिद्धं, निर्वचनं–गौतम ! जघन्येनान्तर्मुहूर्तं, तदनन्तरं मृत्वा तिर्यगा- दिषूत्पादभावादिति, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि, तानि च महाविदेहादिषु सप्तसु मनुष्यभवेषु पूर्वकोटयायुष्केषु अष्टमे च देवकुर्वादिषूत्पद्यमानस्य वेदितव्यानि देवानां तु नैरयिकवद् यैव भवस्थिति सैव कायस्थितिरपि, देवानामपि मृत्वा भूयोऽनन्तरं देवत्वेनोत्पादाभावत् "नो देवे देवेसु उववज्जइ" इति वचनात् ।

साम्प्रतमन्तरं चिचिन्तयिषुराह–'नेरइयस्स णं भंते' ! इत्यादि, नैरयिकस्य भदन्त ! अनन्तरं–नैरयिकत्वात्परिभ्रष्टस्य भूयो नैरयिकत्वप्राप्तेरपान्तरालं कालतः कियच्चिरं भवति ?, कियन्तं कालं यावद्भवतीत्यर्थः, भगवानाह–जघन्येनान्तर्मुहूर्तं, कथमिति चेत्, उच्यते, नरकादुद्धृत्य मनुष्यभवे तिर्यग्भवे वाऽन्तर्मुहूर्तं स्थित्वा भूयो नरकेषूत्पादात्, तत्र मनुष्यभवभावनेयम्–कश्चिन्नरकादुद्धृत्य गर्भजमनुष्यत्वेनोत्पद्य सर्वाभिः पर्याप्तिभिः पर्याप्तो विशिष्टसंज्ञानोपेतो वैक्रियलब्धिमान् राज्याद्याकाङ्क्षी परचक्राद्युपद्रवमाकर्ण्य स्वशक्तिप्रभावतश्चतुरङ्गं सैन्यं विकुर्वित्वा सङ्ग्रामयित्वा च महारौद्रध्यानोपगतो गर्भस्थ एव कालं करोति कृत्वा च कालं भूयो नरकेषूत्पद्यते तत एवमन्तर्मुहूर्तं, तिर्यग्भवे नरकादुद्धृतो गर्भव्युत्क्रान्तिकतन्दुलमत्स्यत्वेनोत्पद्य महारौद्रध्यानोपगतोऽन्तर्मुहूर्तं जीवित्वा भूयो नरकेषु जात इति, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालः परम्परया वनस्पतिषूत्वादादवसातव्यः, तथा चाह–वनस्पतिकालः, स च प्रागेवोक्तः ।

तिर्यग्योनिविषयं प्रश्नसूत्रं पूर्ववत्, निर्वचनं–जघन्येनान्तर्मुहूर्तं, तच्च कस्यापि दिर्यक्त्वेन मृत्वा मनुष्यभवेऽन्तर्मुहूर्तं स्थित्वा भूयस्तिर्यक्त्वेनोत्पद्यमानस्य द्रष्टव्यं, उत्कर्षतः सातिरेकं सागरोपमशतपृथक्त्वं, तच्च नैरन्तर्येण देवनारकमनुष्यभवभ्रमणेनावसातव्यं ।

मनुष्यविषयमपि प्रश्नसूत्रं तथैव, निर्वचनं–जघन्येनान्तर्मुहूर्तं, तच्च मनुष्यभवादुद्धृत्य तिर्यग्भवेऽन्तर्मुहूर्तं स्थित्वा भूयो मनुष्यत्वेनोत्पद्यमानस्यावसातव्यं, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालः प्रागुक्तो वनस्पतिकालः । देवविषयमपि प्रश्नसूत्रं सुगमं, निर्वचनं जघन्येनान्तर्मुहूर्तं, कश्चिद्देवभवाच्च्युत्वा गर्भजमनुष्यत्वेनोत्पद्य सर्वाभिः पर्याप्तिभिः पर्याप्तो विशिष्टसंज्ञानोपेतस्तथाविधस्य श्रमणस्य श्रमणोपासकस्य वाऽन्ते धर्म्यमार्यं वचः श्रुत्वा धर्मध्यानोपगतो गर्भस्थ एव कालं करोति कालं च कृत्वा देवेषूत्पद्यते तत एवमन्तर्मुहूर्तं, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालो यथोक्तस्वरूपो वनस्पतिकालः प्रतिपत्तव्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३४३) एतेसि णं भंते !नेरइयाणं जाव देवाण य कयरे० ?, गोयमा ! सव्वत्थोवा मणुस्सा नेरइया असं० देवा असं० तिरिया अनंतगुणा, से तं चउव्विहा संसारसमावण्णगा जीवा पन्नत्ता ।।

वृ. साम्प्रतमल्पबहुत्वमाह–'एएसि ण'मित्यादि प्रश्नसूत्रं पाठसिद्धं, भगवानाह–गौतम सर्वस्तोका मनुष्याः, श्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, तेभ्यो नैरयिका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेर्यत्प्रथमं वर्गमूलं तद्द्वितीयेन वर्गमूलेन गुण्यते गुणिते च सति यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्यो देवा असङ्ख्येयगुणाः । व्यन्तराणां ज्योतिष्काणां च नैरयिकेभ्योऽप्यसङ्ख्येयगुणतया महादण्डके पठितत्वात्, तेभ्योऽपि तिर्यञ्चोऽनन्ताः, वनस्पतिजीवानामनन्तानन्तत्वात् ।।

प्रतिपत्तौ–३ देवाधिकारे–वैमानिक–उद्देशकः–२ समाप्तः

प्रतिपत्तिः–३ "चतुर्विधा समाप्ता

मुनिदीपरत्न सागरेण संशोधिता सम्पादिता जीवाजीवाभिगमसूत्रे तृतीयाप्रतिपत्याः मलयगिरि आचार्य विरचिता टीका परि समाप्ता ।

प्रतिपत्तिः–४ "पञ्चविधा"

वृ. तदेवमुक्ता चतुर्विधा प्रतिपत्ति, सम्प्रति क्रमप्राप्तां पञ्चविधप्रतिपत्तिमाह–

मू. (३४४) तत्थ जे ते एवमाहंसु–पंचविहा संसारसमावन्नगा जीवा पन्नत्ता ते एवमाहसु, तं०–एगिंदिया बेइंदिया तेइंदिया चउरिंदिया पंचिंदिया । से किं तं एगिंदिया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य, एवं जाव पंचिंदिया दुविहा–पज्जत्तगा य अपज्जत्तगा य ।

एगिंदियस्स णं भंते ! केवइयं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं, बेइंदिय० जहन्नेणं अंतोमु० उक्कोसेणं बारस संवच्छराणि, एवं तेइंदियस्स एगूणपण्णं राइंदियाणं, चउरिंदियस्स छम्मासा, पंचेंदियस्स जह० अंतोमु० उक्कोसेणं तेत्तीसं सागरोवमाइं ।

अपज्जत्तएगिंदियस्स णं केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमु० उक्कोसेणवि अंतो० एवं सव्वेसिं, पज्जत्तेगिंदियाणं णं जाव पंचिंदियाणं पुच्छा, जहन्नेणं अंतो० उक्को० बावीसं वाससहस्साइं अंतमुहुत्तोणाइं, एवं उक्कोसियावि ठिती अंतोमुहुत्तोणा सव्वेसिं पज्जत्ताणं कायव्वा । एगिंदिए णं भंते ! एगिंदिएत्ति कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमु० उक्को० वनस्सतिकालो । बेइंदियस्स णं भंते ! वेइंदियति कालओ केवचिरं होइ ?, जह० अंतो मु० उक्कोसेणं संखेज्जं कालं जाव चउरिंदिए संखेज्जं कालं, पंचेंदिए णं भंते ! पंचिंदिएत्ति कालओ केवचिरं होइ ?, गोयमा ! जह० अंतोमु० उक्को० सागरोवमसहस्सं सातिरेगं ।

एगिंदिए णं अपज्जत्तए णं भंते ! कालओ केवचिरं होंति ?, गोयमा ! जहन्नेणं अंतोमु० उक्कोसेणवि अंतोमुहुत्तं जाव पंचिंदियअपज्जत्तए । पज्जत्तगएगिंदिए णं भंते ! कालओ केवचिरं होंति ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखिज्जाइं वाससहस्साइं । एवं बेइंदिएवि, नवरिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संखेज्जाइं वासाइं। तेइंदिए णं भंते!० संखेज्जा राइंदिया। चउरिंदिए णं० संखेज्जा मासा। पज्जत्तपंचिंदिए सागरोवमसयपुहत्तं सातिरेगं।

एगिंदियस्स णं भंते! केवतियं कालं अंतरं होति?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं। बेंदियस्स णं अंतरं कालओ केवचिरं होति?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं वणस्सइकालो। एवं तेइंदियस्स चउरिंदियस्स पंचेंदियस्स, अपज्जत्तगाणं एवं चेव, पज्जत्तगाणवि एवं चेव॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तः-पञ्चविधाः संसारसमापन्नका जीवाः प्रज्ञप्तास्ते 'एवं' वक्ष्यमाणप्रकारेणोक्तवन्तः, तमेव प्रकारमाह-तद्यथा-एकेन्द्रिया द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाः, अमीषां पदानां व्याख्यानं प्राग्वत्॥ 'से किं त'मित्यादीनि पञ्च पर्याप्तापर्याप्तसूत्राणि, 'एगिंदियस्स णं भंते! केवइयं कालं ठिई?' इत्यादीनि पञ्च स्थितिसूत्राणि पाठसिद्धानि, अपर्याप्तकविशेषणविशिष्टान्यपि पञ्च स्थितिसूत्राणि पाठसिद्धानि, नवरं जघन्यादन्तर्मुहूर्त्तादुत्कृष्टमन्तर्मुहूर्त्तं बृहत्तरमवसातव्यं, पर्याप्तविशेषणविशिष्टान्यपि पञ्च स्थितिसूत्राणि सुप्रतीतानि, नवरमुत्कर्षतो द्वाविंशतिर्वर्षसहस्रादीन्यन्तर्मुहूर्त्तोनानि, अपर्याप्तककालेनान्तर्मुहूर्त्तेन हीनत्वात्

सम्प्रति कायस्थितिप्रतिपादनार्थमाह-'एगिंदिए णं भंते! एगिंदिए'त्ति इत्यादि, जघन्यतोऽन्तर्मुहूर्त्तं, तदनन्तरं मृत्वा द्वीन्द्रियादिषूत्पादात्, उत्कर्षतोऽनन्तं कालं, अनन्तकालमेव निरूपयति- वनस्पतिकालः, वनस्पतिकालस्यैकेन्द्रियत्वात् एकेन्द्रियपदे तस्यापि परिग्रहात्, वनस्पतिकालश्च प्रागेवोक्तः। द्वित्रिचतुरिन्द्रियसूत्रे सङ्ख्येयं कालं-सङ्ख्येयानि वर्षसहस्राणि "विगलिंदियाम वाससहस्सा संखेज्जा" इति वचनात्, पञ्चेन्द्रियसूत्रे सातिरेकं सागरोपमसहस्रं, तच्च नैरयिकति- र्यक्पञ्चेन्द्रियमनुष्यदेवभवभ्रमणेन वेदितव्यं। 'एगिंदियअपज्जत्तए णं भंते' इत्यादि, जघन्यत उत्कर्षतोऽन्तर्मुहूर्त्तमपर्याप्तलब्धेरोता- वत्कालप्रमाणत्वात्, एवं शेषाण्यपि चत्वार्पर्याप्तकसूत्राणि भा० एकेन्द्रियपर्याप्तकसूत्रे सङ्ख्येयानि वर्षसहस्राणि, एकेन्द्रियस्य हि पृथिवीकायस्योत्कर्षतो द्वात्रिंशतिर्वर्षसहस्राणि भवस्थिति अपकायस्य सप्त वर्षसहस्राणि तेजस्कायस्य त्री रात्रिन्दिवानि वायुकायस्य त्रीणि वर्षसहस्राणि वनस्पतिकायस्य दश वर्षसहस्राणि, ततो निरन्तरकतिपयपर्याप्तभवसङ्कलनया सङ्ख्येयान्येव वर्षसहस्राणि घटन्त इति।

द्वीन्द्रियपर्याप्तसूत्रे उत्कर्षतः सङ्ख्येयानि वर्षाणि, द्वीन्द्रियस्य हि उत्कर्षतो भवस्थितिपरिमाणं द्वादश वर्षाणि न च सर्वेष्वपि भवेषूत्कृष्टा स्थितिस्ततः कतिपयनिरन्तरपर्याप्तभवसङ्कलनयापि सङ्ख्येयानि वर्षाण्येव लभ्यन्ते न तु वर्षशतानि वर्षसहस्राणि वा। त्रीन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि रात्रिन्दिवानि, तेषां भवस्थितेरुत्कर्षतोऽप्येकोनपञ्चाशद्दिनमानतया कतिपयनिरतन्तरपर्याप्तभवसङ्कलनायामपि सङ्ख्येयानां रात्रिन्दिवानामेव लभ्यमानत्वात्। चतुरिन्द्रियपर्याप्तसूत्रे सङ्ख्येया मासास्तेषां भवस्थितेरुत्कर्षतः षण्मासप्रमाणतया कतिपयनिरन्तरपर्याप्तभवकालसङ्कलनया सङ्ख्येयानां मासानां प्राप्यमानत्वात्। पञ्चेन्द्रियपर्याप्तसूत्रे सागरोपमशतपृथक्त्वं सातिरेकं, तच्च पूर्ववत्। 'एगिंदियस्स णं भंते! अंतरं कालतो केवचिरं होइ?' इति प्रश्नसूत्रं सुगमं, भगवानाह-गौ० जघन्येनान्तर्मुहूर्त्तं, तच्चैकेन्द्रियादुद्वृ त्य द्वीन्द्रियादावन्तर्मुहूर्त्तं स्थित्वा भूय एकेन्द्रियत्वेनोत्पद्यमानस्य वेदितव्यं, उत्कर्षतो द्वे सागरोपमसहस्रे सङ्ख्येयवर्षाभ्यधिके, यावानेव हि त्रसकायस्य कायस्थिति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालस्तावदेवैकेन्द्रियस्यान्तरं, त्रसकायस्थितिकालश्च यथोक्तप्रमाणः, तथा च वक्ष्यति–'तसकाइए णं भंते !' तसकायत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जावासमब्भहियाइं'।

द्वित्रिचतुष्पञ्चेन्द्रियसूत्रेषु जघन्यतोऽन्तर्मुहूर्त्तं, तच्च पूर्वप्रकारेण भावनीयं, उत्कर्षतः सर्वत्रापि वनस्पतिकालः, द्वीन्द्रियादिभ्य उद्धृत्य वनस्पतिषु यथोक्तप्रमाणमनन्तमपि कालमवस्थानात्। यथैवामूनि पञ्च सूत्राण्यन्तरविषयाण्यौधिकान्युक्तानि तथैव पर्याप्तविषयाण्यपर्याप्तविषयाण्यपि भणनीयानि, तानि चैवम्–'एगिंदियअपज्जत्तस्स णं भंते ! अंतरं कालतो केवचिरं होइ ?, गोयमा जहन्नेणं अंतोमुहुत्तमुक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं, बेइंदियअपज्जत्तस्स णं भंते ! अंतरं कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं वणस्सइकालो, एवं जाव पंचेंदियअपज्जत्तस्स !' एवं पञ्च पर्याप्तसूत्राण्यपि वक्तव्यानि ॥ साम्प्रतमल्पबहुत्वमाह–

मू. (३४५) *एएसि णं भंते ! एगिंदि बेइं० तेइं० चउ० पंचिंदियाणं कयरे२हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पंचेंदिया चउरिंदिया विसेसाहिया तेइंदिया विसेसाहिया बेइंदिया बसेसाहिया एगिंदिया अनंतगुणा। एवं अपज्जत्तगाणं सव्वत्थोवा पंचेंदिया अपज्जत्तगा चउरिंदिया अपज्जत्तगा विसेसाहिया तेइंदिया अपज्जत्तगा विसेसाहिया बेइंदिय अपज्जत्तगा विसेसाहिया एगिंदिया अपज्जत्तगा अनंतगुणा सइंदियाप० वि०।*

सव्वत्थोवा चतुरिंदिया पज्जत्तगा पंचेंदिया पज्जत्तगा विसेसाहिया बेंदियपज्जत्तगा विसेसाहिया तेइंदियपज्जत्तगा विसेसाहिया एगिंदियपज्जत्तगा अणंतगुणा, सइंदिया पज्जत्तगा विसेसाहिया।

एतेसि णं भंते ! सइंदियाणं पज्जत्तगअपज्जत्तगाणं कयरे २ ?, गोयमा ! सव्वत्थोवा सइंदिया अपज्जत्तगा सइंदिया पज्जत्तगा संखेज्जगुणा। एवं एगिंदियावि।

एतेसि णं भंते ! बेइंदियामं पज्जत्तापज्जत्तगाणं अपापबहुं ?, गोयमा ! सव्वत्थोवा बेइंदिया पज्जत्तगा अपज्जत्तगा असंखेज्जगुणा, एवं तेंदियचउरिंदियपंचेंदियावि।

एएसि णं भंते ! एगिंदियाणं बेइंदि–० तेइंदि० चउरिंदि० पंचेंदियाण य पज्जत्तगाण य अपज्जत्तगाण य कयरे २ ?, गोयमा ! सव्वत्थोवा चउरिंदिया पज्जत्तगा पंचेंदिया पज्जत्तगा विसेसाहिया बेइंदिया पज्जत्तगा विसेसाहिया तेइंदिया पज्जत्तगा विसेसाहिया पंचेंदिया अपज्जत्तगा अंखेज्जगुणा चउरिंदिया अपज्जत्ता विसेसाहिया तेइंदियअपज्जत्ता विसेसाहिया बेइंदिया अपज्जत्ता विसेसाहिया एगिंदियअपज्जत्ता अनंतगुणा सइंदिया अपज्जत्ता विसेसाहिया एगिंदियपज्जत्ता संखेज्जगुणा सइंदियपज्जत्ता विसेसाहिया सइंदिया विसेसाहिया। सेत्तं पंचविधा संसारसमावण्णगा जीवा ॥

वृ. "एएसि ण'मित्यादि प्रश्नसूत्रं सूगमं, भगवानाह–गौतम ! सर्वस्तोकाः पञ्चेन्द्रियाः, सङ्ख्येययोजनकोटीकोटीप्रमाणविष्कम्भसूचीप्रमितप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यश्चतुरिन्द्रिया विशेषाधिकाः, विष्कम्भसूच्यास्तेषां प्रभूतसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि त्रीन्द्रिया विशेषाधिकास्तेषां विष्कम्भसूच्याः प्रभूततरसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि द्वीन्द्रि विशेषाधिकास्तेषां विष्कम्भसूच्याः प्रभूततमसङ्ख्येय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योजनकोटीकोटीमानत्वात्, तेभ्य एकेन्द्रियाअनन्तगुणाः, वनस्पतीनामनन्तानन्तत्वात् ।

सम्प्रत्येतेषामेवापर्याप्तविशेषणविशिष्टानामल्पबहुत्वमाह–'एएसि ण'मित्यादि प्रश्नसूत्रं पाठसिद्धं, भगवानाह–गौतम ! सर्वस्तोकाः पञ्चेन्द्रिया अपर्याप्तकाः, एकस्मिन् प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्, तेभ्यश्चतुरिन्द्रियापर्याप्ता विशेषाधिकाः प्रभूततराङ्गुलासङ्ख्येयभागखण्डप्रमाणत्वात्, तेभ्यस्त्रन्द्रियापर्याप्ता विशेषाधिकाः प्रभूततरप्रतराङ्ग्लासङ्ख्येयभागखण्डप्रमाणत्वात्, तेभ्यो द्वीन्द्रियापर्याप्ता विशेषाधिकाः प्रभूततमप्रतराङ्गुलुसङ्ख्येभागखण्डमानत्वात्, तेभ्य एकेन्द्रियपर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानामपर्याप्तानामनन्तानन्ततया सदा प्राप्यमाणत्वात् ।। अधुनैतेषामेव पर्याप्तविशेषणविशिष्टानामल्पबहुत्वमाह– 'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सर्वस्तोकाश्चतुरिन्द्रियाः पर्याप्ता यतोऽल्पाषश्चतुरिन्द्रियास्ततः प्रभूतकालमवस्थानाभावात् पृच्छासमये स्तोका अवाप्यन्ते, ते च स्तोका अपि प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणा वेदितव्याः, तेभ्यः पञ्चेन्द्रियपर्याप्ता विशेषाधिकाः, प्रबूततराङ्गुलासङ्ख्येयभागखण्डमानत्वात्, तेभ्योऽपि द्वीन्द्रियाः पर्याप्ता विशेषाधिकाः प्रभूततरप्रतराङ्गुलसङ्ख्येयभागखण्डप्रमाणत्वात्, तेभ्योऽपि त्रीन्द्रियपर्याप्ता विशेषाधिकाः, स्वभावत एव तेषां प्रभूततराङ्गुलसङ्ख्येयभागखण्डप्रमाणत्वात्, तेभ्य एकेन्द्रियाः पर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानां पर्याप्तानामनन्तत्वात् ।

साम्प्रतमेतेषामेव प्रत्येकं पर्याप्तापर्याप्तानां समुदितानामल्पबहुत्वमभिधित्सुः प्रथमत एकेन्द्रियाणामाह– 'एएसि णं'मत्यादि प्रश्नसूत्रं गतं, भगवानाह–गौतम ! सर्वस्तोका एकेन्द्रिया अपर्याप्ताः, पर्याप्तकाः सङ्ख्येयगुणाः, एकेन्द्रियेषु हि बहवः सूक्ष्माः सर्वलोकापन्नत्वात्, सूक्ष्माश्चापर्याप्ताः सर्वस्तोकाः पर्याप्ताः सङ्ख्येयगुणाः, द्वीन्द्रियसूत्रे सर्वस्तोका द्वीन्द्रियापर्याप्ता यावन्ति प्रतरेऽङ्गुलस्य सङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां तेभ्योऽपर्याप्ता असङ्ख्येयगुणाः, द्वीन्द्रियसूत्रे सर्वस्तोका द्वीन्द्रियापर्याप्ता यावन्ति प्रतरेऽङ्गुलस्य सङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां तेभ्योऽपर्याप्ता असङ्ख्येयगुणाः प्रतरगताङ्गुलासङ्ख्येयभागखण्डप्रमाणत्वात्, एवं त्रिचतुरिन्द्रियपञ्चेन्द्रियाल्पबहुत्वाल्यपि वक्तव्यानि ।

साम्प्रतमेकेन्द्रियाणां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वमाह–'एएसि ण'मित्याद, इदं प्रागुक्ततृतीयद्वीतीयाल्पबहुत्वभावनानुसारेम स्वयं भावनीयं, तत्वतो भावितत्वात्, उपसंहारमाह–'सेत्तं पंचविहा' इत्यादि ।

चतुर्थी प्रतिपत्तिः समाप्ताः

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता जीवाजीवा भिगमसूत्रे
चतुर्थी प्रतिपत्याः मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

पंचमी प्रतिपत्तिः "षड् विधाः"

वृ. उक्ता पञ्चविधा प्रतिपत्तिरघुना क्रमप्राप्ता षड्विधप्रतिपत्तिमभिधित्सुराह–

मू. (३४६) *तत्थ णं जे ते एवमाहंसु छव्विहा संसारसमावन्नगा जीवा ते एवमाहंसु, तंजहा–पुढविकाइया आउकाइया तेउ० वाउ० वणस्सतिकाइया तसकाइया ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं पुढवि० ?, पुढवी० दुविहा पन्नत्ता तं०–सुहुमपुढविक्काइया बादरपुढविकाइया, सुहुमपुढविकाइया दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य। एवं बायरपुढविकाइयावि, एवं चउक्कएणं भेएणं आउतेउवाउवणस्सतिकाइयाणं चतु० नेयव्वा।

से किं तं तसकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य ॥

वृ. 'तत्थ ण'मित्यादि, तत्र ये ते एवमुक्तवन्तः षड्विधाः संसारसमापन्नका जीवास्ते 'एवं' वक्ष्यमाणप्रकारेणोक्तवन्तः, तमेव प्रकारमाह, तद्यथा–पृथ्वीकायिका इत्यादि प्राग् व्याख्यातं 'से किं तं पुढविक्काइया' इत्यादीनि पृथिव्यप्तेजोवायुवनस्पतिविषयाणि त्रीणि त्रसकाय-विषयमेकमिति सर्वसङ्ख्या षोडश सूत्राणि पाठसिद्धानि।

***मू. (३४७)** पुढविकाइयस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं, एवं सव्वेसिं ठिती नेयव्वा।*

तसकाइयस्स जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तेत्तीसं सागरोवमाइं, अपज्जत्तगाणं सव्वेसिं जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तगाणं सव्वेसिं उक्कोसेसया ठिती अंतोमुहुत्तऊणा कायव्वा

वृ. 'पुढविकाइयस्स णं भंते !' इत्यादि स्थितिविषयं सूत्रषट्कं सुप्रतीतं, तत्र जघन्यं सर्वत्राप्यन्तर्मुहूर्त्तमुत्कर्षतः पृथिवीकायिकस्यं द्वाविंशतिर्वर्षसहस्राणि अप्कायिकस्य सप्त तेजस्कायिकस्य त्रीणि रात्रिन्दिवानि वातकायस्य त्रीणि वर्षसहस्राणि वनस्पतिकायस्य दशवर्षसहस्राणि त्रसकायस्य त्रयस्त्रिंशत्सागरोपमाणि। अपर्याप्तविषयाण्यपि षट् सूत्राणि पाठसिद्धानि, सर्वत्र जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्ताभिधानात्, नवरमुत्कृष्टमन्तर्मुहूर्त्तं बृहत्तरं वेदितव्यं पर्याप्तविषया षट्सूत्री पाठसिद्धा, नवरमन्तर्मुहूर्त्तानत्वं अपर्याप्तकालभाविनाऽऽन्तर्मुहूर्तेन हीनत्वात्

***मू. (३४८)** पुढविकाइए णं भंते ! पुढविकाइयत्तिकालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं जाव असंखेज्जा लोया। एवं जाव आउ० तेउ० वाउक्काइयाणं वणस्सइकाइयाणं अनंतं कालं जाव आवलियाए असंखेज्जा लोया। एवं जाव आउ० तेउ वाउक्काइयाणं वणस्सइकाइयाणं अनंतं कालं जाव आवलियाए असंखेज्जतिभागो ॥ तसकाइए णं भंते !० जहन्नेणं अंतोमु० उक्कोस्सेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं अपज्जत्तगाणं छण्हवि जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तगाणं–*

वृ. सम्प्रति कायस्थितिमाह–'पुढविक्कइए णं भंते ! पुढविकाइय'त्ति इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तं, पृथ्वीकायादुद्ध त्यान्यत्रान्तर्मुहूर्त्तं स्थित्वा भूयः पृथिवीकायत्वेन कस्याप्युत्पादात्, उत्कर्षतोऽसङ्ख्येयं कालं, तमेव कालक्षेत्राभ्यां निरूपयति–असङ्ख्येया उतसर्पिम्यवसर्पिण्यः, एषा कालतो मार्गणा, क्षेत्रतोऽसङ्ख्येया लोकाः, किमुक्तं भवति ? –असङ्ख्येयेषु लोकप्रमाणेष्वाकाशखण्डेषु प्रतिसमय मेकैकप्रदेशापहारे यावता कालेन तान्यसङ्ख्येयान्यपि लोकाकाशखण्डानि निर्लेपितानि भवन्ति तावन्तमसङ्ख्येयं कालं यावदिति। एवमप्तेजोवायुसूत्राण्यपि वक्तव्यानि।

वनस्पतिसूत्रे जघन्यं तथैव, उत्कर्षतोऽनन्तं कालं, तमेव कालक्षेत्राभ्यां निरूपयति–अनन्ता उत्सर्पिण्यवसर्पिण्यः, कालत एषा मार्गणा, क्षेत्रतोऽनन्ता लोकाः–अनन्तानन्तेषु लोकालोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे यावता कालेन तान्यपि लोकालोकाकाशखण्डानि निर्लेपानि भवन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावन्तमनन्तकालमित्यर्थः, तमेव पुद्गलपरावर्त्तेन निरूपयति–असङ्ख्येयाः पुद्गलपरावर्त्ताः, पुद्गलपरावर्त्तस्वरूपं पञ्चसङ्ग्रहटीकातो भावनीयं, पुद्गलपरावर्त्तगतमेवासङ्ख्येयत्वं निर्द्धारयति– 'ते ण'मित्यादि, ते पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, आवलिकाया असङ्ख्येये भागे यावन्तः समयास्तावन्त इत्यर्थः, अयं चार्थोऽन्यत्रापिसङ्क्षेपेणोक्तः–

॥ १ ॥ "अस्संखोसप्पिणीसप्पिणीउ एगिंदियाण य चउण्हं।
ता चेव ऊ अनंता वणस्सईए उ बोद्धव्वा ॥"

त्रसकायसूत्रे द्वे सागरोपमसहस्रे सङ्ख्येयवर्षाभ्यधिके, एतावत एवाव्यवधानेन त्रसकायत्वकालस्य केवलवेदसोपलब्धत्वात्। अपर्याप्तविषयायां षट्सूत्र्यां सर्वत्रापि जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तम्, अपर्याप्तलब्धेरुत्कर्षतोऽप्येतावत्कालप्रमाणत्वात।

मू. (३४९) *वाससहस्सा संखा पुढविदगानिलतरूण पज्जत्ता।*
तेऊ राइंदिसंखा तससागरसतपुहुत्ताइं ॥

वृ. पृथिवीकायिकपर्याप्तसूत्रे उत्कर्षतः सङ्ख्येयानि वर्षसहस्राणि, पृथिवीकायिकस्य हि भवस्थितिरुत्कर्षतोऽपि वक्तव्यं, तेजस्कायिकसूत्रे सङ्ख्येयानि रात्रिन्दिवानि, तेजस्कायिकस्य हि भवस्थितिरुत्कर्षतोऽपि त्रीणि रात्रिन्दिवानि, ततो निरन्तरकतिपयपर्याप्तभवसङ्कलनायामपि सङ्ख्येयानि रात्रिन्दिवानि लभ्यन्ते न सु मासा वर्षाणि वर्षसहस्राणि वा। वायुकायिकसूत्रं वनस्पति-कायिकसूत्रं पृथिवीकायिकसूत्रवत्। त्रसकायसूत्रे सागरोपमशतपृथक्त्वं सातिरेकम्।

मू. (३५०) *पज्जत्तगाणवि सव्वेसिं एवं ॥ पुढविकाइयस्स णं भंते! केवतियं कालं अंतरं होति?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं वणप्फतिकालो। एवं आउतेउवाउकाइयाणं वणस्सइकालो, तसकाइयाणवि, वणस्सइकाइयस्स पुढविकाइयकालो। एवं अपज्जत्तगाणवि वमस्सइकालो, वणस्सईणं पुढविकालो, पज्जत्तगाणवि एवं चेव वणस्सइकालो, पज्जत्तवणस्सईणं पुढविकालो ॥*

वृ. सम्प्रत्यन्तरनिरूपणार्थमाह–'पुढविकाइयस्स णं भंते!' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! जघन्येनान्तर्मुहूर्त्तं पृथिवीकायादुद्धृत्यान्यत्रान्तर्मुहूर्त्तं स्थित्वा भूयः पृथिवीकायिकत्वेन कस्यचिदुत्पादात्, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालः प्रागुक्तस्वरूपो वनस्पतिकालः प्रतिपत्तव्यः, पृथिवीकायादुद्धृत्य तावन्तं कालं वनस्पतिष्वस्थानसम्भात्। एवमसेजोवायुत्रससूत्राण्यपि भावनीयानि। वनस्पतिसूत्रे उत्कर्षतोऽसङ्ख्येयं कालम् 'असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालतो खेत्ततो असंखेज्जा लोगा' इति वक्तव्यं, वनस्पतिकायादुद्धृत्य पृथिव्यादिष्ववस्थानात् तेषु च सर्वेष्वप्युत्कर्षतोऽप्येतावत्कालभावात् ॥ सम्प्रत्यल्पबहुत्वमाह–

मू. (३५१) *अप्पाबहुयं–सव्वत्थोवा तसकाइया तेउक्काइया असंखेज्जगुणाा पुढविकाइया विसेसाहिया आउकाइया विसेसाहिया वाउक्काइया विसेसाहिया वमस्सतिकाइया अनंतगुणा एवं अपज्जत्तगावि पज्जत्तगावि।*

एतेसि णं भंते! पुढविकाइयाणं पज्जत्तगाण अपज्जत्तगाण य कयरे२ हिंतो अप्पा वा एवं जाव विसेसाहिया?, गोयमा! सव्वत्थोवा पुढविकाइया अपज्जत्तगा पुढविकाइया पज्जत्तगा संखेज्जगुणा, एतेसि णं० सव्वत्थोवा आउक्काइया अपज्जत्तगा संखेज्जगुणा जाव वणस्सतिकाइयावि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वत्थोवा तसकाइया पज्ञत्तगा तसकाइया अपज्ञत्तगा असंखेज्ञगुणा ।।

एएसि णं भंते ! पुढविकाइयाणं जाव तसकाइयाणं पज्ञत्तगअपज्ञत्तगाण य कयरे २ हिंतो अप्पा वा ४ ?, सव्वत्थोवा तसकाइया पज्ञत्तगा तसकाइया अपज्ञत्तगा असंखेज्ञगुणा तेउक्काइया अपज्ञत्ता असंखेज्ञगुणा पुढविक्काइया आउक्काइया वाउक्काइया अपज्ञत्तगा विसेसाहिया तेउक्काइया पज्ञत्तगा संखेज्ञगुणा पुढविआउवाउपज्ञत्तगा विसेसाहिया, वणस्सतिकाइया अपज्ञत्तगा अनंतगुणा, सकाइया अपज्ञत्तगा विसेसाहिया, वणस्सतिकाइया पज्ञत्तगा संखेज्ञगुणा, सकाइया पज्ञत्तगा विसेसाहिया ।

वृ. 'एएसि ण' मित्यादि, सर्वस्तोकास्त्रसकायिकाः, द्वीन्द्रियःदीनामेव त्रसकायत्वात् तेषां च शेषकायापेक्षयाऽल्पत्त्वात्, तेभ्यस्तेजस्कायिका असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः पृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात् तेषां च शेषकायापेक्षयाऽल्पत्वात्, तेभ्योऽप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयभागलोकाकाशप्रदेशराशिप्रमाणत्वात् तेभ्यो वायुकायिका विशेषाधिकाः, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशमानत्वात्, तेभ्यो वनमातिकायिका अनन्तगुणाः, अनन्तलोकाकाशप्रदेशमानत्वात्

साम्प्रतमेतेषामेवापर्याप्तानां द्वितीयमल्पबहुत्वमाह— 'एएसि ण' मित्यादि, एतदपि तथैव अधुनैतेषामेव पर्याप्तानामल्पबहुत्वमाह— 'एएसि ण' मित्यादि, एतदपि तथैव । साम्प्रतमेतेषामेव पृथिवीकायादीनां प्रत्येकं पर्याप्तापर्याप्तगताल्पबहुत्वमाह— 'एएसि ण' मित्यादि, सर्वस्तोकाः पृथिवीकायिका अपर्याप्ताः पर्याप्ताः सङ्ख्येयगुणाः, पृथिवीकायिका हि बहवः सूक्ष्माः सकललोकगतत्वात्, तेषु च पर्याप्ताः सङ्ख्येयगुणाः, एवमप्तेजोवायुवनस्पतिसूत्राणि भावनीयानि, त्रसकायसूत्रे सर्वस्तोकाः पर्याप्तास्त्रसकायिका अपर्याप्तका असङ्ख्येयगुणाः, त्रसकायानां पर्याप्तानां यथाक्रमं प्रतरगताङ्गुलसङ्ख्येयभागखण्डप्रमाणत्वात् । साम्प्रतमेतेषां समुदितानां पर्याप्तापर्याप्तानमल्पबहुत्वमाह—

'एएसि णं भंते !' इत्यादि, सर्वस्तोकास्त्रसकायिकाः पर्याप्तास्तेभ्यस्त्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः, अत्र कारणं प्रागेवोक्तं, ततस्तेजस्कायिका अपर्याप्ता असङ्ख्येयगुणाः असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, ततः पृथिव्यब्वायवोऽपर्याप्तकाः क्रमेण विशेषाधिकाः प्रभूतप्रभूततरप्रभूतभासङ्ख्येय- लोकाकाशप्रदेशराशिमानत्वात्, तदनन्तरं तेजस्कायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात्, ततः पृथिव्यबवायवः पर्याप्ताः क्रमेण विशेषाधिकाः, ततो वनस्पति- कायिका अपर्याप्ता अनन्तगुणाः, अनन्तलोकाकाशप्रदेशराशिमानत्वात्, तेभ्यो वनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणतवात् सूक्ष्माश्च सर्वबहव इति तदपेक्षमिदमल्पबहुत्वम् ।

मू. (३५२) *सुहुमस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं एवं जाव सुहुमणिओयस्स, एवं अपज्ञत्तगाणवि पज्ञत्तगाणवि जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं ।*

वृ. सम्प्रत्यमीषामेव कायानां सूक्ष्माणां स्थित्यादि चिचिन्तयिषुराह— 'सुहुमस्स णं भंते' इत्यादि, सूक्ष्मस्य सामान्यतो निगोदरूपस्यानिगोदरूपस्य वा भदन्त ! कियन्तं कालं स्थिति प्र० भगवानाह—गौतम ! जघन्येनान्तर्मुहूर्तमुत्कर्षेणाप्यन्तर्मुहूर्तं, नवरमुत्कर्षतो विशेषाधिकमव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सातव्यम्, अन्यथोत्कर्षायोगात् । एवं सूक्ष्मपृथिवीकायाप्कायिकतेजस्कायिकवायुकायिकवनस्पतिकायसूक्ष्मनिगोदविषयाण्यपि षट् सूत्राणि वक्तव्यानि, अथ सूक्ष्मवनस्पतिर्निगोदा एव ततस्तत्सूत्रेणैव गतमिति किमर्थं पृथग् निगोदसूत्रं ?, तदयुक्तं सम्यग्वस्तुतत्वापरिज्ञानात्, सूक्ष्मवनस्पतयो हि जीवा विक्षिताः, सूक्ष्मनिगोदास्तु प्रत्येकमननतानां जीवानामाधारभूताः शरीररूपास्ततो न कश्चिद्दोषः, उक्तञ्च–

॥१॥ "गोला य असंखेज्ञा असंखनिगोदो य गोलओ भणिओ ।
एक्किक्कंमि निगोए अनंतजीवा मुणेयव्वा ॥

॥२॥ एगो असंखभागो वट्टइ उव्वट्टणोववायंमि ।
एगनिगोदे निच्चं एवं सेसेसुवि स एव ॥

॥३॥ अंतोमुहुत्तमेत्तं ठिई निगोयाण जंति निद्दिट्ठा ।
पल्लट्टंति निगोया तम्हा अंतोमुहुत्तेणं ॥

आसामक्षरगमनिका–सूक्ष्मनिगोदैः सकल एव लोकः सर्वतो व्याप्तोऽञ्जनचूर्णपूर्णसमुद्गवत्, तस्मिन्नित्थं निगोदैर्व्यापते लोके निगोदमात्रावगाहना असङ्ख्येया निगोदा वृत्ताकारा बृहत्प्रमाणा गोलका इति व्यपदिश्यन्ते, निगोद इति च नाम अनन्तानां जीवानामेकं शरीरं, तत उक्तम्–असङ्ख्येया गोलाः, एकैकस्मिंश्च गोलकेऽसङ्ख्येया निगोदा एकैकश्च निगोदः अनन्तजीव इति, एकस्मिंश्च निगोदे येऽनन्ता जीवास्तेषामेकोऽसङ्ख्येयतमो भागः प्रतिसमयमुद्वर्त्ततेऽन्यश्चोत्पद्यते, तथा हि विवक्षिते समये विवक्षितस्य निगोदस्यैकोऽसङ्ख्येयतमो भाग उद्वर्त्ततेऽन्यश्चासङ्ख्येयतमो भागस्तस्मिन्नपूर्व उत्पद्यते, द्वितीयेऽपि समयेऽन्योऽसङ्ख्येयभाग उद्वर्त्तते अन्यश्चापूर्व उत्पद्यते, एवं सकलकालमनुसमयमुद्वर्त्तनोपपातौ, अत एव 'एगनिगोदे निच्च'मिति नित्यग्रहणं, यथा चैकस्मिन्निगोदे तथा सर्वेष्वप्यसङ्ख्येयेषु सर्वलोकव्यापिषु निगोदेषु प्रतिपत्तव्यं, सर्वेषामपि च निगोदानां निगोदजीवानां स्थितिर्विनिर्दिष्टाऽन्तर्मुहूर्त्तमात्रं तस्मात्सर्वेऽपि निगोदा अनुसमयमुद्वर्त्तनोत्पाताभ्यामन्तर्मुहूर्त्तमात्रेण परावर्त्तन्ते न च शून्या भवन्तीति ।

एवं सप्तसूत्री अपर्याप्तविषया सप्तसूत्री पर्याप्तविषया वक्त्या, सर्वत्रापि जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तम् ॥ सम्प्रति कायस्थितिमाह–

मू. (३५३) *सुहुमे णं भंते ! सुहुमेत्ति कालतो केवचिरं होति ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्ञकालं जाव असंखेज्ञा लोया, सव्वेसिं पुढविकालो जाव सुहुमनिओयस्स पुढविकालो, अपज्ञत्तगाणं सव्वेसिं जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, एवं पज्ञत्तगाणवि सव्वेसिं जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं ।*

वृ. 'सुहुमे णं भंते ! सुहुमेत्तिकालओ' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तम्, अन्तर्मुहूर्त्तानन्तरं बादरपृथिव्यादावुत्पादात्, उत्कर्षतोऽसङ्ख्येयकालं, तमेवासङ्ख्येयकालं कालक्षेत्राभ्यां निरूपयति–असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, एषा कालतो मार्गणा क्षेत्रतोऽसङ्ख्येया लोकाः, असङ्ख्येयानां लोकाकाशानां प्रतिसमयमेकैकाकाशप्रदेशापहारे यावता कालेन निर्लेपता भवति तावान् असङ्ख्येयः काल इति भावः । एवं सूक्ष्मपृथिव्यप्तेजोवायुवनस्पतिनिगोदसूत्राण्यपि भावनीयानि । सम्प्रति सूक्ष्मादीनामेवापर्याप्तानां कास्थितिमधित्सुराह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सुहुमअपज्जत्तए णं भंते' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽप्यन्तर्मुहूर्त्तम्, अपर्याप्तस्थावरस्यैतावत्कालप्रमाणत्वात्, एवं सूक्ष्मापर्याप्तपृथिव्यादिविषयाऽपि षट्सूत्री तक्तव्या एवं पर्याप्तविषयाऽपि सप्तसूत्री ।

मू. (३५४) *सुहुमस्स णं भंते ! केवतियं कालं अंतरं होति ?, गोयमा ! जहन्नेणं अंतोमु० उक्को० असंखेज्जं कालं कालओ असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ खेत्तओ अंगुलस्स असंखेज्जतिभागो, सुहुमवणस्सतिकायस्स सुहुमनिओयस्सवि जाव असंखेज्जइभागो । पुढविकाइयादीणं वणस्सतिकालो । एवं अपज्जत्तगाणं पज्जत्तगाणवि ॥*

वृ. साम्प्रतमन्तरं चिचिन्तयिषुराह–'सुहुमस्स ण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तं, सूक्ष्मादुद्ध त्य बादरपृथिव्यादावन्तर्मुहूर्त्तं स्थित्वा भूयः सूक्ष्मपृथिव्यादौ कस्याप्युत्पादात्, उत्कर्षतोऽसङ्ख्येयं कालं, तमेवासङ्ख्येयं कालं कालक्षेत्राभ्यां निरूपयति–असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, कालत एषा मार्गणा, क्षेत्रतोऽङ्गुलस्यासङ्ख्येयो भागः, किमुक्तं भवति ?–अङ्गुलमात्रक्षेत्रस्यासङ्ख्येयतमे भागे ये आकाशप्रदेशास्ते प्रतिसमयमेकैकप्रदेशापहारे यावतीभिरुत्सर्पिण्यवसर्प्पिणीभिर्निर्लेपा भवन्ति तावत्य इति ।

'सुहुमपुढविक्काइयस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तं, तद्भावना प्रागिव, उत्कर्षतोऽनन्तं कालं, 'जाव आवलियाए असंखिज्जइभागो' इति यावत्करणादेवं परिपूर्णपाठः–'अनंताओ उस्सप्पिणीओसप्पिणीओ कालतो खेत्ततो अनंता लोगा असंखेज्जा पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो' अस्य व्याख्या पूर्ववत्, भावना त्वेवम्–सूक्ष्मपृथिवीकायिको हि सूक्ष्मपृथिवीकायिकभवादुद्ध त्यानन्तर्येण पारम्पर्येण वा वनस्पतिष्वपि मध्ये गच्छति तत्र चोत्कर्षत एतावन्तं कालं तिष्ठतीति भवति यथोक्तप्रमाणमन्तरं, एवं सूक्ष्माप्कायिकतेजस्कायिकवायुकायिकसूत्राण्यपि वक्तव्यानि ।

सूक्ष्मवनस्पतिपाकियसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालं, स चासङ्ख्येयः कालः पृथिवीकालो वक्तव्यः, स चैवम्–'असंखेज्जा उस्सप्पिणीओसप्पिणीओ कालतो खेत्ततो असंखेज्जा लोगा' इति, सूक्ष्मवनस्पतिकायभवादुद्ध तो हि बादरवनस्पतिषु सूक्ष्मबादरपृथिव्यादिषु चोत्पद्यते तत्र च सर्वत्राप्युत्कर्षतोऽप्येतावन्तं कालमवस्थानमिति यथोक्तप्रमाणमेवान्तरं, एवं सूक्ष्मनिगोदस्याप्यन्तरं वक्तव्यं, यथा चेयमौधिकी सप्तसूत्री उक्ता तथाऽपर्याप्तविषया सप्तसूत्री पर्याप्तविषया च सप्तसूत्री वक्तव्या, नानात्वाभावात् ॥ साम्प्रतमेतेषामल्पबहुत्वमाह–

मू. (३५५) *एवं अप्पाबहुगं, सव्वत्थोवा सुहुमतेउकाइया सुहुमपुढविकाइया विसेसाहिया सुहुमआउवाऊ विसेसाहिया सुहुमनिओया असंखेज्जगुणा सुहुमवणस्सतिकाइया अनंतगुणा सुहुमा विसेसाहिया, एवं अपज्जत्तगाणं, पज्जत्तगाणवि एवं चेव ।*

एतेसि णं भंते ! सुहुमाणं पज्जत्तापज्जत्ताणं कयरे० ?, सव्वत्थोवा सुहुमा अपज्जत्तगा संखेज्जगुणा पज्जत्तगा एवं जाव सुहुमनिगोया ॥ एएसि णं भंते ! सुहुमाणं सुहुमपुढविकाइयाणं जाव सुहुमनिओयाण य पज्जत्तापज्जत्ता० कयरे २ ?

सव्वत्थोवा सुहुमतेउकाइया अपज्जत्तगा सुहुमपुढविकाइया अपज्जत्तगा विसेसाहिया सुहुमआउअपज्जत्ता विसेसाहिया सुहुमवाउअपज्जत्ता विसेसाहिया सुहुमतेउकाइया पज्जत्तगा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संखेज्जगुणा सुहुमपुढविआउवाउपज्जत्तगा विसेसाहिया सुहुमनिओया अपज्जत्तगा असंखेज्जगुणा सुहुमनिओया पज्जत्तगा संखेज्जगुणा सुहुमवणस्सतिकाइया अपज्जत्तगा अनंतगुणा सुहुमअपज्जत्ता विसेसाहिया सुहुमवणस्सइपज्जत्तगा संखेज्जगुणा सुहुमा पज्जत्ता विसेसाहिया ॥

वृ. 'एएसि ण'मित्यादि, सर्वस्तोकाः सूक्ष्मतेजस्कायिकाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः सूक्ष्मपृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशपरिमाणत्वात्, तेभ्यः सूक्ष्माप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाशप्रमाणत्वात्, तेभ्यः सूक्ष्मवायुकायिका विशेषाधिकाः, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशराशिमानत्वात्, तेभ्यः सूक्ष्मनिगोदा असङ्ख्येयगुणाः, तेषां प्रतिगोलकमसङ्ख्येयत्वात्, तेभ्यःसूक्ष्मवनस्पतिकायिका अनन्तगुणाः, प्रतिनिगोदमनन्तानां सद्भावात्, तेभ्यः सामान्यतः सूक्ष्मा विशेषाधिकाः, सूक्ष्मपृथ्वीकायिकादीनामपि तत्र प्रक्षेपात्, तेषामौधिकानामिदमल्पबहुत्वम् । इदानीमेतेषामेवापर्याप्तानामाह—'एएसि णं भंते ! सुहुमअपज्जत्ताण'मित्यादि सर्वं प्राग्वद् भावनीयं ।

साम्प्रतमेतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह—'एएसि णं भंते ! सुहुमपज्जत्तगाण'-मित्यादि, इदमपि प्रागुक्तक्रमेणैव भावनीयं ॥ अधुनाऽमीषामेव सूक्ष्मादीनां प्रत्येकं पर्याप्तपर्याप्तगतान्यल्पबहुत्वान्याह—'एएसि णं भंते ! सुहुमाणं पज्जत्तगाण'मित्यादि, इह बादरेषु पर्याप्तेभ्योऽपर्याप्ता असङ्ख्येयगुणाः, एकैकपर्याप्तनिश्रया असङ्ख्येयानामपर्याप्तानामुत्पादात्, तथा चोक्तं प्रज्ञापनायां प्रथमे प्रज्ञापनाख्ये पदे—''पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा'' इति, सूक्ष्मेषु पुनर्नायं क्रमः, पर्याप्ताश्चापर्याप्तापेक्षया चिरकालावस्थायिन इति सदैव ते बहवो लभ्यन्ते तत उक्तं सर्वस्तोकाः सूक्ष्मा अपर्याप्ताः तेभ्यः सूक्ष्माः पर्याप्तकाः सङ्ख्येयगुणाः, एवं पृथ्वीकायादिष्वपि प्रत्येकं भावनीयम् ॥

गतं चतुर्थमल्पबहुत्वमिदानीं सर्वेषां समुदितानां पर्याप्तापर्याप्तानां पञ्चममल्पबहुत्वमाह—'एएसि ण'मित्यादि, सर्वस्तोकाः सूक्ष्मतेजस्कायिका अपर्याप्ताः, कारणं प्रागेवोक्तं, तेभ्य सूक्ष्मपृथिव्यबवायवोऽपर्याप्ताः क्रमेण विशेषाधिकाः, अत्रापि कारणं प्रागेवोक्तं, तेभ्यः सूक्ष्मतेजस्कायिकाः पर्याप्ताः सङ्ख्येयगुणाः, अपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणानामेव भावितत्वात्, तेभ्यः सूक्ष्मपृथिव्यबवायवः पर्याप्ताः क्रमेण विशेषाधिकाः, कारणं प्रागेवोक्तं, ततः सूक्ष्मनिगोदा अपर्याप्ता असङ्ख्येयगुणास्तेषामतिप्राचुर्यात्, तेभ्यः सूक्ष्मा निगोदाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतः सङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता अनन्तगुणाः, प्रतिनिगोदमनन्तानां तेषां भावात्, तेभ्यः सामान्यतः सूक्ष्मा अपर्याप्ता विशेषाधिकाः, सूक्ष्मपृथ्वीकायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेषु हि अपर्याप्तेभ्यः पर्याप्ताः सङ्ख्येयगुणाः, यच्चापान्तराले विशेषाधिकत्वं तदल्पमिति न सङ्ख्येयगुणत्वव्याघातः, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, सूक्ष्मपृथिव्यादीनामपि पर्याप्तानां तत्र प्रक्षेपात् । सम्प्रति बादरादीनां स्थित्यादि निरूपयति—

मू. (३५६) *बायरस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमु० उक्को० तेत्तीसं सागरोवमाइं ठिई प० एवं बायरतसकाइयस्सवि बायरपुढवीकाइयस्स बावीसयाससहस्साइं बायरआउस्स सत्तवाससहस्सं बायरतेउस्स तिन्नि राइंदिया बायरवाउस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिन्नि वाससहस्साइं बायरवण० दसवाससहस्साइं । एवं पत्तेयसरीरबादरस्सवि, निओयस्स जहन्नेणवि उक्कोसेणवि अंतोमु०, एवं बायरनिओयस्सवि, अपज्जत्तगाणं सव्वेसिं अंतोमुहुत्तं, पज्जत्तगाणं उक्कोसिया ठिई अंतोमुहुत्तूणा कायव्वा सव्वेसिं ॥

वृ. 'बायरस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्यतोऽन्तर्मुहूर्त्तं, तत ऊर्ध्वं मरणात्, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, एवं बादरपृथिव्यपतेजोवायुवनस्पतिप्रत्येकबादरनिगोदबादरत्रसकायिकसूत्राण्यपि वक्तव्यानि, सर्वत्र हि जघन्यतोऽन्तर्मूहूर्त्तम्, उत्कर्षचिन्तायामयं विशेषः–बादरपृथिवीकायिकस्योत्कर्षतो द्वाविंशतिवर्षसहस्राणि बादराप्कायिकस्य सप्तवर्षसहस्राणि बादरतेजस्कायिकस्य त्रीणि रात्रिन्दिवानि बादरवायुकायिकस्य त्रीणि वर्षसहस्राणि सामान्यतो बादरवनस्पतिकायिकस्य दश वर्षसहस्राणि प्रत्येकशरीरबादरवनस्पतिकायस्य दश वर्षसहस्राणि सामान्यतो निगोदस्य जघन्येनाप्युत्कर्षतोऽप्यन्तर्मुहूर्त्तं बादर निगोदस्य जघन्यत उत्कर्षतोऽप्यन्तर्मुहूर्त्तं बादरत्रसकायस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि । सम्प्रत्येतेषामेव सामान्यतो बादरादीनां दशानामपर्याप्तानां स्थितिं चिचिन्तयिषुः सूत्रदशकमाह–'बायरअपज्जत्तगस्स णं भंते !' इत्यादि पाठसिद्धं, सर्वत्र जघन्यत उत्कर्षतश्चान्त- मुहूर्त्ताभिधानात् ।

साम्प्रतमेतेषामेव पर्याप्तानां स्थितिं चिन्तयति–'बादरपज्जत्तगस्स णं भंते !' इत्यादि, जघन्यतः सर्वत्राप्यन्तर्मुहूर्त्तमुत्कर्षतः सामान्यतो बादरस्य त्रयस्त्रिंशत्सागरोपमाण्यन्तर्मुहूर्त्तोनानि, अपर्याप्तकावस्थाभाविनाऽन्तर्मुहूर्त्तेनोनत्वात्, एवं बादरपृथिवीकायिकपर्याप्तकस्य द्वाविंशतिवर्षसहस्राणि अन्तर्मुहूर्त्तोनानि, बादराप्कायिकस्य पर्याप्तकस्य सप्त वर्षसहस्राणि अन्तर्मुहूर्त्तोनानि बादरतेजस्कायिकपर्याप्तकस्य त्रीणि रात्रिन्दिवानि अन्तर्मुहूर्त्तोनानि, बादरवायुकायिकपर्याप्तकस्य त्रीणि वर्षसहस्राणि अन्तर्मुहूर्त्तोनानि, बादरवनस्पतिकायपर्याप्तकस्य दश वर्षसहस्राणि अन्तर्मुहूर्त्तोनानि, प्रत्येकबादरवनस्पतिकायिकपर्याप्तकस्यापि दश वर्षसहसहस्राणि अन्तर्मुहूर्त्तोनानि सामान्यतो निगोदपर्याप्तकस्य बादरनिगोदपर्याप्तकस्य च जघन्यतोऽप्यन्तमूहूर्त्तमुत्कर्षतोऽन्तर्मुहूर्त्तं, बादरत्रसकायिकपर्याप्तस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतस्त्रियस्त्रशत्सागरोप... अन्तर्मुहूर्त्तोनानि । साम्प्रतं कायस्थितिमाह–

मू. (३५७) *बायरे णं भंते ! बायरेत्ति कालओ केवचिरं होति ?, जह० अंतो० उक्कोसेणं असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अंगुलस्स असंखेज्जतिभागो, बायरपुढविकाइयआउतेउवाउ० पत्तेयसरीरबादरवणस्सइकाइयस्स बायरनिओयस्स० ।*

बायरवणस्सइस्स जह० अंतो० उक्को० असं० असं० उस्स० कालओ खेत्तओ अंगु० असं० पत्तेगसरीरबादरवनस्सतिकाइयस्स बायरनिगोअस्स पुढवीव, बायरनिओयस्स णं जह० अन्तो० उक्को० अनंतं कालं अनंता उस्स० कालओ खेत्तओ अड्ढाइज्जा पोग्गल० ।

एतेसिं जहन्नेणं अंतोमु० उक्कोसेणं सत्तरि सागरोवमकोडाकोडीओ संखातीयाओ समाओ अंगुलअसंखभागो तहा–असंखेज्जा उ० ओहे य बायरतरुअणुबंधो सेसओ वोच्छं ।

मू. (३५८) *उस्सप्पिणी २ अड्ढाइयपोग्गलाण परियट्टा ।*
बेउदधिसहस्सा खलु साधिया होंति तसकाए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३५९) *अंतोमुहुत्तकालो होई अपज्जत्तगाण सव्वेसिं ॥*
पज्जत्तबायरस्स य बायरतसकाइयस्सावि ॥ एतेसिं ठिई सागरोवसमतपुहत्तं साइरेगं

मू. (३६०) *तेउस्स संख राई दिया दुविहाणिओए मुहुत्तमद्धं तु ।*
सेसाणं संखेज्ञा वाससहस्सा य सव्वेसिं ॥

वृ. 'बायरे णं भंते !' इत्यादि प्रश्नसूत्रं, पाठसिद्धं, भगवानाहे–गौतम ! जघन्यतोऽन्तर्मुहूर्तं मुत्कर्षतोऽसङ्ख्येयं कालं, तमेवासङ्ख्येयं कालं काल क्षेत्राभ्यां ह्रुपपति– 'असंखेज्जाओ उसप्पिणी०' अस्यव्याख्या प्राग्वत्' बादरपृथ्वीकाये सूत्रे जघन्यतोऽन्तर्मुहूर्तं मुत्कर्षताः सप्तातिः सागरापमकोटिकोट्यः एवं बादरप्यकायिक बादरतेजस्कायिकबादर वायु कायिका नामपि, सामान्यतो बादरवनस्पति कायसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालं तमेव कालक्षेत्राभ्यां निउपयति-असंख्येय उत्सर्पिण्यवसर्णिण्यः कालतः क्षेत्रतोऽङ्गुलस्यासंख्येय भागः

प्रत्येकबादरवनस्पतिकायिकसूत्रं बादरपृथ्वीकायिकवत्, सामान्यतो निगोदसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं, तस्यैव कालक्षेत्राभ्यां निरूपणं करोति–अनन्ता उत्सर्पिण्यवसर्पिण्यः, एषा कालतः प्ररूपणा, क्षेत्रतोऽर्द्धतृतीयाः पुद्गलपरावर्त्ताः । बादरनिगोदसूत्रं बादरपृथ्वीकायिकवत् । बादरत्रसकायसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वे सागरोपमसहस्र सङ्खयेयवर्षाभ्यधिके । साम्प्रतमेतेषामेवापर्याप्तानां कायस्थितिं निरूपयन् सूत्रदशकमाह–

'बायरअपज्जत्तए णं भंते ! बायरअपज्जत्तिए कालतो' इत्यादि सर्वत्र जघन्येनोत्कर्षेण चान्तर्मुहूर्त्तम् । अधुनैतेषामेव पर्याप्तानां कायस्थितमाह–'बायरपज्जत्तए णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तं, तद्भावना प्राग्वत्, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, तत ऊध्र्ध्वमवश्यं बादरस्य सतः पर्याप्तलब्धिविच्युतेः ।

बादरपृथिवीकायिकपर्याप्तसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सङ्खयेयानि वर्षसहस्राणि, तत ऊध्र्ध्वं तथास्वाभाव्याद् बादरपृथिवीकायस्य सतः पर्याप्तिलब्धिभ्रंशात् । एवमप्कायसूत्रमपि वक्तव्यं, तेजस्कायसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सङ्खयेयानि रात्रन्दिवानि, तेजस्कायिकस्य हि उत्कृष्टा भवस्थिति त्रीणि रात्रिन्दिवानि, उत्कृष्टस्थितिकस्य पर्याप्तभवा निरन्तरं कतिपया एवेते सङ्खयेयान्येव रात्रन्दिवानि ।

वायुकायिकसामान्यबादरवनस्पतिकायप्रत्येकबादरवनस्पतिकायसूत्राण्यपि बादरपर्याप्तपृथिवीकायसूत्रवत् । सामान्यतो निगोदपर्याप्तसूत्रे च जघन्यत उष्कर्षतश्चान्तर्मुहूर्त्तं, बादरत्रसकायपर्याप्तसूत्रं जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, तच्च नं रयिकतिर्यग्मनुष्यदेवभवभ्रमणेन पूरियमतव्यम् । साम्प्रतमन्तरं प्रतिपिपादयिषुराह–

मू. (३६१) *अंतरं बायरस्स बायरवनस्सतिस्स निओयस्स बायरनिओयस्स एतेसिं चउण्हवि पुढविकालो जाव असंखेज्ञा लोया, सेसाणं वणस्सतिकालो । एवं पज्ञत्तगाणं अपज्ञत्त- गाणवि अंतरं, ओहे य बायरतरु ओघनिओए बायरनिओए य कालमसंखेज्ञं अंतरं सेसाण वणस्सतिकालो*

वृ. 'बादरस्स णं भंते ! अंतरं कालतो' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्त्तमुत्कर्षतोऽसङ्खयेयं कालं, तमेव कालक्षेत्राभ्यां निरूपयति–असङ्खयेया उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽसङ्खयेया लोकाः, यदेव हि सूक्ष्मस्य सतः कायस्थितिपरिमाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेव बादरस्यान्तरपरिमाणं सूक्ष्मस्य च कायस्थितिपरिमाणमेतदेवेति ।

बादरपृथिवीकायिकसूत्रे जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतोऽनन्तं कालं, स चानन्तः कालो वनस्पतिकालः प्रागुक्तस्वरूपो वेदितव्यः ।

एवं बादराप्कायिकबादरतेजस्कायिकसूत्राण्यपि वक्तव्यानि । सामान्यतो बादरवनस्पतिकायिकसूत्रे जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतोऽसङ्ख्येयं कालं, स चासङ्ख्येयः कालः पृथिवीकालो वेदितव्यः, स चैवम्–असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽसङ्ख्येया लोकाः । प्रत्येकबादरवनस्पतिकायिकसूत्र बादरपृथिवीकायिकसूत्रवत्, सामान्यतो निगोदसूत्रं च सामान्यतो बादरवनस्पतिकायिकसूत्रवत्, बादरत्रसकायिकसूत्रं बादरपृथिवीकायिकसूत्रवत्।

एवमपर्याप्तविषयां दशसूत्री पर्याप्तविषया च दशसूत्री यथोक्तक्रमेण वक्तव्या, नानात्वाभावात् ॥ साम्प्रतमल्पबहुत्वमाह–

मू. (३६२) *अप्पा० सव्वत्थोवा बायरतसकाइया बायरतेउकाइया असंखेज्जगुणा पत्तेयसरीरबादरवणस्सति० असंखेज्जगुमा बायरणिओया असंखे० बायरपुढवि असंखे० आउवाउ असंखेज्जगुणा बायरवणस्सतिकाइया अनंतगुणा बायरा विसेसाहिया १ । एवं अपज्जत्तगाणवि २ । पज्जत्तगाणं सव्वत्थोवा बायरतेउक्काइया बायरतसकाइया असंखेज्जगुणा पत्तेगसरीरबायरा असंखेज्जगुणा सेसा तहेव जाव बादरा विसेसाहिया ३ ।*

एतेसि णं भंते ! बायराणं पज्जत्तापज्जत्ताणं कयरे २ !, सव्वत्थोवा बायरा पज्जत्ता बायरा अपज्जत्तगा असंखेज्जगुणा, एवं सव्वे जहा बायरतसकाइया ४ ।

एएसि णं भंते ! बायराणं बायरपुढविकाइयाणं जाव बायरतसकाइयाण य पज्जत्तापज्जताणं कयरे २ ?, सव्वत्थोवा बायरतेउक्काइया पज्जत्तगा बायरतसकाइया अपज्जत्तगा असंखेज्जगुणा पत्तेयसरीरबायरवणस्सतिकाइया पज्जत्तगा असंखेज्जगुणा बायरणिओया पज्जत्तगा असंखेज्ज० पुढविआउवाउपज्जत्तगा असंखेज्जगुणा बायरतेउअपज्जत्तगा असंखेज्जगुणा पत्तेयसरीरबायरवनस्सतिअप० असंखे० बायरा निओया अपज्जत्तगा असंखे० बायरपुढविआउवाउ अपज्जत्तगा असंखेज्जगुणा बायरवनस्सइ पज्जत्तगा अनतगुणा बायरपज्जत्तगा विसेसाहिया बायरवनस्सति अपज्जत्ता असंखगुणा बायरा अपज्जत्तगा विसेसाहिया बायरा प० विसेसाहिया ५ ।

एएसि णं भंते ! सुहुमाणं सुहुमपुढविकाइयाणं जाव सुहुमनिगोदाणं बायराणं बायरपुढविकाइयाणं जाव बायरतसकाइयाण य कयरे२हिंतो० ?

गोयमा ! सव्वत्थोवा बायरतसकाइया बायरतेउकाइया असंखेज्जुणा पत्तेयसरीरबायरवणा असंखे० तहेव जाव बायरवाउकाइया असंखेज्जगुणा सुहुमतेउक्काइया असंखे० सुहुमपुढवि० विसेसाहिया सुहुमआउ० सुहुमवाउ० विसेसा० सुहुमनिओया असंखेज्जगुणा बायरवणस्सतिकाइया अनंतगुणा बायराविसेसाहिया सुहुमवणस्सइकाइया असंखे० सुहुमा विसेसा० ।

एवं अपज्जत्तगावि पज्जत्तगावि, नवरि सव्वत्थोवा बायरतेउक्काइया पज्जत्ता बायरतसाइया पज्जत्ता असंखेज्जगुणा पत्तेयसरीर० सेसं तहेव जाव सुहुमपज्जत्ता विसेसाहिया ।

एएसि णं भंते ! सुहुमाणं बादराण य पज्जत्ताणं अपज्जत्ताण य कयरे २ ?०, सव्वत्थोवा बायरा पज्जत्ता बायरा अपज्जत्ता असंखेज्जगुणा सव्वत्थोवा सुहुमा अपज्जत्ता सुहुमपज्जत्ता संखेज्जगुणा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं सुहुमपुढविबायरपुढवि जाव सुहुमनिओया बायरनिओया नवरं पत्तेयसरीरबायरवण० सव्वत्थोवा पज्ञत्ता अपज्ञत्ता असंखेज्ञगुणा, एवं बादरतसकाइयावि।

सव्वेसिं पज्ञत्तअपज्ञत्तगाणं कयरे२ हिंतो अप्पा वा बहुया वा?, सव्वत्थोवा बायरतेउक्काइया पज्ञत्ता बायरतसकाइया पज्ञत्तगा असंखेज्ञगुणा ते चेव अपज्ञत्तगा असंखेज्ञगुणा पत्तेयसरीरबायर-वणस्सइअपज्ञत्तगा असंखे० बायरनिओया पज्ञत्ता असंखेज्ञ० बायरपुढवि० असं० आउवाउ-पज्ञत्ता असंखे० बायरतेउकाइयअपज्ञत्ता असंखे० पत्तेय० असंखे० बायरनिओयपज्ञत्ता असं० बायरपुढवि० आउवाउकाइ० अपज्ञत्तगा असंखेज्ञगुणा।

—सुहुमतेउकाइया अपज्ञत्तगा असं० सुहुमपुढविआउवाउअपज्ञत्ता विसेसा० सुहुमतेउकाइ- यपज्ञत्तगा संखेज्ञगुणा सुहुमपुढविआउवाउपज्ञत्तगा विसेसाहिया सुहुमणिगोया अपज्ञत्तगा असंखेज्ञगुणा सुहुमनिगोया पज्ञत्तगा असंखेज्ञगुणा बायरवणस्सतिकाइया पज्ञत्तगा अनतगुणा बायरा पज्ञत्तगा विसेसाहिया बायरवणस्सइ अपज्ञत्ता असंखेज्ञगुणा बायरा अपज्ञत्ता विसे० बायरा विसेसाहिया सुहुमवणस्सतिकाइया अपज्ञत्तगा असंखेज्ञगुणा सुहुमा अपज्ञत्ता विसेसाहिया सुहुवमणस्सइकाइया पज्ञत्ता संखेज्ञगुणा सुहुमा पज्ञत्तगा विसेसाहिया सुहुमा विसेसाहिया॥

वृ. 'एएसि ण' मित्यादि, सर्वस्तोका बादरत्रसकायिकाः, द्वीन्द्रियादीनामेव बादरत्रसत्वात्, तेषां च शेषकायापेक्षयाऽल्पत्वात्, तेभ्यो बादरतेजस्कायिका असङ्घयेयगुणाः, असङ्घयेयलोका-काशप्रमाणत्वात्, तेभ्योऽपि प्रत्येकशरीरबादरवनस्पतिकायिका असङ्घयेयगुणाः, स्थानस्यास-ङ्घयेयगुणत्वात्, बादरतेजस्यिका हि मनुष्यक्षेत्र एव भवन्ति, तथा चोक्तं प्रज्ञापनायां द्वितीये स्थानाख्ये पदे—'कहि णं भंते ! बादरतेउक्काइयाणं पज्ञत्तापज्ञताणं ठाणा पन्नत्ता ?, गोयमा ! अंतो मणुस्सखेत्ते अड्ढाइज्ञेसु दीवसमुद्देसु निव्वाघाएणं पन्नरससु कम्मभूमीसु वाघाएणं पंचसु महाविदेहेसु एत्थ णं बायरतेउक्काइयाणं पज्ञत्तगाणं ठाणा पज्ञत्ता, तथा—जत्थेव बायरतेउक्काइयाणं पज्ञत्ताणं ठाणा पन्नत्ता तत्थेव अपज्ञत्ताणं बायरतेउकाइयाणं ठाणा पन्नत्ता' इति।

बादरवनस्पतिकायिकास्तु त्रिष्वपि लोकेषु, तथा चोक्तं प्रज्ञापनायां तस्मिन्नेव स्थानाख्ये द्वितीये पदे—'कहि णं भंते ! बादरवणस्सइकाइयाणं पज्ञत्तगाणं ठाणा पन्नत्ता ?, गोयमा ! सट्ठाणेणं सत्तसु घनोदहीसु सत्तसु घनोदहिवलएसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु उड्ढलोए कप्पेसु विमाणावलियासु विमाणपत्थडेसु तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु गुंजालियासु सरेसु सरपंतियासु उज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलड्ढाणेसु, एत्थ णं बायरवणस्सइकाइयाणं पज्ञत्तगाणं ठाणा पन्नत्ता, तथा जत्थेव बायरवणस्सइकाइयाणं पज्ञत्तगाणं ठाणा पण्णत्ता तत्थेव बायरवणस्सइकाइ-याणमपज्ञत्तगाणं ठाणा पन्नत्ता' इति। ततः क्षेत्रस्यासङ्घयेयगुणत्वादुपपद्यन्ते बादरतेजस्कायिकेभ्यो-ऽसङ्घयेयगुणाः प्रत्येक-शरीरबदरवनस्पतिकायिकाः, तेभ्यो बादरनिगोदा असङ्घयेयगुणास्तेषा मत्यन्तसूक्ष्मावगाहनत्वात् जलेषु च सर्वत्रापि प्रायोभावात्, पनकसेवालादयो हि जलेष्वव-श्यंभाविनः, ते च बादरान्तकायिका इति, तेभ्योऽपि बादरपृथिवीकायिका असङ्घयेयगुणाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अष्टसु पृथिवीषु सर्वेषु विमानभवन-पर्वतादिषु च भावात्, तेभ्योऽसङ्ख्येयगुणा बादराप्कायिकाः, समुद्रेषु जलप्राभूत्यात्स, तेभ्यो बादरतायुकायिका असङ्ख्येयगुणाः, शुषिरे सर्वत्र वायुसम्भवात्, तेभ्योऽप बादरवनस्पतिकायिका अनन्तगुणाः, प्रतिबादरनिगोदमनन्तानां जीवानां भवात्, तेभ्यः सामान्यतो बादरा विशेषाधिकाः, बादरत्रसकादिकादीनामपि तत्र प्रक्षेपात्।

गतमेकमौधिकमल्पबहुत्वमिदानीमेतेषामेवपर्याप्तानां द्वितीयमाह-'एएसि णं भंते !' इत्यादि, सर्वस्तोका बादरत्रसकायिका अपर्याप्ताः, युक्तिरत्र प्रागुक्तैव, तेभ्यो बादरतेजस्कायका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रमामत्वात्, इत्येवं प्रागुक्तक्रमेणेदमप्यल्पबहुत्वं परिभावनीयम्॥ गतं द्वितीयमल्पबहुत्वं, साम्प्रतमेतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह-'एएसि ण'मित्यादि, सर्वस्तोका बादरतेजस्कायिकाः पर्याप्ताः, आवलिकासमयवर्गस्य कतिपयसम्यन्यूनैरावलिकासमयैर्गुणितस्य यावान् समयराशिर्भवति तत्वप्रमाणत्वात्तेषाम्, उक्तञ्च-"आवलिवग्गो कमेणावलीए गुणिओ हि बायरो तेऊ" इति, तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषाम्, उक्तञ्च-

"पत्तेयपज्जत्तवणकाइया उ पयरं हरंति लोगस्स अंगुलअसंखभागेण भाइय"मिति, तेभ्यो बादरनिगोदपर्याप्तका असङ्ख्येयगुणाः, तेषामत्यन्तसूक्ष्मावगाहनत्वात् जलाशयेषु च सर्वत्र प्रायोभावात्, तेभ्यो बादरपृथिवीकायिकाः पर्याप्ता असङ्ख्येयगुणाः, अतिप्रभूतसङ्ख्येयप्रतराङ्गुलासङ्ख्येयभागखण्डमानत्वात्, तेभ्योऽपि बादराप्कायिकाः पर्याप्ता असङ्ख्येयगुणाः, अतिप्रभूततरासङ्ख्येयप्रतराङ्गुलासङ्ख्येयभागखण्डमानत्वात्, तेभ्यो बादरवायुकायिकाः पर्याप्ता असङ्ख्येयगुणाः, घनीकृतस्य लोकस्यासङ्ख्येयेषु प्रतरेषु सङ्ख्याततमभागवर्त्तिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्यो बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादरपर्याप्तका विशेषाधिकाः, बादरतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्।

गतं तृतीयमल्पबहुत्वमिदानीमेतेषामेव प्रत्येकं पर्याप्तापर्याप्तगतमल्पबहुत्वमाह-'एएसि ण'मित्यादि, इह बादरैकैकपर्याप्तनिश्रयाऽसङ्ख्येया बादरा अपर्याप्ता उत्पद्यन्ते, "पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा" इति वचनात्, ततः सर्वत्र पर्याप्तेभ्योऽपर्याप्ता असङ्ख्येयगुणा वक्तव्याः। बादरत्रसकायिकसूत्रं तु प्रागुक्तयुक्तया भावनीयम्।

गतं चतुर्थमप्यल्पबहुत्वं, सम्प्रत्येतेषामेव समुदितानां पर्याप्तापर्याप्तानां पञ्चममल्पबहुत्वमाह-'एएसि ण'मित्यादि, सर्वस्तोका बादरदेजस्कायिकाः पर्याप्ताः, तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, तेभ्यो बादरप्रत्येकवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः, तेभ्यो बादरनिगोदाः पर्याप्ता असङ्ख्येयगुणाः, तेभ्यो बादरपृथिवीकायिकाः पर्याप्ता असङ्ख्येयगुणाः, तेभ्यो बादराप्याकियाः पर्याप्ता असङ्ख्येयगुणाः, तेभ्यो बादरवायुकायिकाः पर्याप्ता असङ्ख्येयेषु लोकाकाशप्रदेशेषु यावन्त आकाशप्रदेशास्तावत्प्रमाणाः बादरतेजस्कायिकाश्चापर्याप्ता असङ्ख्येयलोकाकाशप्रदेशप्रमाणास्ततो भवन्त्यसङ्ख्येयगुणाः, ततः प्रत्येकबादरवनस्पतिकायिकबादरनिगोदबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिका अपर्याप्ता यथोत्तरमसङ्ख्येयगुणा वक्तव्याः।

यद्यपि चैते प्रत्येकमसङ्ख्ययलोकाकाशप्रदेशप्रमाणास्तथाऽप्यसङ्ख्यातस्यासङ्ख्यात-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदभिन्नत्वादित्थं यथोत्तरमसङ्ख्येयगुणत्वं न विरुध्यते, तेभ्यो बादरवायुकायिकापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवाः पर्याप्ता अनन्तगुणाः प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्ता विशेषाधिकाः, बादरतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यो बादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणा एकैकपपर्याप्तबादरवनस्पतिकायिकनिगोदनिश्रयाऽसङ्ख्येयानामपर्याप्तबादरवनस्पतिकायिकनिगोदानामुत्पादात्, तेभ्यः सामान्यतो बादरा विशेषाधिकाः बादरपर्याप्ततेजस्कायिकादीनामपर्याप्तानां तत्र प्रक्षेपात् ।

तदेवं गतानि बादराश्रितानि पञ्चाल्पबहुत्वानि, सम्प्रति सूक्ष्मबादरसमुदायगतानि पञ्चाल्पबहुत्वान्यभिधित्सुराह–'एएसि ण'मित्यादि, इह प्रथमं बादरगतमल्पबहुत्वं तत्सूक्ष्मगताल्पबहुत्वपञ्चके यत्प्रथममल्पबहुत्वं तद्वद्भावनीयं यावत् सूक्ष्मनिगोदचिन्ता, तदनन्तरं बादरवनस्पतिकायिका अनन्तगुणाः प्रतिबादरनिगोदमनन्तानां जीवानां भावात्, तेभ्यो बादरा विशेषाधिका बादरतेजस्कायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामसङ्ख्येयगुणत्वात्, तेभ्य सामान्यतः सूक्ष्मा विशेषाधिकाः सूक्ष्मतेजस्कायिकादीनामपि तत्र प्रक्षेपात् ।

गतमेकमल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानां द्वितीयमाह–'एएसि ण'मित्यादि, सर्वस्तोका बादरत्रसकायिका अपर्याप्ताः, ततो बादरतेजस्कायिकबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिकाः पर्याप्ताः क्रमेण यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना बादरगताल्पबहुत्वपञ्चके यद्वद् द्वितीयमपर्याप्ताविषयमल्पबहुत्वं तद्वद् भावनीया, ततो बादरवायुकायिकेभ्योऽपर्याप्तेभ्यः सूक्ष्मतेजस्कायिका अपर्याप्ता असङ्ख्येयगुणाः, अतिप्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायुकायिकसूक्ष्मनिगोदा यथोत्तरमङ्ख्येयगुणाः, अत्र भावना सूक्ष्माल्पबहुत्ववद्भावनीया, पञ्चके यद्द्वितीयाल्पबहुत्वं तद्वत्, तेभ्यः सूक्ष्मनिगोदापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवा अपर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां भावात्, तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिकाः, बादरत्रसकायिकापर्याप्तानामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदापर्याप्तेभ्य सूक्ष्मनिगोदापर्याप्तानामसङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतः सूक्ष्मा अपर्याप्ता विशेषाधिकः, सूक्ष्मतेजस्कायिकापर्याप्तादीनामपि तत्र प्रक्षेपात् ।

गतं द्वितीयल्पबहुत्वमिदानीं तेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह–'एएसि ण'मित्यादि, सर्वस्तोका बादरतेजस्कायिकाः पर्याप्ताः, तेभ्यो बादरत्रसकायिकबादरप्रत्येकवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिकाः पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना बादरगताल्पबहुत्वपञ्चके यत्त तीयं पर्याप्तविषयमल्पबहुत्वं तद्वत्कर्त्तव्या, बादरपर्याप्तवायुकायिकेभ्यः सूक्ष्मतेजस्कायिकाः पर्याप्ता असङ्ख्येयलोकाकाशप्रदेशप्रमाणास्ततोऽसङ्ख्येयगुणाः, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायुकायिकाः पर्याप्ताः क्रमेण यथोत्तरं विशेषाधिकाः, ततः सूक्ष्मवायुकायिकेभ्यः पर्याप्तेभ्यः सूक्ष्मनिगोदाः पर्याप्तका असङ्ख्येयगुणाः, तेषामतिप्रभूततया प्रतिगोलकं भावात्, तेभ्यो बादरवनस्पतिकायिका जीवाः पर्याप्तका अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां भावात्, तेभ्यः सामान्यतो बादराः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्याप्ता विशेषाधिकाः, बादरतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदपर्याप्तेभ्यः सूक्ष्मनिगोदपर्याप्तानामसङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, सूक्ष्मतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्।

गतं तृतीयमल्पबहुत्वमिदानीमेतेषामेव सूक्ष्मबादरादीनां प्रत्येकं पर्याप्तापर्याप्तानां पृथक पृथगल्पबहुत्वमाह– 'एएसि णं भंते ! सुहुमाणं बायराण य पज्जत्तापज्जत्ताण' मित्यादि, सर्वत्रेयं भावना–सर्वस्तोका बादराः पर्याप्ताः परिमितक्षेत्रवर्त्तित्वात्, तेभ्यो बादरा अपर्याप्ता असङ्ख्येयगुणाः, एकैकबादरपर्याप्तनिश्रयऽसङ्ख्येयानां बादरापर्याप्तानामुत्पादात्, तेभ्यः सूक्ष्मापर्याप्ता असङ्ख्येयगुणाः, सर्वलोकापन्नतया तेषां क्षेत्रस्यासङ्ख्येयगुणात्वात्, तेभ्यः सूक्ष्मपर्याप्तकाः सङ्ख्येयगुणाः, चिरकालावस्थायितया तेषां सदैव सङ्ख्येयगुणतया प्राप्यमानत्वात्, सर्वसङ्ख्यया चात्र सप्त सूत्राणि, तद्यथा–प्रथमं सामान्यतः सूक्ष्मबादरपर्याप्तापर्याप्त- विषयं द्वितीयं सूक्ष्मबादर- पृथिवीकायिकपर्याप्तापर्याप्तविषयं, तृतीयं सूक्ष्मबादराप्कायिकपर्याप्ता- पर्याप्तविषयं, चतुर्थं सूक्ष्मबादरतेजस्कायिकप पञ्चमं सूक्ष्मबादरवायुकायिक- प० षष्ठं सूक्ष्मबादरवनस्पुतिकायिकपर्याप्ताप०सप्तमं सूक्ष्मबादरनिगोदपर्याप्यापर्याप्तविषयमि।

गतं चतुर्थमल्पबहुत्वमिदानीमेतेषामेव सूक्ष्मपृथिवीकायिकादीनां प्रत्येकं पर्याप्तापर्याप्तानां समुदायेन पञ्चममल्पबहुत्वमाह– 'एएसि णं भंते ! सुहुमाणं सुहुमपुढविक्कइयाण' मित्यादि, सर्वस्तोका बादरतेजस्कायिकाः पर्याप्ताः, आवलिकासमयवर्गे कतिपयसमयन्यूनैरावलिकासमयैर्गुणिते यावान् समयराशिस्तावत्प्रमाणत्वात्तेषां, तेभ्यो बादरत्रसकायिकाः पर्यापता असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषां, तेभ्यो बादरत्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः, प्रतेरयावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषां, ततः प्रत्येकशरीरबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिकाः पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, यद्यप्येते प्रत्येकं प्रतर यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणास्तथाऽप्यङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वादित्थं यथोत्तरमसङ्ख्येयगुणत्वमभिधीयमानं यन विरुध्यते, तेभ्यो बादरतेजस्कायिका अपर्याप्तका असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्।

ततः प्रत्येकशरीरबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिका अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, ततो बादरवायुकायिकेभ्योऽपर्याप्तकेभ्यः सूक्ष्मतेजस्कायिका अपर्याप्ता असङ्ख्येयगुणाः, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायुकायिका अपर्याप्ता यथोत्तरं विशेषाधिकाः, ततः सूक्ष्मतेजस्कायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतः सङ्ख्येयगुणत्वात्, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायकायिकाः पर्याप्ता यथोत्तरं विशेषाधिकाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्तका असङ्ख्येयगुणाः, तेषामतिप्राभूत्येन सर्वलोकेषु भावात्, तेभ्यः सूक्ष्मनिगोदा असङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तानां सदैवोघतः सङ्ख्येयगुणत्वात्, एते च बादरपर्याप्ततेजस्कायिकादयः पर्याप्तनिगोदपर्यवसानाः षोडश पदार्था यद्यप्यन्यत्राविशेषेणासङ्ख्येयलोकाकाशप्रदेशप्रमाणतया संगीयन्ते तथाऽप्यसङ्ख्यातस्यासङ्ख्यातभेदभिन्नत्वादित्थमसङ्ख्येयगुणत्वं विशेषाधिकत्वं सङ्ख्येयगुणत्वं च

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

प्रतिपाद्यमानं न विरोधभागिति, तेभ्यः पर्याप्तसूक्ष्मनिगोदेभ्यो बादरवनस्तिकायिका अपर्याप्ता अनन्तगुणाः। प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्,

तेभ्यः सामान्यतो बादराः पर्याप्ता विशेषाधिकाः, बादरपर्याप्ततेजस्कायिकादीनामपि तत प्रक्षेपात्, तेभ्यो बादरवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, एकैकपर्याप्तनिगोदनिश्रयाऽसङ्ख्येयानां बादरनिगोदापर्याप्तानां मुत्पादात्, तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिकाः, बादरतेजस्कायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सामान्यतो बादरा विशेषाधिकाः, पर्याप्तानामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्म-वनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादर-निगोदेभ्य सूक्ष्मनिगोदानामपर्याप्तानामप्य- सङ्ख्येयगुणत्वात्, ततः सामान्यतः सूक्ष्माअपर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवीकायिकादीनाम- प्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पति-कायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मवनस्पति कायिकापर्याप्तेभ्यो हि सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेष्वप्योघतोऽपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात्।

ततः सामान्यतः सूक्ष्मपर्याप्तेभ्योऽपि सङ्ख्येयगुणाः, विशेषाधिकत्वस्य सङ्ख्येयगुणत्व-बाधनायोगात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्तका विशेषाधिकाः, पर्याप्तसूक्ष्मपृथिवीकायिकादी-नामपि तत्र प्रक्षेपात्, ततः सामान्यतः पर्याप्तापर्याप्तविशेषणरहिताः सूक्ष्मा विशेषाधिकाः, अपर्याप्तानामपि तत्र प्रक्षेपात्।

इह पूर्वं निगोदाः स्थित्यादिभिश्चिन्तितास्ततो निगोदवक्तव्यतामाह–

मू. (३६३) *कतिविहा णं भंते! निओया पन्नत्ता?, गोयमा! दुविहा निओया पन्नत्ता, तंजहा–निओया य निओदजीवा य॥ निओया णं भंते! कतिविहा पन्नत्ता?, गोयमा! दुविहा, पं०, तंजहा–सुहुमनिओया य बायरनिओया य॥ सुहुमनिओया णं भंते! कतिविहा पन्नत्ता?, गोयमा! दुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य।*

बायरनिओयाविदुविहा पन्नत्ता, तंजहा–पज्जत्तगा य अपज्जत्तगा य॥ निओयजीवा णं भंते! कतिविहा पन्नत्ता?, दुविहा पन्नत्ता–सुहुमनिओदजीवा य बायरनिओयजीवा य। सुहुमनिगोदजीवा दुविहा पं० तं०–पज्जत्तगा य अपज्जत्तगा य। बादरनिगोदजीवा दुविहा पन्नत्ता तं०–पज्जत्तगा य अपज्जत्तगा य॥

वृ. 'कतिविहा ण'मित्यादि, कतिभेदाः भदन्त! निगोदाः प्रज्ञप्ताः? भगवानाह–गौतम! द्विविधा निगोदाः प्रज्ञप्तास्तद्यथा–निगोदाश्च निगोदजीवाश्च, उभयेषामपि निगोदशब्दवाच्यतया प्रसिद्धत्वात्, तत्र निगोदा–जीवाश्रयविशेषाः निगोदजीवा–विभिन्नतैजसकार्मणा जीवा एव॥ अधुना निगोदभेदान् पृच्छति– 'निगोया णं भंते!' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! द्विविधाः प्रज्ञप्तास्तद्यथा–सूक्ष्मनिगोदाश्च बादरनिगोदाश्च, तत्र सूक्ष्मनिगोदाः सर्वलोकापन्नाः बादरनिगोदा मूलकन्दादयः।

'सुहुमनिगोयाण'मित्यादि, सूक्ष्मनिगोदा भदन्त! कतिविधाः प्रज्ञप्ताः?, भगवानाह–गौतम! द्विविधाः प्रज्ञप्तास्तद्यथा–पर्याप्ता अपर्याप्ताश्च, एवं बादरनिगोदविषयमपि सूत्रं वक्तव्यं तदेवमुक्ता निगोदाः, अधुना निगोदजीवानधिकृत्य भेदप्रश्नसूत्रमाह– 'निगोयजीवा णं भंते!' इत्यादि सुगमं, भगवानाह–गौतम! निगोदजीवा द्विविधाः प्रज्ञप्तास्तद्यथा–सूक्ष्मनिगोदजीवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बादरनिगोदजीवाश्च, चशब्दौ निगोदजीवतया तुल्यतासूचकौ, एवमन्यत्रापि यथायोगं परिभावनीयौ 'सुहुमनियोगजीवा णं भंते' इत्यादि पर्याप्तापर्याप्तविषयं पाठसिद्धम् ।

सम्प्रति सामान्यतो निगोदसङ्ख्यां जिज्ञासिषुः पृच्छति–

मू. (३६४) *निगोदा णं भंते ! दव्वदुयाए किं संखेज्ञा असंखेज्ञा अनंता ?, गोयमा ! नो संखेज्ञा असंखेज्ञा नो अनंता, एवं पज्ञत्तगावि अपज्ञत्तगावि ।। सुहुमनिगोदा णं भंते ! दव्वट्ठयाए किं संखेज्ञा असंखेज्ञा अणंता ?, गो० ! नो संखेज्ञा असंखेज्ञा नो अनता, एवं पज्ञत्तगावि अपज्ञत्तगावि, एवं बायरावि पज्ञत्तगावि अपज्ञत्तगावि नो संखेज्ञा असंखेज्ञा नो अनंता ।*

निओदजीवा णं भंते ! दव्वट्ठयाए किं संखेज्ञा असंखेज्ञा अनंता ?, गोयमा ! नो संखेज्ञा नो असंखेज्ञा अनंता, एवं पज्ञत्तावि अपज्ञत्तावि, एवं सुहुमनिओयजीवावि पज्ञत्तगावि अपज्ञत्तगावि, बादरनिओदजीवावि पज्ञत्तगावि अपज्ञत्तगावि ।

निओदा णं भंते ! पदेसट्ठयाए किं संखेज्ञा० ? पुच्छा, गोयमा ! नो संखेज्ञा नो असंखेज्ञा अनंता, एवं पज्ञत्तगावि अपजत्तगावि । एवं सुहुमणिओयावि पज्ञत्तगावि अपज्ञत्तगावि य, पएसट्ठयाए सव्वे अनंता, एवं बायरनिगोयावि पज्ञत्तयावि अप्पज्ञत्तयावि, पएसट्ठयाए सव्वे अनंता, एवं निओदजीवा नवविहावि पएसट्ठयाए सव्वे अनंता ।

एएसि णं भंते ! निओयाणं सुहुमाणं बायराणं पज्ञत्तयाणं अपज्ञत्तगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे२ हिंतो अप्पा वा बहुया वा० ?, गोयमा ! सव्वत्थोवा बादर-निओयपज्ञत्तगा दव्वट्ठयाए बादरनिगोदा अपज्ञत्तगा दव्वट्ठयाए असंखेज्ञगुणा सुहुमनि-ओदाअपज्ञत्तगा दववट्ठयाए असंखेज्ञगुणा सुहुमनिओदा पज्ञत्तगा दव्वट्ठयाए संखिज्ञगुणा, एवं पदेसट्ठयाएवि ।

दव्वट्ठपेसट्ठयाए सव्वत्थोवा बादरनिओया य पज्ञत्ता दव्वट्ठयाए जाव सुहुमनिओदा पज्ञत्ता पएसट्ठया अनंतगुणा बायरनिओदा अपज्ञत्ता पएसट्ठयाए असंख० जाव सुहुमनिओया पज्ञत्ता पएसट्ठयाए संखेज्ञगुणा । एवं निओयजीवावि, नवरि संकमए जाव सुहुमनिओयजीवेहिंतो पज्ञत्तएहिंतो दव्वट्ठयाए बायरनिओयजीवा पज्ञ० पदेसट्ठयाए असंखेज्ञगुणा, सेसं तहेव जाव सुहुमनिओयजीवा पज्ञत्ता पएसट्ठयाए संखेज्ञगुणा ।

एतेसि णं भंते ! निगोदाणं सुहुमाणं बायराणं पज्ञत्ताणं अपज्ञत्ताणं निओयजीवाणं सुहुमाणं बायराणं पज्ञत्तगाणं अपज्ञत्तगाणं दव्वट्ठयाए पएसट्ठयाए कयरे२ हिंतो ?०, सव्वत्थोवा बायरनि-ओदा पज्ञत्ता दव्वट्ठयाए बायरनिओदा अपज्ञत्ता दव्वट्ठयाए असङ्खेज्ञगुणा सुहुमनिगोदा अप० दव्वट्ठयाए असंखेज्ञगुणा सुहुमनिओदा पज्ञ० दव्वट्ठयाए संखेज्ञगुणा सुहुमनिओएहिंतो दव्वट्ठयाए बायरनिओदजीवा पज्ञत्ता दव्वट्ठयाए अनंतगुणा बायरनिओदजीवा अपज्ञत्ता दव्वट्ठयाए असंखेज्ञगुणा सुहुमनिओदजीवा अपज्ञत्ता दव्वट्ठयाए असंखेज्ञगुणा सुहुमणिओयजीवा पज्ञत्ता दव्वट्ठयाए संखेज्ञगुणा, पएसट्ठयाए सव्वत्थोवा बायरनिओदजीवा पज्ञत्ता पएसट्ठयाए बायरणि-ओदा अपज्ञत्ता पएसट्ठयाए असंखे० सुहुमणिओयजीवा अपज्ञत्तया पएसट्ठयाए असंखेज्ञगुणा सुहुमनिगोदजीवा पज्ञत्ता पएसट्ठयाए संखेज्ञगुणा सुहुमनिओदजीवेहिंतो पएसट्ठयाए बायरनिगोदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पज्जत्ता पदेसट्ठयाए अनतगुणा।

बायरनिओया अपज्जत्ता पएस० असंखेज्जगुणा जाव सुहुमनिओया पज्जत्ता पएसट्ठयाए संखेज्जगुणा, दव्वट्ठपएसट्ठयाए सव्वत्थोवा बायरनिओया पज्जत्ता दव्वट्ठयाए बायरनिओदा अपज्जत्ता दव्वट्ठयाए असंखेज्जगुणा जाव सुहुमनिगोदा पज्जत्ता, दव्वट्ठयाए संखेज्जगुणा सुहुमनिओदाहिंतो दव्वट्ठयाए बायरनिओदजीवा पज्जत्ता दव्वट्ठयाए अनंतगुणा सेसा तहेव जाव सुहुमनिगोदजीवा पज्जत्तगा दव्वट्ठयाए संखेज्जगुणा सुहुमनिओयजीवेहिंतो पज्जत्तएहिंतो पज्जत्तएहिंतो दव्वट्ठयाए बायरनिओयजीवा पज्जत्ता पदेसट्ठयाए असंखेज्जगुणा सेसा तहेव जाव सुहुमनिओया पज्जत्ता पएसट्ठयाए संखेज्जगुणा।। सेत्तं छव्विहासंसारसमावण्णगा।।

वृ. 'निगोदा ण'मित्यादि, 'निगोदाः' जीवाश्रयविशेषा भदन्त! 'द्रव्यार्थतया' द्रव्यरूपतया किं सङ्ख्येया असङ्ख्येया अनन्ताः?, भगवानाह–गौतम! नो सङ्ख्येयाः, अङ्गुलासङ्ख्येयभागावगाहनानां तेषां सर्वलोकापन्नत्वात्, किन्त्वसङ्ख्येयाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, नाप्यनन्तास्तथा केवलवेदसाऽनुपलम्भात्। एवमपर्याप्तसामान्यनिगोदसूत्रं पर्याप्त सामान्यनिगोदसूत्रं च भावनीयम्। यथा च सामान्यनिगोदविषयं सूत्रत्रयमुक्तम् एवं सूक्ष्मनिगोदविषयमपि सूत्रत्रयं बादरनिगोदविषयमपि सूत्रत्रयं पृथग् वक्तव्यं, भावना च पूर्वानुसारेण स्वयं विधेया।

सम्प्रति द्रव्यार्थतया (निगोदजीवा) सङ्ख्यां पिपृच्छिषुराह–'निगोयजीवा णं भंते! दव्वट्ठयाए' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! नो सङ्ख्येया नाप्यसङ्ख्येयाः किन्त्वनन्ताः प्रतिनिगोदमनन्तानां निगोदद्रव्यजीवानां भावात्। एवमपर्याप्तसूत्रं पर्याप्तसूत्रं च वक्तव्यं सर्वसङ्ख्यया नव सूत्रामि। [एवमेव प्रदेशार्थत विषयाण्यपि न सूत्राणि नानात्वाभावात्, भावना च सर्वत्रापि सुप्रतीता, ये किल द्रव्यार्थतयाऽनन्तास्ते प्रदेशार्थतया सुतरामनन्ताः प्रतिद्रव्यमसङ्ख्यातानां प्रदेशानां भावात्, सर्वसङ्ख्यया चामून्यष्टादश सूत्राणि]।

तदेवं द्रव्यार्थविषयाणि न व सूत्राण्यक्तानि सम्प्रति प्रदेशार्थताविषयाणि नव सूत्राणि विवक्षु प्रथमतः सामान्यतो निगोदविषयं सूत्रत्रयमाह–'निगोया णं भंते! पएसट्ठयाए' इत्यादि, 'निगोदाः' उक्तस्वरूपा णमिति वाक्यालङ्कारे भदन्त! 'प्रदेशार्थतया' प्रदेशरूपतया चिन्त्यमानाः किं सङ्ख्येया असङ्ख्येया अनन्ताः?, भगवानाह–गौतम! नो सङ्ख्येया नो असङ्ख्येयाः किन्त्वनन्ताः, एकैकस्मिन् निगोदे प्रदेशानामनन्तत्वात्, एवं शेषाण्यष्टौ सूत्राणि पूर्वक्रमेण भावनीयानि।

सम्प्रत्येतेषामेव सूक्ष्मबादरपर्याप्तापर्याप्तनिगोदानां द्रव्यार्थप्रदेशार्थोभयार्थतया परस्परमल्पबहुत्वमाह–'एएसि णं भंते! निगोदाण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौ! सर्वस्तोका बादरनिगोदा मूलकन्दादिगताः पर्याप्तका द्रव्यार्थतया, प्रतिनियतक्षत्रवात्तत्वात्, तेभ्यो बादरनिगोदा अपर्याप्तका द्रव्यार्थतयाऽसङ्ख्येयगुणाः, एकैकपर्याप्तबादरिगोदनिश्रयाऽसङ्ख्येयानामपर्याप्तानां बादरनिगोदानामुत्पादात्, तेभ्यः सूक्ष्मनिगोदा अपर्याप्तका द्रव्यार्थतयाऽसङ्ख्येयगुणाः, सकललोकापन्नतया क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः, सूक्ष्मेष्वोधतोऽपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात्, 'पएसट्ठयाए' इति अत ऊर्ध्वं प्रदेशार्थतया चिन्ता क्रियते, तामेव करोति–सर्वस्तोका बादरनिगोदाः पर्याप्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशार्थतया द्रव्यामां स्तोकत्वात्, तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणा द्रव्याणामसङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतयऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणा– द्रव्याणां सङ्ख्येयगुणत्वात् ।

'दव्वट्ठपएसट्ठयाए'त्ति अधुन द्रव्यार्थप्रदेशार्थतया चिन्ता क्रियते–सर्वस्तोका बादरनिगोदाः पर्याप्ता द्रव्यार्थतया, बादरनिगोदा अपर्याप्ता द्रव्यार्थतया असङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ता द्रव्यार्थतया असङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः, युक्ति प्राक्तन्येव, तेभ्यो बादरनिगोदाः पर्याप्ताः प्रदेशार्थतया अनन्तगुणाः, एकैकस्य निगोदस्य अनन्ताणुकानन्तस्कन्धनिष्पन्नत्वात्, तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणाः, द्रव्याणामसङ्ख्येयगुणत्वात्, तेभ्योः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतया असङ्ख्येयगुणाः, युक्ति प्राक्तन्वेव, तेभ्यः सक्ष्मनिगोदाः पर्याप्ताः सङ्ख्येयगुणाः, द्रव्याणां सङ्ख्येयगुणत्वात् ।

साम्प्रतमेतेषामेव सूक्ष्मबादरपर्याप्तापर्याप्तनिगोदजीवानां द्रव्यार्थप्रदेशार्थोभयार्थतया परस्परमल्पबहुत्वमाह– 'एएसि ण'मित्यादि, सर्वस्तोका बादरजीवाः पर्याप्ता द्रव्यार्थतया, निगोदानां स्तोकत्वात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणा, निगोदानामसङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मनिगोदजीवाः अपर्याप्तका द्रव्यार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः, कारणं पूर्ववद् ऊह्यं, प्रदेशार्थतया सर्वस्तोका बादरनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया, द्रव्याणां स्तोकत्वात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, द्रव्याणामसङ्ख्येयगुणत्वात्, एवं तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणाः, द्रव्यार्थप्रदेशार्थतया सर्वस्तोका बादरनिगोदजीवाः पर्याप्ता द्रव्यार्थतया, तेभ्यो बादरनिगोदजीवा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः, तेभ्यो बादरनिगोदजीवाः पर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, प्रतिबादरनिगोदपर्याप्तजीवामसङ्ख्येयानां लोकाकाश प्रदेशप्रमाणानां प्रदेशानां भावात्, तेभ्यः बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः बादरनिगोदापर्याप्तेभ्यो बादरनिगोदपर्याप्तानामसङ्ख्यातगुणत्वात्, तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्तकाः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, भावना प्रागिव ।

सम्प्रति सूक्ष्मबादरपर्याप्तापर्याप्तनिगोदनिगोदजीवानां द्रव्यार्थप्रदेशार्थोभयार्थतया परस्परमल्पबहुत्वमाह–'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सर्वस्तोका बादरनिगोदाः पर्याप्ता द्रव्यार्थतया, तेभ्यो बादरनिगोदा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः तेभ्यः सूक्ष्मनिगोदा अर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः, अत्र सर्वत्रापि युक्ति प्रागुक्तैव, सूक्ष्मनिगोदेभ्यः पर्याप्तेभ्यो द्रव्यार्थतया बादरनिगोदजीवाः पर्याप्ता अनन्तगुणाः, एकैकस्मिन् निगोदेऽनन्तानां जीवानां भावात्, तेभ्यो बादरनिगोदजीवाः अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः निगोदानामसङ्ख्यातत्वात्, एवं तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशार्थतया सर्वस्तोका बादरनिगोदजीवाः पर्याप्तकाः प्रदेशार्थतया निगोदानां स्तोकत्वात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः निगोदानामसङ्ख्येयगुणत्वात्, एवं तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः ।

तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवेभ्यः पर्याप्तेभ्यो बादरनिगोदाः पर्याप्ताः प्रदेशार्थतयाऽनन्तगुणाः, एकैकस्य निगोदस्यानन्ताणुकानन्तस्कन्धनिष्पन्नत्वात्, तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः एकैकबादरपर्याप्तनिगोदनिश्रया सङ्ख्याऽतीतानां बादरपर्याप्तनिगोदानामुत्पादात्, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्यातगुणाः, तेभ्यः सूक्ष्मनिगोदाः पर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणाः, द्रव्यार्थप्रदेशार्थतया सर्वस्तोका बादरनिगोदाः पर्याप्ता द्रव्यार्थतया, तेभ्यो बादरनिगोदा अपर्याप्ता सङ्ख्येयगुणाः, अत्र युक्तिर्निगोदानां द्रव्यार्थतया चिन्तायामिव, तेभ्यः सूक्ष्मनिगोदेभ्यः पर्याप्तेभ्योबादरनिगोदजीवाः पर्याप्ता द्रव्यार्थतयाऽनन्तगुणाः प्रतिबादरनिगोदमनन्तानां जीवानां भावात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवा अपर्याप्ता द्रव्यार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ता द्रव्यार्थतया सङ्ख्येयगुणाः

अत्र युक्तिर्निगोदजीवानां द्रव्यार्थतया चिन्तायामिव, तेभ्यः सूक्ष्मनिगोदजीवेभ्यः पर्याप्तेभ्यो द्रव्यार्थतया चिन्तितेभ्यो बादरनिगोदजीवाः पर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः प्रतिबादरनिगोदपर्याप्तजीवमसङ्ख्येयानां लोकाकाशप्रदेशप्रमाणानां प्रदेशानां भावात्, तेभ्यो बादरनिगोदजीवा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणाः, युक्तिरत्र निगोदजीवानां प्रदेशार्थतया सङ्ख्येयगुणचिन्तायामिव, तेभ्यः सूक्ष्मनिगोदजीवेभ्यः पर्याप्तेभ्यः प्रदेशार्थतया चिन्तितेभ्यो बादरनिगोदाः पर्याप्ताः प्रदेशार्थतयाऽनन्तगुणाः, एकैकस्मिन् निगोदेऽनन्तानामणूनां सद्भावात्, तेभ्यो बादरनिगोदा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदा अपर्याप्ताः प्रदेशार्थतयाऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मनिगोदजीवाः पर्याप्ताः प्रदेशार्थतया सङ्ख्येयगुणाः, अत्र युक्तिर्निगोदानां प्रदेशार्थतया चिन्तायामिव ।

उपसंहारमाह–'सेत्त'मित्यादि, एते षड्विधसंसारसमापन्नका जीवाः ॥

प्रतिपत्तिः–५ समाप्ताः

प्रतिपत्तिः–६ "सप्त विधा"

वृ. तदेवमुक्ता षड्विधप्रतिपत्ति, अधुना क्रमप्राप्तां सप्तविधप्रतिपत्तिमाह–

मू. (३६५) *तत्थ जे ते एवमाहंसु सत्तविहा संसारसमावन्नगा ते एवमाहंसु, तंजहा–नेरइया तिरिक्खा तिरिक्खजोणिणीओ मणुस्सा मणुस्सीओ देवा देवीओ ॥ नेरतियस्स ठिती जहन्नेणं दसवाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं, तिरिक्खजोणियस्स जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं, एवं तिरिक्खजोणिणीएवि, मणुस्साणवि मणुस्सीणवि, देवाणं ठिती जहा णेरइयाणं, देवीणं जहन्नेणं दसवाससहस्साइं उक्कोसेणं पणपन्नपलिओवमाणि ।*

नेरइयदेवदेवीणं जच्चेव ठिती सच्चेव संचिट्ठणा । तिरिक्खजोणिणीणं जहन्नेणं अंतोमु०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं। एवं मणुस्सस्स मणुस्सीएवि ॥ नेरइयस्स अंतरं जह० अंतोमुं० उक्कोसेणं वणस्सतिकालो। एवं सव्वाणं तिरिक्खजोणियवज्ञाणं, तिरिक्खजोणियाणं जहण्णेणं अंतोमु० उक्को० सागरोवमसतपुहुत्तं सातिरेगं।

अप्पाबहुयं–सव्वत्थोवाओ मणुस्सीओ मणुस्सा असंखेज्जगुणा नेरइया असंखेज्जगुणा तिरिक्खजोणिणीओ असंखेज्जगुणाओ देवा असंखेज्जगुणा देवीओ संखेज्जगुणाओ तिरिक्खजोणिया अनंतगुणा। सेत्तं सत्तविहा संसारसमावन्नगा जीवा ॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तः सप्तविधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा–नैरयिकास्तिर्यग्योनिकास्तिर्यग्योनिक्यः मनुष्या मानुष्यः देवा देव्यः ॥ तत्रामीषां सप्तानामपि क्रमेण स्थितमाह–'नेइरयस्स णं भंते !' इत्यादि सप्तसूत्री, नैरयिकस्य जघन्येन दशवर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि। तिर्यग्योनिकस्य जघन्यतोऽन्तर्मुहूर्त्त-मुत्कर्षतस्त्रीणि पल्योपमानि। एवं तिर्यग्योनिकीमनुष्यमानुषीसूत्राण्यपि वक्तव्यानि। देवसूत्रं नैरयिकवत्। देवीसूत्रे जघन्येन दश वर्षसहस्राणि, उत्कर्षतः पञ्चपञ्चाशत् पल्योपमानि, ईशानदेवीनामपरिगृहीतानामुत्कर्षत एतावत्स्थितिकत्वात्।

सम्प्रति कायस्थितिमाह–'नेरइया णं भंते!' इत्यादि, नैरयिकाणां यदेव भवस्थितिपरिमाणं तदेव कायस्थितिपरिमाणमपि, नैरयिकस्य मृत्वा भूयोऽनन्तरं नैरयिकेषूत्पादाभावात्। तिर्यग्योनिकसूत्रे जघन्यतोऽन्तर्मुहूर्त्तं, तदनन्तरमन्यत्रोत्पादात्, उत्कर्षतोऽनन्तं कालमनन्ता उत्सर्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽसङ्ख्येया लोकाः असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते पुद्गल-परावर्त्ता आवलिकाया असङ्ख्येयो भागः, अस्य भावार्थव्याख्या प्रागिव। तिर्यग्योनिकीसूत्रे जघन्यतोऽन्तर्मुहूर्त्तं तत ऊर्ध्वं मृत्वाऽन्यत्रोत्पादात्, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटी-पृथक्त्वाभ्यधिकानि, तानि निरन्तरं सप्तसु पूर्वकोटयायुष्केषु भवेष्वष्टमे च भवे देवकुर्वादिषूत्पन्नाया द्रष्टव्यानि। एवमेव मनुष्यसूत्रं मानुषीसूत्रं च, देवस्य देव्याश्च यैव भवस्थिति सैव कायस्थिति, देवस्य देव्याश्च मृत्वाऽनन्तरं तद्भावेनोत्पादाभावात्।

साम्प्रतमेषामन्तरं चिचिन्तयिषुराह–'नेरइयस्स णं भंते !' इत्यादि, नैरयिकस्य जघन्येनान्तरमन्तर्मुहूर्त्तं, तच्च नरकादुद्धृतस्य तिर्यग्मनुष्यगर्भ एवाशुभाध्यवसायेन मरणतः परिभावनीयं, सानुबन्धकर्म्मफलमेतदिति तात्पर्यार्थः, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालो वनस्पतिकालः, नरकादुद्धृतस्य पारम्पर्येणानन्तं कालं वनस्पतिष्ववस्थानात्, तिर्यग्योनिकस्य जघन्येनान्तरमन्तमुहूर्त्तं, तच्च तिर्यग्योनिकभवादुद्धृत्यान्यत्रान्तर्मुहूर्त्तं स्थित्वा भूयस्तिर्यग्योनित्वेनो-त्पद्यमानस्य वेदितव्यम्, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकम्। तिर्यग्योनिकीसूत्रे मनुष्यसूत्रे मानुषीसूत्रे देवीसूत्रे च जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः।

सम्प्रत्येतेषामेव सप्तानां पदानामल्पबहुत्वमाह–'एएसि म'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–सर्वस्तोको मानुष्यः, कतिपयकोटीकोटीप्रमाणत्वात्, ताभ्यो मनुष्या असङ्ख्येयगुणाः, संमूर्च्छिमनुष्याणां श्रेण्यसङ्ख्येयप्रदेशराशिप्रमाणत्वात्, तेभ्यस्तिर्यग्योनिकाः स्त्रीयोऽसङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्तिश्रेण्याकाशप्रदेशराशिप्रमाणत्वात्, ताभ्यो देवाः सङ्ख्येयगुणाः, वानमन्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्योतिष्काणामपि जलचरतिर्यग्योनिकीभ्यः सङ्ख्येयगुणतया महादण्डके पठितत्वात्, तेभ्यो देव्यः सङ्ख्येयगुणा द्वात्रिंशद्गुणत्वात्, "बत्तीसगुणा बत्तीसरूवअहियाओ होंति देवाणं देवीओ" इति वचनात्, ताभ्यस्तिर्यग्योनिका अनन्तगुणाः वनस्पतिजीवानामनन्तानन्तत्वात् ।

उपसंहारमाह–'सेत्त'मित्यादि सुगमम् ।।

प्रतिपत्तिः–६ समाप्ता

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता जीवाजीवाभिगम सूत्रे षष्ठीप्रतिपत्याः मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

प्रतिपत्तिः–७ "अष्टविधा"

वृ. तदेवमुक्ता सप्तविधप्रतिपत्तिरधुना क्रमप्राप्तामष्टविधप्रतिपत्तिमाह–

मू. (३६६) *तत्थ जे ते एवमाहंसु–अट्ठविहा संसारसमावन्नगा जीवे ते एवमांसु–पढमसमयनेरतिया अपढमसमयनेरइया पढमसमयतिरिक्खजोणिया अपढमसमयतिरिक्खजोणिया पढमसमयमणुस्सा अपढमसमयमणुस्सा पढमसमयदेवा अपढमसमयदेवा ।*

पढमसमयनेरइयस्स णं भंते! केवतियं कालं ठिती पन्नत्ता?, गोयमा! पढमसमयनेरइयस्स जह० एक्कं समयं उक्को० एक्कं समयं। अपढमसमयनेरइयस्स जह० दसवाससहस्साइं समऊणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं समऊणाइं ।

पढमसमयतिरिक्खजोणियस्स जह० एक्कं समयं उक्को० एक्कं समयं, अपढमसमयतिरिक्खजोणियस्स जह० खुड्डागं भवग्गहणं समऊणं उक्को० तिन्नि पलिओवमाइं समऊणाइं, एवं मणुस्साणवि जहा तिरिक्खजोणियाणं, देवाणं जहा नेरतियाणं ठिती । नेरइयदेवाणं जच्चेव ठिती सच्चेव संचिट्ठणा दुविहाणवि। पढमसमयतिरिक्खजोणिए णं भंते! पढ० कालओ केवचिरं होति?, गोयमा! जह० एक्कं समयं उक्को० एक्कं समयं, अपढमतिरिक्खजोणियस्स जह० खुड्डागं भवग्गहणं समऊणं उक्कोसेणं वणस्सतिकालो ।

पढमसमयमणुस्साणं जह० उ० एक्कं समयं, अपढममणुस्स० जह० खुड्डागं भवग्गहणं समऊणं उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं ।

अंतरं पढमसमयनेरतियस्स जह० दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्को० वणस्सतिकालो, अपढमसमय० जह० दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्को० वणस्सतिकालो, पढमसमयतिरिक्खजोणिए जह० दो खुड्डागभवग्गहणाइं समऊणाइं उक्को० वणस्सतिकालो, अपढमसमयतिरिक्खोणियस्स जह० खुड्डागं भवग्गहणं भवग्गहणं समयाहियं उक्क० सागरोवमसतपुहुत्तं सातिरेगं ।

पढमसमयमणुस्सस्स जह० दो खुड्डाइं भवग्गहणाइं समऊणाइं उक्को० वणस्सतिकालो, अपढमसमयमणुस्सस्स जह० खुड्डागं भवग्गहणं समयाहियं उक्को० वणस्सतिकालो । देवाणं जहा नेरइयाणं जह० दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्को० वणस्सइकालो, अपढमसमय० जह० अंतो० उक्को० वणस्सइकालो । अप्पाबहु० एतेसि णं भंते! पढमसमयनेरइयाणं

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

जाव पढमसमयदेवाण य कतरे २ हिंतो० ?, गो० सव्वत्थोवा पढमसमयमणुस्सा पढमसमयनेरइया असंखेज्ञगुणा पढमसमयदेवा असंखेज्ञगुणा पढमसमयतिरिक्खजोणिया असंखेज्ञगुणा।

अपढमसमयनेरइयाणं जाव अपढमदेवाणं एवं चेव अप्पबहु० नवरि अपढमसमयतिरिक्खजोणिया अनंतगुणा ॥ एतेसिं पढमसमयनेरइयाणं अपढम० नेरतियाणं कयरे २ ?, सव्वत्थोवा पढमसमयनेरतिया अपढमसमयनेरइया असंखेज्ञगुणा, एवं सव्वे।

पढमसमयनेरइयाणं जाव अपढमसमयदेवाण य कयरे २ ?, सव्वत्थोवा पढमसमयमणुस्सा अपढमसमयमणुस्सा असंखेज्ञगुणा पढमसमयनेरइया असंखिज्ञगुणा पढमसमयदेवा असंखेज्ञगुणा पढमसमयतिरिक्खजोणिया असंखेज्ञगुणा अपढमसमयनेरइया असंखेज्ञगुणा अपढमसमयदेवा असंखेज्ञगुणा अपढमसमयतिरिक्खजोणिया अनंतगुणा।

सेत्तं अट्ठविहा संसारसमावन्नगा जीवा पन्नत्ता ॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तः—अष्टविधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा—प्रथमसमयनैरयिका अप्रथमसमयनैरयिकाः, प्रथमसमयतिर्यग्योनिका अप्रथमसमयतिर्यग्योनिकाः, प्रथमसमयमनुष्या अप्रथमसमयमनुष्याश्च, प्रथमसमयदेवा अप्रथमसमयदेवाः, तत्र प्रथमसमयनारका नारकायुःप्रथमसमयसंवेदिनः अप्रथमसमयनारका नारकायुर्द्वयादिसमयवर्त्तिनः, एवं तिर्यग्योनिकादयो भावनीयाः।

साम्प्रतमेतेषामष्टानां क्रमेण स्थितिमाह—'पढमसमयनेरइयस्स ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम! एकं समयं, द्वयादिषु समयेषु प्रथमसमयत्वविशेषणायोगात्, अप्रथमसमयप्रश्नसूत्रं सुगमं, भगवानाह—गौतम! जघन्येन दशवर्षसहस्राणि समयोनानि, समयातिक्रान्तावेवाप्रथमसमयविशेषणत्वभावात्, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि समयोनानि। तिर्यग्योनिकादीनां प्रथमसमयानां सर्वेषामेकं समयं, अप्रथमसमयतिर्यग्योनिकानां जघन्येन क्षुल्लकभवग्रहणं समयोनं, उत्कर्षतस्त्रीणि पल्योपमानि समयोनानि। एवं अप्रथमसमयमनुष्याणामपि। अप्रथमसमयदेवानां जघन्येन दश वर्षसहस्राणि समयोनानि, उत्कर्षतस्त्रयस्त्रिंशत् सागरोपमाणि समयोनानि।

अधुनैषामेव कायस्थितिमाह—'पढमसमयनेरइया णं भंते! पढमसमयनेरइयत्ति कालतो केवचिरं होइ?' इति प्रश्नसूत्रं सुगमं, भगवानाह—गौतम! एकं समयं, तदनन्तरं प्रथमसमयत्वविशेषणायोगात्। अप्रथमसमयसूत्रे यदेव स्थितिपरिमाणं तदेव कायस्थितिपरिमाणमपि, देवनैरयिकाणां भूयो भूयस्तद्भावभावितया नैरन्तर्येणोत्पादायोगात्। प्रथमसमयतिर्यग्योनिकसूत्रं, प्रथमसमयनैरयिकसूत्रवत्, अप्रथमतिर्यग्योनिकसूत्रे जघन्येन क्षुल्लकभवग्रहणं समयोनं, समयोनता प्रथमसमयहीनत्वात्, उत्कर्षतोऽनन्तकालं, स चानन्तः कालो वनस्पतिकालः प्रागुक्तस्वरूपः। प्रथमसमयमनुष्यसूत्रं पूर्ववत्, अप्रथमसमयमनुष्यसूत्रे जघन्यतः क्षुल्लकभवग्रहणं समयोनं, तदनन्तरं मृत्वाऽन्यत्रोत्पादात्, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि समयोनानि, तानि सप्तसु भवेषु पूर्वकोटयायुष्केष्वष्टमे भवे देवकुर्वादिषूत्पद्यमानस्य वेदितव्यानि, देवा यथा नैरयिकाः

साम्प्रतमेतेषामेवाष्टानामन्तरं क्रमेण चिन्तयन्नाह—'पढमसमयनेरइयस्स णं भंते!' इत्यादि, प्रथमसमयनैरयिकस्य भदन्त! अन्तरं कालतः कियच्चिरं भवति?, भगवानाह—गौतम! जघन्यतो दशवर्षसहस्राणि अन्तर्मुहूर्त्ताभ्यधिकानि, तानि दशवर्षसहस्रस्थितिकस्य नैरयिकस्य नरकादुद्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यान्यत्रान्तर्मुहूर्तं स्थित्वा भूयो नैरयिकत्वेनोत्पद्यमानस्य वेदितव्यानि, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालो वनस्पतिकालः प्रतिपत्तव्यः, नरकादुद्धृत्य पारम्पर्येण वनस्पतिषु गत्वाऽनन्तमपि कालमवस्थानात्, अप्रथमसमयनैरयिकसूत्रे जघन्यमन्तरं समयाधिकमन्तर्मुहूर्तं, तच्च नरकादुद्धृत्य तिर्यगगर्भे मनुष्यगर्भे वाऽन्तर्मुहूर्तं स्थित्वा भूयो नरकेषूत्पद्यमानस्य भावनीयं, समयाधिकता च प्रथमसमयस्याधिकत्वात्, क्वचिदन्तर्मुहूर्तमित्येव दृश्यते, तत्र प्रथमसमयोऽन्तर्मुहूर्त एवान्तर्भावित इति पृथग्नोक्तः, उत्कर्षतो वनस्पतिकालः ।

प्रथमसमयतिर्यग्योनकसूत्रे जघन्येनान्तरं द्वे क्षुल्लकभवग्रहणे समयोने, ते च क्षुल्लकमनुष्यभवग्रहणव्यवधानतः पुनस्तिर्यक्ष्वेवोत्पद्यमानस्यावसातव्ये, तथाहि—एकं प्रथमसमयोनं तिर्यकक्षुल्लकभवग्रहणं द्वितीयं संपूर्णमेव मनुष्यक्षुल्लकभवग्रहणमिति, उत्कर्षतो वनस्पतिकालः, तदतिक्रमे मनुष्यभवव्यवधानेन भूयः प्रथमसमयतिर्यक्त्वोपपत्तेः, अप्रथमसमयतिर्यग्योनिकसूत्रे जघन्येनान्तरं क्षुल्लकभवग्रहणं समयाधिकं, तत्तु तिर्यग्योनिकक्षुल्लकभवग्रहमचरमसमयस्याधिकृताप्रथमसमयत्वात्तत्र मृतस्य मनुष्यक्षुल्लकभवग्रहणेन व्यवधाने सति तिर्यक्त्वेनोत्पद्यमानस्य प्रथमसमयातिक्रमे वेदितव्यं, अप्रथमसमयान्तरस्यैतावन्मात्रत्वात्, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, देवादिभवानामेतावन्मात्रकालत्वात् । मनुष्यवक्तव्यता तिर्यग्वक्तव्यतेव, नवरं तत्र तिर्यकक्षुल्लकभवग्रहणेन व्यवधानं भावनीयम् । देवसूत्रद्वयं नैरयिकसूत्रद्वयवत् ।

सम्प्रत्येषामेव चतुर्णा प्रथमसमयानां परस्परमल्पबहुत्वमाह—'एएसि णं' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोकाः प्रथमसमयमनुष्याः, श्रेण्यसङ्ख्येयभागमात्रत्वात्, तेभ्यः प्रथमसमयनैरयिका असङ्ख्येयगुणाः, अतिप्रभूतानामेकस्मिन् समये उत्पादसम्भवात्, तेभ्यः प्रथमसमयदेवा असङ्ख्येयगुणाः, व्यन्तरज्योतिष्काणामतिप्रभूततराणामेकस्मिन् समये उत्पादसम्भवात्, तेभ्यः प्रथमसमयतिर्यञ्चोऽसङ्ख्येयगुणाः, इह ये नारकादिगतित्रयादागत्य तिर्यक्त्वप्रथमसमये ये वर्त्तन्ते ते प्रथमसमयतिर्यञ्चो, न शेषाः, ततो यद्यपि प्रतिनिगोदमसङ्ख्येयो भागः सदा विग्रहगतिप्रथमसमयवर्त्ती लभ्यते तथाऽपि निगोदानामपि तिर्यक्त्वान्न ते प्रथमसमयतिर्यञ्चः ते एभ्यः सङ्ख्येयगुणा एव । साम्प्रतमेतेषामेव चतुर्णामप्रथमसमयानां परस्परमल्पबहुत्वमाह—'एएसि ण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोका अप्रथमसमयमनुष्याः, श्रेण्यसङ्ख्येयभागत्वात्, तेभ्योऽप्रथमसमयनैरयिका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः प्रथमवर्गमूले द्वितीय- वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्, तेभ्योऽप्रथमसमयदेवा असङ्ख्येयगुणाः, व्यन्तरज्योतिष्काणामपि प्रभूतत्वात्, तेभ्योऽप्रथम- समयतिर्यग्योनिका अनन्तगुणाः, वनस्पतीनामनन्तत्वात् ।

साम्प्रतमेतेषामेव नैरयिकादीनां प्रत्येकं प्रथमसमयाप्रथमसमयगतमल्पबहुत्वमाह—'एएसि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोकाः प्रथमसमयनैरयिकाः, एकस्मिन् समये सङ्ख्यातीतानामपि स्तोकानामेवोत्पादात्, तेभ्योऽप्रथमसमयनैरयिक असङ्ख्येयगुणाः, चिरकालावस्थायिनां तेषामन्याऽन्योत्पादेनातिप्रभूतभावात् । एवं तिर्यग्योनिकमनुष्यदेवसूत्राण्यपि वक्तव्यानि, नवरं तिर्यगयोनिकसूत्रेऽप्रथमसमयतिर्यग्योनिका अनन्तगुणा वक्तव्याः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनस्पतिजीवानामनन्तत्वात् ।

साम्प्रतमेषामेव नैरयिकादीनां प्रथमाप्रथमसमयानां समुदायेन परस्परमल्पबहुत्वमाह– 'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सर्वस्तोकाः प्रथमसमयमनुष्याः, एकस्मिन् समये सङ्ख्यातीतानामपि स्तोकानामेवोत्पादात्, तेभ्योऽप्रथमसमयमनुष्या असङ्ख्येयगुणाः, चिरकालावस्थायितयाऽतिप्राभूत्येन लभ्यमानत्वात्, तेभ्यः प्रथमसमयनैरयिका असङ्ख्येयगुणाः, अतिप्रभूततराणामेकस्मिन् समये उत्पादसम्भवात्, तेभ्यः प्रथमसमयदेवा असङ्ख्येयगुणाः, व्यन्तरज्योतिष्काणामेकस्मिन्नपि समये प्राचुर्येण कदाचिदुत्पादात् तेभ्यः प्रथमसमयतिर्यग्योनिका असङ्ख्येयगुणाः, नारकवर्जगतित्रयादप्युत्पादसम्भवात्, तेभ्योऽप्रथमसमयनैरयिका असङ्ख्येय गुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः प्रथमवर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्ता वत्प्रमाणत्वात्, तेभ्योऽप्रथमसमयतिर्यग्योनिका अनन्तगुणाः, वनस्पतिजीवानामनन्तत्वात् ।

उपसंहारमाह–प्रतिपत्तिः–७–समाप्ताः 'सेत्त'मित्यादि ॥

प्रतिपत्तिः–८ "नवविधा"

वृ. तदेवमुक्ताऽष्टविधप्रतिपत्तिरधुना क्रमप्राप्ता नवविधप्रतिपत्तिमाह–

मू. (३६७) *तत्थ णं जे ते एवमाहंसु नवविधा संसारसमावण्णगा ते एवमाहंसु–पुढविक्काइया आउक्काइया तेउक्काइया वाउक्काइया वणस्सइकाइया बेइंदिया तेइंदिया चउरिंदिया पंचेंदिया ॥ ठिती सव्वेसिं भा०पुढविक्काइयाणं संचिट्ठणा पुढविकालो जाव वाउक्काइयाणं, वणस्सईणं वणस्सतिकालो, बेइंदिया तेइंदिया चउरिंदिया संखेज्जं कालं, पंचेंदियाणं सागरोवमसहस्सं सातिरेगं ॥ अंतरं सव्वेसिं अनतं कालं, वणस्सतिकाइयाणं असंखेज्जं कालं ।*

अप्पाबहुगं, सव्वत्थोवा पंचिंदिया चउरिंदिया विसेसाहिया तेइंदिया विसेसाहिया बेइंदिया विसेसाहिया तेउक्काइया असंखे० पुढविका० आउ० वाउ० विसेसाहिया वणस्सतिकाइया अनतगुणा । सेत्तं णवविधा संसारसमावण्णगा जीवा पन्नत्ता ॥

वृ. 'तत्थे' त्यादि, तत्र ये ते एवमुक्तवन्तो नवविधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा–पृथिवीकायिका अप्कायिकास्तेजस्कायिका वायुकायिका वनस्पिकायिका द्वीन्द्रियास्त्रिन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाः, अमीषां शब्दार्थभावना प्राग्वत् ॥ साम्प्रतमेतेषां स्थितिनिरूपणार्थं सूत्रनवकमाह–'पुढविक्काइयस्स णं भंते !' इत्यादि, एष सङ्क्षेपार्थ–सर्वत्रापि जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः पृथिवीकायिकस्य द्वाविंशतिवर्षसहस्राणि, अप्कायिकस्य सप्तवर्षसहस्राणि, तेजस्कायिकस्य त्रीणि रात्रिन्दिवानि, वायुकायिकस्य त्रीणि वर्षसहस्राणि, वनस्पतिकायिकस्य दशवर्षसहस्राणि, द्वीन्द्रियस्य द्वादश संवत्सराणि, त्रीन्द्रियस्यैकोनपञ्चाशद् रात्रिंदिवानि, चतुरिन्द्रियस्य षण्मासाः, पञ्चेन्द्रियस्य त्रयस्त्रिंशत्सागरोपमाणि ।

सम्प्रति कायस्थितिप्रतिपादनार्थं सूत्रनवकमाह–'पुढविक्काइए णं भंते !' इत्यादि, सर्वत्र जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पृथिवीकायस्यासङ्ख्येयं कालमसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः, एवमप्तेजोवायुकायिकानामपि द्रष्टव्यं, नवस्पतिकायिकस्यानन्तं कालम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्ता उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽनन्तालोकाः असङ्ख्येयाः पुद्गलपरावर्त्ताः आवलिकाया असङ्ख्येयो भागः, द्वीन्द्रियस्य सङ्ख्येयं कालं, एवं त्रीन्द्रियस्य चतुरिन्द्रियस्य पञ्चेन्द्रियस्य च सागरोपमसहस्रं सातिरेकम् ।

साम्प्रतमन्तरप्रतिपादनार्थमाह– 'पुढविक्काइयस्स ण'मित्यादि, पृथ्वीकायिकस्य भदन्त ! अनन्तरं कालतः कियच्चिरं भवत ?, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्तम्, अन्यत्रान्तर्मुहूर्त्तं स्थित्वा भूयः पृथिवीकायिकत्वेन कस्याप्युत्पादात्, उत्कर्षतोऽनन्तं कालमनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽनन्ता लोकाः असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते च पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, पृथिवीकायादुद्धृत्य वनस्पतिष्वेतावन्तं कालं कस्याप्यवस्थानसम्भवात्, एवमप्तेजोवायुद्वित्रिचतुष्पञ्चेन्द्रियाणामपि वक्तव्यं, वनस्पतिकायिकस्य जघन्यतोऽन्तर्मुहूर्त्तं, तद्भावना प्रागिव, उत्कर्षतोऽसङ्ख्येयं कालमसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्ररतोऽसङ्ख्येया लोकाः, शेषकायेषूत्कर्षतोऽप्येतावन्तं कालमवस्थानसम्भवात् ।

साम्प्रतमेतेषामल्पबहुत्वमाह– 'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम सर्वस्तोकाः पञ्चेन्द्रियाः सङ्ख्येययोजनकोटीकोटीप्रमाणविष्कम्भसूचीप्रमित प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यश्चतुरिन्द्रिया विशेषाधिकाः, विष्कम्भसूच्यास्तेषां प्रभूतसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि त्रीन्द्रिया विशेषाधिकाः, तेषां विष्कम्भसूच्याः प्रभूततरसङ्खयेययोजनकोटीकोटीप्रमाणत्वात्, तेभ्यो द्वीन्द्रिया विशेषाधिकाः, तेषां विष्कम्भसूच्याः प्रभूततमसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्यस्तेजस्कायिका असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः पृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यो वायुकायिका विशेषाधिकाः, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यो वनस्पतिकायिका अनन्तगुणाः, अनन्तलोकाकाशप्रदेशप्रमाणत्वात्

उपसंहारमाह– 'सेत्त'मित्यादि सुगमम् ॥

प्रतिपत्तिः–८ समाप्ता

प्रतिपत्तिः–९ "दसविधा"

वृ. उक्ता नवविधप्रतिपत्ति, सम्प्रति क्रमप्राप्तां दशविधप्रतिपत्तिं प्रतिपादयति–

मू. (३६८) *तत्थ णं जे ते एवमाहंसु दसविधा संसारसमावन्नगा जीवा ते एवमाहंसु तंजहा–पढमसमयएगिंदिया अपढमसमयएगिंदिया पढमसमयबेइंदिया अपढमसमयबेइंदिया जाव पढमसमयपंचिंदिया अपढमसमयपंचिंदिया, पढमसमयएगिंदियस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ? ।*

गोयमा ! जहन्नेणं एक्कं समयं उक्को० एक्क, अपढमसमयएगिंदियस्स जहन्नेणं खुड्डागं भवग्गहणं समऊणं उक्को० बावीसं वाससहस्साइं समऊणाइं, एवं सव्वेसिं पढमसमयिकाणं जहण्णेणं एक्को समओ उक्कोसेणं एक्को समओ, अपढम० जहन्नेणं खुड्डागं भवग्गहणं समऊणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्कोसेणं जा जस्स ठिती सा समऊणा जाव पंचिंदियाणं तेत्तीसं सागरोवमाइं समऊणाइं ।

संचिट्ठणा पढमसमइयस्स जहन्नेणं एक्कं समयं उक्कोसेणं एक्कं समयं, अपढमसमयकाणं जहन्नेणं भवग्गहणं समऊणं उक्कोस्सेणं एगिंदियाणं वणस्सतिकालो, बेइंदियतेइंदियचउरिंदियाणं संखेज्जं कालं पंचेंदियाणं सागरोवमसहस्सं सातिरेगं ।

पढमसमयएगिंदियाणं केवतियं अंतरं होति ?, गोयमा ! जहन्नेणं दो खुड्डागभवग्गहणाइं समऊणाइं, उक्को० वणस्सतिकालो, अपढमएगिंदिय० अंतरं जहन्नेणं खुड्डागं भवग्गहणं समयाहियं उक्को० दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं, सेसाणं सव्वेसिं पढमसमयिकाणं अंतरं जह० दो खुड्डाइं भवगहणाइं समऊणाइं उक्को० वणस्सतिकालो, अपढमसमयिकाणं सेसाणं जहन्नेणं खुड्डागं भवग्गहणं समयाहियं उक्को० वण्णस्सतिकालो ।

पढमसमइयाणं सव्वेसिं सव्वत्थोवा पढमसमयपंचेंदिया पढम० चउरिंदिया विसेसाहिया पढम० तेइंदिया विसेसाहिया प० बेइंदिया विसेसाहिया प० एगिंदिया विसेसाहिया ॥

एवं अपढमसमयिकावि णवरि अपढमसमयएगिंदिया अनंतगुणा । दोण्हं अप्पबहू, सव्वत्थोवा पढमसमय एगिंदिया अपढमसमय एगिंदिया अनंतगुणा ।सेसाणं सव्वत्थोवा पढमसमयिगा अपढम० असंखेज्जगुणा ।

एतेसि णं भंते ! पढमसमयएगिंदियाणं अपढमसमयएगिंदियाणं जाव अपढमसमय-पंचिंदियाण य कयरे २ ?, सव्वत्थोवा पढमसमयपंचेंदिया पढमसमयचउरिंदिया विसेसाहिया पढमसमयतेइंदिया विसेसाहिया एवं हेट्ठामुहा जाव पढमसमयएगिंदिया विसेसाहिया अपढम-समयपंचेंदिया असंखेज्जगुणा अपढमसमयचउरिंदिया विसेसाहिया जाव अपढमसमयएगिंदिया अनंतगुणा ॥

सेत्तं दसविहा संसारसमावन्नगा जीवा पन्नत्ता, सेत्तं संसारसमावन्नगजीवाभिगमे ॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तो दशविधाः संसारसमापन्ना जीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा—प्रथमसमयैकेन्द्रिया अप्रथमसमयैकेन्द्रियाः प्रथमसमयद्वीन्द्रिया अप्रथम-समयद्वीन्द्रियाः प्रथमसमयत्रीन्द्रिया अप्रथमसमयत्रीन्द्रियाः प्रथमसमयचतुरिन्द्रिया अप्रथम-समयचतुरिन्द्रियाः प्रथमसमयपञ्चेन्द्रिया अप्रथमसमयपञ्चेन्द्रियाः प्रथमसमयाप्रथमसमय-व्याख्यानं पूर्ववत् । साम्प्रतमेतेषामेव दशानां क्रमेण स्थितिं निरूपयति—'पढमसमये'त्यादि, प्रथमसमयैकेन्द्रिय- स्य भदन्त ! कियन्तं कालं स्थिति प्रज्ञप्ता ?, भगवानाह—गौतम ! एकं समयं, द्वितीयादिषु समयेषु प्रथमसमयत्वविशेषणस्यायोगात्, एवं प्रथमसमद्वीन्द्रियादिसूत्रेष्वपि वक्तव्यं, अप्रथमसमयैकेनद्रियसूत्रे जघन्यतः क्षुल्लकभवग्रहणं—षटपञ्चाशदधिकावलि-काशतद्वयप्रमाणं समयोनं, समयोनता प्रथमसमयेऽप्रथमसमयत्वायोगात्, उत्कर्षतो द्वाविंशतिवर्षसहस्राणि समयोनानि, प्रथमसमयेन हीनत्वात्, अप्रथमसमयद्वीन्द्रियसूत्रे जघन्यं पूर्ववत्, उत्कर्षतो द्वादश संवत्सराः समयोनाः, अप्रथमसमयत्रीन्द्रियसूत्रेऽपि जघन्यं तथैव, उत्कर्षत एकोनपञ्चाशद्रात्रिन्दिवानि समयोनानि, अप्रथमसमयचतुरिन्द्रियसूत्रेऽपि जघन्यं तथैव, उत्कर्षतः षण्मासाः समयोनाः, अप्रथमसमयपञ्चेन्द्रियसूत्रे जघन्यं प्राग्वत्, उत्कर्षतस्त्रयस्त्रिशत्साग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोपमाणि समयोनानि, समयोनता सर्वत्रापि प्रथमसमयेन हीना प्रतिपत्तव्या।

साम्प्रतमेतेषां क्रमेण कायस्थितिमाह–'पढमसमये' इत्यादि, प्रथमसमयैकेन्द्रियो भदन्त प्रथमसमयैकेन्द्रिय इति–प्रथमसमयैकेन्द्रियत्वेन कालतः 'कियच्चिरं' कियन्तं कालं यावद्भवति ?, भगवानाह–गौतम ! एकं समयं तत ऊर्ध्वं प्रथमसमयत्वायोगात्, एवं प्रथमसमयद्वीन्द्रियादिष्वपि वाच्यं। अप्रथमसमयैकेन्द्रियसूतरे जघन्यतः क्षुल्लकभवग्रहणं समयोनं, तत ऊर्ध्वमन्यत्र कस्याप्युत्पादात्, उत्कर्षतोऽनन्तं कालं, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽनन्ता लोका असङ्ख्येयाः पुद्गलापरावर्त्ताः, ते च पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, एतावन्तं कालं वनस्पतिष्ववस्थानसंभवात्। अप्रथमसमयद्वीन्द्रियसूत्रे जघन्यं तथैव, उत्कर्षतः सङ्ख्येयं कालं, तत ऊर्ध्वमवश्यमुद्वर्त्तनाद्, एवमप्रथमसमयत्रिचतुरिन्द्रियसूत्रे अपि वक्तव्ये, अप्रथमसमयपञ्चेन्द्रियसूत्रे जघन्यं तथैव, उत्कर्षतः सातिरेकं सागरोपमसहस्रं, देवादिभवभ्रमणस्य सातत्येनोत्कर्षतोऽप्येतावत्कालप्रमाणत्वात्।

साम्प्रतमन्तरं चिचिन्तयिरुषाराह–'पढमसमये'त्यादि, प्रथमसमयैकेन्द्रियस्य भदन्त ! अन्तरं कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! जघन्यतो द्वे क्षुल्लकभवग्रहणे समयोने, ते च क्षुल्लकभवग्रहणे द्वीन्द्रियादिभवग्रहणव्यवधानतः पुनरेकेन्द्रियेष्वेवोत्पद्यमानस्यावसातव्ये, तथाहि–एकं प्रथमसमयोनमेकेन्द्रियक्षुल्लकभवग्रहणेव, द्वितीयं संपूर्णमेव द्वीन्द्रियाद्यन्यतमक्षुल्लकभवग्रहणमिति, उत्कर्षतो वनस्पतिकालः, स चानन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽनन्ता लोकाः असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते च पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भाग इत्येवंस्वरूपः, तथाहि–एतावन्तं हि कालं सोऽप्रथमसमयो नतु प्रथमसमयः, ततो द्वीन्द्रियादिषु क्षुल्लकभवग्रहणवस्थायैकेन्द्रियत्वेनोत्पद्यमानः प्रथमे समये प्रथमसमय इति भवत्युत्कर्षतो वनस्पतिकालोऽन्तरं, अप्रथमसमयैकेन्द्रियस्य जघन्यमन्तरं क्षुल्लकभवग्रहणं समयाधिकं।

–तच्चैकेन्द्रियभवगतचरमसमयस्याप्यप्रथमसमयत्वात्तत्र मृतस्य द्वीन्दरियादिक्षुल्लकभवग्रहणेन व्यवधाने सति भूय एकेन्द्रियत्वेनोत्पन्नस्य प्रथमसमयातिक्रमे वेदितव्यं, एतावन्तं कालमप्रथमसमयान्तरभावात्, उत्कर्षतो द्वे सागरोपमसहस्रे सङ्ख्येयवर्षाभ्यधिके, द्वीन्द्रियादिभवभ्रमणस्योत्कर्षतोऽपि सातत्येनैतावन्तं कालं सम्भवात्, प्रथमसमयद्वीन्द्रियस्य जघन्येनान्तरं द्वे क्षुल्लकभवग्रहणे समयोने, तद्यथा–एकं द्वीन्द्रियक्षुल्लकभवग्रहणमेव प्रथमसमयोनं, द्वितीयं सम्पूर्णमिवैकेन्द्रियत्रीन्द्रियाद्यन्यतमक्षुल्लकभवग्रहणं, (मिति, एवं प्रथमसमयत्रिचतुष्पञ्चेन्द्रियाणामप्यन्तरं वेदितव्यं, अप्रथमसमयद्वीन्द्रियस्य जघन्येनान्तरं क्षुल्लकभवग्रहणं समयाधिकं तच्चैकेन्द्रियादिषु) एवं प्रथमसमयत्रीन्द्रिय क्षुल्लकभवं स्थित्वा भूयो द्वीन्द्रियत्वेनोत्पन्नस्य प्थमसमयातिक्रमे वेदितव्यं, उत्कर्षतोऽनन्तं कालमनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽनन्ता लोका असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते च पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, एतावांश्च द्वीन्द्रियभवादुद्धुत्यैतावन्तं कालं वमस्पतिषु स्थित्वा भूयो द्वीन्द्रियत्वेनोत्पन्नस्य प्रथमसमयातिक्रमे भावनीयः, एवमप्रथमसमयत्रिचतुष्पञ्चेन्द्रियाणामपि जघन्यमुत्कृष्टं चान्तरं वक्तव्यं, भावनाप्येतदनुसारेण स्वयं भावनीया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतमेतेषामेकेन्द्रियादिप्रथमसमयानां परस्परमल्पबहुत्वमाह—'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोकाः प्रथमसमयपञ्चेन्द्रियाः, अल्पानामेवैकस्मिन् समये तेषामुत्पादात्, तेभ्यः प्रथमसमयचतुरिन्द्रिया विशेषाधिकाः, प्रभूतानां तेषामेकस्मिन् समये उत्पादसम्भवात्, तेभ्यः प्रथमसमयत्रीन्द्रिया विशेषाधिकाः, प्रभूततराणां तेषामेकस्मिन् समये उत्पादात्, तेभ्यः प्रथमसमयद्वीन्द्रिया विशेषाधिकाः, प्रभूतानां तेषामेकस्मिन् समये उत्पादात्, तेभ्यः प्रथमसमयैकेन्द्रिया विशेषाधिकाः,इह ये द्वीन्द्रियादिभ्य उद्धृत्य एकेन्द्रियत्वेनोत्पद्यन्ते त एव प्रथमे वर्त्तमानाः प्रथमसमयैकेन्द्रिया नान्ये, ते च प्रथमसमयद्वीन्द्रियेभ्यो विशेषाधिका एव नासङ्ख्येया नानन्तगुणा इति ।

साम्प्रतमप्रथमसमयानामेतेषामल्पबहुत्वाह—'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोका अप्रथमसमयपञ्चेन्द्रियाः, तेभ्योऽप्रथमसमयचतुरिन्द्रिया विशेषाधिकाः, तेभ्योऽप्रथमसमयत्रीन्द्रिया विशेषाधिकाः, तेभ्योऽप्रथमसमयद्वीन्द्रिया विशेषाधिकाः, अत्र युक्तिर्नवविधप्रतिपत्तौ सामान्यतो द्वित्रिचतुष्पञ्चेन्द्रियाणां बहुत्वचिन्तायामवि भावनीया, तेभ्योऽप्रथमसमयैकेन्द्रिया अनन्तगुणा वनस्पतिजीवानामनन्तत्वात् ।

साम्प्रतमेकेन्द्रियादीनां प्रत्येकं प्रथमसमयाप्रथमसमयानां परस्परमल्पबहुत्वमभिधित्सुः प्रथमत एकेन्द्रियानां तावदाह—'एएसि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोकाः प्रथमसयैकेन्द्रियाः, अल्पानामेवैकस्मिन् समये द्वीन्द्रियादिभ्य आगतानामुत्पादात्, तेभ्योऽप्रथमसमयैकेन्द्रिया अनन्तगुणा वनस्पतीनामनन्तत्वात् । द्वीन्द्रियसूत्रे सर्वस्तोकाः प्रथमसमयद्वीन्द्रिया अप्रथमसमयद्वीन्द्रिया असङ्ख्येयगुणाः, द्वीन्द्रियाणां सर्वसङ्ख्यया ऽप्यसङ्ख्यातत्वात्, एवं त्रिचतुष्पञ्चेन्द्रियसूत्राण्यपि वक्तव्यानि ।

साम्प्रतमेतेषां दशानामपि परस्परमल्पबहुत्वमाह—'एएसि ण'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सर्वस्तोकाः प्रथमसमयपञ्चेन्द्रियाः, तेभ्यः प्रथमसमयचतुरिन्द्रिया विशेषाधिकाः, तेभ्यः प्रथमसमयत्रीन्द्रिया विशेषाधिकाः, तेभ्यः प्रथमसमयद्वीन्द्रिया विशेषाधिकाः, तेभ्यः प्रथमसयैकेन्द्रिया विशेषाधिकाः, अत्र युक्ति प्रथमाल्पबहुत्ववत्, तेभ्योऽप्रथमसमयपञ्चेन्द्रिया असङ्ख्येयगुणाः, अप्रथमसमयैकेन्द्रिया हि द्वीन्द्रियादिभ्य उद्धृत्यैकेन्द्रियभवप्रथमसमये वर्त्तमानास्ते च स्तोका एव, पञ्चेन्द्रियास्त्वप्रथमसमयवर्त्तिनश्चिरकालावस्थायितया गतचतुष्टयेऽप्यतिप्रभूतास्ततोऽसङ्ख्येयगुणाः, तेभ्योऽप्रथमसमयचतुरिन्द्रिया विशेषाधिकाः, तेभ्योऽप्रथमसमयत्रीन्द्रिया विशेषाधिकाः, तेभ्योऽप्रथमसमयद्वीन्द्रिया विशेषाधिकाः, तेभ्योऽप्रथमसमयैकन्द्रिया अनन्तगुणाः, अत्र युक्तिर्द्वितीयाल्पबहुत्ववत् ।

उपसंहारमाह—'सेत्तं दसविहा संसारसमापन्ना जीवा' । मूलोपसंहारमाह—'सेत्तं संसारसमापन्नजीवाभिगमे' ॥

प्रतिपत्तिः—९ समाप्ता

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता जीवाजीवाभिगम सूत्रे नवमप्रतिपत्याः मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमा सर्वजीवाप्रतिपत्तिः

वृ. तदेवमुक्तः संसारसमापन्नजीवाभिगमः, साम्प्रतं संसारासंसारसमापन्नजीवाभिगममभिधित्सुराह—

मू. (३६९) *से किं तं सव्वजीवाभिगमे ?, सव्वजीवेसु णं इमाओ नव पडिवत्तीओ एवमाहिज्जंति एगे एवमाहंसु—दुविहा सव्वजीवा पन्नत्ता जाव दसविहा सव्वजीवा पन्त्ता ॥ तत्थ जे ते एवमाहंसु दुविहा सव्वजीवा पन्त्ता ते एवमाहंसु, तंजहा—सिद्धा य असिद्धा य इति*

सिद्धे णं भंते ! सिद्धेत्ति कालतो केवचिरं होति ?, गोयमा ! सातीअपज्जवसिए । असिद्धे णं भंते ! असिद्धेत्ति० ?, गोयमा ! असिद्धे दुविहे पण्णत्ते, तंजहा—अनाइए वा अपज्जविए अनातीए वा सपज्जवसिए ।

सिद्धस्स णं भंते ! केवतिकालं अंतरं होति ?, गोयमा ! सातियस्स अपज्जव सियस्स नत्थि अंतरं ॥ असिद्धस्स णं भंते ! केवइयं अंतरं होइ ?, गोयमा ! अनातियस्स अपज्जवसियस्स नत्थि अंतरं, अणातियस्स सपज्जवसियस्स नत्थि अंतरं । एएसि णं भंते ! सिद्धाणं असिद्धाण य कयरे २ ?, गोयमा ! सव्वत्थोवा सिद्धा असिद्धा अनंतगुणा ।

वृ. 'से किं त'मित्यादि, अथ कोऽसौ सर्वजीवाभिगमः ?, सर्वजीवाः संसारिमुक्तभेदाः, गुरुराह—'सव्वजीवेसु ण'मित्यादि, सर्वजीवेषु सामान्येन 'एताः' अनन्तरं वक्ष्यमाणा न व प्रतिपत्तयः 'एवम्' अनन्तरमुपदर्श्यमानेन प्रकारेणाख्यायन्ते, ता एवाह—एके एवमुक्तवन्तो—द्विविधाः सर्वजीवाः प्रज्ञप्ताः, एक एवमुक्तवन्तस्त्रवधाः सर्वजीवाः प्रज्ञप्ताः, एवं यावदेके एवमुक्तवन्तो दशविधाः सर्वजीवाः प्रज्ञप्ताः । 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तो द्विविधाः सर्वजीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा—सिद्धाश्चासिद्धाश्च, सितंबद्धमष्टप्रकारं कर्म्म ध्मातं—भस्मीकृतं यैस्ते सिद्धाः, पृषोदरादित्वादिष्ट-रूपनिष्पत्ति, निर्दग्धकर्म्मेन्धना मुक्ता इत्यर्थ, 'असिद्धाः' संसारिणः, चशब्दौ स्वगतानेकभेद-संदर्शनार्थौ ।

सम्प्रति सिद्धस्य कायस्थितिमाह—'सिद्धे ण'मित्यादि, सिद्धो भदन्त ! सिद्ध इति—सिद्धत्वेन कालतः कियच्चिरं भवति?, भगवानाह—गौतम ! सिद्धः सादिकोऽपर्यवसितः, तत्र सादिता संसारिवप्रमुक्तिसमये सिद्धत्वभावात्, अपर्यवसितता सिद्धत्वच्युतेरसम्भवात् ॥ असिद्धविषयं प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! असिद्धो द्विविधः प्रज्ञप्तस्तद्यथा—अनादिकोऽपर्यवसितः अनादिकः सपर्यवसितः, तत्र यो न जातुचिदपि सेत्स्यति अभव्यत्वात्तथाविधसामग्र्यभावाद्वा सोऽनाद्यपर्यवसितः, यस्तु सिद्धिं गतः सोऽनादिसपर्यवसितः ।

साम्प्रतमन्तरं चिचिन्तयिषुराह—'सिद्धस्स णं भंते' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! सिद्धस्य सादिकस्यापर्यवसितस्य नास्त्यन्तरम्, अत्र 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मिति न्यायात् हेतौ षष्ठी, ततोऽयमर्थः—यस्मात्सिद्धः सादिरपर्यवसितस्तस्मान्नास्त्यन्तरम्, अन्यथाऽपर्यवसितत्वायोगात् ॥ असिद्धसूत्रे असिद्धस्यानादिकस्यापर्यवसितस्य नास्त्यन्तरम्, अपर्यवसितत्वादेवासिद्धत्वाप्रच्युतेः, अनादिकसपर्यवसितस्यापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नास्त्यन्तरं, भूयोऽसिद्धत्वायोगात् ।

साम्प्रतमेतेषामेवाल्पबहुत्वमाह–'एएसि णं'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम सर्वस्तोकाः सिद्धाः असिद्धा अनन्तगुणाः, निगोदजीवानमतिप्रभूतत्वात् ॥

मू. (३७०) *अहवा दुविहा सव्वजीवा पन्नत्ता, तंजहा–सइंदिया चेव अनिंदिया चेव । सइंदिए णं भंते ! कालतो केवचिरं होइ ?, गोयमा ! सइंदिए दुविहे पन्नत्ते–अनातीए वा अपज्जवसिए अनाईए वा सपज्जवसिए, अनिंदिए सातीए वा अपज्जवसिए, दोण्हवि अंतरं नत्थि*

सव्वत्थोवा अनिंदिया सइंदिया अनंतगुणा । अहवा दुविहा सव्वजीवा पन्नत्ता तंजहा–सकाइया चेव अकाइया चेव एवं चेव, एवं सजोगी चेव अजोगी चेव तहेव, [एवं सलेस्सा चेव अलेस्साचेव, ससरीरा चेव असरीरा चेव] संचिट्ठणं अंतरं अप्पाबहुयं जहा सइन्द्रियाणं

अहवा दुविहा सव्वजीवा पन्नता, तंजहा–सवेदगा चेव अवेदगा चेव ॥ सवेदए णं भंते सवे० ? गोयमा ! सवेयए तिविहे पन्नत्ते, तंजहा–अनादीए अपज्जवसिते अणादीए सपज्जवसिए साइए सप्पज्जवसिए, तत्थ णं जे से साइए सपज्जवसिए से जह० अंतोमु० उक्को० अनंतं कालं जाव खेत्तओ अवड्ढं पोग्गलपरियट्टं देसूणं । अवेदए णं भंते ! अवेयएत्ति कालओ केवचिरं होइ ?, गोयमा ! अवेदए दुविहे पन्नत्ते, तंजहा–सातीए वा अपज्जवसिते साइए वा सपज्जवसिए, तत्थ णं जे से सादीए सपज्जवसिते से जहण्णेणं एक्कं समयं उक्को० अंतोमुहुत्तं ।

सवेयगस्स णं भंते ! केवतिकालं अंतरं होइ ?, अनादियस्स अपज्जवसियस्स नत्थि अंतरं, अनादियस्स सपज्जवसियस्स नत्थि अंतरं, सादीयस्स सपज्जवसियस्स जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं । अवेदगसस णं भंते ! केवतियं कालं अंतरं होइ ?, सातीयस्स अपज्जवसियस्स नत्थि अंतरं, सातीयस्स सपज्जवसियस्स जह० अंतोमु० उक्कोसेणं अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं ।

अप्पाबहुगं, सव्वत्थोवा अवेयगा सवेयगा अनंतगुणा । एवं सकसाई चेव अकसाई चेव २ जहा सवेयके तहेव भाणियव्वे । अहवा दुविहा सव्वजीवा–सलेसा य अलेसा य जहा असिद्धा सिद्धा, सव्वत्थोवा अलेसा सलेसा अनंतगुणा ।

वृ. अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–सेन्द्रियाश्च अनिन्द्रियाश्च, तत्र सेन्द्रियाः–संसारिणः अनिन्द्रियाः–सिद्धाः, उपाधिभेदात्पृथगुपन्यासः । एवं सकायिकादिष्वपि भावनीयं, तत्र सेन्द्रियस्य कायस्थितिरन्तरं चासिद्धवद्वक्तव्यं, अनिन्द्रियस्य सिद्धवत्, तच्चैवम्–'सइंदिए णं भंते ! सइंदियत्ति कालतो केवचिरं होइ ?, गोयमा ! सइंदिए दुविहे पन्नत्ते, तंजहा–अनाइए वा अपज्जवसिए अनाइए वा सपज्जवसिए, अनिंदिए णं भंते ! अनिंदिएत्ति कालतो केवचिरं होइ ?, गोयमा ! साइए अपज्जवसिए, सइंदियस्स णं भंते ! कालओ केवचिरं अंतरं होइ ?, गोयमा ! अनाइयस्स अपज्जवसियस्स नत्थि अंतरं, अनाइयस्स सपज्जवसियस्स नत्थि अंतरं, अनिंयस्स णं भंते ! अंतरं कालतो केवचिरं होइ ?, गोयमा ! साइयस्स अपज्जवसियस्स नत्थि अंतरं' इति, अल्पबहुत्वसूत्रं पूर्ववद्भावनीयं ।

एवं कायस्थित्यन्तराल्पबहुत्वसूत्राणि सकायिकाकायिकविषयाणि सयोग्ययोगिविषया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ण्यपि भावयितव्यानि, तच्चैवम्–'अहवा दुविहा सव्वजीवा पन्नत्ता, तंजहा–सकाइया चेव अकाइया चेव, एवं सजोगी चेव अजोगी चेव तहेव, एवं सलेस्सा चेव अलेस्सा चेव ससरीरा पन्नत्ता, तंजहा–सकाइया चेव अकाइया चेव,एवं सजोगी चेव अजोगी चेव तहेव, एवं सलेस्सा चेव अलेस्सा चेव ससरीरा चेवा असरीरा चेव संचिट्ठणं अंतरं अप्पाबहुयं जहा सकाइयाणं।

भूयः प्रकारान्तरेण द्वैविध्यमाह–'अहवे'त्यादि, अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–सवेदकाश्च अवेदकाश्च। तत्र सवेदकस्य कायस्थितिमाह–'सवेदए णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सवेदकस्त्रिविधः प्रज्ञप्तस्तद्यथा–अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्रानाद्यपर्यवसितोऽभव्यो भव्यो वा तथाविधसामग्रयभवान्मुक्तिमगन्ता, उक्तश्च–"भव्वावि न सिज्झंति केइ" इत्यादि, अनादिसपर्यवसितो भव्यो मुक्तिगामी पूर्वमप्रतिपन्नोपशमश्रेणि, सादिसपर्यवसितः पूर्वं प्रतिपन्नोपशमश्रेणि, उपशमश्रेणिं प्रतिपद्य वेदोपशमोत्तरकालावेदकत्वमनुभूय श्रेणसमाप्तौ भवक्षयादपान्तराले मरणतो वा प्रतिपततो वेदोदये पुनः सवेदकत्वोपपत्तेः, तत्र योऽसौ सादिसपर्यवसितो जघन्येनान्तर्मुहूर्त्त श्रेणिसमाप्तौ सवेदकत्वे सति पुनरन्तर्मुहूर्त्तेन श्रेणिप्रतिपत्तावेदकत्वभावात्, आह–किमेकस्मिन् जन्मनि वेलाद्वयमुपशम-श्रेणिलाभो भवति ? यदेवमुच्यते, सत्यमेतद्भवति, तथा चाह मूलटीकाकारः–

"नैकस्मिन् जन्मनि उपशमश्रेणि क्षपकश्रेणिश्च जायते, उपशमश्रेणिद्वयं तु भवत्येवे"ति, तत एवमुपपद्यते–जघन्येनान्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं, तमेव कालक्षेत्राभ्यां निरूपयति–अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः एषा कालतो मार्गणा, क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्त देशोनम्, एतावतः कालादूर्ध्वं पूर्वप्रतिपन्नोपशमश्रेणेरवश्यं मुक्त्यासन्नतया श्रेणिप्रतिपत्तावेदकत्वभावात्।

'अवेदए णं भंते !' इत्यादि प्रश्नसूत्रं पाठसिद्धं, भगवानाह–गौतम ! अवेदको द्विविधः प्रज्ञप्तस्तद्यथा–सादिको वाऽपर्यवसितः [समयानन्तरं] क्षीणवेदः, सादिको वा सपर्यवसित–उपशान्तवेदः, तत्र योऽसौ सादिसपर्यवसितोऽवेदकः स च जघन्येनैकं समयं, उपशमश्रेणिं प्रतिपन्नस्य वेदोपशमसमयानन्तरेऽपि मरणे पुनः सवेदकत्वोपपत्तेः, उत्कर्षतोऽन्तर्मुहूर्त्त-मुपशान्तवेदश्रेणिकालं, तत ऊर्द्ध श्रेणेः प्रतिपतने नियमतः सवेदकत्वभावात्।

अन्तरं प्रतिपिपादयिषुराह–'सवेदगस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम अनादिकस्यापर्यवसितस्य सवेदकस्य नास्त्यन्तरं, अपर्यवसिततया सदा तद्भावाप-रित्यागात्, अनादिकस्य सपरयवसितस्यापि नास्त्यन्तरं, अनादसपर्यवसितो ह्यपान्तराले उपशमश्रेणिमप्रतिपद्य भावी क्षीणवेदो न च क्षीणवेदस्य पुनः सवेदकत्वं प्रतिपाताभावात्, सादिकस्य सपर्यवसितस्य सवेदकस्य जघन्येनैकं समयमन्तरं, द्वितीयवारमुपशमश्रेणिं प्रतिपन्नस्य वेदोपशमसमयानन्तरं मरणसम्भवात्, उत्कर्षेणान्तर्मुहूर्त्तं द्वितीयं वारमुपशमश्रेणिं प्रतिपन्नस्योप-शान्तवेदस्य श्रेणिसमाप्तेरूर्द्ध पुनः सवेदकत्वभावात्।

अवेदकसूत्रे सादिकस्यपर्यवसितस्यावेदकस्य नास्त्यन्तरं, क्षीणवेदस्य पुनः सवेदत्वाभावात्, वेदानां निर्मूलकाषंकषितत्वात्, सादिकस्य सपर्यवसितस्य जघन्येनान्तर्मुहूर्त्तं, उपशमश्रेणिस-माप्तौसवेदकत्वे सति पुनरन्तर्मुहूर्त्तेनोपशमश्रेणिलाभतोऽवेदकत्वोपपत्तेः, उत्कर्षतोऽनन्तं कालं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्ता उत्सर्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्त देशोनं, एकवारमुपश्रेणिं प्रतिपद्य तत्रावेदको भूत्वा श्रेणिसमाप्तौ सवेदकत्वे सति पुनरेतावता कालेन श्रेणिप्रतिपत्ताव-देकत्वोपपत्तेः ।। अल्पबहुत्वमाह–'एएसि णं भंते ! जीवा' इत्यादि पूर्ववत् ।

प्रकारान्तरेण द्वैविध्यमाह–'अहवे'त्यादि, अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–सकषायिकाश्च अकषायिकाश्च, सह कषाया येषां यैर्वा ते सकषायाः त एव सकषायिकाः, प्राकृतत्वात् स्वार्थे इकप्रत्ययः, एवं न विद्यन्ते कषाया येषां ते अकषायाः २ एवाकषायिकाः ।। सम्प्रति कायस्थितिमाह–'सकसाइयस्से'त्यादि, सकषायिकस्य त्रिविधस्यापि संचिट्ठणा कायस्थितिरन्तरं च यथा सवेदकस्य, अकषायिकस्य द्विविधभेदस्यापि कायस्थितिरन्तरं च यथाऽवेदकस्य । तच्चैवम्–'सकसाइए णं भंते ! सकसाइयत्ति कालतो केवचिरं होइ ?, गोयमा ! सकसाइए तिविहे पन्नत्ते, तंजहा–अनाइए वा अपज्जवसिए अनाइए वा सपज्जवसिए साइए वा सपज्जवसिए, तत्थ जे से साइए सपज्जवसिए से जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंता ओसप्पिणिउस्सप्पिणीओ कालतो खेत्ततो अवड्ढपोग्गलपरियट्टं देसूणं, अकसाइए णं भंते ! अकसाइयत्ति कालओ केवचिरं होइ ?, गोयमा ! अकसाइए दुविहे पन्नत्ते, तंजहा–साइए वा अपज्जवसिए साइए वा सपज्जवसिए, तत्थ णं जे साइए सपज्जवसिए से जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं ।

सकसाइयस्स णं भंते ! अंतरं कालतो केवचिरं होइ ?, गोयमा ! अनाइयस्स अपज्जवसियस्स नत्थि अंतरं, अनाइयस्स सपज्जवसियस्स नत्थि अंतरं, साइयसस सपज्जवसियस्स जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं, अकसाइयस्स णं भंते ! केवइयं कालं अंतरं होइ ?, साइयस्सं अपज्जवसियस्स नत्थि अंतरं, साइयस्स सपज्जवसियस्स जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूण'मिति, अस्य व्याख्या पूर्ववत् । अल्पबहुत्वमाह–'एएसि णं भंते ! जीवाणं सकसाइयाण'मित्यादि प्राग्वत् ।। प्रकारान्तरेण द्वैविध्यमाह–

मू. (३७१) *नाणी चेव अन्नाणी चेव ।। नाणी णं भंते ! कालओ० ?, २ दुविहे पन्नत्ते–सातीए वा अपज्जवसिए सादीए वा सपज्जवसिए, तत्थ णं जे से सादीए सपज्जवसिते से जहन्नेणं अंतोमुहुत्तं उक्कोसेणं छावट्ठिसागरोवमाइं सातिरेगाइं, अन्नाणी जहा सवेदया ।*

नाणिस्स अंतरं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अवड्ढं पोग्गलपरियट्टं देसूणं । अन्नाणियस्स दोण्हवि आदिल्लाणं नत्थि अंतरं, सादीयस्स सपज्जवसियस्स जहन्नेणं अंतोमु० उक्कोसेणं छावट्ठिं सागरोवमाइं साइरेगाइं । अप्पाबहु सव्वत्थोवा नाणी अन्नाणी अनंतगुणा ।

अहवा दुविहा सव्वजीवा पन्नत्ता–सागारोवउत्ता य अनागारोवउत्ता य, संचिट्ठणा अंतरं च जहन्नेणं उक्कोसेणवि अन्तोमुहुत्तं, अप्पाबहु सागारो० संखे० ।।

वृ. 'अहवे'त्यादि, अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–सलेश्याश्च अलेश्याश्च, तत्र सलेश्यस्य कायस्थितिरन्तरं चासिद्धस्येव, अलेश्यस्य कायस्थितिरन्तरं च यथा सिद्धस्य । अल्पबहुत्वं प्राग्वत् । भूयः प्रकारान्तरेण द्वैविध्यमाह–'अहवे'त्यादि, अथवा द्विविधाः सर्वजीवाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञप्तास्तद्यथा–ज्ञानिनश्च अज्ञानिनश्च, ज्ञानमेषामस्तीति ज्ञानिनः न ज्ञानिनोऽज्ञानिनः मिथ्याज्ञाना इत्यर्थ

सम्प्रति कायस्थितिमाह–'णाणी ण' मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! ज्ञानी द्विविधः प्रज्ञप्तस्तद्यथा–सादिको वाऽपर्यवसितः, स च केवली केवलज्ञानस्य साद्यसपर्यवसितत्वात्, सादिको वा सपर्यवसितो मतिज्ञानादिज्ञानान्, मतिज्ञानादीनां छाद्मस्थिकतया सादिसपर्यवसितत्वात्, 'तत्थ ण' मित्यादि, तत्र योऽसौ सादिकः सपर्यवसितः स जघन्येनान्तर्मुहूर्तं, सम्यक्त्वस्य जघन्यत एतावन्मात्रकालत्वात् सम्यक्त्ववतश्च ज्ञानित्वात्, यथोक्तम्–"सम्यग्दृष्टेर्ज्ञानं मिथ्यादृष्टेर्विपर्यास" इति, उत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि, सम्यग्दर्शनकालस्याप्युत्कर्षत एतावन्मात्रत्वात्, अप्रतिपतितसम्यक्त्वस्य विजयादिगमनश्रवणात्, तथा च भाष्यम्–

॥ १ ॥ "दो वारे विजयाइसु गयस्स तिन्निऽच्चुए अहव ताइं ।
अइरेगं नरभवियं नानाजीवाण सव्वद्धा ॥"

'अन्नाणी णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! अज्ञानी त्रिविधः प्रज्ञप्तस्तद्यथा–अनादिको वाऽपर्यवसितः अनादिको वा सपर्यवसितः सादिको वा सपर्यवसितः, तत्रनाद्यपर्यवसितो यो न जातुचिदपि सिद्धिं गन्ता, अनादिसपर्यवसितो योऽनादिमिथ्यादृष्टि सम्यक्त्वमासाद्याप्रतिपतितसम्यक्त्व एव क्षपकश्रेणिं प्रतिपत्स्यते, सादिसपर्यवसितः सम्यग्दृष्टिर्भूत्वा जातमिथ्यादृष्टिः, स जघन्येनान्तर्मुहूर्त्त सम्यक्त्वात् प्रतिपत्य पुनरन्तरर्मुहूर्त्तेन कस्यापि सम्यग्दर्शनावापतिसम्भवात्, उत्कर्षेणानन्तं कालं, अनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽपार्द्ध पुद्गलपरावर्त्त देशोनं ।

साम्प्रतमन्तरं प्रतिपादयति–'नाणिस्स णं भंते !' इत्यादि, ज्ञानिनो भदन्त ! अनन्तरं कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! सादिकस्यापर्यवसितस्य नास्त्यन्तरं, अपर्यवसितत्वेन सदा तद्भावापरित्यागात्, सादिकस्य सपर्यवसितस्य जघन्यतोऽन्तर्मुहूर्त्तं, एतावता मिथ्यादर्शनकालेन व्यवधानेन भूयोऽपि ज्ञानभावात्, उत्कर्षेण अनन्तं कालं, अनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्तदेशोनं, सम्यगदृष्टेः सम्यक्त्वाप्रतिपतितस्यैतावन्तं कालं मिथ्यात्वमनुभूय तदनन्तरमवश्यं सम्यक्त्वासादनात् ।

'अन्नाणिस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! अनाद्यपर्यवसितस्य नास्त्यन्तरं, अपर्यवसितत्वादेव, अनादिसपर्यवसितस्यापि नास्त्यन्तरं अवाप्तकेवलज्ञानस्य प्रतिपाताभावात्, सादिसपर्यवसानस्य जघन्येनान्तर्मुहूर्त्तं, जघन्यस्य सम्यग्दर्शनकालस्यैतावन्मात्रत्वात्, उत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि, एतावतोऽपि कालादूर्द्ध सम्यग्दर्शनप्रतिपाते सत्यज्ञानाभावात् । अल्पबहुत्वसूत्रं प्राग्वत् । प्रकारान्तरेण द्वैविध्यमाह–'अहवे' त्यादि, अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–साकारोपयुक्ताश्च अनाकारोपयुक्ताश्च

सम्प्रति कायस्थितिमाह–'सागारोवउत्ता णं भंते !' इह छद्मस्था एव सर्वजीवा विवक्षिता न केवलिनोऽपि 'विचित्रत्वात् सूत्रगते' रिति द्वयानामपि कायस्थितावन्तरे च जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तं, अन्यथा केवलिनामुपयोगस्य साकारस्यानाकारस्य चैकसामयिकत्वात् कायस्थितावन्तरे चैकसामयिकोऽप्युच्येत । अल्पबहुत्वचिन्तायां सर्वस्तोका अनाकारोपयुक्ताः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनाकारोपयोगस्य स्तोककालतया पृच्छासमये तेषां स्तोकानामेवावाप्यमानत्वात्, साकारोपयुक्ताः सङ्ख्येयगुणाः, अनाकारोपयोगाद्धातः साकारोपयोगाद्धायाः सङ्ख्येयगुणत्वात् ॥

मू. (३७२) *अहवा दुविहा सव्वजीवा पन्नत्ता, तंजहा—आहारगा चेव अनाहारगा चेव आहारए णं भंते! जाव केवचिरं होति?, गोयमा! आहारए दुविहे पन्नत्ते, तंजहा—छउमत्थआहारए य केवलिआहारए य, छउमत्थआहारए णं जाव केवचिरं होति ?, गोयमा ! जहन्नेणं खुड्डागं भवग्गहणं दुसमऊणं उक्को० असंखेज्जं कालं जाव काल० खेकेत्तओ अंगुलस्स असंखेज्जतिभागं केवलिआहारए णं जाव केवचिरं होइ ?, गोयमा ! जह० अंतोमु० उक्को० देसूणा पुव्वकोडी ॥*

अनाहारए णं भंते ! केवचिरं० ?, गोयमा ! अनाहारए दुविहे प० तंजहा—छउमत्थअनाहारए य केवलिअनाहारए य, छउमत्थअनाहारए णं जाव केवचिरं होति ?, गोयमा जहन्नेणं एक्कं समयं उक्कोस्सेणं दो समया । केवलिअनाहारए दुविहे पन्न्ते, तंजहा—सिद्धकेवलिअनाहारए य भवत्थकेवलिअनाहारए य ।

सिद्धकेवलियणाहाए णं भंते ! कालओ केवचिरं होति ?, सातिए अपज्जवसिए ॥ भवत्थकेवलियनाहारए णं भंते ! कइविहे प० भवत्थकेवलिय० दुविहे प०—सजोगभवत्थकेवलिअनाहारए य अजोगिभवत्थकेवलिअनाहारए य । सजोगिभवत्थकेवलिअनाहारए णं भंते! कालओ केवचिरं?, अजहन्नमणुक्कसेणं तिन्नि समया। अजोगिभवत्थकेवलि० जह० अंतो० उक्को० अंतोमुहुत्तं ।

छउमत्थआहारगस्स केवतियं कालं अंतरं ?, गोयमा ! जहन्नेणं एक्कं समयं उक्को० दो समया। केवलिआहारगस्स अंतरं अजहन्नमणुक्कोसेणं तिन्नि समया॥ छउमन्न अनाहारगस्स अंतरं जहन्नेणं खुड्डागभवग्गहणं दुसमऊणं उक्को० असंखेज्जं कालं जाव अंगुलस्स असंखेज्जतिभागं सिद्धकेवलिअनाहारगस्स सातीयस्स अपज्जवसियस्स नत्थि अंतरं ।

सजोगि भवत्थकेवलिअणाहारगस्स जह० अंतो० उक्कोसेणवि, अजोगि भवत्थकेवलिअनाहारगस्स नत्थि अंतरं ॥ एएसि णं भंते ! आहारगाणं अनाहारगाण य कयरे २ हिंतो अप्पा बहु० ?, गोयमा ! सव्वत्थोवा अनाहारगा आहारगा असंखेज्जा ॥

वृ. 'अहवे'त्यादि, अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा—आहारकाश्च अनाहारकाश्च अधुना कायस्थितमाह—'आहारगे णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! आहारको द्विविधः प्रज्ञप्तस्तद्यथा—छद्मस्थाहारकः केवल्याहारकः, तत्र छद्मस्थाहारको जघन्येन क्षुल्लकभवग्रहणं द्विसमयोनं, एतच्च जघन्याधिकाराद्विग्रहेणगत्य क्षुल्लकभवग्रहणवत्सूत्पादे परिभावनीयं तत्र यद्यपि नाम लोकान्तनिष्कुटादावुत्पादे चतुःसामयिकी पञ्चसामयिकी च विग्रहगतिर्भवति तथाऽपि बाहुल्येन त्रिसामयिक्तेवेति तामेवाधिकृत्य सूत्रमिदमुक्तं, इत्यमेवान्येषामपि पूर्वाचार्याणां प्रवृत्तिदर्शनात्, उक्तञ्च—''एकं द्वौ वाऽनाहारकः'' इति, त्रिसामयिक्यां च विग्रहगतावाद्यौ द्वौ समयावनाहारक इति ताभ्यां हीनमुक्तं, उत्कर्षतोऽसङ्ख्येयं कालम्, असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽङ्गुलस्यासङ्ख्येयो भागः, किमुक्तं भवति ? —अङ्गुलमात्रक्षेत्राङ्गुलासङ्ख्येयभागे यावन्त आकाशप्रदेशास्तावन्तः प्रतिसमयमेकैकप्रदेशापहारे यावता कालेन निर्लेपा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति तावत्य उत्सर्प्पिण्यवंसार्प्पिण्य इति, तावन्तं हि कालमविग्रहेणोत्पाद्यते, अविग्रहोत्पत्तौ च सततमाहारकः ।

केवल्याहारकप्रश्नसूत्रं पाठसिद्धं, भगवानाह–गौतम ! जघन्येनान्तर्मुहूर्तं, स चान्तकृत् केवली प्रतिपत्तव्यः, उत्कर्षतो देशोना पूर्वकोटी, सा च पूर्वकोटयायुषो नववर्षादारभ्योत्पन्नकेवलज्ञानस्य परिभावनीया। अनाहारकविषयं सूत्रमाह–'अनाहारए णं भंते' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम अनाहारको द्विविधः प्रज्ञप्तः–छद्मस्थोऽनाहारकः केवल्यनाहारकश्च, छद्मस्थानाहारकप्रश्नसूत्रं सुगमं भगवानाह–गौतम ! जघन्यत एकं समयं, जघन्याधिकाराद्द्विसामयिकीं विग्रहगतिम- पेक्ष्यैतदवसातव्यं, उत्कर्षतो द्वौ समयौ त्रिसामयिक्या एव विग्रहगतेर्बाहुल्येनाश्रयणात्, आह च चूर्णिकृत्–"यद्यपि भगवत्यां चतुःसामयिकोऽनाहारक उक्तस्तथाऽप्यत्र नाङ्गीक्रियते, कदाचित्कोऽसौ भावो येन, बाहुल्यमेवाङ्गीक्रियते, बाहुल्याच्च समयद्वयमेवे"ति। केवल्यनाहारकसूत्रं पाठसिद्धं, भगवानाह–गौतम ! केवल्यनाहारको द्विविधः प्रज्ञप्तस्तद्यथाभवस्थकेवल्यनाहारकः सिद्धकेवल्यनाहारकः ।

'सिद्धकेवलिअनाहारए णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सादिकापर्यवसितः, सिद्धस्य साद्यपर्यवसिततयाऽनाहारकत्वस्यापि तद्विशिष्टस्य तथाभावात् ॥ 'भवत्थकेवलिअनाहारए णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! भवस्थकेवल्यनाहारको द्विविधः, प्रज्ञप्तः–सयोगिभवस्थकेवल्यनाहारकोऽयोगिभवस्थकेवल्यनाहारकश्च, तत्रायोगिभवस्थकेवल्यनाहारकप्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येनाप्यन्तर्मुहूर्तमुत्कर्षतोऽप्यन्तर्मुहूर्तं, अयोगित्वं नाम हि शैलेश्यवस्था तस्यां नियमादनाहारक औदारिकादिकाययोगाभावात्, शैलेश्यवस्था च जघन्यत उत्कर्षतश्चान्तर्मुहूर्तं, नवरं जघन्यपदादुत्कृष्टमधिकमवसेयं, अन्यथोभयपदोपन्यासायोगात्। 'सजोगिभवत्थकेवलिअणाहारए णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भ०–गौ० अजघन्योत्कर्षेण त्रयः समयाः, ते चाष्टसामयिककेवलिसमुद्घातावस्थायां तृतीयचतुर्थपञ्चमरूपाः तेषु केवलकार्म्मणकाययोगभावात्, उक्तञ्च–

॥ १ ॥ "कार्म्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च ।
समयत्रयेऽपि तस्माद्भवत्यनाहारको नियमात् ॥"

साम्प्रतमन्तरं चिन्तयन्नाह–'छउमत्थाहारयस्स णं भंते !' इत्यादि, छद्मस्थाहारकस्य भदन्त अन्तरं कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! जगन्येनैकं समयमुत्कर्षतो द्वौ समयौ, यावानेव हि कालो जघन्यत उत्कर्षतश्च छद्मस्थानाहारकस्य तावानाहरकस्यान्तरकालः, स च कालो जघन्येनैकः समयः उत्कर्षतो बाहुल्यमङ्गीकृत्य व्यवह्रियमाणायांत्रिसामयिक्यां विग्रहगतौ द्वौ समयावित्याहारकस्याप्यन्तरं तावदिति। केवल्याहारक्तप्रश्नसूत्रं सुगमं, भगवानाह–गौतम अजघन्योत्कर्षेण त्रयः समयाः केवल्याहारको हि सयोगिभवस्थकेवली, तस्य चानाहारकत्वं त्रीनेव समयान् यथोक्तं प्रागित्यन्तरं केवल्याहारकस्य तावदिति ।

सम्प्रत्यनाहारकस्यान्तरं चिचिन्तयिषुः प्रथमतश्छद्मस्थानाहारकस्याह–'छउमत्थानाहारयस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! जघन्येन क्षुल्लकभवग्रहणं द्विसमयोनं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कर्षतोऽसङ्ख्येयं कालं यावदङ्गुलस्यासङ्ख्येयो भागः, यावानेव हि छद्मस्थाहारकस्य कालस्तावनिव छद्मस्थानाहारकस्यान्तरं, छद्मस्थाहारकस्य च जघन्यतः कालोऽन्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽङ्गुलस्यासङ्ख्येयो भागः, एतावन्तं कालं सततमविग्रहेणोत्पादसम्भवात्, ततश्छद्मस्थानाहारकस्य जघन्यत उत्कर्षतश्चैतावदन्तरमिति । अथ स्थाने २ क्षुल्लकभवग्रहणमित्युक्तं तत्र क्षुल्लकभवग्रहणमिति कः शब्दार्थ ? उच्यते, क्षुल्लं लघु स्तोकमित्येकोऽर्थ क्षुल्लमेव क्षुल्लकं–एकायुष्कसंवेदनकालो भवस्तस्य ग्रहणं–संबन्धनं भवग्रहणं, क्षुल्लकं च तद् भवग्रहणं च क्षुल्लकभवग्रहणं, तच्चावलिकातश्चिन्त्यमानं षट्पञ्चाशदधिकमावलिकाशतद्वयं, अथैकस्मिन् आनप्राणे कियन्ति क्षुल्लकभवग्रहणानि भवन्ति ?, उच्यते, किञ्चित्समधिकानि सप्तदश, कथमिति चेदुच्यते–इह मुहूर्त्तमध्ये सर्वसङ्ख्यया पञ्चषष्टि सहस्राणि पञ्चे शतानि षट्त्रिंशानि क्षुल्लकभवग्रहणानां भवन्ति, यत उक्तं चूर्णौ–

॥ १ ॥ "पन्नट्ठिसहस्साइं पंचेव सया हवंति छत्तीसा ।
खुड्डागभवग्गहणा हवंति अंतोमुहुत्तंमि ॥"

–आनप्राणाश्च मुहूर्त्ते त्रीणि सहस्राणि सप्त शतानि त्रिसप्तत्यधिकानि, उक्तञ्च–

॥ १ ॥ "तिन्नि सहस्सा सत्त य सयाइं तेवत्तरिं च ऊसासा ।
एस मुहुत्तो भणिओ सव्वेहिं अनंतनाणीहिं ॥"

ततोऽत्र त्रैराशिककर्म्मावतारः, यदि त्रिसप्तत्यधिकसप्तशतोत्तरैस्त्रिभिः सहस्रैरुच्छ्वासानां पञ्चषष्टि सहस्राणि पञ्च शतानि षटत्रिंशानि क्षुल्लकभवग्रहणानां भवनति तत एकेनोच्छ्वासेन किं लभामहे ?, अत्रान्त्यराशिना एककलक्षणेन मध्यराशेर्गुणनाज्ञातः स तावानेव, 'एकेन गुणितं तदेव भवती'ति न्यायात्, तत आद्येन राशिना भागहरणं, लब्धाः सप्तदश क्षुल्लकभवाः, शेषात्स्वंशास्तिष्ठन्ति तत्र त्रयोदश शतानि पञ्चनवत्यधिकानि, उक्तञ्च–

॥ १ ॥ "सत्तरस भवग्गहणा खुड्डाणं भवंति आणुपाणुंमि ।
तेरस चेव सयाइं पंचाणइ चेव अंसाणं ॥"

अथैतावद्भिरंशैः कियत्य आवलिका लभ्यन्ते ?, उच्यते, समधिकचतुर्नवति, तथाहि–षट्पञ्चाशदधिकेन शतद्वयेनालिकानां त्रयोदश शतानि पञ्चनवतानि गुण्यन्ते, जातानि त्रीणि लक्षाणि सप्तपञ्चाशत्सहस्राणि शतमेकं विंशत्यधिकं, छेदराशिः स एव ३७७६, लब्धा चतुर्नवतिरावलिकाः, शेषास्त्वंशा आवलिकायास्तिष्ठन्ति चतुर्विंशति शतानि अष्टपञ्चाशानि, छेदः स एव, एवं यदा एकस्मिन्नानप्राणे आवलिकाः सङ्ख्यातुमिष्यन्ते तदा सप्तदश द्वाभ्यां षट्पञ्चाशदधिकाभ्यां शताभ्यां गुण्यन्ते, गुणयित्वा चोपरितनाश्चतुर्नवतिरावलिकाः प्रक्षिप्यन्ते, तत आवलिकानां चतुश्चत्वारिंशत् शतानि षट्चत्वारिंशानि भवन्ति, उक्तञ्च–

॥ १ ॥ "अक्को उ आणुपाणू चोयालीसं सया उ छायाला ।
आवलियपमाणेणं अनंतनाणीहिं निद्दिट्ठो ॥"

यदि पुनर्मुहूर्तेते आवलिकाः सङ्ख्यातुमिष्यन्ते तत एतान्येव चतुश्चत्वारिंशच्छतानि त्रिसप्तत्यधिकानि भवन्तीति सप्तत्रिंच्छशतैस्त्रिसप्तत्यधिकैर्गुण्यन्ते, जाता एका कोटी सप्तषष्टि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शतसहस्राणि चतुःसप्तति सहस्राणि सप्तशतानि अष्टापञ्चाशदधिकानि येऽपि चावलिकाया अंशाश्चतुर्विंशतितानि अष्टपञ्चाशदधिकानि तेऽपि मुहूर्त्तगतोच्छ्वासराशिना गुण्यन्ते, अस्यैव छेदस्य ते अंशा इत्यावलिकानायनार्थं तेनैव भागो ह्रियते, लब्धास्तावत्य एवावलिकाश्चतुर्विंशतिशतान्यष्टापञ्चाशानि तानि मूलराशौ प्रक्षिप्यन्ते, जाता मूलराशिरेका कोटि सप्तषष्टिर्लक्षाः सप्तसप्तति सहस्राणि द्वे शते षोडशोत्तरे, एतावत्य आवलिका मुहूर्त्ते भवन्ति, यदिवा मुहूर्त्तगतानां क्षुल्लकभवग्रहणानां पञ्चषष्टि सहस्राणि पञ्च शतानि षट्त्रिंशतानि एकभवग्रहणप्रमाणेन षट्पञ्चाशेन शतद्वयेनावलिकानां गुण्यन्ते तथाऽपि तावत्य एवावलिका भवन्ति, उक्तञ्च–

॥ १ ॥ "एगा कोडी सत्तट्ठि लक्ख सत्तत्तरी सहस्सा य।
दो य सया सोलहिया आवलियाओ मुहुत्तंमि ॥"

एवं च यदुच्यते 'संखेज्जाओ आवलियाओ एगे ऊसासनीसासे' इत्यादि तदतीव समीचीनमिति कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः । तत्र सयोगिभवस्थकेवल्यनाहारकस्यान्तरमभिधित्सुराह–'सजोगिभवत्थकेवलिअनाहारयस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! जघन्येनाप्यन्तर्मुहूर्त्तमुत्कर्षेणाप्यन्तर्मुहूर्त्तं, समुदघातप्रतिपत्तेरनन्तरमेवान्तर्मुहूर्त्तेन शैलेशीप्रतिपत्तिभावात्, नवरं जघन्यपदादुत्कृष्टपदं विशेषाधिकमवसातव्यं अन्यथोभयपदोपन्यासायोगात्। अयोगिभवस्थकेवल्यनाहारकसूत्रे नास्त्यन्तरं, अयोग्यवस्थायां सर्वस्याप्यनाहारकत्वात् । एवं सिद्धस्यापि साद्यपर्यवसितस्यानाहारकयान्तराभावो भावनीयः ।

साम्प्रतमेतेषामाहारकानाहारकाणामल्पबहुत्वमाह–'एएसि णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! सर्वस्तोका अनाहारकाः, सिद्धविग्रहगत्यापन्नसमुदघातगतसयोगिकेवल्ययोगिकेवलिनामेवानाहारकत्वात्, तेभ्य आहारका असङ्ख्येयगुणाः, अथ सिद्धेभ्योऽनन्तगुणा वनस्पतिजीवास्ते च प्राय आहारका इत्यनन्तगणाः कथं न भवन्ति ?, उच्यते, इह प्रतिनिगोदमसङ्ख्येयो भागः प्रतिसमयं सदा विग्रहगत्यापन्नो लभ्यते, विग्रहगत्यापन्ना अनाहारकाः–

॥ १ ॥ "विग्गहगइमावन्ना केवलिणो समुहया अजोगी य।
सिद्धा य अणाहारा सेसा आहारगा जीवा ॥"

इतिवचनात् ततोऽसङ्ख्येयगुणा एवाहारका घटन्ते नानन्तगुणा इति ॥ प्रकारान्तरेण भूयो द्वैविध्यमाह–

मू. (३७३) अहवा दुविहा सव्वजीवा पन्नत्ता, तंजहा–सभासगा अभासगा य ॥ सभासए णं भंते ! सभासएत्तिकालओ केवचिरं होति ?, गोयमा ! जहन्नेणं एक्कं समयं उक्को० अंतोमुहुत्तं

अभासए णं भंते० !, गोयमा ! अभासए दुविहे पन्नत्ते–साइए वा अपज्जवसिए सातीए वा सपज्जवसिए, तत्थ णं जे से साइए सपज्जवसिए से जह० अंतो० उक्को० अनंतं कालं अनंता उस्सप्पिणीओसप्पिणीओ वणस्सतिकालो ।

भासगस्स णं भंते ! केवतिकालं अंतरं होति ?, जह० अंतो० उक्को० अनंतं कालं वणस्सतिकालो । अभासग० सातीयस्स अपज्जवसियस्स नत्थि अंतरं, सातीयसपज्जवसियस्स जहन्नेणं एक्कं समयं उक्को० अंतो० । अप्पाबहु० सव्वत्थोवा भासगा अभासगा अनंतगुणा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा दुविहा सव्वजीवा ससरीरी य असरीरी य असरीरी जहा सिद्धा, थोवा असरीरी असरीरी अनंतगुणा ॥

वृ. 'अहवे'त्यादि, अथवा द्विविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा—भाषकाश्च अभाषकाश्च, भाषमाणा भाषका इतरेऽभाषकाः ॥ सम्प्रति कायस्थितिमाह—'सभासए णं भंते' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! जघन्येनैकं समयं भाषाद्रव्यग्रहणसमय एव मरणतोऽन्यतो वा कुतश्चित्कारणात्तद्व्यापारस्याप्युपरमात्, उत्कर्षेणान्तर्मुहूर्त्तं, तावन्तं कालं निरन्तरं भाषाद्रव्य-ग्रहणनिसर्गसम्भवात्, तत ऊर्ध्वं जीवस्वाभाव्यान्नियमत एवोपरमति ।

अभाषकप्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! अभाषको द्विविध प्रज्ञप्तस्तद्यथा—सादिको वाऽपर्यवसितः सिद्धः, सादिको वा सपर्यवसितः सच पृथिव्यादि, तत्र योऽसौ सादि सपर्यवसितः स जघन्येनान्तर्मुहूर्त्तं, भाषमादुपरम्यान्तर्मुहूर्त्तेन कस्यापि भूयोऽपि भाषणप्रवृत्तेः, पृथिव्यादिभवस्य वा जघन्यत एतावन्मात्रकालत्वात्, उत्कर्षतो वनस्पतिकालः, च चानन्ता उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽनन्ता लोका असङ्खयेयाः पुद्गलपरावर्त्ताः ते च पुद्गलपरावर्त्ता आवलिकाया असङ्खयेयो भागः, एतावन्तं कालं वनस्पतिष्वभाषकत्वात् ।

साम्प्रतमन्तरं चिचिन्तयिषुराह—'भासगस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौ० जघन्येनान्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः, अभाषककालस्य भाषकान्तरत्वात् । अभाषक-सूत्रे साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात्, सादिसपर्यवसितस्य जघन्येनैकं समयमुत्कर्षतोऽन्तर्मुहूर्त्तं, भाषककालस्याभाषकान्तरत्वात्, तस्य च जघन्यत उत्कर्षतश्चैतावन्मात्र-त्वत्, अल्पबहुत्वसूत्रं प्रतीतम् । 'अहवे'त्यादि, सशरीराः—असिद्धा अशरीराः—सिद्धाः, ततः सर्वाण्यपि सशरीराशरीरसूत्राणि सिद्धासिद्धसूत्राणीव भावनीयानि ॥

मू. (३७४) *अहवा दुविहा सव्वजीवा पन्नत्ता, तंजहा—चरिमा चेव अचरिमा चेव ॥ चरिमे णं भंते ! चरिमेत्ति कालतो केवचिरं होति ?, गोयमा ! चरिमे अनादीए सपज्जवसिए, अचरिमे दुविहे—अनातीए वा अपज्जवसिए सातीए अपज्जवसिते, दोण्हंपि नत्थि अंतरं, अप्पाबहुं सव्वत्थोवा अचरिमा चरिमा अणंतगुणा । [अहवा दुविहा सव्वजीवा सागारोवउत्ता य अणागारोवउत्ता य, दोण्हंपि संचिट्ठणावि अंतरंपि जह० अंतो० उ० अंतो०, अप्पाबहु० सव्वत्थोवा अमागारोवउत्ता सागारोवउत्ता असंखेज्जगुणा] सेत्तं दुविहा सव्वजीवा पन्नत्ता ॥*

वृ. 'बहवे'त्यादि, चरगाः—चरमभववन्तो भव्यविशेषा ये सेत्स्यन्ति, तद्विपरीता अचरमाः—अभव्याः सिद्धाश्च । कायस्थितिसूत्रे चरमोऽनादिसपर्यवसितोऽन्यथा चरमत्वायोगात् । अचरमसूत्रेऽचरमो द्विविधः प्रज्ञप्तस्तद्यथा—अनादिको वाऽपर्यवसितः सादिको वाऽपर्यवसितः, तत्रानाद्यपर्यवसितोऽभव्यः साद्यपर्यवसितः सिद्धः । साम्प्रतमन्तरमाह—

'चरिमस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! अनादिकस्य सपर्यवसितस्य नास्त्यन्तरं, चरमत्वापगमे सति पुनश्चरमत्वायोगात्, अचरमस्याप्य-नाद्यपर्यवसित-स्य साद्यपरियवसितस्य वा नास्त्यन्तरं अविद्यमानचरमत्वात् । अल्पबहुत्वे सर्वस्तोका अचरमाः, अभव्यानां सिद्धानामेव चाचरमत्वात्, चरमा अनन्तगुणाः, सामान्यभव्यापेक्षमेतत्, अन्यथाऽन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तगुणत्वायोगात्, आह च मूलटीकाकारः– "चरमा अनन्तगुणाः, सामान्यभव्यापेक्ष- मेतदिति भावनीयं, दुर्लक्ष्यः सूत्राणां विषयविभाग–" इति। सम्प्रत्युपसंहारमाह–'सेत्तं दुविहा' ते एते द्विविधाः सर्वजीवाः, अत्र क्वचिद्द्विविधवक्तव्य- तासङ्ग्रहणिगाथा–

॥१॥ "सिद्धसइंदियकाए जोए वेए कसायलेसा य।
नाणुवओगाहारा भाससरीरी य चरमो य॥"

–सम्प्रति त्रिविधवक्तव्यतामाह–

प्रथमा सव्वजीवा प्रतिपत्तिः समाप्ता

–: द्वीतीया सर्वजीवा प्रतिपत्तिः :–

मू. (३७५) *तत्थ णं जे ते एवमाहंसु तिविहा सव्वजीवा पन्नत्ता ते एवमाहंसु, तंजहा–सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी।*

सम्मदिट्ठी णं भंते ! कालओ केवचिरं होति ?, गोयमा ! सम्मदिट्ठी दुविहे पन्नत्ते, तंजहा–सातीए वा अपज्जवसिए साइए वा सपज्जवसिए, तत्थ जे ते सातीए सपज्जवसिते ते जह० अंतो० उक्को० छावट्ठिं सागरोवमाइं सातिरेगाइं, मिच्छादिट्ठी तिविहे साइए वा सपज्जवसिए अनातीए वा अपज्जवसित अनातीए वा सपज्जवसिते, तत्थ जे ते सातीए सपज्जपसिए से जह० अंतो० उक्को० अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं सम्मामिच्छादिट्ठी जह० अंतो० उक्को० अंतोमुहुत्तं।

सम्मदिट्ठिस्स अंतरं साइयस्स अपज्जवसियस्स नत्थि अंतरं, सातीयस्स सज्जवसियस्स जह० अंतो० उक्को० अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं, मिच्छादिट्ठिस्स अनादीयस्स अपज्जवसियस्स णत्थि अंतरं, अनातीयस्स सपज्जवसियस्स नत्थि अंतरं, साइयस्स सपज्जवसियस्स जह० अंतो० उक्को० छावट्ठि सागरोवमाइं सातिरेगाइं, सम्मामिच्छादिट्ठिस्स जह० अंतो० उक्को० अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं।

अप्पाबहु० सव्वत्थोवा सम्मामिच्छादिट्ठी सम्मदिट्ठी अनंतगुणा मिच्छादिट्ठी अनंतगुणा।

वृ. 'तत्थ णं जे ते' इत्यादि, तत्र ये ते एवमुक्तवन्तस्त्रिविधाः सर्वजीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा–सम्यग्दृष्टयो मिथ्यादृष्टयः सम्यग्मिथ्यादृष्टयश्च, अमीषां शब्दार्थभावना प्राग्वत्॥ सम्प्रति कायस्थितिमाह–'सम्मदिट्ठी णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सम्यग्दृष्टिर्द्विविधः प्रज्ञप्तस्तद्यथा–सादिको वाऽपर्यवसितः क्षायिकसम्यग्दृष्टि, सादिको वा सपर्यवसितः क्षायोपशमिकादिसम्यग्दर्शनी, तत्र योऽसौ सादसपर्यवसितः स जघन्येनान्तर्मूहूर्त्त, कर्म्मपरिणामस्य विचित्रत्वेनैतावतः कालादूर्ध्वं पुनर्मिथ्यात्वगमनात् उत्कर्षतः षट्षष्टि सागरोपमाणि, तत ऊर्ध्वं नियमतः क्षायोपशमिकसम्यग्दर्शनापगमात्।

मिथ्यादृष्टिप्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! मिथ्यादृष्टिस्त्रिविधः प्रज्ञप्तस्तद्यथा–अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र योऽसौ सादिसपर्यवसितः स जघन्येनान्तर्मुहूर्त्तं, तावता कालेन पुनः कस्यापि सम्यदर्शनलाभात् उत्कर्षतोऽनन्तं कालं, अनन्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्त देशोनं, पूर्वप्रतिपन्नसमयक्त्वस्यैतावतः कालादूर्ध्वं पुनरवश्यं सम्यग्दर्शनलाभात्, पूर्वसम्यक्त्वप्रभावेन संसारस्य परित्तीकरणात्। सम्यग्मिथ्यादृष्टिसूत्रे जघन्यतोऽप्यन्तर्मुहूर्त्तमुत्कर्षतोऽप्यन्तर्मुहूर्त्तं, सम्यग्मिथ्यादर्शनकालस्य स्वभावत् एवैतावन्मात्रत्वात्, नवरं जघन्यपदादुत्कृष्टपदमधिकमवसातव्यम्।

साम्प्रतन्तरमाह- 'सम्मदिट्ठिस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात्, सादिसपर्यवसितस्य जघन्येनान्तर्मुहूर्त्तं, सम्यक्त्वात्त प्रतिपत्यान्तर्मुहूर्त्तेन भूयः कस्यापि सम्यक्त्वप्रतिपत्तेः, उत्कर्षतोऽनन्तं कालं यावदपार्ध्वं पुद्गलपरावर्त्तम्। मिथ्यादृष्टिसूत्रेऽनाद्यपर्यवसितस्य नास्त्यन्तरमपरित्यागात्, अनादिसपर्यवसितस्यापि नास्त्यन्तरं, अन्यथाऽनादित्वायोगात्, सादिसपर्यवसितस्य जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि, सम्यग्दर्शनकाल एव हि मिथ्यादर्शनस्य प्रायोऽन्तरं, सम्यग्दर्शनकालश्च जघन्यत उत्कर्षतश्चैतावानिति।

सम्यग्मिथ्यादृष्टिसूत्रे जघन्यतोऽन्तर्मुहूर्त्तं, सम्यग्मिथ्यादर्शनात् प्रतिपत्यान्तर्मुहूर्त्तेन भूयः कस्यापि सम्यग्मिथ्यादर्शनभावात्, उत्कर्षतोऽनन्तं कालं यावदप्रार्द्धं पुद्गलपरावर्त्त देशोनं, यदि सम्यग्मिथ्यादर्शनात् प्रतिपतितस्य भूयः सम्यग्मिथ्यादर्शनलाभस्तत एतावता कालेन नियमेन अन्यथा तु मुक्ति। अल्पबहुत्वचिन्तायां सर्वस्तोकाः सम्यग्मिथ्यादृष्टयः, तत्परिणामस्य स्तोककालतया पृच्छासमये तेषां स्तोकानामवाप्यमानत्वात्, सम्यग्दृष्टयोऽनन्तगुणाः सिद्धानामनन्तत्वात्, तेभ्यो मिथ्यादृष्टयोऽनन्तगुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तत्वात् तेषां च मिथ्यादृष्टित्वात्॥

मू. (३७६) *अहवा तिविहा सव्वजीवा पन्नत्ता—परित्ता अपरित्ता नोपरित्तानोअपरित्ता परित्ते णं भंते ! कालतो केवचिरं होति ?, परित्ते दुविहे पन्नत्ते—कायपरित्ते य संसारपरित्ते य। कायपरित्ते णं भंते० !, जह० अंतोमु० उक्को० असंखेज्जं कालं जाव असंखेज्जा लोगा।*

संसारपरित्ते णं भंते ! संसारपरित्तेत्ति कालओ केवचिरं होति ?, जह० अंतो० उक्को० अनंतं जाव अवड्ढं पोग्गलपरियट्टं देसूणं।

अपरित्ते णं भंते !०, अपरित्ते दुविहे पन्नत्ते, कायअपरित्ते य संसारअपरित्ते य, कायअपरित्ते णं जह० अंतो० उक्को० अनतं कालं, वणस्सतिकालो, संसारापरित्ते दुविहे पन्नत्ते—अनादीए वा अपज्जवसिते अनादीए वा सपज्जवसिते, नोपरित्तेनोअपरित्ते सातीए अपज्जवसिते।

कायपरित्तस्स जह० अंतरं अंतो० उक्को० वणस्सतिकालो, संसारपरित्तस्स नत्थि अंतरं, कायापरित्तस्स जह० अंतो० उक्को० असंखिज्जं कालं पुढविकालो। संसारापरित्तस्स अनाइयस्स अपज्जवसियस्स नत्थि अंतरं, अनाइयस्स सपज्जवसियस्स नत्थि अंतरं, नोपरीत्तनोअपरित्तस्सवि नत्थि अंतरं।

अप्पाबहु० सव्वत्थोवा परित्ता णोपरित्तानोअपरित्ता अनंतगुणा अपरित्ता अनंतगुणा।

वृ. 'अहवे'त्यादि, अथवा सर्वजीवास्त्रिविधाः प्रज्ञप्तास्तद्यथा—परीत्ता अपरीत्ता नोपरित्तानोअपरीत्ताश्च॥ सम्प्रति कायस्थितिचिन्तापरीत्तविषयं प्रश्नसूत्रं, सुगमं, भगवानाह—गौतम ! परीत्तो द्विविधः प्रज्ञप्तस्तद्यथा—कायपरीत्तः संसारपरीत्तश्च, कायपरीत्तो नाम प्रत्येकशरीरी,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारपरीत्तोऽपार्द्धपुद्गलपरावर्त्तान्तःसंसारः, तत्र कायपरीत्तविषयं प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! जघन्येनान्तर्मुहूर्त्तं, स च साधारणेभ्यः परीत्तेष्वन्तर्मुहूर्त्तस्थित्वा पुनः साधारणेषु गच्छतो वेदितव्यः, उत्कर्षतोऽसङ्ख्येयं कालं, असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः, तथा चाह–पृथिवीकालः, किमुक्तं भवति ?–पृथिव्यादिप्रत्येकशरीरकालः, तत ऊर्ध्वं नियमतः संसारिणः साधारणभावात्।

संसारपरीत्तविषयं प्रश्नसूत्रं पाठसिद्धं, भगवानाह–गौतम! जघन्येनान्तर्मुहूर्त्तं, तावता कालेनान्तकृत्केवलत्वेन सिद्धिगमनात्, उत्कर्षेणानन्तं कालं, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतो देशोनमपार्द्ध पुद्गलपरावर्त्तं यावत्, तत ऊर्द्ध नियमतः सिद्धिगमनाद्, अन्यथा संसारपरीत्तत्वायोगात्। 'अपरीत्ते णं भंते!' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! अपरीत्तो द्विविधः प्रज्ञप्तस्तद्यथा–कायापरीत्तः संसारापरीत्तश्च, कायापरीत्तः–साधारणः, संसारापरीत्तः–कृष्ण-पाक्षिकः, तत्र कायापरीत्तविषयं प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! जघन्येनान्तर्मुहूर्त्तं, तत ऊर्ध्वं कस्यापि प्रत्येकशरीरेषु गमनात्, उत्कर्षतोऽनन्तं कालं, स च वनस्पतिकालः, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽनन्ता लोका असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते च पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः। संसारापरीत्तप्रश्नसूत्रंप्रतीतं, भगवानाह–गौतम संसारापरीत्तो द्विविधः प्रज्ञप्तस्तद्यथा–अनादिकोऽपर्यवसितो, यो न जातुचिदपि सिद्धिं गन्ता, अनादिको वा सपर्यवसितो भव्यविशेषः। नोपरीत्तनोअपरीत्तविषयं प्रश्नसूत्रं प्रतीतं, नोपरीत्त-नोअपरीत्तो हि सिद्धः, स च साद्यपर्यवसित एव प्रतिपाताभावात्।

साम्प्रतमन्तरमाह–'कायापरीत्तस्स णं'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! जघन्येनान्तर्मुहूर्त्तं, साधारणेष्वन्तर्मुहूर्त्तं स्थित्वा भूयः प्रत्येकशरीरेष्वागमनात्, उत्कर्षतोऽनन्तं कालं, स चानन्तः काल– प्रागुक्तस्वरूपो वनस्पतिकालः, तावन्तं कालं साधारणेष्ववस्थानात्।

संसारपरित्तविषयंप्रश्नसूत्रं सुगमं, भगवानाह–गौतम! नास्त्यन्तरं, संसारपरीतत्वापगमे पुनः संसारपरीतत्वाभावात्, मुक्तस्य प्रतिपातासम्भवात्। कायापरीत्तसूत्रे जघन्यतोऽन्तर्मुहूर्त्तं, प्रत्येकशरीरेष्वन्तर्मुहूर्त्तं स्थित्वा भूयः कायापरीत्तेषु कस्याप्यागमनसम्भवात्, उत्कर्षतोऽसङ्ख्येयं कालं यावद्, असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽसङ्ख्येया लोकाः, पथिव्यादिप्रत्येक-शरीरभवभ्रमणकालस्योत्कर्षतोऽप्येतावन्मात्रत्वात्, तथा चाह–पृथिवीकालः पृथिव्यादि-प्रत्येकशरीरकाल इत्यर्थः। संसारापरीत्तसूत्रेऽनाद्यपर्यवसितदस्य नास्त्यन्तरमपर्यवसितत्वात्, अनादिसपर्यवसितस्य नास्त्यन्तरं, संसारापरीतत्वापगमे पुनः संसारापरीतत्वस्यासम्भवात्, नोपरीत्तनोअपरीत्तस्यापि साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात्। अल्पबहुत्वचिन्तायां सर्वस्तोकाः परीत्ताः, कायपरीत्तानां संसारपरीत्तानां चाल्पत्वात्, नोपरीत्तानोअपरीत्ता अनन्तगुणाः सिद्धानामनन्तत्वात्, अपरीत्ता अनन्तगुणाः, कृष्णपाक्षिकाणामतिप्रभूतत्वात्॥

मू. (३७७) अहवा तिविहा सव्वजीवा पं० तं०–पज्जत्तगा अपज्जत्तगा नोपज्जत्तगानो अपज्जत्तगा, पज्जत्तके णं भंते!०, जह० अंतो० उक्को० सागरोवमसतपुहुत्तं साइरेगं। अपज्जत्तगे णं भंते!, जह० अंतो० उक्को० अंतो० नोपज्जत्तनोअपज्जत्तए सातीए अपज्जवसिते।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

पज्जत्तगस्स अंतरहं जह० अंतो० उक्को० अंतो०, अपज्जत्तगस्स जह० अंतो० उक्को० सागरोवसमसयपुहुत्तं साइरेगं, तइयस्स नत्थि अंतरं।

अप्पाबहु० सव्वत्थोवा नोपज्जत्तगनोअपज्जत्तगा अपज्जत्तगा अनंतगुणा पज्जत्तगा संखिज्जगुणा

वृ. 'अहवे'त्यादि, अथवा प्रकारान्तरेण सर्वजीवास्त्रिविधाः प्रज्ञप्तास्तद्यथा–पर्याप्तका अपर्याप्तका नोपर्याप्तकानोअपर्याप्तकाश्च, तत्र पर्याप्तककायिस्थितिचिन्तायां जघन्येनान्तर्मुहूर्त्तं, अपर्याप्तकेभ्यः पर्याप्तेषूत्पद्यान्तर्मुहूर्त्तात्परतोऽपर्याप्तकेषु भूयोऽपि गमनात्, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, तत ऊर्ध्वं नियमतोऽपर्याप्तकभावात्, लब्ध्यपेक्षं चेदं सूत्रं, तेनापान्तराले उपपातापर्याप्तकत्वेऽपि न कश्चिद्दोषः।

अपर्याप्तकसूत्रे जघन्यतोऽप्यन्तर्मुहूर्त्तमुत्कर्षतोऽप्यन्तर्मुहूर्त्तं, अपर्याप्तलब्धेर्जघन्यत उत्कर्षतश्चैतावन्मात्रकालत्वात्, नवरं जघन्यपदादुत्कृष्टपदमधिकमवसातव्यं, अन्यथोभयपदोपन्यासायोगात्, उभयप्रतिषेधवर्त्ती सिद्धः, स च साद्यपर्यवसितः। अन्तरचिन्तायां पर्याप्तकस्य जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तमन्तरं, अपर्याप्तकाल एव हि पर्याप्तकस्यान्तरं, अपर्याप्तककालश्च जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तं, अपर्याप्तकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, पर्याप्तककालस्य जघन्यत उत्कर्षतश्चैतावत्प्रमाणत्वात्, नोपर्याप्तनोअपर्याप्तकस्य नास्त्यन्तरमपर्यवसितत्वात्। अल्पहुत्वचिन्तायां सर्वस्तोकां नोपर्याप्तकनोअपर्याप्तकाः, सिद्धानां शेषजीवापेक्ष-याऽल्पत्वात्, अपर्याप्तका अनन्तगुणाः, निगोदजीवानामपर्याप्तानामन्तानन्तानां सदा लभ्यमा-नत्वात्, तेभ्यः पर्याप्तकाः सङ्ख्येयगुणाः, सूक्ष्मेष्वोधतोऽपर्याप्तकेभ्यः पर्याप्तकानां सङ्ख्येयगुणतयाऽ- वाप्यमानत्वात्॥

मू. (३७८) *अहवा तिविहा सव्वजीवा पं० तं०–सुहुमा बायरा नोसुहुमानोबायरा, सुहुमे णं भंते! सुहुमेत्ति काल केवच्चिरं० ?, जहन्नेणं अंतोमुहुत्तं उक्कोसे० असंखिज्जं कालं पुढविकालो, बायरा जह० अंतो० उक्को० असंखिज्ज कालं असंखिज्जाओ उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अंगुलस्स असंखिज्जइभागो।*

नोसुहुमनोबायरए साइए अपज्जवसिए, सुहुमस्स अंतरं बायरकालो, बायरस्स अंतरं सुहुमकालो, तइयस्स नोसुहुमनोबायरस्स अंतरं नत्थि। अप्पाबहु० सव्वत्थोवा नोसुहमानोबायरा बायर अनंतगुणा सुहुमा असंखेज्जगुणा॥

वृ. 'अहवे'त्यादि, अथवा प्रकारान्तरेण सर्वजीवास्त्रिविधाः प्रज्ञप्तास्तद्यथा–सूक्ष्मा बादराः नोसूक्ष्मानोबादराः। कायस्थितिचिन्तायां सूक्ष्मस्य जघन्यतोऽन्तर्मुहूर्त्तं, तत ऊर्ध्वं भूयोऽपि बादरेषु कस्याप्यागमनात्, उत्कर्षतोऽसङ्ख्येयं कालं, असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽसङ्ख्येया लोकाः, बादरस्य जघन्यतोऽन्तर्मुहूर्त्तं, तदनन्तरं कस्यचिद् भूयोऽपि सूक्ष्मेषु गमनात्, उत्कर्षतोऽसङ्ख्येयं कालं, असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽङ्गुल-स्यासङ्ख्येयो भागः, एतावतः कालादूर्ध्वं नियोगतः संसारिणः सूक्ष्मेषु गमनात्, उभयप्रतिषेपवर्त्ती सिद्धः स च साद्यपर्यवसितः।

अन्तरचिन्तायां सूक्ष्मस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तं उत्कर्षतोऽसङ्ख्येयं कालमसङ्ख्येया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्सर्पिण्यवसर्पिण्यः कालतः क्षेत्रतोऽङ्गुलस्यासङ्ख्येयो भागः, बादरकालस्य जघन्यत उत्कर्षतश्चै-तावत्प्रमाणत्वात् । बादरस्यान्तरं जघन्येनान्तर्मुहूर्त्तं उत्कर्षतोऽसङ्ख्येयं कालं, असङ्ख्येया उत्सर्पिण्यवसर्पिण्य कालतः क्षेत्रतोऽसङ्ख्येया लोकाः, सूक्ष्मस्य जघन्यत उत्कर्षतश्चैतावत्काल-प्रमाणत्वात्, नोसूक्ष्मनोबादरस्य साद्यपर्यवसितस्य, हेतौ षष्ठी, 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मिति न्यायात्, ततोऽयमर्थ–साद्यपर्यवसितत्वान्नास्त्यन्तर-मन्यथाऽपर्यवसितत्वायोगात् । अल्पबहुत्वचिन्तायां सर्वस्तोकानोसूक्ष्मानोबादराः, सिद्धानामल्प-त्वात्, तेभ्यो बादरा अनन्तगुणाः, बादरनिगोदजीवानां सिद्धेभ्योऽप्यनन्तत्वात्, तेभ्यः सूक्ष्मा असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामसङ्ख्यातगुणत्वात् ॥

मू. (३७९) *अहवा तिविहा सव्वजीव्वा पन्नत्ता, तंजहा–सन्नी असन्नी नोसन्नीनोअ-सन्नी, सन्नी भंते ! कालओ० ?, जह० अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं, असन्नी जह० अंतो० उक्को० वणस्सतिकालो, नोसन्नीनोअसन्नी साइए अपज्जवसिते ।*

सन्निस्स अंतरं जह० अंतो० उक्को० वणस्सतिकालो, असन्निस्स अंतरं जह० अंतो० उक्को० सागरोवमसयपुहुत्तं सातिरेगं, ततियस्स नत्थि अंतरं । अप्पाबहू० सव्वत्थोवा सण्णी नोसन्नीनोअसन्नी अनंतगुणा असन्नी अनंतगुणा ॥

वृ. 'अहवा तिविहा' इत्यादि, 'अथवा' प्रकारान्तरेण त्रिप्रकाराः सर्वजीवाः प्रज्ञप्तास्तद्यथा–संज्ञिनोऽसंज्ञिनो नोसंज्ञिनोऽसंज्ञिनश्च, तत्र संज्ञिनः–समनस्काः असंज्ञिनः– अमनस्काः उभयप्रतिषेधवर्त्तिनः सिद्धाः । कायस्थितिचिन्तायां संज्ञिनो जघन्येनान्तर्मुहूर्त्तं, तत ऊर्द्ध भूयोऽपि कस्यचिद् संज्ञिषु गमनात्, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, तत ऊर्ध्वं वश्यं संसारिणः सतोऽसंज्ञिषु गमनात्, असंज्ञिनो जघन्यतोऽन्तर्मुहूर्त्तं, तत ऊर्ध्वं कस्यापि पुनरपि संज्ञिषु गम-नात्, उत्कर्षतोऽनन्तं कालं, स चानन्तः कालो वनस्पतिकालः, स चैवं–अनन्ता उत्स-र्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽनन्ता लोकाः, असङ्ख्येयाः पुद्गलपरावर्त्ताः, ते च पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, उभयप्रतिषेधवर्त्ती सिद्धः, स च साद्यपर्यवसितः ।

अन्तरचिन्तायां संज्ञिनोऽन्तरं जघन्येनान्तर्मुहूर्त्तं उत्कर्षतोऽनन्तं कालं, स चानन्तकालो वनस्पतिकालः, असञ्ज्ञिकालस्य जघन्यत उत्कर्षतश्चैतावत्प्रमाणत्वात्, असंज्ञिनोऽन्तरं जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सागरोपमशतपृथक्त्वं, संज्ञिकालस्य जघन्यत उत्कर्षतश्चैताव-त्प्रमाणत्वात्, नोसंज्ञिनोनोअसंज्ञिनः साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात् । अल्पबहुत्वचिन्तायां सर्वस्तोकाः संज्ञिनो, देवनारकगर्भव्युत्क्रान्तिकतिर्यग्मनुष्याणामेव संज्ञित्वात्, तेभ्य उभयप्रतिषेधवर्त्तिनोऽनन्तगुणाः, वनस्पतिवर्जशेषजीवेभ्यः सिद्धानामनन्त-गुणात्वात् । तेभ्योऽसंज्ञिनोऽनन्तगुणाः वनस्पतीनां सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥

मू. (३८०) *अहवा तिविहा सव्वजीवा पन्नत्ता, तंजहा–भवसिद्धिया अभवसिद्धिया नोभवसिद्धियानोअभवसिद्धिया, अनाइया सपज्जवसिया भवसिद्धिया, अनाइया अपज्जवसिया अभवसिद्धिया, साई अपज्जवसिया नोभवसिद्धियानोअभवसिद्धिया ।*

तिण्हंपि नत्थि अंतरं । अप्पाबहु० सव्वत्थोवा अभवसिद्धिया नोभवसिद्धीयानोअभव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धीया अनंतगुणा भवसिद्धिया अनंतगुणा ।

वृ. 'अहवे'त्यादि, अथवा–प्रकारान्तरेण त्रिविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा– 'भवसिद्धिकाः' भवे सिद्धिर्येषां ते भवसिद्धिका भव्या इत्यर्थः, अभवसिद्धिका–अभव्याः, नोभवसिद्धिकानोअभवसिद्धिकाः सिद्धाः, सिद्धानां संसारातीतया भवसिद्धिकत्वाभवसिद्धिकत्वविशेषणरहितत्वात् । कायस्थितिचिन्तायां भवसिद्धिकोऽनादिसपर्यवसितोऽन्यथा भवसिद्धिकत्वायोगात्, अभवसिद्धिकोऽनाद्यपर्यवसितः, अभवसिद्धिकत्वादेवान्यथ तद्भावायोगात्, नोभवसिद्धिकोनोअभवसिद्धिकः साद्यपर्यवसितः, सिद्धस्य संसारक्षयात्प्रादुर्भूतस्य प्रतिपातासम्भवात् ।

अन्तरचिन्तायां भवसिद्धिकस्यानांदिसपर्यवसितस्य नास्त्यन्तरं, भवसिद्धिकत्वापगमे पुनर्भवसिद्धिकत्वायोगात्, अभवसिद्धिकस्य नास्त्यन्तरमपर्यवसिततया सदा तद्भावपरित्यागात्, नोभवसिद्धिकनोअभवसिद्धिकस्यापि साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात् ।

अल्पबहुत्वचिन्तायां सर्वस्तोका अभवसिद्धिकाः, अभव्यानां जघन्ययुक्तानन्तकतुल्यत्वात्, नोभवसिद्धिकानोअभवसिद्धिका अनन्तगुणाः, सिद्धानामभव्येभ्योऽनन्तगुणत्वात्, तेभ्यो भवसिद्धिका अनन्तगुणाः, भव्यराशेः सिद्धेभ्योऽप्यनन्तगुणत्वात् ।

मू. (३८१) *अहवा तिविहा सव्व० तंजहा–तसा थावरा नोतसानोथावरा, तस्स णं भंते कालओ० ?, जह० अंते० उक्को० दो सागरोवमसहस्साइं साइरेगाइं, थावरस्स संचिट्ठणा वणस्सतिकालो, नोतसानोथावरा साती अपज्जवसिया ।*

तसस्स अंतरं वणस्सतिकालो, थावरस्स अंतरं दो सागरोवमसहस्साइं साइरेगाइं, नोतसथावरस्स नत्थि अंतरं । अपापबहु० सव्वत्थोवा तसा नोतसानोथावरा अनंतगुणा थावरा अनंतगुणा । से तं तिविधा सव्वजीवा पन्नत्ता ।

वृ. उपसंहारमाह–'सेत्तं तिविहा सव्वजीवा पन्नत्ता' ।। तदेवं त्रिविधसर्वजीवप्रतिपत्तिरुक्ता, सम्प्रति चतुर्विध सर्वजीवप्रतिपत्तिमभिधित्सुराह–

द्वितीया सर्वजीवा प्रतिपत्तिः समाप्ता

–: तृतीया सर्वजीवा प्रतिपत्ति :–

मू. (३८२) *तत्थ जे ते एवमाहंसु–चउव्विहा सव्वजीवा पन्नत्ता ते एवमाहंसु तं०–मणजोगी वइजोगी कायजोगी अजोगी । मणजोगी णं भंते ! जह० एक्कं समयं उक्को० अंतोमु०, एवं वइजोगीवि, कायजोगी जह० अंतो० उक्को० वणस्सतिकालो, अजोगी सातिए अपज्जवसिए ।*

मनजोगिस्स अंतरं जहन्नेणं अंतोमुहुत्तं उक्को० वणससइकालो, एवं वइजोगिस्सवि, कायजोगिस्स जह० एक्कं समयं उक्को० अंतो०, अयोगिस्स णत्थि अंतरं । अप्पबहु० सव्वत्थोवा मणजोगी वइजोगी संखिज्जगुणा अजोगा अणंतगुणा कायजोगी अनंतगुणा ।।

वृ. 'तत्थ जे ते एव'मित्यादि, तत्र ये ते एवमुक्तवन्तश्चतुर्विधाः सर्वजीवाः प्रज्ञप्तास्त एवमुक्तवन्तस्तद्यथा–मनोयोगिनो वाग्योगिनः काययोगिनोऽयोगिनश्चेति, तत्र कायस्थितिचिन्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यां मनोयोगो जघन्यत एकं समयं, विशिष्यमनोयोग्यपुद्गलग्रहणापेक्षमेतत्सूत्रं, ततो द्वितीये समये मरणेनोपरमतो भाषकवदेकसमयता प्रतिपत्तव्या, उत्कर्षतोऽन्तर्मुहूर्त्तं, तथा च जीवस्वभावतया नियमत उपरमात् भाषकवत्, मनोयोगरहितवाग्योगवानेव वाग्योगी द्वीन्द्रियादि, जघन्यत एकं समयमुत्कर्षतोऽन्तर्मुहूर्त्तं, एतदपि सूत्रं विशिष्टवाग्द्रव्यग्रहणापेक्षमवसातव्यं, काययोगी वाग्योगमनोयोगविकल एकेन्द्रियादि, जघन्यतोऽन्तर्मुहूर्त्तं, द्वीन्द्रियादिभ्य उद्धृत्य पृथिव्यादिष्वन्तर्मुहूर्त्तं स्थित्वा भूयः कस्यापि द्वीन्द्रियादिषु गमनात्, उत्कर्षतः प्रागुक्तस्वरूपो वनस्पतिकालः, अयोगी सिद्धः, स च साद्यपर्यवसितः ।

अन्तरचिन्त्यां मनोयोगिनोऽन्तरं जघन्येनान्तर्मुहूर्त्तं, तत ऊर्ध्वं भूयो विशिष्टमनोयोग्यपुद्गलग्रहणसम्भवात्, उत्कर्षतो वनस्पतिकालः, तावन्तं कालं स्थित्वा भूयो मनोयोगिष्वागमनसम्भवात्, एवं वाग्योगिनोऽपि जघन्यत उत्कर्षतश्चान्तरं भावनीयं, औदारिककाययोगिनो जघन्यत एकं समयं, औदारिकलक्षणं कायमपेक्ष्यैतत्सूत्रं, यतो द्विसामायिक्यामपान्तरालगतावेकः समयोऽन्तरं, उत्कर्षतोऽन्तर्मुहूर्त्तं, इदं हि सूत्रं परिपूर्णौदारिकशरीरपर्याप्तिपरिसमाप्त्यपेक्षं, यतो द्विसामायिक्यामपान्तरालगतावेकः समयोऽन्तरं, उत्कर्षतोऽन्तर्मुहूर्त्तं, इदं हि सूत्रं परिपूर्णौदारिकशरीरपर्याप्तिपरिसमाप्त्यपेक्षं, तत्र विग्रहसमयादारभ्य यावदौदारिकशरीरपर्याप्तिपरिसमाप्तिस्तावदन्तर्मुहूर्त्तं, तत उक्तमुत्कर्षतोऽन्तर्मुहूर्त्तं, न चैतत्स्वमनीषिकाविजृम्भितं, यत आह चूर्णिकृत्–

'कायजोगिस्स जह० एक्कं समयं, कहं ?, एकसामायिकविग्रहगतस्य उक्कोसं अंतरं अंतोमुहुत्तं, विग्रहसमयादारभ्य औदारिकशरीरपर्याप्तकस्य यावदेवमन्तर्मुहूर्त्तं द्रष्टव्य'मिति, सूत्राणि ह्यमूनि विचित्राभिप्रायतया दुर्लक्ष्याणीति सम्यक्संप्रदायादवसातव्यानि, सम्प्रदायश्च यथोक्तस्वरूप इति न काचिदनुपपत्ति, न च सूत्राभिप्रायमज्ञात्वा अनुपपत्तिरुद्भावनीया, महाशातनायोगतो महाऽनर्थप्रसक्तेः, सूत्रकृतो हि भगवन्तो महीयांसः प्रमाणीकृताश्च महीयस्तरैस्तत्कालवर्त्तिभिरन्यैर्विद्वद्भिस्ततो न तत्सूत्रेषु मनागप्यनुपपत्ति, केवलं सम्प्रदायावसाये यत्नो विधेयः, ये तु सूत्राभिप्रायमज्ञात्वा यथा कथञ्चिदनुपपत्तिमुद्भावयन्ते ते महतो महीयस आशातयन्तीति दीर्घतरसंसारभाजः, आह च टीकाकारः–

"एवं विचित्राणि सूत्राणि सम्यक्संप्रदायादवसेयानीत्यविज्ञाय तदभिप्रायं नानुपपत्तिचोदना कार्या, महाशातनायोगतो महाऽनर्थप्रसङ्गादिति" एवं च ये सम्प्रति दुष्षमानुभावतः प्रवचनस्योपप्लवाय धूमकेतव इवोत्थिताः सकलकालसुकराव्यवच्छिन्नसुविधिमार्गानुष्ठातृसुविहितसाधुषु मत्सरिणस्तेऽपि वृद्धपरम्परायातसम्प्रदायादवसेयं सूत्राभिप्रायमपासयोत्सूत्रं प्ररूपयन्तो महाशातनाभाजः प्रतिपत्तव्या अपकर्णयितव्याश्च दूरतस्तत्ववेदिभिरिति कृतं प्रसङ्गेन

सम्प्रत्यल्पबहुत्वमाह– 'एएसि णं'मित्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! सर्वस्तोका मनोयोगिनो, देवनारकगर्भजतिर्यक्पञ्चेन्द्रियमनुष्याणामेव मनोयोगित्वात्, तेभ्यो वाग्योगिनोऽसङ्ख्येयगुणाः, द्वित्रिचतुरसञ्ज्ञिपञ्चेन्द्रियाणा वाग्योगित्वात्, अयोगिनोऽनन्तगुणाः सिद्धानामनन्तत्वात्, तेभ्यः काययोगिनोऽनन्तगुणाः वनस्पतीनां सिद्धेभ्योऽप्यनन्तत्वात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (३८३) अहवा चउव्विहा सव्वजीवा प० तं०–इत्थिवेयगा पुरिसवेयगा नपुंसकगवेयगा अवेयगा, इत्थिवेयगा णं भंते! इत्थेवेदएत्ति कालतो केवचिरं होति?, गो० पलियसय दसुत्तरं अट्ठारस चोदस पलितपुहुत्तं, समओ जहन्नो, पुरिसवेदस्स जह० अंतो० उक्को० सागरोवमसयपुहत्तं सातिरेगं, नपुंसगवेदस्स जह० एक्को समयं उक्को० अनंतं कालं वणस्सतिकालो।

अवेयए दुविहे प०–सातीए वा अपज्जवसिते सातीए वा सपज्जवसिए से जह० एक्क स० उक्क० अंतोमु०। इत्थिवेदस्स अंतरं जह० अंतो० उक्क० वणस्सतिकालो, पुरिसवेदस्स जह० एगं समयं उक्को० वणस्सइकालो, नपुंसगवेदस्स जह० अंतो० उक्क० सागरोवमसयपुहुत्तं सातिरेगं, अवेदगो जहा हेट्ठा। अप्पाबहु० सव्वत्थोवा पुरिसवेदगा इत्थिवेदगा संखेज्जगुणा अवेदगा अनंतगुणा नपुंसगवेयगा अनंतगुणा।

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण चतुर्विधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–स्त्रीवेदकाः पुरुषवेदका नपुंसकवेदका अवेदकाः। कायस्थितिचिन्तायां स्त्रीवेदकस्य जह० एगं समय'मित्यादि पूर्वं त्रिविधप्रतिपत्तौ प्रपञ्चतो व्याख्यातमिति न भूयो व्याख्ययते, पुरुषवेदस्य जघन्यतोऽन्तर्मुहूर्त्तं, स्त्रीवेदादिभ्य उद्धृत्य पुरुषवेदानामन्तर्मुहूर्त्तं जीवित्वा भूयः स्त्रीवेदादिषु कस्यापि गमनात्।

अथ यथा स्त्रीवेदस्य नपुंसकस्य वा उपशमश्रेणावुपशमे जाते तदनन्तरमेकं समयं तं वेदमनुभूय मृतस्यैकसमयता व्यावर्ण्यते तथा पुरुषवेदस्यापि जघन्यत एकसमयता कस्मान्न भवति? उच्यते, उपशमश्रेण्यन्तर्गतो मृतः सर्वोऽपि पुरुषवेदेषूत्पद्यते नान्यवेदेषु, तेन स्त्रीवेदस्य नपुंसकवेदस्य चोक्तप्रकारेण जघन्यत एकसमयता लभ्यते, न पुरुषवेदस्य, तस्य जन्मान्तरेऽपि सातत्येन गमनात्, ततो जघन्यं पुरुषवेदस्योपदर्शितेनैव प्रकारेणेत्यन्तर्मुहूर्त्तं, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, तच्च देवमनुष्यतिर्यग्भवभ्रमणेन वेदितव्यं, नपुंसकवेदो जघन्यत एकं समयं, स चैकः समय उपशमश्रेणौ वेदोपशमान्तरमेकं समयं नपुंसकवेदमनुभूय मृतस्य परिभावनीयो मरणानन्तरं पुरुषवेदेषूत्पादात्, उत्कर्षतो वनस्पतिकालः, स च प्रागनेकधा दर्शितः, अवेदको द्विविधः–साद्यपर्यवसितः क्षीणवेदः सादिसपर्यवसित उपशान्तवेदः, स च जघन्यत एकं समयं, द्वितीये समये मरणतो देवगतौ पुरुषवेदसम्भवात्, उत्कर्षतोऽन्तर्मुहूर्त्तं, तदनन्तरं मरणतः पुरुषवेदसङ्क्रमन्याप्रतिपाततो येन वेदेनोपशमश्रेणिं प्रतिपन्नस्तद्वेदोदयापत्या सवेदकत्वात्

अन्तरचिन्तायां स्त्रवेदस्यान्तरं जघन्यतोऽन्तर्मुहूर्त्तं, तच्चोपशान्तवेदे पुनरन्तर्मुहूर्त्तेन स्त्रवेदोदयापत्या, यदिवा स्त्रीभ्य उद्धृत्य पुरुषवेदेषु नपुंसकवेदेषु वाऽन्तर्मुहूर्त्तं जीवित्वा पुनः स्त्रीत्वेनोत्पत्या भावनीयं, उत्कर्षतो वनस्पतिकालः, पुरुषवेदस्यान्तरं जघन्यत एकं समयं, पुरुषस्य स्ववेदोपशमसमयानन्तरं मरणे पुरुषेष्वेवोत्पादात्, उत्कर्षतो वनस्पतिकालः, नपुंसकवेदस्य जघन्यतोऽन्तर्मुहूर्त्तं, तच्च स्त्रीवेदोक्तप्रकारेण भावयितव्यं, उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, तत ऊर्ध्वंनियमतः संसारिणः सतो नपुंसकवेदोदयभावात्, अवेदकस्य साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात्, सादिसपर्यवसितस्य जघन्येनान्तर्मुहूर्त्तेन कस्यापि श्रेणिसमारम्भात्, उत्कर्षतोऽनन्तं कालं, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽपार्द्धं पुद्गलपरावर्त्तं देशोनं, तावतः कालादूर्ध्वंपूर्वप्रतिपन्नोपशमश्रेणिकस्य पुनः श्रेणिसमारम्भात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अल्पबहुत्वचिन्तायां सर्वस्तोकाः पुरुषवेदकाः कतित्रयेऽप्यल्पत्वात्, स्त्रीवेदकाः सङ्ख्येयगुणाः, तिर्यग्गतौ त्रिगुणत्वात् (मनुष्यगतौ सप्तविंशतिगुणत्वात्) देवगतौ द्वात्रिंशद्गुणत्वात्, अवेदका अनन्तगुणाः, सिद्धानामनन्तत्वात्, नपुंसकवेदका अनन्तगुणाः, वनस्पतीकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥

मू. (३८४) अहवा चउव्विहा सव्वजीवा पन्नत्ता, तंजहा—चक्खुदंसणी अचक्खुदंसणी अवधिदंसणी केवलिदंसणी ।

चक्खुदंसणी णं भंते!० ?, जह० अंतो० उक्को० सागरोवमसहस्सं सातिरेगं, अचक्खुदंसणी दुविहे पन्नत्ते—अनातीए वा अपज्जवसिए अनाइए वा सपज्जवसिए । ओहिदंसणिस्स जह० एक्क समयं उक्को० दो छावट्ठी सागरोवमाणं साइरेगाओ, केवलदंसणी साइए अपज्जवसिए ॥ चक्खुदंसणिस्स अंतरं जह० अंतोमु० उक्को० वणस्सतिकालो ।

अचक्खुदंसणिस्स दुविहस्स नत्थि अंतरं । ओहिदंसनस्स जह० अंतोमु० उक्कोसे० वणस्सइकालो । केवलदंसणिस्स नत्थि अंतरं । अप्पाबहुयं सव्वत्थोवा ओहिदंसणी चक्खुदंसणी असंखेज्जगुणा केवलदंसणी अनंतगुणा अचक्खुदंसणी अनंतगुणा ।

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण चतुर्विधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा—चक्षुर्दर्शनिनोऽचक्षुर्दर्शनिनोऽवधिदर्शनिनः केवलदर्शनिनः ।

अमीषां कायस्थितमाह—'चक्खुदंसणी णं भंते!' इत्यादि, चक्षुर्दर्शनी जघन्यतोऽन्तर्मुहूर्त्तं, अचक्षुर्दर्शनिभ्य उद्धृ त्य चक्षुर्दर्शनिषूत्पद्य तावन्तं कालं स्थित्वा पुनरचक्षुर्दर्शनिषु कस्यापि गमनात्, उत्कर्षतः सागरोपमसहस्रं सातिरेकं, अचक्षुर्दर्शनी द्विविधः प्रज्ञप्तस्तद्यथा—अनाद्यपर्यवसितो यो न जातुचिदपि सिद्धिं गन्ता, अनादिसपर्यवसितो भव्यविशेषो यः सेत्स्यति, अवधिदर्शनी जघन्यत एकं समयं, अवधिप्रतपत्यनन्तरमेव कस्यापि मरणतो मिथ्यात्वगमनतो दुष्टाध्यवसायभावतोऽवधिप्रतिपातात्, उत्कर्षतो द्वे षट्षष्ठी सागरोपमाणां सातिरेके, तत्रैका षटषष्टि एवं—विभङ्गज्ञानी तिर्यक्पञ्चेन्द्रियो मनुष्यो वाऽधः सप्तम्यामुत्पन्नः, तत्र त्रयस्त्रिंशतं सागरोपमाणि स्थित्वा तत्र च प्रत्यासन्ने उद्वर्त्तनाकाले सम्यकत्वं प्राप्य पुनः परित्यजति ततोऽप्रतिपतितेनैव विभङ्गेन पूर्वकोटयायुष्केषु तिर्यक्षु जातस्ततः पुनरप्यप्रतिपतितविभङ्ग एवाधः सप्तम्यामुत्पन्नः, तत्र च त्रयस्त्रशतं सागरोपमाणि स्थित्वा पनरप्युद्वर्त्तनाकाले प्रत्यासन्ने सम्यक्त्वं प्राप्य पुनः परित्यजति, ततः पुनरप्यप्रतिपतितेनैव विभङ्गेन पूर्वकोटयायुष्केषु तिर्यक्षूपजातो, वेलाद्वयमपि चाविग्रहेणाधः सप्तम्यास्तिर्क्षूत्पादयितव्यः ।

विग्रहे विभङ्गस्य प्रतिषेधात्, उक्तं च—''विभंगनाणी पंचेंदियतिरिक्खजोणिया मणूया य आहारगा नो अनाहारगा'' इति, नन्वपान्तराले किमर्थं सम्यक्त्वं प्रतिपाद्यते?, उच्यते, विभङ्गस्य स्तोककालावस्थायित्वात्, उक्तञ्च—''विभंगनाणी जह० एगं समयं उक्को० तेत्तीसं सागरोवमाइं देसूणाए पुव्वकोडीए अब्महियाइं''ति, तदनन्तरमप्रतिपतितविभङ्ग एव मनुष्यत्वं प्राप्य सम्यक्त्वपूर्वं संयममासाद्य विजयादिषु वारद्वयमुत्पद्यमानस्य द्वितीया षट्षष्टिर्भावनीया अवधिदर्शनं च विभङ्गेऽवधिज्ञाने च तुल्यमतो द्वे षटषष्टी सागरोपमाणां सातिरेके स्थितिरवधिदर्शनिनः, केवलदर्शनी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साद्यपर्यवसितः।

साम्प्रतमन्तरमाह– 'चक्खुदंसणिस्स णं भंते!' इत्यादि, चक्षुर्दर्शनिनोऽन्तरं जघन्येनान्तर्मुहूर्त्तं तावत्प्रमाणेनाचक्षुर्दर्शनभवेन व्यवधानात्, उत्कर्षतो वनस्पतिकालः, स च प्रागुक्तस्वरूपः, अचक्षुदर्शनिनोऽनाद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात्, अनादिसपर्यवसितस्य नास्त्यन्तरं अचक्षुर्दर्शनित्वापगमे भूयोऽचक्षुर्दर्शनित्वायोगात्, क्षीणघातिकर्म्मणः प्रतिपातासम्भवात्, अवधिदर्शनिनो जघन्येनैकं समयमनतरं, प्रतिपातसमयानन्तरसमय एव कस्यापि पुनस्तल्लाभभावात्, क्वचिदन्तर्गुहूर्त्तमिति पाठः, स च सुगमः तावता व्यवधानेन पुनस्तल्लाभभावात्, न चायं निर्मूलः पाठो, मूलटीकाकारेणापि मतान्तरेण समर्थितत्वात्, उत्कर्षतो वनस्पतिकालः, तावतः कालादूर्द्धमवश्यमवधिदर्शनसम्भवात्, अनादिमिथ्यादृष्टेरप्यिरोधात्, ज्ञानं हि सम्यक्त्वसचिवं न दर्शनमपीति भावना, केवलदर्शनिलः साद्यपर्यवसितस्य नास्त्यन्तरमपर्यवसितत्वात्।

अल्पबहुत्वचिन्तायां सर्वस्तोका अवधिदर्शनिनो, देवनारककतिपयगर्भजतिर्यकपञ्चेन्द्रियमनुष्याणामेव तद्भावात्, चक्षुर्दर्शनिनोऽसङ्ख्येयगुणाः, संमूर्च्छिमतिर्यकपञ्चेन्द्रियचतुरिन्द्रियाणामपि तस्य भावात्, केवलदर्शनिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्योऽचक्षुर्दर्शनिनोऽनन्तगुणाः, एकेन्द्रियाणामप्यचक्षुर्दर्शनित्वात् ॥

मू. (३८५) *अहवा चउव्विहा सव्वजीवा पन्नत्ता, तंजहा–संजया असंजया संजयासंजया नोसंजयानोअसंजयानोसंजयासंजया।*

संजए णं भंते!० ? जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी, असंजया जहा अन्नाणी, संजयासंजते जह० अंतोमु० उक्को० देसूणा पुव्वकोडी, नोसंजतनोअसंजयनोसंजयासंजए सातीए अपज्जवसिए, संजयस्स संजयासंजयस्स दोण्हवि अंतरं जह० अंतोमु० उक्को० अवड्ढं पोग्गलपरियट्टं देसूणं, असंजयस्स आदिदुवे नत्थि अंतरं, सातीयस्स सपज्जवसियस्स जह० एक्कं स० उक्को० देसूणा पुव्वकोडी, चउत्थगस्स नत्थि अंतरं।

अप्पबहु० सव्वत्थोवा संजयासंजया संजया असंखेज्जगुणा नोसंजयनोअसंजयनोसंजयांजया अनंतगुणा असंजया अनंतगुणा ॥ सेत्तं चउव्विहा सव्वजीवा पन्न्ता ॥

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण सर्वजीवाश्चतुर्विधाः प्रज्ञप्तास्तद्यथा–संयताः असंयताः संयतासंयताः नोसंयतानोअसंयतानो संयतासंयताः।

कायस्थितिमाह–'संजए णं भंते!' इत्यादि, संयतो जघन्यत एकं समयं, सर्वविरतिपरिणामसमयानन्तरसमय एव कस्यापि मरणात्, उत्कर्षतो देशोना पूर्वकोटी, असंयतस्त्रिविधः– अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्रानाद्यपर्यवसितो यो न जातुचिदपि संयमं प्राप्स्यति, अनादसपर्यवसितो यः संयमं लप्स्यति, लब्धेन च तेनैव संयमने सिद्धिं गन्ता, सादिसपर्यवसितो सर्वविरतेर्देशविरतेर्वा परिभ्रष्टः, स हि सादि नियमभाविसपर्यवसितत्वापेक्षया च सपर्यवसितः, स च जघन्येनान्तर्मुहूर्त्तं, तावता कालेन कस्यापि संयतत्वलाभात् 'तिण्हं सहस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुहुत्त'मित्यादि वचनात्, उत्कर्षतोऽनन्तं कालं, अनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रतोऽपार्द्धं पुद्गलपरावर्त्तं देशोनं, संयतासंयतो जघन्येनान्तर्मुहूर्त, संयतासंयतत्वप्रतिपत्तेः भङ्गबहुलतया जघन्यतोऽप्येतावन्मात्रकालप्रमाणत्वात्, उत्कर्षतो देशोना पूर्वकोटी, बालकाले तदभावात्, त्रितयप्रतिषेधवर्त्ती सिद्धः, स च साद्यपर्यवसित एव।

अन्तरमाह–'संजयस्स ण'मित्यादि, संयतस्य जघन्येनान्तरमन्तर्मुहूर्तं, तावता कालेन पुनः कस्यापि संयतत्वलाभात्, उत्कर्षतोऽनन्तरं कालं, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽपार्द्धं पुद्गलपरावर्त्तं देशोनम्, एतावतः कालादूर्द्धं पूर्वमवाप्तसंयमस्य नियमतः संयमलाभात्, अनाद्यपर्यवसितस्यासंयतस्य नास्त्यन्तरमपर्यवसितत्वात्, अनादिसपर्यवसितस्यापि नास्त्यन्तरं, तस्य प्रतिपातासम्भवात्, सादिसपर्यवसितस्य जघन्यत एकं समयं, स चैकसमयः प्राग्व्यावर्णितः संयतमसमयः, एवमुत्क्षतो देशोना पूर्वकोटी, असंयतत्वव्यवधायकस्य संयतकालस्य संयतासंयतकालस्य वा उत्कर्षतोऽप्येतावत्प्रमाणत्वात्, संयतासंयतस्य जघन्यतोऽन्तर्मुहूर्त्तं, तद्भावपाते एतावता कालेन तल्लाभसिद्धेः, उत्कर्षतः संयतवत्, त्रितयप्रतिषेधवर्त्तिनः सिद्धस्य साद्यपर्यवसितस्य नास्त्यन्तरं अपर्यवसिततया सदा तद्भावापरित्यागात्।

अल्पबहुत्वमाह–'एएसि ण'मित्यादि, सर्वस्तोका जीवाः संयताः, सङ्ख्येयकोटीकोटी-प्रमाणत्वात्, संयतासंयता असङ्ख्येयगुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तत्वात्।

उपसंहारमाह–'सेत्त'मित्यादि ॥ उक्ताश्चतुर्विधाः सर्वजीवाः, सम्प्रति पञ्चविधानाह–

तृतीया सर्वजीवाप्रतिपत्तिः समाप्ता

–ः चतुर्थी सर्वजीवा प्रतिपत्तिः :–

मू. (३८६) *तत्थ जे ते एवमाहंसु पंचविधा सव्वजीवा पन्नत्ता ते एवमाहंसु, तंजहा–कोहकसायी मानकसायी मायाकसायी लोभकसायी अकसायी।*

कोहकसाई मानकसाई मायाकसाई णं जह० अंतो० उक्को० अंतोमु०, लोभकसाइस्स जह० एकं स० उक्को० अंतो०, अकसाई दुविहे जहा हेट्ठ ॥ कोहकसाईमानकसाईमायाकसाईणं अंतरं जह० एक्को० स० उक्को० अंतो० लोहकसाइस्स अंतरं जह० अंतो० उक्को० अंतो०, अकसाई तहा जहा हेट्ठा। अप्पाबहु–

वृ. 'तत्थ जे ते' इत्यादि, तत्र ये ते एवमुक्तवन्तः पञ्चविधाः सर्वजीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा–क्रधकषायिणो मानकषायिणो मायाकषयिणो लोमकषायिणोऽकषायिणश्च।

अमीषां कायस्थितिमाह–'कोहकसाई णं भंते' इत्यादि, क्रोधकषायी जघन्येनैकं संमयं, स चोपशमश्रेणेः प्रतिपतन् लोभकषायोदयप्रथमसमयानन्तरं मृतः प्रतिपत्तव्यो, मरणसमये कस्यापि क्रोधाद्युदयसम्भवात्, क्रमेण प्रतिपतनं हि मरणाभावे न तु मरणेऽपीति, उत्कर्षतोऽन्तर्मुहूर्त्तं, अकषायी द्विविधः–साद्यपर्यवसितः केवली, सादिसप्यवसित उपशान्त-कषायः, स च जघन्येनैकं समयं द्वितीये समये मरणतः क्रोधाद्युदयेन सकषायत्वप्राप्तेः, उत्कर्षतोऽन्तर्मुहूर्त्तमुपशान्त- मोहगुणस्थानककालस्यैतावत्प्रमाणत्वादित्येके, अन्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वमिदधर्ति—जघन्यतोऽप्यन्तर्मुहूर्त्तं, न लोभोपशमप्रवृत्तस्यान्तेऽन्तर्मुहूर्तादधो मरणमिति वृद्धावादात्, उत्कर्षतोऽप्यन्तर्मुहूर्त्तमुपशान्त-मोहगुणस्थानककालस्योत्कर्षतोऽप्येतावन्मात्रत्वात्, नवरं जघन्यपदादुत्कृष्टपदं विशेषाधिक-मवसातव्यं, युक्तं चैतत् सूत्रकृतोऽभिप्रायेण प्रतिभासते, लोभकषायिणो जघन्यत उत्कर्षत- श्चान्तर्मुहूर्त्तान्तराभिधान्त, वक्ष्यति च—"लोभकसायइस्स जह० अंतो० उक्कोसेणवि अंतोमुहुत्त-मंतर"मिति ॥

साम्प्रतमन्तरमाह—'कोहकसाइस्स णं भंते!' इत्यादि, क्रोधकषायिणोऽन्तरं जघन्येनैकं समयं, तदपशमसमयानन्तरं मरणे भूयः कस्यापि तदुदयात्, उत्कर्षतोऽन्तर्मुहूर्त्तं, एवं मानकषायिमायाकषायिसूत्रे अपि वक्तव्ये, लोभकषायिणो जघन्येनोत्कृष्टेनाप्यन्तर्मुहूर्त्तं नवरमुत्कृष्टं बृहत्तरमवसातव्यम्, अकषायिणः साद्यपर्यवसतिस्य नास्त्यन्तरं अपर्यवसितत्वात्, सादिसपर्यवसितस्य जघन्येनान्तर्मुहूर्त्तं, तावता कालेन भूयः श्रेणिलाभात्, उत्कर्षतोऽनन्तं कालं, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कालतः, क्षेत्रतोऽपार्द्धपुद्गलरावर्त्त देशोनं, पूर्वमनुभूताकषायित्वस्यैतावता कालेन भूयो नियमेनाकषायित्वभावात् ।

मू. (३८७) *अकसाईणो सव्वत्थोवा मानकसाई तहा अनंतगुणा ।*
कोहे माया लोभे विसेसमहिया मुणेतव्वा ॥

वृ. अल्पबहतुवचिन्तायां सर्वस्तोका अकषायिणः, सिद्धानामेवाकषयातिव्ता, तेभ्यो मानकषायिणोऽनन्तगुणाः, निगोदजीवानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्यः क्रोधकषायिणो विशेषाधिकाः, क्रोधकषायोदयस्य चिरकालावस्थायित्वात्, एवं तेभ्यो मायाकषायिणो विशेषाधिकाः, तेभ्यो लोभकषायिणो विशेषाधिकाः, मायालोभोदययोश्चिरतरकालावस्थायित्वात् ॥

मू. (३८८) *अहवा पंचविहा सव्वजीवा पन्नत्ता, तंजहा—नेरइया तिरिक्खजोणिया मणुस्सा देवा सिद्धा । संचिट्ठणांतराणि जह हेट्ठा भणियाणि । अप्पाबहु० थोवा मणुस्सा नेरइया असंखेज्जगुणा देवा असंखेज्जगुणा सिद्धा अनंतगुणा तिरिया अनंतगुणा । सेत्तं पंचविहा सव्वजीवा पन्नत्ता ॥*

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण पञ्चविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा—नैरयिकास्तिर्यञ्चो मनुष्या देवाः सिद्धाः, अमीषां कायस्थितिरन्तरमल्पबहुत्वं च प्रागेवाभिहितमिति न भूयो भाव्यते । उपसंहारमाह—'सेत्तं पंचविहा सव्वजीवा पन्नत्ता' ॥ तदेवमुक्ताः पञ्चविधाः सर्वजीवाः, सम्प्रति षडविधानाह—

चतुर्थी सर्वजीवा प्रतिपत्तिः समाप्ता

—: पञ्चमी सर्वजीवा प्रतिपत्तिः :—

मू. (३८९) *तत्थ जे ते एवमाहंसु छव्विहा सव्वजीवा पन्नत्ता ते एवमाहंसु, तंजहा—आभिनिबोहियनाणी सुयनाणी ओहिनाणी मणपज्जवनाणी केवलनाणी अन्नाणी, आभिणिबोहियनाणी णं भंते! आभिनिबोहियनाणित्ति कालओ केवचिरं होइ?*

गोयमा! जह० अन्तोमुहुत्तं उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं एवं सुयनाणीवि, ओहिनाणी णं भंते!०?, जह० एक्कं समयं उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं, मनपज्जवनाणी णं भंते!०?, जह० एक्कं समयं उक्को० देसूणा पुव्वकोडी, केवलनाणी णं भंते!०? सादीए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपज्जवसिए।

अन्नाणिणो तिविहा पं० तं०— अनाइए वा अपज्जवसिए अनाइए वा सपज्जवसिए साइए वा सपज्जवसिए, तत्थ साइए सपज्जवसिए जह० अंतो० उक्को० अनंतं कालं उवड्ढं पुग्गलपरियट्टं देसूणं।

अंतरं आभिनिबोहियनाणिस्स जह० अंतो० उक्को० अनंतं कालं अवड्ढं पुग्गलपरियट्टं देसूणं एवं सुय० अंतरं० मनपज्जव०, केवलनाणिणो णंत्थि अंतरं, अन्नाणि० साइसपज्जवसियस्स जह० अंतो० उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं। अप्पा० सव्वत्थोवा मन० ओहि० असंखे० आभि० सुय० विसेसा० सङ्काणे दोवि तुल्ला केव० अनत० अन्नाणी अनतगुणा।

अहवा छव्विहा सव्वजीवा पण्णत्ता तंजहा— एगिंदिया बेंदिया तेंदिया चउरिंदिया पंचेंदिया अनिंदिया। संचिट्ठणांतरा जहा हेट्ठा।

अप्पाबहु—सव्वत्थोवा पंचेदिया चउरिंदिया विसेसा० तेइंदिया विसेसा० बेंदिया विसेसा० एगिंदिया अनतगुणा अनिंदिया अनंतगुणा॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तः षड्विधाः सर्वजीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा—आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनो मनःपर्यवज्ञानिनः केवलज्ञानिनोऽज्ञानिनश्च।

सम्प्रत्यमीषां कायस्थितिमाह—'आभिनिबोहियनाणी णं भंते!' इत्यादि, आभिनिबोधिकज्ञानी जघन्येनान्तर्मुहूर्तं, सम्यक्त्वकालस्य जघन्यत एवावन्मात्रत्वात्, उत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि, तानि च विजयादिषु वारद्वयादिगमनेन भावनीयानि, एवं श्रुतज्ञानिनोऽपि वक्तव्यं, आभिनिबोधिकश्रुतज्ञानयोः परस्पराविनाभूतत्वात्, 'जत्थ आभिनिबोहियणाणं तत्थ सुयनाणं, जत्थ सुयनाणं तत्थ आभिणिबोहियनाणं, दोवि एयाइं अन्नोन्नमणुगयाइं' इति वचनात्, अवधिज्ञानि जघन्यत एकं समयं, सा चैकसमयता मरणतः प्रतिपातेन मिथ्यात्वगमनतो वा विभङ्गज्ञानभावतः प्रतिपत्तव्या, उत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि, तान्याभिनिबोधिकज्ञानवद्भावनीयानि, मनःपर्यवज्ञानी जघन्यत एकं समयं, द्वितीय समये मरणतः प्रतिपातात्, उत्कर्षतो देशोना पूर्वकोटी, चारित्रकालस्योत्कर्षतोऽप्येतावन्मात्रत्वात्, केवलज्ञानी साद्यपर्यवसितः।

अज्ञानी त्रिविधः प्रज्ञप्तस्तद्यथा—अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र योऽसौ सादिसपर्यवसितोऽसौ जघन्येनान्तर्मुहूर्त्तं, तत ऊर्ध्वं कस्यापि सम्यक्त्वकालमतो भूयोऽपि ज्ञानित्वभावात्, उत्कर्षतोऽनन्तं कालं यावदपार्द्ध देशोनं पुद्गलपरावर्त्तं, ज्ञानित्वात्परिभ्रष्टस्यैतावता कालेन नियमतो भूयोऽपि ज्ञानित्वभावात्।

अन्तरचिन्तायामाभिनिबोधिकज्ञानिनो जघन्येनान्तरमन्तर्मुहूर्त्तं, कस्याप्येतावत्कालेन भूयोऽप्याभिनिबोधिकज्ञानित्वभावात्, उत्कर्षतोऽनन्तं कालं यावदपार्द्ध पुद्गल परावर्त्त देशोनं, एवं श्रुतज्ञानिनोऽवधिज्ञानिनो मनःपर्यवज्ञानिनश्चान्तरं वक्तव्यं, केवलज्ञानिनः साद्यपर्यवसितत्वान्नास्त्यन्तरं, अज्ञानिनोऽनाद्यपर्यवसितस्य नास्त्यन्तरं अपर्यवसितत्वात्, अनादिसपर्यवसितस्यापि नास्त्यन्तरं भूयस्तद्भावायोगात्, पुनरज्ञानित्वं हि भवत् सादिसपर्यवसितं भवति न त्वनादिसपर्यवसितं, सादिसपर्यवसितस्य जघन्यतोऽन्तर्मुहूर्त, तावता कालेन भूयोऽपि कस्याप्यज्ञानित्वप्राप्तेः, उत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अल्पबहुत्वचिन्तायां सर्वस्तोका मनःप्रयवज्ञानिनश्चारित्रिणामेव केषाञ्चित्तिद्भावात् 'तं संजयस्स सव्वप्पमायरहियस्सविविधरिद्धिमतो' इति वचनात्, तेभ्योऽवधिज्ञानिनोऽसङ्ख्यातगुणाः, देवनारकाणामप्यवधिज्ञानभावात्, तेभ्य आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च द्वयेऽपि विशेषाधिकाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, आभिनिबोधिकश्रुतज्ञानयोः परस्पराविनाभावात्, तेभ्यः केवलज्ञानिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्योऽज्ञानिनोनन्तगुणाः, वनस्पतिकायानां सिद्धेभ्योऽप्यनन्तत्वात् । 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण षड्विधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–एकेन्द्रिया द्वीन्द्रियास्त्रिन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रिया अनिन्द्रियाः । एतेषां कायस्थितिरन्तरमल्पबहुत्वं प्रागेव भावितम् ॥

मू. (३९०) *अहवा छव्विहा सव्वजीवा पन्नत्ता तंजहा–ओरालियसरीरी वेउव्वियसरीरी आहारगसरीरी तेयगसरीरी कम्मगसरीरी असरीरी ।*

ओरालियसरीरी णं भंते! कालओ केवचिरं होइ?, जहन्नेणं खुड्डागं भवगहणं दुसमऊणं, उक्कोसेणं असंखिज्जं कालं जाव अंगुलस्स असंखेज्जतिभागं, वेउव्वियसरीरी जह० एक्कं समयं उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, आहारगसरीरी जह० अंतो० उक्को अंतो०

तेयगसरीरी दुविहे–अनादीए वा अपज्जवसिए अनादीए वा सपज्जवसिते, एवं कम्मगसरीरीवि, असरीरी सातीए अपज्जवसिते ।

अंतरं ओरालियसरीरस्स जह० एक्कं समयं उक्को० तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, वेउव्वियसरीरस्स जह० अंतो० उक्को० अनंतं कालं वणस्सतिकालो, आहारगस्स सरीरस्स जह० अंतो० उक्को० अनंत कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं, तेय० कम्मसरीरस्स य दुण्हवि नत्थि अंतरं ॥

अप्पाबहु० सव्वत्थोवा आहारगसरीरी वेउव्वियसरीरी असंखेज्जगुणा ओरालियसरीरी असंखेज्जगुणा असरीरी अनंतगुणा तेयाकम्मसरीरी दोवि तुल्ला अनंतगुणा ॥ सेत्तं छव्विहा सव्वजीवा पन्नत्ता ॥

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण षड्विधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा–औदारिकशरीरिणः वैक्रियशरीरिणः आहारकश० : तैजसश० कार्मणशरीरिणः अशरीरिणश्च ।

अमीषां कायस्थितिमाह–'ओरालियसरीरी णं भंते' इत्यादि, औदारिकशरीरी जघन्यतः क्षुल्लकभवग्रहणं द्विसमयोनं, विग्रहे आद्ययोर्द्वयोः समययोः कार्मणशरीरित्वात्, उत्कर्षतोऽसङ्ख्येयं कालं तावन्तं कालमविग्रहेणोत्पादसम्भवात् ।

वैक्रियशरीरी जघन्येनैकं समयं, विकुर्वणासमयानन्तरसमये एव कस्यापि मरणसम्भवात्, उत्कर्षतस्त्रिंयस्त्रशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यदिकानि, तानि चैवं–कश्चिच्चारित्रवान् वैक्रियशरीरं कृत्वाऽन्तर्मुहूर्त्तं जीवित्वा स्थितिक्षयादविग्रहेणानुत्तरसुरेषूपजायते, आहारकशरीरी जघन्येनाप्यन्तर्मुहूर्त्तमुत्कर्षतोऽप्यन्तर्मुहूर्त्तं, तैजसशरीरी कार्मणशरीरी च प्रत्येकं द्विविधः–अनाद्यपर्यवसितो यो न मुक्तिं गन्ता, अनादिसपर्यवसितो मुक्तिगामी, अशरीरी साद्यपर्यवसितः

अन्तरचिन्तायामौदारिकशरीरिणोऽन्तरं जघन्यत एकः समयः, स च द्विसामयिक्यामपान्तरालगतौ भावनीयः, प्रथमे समये कार्मणशरीरोपेतत्वात्, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिकानि, उत्कृष्टो वैक्रियकाल इति भावः, वैक्रियशरीरिणोऽन्तरं जघन्यतोऽन्तर्मुहूर्त्तं

सकृद्वैक्रियकरमे एतावता कालेन पुनर्वैक्रियकरणात् मानवदेवेषु भावात्, उत्कर्षतो वनस्पतिकालः प्रकट एव, आहारकशरीरिमो जघन्येनान्तर्मुहूर्त्तं, सकृत्करणे एतावता कालेन पुनः करणात्, उत्कर्षतोऽनन्तं कालं यावदपार्द्धं पुद्गलपरावर्त्तं, तैजसकार्म्मणशरीरयोर्द्विधाऽपि नास्त्यन्तरं।

अल्पबहुत्वचिन्तयां सर्वस्तोका आहारकशरीरिणः, उत्कर्षतोऽपि सहस्रपृथक्त्वेन प्राप्यमाणत्वात्, तेभ्यो वैक्रियशरीरिणोऽसङ्ख्येयगुणाः, इहानन्तानामपि जीवानां यस्मादेकमौदारिकं शरीरं ततः स एक औदारिकशरीरी परिगृह्यते ततोऽसङ्ख्येयगुणा एवौदारिकशरीरिणो नानन्तगुणाः, आह च मूलटीकाकारः–

"औदारिकशरीरिभ्योऽशरीरा अनन्तगुणाः, सिद्धानामनन्तत्वात्, औदारिकशरीरिणां च शीरापेक्षयाऽसङ्ख्येयत्वा"दिति, तेभ्योऽशरीरिणोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यस्तैजसशरीरिणः कार्मणशरीरिणश्चानन्तगुणाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तैजसकार्मणयोः परस्पराविनाभावात्, इह तैजसशरीरं कार्मणशरीरं च निगोदेष्वपि प्रतिजीवं विद्यत इति सिद्धेभ्योऽप्यनन्तगुणत्वम्। उपसंहारमाह–'सेत्तं छव्विहा सव्वजीवा पन्नत्ता'॥ उक्ताः षड्विधाः सर्वजीवाः, सम्प्रति सप्तविधानाह–

पञ्चमी सर्वजीवा प्रतिपत्तिः समाप्ता

–: षष्ठी सर्वजीवा प्रतिपत्तिः :–

मू. (३९१) *तत्थ जे ते एवमाहंसु सत्तविध सव्वजीवा पं० ते एवमाहंसु, तंजहा– पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणस्सतिकाइया तसकाइया अकाइया। संचिट्ठणंतरा जहा हेट्ठा। अप्पाबहु० सव्वत्थोवा तसकाइया तेउकाइया असंखेज्जगुणा पुढविकाइया विसे० आउ० विसे० वाउ० विसेसा० सिद्धा अनंतगुणा वणस्सइकाइया अनंतगुणा॥*

वृ. 'तत्थ जे ते' इत्यादि, तत्र ये ते एवमुक्तवन्तः सप्तविधाः सर्वजीवाः प्रज्ञप्तास्ते एवमुक्तवन्तस्तद्यथा–पृथिवीकायिका अप्कायिकाः तेजस्कायिका वायुकायिका वनस्पतिकायिकाः त्रसकायिकाः अकायिकाश्च। पृथिवीकायिकादीनां कायस्थितिरन्तरमल्पबहुत्वं च प्रागेव भावितमिति न भूयो भाव्यते॥

मू. (३९२) *अहवा सत्तविहा सव्वजीवा प० तंजहा–कण्हलेस्सा नीललेस्सा काउलेस्सा तेउलेस्सा पम्हलेस्सा सुक्कलेस्सा अलेस्सा।*

कण्हलेसे णं भंते! कण्हलेसत्ति कालओ केवचिरं होइ, गोयमा! ज० अंतो० उक्को० तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, नीललेस्से णं जह० अंतो० उक्को० दस सागरोवमाइं पलिओवमस्स असंखेज्जतिभागअब्भहियाइं, काउलेस्से णं भंते!०, जह० अंतो० उक्को० तिन्नि सागरोवमाइं पलिओवमस्स असंखेज्जतिभागमब्भहियाइं।

तेउलेस्से णं भंते!, जह० अं० उक्को० दोन्नि सागरोवमाइं पलिओवमस्स असंखेज्जइभागमब्भहियाइं, पम्हलेसे णं भंते! जह० अंतो० उक्को० दस सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, सुक्कलेसे णं भंते!०?, जहन्नेणं अंतो० उक्कोसेणं तित्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, अलेस्से णं भंते! सादीए अपज्जवसिते।

कण्हलेसस्स णं भंते! अंतरं कालओ केवचिरं होति?, जह० अंतो० उक्को० तेत्तीसं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागरोवमाइं अंतोमुहुत्तम०, एवं नीललेसस्सवि, काउलेसस्सवि, तेउलेसस्स णं भंते ! अंतरं का० ?, जह० अंतो० उक्को० वणस्सतिकालो, एवं पम्हलेस्सवि सुक्कलेसस्सवि दोण्हवि एवमंतरं, अलेसस्स णं भंते ! अंतरं कालओ० ?, गोयमा ! सादीयस्स अपज्जवसियस्स नत्थि अंतरं । एतेसि णं भंते ! जीवाणं कण्हलेसाणं नीललेसाणं काउले० तेउ० पम्ह० सुक्क० अलेसाण य कयरे २ ?०, गोयमा ! सव्वत्थोवा सुक्कलेस्सा पम्हलेस्सा संखेज्जगुणा तेउलेस्सा संखिज्जगुणा अलेस्सा अनंतगुणा काउलेस्सा अनंतगुणा नीललेस्सा विसेसाहिया कण्हलेस्सा विसेसाहिया । सेत्तं सत्तविहा सव्वजीवा पन्नत्ता ॥

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण सर्वजीवाः सप्तविधाः प्रज्ञप्तास्तद्यथा- कृष्णलेश्याः नीललेश्याः कापोतलेश्याः तेजोलेश्याः पद्मलेश्याः सुक्ललेश्याः अलेश्याः ।

साम्प्रतमेतेषां कायस्थितिमाह- 'कण्हलेसे णं भंते !' इत्यादि, कृष्णलेश्या जघन्यतोऽन्तर्मुहूर्तं, तिर्यङ्मनुष्याणां कृष्णलेश्याया अन्तर्मुहूर्तावस्थायित्वात्, उत्कर्षतस्त्रिंयस्त्रशत्सागरोपमाणि अन्तर्मुहूर्ताभ्यधिकानि, देवनारका हि पाश्चात्यभवगतचरमान्त- र्मुहूर्तादारभ्याग्रेतनभवगतप्रथमान्तर्मुहूर्त्त यावदवस्थितलेश्याकाः, अधःसप्तमपृथिवीनारकाश्च कृष्णलेश्याकाः पाश्चात्याग्रेतनभवगतचरमादिमान्तर्मुहूर्ते द्वे अप्येकमन्तर्मुहूर्तं, तस्यासङ्ख्यातभेदात्मकत्वात्, तत उपपद्यन्ते कृष्णलेश्याकस्यान्तर्मुहूर्ताभ्यधिकानि त्रयस्त्रिंशत्सागरोप० ।

नीललेश्याको जघन्यतोऽन्तर्मुहूर्तं तच्च प्राग्वत्, उत्कर्षतो दश सागरोपमाणि पल्योपमासङ्ख्येयभागाधिकानि, धूमप्रभाप्रथमप्रस्तटनारकाणां नीललेश्याकानामेतावत्स्थितिकत्वात्, पाश्चात्याग्रेतनभवगते च चरमादिमान्तर्मुहूर्ते पल्योपमासङ्ख्येयभागान्तःप्रविष्टे न पृथग्विवक्षिते, कापोतलेश्याको जघन्येनान्तर्मुहूर्तं प्राग्वत्, उत्कर्षतस्त्रीणि सागरोपमाणि पल्योपमासङ्ख्येयभागाभ्यधिकानि, वालुकाप्रथमप्रस्तटगतनारकाणां कापोतलेश्याकानामेतावत्स्थितिकत्वात्, तेजोलेश्याको जघन्येनान्तर्मुहूर्तं तथैव उत्कर्षतो द्वे सागरोपमे पल्योपमासङ्ख्येयभागाभ्यधिके, ते चेशानदेवानामवसातव्ये, पद्मलेश्याको जघन्येनान्तर्मुहूर्तं प्राग्वत्, उत्कर्षतो दश सागरोपमाणि अन्तर्मुहूर्ताभ्यदिकानि, तानि ब्रह्मलोकवासिनां देवानामवसातव्यानि, शुक्ललेश्याको जघन्यतोऽन्तर्मुहूर्तं प्राग्वत्, उत्कर्षतस्त्रयस्त्रिंशत् सागरोपमाणि अन्तर्मुहूर्ताभ्यधिकानि, तानि चानुत्तरसुराणां प्रतिपत्तव्यानि, तेषां शुक्ललेश्याकत्वात् ॥

अन्तरचिन्तायां कृष्णलेश्याकस्यान्तरं जघन्यतोऽन्तर्मुहूर्तं, तिर्यङ्मनुष्याणामन्तर्मुहूर्तेन लेश्यापरावर्त्तनात्, उत्कर्षतस्त्रिंयस्त्रशत्सागरोपमाण्यन्तर्मुहूर्ताभ्यधिकानि, शुक्ललेश्योत्कृष्टकालस्य कृष्णलेश्यान्तरोत्कृष्टकालत्वात्, एवं नीललेश्याकापोतलेश्ययोरपि जघन्यत उत्कर्षतश्चान्तं वक्तव्यं, तेजःपद्मशुक्लानामन्तरं जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतो वनस्पतिकालः, लान्तकादिदेवानां पर्याप्तगर्भव्युत्क्रान्तिककतिपयपञ्चेन्द्रियतिर्यङ्मनुष्याणां च पद्मलेश्याकत्वात्, अथ लान्तकादिदेवेभ्यः सनत्कुमारादिकल्पत्रयवासिनो देवा असङ्ख्यातगुणाः ततः शुक्ललेश्येभ्यः पद्मलेश्या असङ्ख्यातगुणा- प्राप्नुवन्ति, कथं सङ्ख्येयेगुणा उक्ताः ?

उच्यते, इह जघन्यपदेऽप्यसङ्ख्यातानां सनत्कुमारादिकल्पत्रयवासिभ्योऽसङ्ख्येयगुणानां पञ्चेन्द्रियतिरश्चा शुक्ललेश्या, ततः पद्मलेश्याकाः शुक्ललेश्याकेभ्यः सङ्ख्येयगुणाः, तेजोलेश्याकाः देभ्योऽपि सङ्ख्येयगुणाः, तेभ्योऽपि सङ्ख्येयगुणेषु तिर्यक्पञ्चेन्द्रियमनुष्येषु भवनपतिव्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तरज्योतिष्कसौधर्मेशानदेवेषु च तेजोलेश्याभावात्, भावना सङ्ख्येयगुणत्वे प्राग्वत्, तेभ्योऽप्यनन्तगुणा अलेश्याः, सिद्धानामनन्तत्वात्, तेभ्योऽपि कापोतलेश्या अनन्तगुणाः, सिद्धेभ्योऽप्यनन्तगुणानां वनस्पतिकायिकानां कापोतलेश्यावतां सद्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, क्लिष्टतराध्यवसायानां प्रभूततराणां सद्भावात्। उपसंहारमाह–'सेत्तं सत्तविहा सव्वजीवा पन्नत्ता' ॥ उक्ताः सप्तविधाः सर्वजीवाः, साम्प्रतमष्टविधानाह–

षष्ठी सर्वजीवा प्रतिपत्तिः समाप्ता

–: सप्तमी सर्वजीवा प्रतिपत्तिः :–

मू. (३९३) *तत्थ जे ते एवमाहंसु अट्ठविहा सव्वजीवा पन्नत्ता ते णं एवमाहंसु, तंजहा– आभिनिबोहियनाणी सुय० ओहि० मन० केवल० मतिअन्नाणी सुयअन्नाणी विभंगअन्नाणी*

आभिनिबोहियनाणी णं भंते ! आभिनिबोहियनाणीत्ति कालओ केवचिरं होति ?, गोयमा ! जह० अंतो० उक्को० छावट्ठिसागरोवमाइं सातिरेगाइं सातिरेगाइं, मनपज्जवणाणी णं भंते !० ? जह० एक्कं स० उक्को० देसूणा पुव्वकोडी ।

केवलनाणी णं भंते !० ? सादीए अपज्जवसिते, मतिअन्नाणी णं भंते !० ? मइअन्नाणी तिविहे पन्नत्ते तं० अणाइए वा अपज्जवसिए अनादीए वा सपज्जवसिए सातीए वा सपजजवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जह० अंतो० उक्को० अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं, सुयअन्नाणी एवं चेव ।

विभंगअन्नाणी णं भंते ! विभंग० जह० एक्कं समयं उ० तेत्तीसं सागरोवमाइं देसूणाए पुव्वकोडीए अब्भहियाइं ।

आभिनिबोहियनाणिस्स णं भंते ! अंतरं कालओ० ?, जह० अंतो० उक्को० अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं, एवं सुयनाणिस्सवि, ओहिनाणिस्सवि, मनपज्जवनाणिस्सवि, केवलनाणिस्स णं भंते ! अंतरं० ?, सादीयस्स अपज्जवसियस्स नत्थि अंतरं ।

मइअन्नाणिस्स णं भंते ! अंतरं० ?, अनादीयस्स अपज्जवसियस्स नत्थि अंतरं, अनादीयस्स सपज्जवसियस्स नत्थि अंतरं, सादीयस्स सपज्जवसियस्स जह० अंतो० उक्को० छावट्ठिं सागरोवमाइं सातिरेगाइं, एवं सुयअन्नाणिस्सवि, विभंगनाणिस्स णं भंते ! अंतरं० ?, जह० अंतो० उक्को० वणस्सतिकालो ।

एएसि णं भंते ! आभिनिबोहियनाणीणं सुयनाणि० ओहि० मन० केवल० मइअन्नाणि० सुयअन्नाणि० विभंगनानीण य कतरे० ?, गोयमा ! सव्वत्थोवा जीवा मनपज्जवनाणि ओहिनाणि असंखेज्जगुणा आभिनिबोहियनाणी सुयनाणी एए दोवि तुल्ला विसेसाहिया, विभंगनाणी असंखिज्जगुणा, केवलनाणी अनंतगुणा, मइअन्नाणी सुयअन्नाणी य दोवि तुल्ला अनंतगुणा

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तोऽष्टविधाः सर्वजीवाः प्रज्ञप्तास्त एवमुक्तवन्तस्तद्यथा–आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनो मनःपर्यवज्ञानिनः केवलज्ञानिनो मत्यज्ञानिनः श्रुताज्ञानिनो विभङ्गज्ञानिनश्च ।

कायस्थितिचिन्तायामाभिनिबोधिकज्ञानी जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः षट्षष्टि सागरोपमाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सातिरेकाणि, एवं श्रुतज्ञान्यपि, अवधिज्ञानी जघन्यत एकं समयमुत्कर्षतः षट्षष्टि सागरोपमाणि सातिरेकाणि, मनःपर्यवज्ञानि जघन्यत एकं समयमुत्कर्षतो देशोना पूर्वकोटी, केवलज्ञानी साद्यपर्यवसितः, मत्यज्ञानी त्रिविधस्तद्यथा—अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र योऽसौ सादिसपर्यवसितः स जघन्येनान्तर्मुहूर्तमुत्कर्षतोऽनन्तं कालं यावदपार्द्धं पुद्गलपरावर्त्तं देशोनं, एवं श्रुताज्ञान्यपि, विभङ्गज्ञानी जघन्येनैकं समयं, द्वितीयसमये मरणतः प्रतिपाते सम्यक्त्वलाभतो ज्ञानभावेन वा विभङ्गाभावात्, उत्कर्षतस्त्रिंयत्रशत्सागरोपमाणि देशोनया पूर्वकोटयाऽभ्यधिकानि, तानि च सुप्रतितानी, अप्रतिपतितविभङ्गानां धन्वन्तरिप्रमुखाणां बहूनां सप्तमपृथिवीनरकगमनश्रवणात् ।

अनन्तरचिन्तायामाभिनिबोधिकज्ञानिनोऽन्तरं वक्तव्यं, केवलज्ञानिनःजघन्येनान्तर्मुहूर्तमुत्कर्षतः षट्षष्टि सागरोपमाणि, विभङ्गज्ञानिनो जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽनन्तंकालं वनस्पतिकालः ।

अल्पबहुत्वचिन्तायां सर्वस्तोका मनःपर्यवज्ञानिनः, तेभ्योऽवधिज्ञानिनोसङ्ख्येयगुणाः, तेभ्योऽप्याभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, तेभ्योऽपि विभङ्गज्ञानिनोऽसङ्ख्येयगुणाः, मिथ्यादृशां प्राभूतत्वात्, एतेभ्योऽपि केवलज्ञानिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्योऽपि मत्यज्ञानिनः श्रुताज्ञानिनश्च प्रत्येकमनन्तगुणाः, स्वस्थाने तु परस्परं तुल्याः, भावना सर्वत्रापि प्राग्वत्, केवलं सूत्रपुस्तकेष्वतिसङ्क्षेप इति विवृतं

मू. (३१४) *अहवा अट्ठविहा सव्वजीवा पन्नत्ता, तंजहा—नेरइया तिरिक्खजोणिया तिरिक्खजोणिणीओ मणुस्सा मणुस्सीओ देवा देवीओ सिद्धा ।*

नेरइए णं भंते ! नेरइयत्ति कालओ केवचिरं होति ?, गोयमा ! जहन्नेणं दस वाससहस्साइं उ० तेत्तीसं सागरोवमाइं, तिरिक्खजोणिए णं भंते !० २, जह० अंतोमु० उक्को० वणस्सतिकालो

तिरिक्खजोणिणी णं भंते !० ?, जह० अंतो० उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, एवं मणूसे मणूसी, देवे जहा नेरइए, देवी णं भंते !० ?, जह० दस वाससहस्साइं उ० पणपन्नं पलिओवमाइं, सिद्धे णं भंते ! सिद्धेत्ति० ?, गोयमा ! सादीए अपज्जवसिए

नेरइयस्स णं भंते ! अंतरं कालओ केवचिरं होति ?, जह० अंतो० उक्को० वणस्सतिकालो, तिरिक्खजोणियस्स णं भंते ! अंतरं कालओ० ?, जह० अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं । तिरिक्खजोणिणी णं भंते ! अंतरं कालओ केवचिरं होति ?, गोयमा ! जह० अंतोमुहुत्तं उक्को० वनस्सतिकालो, एवं मणुस्सस्सवि मणुस्सीएवि, देवस्सवि देवीएवि, सिद्धस्स णं भंते ! अंतरं सादीयस्स अपज्जवसियस्स नत्थि अंतरं ।

एतेसि णं भंते ! नेरइयाणं तिरिक्खजोणियाणं तिरिक्खजोणिणीणं मणूसाणं मणूसीणं देवाणं देवीणं सिद्धाण य कयरे० ?, गोयमा ! सव्वत्थोवा मणुस्सीओ मणुस्सा असंखेज्जगुणा नेरइया असंखिज्जगुणा तिरिक्खजोणिणीओ असंखिज्जगुणाओ देवा संखिज्जगुणा देवीओ संखेज्जगुणाओ सिद्धा अनंतगुणा तिरिक्खजोणिया अनंतगुणा ।

सेत्तं अट्ठविहा सव्वजीवा पन्नत्ता ।।

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण अष्टविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा—नैरयिकास्तिर्यग्योनास्तिर्यग्योन्यो मनुष्या मनुष्यो देवा देव्यः सिद्धाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र नैरयिकादीनां देवीपर्यन्तानां कायस्थितिरन्तरं च संसारसमापन्नसप्तविधप्रतिपत्ताविव, सिद्धस्तु कायस्थितिचिन्तायां साद्यपरियवसितः, अन्तरचिन्तायां नास्त्यन्तरं ।

अल्पबहुत्वं, सर्वस्तोका मनुष्याः, सङ्ख्येयकोटीकोटीप्रमाणत्वात्, ताभ्यो मानुष्योऽसङ्ख्येयगुणाः, श्रेण्यसङ्ख्येयभागप्रमाणत्वात्, तेभ्यो नैरयिका असङ्ख्येयगुणाः, तेभ्यस्तिर्यग्योन्योऽसङ्ख्येयगुणाः, ताभ्यो देवाः सङ्ख्येयगुणाः, तेभ्यो देव्यः सङ्ख्येयभागप्रमाणत्वात्, तेभ्यो नैरयिका असङ्ख्येयगुणाः, तेभ्यस्तिर्यग्योन्योऽसङ्ख्येयगुणाः, ताभ्यो देवाः सङ्ख्येयगुणाः, तेभ्यो देव्यः सङ्ख्येयगुणाः, युक्ति सर्वत्रापि संसारसमापन्नसप्तविधप्रतिपत्ताविव, देवीभ्यः सिद्धा अनन्तगुणाः, तेभ्योऽपि तिर्यग्योनिका अनन्तगुणाः । उपसंहारमाह–'सेत्तं अट्ठविहा सव्वजीवा पन्नत्ता' उक्ता अष्टविधाः सर्वजीवाः, सम्प्रति नवविधानाह–

सप्तमी सर्वजीवा प्रतिपत्तिः समाप्ता

–: अष्टमी सर्वजीवा प्रतिपत्तिः :–

मू. (३९५) *तत्थ णं जे ते एवमाहंसु नविधा सव्वजीवा पं० ते णं एवमाहंसु, तंजहा–एगिंदिया बेंदिया तेंदिया उरिंदिया नेरइया पचेंदियतिरिक्खजोणिया मणूसा देवा सिद्धा*

एगिंदिए णं भंते ! एगिंदियत्ति कालओ केवचिरं होइ ?, गोयमा ! जह० अंतोमु० उक्को० वणस्स०, बेंदिए णं भंते ! जह० अंतो० उक्को० संखेज्जं कालं, एवं तेइंदिएवि, चउ०, नेरइया णं भंते !० २ जह० दस वाससहस्साइं उक्को० तेत्तीसं सागरोवमाइं ।

पंचेंदियतिरिक्खजोणिए णं भंते ! जह० अंतो० उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, एवं मणूसेवि, देवा जहा नेरइया, सिद्धे णं भंते !० २ ? सादीए अपज्जवसिए ।

एगिंदियस्स णं भंते ! अंतरं कालओ केवचिरं होति ?, गोयमा ! जह० अंतो० उक्को० दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं ।

बेंदियस्स णं भंते ! अंतरं कालओ केवचिरं होति ?, गोयमा ! जह० अंतो० उक्को० वणस्सतिकालो, एवं तेंदियस्सवि चउरिंदियस्सवि नेरयस्सवि पंचेंदियतिरिक्खजोणियस्सवि मणूसस्सवि देवस्सवि सव्वेसिमेवं अंतरं भाणियव्वं, सिद्धस्स णं भंते ! अंतरं कालओ० ? सादीयस्स अपज्जवसियस्स नत्थि अंतरं ।

एतेसि णं भंते ! एगिंदियाणं बेइंदि० तेइंदि० चउरिंदियाणं नेरइयाणं पंचेंदियतिरिक्खजोणियाणं मणूसाणं देवाणं सिद्धाण य कयरे २ ?, गोयमा ! सव्वत्थोवा मणुस्सा नेरइया असंखेज्जगुणा देवा असंखेज्जगुणा पंचेंदियतिरिक्खजोणिया असंखेज्जगुणा चउरिंदिया विसेसाहिया तेइंदिया विसेसाहिया बेंदिया विसे० सिद्धा अनंतगुणा एगिंदिया अनंतगुणा ॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तो नवविधाः सर्वजीवाः प्रज्ञप्तास्त एवमुक्तवन्तस्तद्यथा–एकेन्द्रिया द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रिया नैरयिकास्तिर्यग्योनिका मनुष्या देवाः सिद्धाः

अमीषां कायस्थितिचिन्तायामेकेन्द्रियस्य जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतो वनस्पतिकालः, द्वीन्द्रियस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतः सङ्ख्येयं कालं, एवं त्रीन्द्रियचतुरिन्द्रिययोरपि वक्तव्यं, नैरयिकस्य जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि, तिर्यग्योनकपञ्चेन्द्रियस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतः पूर्वकोटीपृथक्त्वाभ्यधिकानि त्रीणि पल्योपमानि, एवं मनुष्यस्यापि, देवानां यथा नैरयिकाणां ।

अन्तरचिन्तायामेकेन्द्रियस्य जघन्यमन्तर्मुहूर्त्तमुत्कर्षतो द्वे सागरोपमसहस्रे सङ्ख्येयवर्षाभ्यधिके, द्वित्रिचतुरिन्द्रियनैरयिकतिर्यक्पञ्चेन्द्रियमनुष्यदेवानां जघन्यतः प्रत्येकमन्तर्मुहूर्तमुत्कर्षतो वनस्पतिकालः, सिद्धस्य साद्पर्यवसितस्य नास्त्यन्तरं ।

अल्पबहुत्वचिन्तायां सर्वस्तोका मनुष्या नैरयिका असङ्ख्येयगुणाः देवा असङ्ख्येयगुणाः तिर्यक्पञ्चेन्द्रिया असङ्ख्येयगुणाः चतुरिन्द्रिया विशेषाधिकाः त्रीन्द्रिया विसेशाधिकाः द्वीन्द्रिया विशेषाधिकाः सिद्धा अनन्तगुणाः एकेन्द्रिया अनन्तगुणाः ॥

मू. (३१६) *अहवा नवविधा सव्वजीवा पन्नत्ता, तंजहा–पढमसमयनेरइया अपढमसमयनेरइया पढमसमयतिरिक्खजोणिया अपढमसमयतिरिक्खजोणिया पढमसमयमणूसा अपढमसमयमणूसा पढमसमयदेवा अपढमसमयदेवा सिद्धा य ।*

पढमसमयनेरइया णं भंते !० ?, गोयमा ! एक्कं समयं, अपढमसमयनेरइयस्स णं भंते० २ ?, जहन्नेणं दस वाससहस्साइं समऊणाइं, उक्को० तेत्तीसं सागरोवमाइं समऊणाइं, पढमसमयतिरिक्खजोणियस्स णं भंते !० ?, एक्कं समयं ।

अपढमसमयतिरिक्खजोणियस्स णं भंते !० ?, जह० खुड्डागं भवग्गहणं समऊणं उक्को० वणस्सतिकालो, पढमसमयमणूसे णं भंते !०, एक्कं समयं, अपढमसमयमणूस्से णं भंते !० ?, जह० खुड्डागं भवग्गहणं समऊणं उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, देवे जहा नेरइए, सिद्धे णं भंते ! सिद्धेत्ति कालओ केवचिरं होति ?, गोयमा ! सादीए अपज्ञवसिते

पढमसमयनेरइयस्स णं भंते ! अंतरं कालओ० ?, गोयमा ! जह० दस वाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्कोसेणं वणस्सतिकालो, अपढमसमयणेरइयस्स णं भंते ! अंतरं० ?, जह० अंतो० उक्को० वणस्सतिकालो । पढमसमयतिरिक्खजोणियस्स णं भंते ! अंतरं कालतो० ?, जह० दो खुड्डागाइं भवग्गहमाइं समऊणाइं उक्को० वण० ।

अपढमसमयतिरिक्खजोणियस्स णं भंते ! अंतरं कालतो० ?, जह० खुड्डागं भवग्गहणं समयाहियं उ० सागरोवमसमयपुहुत्तं सातिरेगं, पढमसमयमणूसस्स जहा पढमसमयतिरिक्खजोणियस्स ।

अपढमसमयमणूसस्स णं भंते ! अंतरं कालओ० ?, ज० खुड्डागं भवग्गह० समयाहियं उ० वण०, पढमसमयदेवस्स जहा पढमसमयनेरतियस्स, अपढमसमयदेवस्स जहा अपढमसमयनेरइयस्स, सिद्धस्स णं भंते !०, सादीयस्स अपज्ञवसियस्स नत्थि अंतं ।

एएसि णं भंते ! पढमसमयनेरइयाणं पढमस० तिरिक्खजोणियाणं पढमसमयमणूसाण पढमस० देवाण य कयरे० २ ?, गोयमा ! सव्वत्थोवा पढमसमयमणूसा पढमसमयनेरइया असंखिज्ञगुणा पढसमयदेवा असं० पढमस० तिरिक्खजो० असं० ।

एएसि णं भंते ! अपढमस० नेरइयाणं अपढमसमयतिरिक्खजोणि० अपढमसमयमणूसाणं अपढमसमयदेवाण य कयरे० २ ?, गोयमा ! सव्वत्थोवा अपढमसमयमणूसा अपढमसम० नेरइ० असं० अपढमसमयदेवा अस० अपढमसमयतिरि० अनंतगुणा ।

एतेसि णं भंते ! पढमस० नेरइयाणं अपढमसम० नेरइयाण य कयरे० २ ?, गोयमा !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वत्थोवा पढमसमयनेरइया अपढमसमयनेरइया असंखेज्जगुणा, एतेसि णं भंते ! पढमसमयतिरिजोक्ख० अपढमस० तिरि० जोणि० कतरे० ?, गोयमा ! सव्व पढमसमयतिरि० अपढमसमयतिरि० जोणि० अनंत०, मणुयदेवअप्पाबहुयं जहा नेरइयाणं।

एतेसि णं भंते ! पढमस० णेरइ० पढमस० तिरिक्खाणं पढमस० मणूसाणं पढमसमयदेवाणं अपढमसमयनेरइ० अपढमसमयतिरिक्खजोणि० अपढमसमयमणूसा० अपढमसमयदेवाणं सिद्धाण य कयरे० २ ? गोयमा ! सव्व० पढमस० मणूसा अपढमस० मणु० असं० पढमसमयनेरइ० असं० पढमसमयदेवा असंखे० पढमसमयतिरिक्खजो० असं० अपढमसमयनेर० असं० अपढमस० देवा असंखे० सिद्धा अणं० अपढमस० तिरि० अनंतगुणा।

सेत्तं नवविहा सव्वजीवा पन्नत्ता।

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण नवविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा— प्रथमसमयनैरयिका अप्रथमसमयनैरयिकाः प्रथमसमयतिर्यग्योनिका अप्रथमसमयतिर्यग्योनिकाः प्रथमसमयमनुष्या अप्रथमसमयमनुष्याः प्रथमसमयदेवा अप्रथमसमयदेवाः सिद्धाः ॥ कायस्थितचिन्तायां प्रथमसमयनैरयिकस्य कायस्थितिरेकं समयं, अप्रथमसमयनैरयकस्य जघन्यतो दश वर्षसहस्राणि समयोनानि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि समयोनानि, प्रथमसमयतिर्यग्योनिकस्यैकं समयं, अप्रथमसमयतिर्यग्योनिकस्य जघन्यतः क्षुल्लकभवग्रहणं समयनोनमुत्कर्षतो वनस्पतिकालः, प्रथमसमयमनुष्यस्यैकं समयं, अप्रथमसमयस्य जघन्यतः क्षुल्लकभवग्रहणं समयोनमुत्कर्षतः पूर्वकोटीपृथक्त्वाभ्यधिकानि त्रीणि पल्योपमानि, देवा यथा नैरयिकाः, सिद्धाः साद्यपर्यवसिताः।

अन्तरचिन्तायां प्रथमसमयनैरयिकस्य जघन्यमन्तरं दशवर्षसहस्राणि अन्तर्मुहूर्त्ताभ्यधिकानि, उत्कर्षतो वनस्पतिकालः, अप्रथमसमयनैरयिकस्य जघन्यतोऽन्तरंमन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः, प्रथमसमयतिर्यग्योनिकस्य जघन्यतो द्वे क्षुल्लकभवग्रहणे समयोने उत्कर्षतो वनस्पतिकालः, अप्रथमसमयतिर्यग्योनिकस्य जघन्यतः क्षुल्लकभवग्रहणं समयाधिकं उत्कर्षतः सागरोपमशतपृथक्त्वं सातिरेकं, प्रथमसमयमनुष्यस्य जघन्यतो द्वे क्षुल्लकभवग्रहणे समयोने उत्कर्षतो वनस्पतिकालः, अप्रथमसमयमनुष्य जघन्यतः क्षुल्लकभवग्रहणं समयाधिकमुत्कर्षतो वनस्पतिकालः, प्रथमसमयदेवस्य जघन्यतो दश वर्षसहस्राणि अन्तर्मुहूर्त्ताभ्यधिकानि उत्कर्षतो वनस्पतिकालः, अप्रथमसमयदेवस् जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः, सिद्धस्य साद्यपर्यव सितस्य नास्त्यन्तरं।

सम्प्रत्यल्पबहुत्वचिन्ता, तत्राल्पबहुत्वान्यत्र चत्वारि, तद्यथा—प्रथमं प्रथमसमयनैरयिकादीनां, द्वितीयप्रथमसमयनैरयिकादीनां, तृतीयं प्रथमाप्रथमसमयनैरयिकादीनां प्रत्येकं, चतुर्थं सर्वसमुदायेन, तत्र प्रथममिदम्—सर्वस्तोकाः प्रथमसमयमनुष्याः, तेभ्यः प्रथमसमयनैरयिका असङ्ख्येयगुणाः, तेभ्यः प्रथमसमयदेवा असङ्खयेयगुणाः, तेभ्यः प्रथमसमयतिर्यग्योनिका असङ्ख्येयगुणाः, नारकादिशेषगतितरयादागतानामेव प्रथमसमये वर्त्तमानानां प्रथमसमयतिर्यग्योनिकत्वात्।

द्वितीयमेवम्—सर्वस्तोका अप्रथमसमयमनुष्याः, तेभ्योऽप्रथमसमयनैरयिका असङ्ख्येयगुणाः, तेभ्योऽप्रथमसमयदेवा असङ्ख्येयगुणाः, तेभ्योऽप्रथमसमयतिर्यग्योनिका अनन्तगुणाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निगोदजीवानामनन्तत्वात्। तृतीयमेवम्—सर्वस्तोकाः प्रथमसमयनैरयिका अप्रथमसमयनैरयिका असङ्ख्येयगुणाः, तथा प्रथमसमयतिर्यग्योनिकाः सर्वस्तोकाः अप्रथमसमयतिर्यग्योनिका अनन्तगुणाः, तथा सर्वस्तोकाः प्रथमसमयमनुष्याः अप्रथमसमयमनुष्या असङ्ख्येयगुणाः, तथा सर्वस्तोकाः प्रथमसमयदेवाः अप्रथमसमयदेवा असङ्ख्येयगुणाः।

सर्वसमुदायगतं चतुर्थमेवम्—सर्वस्तोकाः प्रथमसमयमनुष्याः अप्रथमसमयमनुष्या असङ्ख्येयगुणाः, तेभ्यः प्रथमसमयनैरयिका असङ्ख्येयगुणाः, तेभ्योऽपि प्रथमसमयदेवा असङ्ख्येयगुणाः, तेभ्योऽपि प्रथमसमयतिर्यञ्चोऽसङ्ख्येयगुणाः, तेभ्योऽपि अप्रथमसमयनैरयिका असङ्ख्येयगुणाः, तेभ्योऽप्यप्रथमसमयदेवा असङ्ख्येयगुणाः, तेभ्यः सिद्धा अनन्तगुणाः, तेभ्योऽप्रथमसमयतिर्यग्योनिका अनन्तगुणाः।उपसंहारमाह—'सेत्तं नवविहा सव्वजीवा पन्नत्ता' उक्ता नवविधाः सर्वजीवाः, सम्प्रति दशविधानाह—

अष्टमी सर्वजीवा प्रतिपत्तिः समाप्त।

—: नवमी सर्वजीवा प्रतिपत्तिः :—

मू. (३१७) *तत्थ णं जे ते एवमाहंसु दसविधा सव्वजीवा पन्नत्ता ते णं एवमाहंसु, तंजहा—पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणस्सतिकाइया बिंदिया तिंदिया चउरिं० पंचें० अनिंदिया।*

पुढविकाइए णं भंते! पुढविकाइएत्ति कालओ केवचिरं होति?, गोयमा! जह० अंतो० उक्को० असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ असंखेज्जा लोया, एवं आउतेउवाउकाइए, वणस्सतिकाइए णं भंते!० २?, गोयमा! जह० अंतो० उक्को० वणस्सतिकालो, बेंदिए णं भंते!०?, जह० अंतो० उक्को० संखेज्जं कालं, एवं तेइंदिएवि चउरिंदिएवि, पंचिंदिए णं भंते!०?, गोयमा! जह० अंतो० उक्को० सागरोवमसहस्सं सातिरेगं, अनिंदिए णं भंते!०?, सादीए अपज्जवसिए।

पुढविकाइयस्स णं भंते! अंतरं कालओ केवचिरं होति?, गोयमा! जह० अंतो० उक्क० वणस्सतिकालो, एवं आउकाइयस्स तेउ० वाउ०, वणस्सइकाइयस्स णं भंते! अंतरं कालओ० जा चेव पुढविकाइयस्स संचिट्ठणा, बियतियचउरिंदियपंचेंदियाणं एतेसिं चउण्हंपि अंतरं जह० अंतो० उक्को० वणस्सइकालो, अनिंदियस्स णं भंते! अंतरं कालओ केवचिरं होति?, गोयमा! सादीस्स अपज्जवसियस्स नत्थि अंतरं।

एतेसि णं भंते! पुढविकाइयाणं आउ० तेउ० वाउ० वण० बेंदियाणं तेइंदियाणं चउरिं० पंचेंदियाणं अनिंदियाण य कतरे २०?

गोयमा! सव्वत्थोवा पंचेंदिया चतुरिंदिया विसेसाहिया तेइंदि० विसे० बेंदि० विसे० तेउकाइया असंखिज्जगुणा पुढविकाइया वि० आउ० वि० वाउ० वि० अनिंदिया अनंतगुणा वणस्सतिकाइया अनंतगुणा॥

वृ. 'तत्थे'त्यादि, तत्र ये ते एवमुक्तवन्तो दशविधाः सर्वजीवाः प्रज्ञप्तास्त एवमुक्तवन्तस्तद्यथा—पृथिवीकायिकाः अप्कायिकाः तेजस्कायिकाः वायुकायिकाः वनस्पतिकायिकाः द्वीन्द्रियाः त्रीन्द्रियाः चतुरिन्द्रियाः पञ्चेन्द्रियाः अनिन्द्रियाः, तत्र पृथिवीकायिकस्य कायस्थितिर्जघन्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोऽन्तर्मुहूर्त्तमुत्कर्षतोऽसङ्ख्येयं कालं, असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽसङ्ख्येया लोकाः, एवमप्तेजोवायूनामपि वक्तव्यं, वनस्पतिकायिकस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतोऽनन्तं कालं, अनन्ता उत्सर्प्पिण्यवसर्प्पिण्यः कलतः क्षेत्रतोऽनन्तालोका असङ्ख्येया– पुद्‌गलपरावर्त्ता आवलिकाया असङ्ख्येयो भागः, द्वित्रिचतुरिन्द्रियाणां जघन्यतः प्रत्येकमन्तर्मुहूर्त्तमुत्कर्षतः प्रत्येकं सङ्ख्येयः कालः, पञ्चेन्द्रियस्य जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो वनस्पतिकालः, एवं यावत्पञ्चेन्द्रियस्य, नवरं वनस्पतिकायिकस्योत्कर्षतोऽसङ्ख्येयं कालं, असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यः कालतः क्षेत्रतोऽसङ्ख्येया लोकाः, अनिन्द्रियस्य नास्त्यन्तरं, साद्यपर्यवसितत्वात् ।। अल्पबहुत्वचिन्तायां सर्वस्तोकाः पञ्चेन्द्रियाश्चतुरिन्द्रिया विशेषाधिकाः त्रीन्द्रिया विशेषाधिकाः द्वीन्द्रिया विशेषाधिकाः तेजस्कायिका असङ्ख्येयगुणाः पृथिवीकायिका विशेषाधिकाः अप्कायिका विशेषाधिकाः वायुकायिका विशेषाधिकाः अनिन्द्रिया अनन्तगुणाः वनस्पतिकायिका अनन्तगुणाः ।।

मू. (३९८) *अहवा दसविहा सव्वजीवा पन्नत्ता, तंजहा–पढमसमयनेरइया अपढमसमयनेरइया पढमसमयतिरिक्खजोणिया अपढमसमयतिरिक्खजोणिया पढमसमय-मणूसा अपढमसमयमणूसा पढमसमयदेवा अपढमसमयदेवा पढमसमयसिद्धा अपढमसमयसिद्धा*

पढमसमयनेरइया णं भंते ! पढमसमयनेरइएत्ति कालओ केवचिरं होति ?, गोयमा ! एक्कं समयं, अपढमसमयनेरइए णं भंते !० ? जहन्नेणं दस वाससहस्साइं समऊणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं समऊणाइं, पढमसमयतिरिक्खजोणिया णं भंते !० २ ?, गोयमा ! एक्कं समयं, अपढमसमयतिरिक्ख० जह० खुड्डागं भवग्गहणं समऊणं उक्को० वणस्सइकालो ।

पढमसमयमणूसे णं भंते !० २ ?, एक्कं समयं, अपढमस० मणूसे णं भंते !० ?, जह० खुड्डागं भवग्गहणं समऊणं उक्को० तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं, देवे जहा नेरइए, पढमसमयसिद्धे णं भंते !० २ ? एक्कं समयं, अपढमसमयसिद्धे णं भंते !० २ ?, सादीए अपज्जवसिए । पढमसमयनेर० भंते ! अंतरं कालओ० ?, ज० दस वाससहस्साइं अंतोमुहुत्तम-ब्भहियाइं उक्क० वण०, अपढमसमयनेर० अंतरं कालओ केव० ?, जह० अंतो० उ० वण० ।

पढमसमयतिरिक्खजोणियस्स अंतरं केवचिरं होइ ?, गोयमा ! जह० दो खुड्डागभवग्गहणाइं समऊणाइं उक्को० वण०, अपढमसमयतिरिक्खजोणियस्स णं भंते !० ?, जह० खुड्डागभवग्गहणं समयाहियं उक्को० सागरोवमसयपुहुत्तं सातिरेगं, पढमसमयमणूसस्स णं भंते ! अंतरं कालओ० ?, जह० दो खुड्डागभवग्गहणाइं समऊणाइं उक्क० वण० ।

अपढमसमयमणूसस्स णं भंते ! अंतरं० ?, जह० खुड्डागं भव० समयाहियं उक्को० वणस्स०, देवस्स णं अंतरं जहा नेरइयस्स, पढमसमयसिद्धस्स णं भंते ! अंतरं ?, नत्थि, अपढमसमयसिद्धस्स णं भंते ! अंतरं कालओ केवचिरं होति ?, गोयमा ! सादीयस्स अपज्जवसियस्स नत्थि अंतरं ।

एतेसि णं भंते ! पढमस० नेर० पढमस० तिरिक्खजोणियाणं पढमसमयमणूसाणं पढमसमयदेवाणं पढमसमयसिद्धाण य कतरे २० ?, गोयमा ! सव्वत्थोवा पढमसमयसिद्धा पढमसमयसमयणूसा असंखे० पढमस० णेरइया असंखेज्जगुणा पढमस० देवा असं० पढमस० तिरि० असं० ।

एतेसि णं भंते ! अपढमसमयनेरइयामं जाव अपढमसमयसिद्धाय य कयरे० ?, गोयमा सव्वत्थोवा अपढमस० मणूसा अपढमस० नेरइया असंखि० अपढमस० देवा असंखि०

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अपढमस० सिद्धा अणनतगुणा अपढमस० तिरि० जो० अणनतगुणा।

एतेसि णं भंते! पढमस० नेरइयाणं अपढमस० नेरइयाण य कतरे २ ? गोयमा! सव्वत्थोवा पढमस० नेरइया अपढमस० नेरइया असंखे०, एतेसि णं भंते! पढमस० तिरिक्खजोणियाणं अपढमस० तिरिक्खजोणियाण य कतरे २ ? गोयमा! सव्वत्थोवा पढमसमयतिरिक्खजो० अपढमस० तिरिक्खजोणिया अनंतगुणा।

एतेसि णं भंते! पढमस० मणूसाणं अपढमसमयमणूसाण य कतरे २ ?, गोयमा! सव्वत्थोवा पढमसम० मणूसा अपढमस० मणूसा असंखे०, जहा मणूसा तहा देवावि, एतेसि णं भंते! पढमसमयसिद्धाणं अपढमसमयसिद्धाण य कयरे २ अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा पढमसमयसिद्धा अपढमसम० सिद्धा अणनतगुणा।

एतेसि णं भंते! पढमसमयनेरइयाणं अपढमसमयनेरइयाणं पढमस० तिरि० जोणि० अपढमस० तिरि० जो० प० समयमणू० अपढमस० मणू० पढ० स० देवाणं अप० सम० देवामं पढमस० सिद्धाणं अपढमसम० सिद्धा पढमस० मणू० असं० अप० सम० मणू० असंखि० पढमसम० नेरइ० असं० पढमस० देवा असं० पढमस० तिरि० असं० अपढमस० नेर० असंखे० अपढमस० देवा असं० अपढमस० सिद्धा अणंत० अपढमस० तिरि० अनंतगुणा।

सेत्तं दसविहा सव्वजीवा पन्नत्ता। सेत्तं सव्वजीवाभिगमे।

वृ. 'अहवे'त्यादि, 'अथवा' प्रकारान्तरेण दशविधाः सर्वजीवाः प्रज्ञप्तास्तद्यथा—प्रथमसमयनैरयिकाः अप्रथमसमयनैरयिकाः प्रथमसमयतिर्यग्योनिकाः अप्रथमसमयतिर्यग्योनिकाः प्रथमसमयमनुष्याः अप्रथमसमयमनुष्याः प्रथमसमयदेवाः अप्रशमयदेवाः प्रथमसमयसिद्धाः अप्रथमसमयसिद्धाः।

कायस्थितिरन्तरं च प्रथमसमयनारकादीनामप्रथमसमयदेवपर्यन्तानां पूर्ववत्, प्रयसमयसिद्धस्य कायस्थितिरेकं समयं, अप्रथमसमयसिद्धः साद्यपर्यवसितः, प्रथमसमयसिद्धस्य नास्त्यन्तरं, भूयः प्रथमसमयसिद्धत्वाभावात्, अप्रथमसमयसिद्धस्यापि नास्त्यन्तरमपर्यवसितत्वात्

अल्पबहत्वान्यत्रापि चत्वारि, तत्र प्रथममिदं—सर्वस्तोकाः प्रथमसमयसिद्धाः, अष्टोत्तरशतादूर्ध्वमभावात्, तेभ्यः प्रथमसमयतिर्यञ्चोऽसङ्ख्येयगुणाः। द्वितीयमिदं—सर्वस्तोका अप्रथमसमयमनुष्या अप्रथमसमयनैरयिका असङ्ख्येयगुणाः अप्रथमसमयदेवा असङ्ख्येयगुणाः अप्रथमसमयसिद्धा अनन्तगुणाः अप्रथमसमयतिर्यञ्चोऽनन्तगुणाः। तृतीयं प्रत्येकभाविनैरयिकतिर्यङ्मनुष्यदेवानां पूर्ववत्, सिदधानामेवं—सर्वस्तोकाः प्रथमसमयसिद्धा अप्रथमसमयसिद्धा अनन्तगुणाः

समुदायगतं चतुर्थमेवं—सर्वस्तोकाः अप्रथमसमयसिद्धाः तेभ्यः प्रथमसमयमनुष्या असङ्ख्येयगुणाः तेभ्योऽप्रथमसमयमनुष्या असङ्ख्येयगुणाः तभ्यः प्रथमसमयनैरयिका असङ्ख्येयगुणा—तेभ्यः प्रथमसमयदेवा असङ्ख्येयगुणाः तेभ्यः प्रथमसमयतिर्यञ्चोऽसङ्ख्येयगुणाः तेभ्योऽप्रथमसमयनैरयिका असङ्ख्येयगुणाः तेभ्योऽप्रथमसमयदेवा असङ्ख्येयगुणाः तेभ्योऽप्रथमसमयसिद्धा अनन्तगुणाः तेभ्योऽप्रथमसमयतिर्यञ्चोऽनन्तगुणाः, भावना सर्वत्रापि प्राग्वत्, नवरं सूत्रे संक्षेप इति विवृतम्।

नवमी सर्वजीवा प्रतिपत्तिः समाप्त।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निगमनमाह–'सेत्तं दसविहा सव्वजीवा पन्नत्ता' महानिगमनमाह–सोऽयं सर्वजीवाभिगम इति। विवृतमुद्देशतोऽध्ययनशास्त्रमर्हद्वचनमित्येदतिगम्भीरार्थं, अविषयोऽस्य सारः स्थूलबुद्धीनां, न खलु पश्यति सूक्ष्मान् रूपविशेषान् मन्दलोचनः, स्थूलदर्शनमपि हिताय मध्यस्थानां, द्वेषाद्ययोगतोऽवश्यं तत्फलयोगात्, पक्षपातोऽप्यत्र कल्याणहेतुः, राजयक्ष्माऽहङ्कारादिदुःखसमुदयस्य, विपर्यस्तदर्शनं त्वनर्थायेति त्याज्य एतनुगुणो व्यवहारः, कार्या सदैव सन्मार्गप्रतिपत्तये मार्गानुसारिबोधबहुश्रुतजनैः सङ्गति, तद्योगतः सकलापायविरहिणा चिरमभिमतफलसिद्धेः ॥

॥ १ ॥ जयति परिस्फुटविमल–ज्ञानविभासितसमस्तवस्तुगणः।
प्रतिहतपरतीर्थिमतः श्रीवीरजिनेश्वरो भगवान् ॥

॥ २ ॥ सरस्वती तमोवृन्दं, शरज्ज्योत्स्नेव निघ्नती।
नित्यं वो मङ्गलं दिश्यान्मुनिभि पर्युपासिता ॥

॥ ३ ॥ जीवाजीवाभिगमं विवृण्वताऽवापि मलयगिरिणेह।
कुशलं तेन लभन्ता मुनयः सिद्धान्तसद्बोधम् ॥

१४ | तृतीयं उपाङ्गसूत्रं जीवाजीवाभिगमं समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता जीवाजीवाभिगम उपाङ्गसूत्रस्य मलयगिरिआचार्य विरचिता टीका परिसमाप्ता।

❋❋❋

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ભાવભરી વંદના

જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો
વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો
એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-

પંચમ ગણધર શ્રી સુધર્મા સ્વામી		ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી	
દશ પૂર્વધર શ્રી શય્યંભવસૂરિ		(અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ	
દેવવાચક ગણિ		શ્રી શ્યામાચાર્ય	
દેવર્દ્ધિગણિ ક્ષમાશ્રમણ		જિનભદ્ર ગણિ ક્ષમાશ્રમણ	
સંઘદાસગણિ		સિદ્ધસેન ગણિ	
જિનદાસ ગણિ મહત્તર		અગત્સ્યસિંહ સૂરિ	
શીલાંકાચાર્ય		અભયદેવસૂરિ	
મલયગિરિસૂરિ		ક્ષેમકીર્તિસૂરિ	
હરિભદ્રસૂરિ		આર્યરક્ષિત સૂરિ (?)	
દ્રોણાચાર્ય		ચંદ્ર સૂરિ	
વાદિવેતાલ શાંતિચંદ્ર સૂરિ		મલ્લધારી હેમચંદ્રસૂરિ	
શાંતિચંદ્ર ઉપાધ્યાય		ધર્મસાગર ઉપાધ્યાય	
ગુણરત્નસૂરી		વિજય વિમલગણિ	
વીરભદ્ર	ઋષિપાલ	બ્રહ્મમુનિ	તિલકસૂરિ
સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી			

વર્તમાન કાલિન આગમ સાહિત્ય વારસાને
સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા
સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને

આનંદ સાગરસૂરિજી	ચંદ્રસાગર સૂરિજી	મુનિ માણેક
જિન વિજયજી	પુન્યવિજયજી	ચતુરવિજયજી
જંબુ વિજયજી	અમરમુનિજી	કનૈયાલાલજી
લાભસાગરસુરિજી	આચાર્ય તુલસી	ચંપક સાગરજી

સ્મરણાંજલિ

બાબુ ધનપતસિંહ	પં૦ બેચરદાસ	પં૦ જીવરાજભાઈ
પં૦ ભગવાનદાસ	પં૦ રૂપેન્દ્રકુમાર	પં૦ હીરાલાલ
શ્રુત પ્રકાશક સર્વે સંસ્થાઓ		

Jain Education International For Private & Personal Use Only www.jainelibrary.org

૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

क्रम	आगमसूत्रनाम	मूल श्लोक प्रमाण	वृत्ति-कर्ता	वृत्ति श्लोकप्रमाण
१.	आचार	२५५४	शीलाङ्काचार्य	१२०००
२.	सूत्रकृत	२१००	शीलाङ्काचार्य	१२८५०
३.	स्थान	३७००	अभदेवसूरि	१४२५०
४.	समवाय	१६६७	अभयदेवसूरि	३५७५
५.	भगवती	१५७५१	अभयदेवसूरि	१८६१६
६.	ज्ञाताधर्मकथा	५४५०	अभयदेवसूरि	३८००
७.	उपासकदशा	८१२	अभयदेवसूरि	८००
८.	अन्तकृद्दशा	९००	अभयदेवसूरि	४००
९.	अनुत्तरोपपातिकदशा	१९२	अभयदेवसूरि	१००
१०.	प्रश्नव्याकरण	१३००	अभयदेवसूरि	५६३०
११.	विपाकश्रुत	१२५०	अभयदेवसूरि	९००
१२.	औपपातिक	११६७	अभयदेवसूरि	३१२५
१३.	राजप्रश्निय	२१२०	मलयगिरिसूरि	३७००
१४.	जीवाजीवाभिगम	४७००	मलयगिरिसूरि	१४०००
१५.	प्रज्ञापना	७७८७	मलयगिरिसूरि	१६०००
१६.	सूर्यप्रज्ञप्ति	२२९६	मलयगिरिसूरि	९०००
१७.	चन्द्रप्रज्ञप्ति	२३००	मलयगिरिसूरि	९१००
१८.	जम्बूद्वीपप्रज्ञप्ति	४४५४	शान्तिचन्द्रउपाध्याय	१८०००
१९थी	निरयावलिका	११००	चन्द्रसूरि	६००
२३.	(पञ्च उपाङ्ग)	—	—	—
२४.	चतुःशरण	८०	विजयविमलयगणि	(?) २००
२५.	आतुर प्रत्याख्यान	१००	गुणरत्नसूरि (अवचूरि)	(?) १५०
२६.	महाप्रत्याख्यान	१७६	आनन्दसागरसूरि (संस्कृतछाया)	१७६
२७.	भक्तपरिज्ञा	२१५	आनन्दसागरसूरि (संस्कृतछाया)	२१५
२८.	तन्दुल वैचारिक	५००	विजयविमलगणि	(?) ५००
२९.	संस्तारक	१५५	गुणरत्न सूरि (अवचूरि)	११०
३०.	गच्छाचार★	१७५	विजयविमलगणि	१५६०
३१.	गणिविद्या	१०५	आनन्दसागरसूरि (संस्कृतछाया)	१०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रम	आगमसूत्रनाम	• मूल श्लोक प्रमाण	वृत्ति-कर्ता	• वृत्ति श्लोकप्रमाण
३२.	देवेन्द्रस्तव	३७५	आनन्दसागरसूरि (संस्कृत छाया)	३७५
३३.	मरणसमाधि ★	८३७	आनन्दसागरसूरि (संस्कृत छाया)	८३७
३४.	निशीथ	८२१	जिनदासगणि (चूर्णि)	२८०००
			सङ्घदासगणि (भाष्य)	७५००
३५.	बृहत्कल्प	४७३	मलयगिरि+क्षेमकीर्ति	४२६००
			सङ्घदासगणि (भाष्य)	७६००
३६.	व्यवहार	३७३	मलयगिरि	३४०००
			सङ्घदासगणि (भाष्य)	६४००
३७.	दशाश्रुतस्कन्ध	८९६	- ? - (चूर्णि)	२२२५
३८.	जीतकल्प ★	१३०	सिद्धसेनगणि (चूर्णि)	१०००
३९.	महानिशीथ	४५४८	—	—
४०.	आवश्यक	१३०	हरिभद्रसूरि	२२०००
४१.	ओघनिर्युक्ति	नि.१३५५	द्रोणाचार्य	(?)७५००
-	पिण्डनिर्युक्ति ★	नि. ८३५	मलयगिरिसूरि	७०००
४२.	दशवैकालिक	८३५	हरिभद्रसूरि	७०००
४३.	उत्तराध्ययन	२०००	शांतिसूरि	१६०००
४४.	नन्दी	७००	मलयगिरिसूरि	७७३२
४५.	अनुयोगद्वार	२०००	मलधारीहेमचन्द्रसूरि	५९००

નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ अंगसूत्रो, ૧૨ થી ૨૩ उपांगसूत्रो, ૨૪થી૩૩ प्रकीर्णकसूत्रो ૩૪થી ૩૯ छेदसूत्रो, ૪૦ થી ૪૩ मूळसूत्रो, ૪૪-૪૫ चूलिकासूत्रोના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત वृत्ति-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ वृत्ति-चूर्णि આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) गच्छाचार અને मरणसमाधि ના વિકલ્પે चंदावेज्झय અને वीरस्तव प्रकीर्णक આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ जीतकल्प જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પંચકલ્પનું ભાષ્ય અમે ''आगमसुत्ताणि''માં સંપાદીત કર્યું છે.

(૫) ओघ અને पिण्ड એ બંને निर्युक्ति વિકલ્પે છે. જે હાલ મૂળસૂત્ર રૂપે પ્રસિધ્ધ છે. જે બંનેની वृत्ति અમે આપી છે. તેમજ તેમાં ભાષ્યની ગાથાઓ પણ સમાવિષ્ટ થઈ છે.

(૬) ચાર प्रकीर्णक सूत्रो અને महानिशीथ એ પાંચ આગમની કોઈ वृत्ति આદિ ઉપલબ્ધ થવાનો ઉલ્લેખ મળતો નથી. प्रकीर्णक ની संस्कृत छाया ઉપલબ્ધ છે તેથી મૂકી છે. निशीथ-दशा-जितकल्प એ ત્રણેની चूर्णि આપી છે. જેમાં दशा અને जीतकल्प એ બંને ઉપરવૃત્તિ મળતી હોવાનો ઉલ્લેખ છે, પણ અમે તે મેળવી શક્યા નથી. જ્યારે निशीथ ઉપર તો માત્ર વીસમા उद्देशकः ની જ वृत्ति નો ઉલ્લેખ મળે છે.

➡ વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ निर्युक्तिः ⬅

क्रम	निर्युक्ति	श्लोकप्रमाण	क्रम	निर्युक्ति	श्लोकप्रमाण
१.	आचार-निर्युक्ति	४५०	६.	आवश्यक–निर्युक्ति	२५००
२.	सूत्रकृत-निर्युक्ति	२६५	७.	ओघनिर्युक्ति	१३५५
३.	बृहत्कल्प-निर्युक्ति ★	–	८.	पिण्डनिर्युक्ति	८३५
४.	व्यवहार-निर्युक्ति ★	–	९.	दशवैकालिक-निर्युक्ति	५००
५.	दशाश्रुत०-निर्युक्ति	१८०	१०.	उत्तराध्ययन-निर्युक्ति	७००

નોંધ :-

(૧) અહીં આપેલ श्लोक प्रमाण એ ગાથા સંખ્યા નથી. ''૩૨ અક્ષરનો એક શ્લોક'' એ પ્રમાણથી નોંધાયેલ श्लोक प्रमाण છે.

(૨) ★ बृहत्कल्प અને व्यवहार એ બંને સૂત્રોની निर्युक्ति હાલ भाष्य માં ભળી ગઈ છે. જેનો યથાસંભવ ઉલ્લેખ वृत्तिकार महर्षि એ भाष्य ઉપરની वृत्तिમાં કર્યો હોય તેવું જોવા મળેલ છે.

(૩) ओघ અને पिण्ड निर्युक्ति સ્વતંત્ર मूलआगम સ્વરૂપે સ્થાન પામેલ છે તેથી તેનું સ્વતંત્ર સંપાદન आगम-૪૧ રૂપે થયેલ છે. (તેમજ આ સંપાદનમાં પણ છે.)

(૪) બાકીની છ निर्युक्तिમાંથી दशाश्रुतस्कन्ध निर्युक्ति ઉપર चूर्णि અને અન્ય પાંચ निर्युक्ति ઉપરની वृत्ति અમે અમારા સંપાદનમાં પ્રકાશીત કરી છે. જ્યાં આ છ निर्युक्ति સ્પષ્ટ અલગ જોઈ શકાય છે.

(૫) निर्युक्तिकर्ता તરીકે भद्रबाहुस्वामी નો ઉલ્લેખ જ જોવા મળે છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

क्रम	भाष्य	श्लोकप्रमाण	क्रम	भाष्य	गाथाप्रमाण
१.	निशीषभाष्य	७५००	६.	आवश्यकभाष्य ★	४८३
२.	बृहत्कल्पभाष्य	७६००	७.	ओघनिर्युक्तिभाष्य ★	३२२
३.	व्यवहारभाष्य	६४००	८.	पिण्डनिर्युक्तिभाष्य ★	४६
४.	पञ्चकल्पभाष्य	३१८५	९.	दशवैकालिकभाष्य ★	६३
५.	जीतकल्पभाष्य	३१२५	१०.	उत्तराध्ययनभाष्य (?)	–

નોંધ :-

(૧) निशीष, बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-૩૮ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા मूळभाष्य રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्रं-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति, दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ૩૫ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે भाष्यगाथा જોવા મળે છે.

(૭) भाष्यकर्ता તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ચૂર્ણિઃ

क्रम	चूर्णि	श्लोकप्रमाण	क्रम	चूर्णि	श्लोकप्रमाण
१.	आचार-चूर्णि	८३००	९.	दशाश्रुतस्कन्धचूर्णि	२२२५
२.	सूत्रकृत-चूर्णि	९९००	१०.	पञ्चकल्पचूर्णि	३२७५
३.	भगवती-चूर्णि	३११४	११.	जीतकल्पचूर्णि	१०००
४.	जीवाभिगम-चूर्णि	१५००	१२.	आवश्यकचूर्णि	१८५००
५.	जंबूद्वीपप्रज्ञप्ति-चूर्णि	१८७९	१३.	दशवैकालिकचूर्णि	७०००
६.	निशीथचूर्णि	२८०००	१४.	उत्तराध्ययनचूर्णि	५८५०
७.	बृहत्कल्पचूर्णि	१६०००	१५.	नन्दीचूर्णि	१५००
८.	व्यवहारचूर्णि	१२००	१६.	अनुयोगदारचूर्णि	२२६५

નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिमांथी निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ बृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार તરીકે जिनदासगणिमहत्तरનું નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

"આગમ-પંચાંગી" એક ચિન્ત્ય બાબત"

૧ *વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે સુવ્યવસ્થિત પંચાંગી એક માત્ર आवश्यक સૂત્રની ગણાય.*

૨ *नंदीसूत्र માં પંચાંગીને બદલે संग्रहणी, प्रतिपत्ति ઓ વગેરેના પણ ઉલ્લેખ છે.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धनो છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક મૂલનો છે. આ मूल ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટ્ટુ લખાણ છે અને गाथा/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(૧) **आचार** - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા श्रुतस्कन्ध માં જ છે.

(૨) **सूत्रकृत** - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(૩) **स्थान** - स्थानं/अध्ययनं/मूलं

(૪) **समवाय** - समवायः/मूलं

(૫) **भगवती** - शतकं/वर्ग:-अंतरशतकं/उद्देशकः/मूलं
અહીં शतक ના પેટા વિભાગમાં બે નામો છે. (૧) वर्गः (૨) अंतरशतक જેમકે शतक ૨૧, ૨૨, ૨૩ માં शतक ના પેટા વિભાગનું નામ वर्गः જ જણાવેલ છે. शतक - ૩૩,૩૪,૩૫,૩૬,૪૦ ના પેટા વિભાગને अंतरशतक અથવા शतकशतक નામથી ઓળખાવાય છે.

(૬) **ज्ञाताधर्मकथा**- श्रुतस्कन्धः/वर्ग:/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग નામે છે અને તે वर्ग ના પેટા વિભાગમાં अध्ययन છે.

(૭) **उपासकदशा**- अध्ययनं/मूलं

(૮) **अन्तकृद्दशा**- वर्ग:/अध्ययनं/मूलं

(૯) **अनुत्तरोपपातिकदशा**- वर्ग:/अध्ययनं/मूलं

(૧૦) **प्रश्नव्याकरण**- द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(૧૧) **विपाकश्रुत**- श्रुतस्कन्धः/अध्ययनं/मूलं

(૧૨) **औपपातिक**- मूलं

(૧૩) **राजप्रश्नीय**- मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(૧૪) **जीवाजीवाभिगम-** ★प्रतिपत्तिः/★ उद्देशकः/मूलं
આ આગમમાં ઉક્ત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે प्रतिपत्तिः પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -३-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(૧૫) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं
પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(૧૬) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(૧૭) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं
આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(૧૮) **जम्बूद्वीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(१९) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं
આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સૂત્રકારે ઓળખાવેલા છે. જેમાં વર્ગ-૧, निरयावलिका, વર્ગ-૨ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशपयन्ना)** मूलं

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

क्रम	आगमसूत्र	मूलं	गाथा	क्रम	आगमसूत्र	मूलं	गाथा
१.	आचार	५५२	१४७	२४.	चतुःशरण	६३	६३
२.	सूत्रकृत	८०६	७२३	२५.	आतुरप्रत्याख्यान	७१	७०
३.	स्थान	१०१०	१६९	२६.	महाप्रत्याख्यानं	१४२	१४२
४.	समवाय	३८३	९३	२७.	भक्तपरिज्ञा	१७२	१७२
५.	भगवती	१०८७	११४	२८.	तंदुलवैचारिक	१६१	१३९
६.	ज्ञाताधर्मकथा	२४१	५७	२९.	संस्तारक	१३३	१३३
७.	उपासक दशा	७३	१३	३०.	गच्छाचार	१३७	१३७
८.	अन्तकृद्दशा	६२	१२	३१.	गणिविद्या	८२	८२
९.	अनुत्तरोपपातिक	१३	४	३२.	देवेन्द्रस्तव	३०७	३०७
१०.	प्रश्नव्याकरण	४७	१४	३३.	मरणसमाधि	६६४	६६४
११.	विपाकश्रुत	४७	३	३४.	निशीष	१४२०	–
१२.	औपपातिक	७७	३०	३५.	बृहत्कल्प	२१५	–
१३.	राजप्रश्निय	८५	–	३६.	व्यवहार	२८५	–
१४.	जीवाभिगम	३९८	९३	३७.	दशाश्रुतस्कन्ध	११४	५६
१५.	प्रज्ञापना	६२२	२३१	३८.	जीतकल्प	१०३	१०३
१६.	सूर्यप्रज्ञप्ति	२१४	१०३	३९.	महानिशीथ	१५२८	८
१७.	चन्द्रप्रज्ञप्ति	२१८	१०७	४०.	आवश्यक	९२	२१
१८.	जम्बूदीपप्रज्ञप्ति	३६५	१३१	४१.	ओघनिर्युक्ति	११६५	११६५
१९.	निरयावलिका	२१	–	४१.	पिण्डनिर्युक्ति	७१२	७१२
२०.	कल्पवतंसिका	५	१	४२.	दशवैकालिक	५४०	५१५
२१.	पुष्पिता	११	२	४३.	उत्तराध्ययन	१७३१	१६४०
२२.	पुष्पचूलिका	३	१	४४.	नन्दी	१६८	९३
२३.	वण्हिदशा	५	१	४५.	अनुयोगद्वार	३५०	१४१

નોંધ :- ઉક્ત गाथा સંખ્યાનો સમાવેશ मूलं માં થઈ જ જાય છે. તે मूल સિવાયની અલગ गाथा સમજવી નહીં. मूल શબ્દ એ અમો सूत्र અને गाथा બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. गाथा બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ सूत्रના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—: અમારા પ્રકાશનો :—

[૧] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[३] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[४] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[५] कृदन्तमाला
[६] चैत्यवन्दन पर्वमाला
[७] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[८] चैत्यवन्दन चोविशी
[९] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[१०] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ – ૧– શ્રાવક કર્તવ્ય - ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ – ૨– શ્રાવક કર્તવ્ય - ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ – ૩– શ્રાવક કર્તવ્ય - ૧૬ થી ૩૬
[૧૪] નવપદ - શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ - સૂત્ર - પદ્ય - આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ - બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ - બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો - [આવૃત્તિ - ચાર]
[૨૬] અભિનવ જૈન પંચાંગ - ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧૦

પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[४२]	आयारो	[आगमसुत्ताणि-१]	पढमं अंगसुत्तं
[४३]	सूयगडो	[आगमसुत्ताणि-२]	बीअं अंगसुत्तं
[४४]	ठाणं	[आगमसुत्ताणि-३]	तइयं अंगसुत्तं
[४५]	समवाओ	[आगमसुत्ताणि-४]	चउत्थं अंगसुत्तं
[४६]	विवाहपन्नति	[आगमसुत्ताणि-५]	पंचमं अंगसुत्तं
[४७]	नायाधम्मकहाओ	[आगमसुत्ताणि-६]	छट्ठं अंगसुत्तं
[४८]	उवासगदसाओ	[आगमसुत्ताणि-७]	सत्तमं अंगसुत्तं
[४९]	अंतगडदसाओ	[आगमसुत्ताणि-८]	अट्ठमं अंगसुत्तं
[५०]	अनुत्तोववाइयदसाओ	[आगमसुत्ताणि-९]	नवमं अंगसुत्तं
[५१]	पण्हावागरणं	[आगमसुत्ताणि-१०]	दसमं अंगसुत्तं
[५२]	विवागसूयं	[आगमसुत्ताणि-११]	एक्षरसमं अंगसुत्तं
[५३]	उववाइयं	[आगमसुत्ताणि-१२]	पढमं उवंगसुत्तं
[५४]	रायप्पसेणियं	[आगमसुत्ताणि-१३]	बीअं उवंगसुत्तं
[५५]	जीवाजीवाभिगमं	[आगमसुत्ताणि-१४]	तइयं उवंगसुत्तं
[५६]	पन्नवणासुत्तं	[आगमसुत्ताणि-१५]	चउत्थं उवंगसुत्तं
[५७]	सूरपन्नतिः	[आगमसुत्ताणि-१६]	पंचमं उवंगसुत्तं
[५८]	चंदपन्नत्तिः	[आगमसुत्ताणि-१७]	छट्ठं उवंगसुत्तं
[५९]	जंबूद्दीवपन्नति	[आगमसुत्ताणि-१८]	सत्तमं उवंगसुत्तं
[६०]	निरयावलियाणं	[आगमसुत्ताणि-१९]	अट्ठमं उवंगसुत्तं
[६१]	कप्पवडिंसियाणं	[आगमसुत्ताणि-२०]	नवमं उवंगसुत्तं
[६२]	पुप्फियाणं	[आगमसुत्ताणि-२१]	दसमं उवंगसुत्तं
[६३]	पुप्फचूलियाणं	[आगमसुत्ताणि-२२]	एक्षरसमं उवंगसुत्तं
[६४]	वण्हिदसाणं	[आगमसुत्ताणि-२३]	बारसमं उवंगसुत्तं
[६५]	चउसरणं	[आगमसुत्ताणि-२४]	पढमं पईण्णगं
[६६]	आउरपच्चक्खाणं	[आगमसुत्ताणि-२५]	बीअं पईण्णगं
[६७]	महापच्चक्खाणं	[आगमसुत्ताणि-२६]	तीइयं पईण्णगं
[६८]	भत्तपरिण्णा	[आगमसुत्ताणि-२७]	चउत्थं पईण्णगं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[६९]	तंदुलवेयालियं	[आगमसुत्ताणि-२८]	पंचमं पईण्णगं
[७०]	संथारगं	[आगमसुत्ताणि-२९]	छट्ठं पईण्णगं
[७१]	गच्छायार	[आगमसुत्ताणि-३०/१]	सत्तमं पईण्णगं-१
[७२]	चंदावेज्झयं	[आगमसुत्ताणि-३०/२]	सत्तमं पईण्णगं-२
[७३]	गणिविज्जा	[आगमसुत्ताणि-३१]	अट्ठमं पईण्णगं
[७४]	देविंदत्थओ	[आगमसुत्ताणि-३२]	नवमं पईण्णगं
[७५]	मरणसमाहि	[आगमसुत्ताणि-३३/१]	दसमं पईण्णगं-१
[७६]	वीरत्थव	[आगमसुत्ताणि-३३/२]	दसमं पईण्णगं-२
[७७]	निसीह	[आगमसुत्ताणि-३४]	पढमं छेयसुत्तं
[७८]	बुहत्कप्पो	[आगमसुत्ताणि-३५]	बीअं छेयसुत्तं
[७९]	ववहार	[आगमसुत्ताणि-३६]	तइयं छेयसुत्तं
[८०]	दसासुयक्खंधं	[आगमसुत्ताणि-३७]	चउत्थं छेयसुत्तं
[८१]	जीयकप्पो	[आगमसुत्ताणि-३८/१]	पंचमं छेयसुत्तं-१
[८२]	पंचकप्पभास	[आगमसुत्ताणि-३८/२]	पंचमं छेयसुत्तं-२
[८३]	महानिसीहं	[आगमसुत्ताणि-३९]	छट्ठं छेयसुत्तं
[८४]	आवसस्सयं	[आगमसुत्ताणि-४०]	पढमं मूलसुत्तं
[८५]	ओहनिज्जुत्ति	[आगमसुत्ताणि-४१/१]	बीअं मूलसुत्तं-१
[८६]	पिंडनिज्जुत्ति	[आगमसुत्ताणि-४१/२]	बीअं मूलसुत्तं-२
[८७]	दसवेयालियं	[आगमसुत्ताणि-४२]	तइयं मुलसुत्तं
[८८]	उत्तरज्झयणं	[आगमसुत्ताणि-४३]	चउत्थं मूलसुत्तं
[८९]	नंदीसूयं	[आगमसुत्ताणि-४४]	पढमा चूलिया
[९०]	अनुओगदारं	[आगमसुत्ताणि-४५]	बितिया चूलिया

પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[૯૧]	આયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	પહેલું અંગસૂત્ર
[૯૨]	સૂયગડ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	બીજું અંગસૂત્ર
[૯૩]	ઠાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ત્રીજું અંગસૂત્ર
[૯૪]	સમવાય -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ચોથું અંગસૂત્ર
[૯૫]	વિવાહપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૨]	પાંચમું અંગસૂત્ર
[૯૬]	નાયાધમ્મકહા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	છઠ્ઠું અંગસૂત્ર
[૯૭]	ઉવાસગદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	સાતમું અંગસૂત્ર
[૯૮]	અંતગડદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	આઠમું અંગસૂત્ર
[૯૯]	અનુત્તરોપપાતિકદસા-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	નવમું અંગસૂત્ર
[૧૦૦]	પણ્હાવાગરણ-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	દશમું અંગસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૦૧]	વિવાગસૂય -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	અગિયારમું અંગસૂત્ર
[૧૦૨]	ઉવવાઇય	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	પહેલું ઉપાંગસૂત્ર
[૧૦૩]	રાયપ્પસેણિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	બીજું ઉપાંગસૂત્ર
[૧૦૪]	જીવાજીવાભિગમ -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ત્રીજું ઉપાંગસૂત્ર
[૧૦૫]	પન્નવણાસુત્ત	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ચોથું ઉપાંગસૂત્ર
[૧૦૬]	સૂરપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	પાચમું ઉપાંગસૂત્ર
[૧૦૭]	ચંદપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	છઠ્ઠું ઉપાંગસૂત્ર
[૧૦૮]	જંબુદ્દીવપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	સાતમું ઉપાંગસૂત્ર
[૧૦૯]	નિરયાવલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	આઠમું ઉપાંગસૂત્ર
[૧૧૦]	કપ્પવડિંસિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	નવમું ઉપાંગસૂત્ર
[૧૧૧]	પુપ્ફિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	દશમું ઉપાંગસૂત્ર
[૧૧૨]	પુપ્ફચૂલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	અગિયારમું ઉપાંગસૂત્ર
[૧૧૩]	વણ્હિદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	બારમું ઉપાંગસૂત્ર
[૧૧૪]	ચઉસરણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલો પયન્નો
[૧૧૫]	આઉરપ્પચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજો પયન્નો
[૧૧૬]	મહાપચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજો પયન્નો
[૧૧૭]	ભત્તપરિણ્ણા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથો પયન્નો
[૧૧૮]	તંદુલવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમો પયન્નો
[૧૧૯]	સંથારગ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠો પયન્નો
[૧૨૦]	ગચ્છાયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૧
[૧૨૧]	ચંદાવેજ્ઝય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૨
[૧૨૨]	ગણિવિજ્જા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	આઠમો પયન્નો
[૧૨૩]	દેવિંદત્થઓ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	નવમો પયન્નો
[૧૨૪]	વીરત્થવ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	દશમો પયન્નો
[૧૨૫]	નિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલું છેદસૂત્ર
[૧૨૬]	બુહતકપ્પ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજું છેદસૂત્ર
[૧૨૭]	વવહાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજું છેદસૂત્ર
[૧૨૮]	દસાસુયક્ખંધ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથું છેદસૂત્ર
[૧૨૯]	જીયકપ્પો -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમું છેદસૂત્ર
[૧૩૦]	મહાનિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠું છેદસૂત્ર
[૧૩૧]	આવસ્સય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	પહેલું મૂલસુત્ર
[૧૩૨]	ઓહનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૧
[૧૩૩]	પિંડનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૨
[૧૩૪]	દસવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	ત્રીજું મુલસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૩૫] ઉત્તરજ્ઝયણ - ગુજરાતી અનુવાદ [આગમદીપ-૭] ચોથું મૂલસુત્ર
[૧૩૬] નંદીસુત્તં - ગુજરાતી અનુવાદ [આગમદીપ-૭] પહેલી ચૂલિકા
[૧૩૭] અનુયોગદ્ધાર - ગુજરાતી અનુવાદ [આગમદીપ-૭] બીજી ચૂલિકા

પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.

[૧૩૮] દીક્ષા યોગાદિ વિધિ
[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ
[१४०] आचाराङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१
[१४१] सूत्रकृताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-२
[१४२] स्थानाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-३
[१४३] समवायाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-४
[१४४] भगवतीअङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-५/६
[१४५] ज्ञाताधर्मकथाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४६] उपासकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४७] अन्तकृद्दशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४८] अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४९] प्रश्नव्याकरणाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१५०] विपाकश्रुताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५१] औपपातिकउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५२] राजप्रश्नियउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५३] जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-९
[१५४] प्रज्ञापनाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१०/११
[१५५] सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५६] चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५७] जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१३
[१५८] निरयावलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१५९] कल्पवतंसिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६०] पुष्पिताउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६१] पुष्पचूलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६२] वण्हिदसाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६३] चतुःशरणप्रकीर्णकसूत्र सटीकं आगमसुत्ताणि सटीकं-१४
[१६४] आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६५] महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१६६] भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१६७]	तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६८]	संस्तारकप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१६९]	गच्छाचारप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१७०]	गणिविद्याप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७१]	देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७२]	मरणसमाधिप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७३]	निशीथछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१५-१६-१७
[१७४]	बृहत्कल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१८-१९-२०
[१७५]	व्यवहारछेदसूत्रं सटीकं	आगगम सुत्ताणि सटीकं-२१-२२
[१७६]	दशाश्रुतस्कन्धछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७७]	जीतकल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७८]	महानिशीथसूत्रं (मूलं)	आगमसुत्ताणि सटीकं-२३
[१७९]	आवश्यकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२४-२५
[१८०]	ओघनिर्युक्तिमूलसूत्रं सटीकं	आगम सुत्तामि सटीकं-२६
[१८१]	पिण्डनिर्युक्तिमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२६
[१८२]	दशवैकालिकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२७
[१८३]	उत्तराध्ययनमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२८-२९
[१८४]	नन्दी-चूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०
[१८५]	अनुयोगद्वारचूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०

પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

–: સંપર્ક સ્થળ :–

'આગમ આરાધના કેન્દ્ર'

શીતલનાથ સોસાયટી-વિભાગ-૧, ફ્લેટ નં-૧૩, ૪થે માળે

શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, બ્હાઈ સેન્ટર, ખાનપુર

અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

आगमसुत्ताणि	समाविष्टाआगमाः
भाग-१	आयार
भाग-२	सूत्रकृत
भाग-३	स्थान
भाग-४	समवाय
भाग-५-६	भगवती (अपरनाम व्याख्याप्रज्ञप्ति)
भाग-७	ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण
भाग-८	विपाकश्रुत, औपपातिक, राजप्रश्निय
भाग-९	जीवाजीवाभिगम
भाग-१०-११	प्रज्ञापना
भाग-१२	सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति
भाग-१३	जम्बूद्वीपप्रज्ञप्ति
भाग-१४	निरयावलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चतुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा, तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि
भाग-१५-१६-१७	नीशीथ
भाग-१८-१९-२०	बृहत्कल्प
भाग-२१-२२	व्यवहार
भाग-२३	दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ
भाग-२४-२५	आवश्यक
भाग-२६	ओघनिर्युक्ति, पिण्डनिर्युक्ति
भाग-२७	दशवैकालिक
भाग-२८-२९	उत्तराध्ययन
भाग-३०	नन्दी, अनुयोगद्वार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org